Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated AUG 1993

But thought nor word can seize eternal truth

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमहाभारत

॥ सौप्तिकपर्व्व ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं। देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्।

॥ सञ्जय उवाच॥ ततस्ते सहिता वीराः प्रयाता दक्षिणमुखाः। उपास्तमनवेलायां शिविराभ्यास ॒गताः।
विमुच्य वाहांस्त्वरिता भीताः समभवंस्तदा। गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते।
सेनानिवेशमभितो नातिदूरमवस्थिताः। निकृत्ता निशितैः शस्त्रैः समन्तात् क्षतविक्षताः।
दीर्घमुष्णञ्च निश्वस्य पाण्डवानन्वचिन्तयन्। श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणां।
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन् पुनः। ते मुहूर्त्तात्ततो गत्वा श्रान्तवाहाः पिपासिताः।
नामृष्यन्त महेष्वासाः क्रोधामर्षवशङ्गताः। राज्ञो वधेन सन्तप्ता मुहूर्त्तं समवस्थिताः।
॥ धृतराष्ट्र उवाच॥ अश्रद्धेयमिदं कर्म्म कृतं भीमेन सञ्जय। यत्स नागायुतप्राणः पुत्रो मम निपातितः।
अवध्यः सर्व्वभूतानां वज्रसंहननो युवा। पाण्डवैः समरे पुत्रो निहतो मम सञ्जय।
नादिष्टमभ्यतिक्रान्तुं शक्यं गावल्गणे नरैः। यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः।
अद्रिसारमयं नूनं हृदयं मम सञ्जय। हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा।
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति। न ह्यहं पाण्डवेयस्य विषये वस्तुमुत्सहे।
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय। प्रेष्यभूतः प्रवर्त्तेयं पाण्डवेयस्य शासनात्।
आज्ञाप्य पृथिवीं सर्व्वां स्थित्वा मूर्द्धनि सञ्जय। येन पुत्रशतं पूर्णमेकेन निहतं मम।
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः। अकुर्व्वता वचस्तेन मम पुत्रेण सञ्जय।
कथमस्य भविष्यामि प्रेष्यभूतो दुरन्तकृत्। कथं भीमस्य वाक्यानि श्रोतुं शक्यानि सञ्जय।
अधर्म्मेण हते तात पुत्रे दुर्य्योधने मम। कृतवर्म्मा कृपो द्रौणिः किमकुर्व्वत सञ्जय।
॥ सञ्जय उवाच॥ गत्वा तु तावका राजन्नातिदूरमवस्थिताः। अपश्यन्त वनं घोरं नानाद्रुमलतावृतं।
ते मुहूर्त्तन्तु विश्रम्य लब्धतोयैर्हयोत्तमैः। सूर्य्यास्तमनवेलायां समासेदुर्महद्वनं।
नानामृगगणैर्जुष्टं नानापक्षिगणावृतं। नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नानातिथैः समाकीर्णं नानापुष्पोपशोभितं । पद्मिनीशतसञ्छन्नं नीलोत्पलसमायुतं । २०
प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः । शाखासहस्रसञ्छन्नं न्यग्रोधं ददृशुस्ततः ।
उपेत्य तु तदा राजन् न्यग्रोधं ते महारथाः । ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिं ।
तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः । उपस्पृश्य यथान्यायं सन्ध्यामन्वासत प्रभो ।
ततोऽस्तं पर्व्वतश्रेष्ठमनुप्राप्ते दिवाकरे । सर्व्वस्य जगतो धात्री शर्व्वरी समपद्यत ।
ग्रहनक्षत्रताराभिः सम्पूर्णाभिरलङ्कृतं । नभोंऽशुकमिवाभाति प्रेक्षणीयं समन्ततः । २५
इच्छया ते प्रवल्गन्ति ये सत्त्वा रात्रिचारिणः । दिवाचराश्च ये सत्त्वास्ते निद्रावशमागताः ।
रात्रिञ्चराणां सत्त्वानां निर्घोषोऽभूत्सुदारुणः । क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्व्वरी ।
तस्मिन्रात्रिमुखे घोरे दुःखशोकसमन्विताः । कृतवर्म्मा कृपो द्रौणिरुपोपविविशुः समं ।
तत्रोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः । तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयं ।
निद्रया च परीताङ्गा निषेदुर्द्धरणीतले । श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः । ३०
ततो निद्रावशं प्राप्तौ कृपभोजौ महारथौ । सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ।
तौ तु सुप्तौ महाराज श्रमशोकसमन्वितौ । महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ।
क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत । न वै स्म स जगामाथ निद्रां सर्प इव श्वसन् ।
न लेभे स तु निद्रां वै दह्यमानो हि मन्युना । वीक्षाञ्चक्रे महाबाहुस्तद्वनं घोरदर्शनं ।
वीक्षमाणो वनोद्देशं नानासत्त्वैर्निषेवितं । अपश्यत महाबाहुर्न्यग्रोधं वायसैर्वृतं । ३५
तत्र काकसहस्राणि तां निशां पर्य्यनाययन् । सुखं स्वपन्ति कौरव्य पृथक्पृथगुपाश्रयाः ।
सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः । सोऽपश्यत् सहसायान्तमुलूकं घोरदर्शनं ।
महास्वनं महाकायं हर्य्यक्षं बभ्रुपिङ्गलं । सुदीर्घघोणानखरं सुपर्णमिव वेगितं ।
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः । न्यग्रोधस्य ततः शाखां प्रार्थयामास भारत ।
सन्निपत्य तु शाखायां न्यग्रोधस्य विहङ्गमः । प्राप्तान् जघान सुबहून् वायसान् वायसान्तकः । ४०
केषाञ्चिदच्छिनत्पक्षांश्छिरांसि च चकर्त्त ह । चरणांश्चैव केषाञ्चिद्बभञ्ज चरणायुधः ।
क्षणेनाहन्य बलवान् येऽस्य दृष्टिपथे स्थिताः । तेषां शरीरावयवैः शरीरैश्च विशाम्पते ।
न्यग्रोधमण्डलं सर्व्वं सञ्छन्नं सर्व्वतोऽभवत् । तांस्तु हत्वा ततः काकान् कौशिको मुदितोऽभवत् ।
प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः । तद्दृष्ट्वा सोपधं कर्म्म कौशिकेन कृतं निशि ।
तद्भावे कृतसङ्कल्पो द्रौणिरेकोऽनुचिन्तयत् । उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षपणे युक्तः प्राप्तः कालश्च मे मतः । नाद्य शक्या मया हन्तुं पाण्डवा जितकाशिनः । ४५
बलवन्तः कृतोत्साहाः प्राप्तलक्षाः प्रहारिणः । राज्ञः सकाशात्तेषान्तु प्रतिज्ञातो वधो मया ।
पतङ्गाग्निसमां वृत्तिमास्थायात्मविनाशिनीं । न्यायतो युध्यमानस्य प्राणत्यागो न संशयः ।
छद्मना च भवेत् सिद्धिः शत्रूणाञ्च क्षयो महान् । ततः संशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

ते जना बहु मन्यन्ते ये च शास्त्रविशारदाः। यच्चाप्यत्र भवेद्वाक्यं गर्हितं लोकनिन्दितं। ५०
कर्त्तव्यं तन्मनुष्येण क्षत्त्रधर्म्मेण वर्त्तता। निन्दितानि च सर्व्वाणि कुत्सितानि पदे पदे।
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः। अस्मिन्नर्थे पुरा गीताः श्रूयन्ते धर्म्मचिन्तकैः।
श्लोका न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः। परिश्रान्ते विदीर्णे वा भुञ्जाने वाऽपि शत्रुभिः।
प्रस्थाने वा प्रवेशे वा प्रहर्त्तव्यं रिपोर्ब्बलं। निद्रार्त्तमर्द्धरात्रे च तथा नष्टप्रणायकं।
भिन्नयोधं बलं यच्च द्विधा युक्तञ्च यद्भवेत्। इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे। ५५
पाण्डूनां सह पाञ्चालैर्द्रोणपुत्त्रः प्रतापवान्। स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः।
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च। तौ प्रबुद्धौ महात्मानौ कृपभोजौ महाबलौ।
नोत्तरं प्रतिपद्येतां तत्र युक्तं ह्रिया वृतौ। स मुहूर्त्तमिव ध्यात्वा वाष्पविक्लवमब्रवीत्।
हतो दुर्य्योधनो राजा एकवीरो महाबलः। यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह।
एकाकी बहुभिः क्षुद्रैराहवे शुद्धविक्रमः। पातितो भीमसेनेन एकादशचमूपतिः। ६०
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतं। मूर्द्धाभिषिक्तस्य शिरः पादेन परिमृद्नता।
विनर्द्दन्ति च पाञ्चालाः क्ष्वेलन्ति च हसन्ति च। धमन्ति शङ्खान् शतशो हृष्टा घ्नन्ति च दुन्दुभीन्।
वादित्रघोषस्तुमुलो विमिश्रः शङ्खनिःस्वनैः। अनिलेनेरितो घोरो दिशः पूरयतीव ह।
अश्वानां हेषमाणानां गजानाञ्चैव बृंहतां। सिंहनादश्च शूराणां श्रूयते सुमहानयं।
दिशं प्राचीं समाश्रित्य हृष्टानां गच्छतां भृशं। रथनेमिस्वनाश्चैव श्रूयन्ते लोमहर्षणाः। ६५
पाण्डवैर्धार्त्तराष्ट्राणां यदिदं कदनङ्कृतं। वयमेव त्रयः शिष्टा अस्मिन्महति वैशसे।
केचिन्नागशतप्राणाः केचित् सर्व्वास्त्रकोविदाः। निहताः पाण्डवेयैस्ते मन्ये कालस्य पर्य्ययं।
एवमेतेन भाव्यं हि नूनं कार्य्येण तत्त्वतः। यथा ह्यस्येदृशी निष्ठा कृते कार्य्येऽपि दुष्करे।
भवतोस्तु यदि प्रज्ञा न मोहादपनीयते। व्यापन्नेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यतां।
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिमन्त्रणायां प्रथमोऽध्यायः॥ १ ॥
॥ कृप उवाच ॥ श्रुतन्ते वचनं सर्व्वं यद्यदुक्तं त्वया विभो। ममापि तु वचः किञ्चिच्छृणुष्वाद्य महाभुज। ७०
आबद्धा मानुषाः सर्व्वे निबद्धाः कर्म्मणोर्द्वयोः। दैवे पुरुषकारे च परं ताभ्यां न विद्यते।
नहि दैवेन सिध्यन्ति कार्य्याण्येकेन सत्तम। न चापि कर्म्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः।
ताभ्यामुभाभ्यां सर्व्वार्था निबद्धा अधमोत्तमाः। प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्व्वशः।
पर्ज्जन्यः पर्व्वते वर्षन् किन्नु साधयते फलं। कृष्टे क्षेत्रे तथा वर्षन् किं न साधयते फलं।
उत्थानञ्चापि दैवस्य ह्यनुत्थानञ्च दैवतं। व्यर्थं भवति सर्व्वत्र पूर्व्वस्तत्र विनिश्चयः। ७५
सुवृष्टे च यथा दैवे सम्यक् क्षेत्रे च कर्षिते। वीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी।
तयोर्द्दैवं विनिश्चित्य स्ववशञ्चैव प्रवर्त्तते। प्राज्ञाः पुरुषकारे तु वर्त्तन्ते दाक्ष्यमाश्रिताः।
ताभ्यां सर्व्वे हि कार्य्यार्था मनुष्याणां नरर्षभ। विचेष्टन्तः स्म दृश्यन्ते निवृत्तास्तु तथैव च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृतः पुरुषकारश्च सोऽपि दैवेन सिध्यति। तथाऽस्य कर्म्मणः कर्त्तुरभिनिर्व्वर्त्तते फलं।
उत्थानञ्च मनुष्याणां दक्षाणां दैववर्ज्जितं। अफलं दृश्यते लोके सम्यगप्युपपादितं। ८०
तत्रालसा मनुष्याणां ये भवन्त्यमनस्विनः। उत्थानन्ते विगर्हन्ति प्राज्ञानान्तन्न रोचते।
प्रायशो हि कृतं कर्म्म नाफलं दृश्यते भुवि। अकृत्वा च पुनर्दुःखं कर्म्म पश्येन्महाफलं।
चेष्टामकुर्व्वँल्लभते यदि किञ्चिद्यदृच्छया। यो वा न लभते कृत्वा दुर्द्दशौ तावुभावपि।
शक्नोति जीवितुं दक्षो नालसः सुखमेधते। दृश्यन्ते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः।
यदि दक्षः समारम्भात् कर्म्मणो नाश्नुते फलं। नास्य वाच्यं भवेत् किञ्चित् लब्धव्यं वाऽधिगच्छति। ८५
अकृत्वा कर्म्म यो लोके फलं विन्दति धिष्ठितः। स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः।
एवमेतदनादृत्य वर्त्तते यस्त्वतोऽन्यथा। स करोत्यात्मनोऽनर्थानेष बुद्धिमतां नयः।
हीनं पुरुषकारेण यदा दैवेन वा पुनः। कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत्।
हीनं पुरुषकारेण कर्म्मत्विह न सिध्यति। दैवतेभ्यो नमस्कृत्य यस्त्वर्थान् सम्यगीहते।
दक्षो दाक्षिण्यसम्पन्नो न स मोघैर्व्विहन्यते। सम्यगीहा पुनरियं यो वृद्धानुपसेवते। ९०
आपृच्छति च यच्छ्रेयः करोति च हितं वचः। उत्थायोत्थाय हि सदा प्रष्टव्या वृद्धसम्मताः।
ते स्म योगे परं मूलं तन्मूला सिद्धिरुच्यते। वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत्।
उत्थानस्य फलं सम्यक् तदा स लभते चिरात्। रागात् क्रोधाद्भयाल्लोभाद्योऽर्थानीहेत मानवः।
अनीशश्चावमानी च स शीघ्रं भ्रश्यते श्रियः। सोऽयं दुर्य्योधनेनार्थो लुब्धेनादीर्घदर्शिना।
असमर्थः समारब्धो मूढत्वादपि चिन्तितः। हितबुद्धीननादृत्य संमन्त्र्यासाधुभिः सह। ९५
वार्य्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः। पूर्व्वमप्यतिदुःशीलो न धैर्य्यं कर्त्तुमर्हति।
तपत्यर्थे विपन्ने हि मित्राणां न कृतं वचः। अनुवर्त्तामहे यत्तु तं वयं पापपूरुषं।
अस्मानप्यनयस्तस्मात् प्राप्तोऽयं दारुणो महान्। अनेन तु ममाद्यापि व्यसनेनोपतापितः।
बुद्धिश्चिन्तयतः किञ्चित् स्वंश्रेयो नावबुध्यते। मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः।
तत्रास्य बुद्धिर्व्विनयस्तत्र श्रेयश्च पश्यति। ततोऽस्य मूलं कार्य्याणां बुद्ध्या निश्चित्य वै बुधाः। १००
तेऽत्र पृष्टा यथा ब्रूयुस्तत्कर्त्तव्यं तथा भवेत्। ते वयं धृतराष्ट्रञ्च गान्धारीञ्च समेत्य ह।
उपपृच्छामहे गत्वा विदुरञ्च महामतिं। ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनन्तरं।
तदस्माभिः पुनः कार्य्यं इतिमे नैष्ठिकी मतिः। अनारम्भात्तु कार्य्याणां नार्थः सम्पद्यते क्वचित्।
कृते पुरुषकारे तु येषां कार्य्यं न सिध्यति। दैवेनोपहतास्ते तु नात्र कार्य्या विचारणा।
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिकृपसंवादे द्वितीयोऽध्यायः ॥ २ ॥
॥ सञ्जय उवाच ॥ कृपस्य वचनं श्रुत्वा धर्म्मार्थसहितं शुभं। अश्वत्थामा महाराज दुःखशोकसमन्वितः। १०५
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा। क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत।
पुरुषे पुरुषे बुद्धिर्या या भवति शोभना। तुष्यन्ति च पृथक् सर्व्वे प्रज्ञया ते स्वया स्वया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरं। सर्व्वस्यात्मा बहुमतः सर्व्वात्मानं प्रशंसति।
सर्व्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता। परबुद्धिञ्च निन्दन्ति स्वां प्रशंसन्ति चासकृत्।
कारणान्तरयोगेन योगे येषां समागतिः। अन्योन्येन च तुष्यन्ति बहुमन्यन्ति चासकृत्। ११०
तस्यैव तु मनुष्यस्य सा सा बुद्धिस्तदा तदा। कालयोगे विपर्य्यासं प्राप्यान्योन्यं विपद्यते।
विचित्रत्वात्तु चित्तानां मनुष्याणां विशेषतः। चित्तवैकल्यमासाद्य सा सा बुद्धिः प्रजायते।
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि। भैषज्यं कुरुते योगात् प्रशमार्थमिति प्रभो।
एवं कार्य्यस्य योगार्थं बुद्धिं कुर्व्वन्ति मानवाः। प्रज्ञया हि स्वया युक्तास्ताञ्च निन्दन्ति मानवाः।
अन्यया यौवने मर्त्त्यो बुद्ध्या भवति मोहितः। मध्येऽन्यया जरायान्तु सोऽन्यां रोचयते मतिं। ११५
व्यसनं वा महाघोरं समृद्धिञ्चापि तादृशीं। अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतिं।
एकस्मिन्नेव पुरुषे सा सा बुद्धिस्तदा तदा। भवत्यकृतकर्म्मत्वात् सा तस्यैव न रोचते।
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति। तया प्रकुरुते भावं सा तस्योद्योगकारिका।
सर्व्वो हि पुरुषो भोज साध्वेतदिति निश्चितः। कर्त्तुमारभते प्रीतो मारणादिषु कर्म्मसु।
सर्व्वे हि बुद्धिमाज्ञाय प्रज्ञाञ्चापि स्वकां नराः। चेष्टन्ते विविधाश्चेष्टा हितमित्येव जानते। १२०
उपजाता व्यसनजा येयमद्य मतिर्म्मम। युवयोस्तां प्रवक्ष्यामि मम शोकविनाशिनीं।
प्रजापतिः प्रजाः सृष्ट्वा कर्म्म तासु विधाय च। वर्णे वर्णे समाधत्ते ह्येकैकं गुणभाग्गुणं।
ब्राह्मणे वेदमग्र्यन्तु क्षत्त्रिये तेज उत्तमं। दाक्ष्यं वैश्ये च शूद्रे च सर्व्ववर्णानुकूलता।
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्त्रियोऽधमः। अदक्षो निन्द्यते वैश्यः शूद्रश्च प्रतिकूलवान्।
सोऽस्मि जातः कुलश्रेष्ठे ब्राह्मणानां सुपूजिते। मन्दभाग्यतयास्म्येनं क्षत्त्रधर्म्ममनुष्ठितः। १२५
क्षत्त्रधर्म्मं विदित्वाऽहं यदि ब्राह्मणमाश्रितः। प्रकुर्य्यां सुमहत् कर्म्म न मे तत् साधुसम्मतं।
धारयंश्च धनुर्द्दिव्यं दिव्यान्यस्त्राणि चाहवे। पितरं निहतं दृष्ट्वा किं नु वक्ष्यामि संसदि।
सोऽहमद्य यथाकामं क्षत्त्रधर्म्ममुपास्य तं। गन्ताऽस्मि पदवीं राज्ञः पितुश्चापि महात्मनः।
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः। विमुक्तयुग्यकवचा हर्षेण च समन्विताः।
जयं मत्वात्मनश्चैव श्रान्ता व्यायामकर्षिताः। तेषां निशि प्रसुप्तानां सुस्थानां शिविरे स्वके। १३०
अवस्कन्दं करिष्यामि शिविरस्याद्य दुष्करं। तानवस्कन्द्य शिविरे प्रेतभूतान् विचेतसः।
सूदयिष्यामि विक्रम्य मघवानिव दानवान्। अद्य तान् सहितान् सर्व्वान् धृष्टद्युम्नपुरोगमान्।
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः। निहत्य चैव पाञ्चालान् शान्तिं लब्धाऽस्मि सत्तम।
पाञ्चालेषु भविष्यामि सूदयन्नद्य संयुगे। पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव।
अद्याहं सर्व्वपाञ्चालान्निहत्य च निकृत्य च। अर्द्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा। १३५
अद्याहं सर्व्वपाञ्चालैः कृत्वा भूमिं शरीरिणीं। प्रहृत्यैकैकशस्तेषु भविष्याम्यनृणः पितुः।
दुर्य्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि। गमयिष्यामि पाञ्चालान् पदवीमद्य दुर्गमां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि । न चिरात् प्रमथिष्यामि पशोरिव शिवो बलात् ।
अद्य पाञ्चालपाण्डूनां शयितानात्मजान्निशि । खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम ।
अद्य पाञ्चालसेनान्तां निहत्य निशि सौप्तिके । कृतकृत्यः सुखी चैव भविष्यामि महामते । १४०
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिमन्त्रणायां तृतीयोऽध्यायः ॥ ३ ॥
॥ कृप उवाच ॥ दिष्ट्या ते प्रतिकर्त्तव्ये मतिर्यातेयमच्युत । न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयं ।
अनुयास्यावहे त्वान्तु प्रभाते सहितावुभौ । अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ।
अहं त्वामनुयास्यामि कृतवर्म्मा च सात्वतः । परानभिमुखं यान्तं रथावास्थाय दंशितौ ।
आवाभ्यां सहितः शत्रून् श्वो निहन्ता समागमे । विक्रम्य रथिनां श्रेष्ठ पाञ्चालान् सपदानुगान् ।
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमां । चिरन्ते जाग्रतस्तात स्वप तावन्निशामिमां । १४५
विश्रान्तस्य विनिद्रस्य सुस्थचित्तस्य मानद । समेत्य समरे शत्रून् वधिष्यसि न संशयः ।
नहि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधं । जेतुमुत्सहते शश्वदपि देवेषु वासवः ।
कृपेण सहितं यान्तं गुप्तञ्च कृतवर्म्मणा । को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ।
ते वयं निशि विश्रान्ता विनिद्रा विगतज्वराः । प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ।
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः । सात्वतोऽपि महेष्वासो नित्यं युद्धेषु कोविदः । १५०
ते वयं सहितास्तात सर्व्वान् शत्रून् समागतान् । प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलां ।
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखं । अहञ्च कृतवर्म्मा च त्वां प्रयान्तं नरोत्तमं ।
अनुयास्याव सहितौ धन्विनौ परतापनौ । रथिनं त्वरया यान्तं रथमास्थाय दंशितौ ।
स गत्वा शिविरं तेषां नाम विश्राव्य चाहवे । ततः कर्त्ताऽसि शत्रूणां युध्यतां कदनं महत् ।
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि । विहरस्व यथा शक्रः सूदयित्वा महासुरान् । १५५
त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीं । दैत्यसेनामिव क्रुद्धः सर्व्वदानवसूदनः ।
मया त्वां सहितं संख्ये गुप्तञ्च कृतवर्म्मणा । न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयं ।
न चाहं समरे तात कृतवर्म्मा न चैव हि । अनिर्ज्जित्य रणे पाण्डूंश्च यास्यामि कर्हिचित् ।
हत्वा च समरे क्रुद्धान् पाञ्चालान् पाण्डुभिः सह । निवर्त्तिष्यामहे सर्व्वे हता वा स्वर्गगा वयं ।
सर्व्वोपायैः सहायास्ते प्रभाते वयमाहवे । सत्यमेतन्महाबाहो प्रब्रवीमि तवानघ । १६०
एवमुक्तस्ततो द्रौणिर्म्मातुलेन हितं वचः । अब्रवीन्मातुलं राजन् क्रोधसंरक्तलोचनः ।
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च । अर्थांश्चिन्तयतश्चापि कामयानस्य वा पुनः ।
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयं । यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत् ।
किं नाम दुःखं लोकेऽस्मिन् पितुर्व्वधमनुस्मरन् । हृदयं निर्द्दहन् मेऽद्य रात्र्यहानि न शाम्यति ।
यथा च निहतः पापैः पिता मम विशेषतः । प्रत्यक्षमपि ते सर्व्वं तन्मे मर्म्माणि कृन्तति । १६५
कथं हि मादृशो लोके मुहूर्त्तमपि जीवति । द्रोणो हतेति यद्वाचः पाञ्चालानां शृणोम्यहं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

धृष्टद्युम्नमहत्वा तु नाहं जीवितुमुत्सहे। स मे पितुर्व्वधाद्वध्यः पाञ्चाला ये च सङ्गताः।
विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः। स पुनर्हृदयं कस्य क्रूरस्यापि न निर्द्दहेत्।
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत्। नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः।
यश्चायं मित्रपक्षो मे मयि जीवति निर्ज्जितः। शोकं मे वर्द्धयत्येव वारिवेग इवार्णवं। १००
एकाग्रमनसो मे च कुतो निद्रा कुतः सुखं। वासुदेवार्ज्जुनाभ्यां च तानहं परिरक्षितान्।
अविषह्यतमान्मन्ये महेन्द्रेणापि सत्तम। न चापि शक्तः संयन्तुं कोपमेतं समुत्थितं।
तं न पश्यामि लोकेऽस्मिन् यो मां कोपान्निवर्त्तयेत्। तथैवं निश्चिता बुद्धिरेषा साधुमता मम।
वार्त्तिकैः कथ्यमानस्तु मित्राणां मे पराभवः। पाण्डवानाञ्च विजयो हृदयं दहतीव मे।
अहन्तु कदनं कृत्वा शत्रूणामद्य सौप्तिके। ततो विश्रमिता चैव स्वप्ता च विगतज्वरः। १०५
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिमन्त्रणायां चतुर्थोऽध्यायः॥ ४॥
॥ कृप उवाच॥ शुश्रूषुरपि दुर्म्मेधाः पुरुषो नियतेन्द्रियः। नालं वेदयितुं कृत्स्नौ धर्म्मार्थाविति मे मतिः।
तथैव तावन्मेधावी विनयं यो न शिक्षते। न च किञ्चन जानाति सोऽपि धर्म्मार्थनिश्चयं।
चिरं ह्यपि जडः शूरः पण्डितं पर्य्युपास्य ह। न स धर्म्मान् विजानाति दर्व्वी सूपरसानिव।
मुहूर्त्तमपि तं प्राज्ञः पण्डितं पर्य्युपास्य हि। क्षिप्रं धर्म्मान् विजानाति जिह्वा सूपरसानिव।
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः। जानीयादागमान् सर्व्वान् ग्राह्यं न च विरोधयेत्। ११०
अनेयस्त्ववमानी यो दुरात्मा पापपूरुषः। दिष्टमुत्सृज्य कल्याणं करोति बहु पापकं।
नाथवन्तन्तु सुहृदः प्रतिषेधन्ति पातकात्। निवर्त्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्त्तते।
यथा ह्युच्चावचैर्व्वाक्यैः क्षिप्तचित्तो नियम्यते। तथैव सुहृदा शक्यो न शक्यस्त्ववसीदति।
तथैव सुहृदं प्राज्ञं कुर्व्वाणं कर्म्म पापकं। प्राज्ञाः सम्प्रतिषेधन्ति यथाशक्ति पुनः पुनः।
स कल्याणे मनः कृत्वा नियम्यात्मानमात्मना। कुरु मे वचनं तात येन पश्चान्न तप्यते। ११५
न वधः पूज्यते लोके सुप्तानामिह धर्म्मतः। तथैवापास्तशस्त्राणां विमुक्तरथवाजिनां।
ये च ब्रूयुस्तवास्मीति ये च स्युः शरणागताः। विमुक्तमूर्द्धजा ये च ये चापि हतवाहनाः।
अद्य स्वप्स्यन्ति पाञ्चाला विमुक्तकवचा विभो। विश्वस्ता रजनीं सर्व्वे प्रेता इव विचेतसः।
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः। व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लवे।
सर्व्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः। न च ते जातु लोकेऽस्मिन् सुसूक्ष्ममपि किल्बिषं। १२०
त्वं पुनः सूर्य्यसङ्काशः श्वोभूत उदिते रवौ। प्रकाशे सर्व्वभूतानां विजेता युधि शात्रवान्।
असम्भावितरूपं हि त्वयि कर्म्म विगर्हितं। शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्म्मम।
॥ अश्वत्थामोवाच॥ एवमेव यथात्थ त्वं मातुलेह न संशयः। तैस्तु पूर्व्वमयं सेतुः शतधा विदलीकृतः।
प्रत्यक्षं भूमिपालानां भवतश्चापि सन्निधौ। न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः।
कर्णश्च पतिते चक्रे रथस्य रथिनाम्वरः। उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना। १२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तथा शान्तनवो भीष्मो न्यस्तशस्त्रो निरायुधः। शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना।
भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे। क्रोशतां भूमिपालानां युयुधानेन पातितः।
दुर्य्योधनश्च भीमेन समेत्य गदया रणे। पश्यतां भूमिपालानामधर्म्मेण निपातितः।
एकाकी बहुभिस्तत्र परिवार्य्य महारथैः। अधर्म्मेण नरव्याघ्रो भीमसेनेन पातितः।
विलापो भग्नसक्थस्य यो मे राज्ञः परिश्रुतः। वार्त्तिकानां कथयतां स मे मर्म्माणि कृन्तति। १००
एवञ्चाधार्म्मिकाः पापाः पाञ्चाला भिन्नसेतवः। तानेवं भिन्नमर्य्यादान् किं भवान्न विगर्हति।
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके। कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै।
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितं। तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखं।
न स जातः पुमाल्लोके कश्चिन्न स भविष्यति। यो मे व्यावर्त्तयेदेतां बधे तेषां कृतां मतिं।
॥ सञ्जय उवाच ॥ एवमुक्त्वा महाराज द्रोणपुत्त्रः प्रतापवान्। एकान्ते योजयित्वाऽश्वान् प्रायादभिमुखः परान्। १०५
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ। किमर्थं स्यन्दनो युक्तः किञ्च कार्य्यञ्चिकीर्षितं।
एकसार्थप्रयातौ स्वस्त्वया सह नरर्षभ। समदुःखसुखौ चापि नावां शङ्कितुमर्हसि।
अश्वत्थामा तु संक्रुद्धः पितुर्ब्बधमनुस्मरन्। ताभ्यां तथ्यं तथाचख्यौ यदस्यात्मचिकीर्षितं।
हत्वा शतसहस्राणि योधानां निशितैः शरैः। न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः।
तं तथैव हनिष्यामि न्यस्तवर्म्माणमद्य वै। पुत्त्रं पाञ्चालराजस्य पापं पापेन कर्म्मणा। ११०
कथञ्च निहतः पापः पाञ्चाल्यः पशुवन्मया। शस्त्रेण विजिताल्लोकान्नाप्नुयादिति मे मतिः।
क्षिप्रं सन्नद्धकवचौ सखड्गावात्तकार्म्मुकौ। मामास्थाय प्रतीक्षेतां रथवर्य्यौ परन्तपौ।
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान्। तमन्वयात् कृपो राजन् कृतवर्म्मा च सात्वतः।
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः। हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः।
ययुश्च शिबिरं तेषां सम्प्रसुप्तजनं विभो। द्वारदेशन्तु सम्प्राप्य द्रौणिस्तस्थौ महारथः। ११५
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिगमने पञ्चमोऽध्यायः॥ ५॥
॥ धृतराष्ट्र उवाच॥ द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ। अकुर्व्वतां भोजकृपौ किं सञ्जय वदस्व मे।
॥ सञ्जय उवाच॥ कृतवर्म्माणमामन्त्र्य कृपञ्च स महारथः। द्रौणिर्म्मन्युपरीतात्मा शिबिरद्वारमागमत्।
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिं। सोऽपश्यद्द्वारमाश्रित्य तिष्ठन्तं लोमहर्षणं।
वसानं चर्म्म वैयाघ्रं महारुधिरविस्रवं। कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनं।
बाहुभिः स्वायतैः पीनैर्नानाप्रहरणोद्यतैः। बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननं। १२०
दंष्ट्राकरालवदनं व्यादितास्यं भयानकं। नयनानां सहस्रैस्तु विचित्रैरभिभूषितं।
नैव तस्य वपुः शक्यं प्रवक्तुं वेश एव च। सर्व्वथा तु तदालक्ष्य स्फुटेयुरपि पर्व्वताः।
तस्यास्यनासिकाभ्याञ्च श्रवणाभ्याञ्च सर्व्वशः। तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन् महार्च्चिषः।
तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः। प्रादुरासन् हृषीकेशाः शतशोऽथ सहस्रशः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

तदत्यद्भुतमालोक्य भूतं लोकभयङ्करं। द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत्। २२५
द्रौणिमुक्ताञ्छरांस्तांस्तु तद्भूतं महदग्रसत्। उदधेरिव वार्य्योघान् पावको वडवामुखः।
अग्रसत्तांस्तथा भूतं द्रौणिना प्रहिताञ्छरान्। अश्वत्थामा तु सम्प्रेक्ष्य शरौघांस्तान्निरर्थकान्।
रथशक्तिं मुमोचास्मै दीप्तामग्निशिखामिव। सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्य्यत।
युगान्ते सूर्य्यमाहत्य महोल्केव दिवश्च्युता। अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसं।
कोशात् समुद्ववर्हाशु बिलाद्दीप्तमिवोरगं। ततः खड्गवरं धीमान् भूताय प्राहिणोत्तदा। २३०
स तदासाद्य भूतं वै विलं नकुलवद्ययौ। ततः स कुपितो द्रौणिरिन्द्रकेतुनिभां गदां।
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत्। ततः सर्व्वायुधाभावे वीक्षमाणस्ततस्ततः।
अपश्यत् कृतमाकाशमनाकाशं जनार्द्दनैः। तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः।
अब्रवीदतिसन्तप्तः कृपवाक्यमनुस्मरन्। ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः।
स शोचत्यापदं प्राप्य यथाऽहमतिवर्त्य तौ। शास्त्रदृष्टानविद्वान् यः समतीत्य जिघांसति। २३५
स पथः प्रच्युतो धर्म्मात् कुपथे प्रतिहन्यते। गोब्राह्मणनृपस्त्रीषु सख्युर्म्मातुर्गुरोस्तथा।
हीनप्राणजडान्धेषु सुप्तभीतोत्थितेषु च। मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत्।
इत्येवं गुरुभिः पूर्व्वमुपादिष्टं नृणां सदा। सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनं।
अमार्गेणैवमारभ्य घोरामापदमागतः। ताञ्चापदं घोरतरां प्रवदन्ति मनीषिणः।
यदुद्यम्य महत् कृत्यं भयादपि निवर्त्तते। अशक्तश्चैव तत् कर्त्तुं कर्म्म शक्तिबलादिह। २४०
न हि दैवाद्गरीयो वै मानुषं कर्म्म कथ्यते। मानुष्यं कुर्व्वतः कर्म्म यदि दैवान्न सिध्यति।
स पथः प्रच्युतो धर्म्याद्विपदं प्रतिपद्यते। प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः।
यदारभ्य क्रियां काञ्चिद्भयादिह निवर्त्तते। तदिदं दुष्प्रणीतेन भयं मां समुपस्थितं।
न हि द्रोणसुतः संख्ये निवर्त्तेत कथञ्चन। इदञ्च सुमहद्भूतं दैवदण्डमिवोद्यतं।
न चैतदभिजानामि चिन्तयन्नपि सर्व्वथा। ध्रुवं येयमधर्म्मे मे प्रवृत्ता कलुषा मतिः। २४५
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते। तदिदं दैवविहितं मम संख्ये निवर्त्तनं।
नान्यत्र दैवादुद्यन्तुमिह शक्यं कथञ्चन। सोऽहमद्य महादेवं प्रपद्ये शरणं विभुं।
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति। कपर्द्दिनं देवदेवमुमापतिमनामयं।
कपालमालिनं रुद्रं भगनेत्रहरं हरं। स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च।
तस्माच्छरणमभ्येमि गिरिशं शूलपाणिनं। २५०

इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिचिन्तायां षष्ठोऽध्यायः॥ ६ ॥

॥ सञ्जय उवाच ॥ एवं सञ्चिन्तयित्वा तु द्रोणपुत्रो विशाम्पते। अवतीर्य्य रथोपस्थाद्दैवेशं प्रणतः स्थितः।
॥ द्रौणिरुवाच ॥ उग्रं स्थाणुं शिवं रुद्रं शर्व्वमीशानमीश्वरं। गिरिशं वरदं देवं भवभावनमीश्वरं।
शितिकण्ठमजं शुक्रं दक्षक्रतुहरं हरं। विश्वरूपं विरूपाक्षं बहुरूपमुमापतिं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्मशानवासिनं दृप्तं महागणपतिं विभुं। खट्वाङ्गधारिणं रुद्रं जटिलं ब्रह्मचारिणं।
मनसा सुविशुद्धेन दुष्करेणाल्पचेतसा। सोऽहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनं। १५५
स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससं। विलोहितं नीलकण्ठमसह्यं दुर्निवारणं।
शक्रं ब्रह्मसृजं ब्रह्म ब्रह्मचारिणमेव च। व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिं।
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियं। धनाध्यक्षं क्षितिमुखं गौरीहृदयवल्लभं।
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनं। तनुवाससमत्युग्रमुमाभूषणतत्परं।
परं परेभ्यः परमं परं यस्मान्न विद्यते। इष्वस्त्रोत्तमभर्त्तारं दिगन्तं देशरक्षिणं। १६०
हिरण्यकवचं देवं चन्द्रमौलिविभूषणं। प्रपद्ये शरणं देवं परमेण समाधिना।
इमाञ्चेदापदं घोरां तराम्यद्य सुदुष्करां। सर्व्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिं।
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्म्मणः। पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः।
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत। स दिशो विदिशः खञ्च ज्वालाभिरिव पूरयन्।
दीप्तास्यनयनाश्चात्र नैकपादशिरोभुजाः। रत्नचित्राङ्गदधराः समुद्यतकरास्तथा। १६५
द्विपशैलप्रतीकाशाः प्रादुरासन् महागणाः। श्ववराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः।
ऋक्षमार्ज्जारवदना व्याघ्रद्वीपिमुखास्तथा। काकवक्त्राः प्लवमुखाः शुकवक्त्रास्तथैव च।
महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः। दार्व्वाघाटमुखाश्चापि चासवक्त्राश्च भारत।
कूर्म्मनक्रमुखाश्चैव शिशुमारमुखास्तथा। पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च।
हरिवक्त्राः क्रौञ्चमुखाः कपोतिभमुखास्तथा। महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च। १७०
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः। निर्म्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत।
तथैवाशिरसो राजनृक्षवक्त्राश्च भारत। प्रदीप्तनेत्रजिह्वाश्च ज्वालाकर्णास्तथैव च।
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः। मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप।
शङ्खाभाः शङ्खवक्त्राश्च शङ्खकर्णास्तथैव च। शङ्खमालाः परिकराः शङ्खध्वनिसमस्वनाः।
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः। चतुर्द्दंष्ट्राश्चतुर्जिह्वाः शङ्कुकर्णाः किरीटिनः। १७५
मौञ्जीधराश्च राजेन्द्र तथा कुञ्चितमूर्द्धजाः। उष्णीषिणो मुकुटिनश्चारुवक्त्राः स्वलङ्कृताः।
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः। माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः।
शतघ्नीवज्रहस्ताश्च तथा मुषलपाणयः। भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत।
पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा। सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः।
महापाशोद्यतकरास्तथा लगुडपाणयः। स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः। १८०
महासर्पाङ्गदधराश्चित्राभरणधारिणः। रजोध्वजाः पङ्कदिग्धाः सर्व्वे शुक्लाम्बरस्रजः।
नीलाङ्गाः पिङ्गलाङ्गाश्च मुण्डवक्त्रास्तथैव च। भेरीशङ्खमृदङ्गांश्च झर्झरानकगोमुखान्।
अवादयन् पारिषदाः प्रहृष्टाः कनकप्रभाः। गायमानास्तथैवान्ये नृत्यमानास्तथाऽपरे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

लङ्घयन्तः प्लवन्तश्च वल्गन्तश्च महारथाः। धावन्तो जवना मुण्डाः पवनोद्धूतमूर्द्धजाः।
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः। सुभीमा घोररूपाश्च शूलपट्टिशपाणयः। २८५
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः। रत्नचित्राङ्गदधराः समुद्यतकरास्तथा।
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः। पातारोऽसृग्वसौघानां मांसान्त्रकृतभोजनाः।
चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः। अतिह्रस्वातिदीर्घाश्च प्रलम्बाश्चातिभैरवाः।
विकटाः काललम्बोष्ठा बृहच्छेफाण्डपिण्डिकाः। महार्हनानाविकटा मुण्डाश्च जटिलाः परे।
सार्केन्दुग्रहनक्षत्रां द्यां कुर्य्युस्ते महीतले। उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्व्विधं। २९०
ये च वीतभया नित्यं हरस्य भ्रुकुटीसहाः। कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः।
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः। प्राप्याष्टगुणमैश्वर्य्यं ये न यास्यन्ति वै स्मयं।
येषां विस्मयते नित्यं भगवान् कर्म्मभिर्हरः। मनोवाक्कर्म्मभिर्युक्तैर्नित्यमाराधितश्च यैः।
मनोवाक्कर्म्मभिर्भक्तान् पाति पुत्त्रानिवौरसान्। पिवन्तोऽसृग्वसाश्चान्ये क्रुद्धा ब्रह्मद्विषां सदा।
चतुर्व्विधात्मकं सोमं ये पिवन्ति च सर्व्वदा। श्रुतेन ब्रह्मचर्य्येण तपसा च दमेन च। २९५
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः। यैरात्मभूतैर्भगवान् पार्व्वत्या च महेश्वरः।
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः। नानावादित्रहसितक्ष्वेडितोत्क्रुष्टगर्ज्जितैः।
संत्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः। संस्तुवन्तो महादेवं भाः कुर्व्वाणाः सुवर्च्चसः।
विवर्द्धयिषवो द्रौणेर्म्महिमानं महात्मनः। जिज्ञासमानास्तत्तेजः सौप्तिकञ्च दिदृक्षवः।
भीमोग्रपरिघालातशूलपट्टिशपाणयः। घोररूपाः समाजग्मुर्भूतसंघाः समन्ततः। ३००
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात्। तान् प्रेक्षमाणोऽपि व्यथां न चकार महाबलः।
अथ द्रौणिर्द्धनुष्पाणिर्व्बद्धगोधाङ्गुलित्रवान्। स्वयमेवात्मनात्मानमुपहारमुपाहरत्।
धनूंषि समिधस्तत्र पवित्राणि शिताः शराः। हविरात्मवतश्चात्मा तस्मिन् भारत कर्म्मणि।
ततः सौम्येन मन्त्रेण द्रोणपुत्त्रः प्रतापवान्। उपहारं महामन्युरथात्मानमुपाहरत्।
तं रुद्रं रौद्रकर्म्माणं रौद्रैः कर्म्मभिरच्युतं। अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः। ३०५
॥ द्रौणिरुवाच ॥ इममात्मानमद्याहं जातमाङ्गिरसे कुले। स्वग्नौ जुहोमि भगवन् प्रतिगृह्णीष्व मां बलिं।
भवद्भक्त्या महादेव परमेण समाधिना। अस्यामापदि विश्वात्मन्नुपाकुर्म्मि तवाग्रतः।
त्वयि सर्व्वाणि भूतानि सर्व्वभूतेषु चासि व। गुणानां हि प्रधानानामेकत्वं त्वयि तिष्ठति।
सर्व्वभूताश्रय विभो हविर्भूतमवस्थितं। प्रतिगृहाण मां देव यद्यशक्याः परे मया।
इत्युक्त्वा द्रौणिरास्थाय तां वेदीं दीप्तपावकां। सन्त्यज्यात्मानमारुह्य कृष्णवर्त्मन्युपाविशत्। ३१०
तमूर्द्ध्वबाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितं। अब्रवीद्भगवान् साक्षान्महादेवो हसन्निव।
सत्यशौचार्ज्जवत्यागैस्तपसा नियमेन च। क्षान्त्या मत्या च धृत्या च बुद्ध्या च वचसा तथा।
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्म्मणा। तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुर्व्वता तात सम्मानं त्वाञ्च जिज्ञासता मया। पाञ्चालाः सहसा गुप्ता मायाश्च बहुशः कृताः।
कृतस्तस्यैव सम्मानः पाञ्चालान्रचता मया। अभिभूतास्तु कालेन नैषामद्यास्ति जीवितं।
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुं। आविवेश ददौ चास्मै विमलं खड्गमुत्तमं।
अथाविष्टो भगवता भूयो जज्वाल तेजसा। वेगवांश्चाभवद्युद्धे देवसृष्टेन तेजसा।
तमदृश्यानि भूतानि रचांसि च समाद्रवन्। अभितः शत्रुशिविरं यान्तं साचादिवेश्वरं।
इति श्रीमहाभारते सौप्तिकपर्व्वणि द्रौणिशिवार्चने सप्तमोऽध्यायः॥ ७॥
॥ धृतराष्ट्र उवाच॥ ततः प्रयाते शिविरं द्रोणपुत्त्रे महारथे। कच्चित् कृपश्च भोजश्च भयार्त्तौ न व्यवर्त्ततां।
कच्चिन्न वारितौ चुद्रै रचिभिर्नोपलचितौ। असह्यमिति मन्वानौ न निवृत्तौ महारथौ।
कच्चिदुन्मथ्य शिविरं हत्वा सोमकपाण्डवान्। दुर्य्योधनस्य पदवीं गतौ परमिकां रणे।
पाञ्चालैर्निहतौ वीरौ कच्चित्तु स्वपतां चितौ। कच्चित्ताभ्यां कृतं कर्म्म तन्ममाचच्व सञ्जय।
॥ सञ्जय उवाच॥ तस्मिन् प्रयाते शिविरं द्रोणपुत्त्रे महात्मनि। कृपश्च कृतवर्म्मा च शिविरद्वार्य्यतिष्ठतां।
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ। प्रहृष्टः शनकैराजन्निदं वचनमब्रवीत्।
यत्तौ भवन्तौ पर्य्याप्तौ सर्व्वचत्त्रस्य नाशने। किं पुनर्य्योधशेषस्य प्रसुप्तस्य विशेषतः।
अहं प्रवेच्ये शिविरं चरिष्यामि च कालवत्। यथा न कश्चिदपि वां जीवन्मुच्येत मानवः।
तथा भवद्भ्यां कार्य्यं स्यात् इति मे निश्चिता मतिः। इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिविरं महत्।
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः। स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह।
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत्। ते तु कृत्वा महत् कर्म्म श्रान्ताश्च बलवद्रणे।
प्रसुप्ताश्चैव विश्वस्ताः समेत्य परिधाविताः। अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत।
पाञ्चाल्यं शयने द्रौणिरपश्यत् सुप्तमन्तिकात्। चौमावदाते महति स्पर्द्ध्यास्तरणसंवृते।
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते। तं शयानं महात्मानं विश्रब्धमकुतोभयं।
प्राबोधयत पादेन शयनस्थं महीपते। सम्बुध्य चरणस्पर्शादुत्थाय रणदुर्म्मदः।
अभ्यजानदमेयात्मा द्रोणपुत्त्रं महारथं। तमुत्पतन्तं शयनादश्वत्थामा महाबलः।
केशेष्वालम्ब्य पाणिभ्यां निष्पिपेष महीतले। सबलं तेन निष्पिष्टः साध्वसेन च भारत।
निद्रया चैव पाञ्चाल्यो नाशकच्चेष्टितुं तदा। तमाक्रम्य पदा राजन् कण्ठे चोरसि चोभयोः।
नदन्तं विस्फुरन्तञ्च पशुमारममारयत्। तुदन्नखैश्च स द्रौणिं नातिव्यक्तमुदाहरत्।
आचार्य्यपुत्त्र शस्त्रेण जहि मां मा चिरं कृथाः। त्वत्कृते सुकृताल्लोकान् गच्छेयं द्विपदां वर।
एवमुक्त्वा तु वचनं विरराम परन्तपः। सुतः पाञ्चालराजस्य आक्रान्तो बलिना भृशं।
तस्याव्यक्तान्तु तां वाचं संश्रुत्य द्रौणिरब्रवीत्। आचार्य्यघातिनां लोका न सन्ति कुलपांसन।
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्म्मते। एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपं।
मर्म्मस्वभ्यवधीत् क्रुद्धः पादाष्ठीलैः सुदारुणैः। तस्य वीरस्य शब्देन मार्य्यमाणस्य वेश्मनि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः । ते दृष्ट्वा धर्षयन्तन्तमतिमानुषविक्रमं ।
भूतमेवाध्यवस्यन्तो न स्म प्रव्याहरन् भयात् । तन्तु तेनाभ्युपायेन गमयित्वा यमक्षयं ।
अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनं । स तस्य भवनाद्राजन्निष्क्रम्य नादयन् दिशः । १४५
रथेन शिविरं प्रायाज्जिघांसुर्द्विषतो बली । अपक्रान्ते ततस्तस्मिन् द्रोणपुत्त्रे महारथे ।
सहितैरक्षिभिः सर्व्वैः प्रणेदुर्य्योषितस्तदा । राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ।
व्याक्रोशन् क्षत्त्रियाः सर्व्वे धृष्टद्युम्नस्य भारत । तासान्तु तेन शब्देन समीपे क्षत्त्रियर्षभाः ।
क्षिप्रञ्च समनह्यन्त किमेतदिति चाब्रुवन् । स्त्रियस्तु राजन् वित्रस्ता भारद्वाजं निरीक्ष्य ताः ।
अब्रुवन् दीनकण्ठेन क्षिप्रमाद्रवतेति वै । राक्षसो वा मनुष्यो वा नैनं जानीमहे वयं । १५०
हत्वा पाञ्चालराजानं रथमारुह्य तिष्ठति । ततस्ते योधमुख्यास्तु सहसा पर्य्यवारयन् ।
स तानापततः सर्व्वान् रुद्रास्त्रेण व्यपोथयत् । धृष्टद्युम्नञ्च हत्वा स तांश्चैवास्य पदानुगान् ।
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके । तमप्याक्रम्य पादेन कण्ठे चोरसि तेजसा ।
तथैव मारयामास विनर्द्दन्तमरिन्दमं । युधामन्युश्च सम्प्राप्तो मत्वा तं रक्षसा हतं ।
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् । तमभिद्रुत्य जग्राह क्षितौ चैनमपातयत् । १५५
विस्फुरन्तञ्च पशुवत्तथैवैनममारयत् । तथा स वीरो हत्वा तं ततोऽन्यान् समुपाद्रवत् ।
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् । स्फुरतो वेपमानांश्च शमितेव पशून्मखे ।
ततो निस्त्रिंशमादाय जघानान्यान् पृथक् पृथक् । भागशो विचरन् मार्गानसियुद्धविशारदः ।
तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् । श्रान्तान् न्यस्तायुधान् सर्व्वान् क्षणेनैव व्यपोथयत् ।
योधानश्वान् द्विपांश्चैव प्राच्छिनत्स वरासिना । रुधिरोक्षितसर्व्वाङ्गः कालसृष्ट इवान्तकः । १६०
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योत्तमेन च । आक्षेपणेन चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ।
तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः । अमानुष इवाकारो बभौ परमभीषणः ।
ये त्वजाग्रत कौरव्य तेऽपि शब्देन मोहिताः । निरीक्षमाणा अन्योन्यं दृष्ट्वा दृष्ट्वा प्रविव्यथुः ।
तद्रूपं तस्य ते दृष्ट्वा क्षत्त्रियाः शत्रुकर्षिणः । राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ।
स घोररूपो व्यचरत् कालवच्छिविरे ततः । अपश्यद्द्रौपदीपुत्त्रान् अवशिष्टांश्च सोमकान् । १६५
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः । धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशाम्पते ।
अवाकिरन् शरव्रातैर्भारद्वाजमभीतवत् । ततस्तेन निनादेन सम्प्रबुद्धाः प्रभद्रकाः ।
शिलीमुखैः शिखण्डी च द्रोणपुत्त्रं समार्द्दयन् । भारद्वाजः स तान् दृष्ट्वा शरवर्षाणि वर्षतः ।
ननाद बलवान्नादं जिघांसुस्तान्महारथः । ततः परमसंक्रुद्धः पितुर्व्वधमनुस्मरन् ।
अवरुह्य रथोपस्थात्त्वरमाणोऽभिदुद्रुवे । सहस्रचन्द्रविमलं गृहीत्वा चर्म्म संयुगे । १७०
खड्गञ्च विमलं दिव्यं जातरूपपरिष्कृतं । द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ।
ततः स नरशार्द्दूलं प्रतिविन्ध्यं महाहवे । कुक्षिदेशे ऽवधीद्राजन् स हतो न्यपतद्भुवि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रासेन विद्धा द्रौणिन्तु सुतसोमः प्रतापवान्। पुनश्चासिं समुद्यम्य द्रोणपुत्त्रमुपाद्रवत्।
सुतसोमस्य सासिं तं बाहुं छित्त्वा नरर्षभः। पुनरप्याहनत् पार्श्वे स भिन्नहृदयोऽपतत्।
नाकुलिस्तु शतानीको रथचक्रेण वीर्य्यवान्। दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत्। ३७५
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः। स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः।
श्रुतकर्म्मा तु परिघं गृहीत्वा समताडयत्। अभिद्रुत्य ययौ द्रौणिं सव्ये सफलके भृशं।
स तु तं श्रुतकर्म्माणमास्ये जघ्ने वरासिना। स हतो न्यपतद्भूमौ विमूढो विकृताननः।
तेन शब्देन वीरस्तु श्रुतकीर्त्तिर्म्महारथः। अश्वत्थामानमासाद्य शरवर्षैरवाकिरत्।
तस्यापि शरवर्षाणि चर्म्मणा प्रतिवार्य्य सः। सकुण्डलं शिरः कायाद्भ्राजमानमपाहरत्। ३८०
ततो भीष्मनिहन्तारं सह सर्व्वैः प्रभद्रकैः। अहनत् सर्व्वतो वीरं नानाप्रहरणैर्ब्बली।
शिलीमुखेन चान्येन भ्रुवोर्म्मध्ये समार्पयत्। स तु क्रोधसमाविष्टो द्रोणपुत्त्रो महाबलः।
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना। शिखण्डिनं ततो हत्वा क्रोधाविष्टः परन्तपः।
प्रभद्रकगणान् सर्व्वानभिदुद्राव वेगवान्। यच्च शिष्टं विराटस्य बलन्तु भृशमाद्रवत्।
द्रुपदस्य च पुत्त्राणां पौत्त्राणां सुहृदामपि। चकार कदनं घोरं दृष्ट्वा दृष्ट्वा महाबलः। ३८५
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च। न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः।
कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनां। रक्ताम्बरधरामेकां पाशहस्तां कुटुम्बिनीं।
ददृशुः कालरात्रिं ते गायमानामवस्थितां। नराश्वकुञ्जरान् पाशैर्ब्बद्ध्वा घोरैः प्रतस्थुषीं।
वहन्तीं विविधान् प्रेतान् पाशबद्धान् विमूर्द्धजान्। तथैव च सदा राजन्न्यस्तशस्त्रान् महारथान्।
स्वप्ने सुप्तान्नयन्तीं तां रात्रिष्वन्यासु मारिष। ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिञ्च सर्व्वदा। ३९०
यतः प्रभृति संग्रामः कुरुपाण्डवसेनयोः। ततः प्रभृति तां कन्यामपश्यन्द्रौणिमेव च।
तांस्तु दैवहतान् पूर्व्वं पश्चाद्द्रौणिर्व्यपातयत्। त्रासयन् सर्व्वभूतानि विनदन् भैरवान्रवेण।
तदनुस्मृत्य ते वीरा दर्शनं पूर्व्वकालिकं। इदं तदिति मन्यन्त दैवेनोपनिपीडिताः।
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः। शिविरे पाण्डवेयानां शतशोऽथ सहस्रशः।
सोऽच्छिनत् कस्यचित् पादौ जघनञ्चैव कस्यचित्। कांश्चिद्बिभेद पार्श्वेषु कालसृष्ट इवान्तकः। ३९५
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशोत्कटैः। गजाश्वमथितैश्चान्यैर्म्मही कीर्णाऽभवत् प्रभो।
क्रोशतां किमिदं कोऽयं कः शब्दः किं नु किं कृतं। एवं तेषां तथा द्रोणिरन्तकः समपद्यत।
अपेतशस्त्रसन्नाहान् सन्नद्धान् पाण्डुसृञ्जयान्। प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः।
ततस्तच्छस्त्रवित्रस्ता उत्पतन्तो भयातुराः। निद्रान्धा नष्टसंज्ञाश्च तत्र तत्र निलिल्यिरे।
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः। विनदन्तो भृशं त्रस्ताः समासीदन् परस्परं। ४००
ततो रथं पुनर्द्रौणिरास्थितो भीमनिःस्वनं। धनुष्पाणिः शरैरन्यान् प्रैषयद्वै यमक्षयं।
पुनरुत्पततश्चापि दूरादपि नरोत्तमान्। शूरान् सम्पततश्चान्यान् कालरात्र्यै न्यवेदयत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथैव स्यन्दनाग्रेण प्रमथन् स विधावति । शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ।
पुनश्च सुविचित्रेण शतचन्द्रेण चर्म्मणा । तेन चाकाशवर्णेन तथाऽचरत सोऽसिना ।
तथा स शिविरं तेषां द्रौणिराहवदुर्म्मदः । व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः । ४०५
उत्पेतुस्तेन शब्देन योधा राजन् विचेतसः । निद्रार्त्ताश्च भयार्त्ताश्च व्यधावन्तस्ततस्ततः ।
विस्वरं चुक्रुशुश्चान्ये बह्वबद्धं तथाऽवदन् । न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ।
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन् परस्परं । उत्पतन्तोऽपतन् श्रान्ताः केचित्तत्राभ्रमंस्तदा ।
पुरीषमसृजन् केचित् केचिन्मूत्रं विसुस्रुवुः । बन्धनानि च राजेन्द्र संच्छिद्य तुरगा द्विपाः ।
समं पर्य्यपतंश्चान्ये कुर्व्वन्तो महदाकुलं । तत्र केचिन्नरा भीता व्यलीयन्त महीतले । ४१०
तथैव तान्निपतितानपिषन् गजवाजिनः । तस्मिंस्तथा वर्त्तमाने रक्षांसि पुरुषर्षभ ।
हृष्टानि व्यनदन्नुच्चैर्मुदा भरतसत्तम । स शब्दः पूरितो राजन् भूतसंघैर्मुदायुतैः ।
अपूरयन्दिशः सर्व्वा दिवञ्चातिमहान् स्वनः । तेषामार्त्तस्वरं श्रुत्वा वित्रस्ता गजवाजिनः ।
मुक्ताः पर्य्यपतन्राजन् मृद्नन्तः शिविरे जनं । तैस्तत्र परिधावद्भिश्चरणोदीरितं रजः ।
अकरोच्छिविरे तेषां रजन्यां द्विगुणं तमः । तस्मिंस्तमसि संजाते प्रमूढाः सर्व्वतो जनाः । ४१५
नाजानन् पितरः पुत्रान् भ्रातॄन् भ्रातर एव च । गजो गजानतिक्रम्य निर्म्मनुष्या हया हयान् ।
अताडयंस्तथाभञ्जंस्तथामृद्नंश्च भारत । ते भग्नाः प्रपतन्ति स्म निघ्नन्तश्च परस्परं ।
न्यपातयंस्तथा चान्यान् पातयित्वा तदाऽपिषन् । विचेतसः सनिद्राश्च तमसा चावृता नराः ।
जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः । त्यक्त्वा द्वाराणि च द्वाःस्थास्तथा गुल्मानि गौल्मिकाः ।
प्राद्रवन्त यथाशक्ति कान्दिशीका विचेतसः । विप्रनष्टाश्च तेऽन्योन्यं नाजानन्त तथा विभो । ४२०
क्रोशन्तस्तातपुत्रेति दैवोपहतचेतसः । पलायतां दिशस्तेषां स्वानप्युत्सृज्य बान्धवान् ।
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः । हाहाकारञ्च कुर्व्वाणाः पृथिव्यां शेरते परे ।
तान् बुद्ध्वा रणमध्येऽसौ द्रोणपुत्रो न्यवारयत् । तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ।
शिविरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः । तांस्तु निष्पतितांस्त्रस्तान् शिविरात् जीवितैषिणः ।
कृतवर्म्मा कृपश्चैव द्वारदेशे निजघ्नतुः । विस्रस्तयन्त्रकवचान्मुक्तकेशान् कृताञ्जलीन् । ४२५
वेपमानान् क्षितौ भीतान्नैव कांश्चिदमुञ्चतां । नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिविराद्बहिः ।
कृपश्चैव महाराज हार्द्दिक्यश्चैव दुर्म्मतिः । भूयश्चैव चिकीर्षन्तौ द्रोणपुत्रस्य तौ प्रियं ।
त्रिषु देशेषु ददतुः शिविरस्य हुताशनं । ततः प्रकाशे शिविरे खड्गेन पितृनन्दनः ।
अश्वत्थामा महाराज व्यचरत् कृतहस्तवत् । कांश्चिदापततो वीरानपरांश्चैव धावतः ।
व्ययोजयत खड्गेन प्राणैर्द्विजवरोत्तमः । कांश्चिद्योधान् स खड्गेन मध्ये सञ्छिद्य वीर्य्यवान् । ४३०
अपातयद्द्रोणपुत्रः संरब्धस्तिलकाण्डवत् । विनदद्भिर्भृशायस्तैर्नराश्वद्विपदोत्तमैः ।
पतितैरभवत् कीर्णा मेदिनी भरतर्षभ । मानुषाणां सहस्रेषु हतेषु पतितेषु च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उदतिष्ठन् कबन्धानि बहून्युत्थाय चापतन्। सायुधान् साङ्गदान् बाहून् विचकर्त्त शिरांसि च।
हस्तिहस्तोपमानूरून् हस्तान् पादांश्च भारत। पृष्ठच्छिन्नान् पार्श्वच्छिन्नान् शिरश्छिन्नांस्तथा परान्।
स महात्माऽकरोद्द्रौणिः कांश्चिचापि पराङ्मुखान्। मध्यदेशे नरानन्यांश्चिच्छेदान्यांश्च कर्णतः। ४३५
अंसदेशे निहत्यान्यान् काये प्रावेशयच्छिरः। एवं विचरतस्तस्य निघ्नतः सुबहून्नरान्।
तमसा रजनी घोरा बभौ दारुणदर्शना। किञ्चित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः।
बहुना च गजाश्वेन भूरभूद्भीमदर्शना। यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे।
क्रुद्धेन द्रोणपुत्रेण सञ्छिन्नाः प्रापतन् भुवि। भ्रातॄनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः।
केचिदूचुर्न तत् क्रुद्धैर्धार्त्तराष्ट्रैः कृतं रणे। यत् कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्म्मभिः। ४४०
असान्निध्याद्धि पार्थानामिदं नः कदनं कृतं। न चासुरैर्न गन्धर्व्वैर्न यक्षैर्न च राक्षसैः।
शक्यो विजेतुं कौन्तेयो गोप्ता यस्य जनार्द्दनः। ब्राह्मण्यः सत्यवाग्दान्तः सर्व्वभूतानुकम्पकः।
न स सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिं। धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः।
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्म्मभिः। इति लालप्यमानाः स्म शेरते बहवो जनाः।
स्तनताञ्च मनुष्याणां अपरेषाञ्च कूजतां। ततो मुहूर्त्तात् प्राशाम्यत्स शब्दस्तुमुलो महान्। ४४५
शोणितव्यतिसिक्तायां वसुधायाञ्च भूमिप। तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत।
स चेष्टमानानुद्विग्नान्निरुत्साहान् सहस्रशः। न्यपातयन्नरान् क्रुद्धः पशून् पशुपतिर्यथा।
अन्योन्यं सम्परिष्वज्य शयानान् द्रवतोऽपरान्। संलीनान् युध्यमानांश्च सर्व्वान् द्रौणिरपोथयत्।
दह्यमानाहुताशेन बध्यमानांश्च तेन ते। परस्परं तदा योधाननयद्यमसादनं।
तस्या रजन्यास्त्वर्द्धेन पाण्डवानां महद्बलं। गमयामास राजेन्द्र द्रौणिर्यमनिवेशनं। ४५०
निशाचराणां सत्त्वानां रात्रिः सा हर्षवर्द्धिनी। आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशं।
तत्रादृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः। खादन्तो नरमांसानि पिबन्तः शोणितानि च।
करालाः पिङ्गलाश्चैव शैलदन्ता रजस्वलाः। जटिला दीर्घशङ्खाश्च पञ्चपादा महोदराः।
पश्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः। घण्टाजालावसक्ताश्च नीलकण्ठा विभीषणाः।
सपुत्रदाराः सक्रूराः सुदुर्द्दर्शाः सुदुर्घृणाः। विविधानि च रूपाणि तत्रादृश्यन्त रक्षसां। ४५५
पीत्वा च शोणितं हृष्टाः प्रानृत्यन् गणशोऽपरे। इदं परमिदं मेध्यमिदं स्वाद्विति चाब्रुवन्।
मेदोमज्जास्थिरक्तानां वसानाञ्च भृशाशिताः। परमांसानि खादन्तः क्रव्यादा मांसजीविनः।
वसाश्चैवापरे पीत्वा पर्य्यधावन् विकुक्षिकाः। नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशनाः।
आयुधानि च तत्रासन् प्रयुतान्यर्ब्बुदानि च। रक्षसां घोररूपाणां महतां क्रूरकर्म्मणां।
मुदितानां वितृप्तानां तस्मिन्महति वैशसे। समेतानि बहून्यासन् भूतानि च जनाधिप।
प्रत्यूषकाले शिबिरात् प्रतिगन्तुमियेष सः। नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः। ४६०
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो। दुर्गमां पदवीं गत्वा विरराज जनक्षये।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

युगान्ते सर्व्वभूतानि भस्म कृत्वेव पावकः। यथाप्रतिज्ञं तत्कर्म्म कृत्वा द्रौणायणिः प्रभो।
दुर्गमां पदवीं गच्छन् पितुरासीद्गतज्वरः। यथैव संसुप्तजने शिविरे प्राविशन्निशि।
तथैव हत्वा निःशब्दे निश्चक्राम नरर्षभः। निष्क्रम्य शिविरात्तस्मात्ताभ्यां सङ्गम्य वीर्य्यवान्। ४६५
आचख्यौ कर्म्म तत् सर्व्वं हृष्टः संहर्षयन् विभो। तावयाचख्यतुस्तस्मै प्रियं प्रियकरौ तदा।
पाञ्चालान् सृञ्जयांश्चैव विनिकृत्तान् सहस्रशः। प्रीत्या चोच्चैरुदक्रोशंस्तथैवास्फोटयंस्तलान्।
एवंविधा हि सा रात्रिः सोमकानां जनक्षये। प्रसुप्तानां प्रमत्तानामासीत् सुभृशदारुणा।
असंशयं हि कालस्य पर्य्यायो दुरतिक्रमः। तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयं।
॥ धृतराष्ट्र उवाच॥ प्रागेव सुमहत् कर्म्म द्रौणिरेतन्महारथः। नाकरोदीदृशं कस्मान्मत्पुत्त्रविजये धृतः। ४७०
अथ कस्माद्धते क्षुद्रे कर्म्मेदं कृतवानसौ। द्रोणपुत्त्रो महात्मा स तन्मे शंसितुमर्हसि।
॥ सञ्जय उवाच ॥ तेषां नूनं भयान्नासौ कृतवान् कुरुनन्दन। असान्निध्याद्धि पार्थानां केशवस्य च धीमतः।
सात्यकेश्चापि कर्म्मेदं द्रोणपुत्त्रेण साधितं। को हि तेषां समक्षं तान् हन्यादपि मरुत्पतिः।
एतदीदृशकं वृत्तं राजन् सुप्तजने विभो। ततो जनक्षयं कृत्वा पाण्डवानां महात्ययं।
दिष्ट्या दिष्ट्येव चान्योन्यं समेत्योचुर्म्महारथाः। पर्य्यष्वजत्ततो द्रौणिस्ताभ्यां सम्प्रतिनन्दितः। ४७५
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमं। पाञ्चाला निहताः सर्व्वे द्रौपदेयाश्च सर्व्वशः।
सोमका मत्स्यशेषाश्च सर्व्वे विनिहता मया। इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरं।
यदि जीवति नो राजा तस्मै शंसामहे वयं।
इति श्रीमहाभारते सौप्तिकपर्व्वणि रात्रियुद्धे पाञ्चालादिवधे अष्टमोऽध्यायः॥ ८ ॥
॥ सञ्जय उवाच ॥ ते हत्वा सर्व्वपाञ्चालान् द्रौपदेयांश्च सर्व्वशः। आगच्छन् सहितास्तत्र यत्र दुर्य्योधनो हतः।
गत्वा चैनमपश्यन्त किञ्चित्प्राणं जनाधिपं। ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजं। ४८०
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसं। वमन्तं रुधिरं वक्त्रादपश्यन् वसुधातले।
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः। शालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात्।
निवारयन्तं कृच्छ्रात्तान् श्वापदांश्च चिखादिषून्। विचेष्टमानं मह्यां च सुभृशं गाढवेदनं।
तं शयानं तथा दृष्ट्वा भूमौ सुरुधिरोक्षितं। हतशिष्टास्त्रयो वीराः शोकार्त्ताः पर्य्यवारयन्।
अश्वत्थामा कृपश्चैव कृतवर्म्मा च सात्त्वतः। तैस्त्रिभिः शोणितादिग्धैर्निश्वसद्भिर्म्महारथैः। ४८५
शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः। ते तं शयानं संप्रेक्ष्य राजानमतथोचितं।
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः। ततस्तु रुधिरं हस्तैर्म्मुखान्निर्म्मृज्य तस्य हि।
रणे राज्ञः शयानस्य कृपणं पर्य्यदेवयन्।
॥ कृप उवाच॥ न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः। एकादशचमूभर्त्ता शेते दुर्य्योधनो हतः।
पश्य चामीकराभस्य चामीकरविभूषितां। गदां गदाप्रियस्येमां समीपे पतितां भुवि। ४९०
इयमेनं गदा शूरं न जहाति रणे रणे। स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पश्येमां सह वीरेण जाम्बूनदविभूषितां । शयानं शयने हर्म्ये भार्य्यां प्रीतिमतीमिव ।
योऽयं मूर्द्धाभिषिक्तानां अग्रे जातः परन्तपः । स हतो ग्रसते पांशून् पश्य कालस्य पर्य्ययं ।
येनाजौ निहता भूमावशेरत हतद्विषः । स भूमौ निहतः शेते कुरुराजः परैरयं ।
भयान्नमन्ति राजानो यस्य स्म शतसङ्घशः । स वीरशयने शेते क्रव्याद्भिः परिवारितः । ४९५
उपासत द्विजाः पूर्व्वमर्थहेतोर्यमीश्वरं । उपासते च तं ह्यद्य क्रव्यादा मांसहेतवः ।
॥ सञ्जय उवाच ॥ तं शयानं कुरुश्रेष्ठं ततो भरतसत्तम । अश्वत्थामा समालोक्य करुणं पर्य्यदेवयत् ।
आहुस्त्वां राजशार्द्दूल मुख्यं सर्व्वधनुष्मतां । धनाध्यक्षोपमं युद्धे शिष्यं सङ्कर्षणस्य च ।
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ । बलिनं कृतिनं नित्यं स च पापात्मवान्नृप ।
कालो नूनं महाराज लोकेऽस्मिन् बलवत्तरः । पश्यामो निहतं त्वाञ्च भीमसेनेन संयुगे । ५००
कथं त्वां सर्व्वधर्म्मज्ञं क्षुद्रः पापो वृकोदरः । निकृत्या हतवान्मन्दो नूनं कालो दुरत्ययः ।
धर्म्मयुद्धे ह्यधर्म्मेण समाहूयौजसा मृधे । गदया भीमसेनेन निर्भिन्ने सक्थिनी तव ।
अधर्म्मेण हतस्याजौ मृद्यमानं पदा शिरः । य उपेक्षितवान् क्षुद्रं धिक्कृष्णं धिग्युधिष्ठिरं ।
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरं । यावत् स्थास्यन्ति भूतानि निकृत्या ह्यसि पातितः ।
ननु रामोऽब्रवीद्राजन् त्वां सदा यदुनन्दनः । दुर्य्योधनसमो नास्ति गदया इति वीर्य्यवान् । ५०५
श्लाघते त्वां हि वार्ष्णेयो राजन् संसत्सु भारत । स शिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ।
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः । हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिं ।
दुर्य्योधन न शोचामि त्वामहं पुरुषर्षभ । हतपुत्रौ तु शोचामि गान्धारीं पितरञ्च ते ।
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमां । धिगस्तु कृष्णं वार्ष्णेयमर्ज्जुनञ्चापि दुर्म्मतिं ।
धर्म्मज्ञमानिनौ यौ त्वां वध्यमानमुपेक्षतां । पाण्डवाश्चापि ते सर्व्वे किं वक्ष्यन्ति नराधिप । ५१०
कथं दुर्य्योधनोऽस्माभिर्हत इत्यनपत्रपाः । धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ।
प्रायशोऽभिमुखः शत्रून् धर्म्मेण पुरुषर्षभ । हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ।
प्रज्ञाचक्षुश्च दुर्द्धर्षः कां गतिं प्रतिपत्स्यते । धिगस्तु कृतवर्म्माणं मां कृपञ्च महारथं ।
ये वयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवं । दातारं सर्व्वकामानां रक्षितारं प्रजाहितं ।
यद्वयं नानुगच्छामस्त्वां धिगस्मान्नराधमान् । कृपस्य तव वीर्य्येण मम चैव पितुश्च मे ।
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च । तव प्रसादादस्माभिः समित्रैः सह बान्धवैः । ५१५
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः । कुतश्चापीदृशं पापाः प्रवर्त्तिष्यामहे वयं ।
यादृशेन पुरस्कृत्य त्वं गतः सर्व्वपार्थिवान् । वयमेव त्रयो राजन् गच्छन्तं परमां गतिं ।
यद्वै त्वां नानुगच्छामस्तेन धक्ष्यामहे वयं । तान् स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते ।
किं नाम तद्भवेत् कर्म्म येन त्वां न व्रजाम वै । दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमां ।
हीनानां नस्त्वया राजन् कुतः शान्तिः कुतः सुखं । गत्वैव तु महाराज समेत्य च महारथान् । ५२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्व्वचनान्मम । आचार्य्यं पूजयित्वा च केतुं सर्व्वधनुष्मतां ।
हतं मयाऽद्य शंसेथा धृष्टद्युम्नं नराधिप । परिष्वजेथा राजानं वाह्लीकं सुमहारथं ।
सैन्धवं सोमदत्तञ्च भूरिश्रवसमेव च । तथा पूर्व्वगतानन्यान् स्वर्गे पार्थिवसत्तमान् ।
अस्मद्वाक्यात् परिष्वज्य संपृच्छेस्त्वमनामयं । ५२५
॥ सञ्जय उवाच ॥ इत्येवमुक्त्वा राजानं भग्नसक्थमचेतनं । अश्वत्थामा समुद्वीक्ष्य पुनर्व्वचनमब्रवीत् ।
दुर्य्योधन जीवसि त्वं वाक्यं श्रोत्रसुखं शृणु । सप्तपाण्डवतः शेषा धार्त्तराष्ट्रास्त्रयो वयं ।
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः । अहञ्च कृतवर्म्मा च कृपः शारद्वतस्तथा ।
द्रौपदेया हताः सर्व्वे धृष्टद्युम्नस्य चात्मजाः । पाञ्चाला निहताः सर्व्वे मत्स्यशेषाश्च भारत ।
कृते प्रतिकृतं पश्य हतपुत्त्रा हि पाण्डवाः । सौप्तिके शिविरं तेषां हतं सनरवाहनं । ५३०
मया च पापकर्म्माऽसौ धृष्टद्युम्नो महीपते । प्रविश्य शिविरं रात्रौ पशुमारेण मारितः ।
दुर्य्योधनस्तु तां वाचं निशम्य मनसः प्रियां । प्रतिलभ्य पुनश्चेत इदं वचनमब्रवीत् ।
न मेऽकरोत्तद्गाङ्गेयो न कर्णो न च ते पिता । यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतं ।
स च सेनापतिः क्षुद्रो हतः सार्द्धं शिखण्डिना । तेन मन्ये मघवता सममात्मानमद्य वै ।
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः सङ्गमः पुनः । इत्येवमुक्त्वा तूष्णीं स कुरुराजो महामनाः । ५३५
प्राणानुपास्रजद्वीरः सुहृदां दुःखमुत्सृजन् । अपाक्रामद्दिवं पुण्यां शरीरं क्षितिमाविशत् ।
एवं ते निधनं यातः पुत्त्रो दुर्य्योधनो नृप । अग्रे यात्वा रणे शूरः पश्चाद्विनिहतः परैः ।
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपं । पुनः पुनः प्रेक्षमाणाः स्वकानारुरुहूरथान् ।
इत्येवं द्रोणपुत्त्रस्य निशम्य करुणां गिरं । प्रत्यूषकाले शोकार्त्ताः प्राद्रवन्नगरं प्रति ।
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः । घोरो विशसनो रौद्रो राजन् दुर्म्मन्त्रिते तव । ५४०
तव पुत्त्रे गते स्वर्गं शोकार्त्तस्य ममानघ । ऋषिदत्तं प्रणष्टं तद्दिव्यदर्शित्वमद्य वै ।
॥ वैशम्पायन उवाच ॥ इति श्रुत्वा स नृपतिः पुत्त्रस्य निधनन्तदा । निश्वस्य दीर्घमुष्णञ्च ततश्चिन्तापरोऽभवत् ।
इति श्रीमहाभारते सौप्तिकपर्व्वणि दुर्य्योधनप्राणत्यागे नवमोऽध्यायः ॥ ९ ॥

॥ अथ ऐषीकपर्व्व ॥

॥ वैशम्पायन उवाच ॥ तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः । शशंस धर्म्मराजाय सौप्तिके कदनं कृतं ।
॥ सूत उवाच ॥ द्रौपदेया हता राजन् द्रुपदस्यात्मजैः सह । प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिविरे स्वके ।
कृतवर्म्मणा नृशंसेन गौतमेन कृपेण च । अश्वत्थाम्ना च पापेन हतं वः शिविरं निशि । ५४५
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः । सहस्राणि निकृन्तद्भिर्निःशेषन्ते बलं कृतं ।
छिद्यमानस्य महतो वनस्येव परश्वधैः । शुश्रुवे सुमहान् शब्दो बलस्य तव भारत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अहमेकोऽवशिष्टस्तु तस्मात् सैन्यान्महामते । मुक्तः कथञ्चिद्धर्म्मात्मन् व्यग्रस्य कृतवर्म्मणः ।
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्त्रो युधिष्ठिरः । पपात मह्यां दुर्द्धर्षः पुत्त्रशोकसमन्वितः ।
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः । भीमसेनोऽर्ज्जुनश्चैव माद्रीपुत्त्रौ च पाण्डवौ । ५५०
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा । जित्वा शत्रून् जितः पश्चात् पर्य्यदेवयदार्त्तवत् ।
दुर्व्विदा गतिरर्थानामपि ये दिव्यचक्षुषः । जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ।
हत्वा भ्रातॄन् वयस्यांश्च पितॄन् पौत्त्रान् सुहृद्गणान् । बन्धूनमात्यान् पौत्त्रांश्च जित्वा सर्व्वान् जिता वयं ।
अनर्थो ह्यर्थसङ्काशस्तथाऽनर्थोऽर्थदर्शनः । जयो यमजयाकारो जयस्तस्मात् पराजयः ।
यज्जित्वा तप्यते पश्चादापन्न इव दुर्म्मतिः । कथं मन्येत विजयं ततो जिततरः परैः । ५५५
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः । निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ।
कर्णिनालीकदंष्ट्रस्य खड्गजिह्वस्य संयुगे । चापव्यात्ताास्यरौद्रस्य ज्यातलस्वननादिनः ।
क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः । ये व्यमुच्यन्त कर्णस्य प्रमादात्त इमे हताः ।
रथह्रदं शरवर्षोर्म्मिमन्तं रत्नाचितं वाहनवाजियुक्तं । शक्त्यृष्टिमीनध्वजनागनक्रं शरासनावर्त्तमहेषुफेणं ।
संग्रामचन्द्रोदयवेगवेलं द्रोणार्णवं ज्यातलनेमिघोषं । ये तेरुरुच्चावचशस्त्रनौभिस्ते राजपुत्त्रा निहताः प्रमादात् । ५६०
न हि प्रमादात् परमस्ति कश्चिद्वधो नराणामिह जीवलोके । प्रमत्तमर्था हि नरं समन्तात् त्यजन्त्यनर्थाश्च समाविशन्ति ।
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं शरार्च्चिषं कोपमहासमीरं । महाधनुर्ज्यातलनेमिघोषं तनुत्रनानाविधशस्त्रहोमं ।
महाचमूकक्षदवाभिपन्नं महाहवे भीष्ममयाग्निदाहं । ये सेहुरात्तायुधतीक्ष्णवेगं ते राजपुत्त्रा निहताः प्रमादात् ।
न हि प्रमत्तेन नरेण शक्यं विद्या तपःश्रीर्व्विपुलं यशो वा । पश्याप्रमादेन निहत्य शत्रून् सर्व्वान्महेन्द्रं सुखमेधमानं ।
इन्द्रोपमान् पार्थिवपुत्त्रपौत्त्रान् पश्याविशेषेण हतान् प्रमादात् । तीर्त्वा समुद्रं वणिजः समृद्धा मग्नाः कुनद्यामिव हेल
मानाः ।
अमर्षितैर्ये निहताः शयाना निःसंशयन्ते त्रिदिवं प्रपन्नाः । भ्रातॄंश्च पुत्त्रांश्च हतान्निशम्य पाञ्चालराजं पितरञ्च वृद्धं । ५६५
ध्रुवं विसंज्ञा पतिता पृथिव्यां सा शोष्यते शोककृशाङ्गयष्टिः । तच्छोकजं दुःखमपारयन्ती कथं भविष्यत्युचिता सुखानां ।
पुत्त्रक्षयभ्रातृवधप्रणुन्ना प्रदह्यमानेव हुताशनेन । इत्येवमार्त्तः परिदेवयन् स राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां समातृपक्षामिति राजपुत्त्रीं । माद्रीसुतस्तत् परिगृह्य वाक्यं धर्म्मेण धर्म्मप्रतिमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः पाञ्चालराजस्य च यत्र दाराः । प्रस्थाप्य माद्रीसुतराजमीढः शोकार्द्दितस्तैः सहितः
सुहृद्भिः ।
रोरूयमाणः प्रययौ सुतानामायोधनं भूतगणानुकीर्णं । स तत् प्रविश्याशिवमुग्ररूपं ददर्श पुत्त्रान् सुहृदः सखींश्च । ५७०
भूमौ शयानान् रुधिरार्द्रगात्रान् विभिन्नदेहान् प्रहृतोत्तमाङ्गान् । स तांस्तु दृष्ट्वा भृशमार्त्तरूपो युधिष्ठिरो धर्म्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः पपात चोर्व्व्यां सगणो विसंज्ञः ।
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि युधिष्ठिरस्य शिविरदर्शने दशमोऽध्यायः ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ स दृष्ट्वा निहतान् संख्ये पुत्त्रान् पौत्त्रान् सखींस्तथा। महादुःखपरीतात्मा बभूव जनमेजय।
ततस्तस्य महान् शोकः प्रादुरासीन्महात्मनः। स्मरतः पुत्त्रपौत्त्राणां भ्रातृणां स्वजनस्य च। ५७५
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसं। सुहृदो भृशसंविग्नाः सान्त्वयाञ्चक्रिरे तदा।
ततस्तस्मिन् क्षणे काल्यो रथेनादित्यवर्च्चसा। नकुलः कृष्णया सार्द्धमुपायात् परमार्त्तया।
उपप्लव्यं गता सा तु श्रुत्वा सुमहदप्रियं। तदा विनाशं सर्व्वेषां पुत्त्राणां व्यथिताऽभवत्।
कम्पमानेव कदली वातेनाभिसमीरिता। कृष्णा राजानमासाद्य शोकार्त्ता न्यपतद्भुवि।
बभूव वदनं तस्याः सहसा शोककर्षितं। फुल्लपद्मपलाशाक्ष्यास्तमोग्रस्त इवांशुमान्। ५८०
ततस्तां पतितां दृष्ट्वा संरम्भी सत्यविक्रमः। बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः।
सा समाश्वासिता तेन भीमसेनेन भामिनी। रुदती पाण्डवं कृष्णा सह भ्रातरमब्रवीत्।
दिष्ट्या राजन्नवाप्येमामखिलां भोक्ष्यसे महीं। आत्मजान् क्षत्त्रधर्म्मेण सम्प्रदाय यमाय वै।
दिष्ट्या त्वं कुशली पार्थ मत्तमातङ्गगामिनं। अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि।
आत्मजान् क्षत्त्रधर्म्मेण श्रुत्वा शूरान्निपातितान्। उपप्लव्ये मया सार्द्धं दिष्ट्या त्वं न स्मरिष्यसि। ५८५
प्रसुप्तानां बधं श्रुत्वा द्रौणिना पापकर्म्मणा। शोकस्तपति मां पार्थ हुताशन इवाश्रयं।
तस्य पापकृतो द्रौणेर्न्न चेदद्य त्वया रणे। ह्रियते सानुबन्धस्य युधि विक्रम्य जीवितं।
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः। न चेत् फलमवाप्नोति द्रौणिः पापस्य कर्म्मणः।
एवमुक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत्। युधिष्ठिरं याज्ञसेनी धर्म्मराजं यशस्विनी।
दृष्ट्वोपविष्टां राजर्षिः पाण्डवो महिषीं प्रियां। प्रत्युवाच स धर्म्मात्मा द्रौपदीं चारुदर्शनां। ५९०
धर्म्म्यं धर्म्मेण धर्म्मज्ञे प्राप्तास्ते निधनं शुभे। पुत्त्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि।
स कल्याणि वनं दुर्गं दूरं द्रौणिरितो गतः। तस्य त्वं पातनं संख्ये कथं ज्ञास्यसि शोभने।
॥ द्रौपद्युवाच ॥ द्रोणपुत्त्रस्य सहजो मणिः शिरसि मे श्रुतः। निहत्य संख्ये तं पापं पश्येयं मणिमाहृतं।
राजन् शिरसि ते कृत्वा जीवेयमिति मे मतिः। इत्युक्त्वा पाण्डवं कृष्णा राजानञ्चारुदर्शना।
भीमसेनमथागत्य परमं वाक्यमब्रवीत्। त्रातुमर्हसि मां भीम क्षत्त्रधर्म्ममनुस्मरन्। ५९५
जहि तं पापकर्म्माणं शम्बरं मघवानिव। न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन।
श्रुतं तत् सर्व्वलोकेषु परमव्यसने यथा। द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते।
हिडिम्बदर्शने चैव तथा त्वमभवो गतिः। तथा विराटनगरे कीचकेन भृशार्द्दितां।
मामप्युद्धृतवान् कृच्छ्रात् पौलोमीं मघवानिव। यथैतान्यकृथाः पार्थ महाकर्म्माणि वै पुरा।
तथा द्रौणिममित्रघ्नं विनिहत्य सुखी भव। तस्या बहुविधं दुःखं निशम्य परिदेवितं। ६००
न चामर्षत कौन्तेयो भीमसेनो महाबलः। स काञ्चनविचित्राङ्गमारुरोह महारथं।
आदाय रुचिरञ्चित्रं समार्गणगुणं धनुः। नकुलं सारथिं कृत्वा द्रोणपुत्त्रबधे धृतः।
विस्फार्य्य सशरञ्चापं तूर्णमश्वानचोदयत्। ते हयाः पुरुषव्याघ्र चोदिता वातरंहसः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेगेन त्वरिता जग्मुर्हरयः शीघ्रगामिनः । शिविरात् स्वाद्गृहीत्वा स रथस्य पदमच्युतः ।
द्रोणपुत्त्ररथस्याशु ययौ वेगेन वीर्य्यवान् । ६०५
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि द्रौणिवधार्थभीमगमने एकादशोऽध्यायः ॥ ११ ॥
॥ वैशम्पायन उवाच ॥ तस्मिन् प्रयाते दुर्द्धर्षे यदूनामृषभस्ततः । अब्रवीत् पुण्डरीकाक्षः कुन्तीपुत्त्रं युधिष्ठिरं ।
एष पाण्डव ते भ्राता पुत्त्रशोकपरायणः । जिघांसुर्द्रौणिमाक्रन्दे एक एवाभिधावति ।
भीमः प्रियस्ते सर्व्वेभ्यो भ्रातृभ्यो भरतर्षभ । तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ।
यत्तदाचष्ट पुत्त्राय द्रोणः परपुरञ्जयः । अस्त्रं ब्रह्मशिरो नाम दहेत पृथिवीमपि ।
तन्महात्मा महाभागः केतुः सर्व्वधनुष्मतां । प्रत्यपादयदाचार्य्यः प्रीयमाणो धनञ्जयं । ६१०
तं पुत्त्रोऽप्येक एवैनमन्वयाचदमर्षणः । ततः प्रोवाच पुत्त्राय नातिहृष्टमना इव ।
विदितश्चापलं ह्यासीदात्मजस्य दुरात्मनः । सर्व्वधर्म्मविदाचार्य्यः सोऽन्वशात् स्वसुतं ततः ।
परमापद्गतेनापि न स्म तात त्वया रणे । इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ।
इत्युक्तवान् गुरुः पुत्त्रं द्रोणः पश्चादथोक्तवान् । न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ।
स तदाज्ञाय दुष्टात्मा पितुर्व्वचनमप्रियं । निराशः सर्व्वकल्याणैः शोकात् पर्य्यचरन्महीं । ६१५
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत । अवसद्द्वारकामेत्य वृष्णिभिः परमार्चितः ।
स कदाचित् समुद्रान्ते वसन् द्वारवतीमनु । एक एकं समागत्य मामुवाच हसन्निव ।
यत्तदुग्रं तपः कृष्ण चरन् सत्यपराक्रमः । अगस्त्याद्भारताचार्य्यः प्रत्यपद्यत मे पिता ।
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्व्वपूजितं । तदद्य मयि दाशार्ह यथा पितरि मे तथा ।
अस्मत्तस्तदुपादाय दिव्यमस्त्रं यदूत्तम । ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे । ६२०
स राजन् प्रीयमाणेन मयाऽप्युक्तः कृताञ्जलिः । याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ।
देवदानवगन्धर्व्वमनुष्यपतगोरगाः । न समा मम वीर्य्यस्य शतांशेनापि पिण्डिताः ।
इदं धनुरियं शक्तिरिदञ्चक्रमियं गदा । यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददामि ते ।
यच्छक्नोषि समुद्यन्तुं प्रयोक्तुमपि वा रणे । तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि ।
स सुनाभं सहस्रारं वज्रनाभमयस्मयं । वव्रे चक्रं महाभागो मत्तः स्पर्द्धन्मया सह । ६२५
गृहाण चक्रमित्युक्तो मया तु तदनन्तरं । जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना ।
न चैनमशकत् स्थानात् सञ्चालयितुमच्युत । अथैनं दक्षिणेनापि गृहीतुमुपचक्रमे ।
सर्व्वयत्नबलेनापि गृह्णन्नेवमिदं ततः । ततः सर्व्वबलेनापि यदैनं न शशाक ह ।
उद्यन्तुं वा चालयितुं द्रौणिः परमदुर्म्मनाः । कृत्वा यत्नं परिश्रान्तः संन्यवर्त्तत भारत ।
निवृत्तमनसं तस्मादभिप्रायाद्विचेतसं । अहमामन्त्र्य संविग्नमश्वत्थामानमब्रुवं । ६३०
यः सदैवमनुष्येषु प्रमाणं परमं गतः । गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ।
यः साक्षाद्देवदेवेशं शितिकण्ठमुमापतिं । द्वन्द्वयुद्धे पराजिष्णुस्तोषयामास शङ्करं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्मात् प्रियतरो नास्ति ममान्यः पुरुषो भुवि। नादेयं यस्य मे किञ्चिदपि दाराः सुतास्तथा।
तेनापि सुहृदा ब्रह्मन् पार्थेनाक्लिष्टकर्म्मणा। नोक्तपूर्व्वमिदं वाक्यं यत्त्वं मामभिभाषसे।
ब्रह्मचर्य्यं महद्घोरं तीर्त्वा द्वादशवार्षिकं। हिमवत्पार्श्वमास्थाय यो मया तपसाऽर्ज्जितः। ६३५
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत। सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः।
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे। न प्रार्थितमभून्मूढ यदिदं प्रार्थितं त्वया।
रामेणातिबलेनैतन्नोक्तपूर्व्वं कदाचन। न गदेन न शाम्बेन यदिदं प्रार्थितं त्वया।
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः। नोक्तपूर्व्वमिदं जातु यदिदं प्रार्थितं त्वया।
भारताचार्य्यपुत्त्रस्त्वं मानितः सर्व्वयादवैः। चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे। ६४०
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह। प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह।
प्रार्थितन्ते मया चक्रं देवदानवपूजितं। अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते।
त्वत्तोऽहं दुर्लभं काममनवाप्यैव केशव। प्रतियास्यामि गोविन्द शिवेनाभिवदस्व मां।
एतत् सुभीमं भीमानामृषभेण त्वया धृतं। चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते।
एतावदुक्त्वा द्रौणिर्म्मां युग्यानश्वान् धनानि च। आदायोपययौ काले रत्नानि विविधानि च। ६४५
स संरम्भी दुरात्मा च चपलः क्रूर एव च। वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः।
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि युधिष्ठिरकृष्णसंवादे द्वादशोऽध्यायः॥ १२ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा युधां श्रेष्ठः सर्व्वयादवनन्दनः। सर्व्वायुधवरोपेतमारुरोह रथोत्तमं।
युक्तं परमकाम्बोजैस्तुरगैर्हेममालिभिः। आदित्योदयवर्णस्य धुरं रथवरस्य तु।
दक्षिणामवहच्छैब्यः सुग्रीवः सव्यतोऽभवत्। पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पवलाहकौ।
विश्वकर्म्मकृता दिव्या रत्नधातुविभूषिता। उच्छ्रितेव रथे माया ध्वजयष्टिरदृश्यत। ६५०
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान्। तस्य सत्त्ववतः केतुर्भुजगारिरदृश्यत।
अथारोहद्धृषीकेशः केतुः सर्व्वधनुष्मतां। अर्ज्जुनः सत्यकर्म्मा च कुरुराजो युधिष्ठिरः।
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ। रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवं।
तावुपारोप्य दाशार्हः स्यन्दनं लोकपूजितं। प्रतोदेन जवोपेतान् परमाश्वानचोदयत्।
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमं। आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च। ६५५
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनां। प्रादुरासीन्महाञ्छब्दः पक्षिणां पततामिव।
ते समार्च्छन्नरव्याघ्राः क्षणेन भरतर्षभ। भीमसेनं महेष्वासं समनुद्रुत्य वेगिताः।
क्रोधदीप्तन्तु कौन्तेयं द्विषदर्थे समुद्यतं। नाशक्नुवन् वारयितुं समेत्यापि महारथाः।
स तेषां प्रेक्षतामेव श्रीमतां दृढधन्विनां। ययौ भागीरथीतीरं हरिभिर्भृशवेगितैः।
यत्र स्म श्रूयते द्रौणिः पुत्त्रहन्ता महात्मनां। स ददर्श महात्मानमुदकान्ते यशस्विनं। ६६०
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह। तत्रैव क्रूरकर्म्माणं घृताक्तं कुशचीरिणं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रजसा ध्वस्तमासीनं ददर्श द्रौणिमन्तिके। तमभ्यधावत् कौन्तेयः प्रगृह्य सशरं धनुः।
भीमसेनो महाबाहुस्तिष्ठ तिष्ठेति चाब्रवीत्। स दृष्ट्वा भीमधन्वानं प्रगृहीतशरासनं।
भ्रातरौ पृष्ठतश्चास्य जनार्द्दनरथे स्थितौ। व्यथितात्माऽभवद्द्रौणिः प्राप्तञ्चेदममन्यत।
स तद्दिव्यमदीनात्मा परमास्त्रमचिन्तयत्। जग्राह च स चैषीकां द्रौणिः सव्येन पाणिना। ६६५
स तामापदमासाद्य दिव्यमस्त्रमुदैरयत्। अमृष्यमाणस्तान् शूरान् दिव्यायुधधरान् स्थितान्।
अपाण्डवायेति रुषा व्यसृजद्दारुणं वचः। इत्युक्त्वा राजशार्दूल द्रोणपुत्त्रः प्रतापवान्।
सर्व्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह। ततस्तस्यामिषीकायां पावकः समजायत।
प्रधक्ष्यन्निव लोकांस्त्रीन् कालान्तकयमोपमः।
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि ब्रह्मशिरोऽस्त्रत्यागे त्रयोदशोऽध्यायः॥ १३ ॥
॥ वैशम्पायन उवाच ॥ इङ्गितेनैव दाशार्हस्तमभिप्रायमादितः। द्रौणेर्बुद्ध्वा महाबाहुरर्ज्जुनं प्रत्यभाषत। ६७०
अर्ज्जुनार्ज्जुन यद्दिव्यमस्त्रन्ते यदि वर्त्तते। द्रोणोपदिष्टं तस्यायं कालः सम्प्रति पाण्डव।
भ्रातॄणामात्मनश्चैव परित्राणाय भारत। विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणं।
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा। अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः।
पूर्व्वमाचार्य्यपुत्त्राय ततोऽनन्तरमात्मने। भ्रातृभ्यश्चैव सर्व्वेभ्यः स्वस्तीत्युक्त्वा परन्तपः।
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्व्वशः। उत्ससर्ज्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यतां। ६७५
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना। प्रजज्वाल महार्चिश्च युगान्तानलसन्निभं।
तथैव द्रोणपुत्त्रस्य तदस्त्रं तिग्मतेजसः। प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतं।
निर्घाता बहवश्चासन् पेतुरुल्काः सहस्रशः। महद्भयञ्च भूतानां सर्व्वेषां समजायत।
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशं। चचाल च मही कृत्स्ना सपर्व्वतवनद्रुमा।
ते त्वस्त्रतेजसी लोकांस्तापयन्ती व्यवस्थिते। महर्षी सहितौ तत्र दर्शयामासतुस्तदा। ६८०
नारदः सर्व्वभूतात्मा भरतानां पितामहः। उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ।
तौ मुनी सर्व्वधर्म्मज्ञौ सर्व्वभूतहितैषिणौ। दीप्तयोरस्त्रयोर्म्मध्ये स्थितौ परमतेजसौ।
तदन्तरमथाधृष्यावुपगम्य यशस्विनौ। आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ।
प्राणभृद्भिरनाधृष्यौ देवदानवसम्मतौ। अस्त्रतेजः शमयितुं लोकानां हितकाम्यया।
॥ ऋषी ऊचतुः ॥ नानाशस्त्रविदः पूर्व्वे येऽप्यतीता महारथाः। नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन। ६८५
किमिदं साहसं वीरौ कृतवन्तौ महात्ययं ॥
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि अर्ज्जुनास्त्रत्यागे चतुर्द्दशोऽध्यायः॥ १४ ॥
॥ वैशम्पायन उवाच ॥ दृष्ट्वैव नरशार्दूल तावग्निसमतेजसौ। संजहार शरं दिव्यं त्वरमाणो धनञ्जयः।
उवाच भरतश्रेष्ठ तावृषी प्राञ्जलिस्तदा। प्रयुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया।
संहृते परमास्त्रेऽस्मिन् सर्व्वानस्मानशेषतः। पापकर्म्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदत्र हितमस्माकं लोकानाञ्चैव सर्व्वथा। भवन्तौ देवसङ्काशौ तथा संमन्तुमर्हथः। ९०
इत्युक्ता संजहारास्त्रं पुनरेव धनञ्जयः। संहारो दुष्करस्तस्य देवैरपि हि संयुगे।
विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे। अशक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः।
ब्रह्मतेजोद्भवं विद्धि विसृष्टमकृतात्मना। न शक्यमावर्त्तयितुं ब्रह्मचारिव्रतादृते।
अचीर्णब्रह्मचर्य्यो यः सृष्ट्वावर्त्तयते पुनः। तदस्त्रं सानुबन्धस्य मूर्द्धानं तस्य कृन्तति।
ब्रह्मचारी व्रती चापि दुराचारमवाप्य तत्। परमव्यसनार्त्तोऽपि नार्ज्जुनोऽस्त्रं व्यमुञ्चत। ९५
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः। गुरुवर्त्ती च तेनास्त्रं सञ्जहारार्ज्जुनः पुनः।
द्रौणिरप्यथ सम्प्रेक्ष्य तावृषी पुरतः स्थितौ। न शशाक पुनर्घोरमस्त्रं संहर्त्तुमोजसा।
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे। द्रौणिर्द्दीनमना राजन् द्वैपायनमभाषत।
उत्तमव्यसनार्त्तेन प्राणत्राणमभीप्सुना। मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने।
अधर्म्मश्च कृतोऽनेन धार्त्तराष्ट्रं जिघांसता। मिथ्याचारेण भगवन् भीमसेनेन संयुगे। १००
अतः सृष्टमिदं ब्रह्मन् मयाऽस्त्रमकृतात्मना। तस्य भूयोऽद्य संहारं कर्त्तुं नाहमिहोत्सहे।
निसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदं। अपाण्डवायेति मुने ब्रह्मतेजोऽनुमन्त्र्य वै।
तदिदं पाण्डवेयानामन्तकायाभिसंहितं। अद्य पाण्डुसुतान् सर्व्वान् जीविताद्भ्रंशयिष्यति।
कृतं पापमिदं ब्रह्मन् रोषाविष्टेन चेतसा। बधमाशास्य पार्थानां मयाऽस्त्रं सृजता रणे।
॥ व्यास उवाच ॥ अस्त्रं ब्रह्मशिरस्तात विद्वान् पार्थो धनञ्जयः। उत्सृष्टवान्न रोषेण न नाशाय तवाहवे। १०५
अस्त्रमस्त्रेण तु रणे तव संशमयिष्यता। विसृष्टमर्ज्जुनेनेदं पुनश्च प्रतिसंहृतं।
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात् पितुस्तव। क्षत्रधर्म्मान्महाबाहुर्नाकम्पत धनञ्जयः।
एवं धृतिमतः साधोः सर्व्वास्त्रविदुषः सतः। सभ्रातृबन्धोः कस्मात्त्वं बधमस्य चिकीर्षसि।
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण बध्यते। समा द्वादश पर्ज्जन्यस्तद्राष्ट्रं नाभिवर्षति।
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः। न विहन्यात्तदस्त्रन्तु प्रजाहितचिकीर्षया। ११०
पाण्डवास्त्वञ्च राष्ट्रञ्च सदा संरक्ष्यमेव हि। तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज।
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः। न ह्यधर्म्मेण राजर्षिः पाण्डवो जेतुमिच्छति।
मणिञ्चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति। एतदादाय ते प्राणान् प्रतिदास्यन्ति पाण्डवाः।
॥ द्रौणिरुवाच ॥ पाण्डवैर्यानि रत्नानि यच्चान्यत् कौरवैर्द्धनं। अवाप्तमिह तेभ्योऽयं मणिर्मम विशिष्यते।
यमाबध्य भयं नास्ति शस्त्रव्याधिक्षुधाश्रयं। देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथञ्चन। ११५
नच रक्षोगणभयं न तस्करभयन्तथा। एवं वीर्य्यो मणिरयं न मे त्याज्यः कथञ्चन।
यत्तु मे भगवानाह तन्मे कार्य्यमनन्तरं। अयं मणिरयं चाहमिषीका तु पतिष्यति।
गर्भेषु पाण्डवेयानाममोघञ्चैतदुत्तमं। न च शक्तोऽस्मि भगवन् संहर्त्तुं पुनरुद्यतं।
एतदस्त्रमतश्चैव गर्भेषु विसृजाम्यहं। न च वाक्यं भगवतो न करिष्ये महामुने।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ व्यास उवाच ॥ एवं कुरु न चान्या तु बुद्धिः कार्य्या त्वयाऽनघ। गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम। ०१०
॥ वैशम्पायन उवाच ॥ ततः परममस्त्रन्तु द्रौणिरुद्यतमाहवे। द्वैपायनवचः श्रुत्वा गर्भेषु प्रमुमोच ह।
इति श्रीमहाभारते सौप्तिकपर्व्वणि ऐषीकपर्व्वणि ब्रह्मशिरोऽस्त्रस्य पाण्डवेयगर्भप्रवेशने पञ्चदशोऽध्यायः॥ १५ ॥
॥ वैशम्पायन उवाच ॥ तदाज्ञाय हृषीकेशो विसृष्टं पापकर्म्मणा। हृष्यमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा।
विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः। उपप्लव्यगतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत्।
परिक्षीणेषु कुरुषु पुत्त्रस्तव भविष्यति। एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति।
तस्य तद्वचनं साधोः सत्यमेतद्भविष्यति। परिक्षिद्भविता ह्येषां पुनर्व्वंशकरः सुतः। ०१५
एवं ब्रुवाणं गोविन्दं सात्वतां प्रवरं तदा। द्रौणिः परमसंरब्धः प्रत्युवाचेदमुत्तरं।
नैतदेव यथात्थ त्वं पक्षपातेन केशव। वचनं पुण्डरीकाक्ष न च मद्वाक्यमन्यथा।
पतिष्यति तदस्त्रं हि गर्भे तस्या मयोद्यतं। विराटदुहितुः कृष्ण यं त्वं रक्षितुमिच्छसि।
॥ श्रीभगवानुवाच ॥ अमोघपरमास्त्रस्य पातस्तस्य भविष्यति। स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति।
त्वान्तु कापुरुषं पापं विदुः सर्व्वे मनीषिणः। असकृत्पापकर्म्माणं बालजीवितघातकं। ०२०
तस्मात्त्वमस्य पापस्य कर्म्मणः फलमाप्नुहि। त्रीणि वर्षसहस्राणि चरिष्यसि महीमिमां।
अप्राप्नुवन् क्वचित् काञ्चित् सम्विदं जातु केनचित्। निर्जनानसहायस्त्वं देशान् प्रविचरिष्यसि।
भविता नहि ते क्षुद्र जनमध्येषु संस्थितिः। पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः।
विचरिष्यसि पापात्मा सर्व्वव्याधिसमन्वितः। वयः प्राप्य परिक्षित्तु वेदव्रतमवाप्य च।
कृपाच्छारद्वताच्छूरः सर्व्वास्त्राण्युपपत्स्यते। विदित्वा परमास्त्राणि क्षत्त्रधर्म्मव्रते स्थितः। ०२५
षष्टिं वर्षाणि धर्म्मात्मा वसुधां पालयिष्यति। इतश्चोर्द्धं महाबाहुः कुरुराजो भविष्यति।
परिक्षिन्नाम नृपतिर्म्मिषतस्ते सुदुर्म्मते। अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसा।
पश्य मे तपसो वीर्य्यं सत्यस्य च नराधम।
॥ व्यास उवाच ॥ यस्मादनादृत्य कृतं त्वयाऽस्मान् कर्म्म दारुणं। ब्राह्मणस्य सतश्चैव यस्मात्ते वृत्तमीदृशं।
तस्माद्यद्देवकीपुत्त्र उक्तवानुत्तमं वचः। असंशयन्ते तद्भावि क्षत्त्रधर्म्मस्त्वयाश्रितः। ०४०
॥ अश्वत्थामोवाच ॥ सहैव भवता ब्रह्मन् स्थास्यामि पुरुषेष्विह। सत्यवागस्तु भगवानयञ्च पुरुषोत्तमः।
॥ वैशम्पायन उवाच ॥ प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनां। जगाम विमनास्तेषां सर्व्वेषां पश्यतां वनं।
पाण्डवाश्चापि गोविन्दं पुरस्कृत्य हतद्विषः। कृष्णद्वैपायनञ्चैव नारदञ्च महामुनिं।
द्रोणपुत्त्रस्य सहजं मणिमादाय सत्वराः। द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीं।
॥ वैशम्पायन उवाच ॥ ततस्ते पुरुषव्याघ्राः सदश्वैरनिलोपमैः। अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव हि। ०४५
अवतीर्य्य रथाभ्यान्तु त्वरमाणा महारथाः। ददृशुर्द्रौपदीं कृष्णामार्त्तामार्त्ततराः स्वयं।
तामुपेत्य निरानन्दां दुःखशोकसमन्वितां। परिवार्य्य व्यतिष्ठन्त पाण्डवाः सहकेशवाः।
ततो राजाभ्यनुज्ञातो भीमसेनो महाबलः। प्रददौ तं मणिं दिव्यं वचनञ्चेदमब्रवीत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अयं भद्रे तव मणिः पुत्रहन्ता जितः स ते। उत्तिष्ठ शोकमुत्सृज्य चत्रधर्म्ममनुस्मर।
प्रयाणे वासुदेवस्य शमार्थमसितेचणे। यान्युक्तानि त्वया भीरु वाक्यानि मधुघातिनि। ७५०
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च। न वै त्वमिति गोविन्द शममिच्छति राजनि।
उक्तवत्यसि तीव्राणि वाक्यानि पुरुषोत्तमं। चत्रधर्म्मानुरूपाणि तानि संस्मर्त्तुमर्हसि।
हतो दुर्य्योधनः पापो राज्यस्य परिपन्थिकः। दुःशासनस्य रुधिरं पीतं विस्फुरतो मया।
वैरस्य गतमानृण्यं न स्म वाच्या विवचतां। जित्वा मुक्तो द्रोणपुत्रो ब्राह्मण्याद्गौरवेण च।
यशोऽस्य पातितं देवि शरीरन्त्ववशेषितं। वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि। ७५५
॥ द्रौपद्युवाच ॥ केवलानृण्यमाप्ताऽस्मि गुरुपुत्रो गुरुर्मम। शिरस्येतं मणिं राजा प्रतिबध्नातु भारत।
तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा। गुरोरुच्छिष्टमित्येव द्रौपद्या वचनादपि।
ततो दिव्यं मणिवरं शिरसा धारयन् प्रभुः। शुशुभे स तदा राजा सचन्द्र इव पर्व्वतः।
उत्तस्थौ पुत्रशोकार्त्ता ततः कृष्णा मनस्विनी। कृष्णश्चापि महाबाहुः परिपप्रच्छ धर्म्मराट्।
इति श्रीमहाभारते सौप्तिकपर्व्वण्यैषीकपर्व्वणि द्रौपदीसान्त्वनायां षोडशोऽध्यायः॥ १६ ॥
॥ वैशम्पायन उवाच ॥ हतेषु सर्व्वसैन्येषु सौप्तिके तैरथैस्त्रिभिः। शोचन् युधिष्ठिरो राजा दाशार्हमिदमब्रवीत्। ७६०
कथं नु कृष्ण पापेन चुद्रेणाकृतकर्म्मणा। द्रौणिना निहताः सर्व्वे मम पुत्रा महारथाः।
तथा कृतास्त्रा विक्रान्ताः सहस्रशतयोधिनः। द्रुपदस्यात्मजाश्चैव द्रोणपुत्रेण पातिताः।
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखं। निजघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः।
किन्नु तेन कृतं कर्म्म तथायुक्तं नरर्षभ। यदेकः समरे सर्व्वानवधीन्नो गुरोः सुतः।
॥ श्रीभगवानुवाच ॥ नूनं स देवदेवानामीश्वरेश्वरमव्ययं। जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून्। ७६५
प्रसन्नो हि महादेवो दद्यादमरतामपि। वीर्य्यञ्च गिरिशो दद्याद्येनेन्द्रमपि शातयेत्।
वेदाहं हि महादेवं तत्त्वेन भरतर्षभ। यानि चास्य पुराणानि कर्म्माणि विविधानि च।
आदिरेष हि भूतानां मध्यमन्तश्च भारत। विचेष्टते जगच्चेदं सर्व्वमस्यैव कर्म्मणा।
एवं सिसृचुर्भूतानि ददर्श प्रथमं विभुः। पितामहोऽब्रवीच्चैनं भूतानि सृज माचिरं।
हरिकेशस्तथेत्युक्त्वा भूतानां दोषदर्शिवान्। दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः। ७७०
सुमहान्तं ततः कालं प्रतीच्यैनं पितामहः। स्रष्टारं सर्व्वभूतानां ससर्ज्ज मनसाऽमरं।
सोऽब्रवीत् पितरं दृष्ट्वा गिरिशं सुप्तमम्भसि। यदि मे नाग्रजोऽस्त्वन्यस्ततः स्रच्याम्यहं प्रजाः।
तमब्रवीत् पिता नास्ति त्वदन्यः पुरुषोऽग्रजः। स्थाणुरेव जले मग्नो विस्रब्धः कुरु वैकृतं।
भूतान्यन्वसृजत् सप्त दचादींस्तु प्रजापतीन्। यैरिमं व्यकरोत् सर्व्वं भूतग्रामं चतुर्व्विधं।
ताः सृष्टमात्राः चुधिताः प्रजाः सर्व्वाः प्रजापतिं। विभचयिषवो राजन् सहसा प्राद्रवंस्तदा। ७७५
स भच्यमाणस्त्राणार्थी पितामहमुपाद्रवत्। आभ्यो मां भगवांस्त्रातु वृत्तिरासां विधीयतां।
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च। जङ्गमानि च भूतानि दुर्व्वलानि बलीयसां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विहितान्नाः प्रजास्तास्तु जग्मुः सृष्टा यथागतं । ततो वर्द्धिरे राजन् प्रीतिमत्यः स्वयोनिषु ।
भूतग्रामे विवृद्धे तु तुष्टे लोकगुरावपि । उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः ।
बहुरूपाः प्रजाः सृष्टा विवृद्धाश्च स्वतेजसा । चुक्रोध भगवान्रुद्रो लिङ्गं स्वञ्चाप्यविध्यत । ७८०
तत्प्रविद्धं तथा भूमौ तथैव प्रत्यतिष्ठत । तमुवाचाव्ययो ब्रह्मा वचोभिः शमयन्निव ।
किं कृतं सलिले शर्व्व चिरकालस्थितेन ते । किमर्थञ्चेदमुत्पाद्य लिङ्गं भूमौ प्रवेशितं ।
सोऽब्रवीज्जातसंरम्भस्तथा लोकगुरुर्गुरुं । प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै ।
तपसाऽधिगतञ्चान्नं प्रजार्थं मे पितामह । ओषध्यः परिवर्त्तेरन् यथैवं सततं प्रजाः ।
एवमुक्त्वा स सक्रोधो जगाम विमना भवः । गिरेर्मुञ्जवतः पादं तपस्तप्तुं महातपाः । ७८५
इति श्रीमहाभारते सौप्तिकपर्व्वण्यैषीकपर्व्वणि युधिष्ठिरकृष्णसंवादे सप्तदशोऽध्यायः ॥ १७ ॥
॥ श्रीभगवानुवाच ॥ ततो देवयुगेऽतीते देवा वै समकल्पयन् । यज्ञं वेदप्रमाणेन विधिवद्यष्टुमीप्सवः ।
कल्पयामासुरथ ते साधनानि हवींषि च । भागार्हा देवताश्चैव याज्ञियं द्रव्यमेव च ।
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः । नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप ।
सोऽकल्प्यमाने भागे तु कृत्तिवासा मखेऽमरैः । ततः साधनमन्विच्छन् धनुरादौ ससर्ज्ज ह ।
लोकयज्ञः क्रियायज्ञो गृहयज्ञः सनातनः । पञ्चभूतनृयज्ञश्च यज्ञे सर्व्वमिदं जगत् । ७९०
लोकयज्ञैर्नृयज्ञैश्च कपर्द्दी विदधे धनुः । धनुः सृष्टमभूत्तस्य पञ्चकिष्कुः प्रमाणतः ।
वषट्कारोऽभवज्ज्या तु धनुषस्तस्य भारत । यज्ञाङ्गानि च चत्वारि तस्य सन्नहनेऽभवन् ।
ततः क्रुद्धो महादेवस्तदुपादाय कार्म्मुकं । आजगामाथ तत्रैव यत्र देवाः समीजिरे ।
तमात्तकार्म्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययं । विव्यथे पृथिवी देवी पर्व्वताश्च चकम्पिरे ।
न ववौ पवनश्चैव नाग्निर्जज्वाल चैधितः । व्यभ्रमच्चापि संविग्नं दिवि नक्षत्रमण्डलं । ७९५
न बभौ भास्करश्चापि सोमः श्रीमुक्तमण्डलः । तिमिरेणाकुलं सर्व्वमाकाशञ्चाभवद्वृतं ।
अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे । न प्रत्यभाच्च यज्ञः स देवतास्त्रेसिरे तथा ।
ततः स यज्ञं विव्याध रौद्रेण हृदि पत्रिणा । अपक्रान्तस्ततो यज्ञो मृगो भूत्वा सपावकः ।
स तु तेनैव रूपेण दिवं प्राप्य व्यराजत । अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले ।
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात् सुरान् । नष्टसंज्ञेषु देवेषु न प्राज्ञायत किञ्चन । ८००
त्र्यम्बकः सवितुर्बाहू भगस्य नयने तथा । पूष्णश्च दशनान् क्रुद्धो धनुष्कोट्या व्यशातयत् ।
प्राद्रवन्त ततो देवा यज्ञाङ्गानि च सर्व्वशः । केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् ।
स तु विद्राव्य तत् सर्व्वं शितिकण्ठोऽवहस्य च । अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ।
ततो वागमरैरुक्ता ज्यान्तस्य धनुषोऽच्छिनत् । अथ तत् सहसा राजन् च्छिन्नज्यं विष्फुरद्धनुः ।
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् । शरणं सह यज्ञेन प्रसादञ्चाकरोत् प्रभुः । ८०५
ततः प्रसन्नो भगवान् स्थाप्य कोपं जलाशये । सजलं पावको भूत्वा शोषयत्यनिशं प्रभो ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भगस्य नयने चैव बाहू च सवितुस्तथा। प्रादात् पूष्णश्च दशनान् पुनर्यज्ञांश्च पाण्डव।
ततः सुस्थमिदं सर्व्वं बभूव पुनरेव हि। सर्व्वाणि च हवींष्यस्य देवा भागमकल्पयन्।
तस्मिन् क्रुद्धेऽभवत् सर्व्वमसुस्थं भुवनं प्रभो। प्रसन्ने च पुनः सुस्थं प्रसन्नोऽस्य च वीर्य्यवान्।
ततस्ते निहताः सर्व्वे तव पुत्त्रा महारथाः। अन्ये च बहवः शूराः पाञ्चालस्य पदानुगाः।
न तन्मनसि कर्त्तव्यं न च तद्द्रौणिना कृतं। महादेवप्रसादेन कुरु कार्य्यमनन्तरं।
इति श्रीमहाभारते सौप्तिकपर्व्वण्यैषीकपर्व्वणि युधिष्ठिरार्ज्जुनसंवादे अष्टादशोऽध्यायः॥ १८ ॥

॥ समाप्तञ्चेदं सौप्तिकपर्व्व ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमहाभारतं

॥ अथ स्त्रीपर्व्व ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं । देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ।

॥ जनमेजय उवाच ॥ हते दुर्य्योधने चैव हते सैन्ये च सर्व्वशः । धृतराष्ट्रो महाराजः श्रुत्वा किमकरोन्मुने ।
तथैव कौरवो राजा धर्म्मपुत्त्रो महामनाः । कृपप्रभृतयश्चैव किमकुर्व्वत ते त्रयः ।
अश्वत्थाम्नः श्रुतं कर्म्म शापादन्योन्यकारितात् । वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ।
॥ वैशम्पायन उवाच ॥ हते पुत्त्रशते दीनं छिन्नशाखमिव द्रुमं । पुत्त्रशोकाभिसन्तप्तं धृतराष्ट्रं महीपतिं ।
ध्यानमूकत्वमापन्नं चिन्तया समभिप्लुतं । अभिगम्य महाराजं सञ्जयो वाक्यमब्रवीत् ।
किं शोचसि महाराज नास्ति शोके सहायता । अक्षौहिण्यो हतास्त्वष्टौ दश चैव विशाम्पते ।
निर्ज्जनेयं वसुमती शून्या सम्प्रति केवला । नानादिग्भ्यः समागम्य नानादेश्या नराधिपाः ।
सहैव तव पुत्त्रेण सर्व्वे वै निधनं गताः । पितॄणां पुत्त्रपौत्त्राणां ज्ञातीनां सुहृदान्तथा ।
गुरूणाञ्चानुपूर्व्व्येण प्रेतकार्य्याणि कारय ।
॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा करुणं वाक्यं पुत्त्रपौत्त्रवधार्द्दितः । पपात भुवि दुर्द्धर्षो वाताहत इव द्रुमः ।
॥ धृतराष्ट्र उवाच ॥ हतपुत्त्रो हतामात्यो हतसर्व्वसुहृज्जनः । दुःखी नूनं भविष्यामि विचरन् पृथिवीमिमां ।
किं नु बन्धुविहीनस्य जीवितेन ममाद्य वै । लूनपक्षस्य इव मे जराजीर्णस्य पक्षिणः ।
हतराज्यो हतबन्धुर्हतचक्षुश्च वै तथा । न भ्राजिष्ये महाप्राज्ञ क्षीणरश्मिरिवांशुमान ।
न कृतं सुहृदां वाक्यं जामदग्न्यस्य जल्पतः । नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ।
सभामध्ये तु कृष्णेन यच्छ्रेयोऽभिहितं मम । अलं वैरेण ते राजन् पुत्त्रः संगृह्यतामिति ।
तच्च वाक्यमकृत्वाऽहं भृशं तप्यामि दुर्म्मतिः । न हि श्रोताऽस्मि भीष्मस्य धर्म्मयुक्तं प्रभाषितं ।
दुर्य्योधनस्य च तथा वृषभस्येव नर्द्दतः । दुःशासनवधं श्रुत्वा कर्णस्य च विपर्य्ययं ।
द्रोणसूर्य्योपरागञ्च हृदयं मे विदीर्य्यते । न स्मराम्यात्मनः किञ्चित् पुरा सञ्जय दुष्कृतं ।
यस्येदं फलमद्येह मया मूढेन भुज्यते । नूनं व्यपकृतं किञ्चिन्मया पूर्व्वेषु जन्मसु ।
येन मां दुःखभागेषु धाता कर्म्मसु युक्तवान् । परिणामश्च वयसः सर्व्वबन्धुक्षयश्च मे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुहृन्मित्रविनाशश्च दैवयोगादुपागतः । कोऽन्योऽस्ति दुःखिततरो मत्तोऽन्यो हि पुमान् भुवि ।
तन्ममाद्यैव पश्यन्तु पाण्डवाः संशितव्रताः । विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितं ।
॥ वैशम्पायन उवाच ॥ तस्य लालप्यमानस्य बहुशोकं वितन्वतः । शोकापहं नरेन्द्रस्य सञ्जयो वाक्यमब्रवीत् ।
शोकं राजन् व्यपनुद श्रुतास्ते वेदनिश्चयाः । शास्त्रागमाश्च विविधा वृद्धेभ्यो नृपसत्तम ।
सृञ्जये पुत्त्रशोकार्त्ते यदूचुर्मुनयः पुरा । यथा यौवनजं दर्पमास्थिते ते सुते नृप । २०
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितं । स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना ।
असिनैवैकधारेण स्वबुद्ध्या तु विचेष्टितं । प्रायशोऽवृत्तसम्पन्नाः सततं पर्य्युपासिताः ।
यस्य दुःशासनो मन्त्री राधेयश्च दुरात्मवान् । शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्म्मतिः ।
शल्यश्च येन वै सर्व्वं शल्यभूतं कृतं जगत् । कुरुवृद्धस्य भीष्मस्य गान्धार्य्या विदुरस्य च ।
द्रोणस्य च महाराज कृपस्य च शरद्वतः । कृष्णस्य च महाराज नारदस्य च धीमतः । २५
ऋषीणाञ्च तथाऽन्येषां व्यासस्यामिततेजसः । न कृतं तेन वचनं तव पुत्त्रेण भारत ।
अल्पबुद्धिरहङ्कारी नित्यं युद्धमिति ब्रुवन् । क्रूरो दुर्म्मर्षणो नित्यमसन्तुष्टश्च वीर्य्यवान् ।
श्रुतवानसि मेधावी सत्यवांश्चैव नित्यदा । न मुह्यन्तीदृशाः सन्तो बुद्धिमन्तो भवादृशाः ।
न धर्म्मः सत्कृतः कश्चिन्नित्यं युद्धमिति ब्रुवन् । क्षयिताः क्षत्त्रियाः सर्व्वे शत्रूणां वर्द्धितं यशः ।
मध्यस्थोऽसि त्वमप्यासीर्न क्षमं किञ्चिदुक्तवान् । दुर्द्धरेण त्वया भावस्तुलया न समं धृतः । ३०
आदावेव मनुष्येण वर्त्तितव्यं यथाक्षमं । यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ।
पुत्त्रगृद्ध्या त्वया राजन् प्रियन्तस्य चिकीर्षितं । पश्चात्तापमिमं प्राप्तो न त्वं शोचितुमर्हसि ।
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति । स भ्रष्टो मधुलोभेन शोचत्येवं यथा भवान् ।
अर्थान्न शोचन् प्राप्नोति न शोचन् विन्दते फलं । न शोचन् प्रियमाप्नोति न शोचन् विन्दते परं ।
स्वयमुत्पादयित्वाऽग्निं वस्त्रेण परिवेष्टयन् । दह्यमानो मनस्तापं भजते न स पण्डितः । ३५
त्वयैव ससुतेनायं वाक्यवायुसमीरितः । लोभाज्येन च संसिक्तो ज्वलितः पार्थपावकः ।
तस्मिन् समिद्धे पतिताः शलभा इव ते सुताः । तान् वै शराग्निनिर्द्दग्धान्न त्वं शोचितुमर्हसि ।
यच्चाश्रुपातात् कलिलं वदनं वहसे नृप । अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ।
विस्फुलिङ्गा इव ह्येतान् दहन्ति किल मानवान् । जहीहि मन्युं बुद्ध्या वै धारयात्मानमात्मना ।
॥ वैशम्पायन उवाच ॥ एवमाश्वासितस्तेन सञ्जयेन महात्मना । विदुरो भूय एवाह बुद्धिपूर्व्वं परन्तपः । ४०

इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके प्रथमोऽध्यायः ॥ १ ॥

॥ वैशम्पायन उवाच ॥ ततोऽमृतसमैर्व्वाक्यैर्ह्लादयन् पुरुषर्षभं । वैचित्रवीर्य्यं विदुरो यदुवाच निबोध तत् ।
॥ विदुर उवाच ॥ उत्तिष्ठ राजन् किं शेषे धारयात्मानमात्मना । एषा वै सर्व्वसत्त्वानां लोकेश्वरपरा गतिः ।
सर्व्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितं ।
यदा शूरञ्च भीरुञ्च यमः कर्षति भारत । तत् किं न योत्स्यन्ति हि ते क्षत्त्रियाः क्षत्त्रियर्षभ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation Jalgaon

अयुध्यमानो म्रियते युध्यमानश्च जीवति । कालं प्राप्य महाराज न कश्चिदतिवर्त्तते । ५०
अभावादीनि भूतानि भावमध्यानि भारत । अभावनिधनान्येव तत्र का परिदेवना ।
न शोचन्मृतमन्वेति न शोचन् म्रियते नरः । एवं सांसिद्धिके लोके किमर्थमनुशोचसि ।
कालः कर्षति भूतानि सर्व्वाणि विविधान्युत । न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ।
यथा वायुस्तृणाग्राणि संवर्त्तयति सर्व्वशः । तथा कालवशं यान्ति भूतानि भरतर्षभ ।
एकसार्थप्रयातानां सर्व्वेषां तत्र गामिनां । यस्य कालः प्रयात्यग्रे तत्र का परिदेवना । ५५
न चाप्येतान् हतान् युद्धे राजन् शोचितुमर्हसि । प्रमाणं यदि शास्त्राणि गतास्ते परमां गतिं ।
सर्व्वे स्वाध्यायवन्तो हि सर्व्वे च चरितव्रताः । सर्व्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ।
अदर्शनादापतिताः पुनश्चादर्शनं गताः । नैते तव न तेषां त्वं तत्र का परिदेवना ।
हतोऽपि लभते स्वर्गं हत्वा च लभते यशः । उभयं नो बहुगुणं नास्ति निष्फलता रणे ।
तेषां कामदुघांल्लोकानिन्द्रः सङ्कल्पयिष्यति । इन्द्रस्यातिथयो ह्येते भवन्ति पुरुषर्षभ । ६०
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया । स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः ।
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः । हूयमानाञ्छरांश्चैव सेहुस्तेजस्विनो मिथः ।
एवं राजंस्तवाचक्षे स्वर्गपन्थानमुत्तमं । न युद्धादधिकङ्किञ्चित् क्षत्रियस्येह विद्यते ।
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः । आशिषं परमां प्राप्ता न शोच्याः सर्व्व एव हि ।
आत्मानमात्मनाश्वास्य मा शुचः पुरुषर्षभ । नाद्य शोकाभिभूतस्त्वं कार्य्यमुत्स्रष्टुमर्हसि । ६५
मातापितृसहस्राणि पुत्त्रदारशतानि च । संसारेष्वनुभूतानि कस्य ते कस्य वा वयं ।
शोकस्थानसहस्राणि भयस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितं ।
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम । न मध्यस्थः क्वचित् कालः सर्व्वं कालः प्रकर्षति ।
कालः पचति भूतानि कालः संहरते प्रजाः । कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ।
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः । आरोग्यं प्रियसंवासो गृध्येदेषु न पण्डितः । ७०
न जानपदिकं दुःखमेकः शोचितुमर्हसि । अप्यभावेन युज्येत तच्चास्य न निवर्त्तते ।
न शोचन् प्रतिकुर्व्वीत यदि नश्येत्पराक्रमात् । भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ।
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्द्धते । अनिष्टसम्प्रयोगाच्च विप्रयोगात् प्रियस्य च ।
मानुषा मानसैर्दुःखैर्दह्यन्ते चाल्पबुद्धयः । नार्थो न धर्म्मो न सुखं यदेतदनुशोचसि ।
न च नापैति कार्य्यार्थात्त्रिवर्गाच्चैव हीयते । अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः । ७५
असन्तुष्टाः प्रमुह्यन्ति सन्तोषं यान्ति पण्डिताः । प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतज्ज्ञानस्य सामर्थ्यं नैवाल्यैः समतामियात् । शयानञ्चानुशेते हि तिष्ठन्तञ्चानुतिष्ठति ।
अनुधावन्ति धावन्तं कर्म्म पूर्व्वकृतं नरं । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभं ।
तस्यां तस्यामवस्थायां तत्फलं समुपाश्नुते । येन येन शरीरेण यद्यत्कर्म्म करोति यः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेन तेन शरीरेण तत्फलं समुपाश्नुते। आत्मैव ह्यात्मनो मित्रं आत्मैव रिपुरात्मनः। ८०
आत्मैव ह्यात्मनः साक्षी कृतस्याप्यकृतस्य च। शुभेन कर्म्मणा सौख्यं दुःखं पापेन कर्म्मणा।
कृतं लभति सर्व्वत्र नाकृतं भुज्यते क्वचित्। न हि ज्ञानविरुद्धेषु बहुपापेषु कर्म्मसु।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके द्वितीयोऽध्यायः॥ २ ॥
॥ धृतराष्ट्र उवाच ॥ सुभाषितैर्म्महाप्राज्ञ शोकोऽयं विगतो मम। भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः।
अनिष्टानामसंसर्गादिष्टानाञ्च विसर्ज्जनात्। कथं हि मानसैर्दुःखैः प्रमुच्यन्ते तु पण्डिताः। ८५
॥ विदुर उवाच ॥ यतो यतो मनोदुःखात् सुखाद्वा विप्रमुच्यते। ततस्ततो नियम्यैतच्छान्तिं विन्देत वै बुधः।
अशाश्वतमिदं सर्व्वं चिन्त्यमानं नरर्षभ। कदलीसन्निभो लोकः सारो ह्यस्य न विद्यते।
यदा प्राज्ञाश्च मूढाश्च धनवन्तोऽथ निर्द्धनाः। सर्व्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः।
निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धिभिः। किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः।
येन प्रत्यवगच्छेयुः कुलरूपविशेषणं। कस्मादन्योन्यमिच्छन्ति विप्रलब्धधियो नराः। ९०
गृहाणीव हि मर्त्त्यानामाहुर्द्देहानि पण्डिताः। कालेन विनियुज्यन्ते सत्त्वमेकन्तु शाश्वतं।
यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु पूरुषः। अन्यद्रोचयते वस्त्रमेवं देहाः शरीरिणां।
वैचित्रवीर्य्य साध्यं हि दुःखं वा यदि वा सुखं। प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्म्मणा।
कर्म्मणा प्राप्यते स्वर्गः सुखं दुःखञ्च भारत। ततो वहति तं भारमवशः स्ववशोऽपि वा।
यथा च मृण्मयं भाण्डं चक्रारूढं विपद्यते। किञ्चित्प्रक्रियमाणं वा कृतमात्रमथापि वा। ९५
छिन्नं वाप्यवरोप्यन्तदवतीर्णमथापि वा। आर्द्रं वाऽप्यथ वा शुष्कं पच्यमानमथापि वा।
अवतार्य्यमाणमापाकादुद्धृतञ्चापि भारत। अथ वा परिभुज्यन्तमेवं देहाः शरीरिणां।
गर्भस्थो वा प्रसूतो वाऽप्यथ वा दिवसान्तरः। अर्द्धमासगतो वाऽपि मासमात्रगतोऽपि वा।
संवत्सरगतो वाऽपि द्विसंवत्सर एव वा। यौवनस्थोऽथ मध्यस्थो वृद्धो वाऽपि विपद्यते।
प्राक्कर्म्मभिस्तु भूतानि भवन्ति न भवन्ति च। एवं सांसिद्धिके लोके किमर्थमनुतप्यसे। १००
यथा तु सलिलं राजन् क्रीडार्थमनुसञ्चरन्। उन्मज्जेच्च निमज्जेच्च किञ्चित्सत्त्व नराधिप।
एवं संसारगहने उन्मज्जननिमज्जने। कर्म्मभोगेन बध्यन्ते क्लिश्यन्ते चाल्पबुद्धयः।
ये तु प्राज्ञाः स्थिताः सत्त्वे संसारेऽस्मिन् हितैषिणः। समागमज्ञा भूतानां ते यान्ति परमाङ्गतिं।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके तृतीयोऽध्यायः ॥ ३ ॥
॥ धृतराष्ट्र उवाच ॥ कथं संसारगहनं विज्ञेयं वदताम्बर। एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः।
॥ विदुर उवाच ॥ जन्मप्रभृति भूतानां क्रिया सर्व्वोपलक्ष्यते। पूर्व्वमेवेह कलिले वसते किञ्चिदन्तरं। १०५
ततः स पञ्चमेऽतीते मासे वासमकल्पयत्। ततः सर्व्वाङ्गसम्पूर्णो गर्भो वै स तु जायते।
अमेध्यमध्ये वसति मांसशोणितलेपने। ततस्तु वायुवेगेन ऊर्द्धपादो ह्यधःशिराः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

योनिद्वारमुपागम्य बहून्क्लेशान् समृच्छति । योनिसम्पीडनाच्चैव पूर्व्वकर्म्मभिरन्वितः ।
तस्मान्मुक्तः स संसारादन्यान् पश्यत्युपद्रवान् । ग्रहास्तमुपगच्छन्ति सारमेया इवामिषं ।
ततः प्राप्तोत्तरे काले व्याधयश्चापि तं तथा । उपसर्पन्ति जीवन्तं बाध्यमानं स्वकर्म्मभिः । ११०
तं बद्धमिन्द्रियैः पाशैः सङ्गस्वादुभिरावृतं । व्यसनान्यपि वर्त्तन्ते विविधानि नराधिप ।
बाध्यमानश्च तैर्भूयो नैव तृप्तिमुपैति सः । तदा नावैति चैवायं प्रकुर्व्वन् साध्वसाधु वा ।
तथैव परिरक्षन्ति ये ध्यानपरिनिष्ठिताः । अयं न बुध्यते तावद्यमलोकमथागतं ।
यमदूतैर्व्विकृष्यंश्च मृत्युं कालेन गच्छति । वाग्घीनस्य च यन्मात्रं दृष्टानिष्टं कृतं मुखे ।
भूय एवात्मनात्मानं बध्यमानमुपेक्षते । अहो विनिकृतो लोको लोभेन च वशीकृतः । ११५
लोभक्रोधभयोन्मत्तो नात्मानमवबुध्यते । कुलीनत्वे च रमते दुष्कुलीनान् विकुत्सयन् ।
धनदर्पेण दृप्तश्च दरिद्रान् परिकुत्सयन् । मूर्खानिति परानाह नात्मानं समवेक्षते ।
दोषान् क्षिपति चान्येषां नात्मानं शास्तुमिच्छति । यदा प्राज्ञाश्च मूर्खाश्च धनवन्तश्च निर्द्धनाः ।
कुलीनाश्चाकुलीनाश्च मानिनोऽथाप्यमानिनः । सर्व्वे पितृवनं प्राप्ताः स्वपन्ति विगतज्वराः ।
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः । विशेषं न प्रपश्यन्ति तत्र तेषां परे जनाः । १२०
येन प्रत्यवगच्छेयुः कुलरूपविशेषणं । यदा सर्व्वे समं न्यस्ताः स्वपन्ति धरणीतले ।
कस्मादन्योन्यमिच्छन्ति प्रलब्धुमिह दुर्ब्बुधाः । प्रत्यक्षञ्च परोक्षञ्च यो निशम्य श्रुतिन्त्विमां ।
जन्मप्रभृति वर्त्तेत प्राप्नुयात् परमां गतिं । एवं सर्व्वं विदित्वा वै यस्तत्त्वमनुवर्त्तते ।
संप्रमोक्षयते सर्व्वान् पन्थानो मनुजेश्वर ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके चतुर्थोऽध्यायः ॥ ४ ॥
॥ धृतराष्ट्र उवाच ॥ यदिदं धर्म्मगहनं बुद्ध्या समनुगम्यते । तद्धि विस्तरतः सर्व्वं बुद्धिमार्गं प्रशंस मे । १२५
॥ विदुर उवाच ॥ तत्र ते वर्त्तयिष्यामि नमस्कृत्वा स्वयम्भुवे । यथा संसारगहनं वदन्ति परमर्षयः ।
कश्चिन्महति संसारे वर्त्तमानो द्विजः किल । महद्दुर्गमनुप्राप्तो वनं क्रव्यादसंकुलं ।
सिंहव्याघ्रगजाकीर्णमतिघोरं महास्वनैः । समन्तात्सम्परिक्षिप्तं यत् स्म दृष्ट्वा त्रसेद्यमः ।
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत् परं । अभ्युच्छ्रयश्च रोम्णां वै विक्रियाश्च परन्तप ।
स तद्वनं व्यनुसरन् सम्प्राधावन्नितस्ततः । वीक्षमाणो दिशः सर्व्वाः शरणं क्व भवेदिति । १३०
स तेषाञ्छिद्रमन्विच्छन् प्रद्रुतो भयपीडितः । न च निर्यांति वै दूरं न वा तैर्व्विप्रमुच्यते ।
अथापश्यद्वनं घोरं समन्ताद्वागुरावृतं । बाहुभ्यां सम्परिक्षिप्तं स्त्रिया परमघोरया ।
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः । नभस्पृशैर्म्महाघोरैः परिक्षिप्तं महावनं ।
वनमध्ये च तत्राभूदुदपानः समावृतः । वल्लीभिस्तृणच्छन्नाभिर्दृढाभिरिव संवृतः ।
पपात स द्विजस्तत्र निगूढे सलिलाशये । विलग्नश्चाभवत्तस्मिन् लतासन्तानसङ्कुले । १३५
पनसस्य यथा जातं वृन्तबद्धं महाफलं । स तथा लम्बते तत्र ह्यूर्द्ध्वपादो ह्यधःशिराः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

 Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः । कूपमध्ये महानागमपश्यत महाबलं ।
कूपवीनाहवेलायामपश्यत महागजं । षड्वक्तं कृष्णवर्णञ्च द्विषट्कपदचारिणं ।
क्रमेण परिसर्प्पन्तं वल्लीवृक्षसमावृतं । तस्य चापि प्रशाखासु वृक्षशाखावलम्बिनं ।
नानारूपा मधुकरा घोररूपा भयावहाः । आसते मधु संवृत्य पूर्व्वमेव निकेतजाः । १४०
भूयो भूयः समीहन्ते मधूनि भरतर्षभ । स्वादनीयानि भूतानां यैर्व्बालो विप्रकृष्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते सदा । आलम्बमानः स पुमान् धारां पिवति सर्व्वदा ।
न चास्य तृष्णा विरता पिवमानस्य सङ्कटे । अभीप्सति तदा नित्यमतृप्तः स पुनः पुनः ।
न चास्य जीविते राजन् निर्व्वेदः समजायत । तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश्च तं वृक्षं कुट्टयन्ति च मूषिकाः । व्यालैश्च वनदुर्गान्ते स्त्रिया च परमोग्रया । १४५
कूपाधस्ताच्च नागेन वीनाहे कुञ्जरेण च । वृक्षप्रपाताच्च भयं मूषिकेभ्यश्च पञ्चमं ।
मधुलोभान्मधुकरैः षष्ठमाहुर्म्महद्भयं । एवं स वसते तत्र क्षिप्तः संसारसागरे ।
न चैव जीविताशायां निर्व्वेदमुपगच्छति ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके पञ्चमोऽध्यायः ॥ ५ ॥
॥ धृतराष्ट्र उवाच ॥ अहो खलु महद्दुःखं कृच्छ्रवासश्च तस्य ह । कथं तस्य रतिस्तत्र तुष्टिर्व्वा वदताम्वर ।
स देशः क्व नु यत्रासौ वसते धर्म्मसङ्कटे । कथं वा स विमुच्येत नरस्तस्मान्महाभयात् । १५०
एतन्मे सर्व्वमाचक्ष्व साधु चेष्टामहे तदा । कृपा मे महती जाता तस्याभ्युद्धरणेन हि ।
॥ विदुर उवाच ॥ उपमानमिदं राजन् मोक्षविद्भिरुदाहृतं । सुकृतं विन्दते येन परलोकेषु मानवः ।
उच्यते यत्तु कान्तारं महासंसार एव सः । वनं दुर्गं हि तच्चैतत् संसारगहनं हि तत् ।
ये च ते कथिता व्याला व्याधयस्ते प्रकीर्त्तिताः । या सा नारी वृहत्काया अध्यतिष्ठत तत्र वै ।
तामाहुस्तु जरां प्राज्ञा वर्णरूपविनाशिनीं । यस्तत्र कूपो नृपते स तु देहः शरीरिणां । १५५
यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः । अन्तकः सर्व्वभूतानां देहिनां सर्व्वहार्य्यसौ ।
कूपमध्ये च या जाता वल्ली यत्र स मानवः । प्रताने लम्बते लग्नो जीविताशा शरीरिणां ।
स यस्तु कूपवीनाहे तं वृक्षं परिसर्पति । षड्वक्त्रः कुञ्जरो राजन् स तु संवत्सरः स्मृतः ।
षण्मुखा ऋतवो मासाः पादा द्वादश कीर्त्तिताः । ये तु वृक्षं निकृन्तन्ति मूषिकाः पन्नगास्तथा ।
रात्र्यहानि तु तान्याहुर्भूतानां परिचिन्तकाः । ये ते मधुकरास्तत्र कामास्ते परिकीर्त्तिताः । १६०
यास्तु ता बहुशो धाराः स्रवन्ति मधुनिस्रवं । तांस्तु कामरसान् विद्याद्यत्र मज्जन्ति मानवाः ।
एवं संसारचक्रस्य परिवृत्तं विदुर्व्बुधाः । येन संसारचक्रस्य पाशांश्छिन्दन्ति वै वुधाः ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके षष्ठोऽध्यायः ॥ ६ ॥
॥ धृतराष्ट्र उवाच ॥ अहोऽभिहितमाख्यानं भवता तत्त्वदर्शिना । भूय एव तु मे हर्षः श्रुत्वा वागमृतं तव ।
॥ विदुर उवाच ॥ शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरं । यच्छ्रुत्वा विप्रमुच्यन्ते संसारेभ्यो विचक्षणाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation - Jalgaon

यथा तु पुरुषो राजन् दीर्घमध्वानमास्थितः । क्वचित् क्वचित् श्रमाच्छ्रान्तः कुरुते वासमेव च । १६५
एवं संसारपर्य्याये गर्भवासेषु भारत । कुर्व्वन्ति दुर्ब्बुधा वासं मुच्यन्ते तत्र पण्डिताः ।
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः । यत्तु संसारगहनं वनमाहुर्म्मनीषिणः ।
सो ऽयं लोके समावर्त्तो मर्त्यानां भरतर्षभ । चराणां स्थावराणाञ्च न गृध्येत्तत्र पण्डितः ।
शारीरा मानसाश्चैव मर्त्यानां ये तु व्याधयः । प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता भुवि ।
क्लिश्यमानाश्च तैर्नित्यं वार्य्यमाणाश्च भारत । स्वकर्म्मभिर्म्महाव्यालैर्नोद्विजन्त्यल्पबुद्धयः । १७०
अथापि तैर्व्विमुच्येत व्याधिभिः पुरुषो नृप । आवृणोत्येव तं पश्चाज्जरा रूपविनाशिनी ।
शब्दरूपरसस्पर्शैर्व्विषयैर्व्विविधैरपि । मज्जमांसमहापङ्के निरालम्बे समन्ततः ।
संवत्सराश्च मासाश्च पक्षाहोरात्रसन्धयः । क्रमेणास्योपयुञ्जन्ति रूपमायुस्तथैव च ।
एते कालस्य निधयो नैतान् जानन्ति दुर्ब्बुधाः । धात्राऽभिलिखितान्याहुः सर्व्वभूतानि कर्म्मणा ।
रथः शरीरं भूतानां सत्त्वमाहुस्तु सारथिं । इन्द्रियाणि हयानाहुः कर्म्मबुद्धिस्तु रश्मयः । १७५
तेषां हयानां यो वेगं धावतामनुधावति । स तु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्त्तते ।
यस्तान् संयमते बुद्ध्या संयतो न निवर्त्तते । स तु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्त्तते ।
भ्रममाणा न मुह्यन्ति संसारेण भ्रमन्ति ते । संसारे भ्रमतां राजन् दुःखमेतद्धि जायते ।
तस्मादस्य निवृत्त्यर्थं यत्नमेवाचरेत् बुधः । उपेक्षा नात्र कर्त्तव्या शतशाखः प्रवर्त्तते ।
यतेन्द्रियो नरो राजन् क्रोधलोभनिराकृतः । सन्तुष्टः सत्यवादी यः स शान्तिमधिगच्छति । १८०
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्ब्बुधाः । स चैतत् प्राप्नुयाद्राजन् यत्त्वं प्राप्तो नराधिप ।
राज्यनाशं सुहृन्नाशं सुतनाशञ्च भारत । अनुतर्षोत्तमेवैतद्दुःखं भवति भारत ।
साधुः परमदुःखानां बुद्धिभैषज्यमाचरेत् । ज्ञानौषधमवाप्येह दूरपारं महौषधं ।
छिन्द्याद्दुःखमहाव्याधिं नरः संयतमानसः । न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः ।
तथोन्मोचयते दुःखाद्यथात्मा स्थिरसंयमः । तस्मान्मैत्रं समास्थाय शीलमापद्य भारत । १८५
दमस्त्यागो ऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः । शीलरश्मिसमायुक्तः स्थितो यो मानसे रथे ।
त्यक्त्वा मृत्युभयं राजन् ब्रह्मलोकं स गच्छति । अभयं सर्व्वभूतेभ्यो यो ददाति महीपते ।
स गच्छति परं स्थानं विष्णोः परमनामयं । न तत्क्रतुसहस्रेण नोपवासैश्च नित्यशः ।
अभयस्य च दानेन यत्फलं प्राप्नुयान्नरः । न ह्यात्मनः प्रियतरं किञ्चिद्भूतेषु निश्चितं ।
अनिष्टं सर्व्वभूतानां मरणं नाम भारत । तस्मात् सर्व्वेषु भूतेषु दया कार्य्या विपश्चिता । १९०
नानामोहसमायुक्ता बुद्धिजालेन संवृताः । असूक्ष्मदृष्टयो मन्दा भ्राम्यन्ति तत्र तत्र ह ।
सुसूक्ष्मदृष्टयो राजन् व्रजन्ति ब्रह्म शाश्वतं ।

इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके सप्तमोऽध्यायः ॥ ७ ॥

॥ वैशम्पायन उवाच ॥ विदुरस्य तु तद्वाक्यं निशम्य कुरुसत्तमः । पुत्रशोकाभिसन्तप्तः पपात भुवि मूर्च्छितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः। कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा।
सञ्जयः सुहृदश्चान्ये द्वाःस्था ये चास्य सम्मताः। जलेन सुखशीतेन तालवृन्तैश्च भारत। १९५
पस्पर्शुश्च करैर्गात्रं वीज्यमानाश्च यत्नतः। अन्वासंश्च चिरं कालं धृतराष्ट्रं तथागतं।
अथ दीर्घस्य कालस्य लब्धसंज्ञो महीपतिः। विललाप चिरं कालं पुत्त्राधिभिरभिप्लुतः।
धिगस्तु खलु मानुष्यं मानुषेषु परिग्रहं। यतो मूलानि दुःखानि सम्भवन्ति मुहुर्मुहुः।
पुत्त्रनाशेऽर्थनाशे च ज्ञातिसम्बन्धिनामय। प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो।
येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति। येनाभिभूतः पुरुषो मरणं बहु मन्यते। २००
तदिदं व्यसनं प्राप्तं मया भाग्यविपर्य्ययात्। तस्यान्तं नाभिगच्छामि ऋते प्राणविमोचणात्।
तथैवाहं करिष्यामि अद्यैव द्विजसत्तम। इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमं।
धृतराष्ट्रोऽभवन्मूढः स शोकं परमं गतः। अभूच्च तूष्णीं राजाऽसौ ध्यायमानो महीपते।
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनः प्रभुः। पुत्त्रशोकाभिसन्तप्तं पुत्त्रं वचनमब्रवीत्।
॥ व्यास उवाच॥ धृतराष्ट्र महाबाहो यत्त्वां वक्ष्यामि तच्छृणु। श्रुतवानसि मेधावी धर्म्मार्थकुशलं प्रभो। २०५
न तेऽस्त्यविदितं किञ्चिद्वेदितव्यं परन्तप। अनित्यतां हि मर्त्यानां विजानासि न संशयः।
अध्रुवे जीवलोके च स्थाने वा शाश्वते सति। जीविते मरणान्ते च कस्माच्छोचसि भारत।
प्रत्यक्षं तव राजेन्द्र वैरस्यास्य समुद्भवः। पुत्त्रन्ते कारणं कृत्वा कालयोगेन कारितः।
अवश्यं भवितव्ये च कुरूणां वैशसे नृप। कस्माच्छोचसि तान्शूरान् गतान् परमिकां गतिं।
जानता च महाबाहो विदुरेण महात्मना। यतितं सर्व्वयत्नेन शमं प्रति जनेश्वर। २१०
नच दैवकृतो मार्गः शक्यो भूतेन केनचित्। घटताऽपि चिरं कालं नियन्तुमिति मे मतिः।
देवतानां हि यत्कार्य्यं मया प्रत्यक्षतः श्रुतं। तत्तेऽहं सम्प्रवक्ष्यामि यथा स्थैर्य्यं भवेत्ततः।
पुराऽहं त्वरितो यातः सभामैन्द्रीं जितक्लमः। अपश्यं तत्र च तदा समवेतान् दिवौकसः।
नारदप्रमुखांश्चापि सर्व्वदेवर्षयोऽनघ। तत्र चापि मया दृष्टा पृथिवी पृथिवीपते।
कार्य्यार्थमिव सम्प्राप्ता देवतानां समीपतः। उपगम्य तदा धात्री देवानाह समागतान्। २१५
यत्कार्य्यं मम युष्माभिर्ब्रह्मणः सदने तदा। प्रतिज्ञातं महाभागास्तच्छीघ्रं संविधीयतां।
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः। उवाच वाक्यं प्रहसन् पृथिवीं देवसंसदि।
धृतराष्ट्रस्य पुत्त्राणां यस्तु ज्येष्ठः शतस्य वै। दुर्य्योधन इति ख्यातः स ते कार्य्यं करिष्यति।
तञ्च प्राप्य महीपालं कृतकृत्या भविष्यसि। तस्यार्थे पृथिवीपालाः कुरुक्षेत्रे समागताः।
अन्योन्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः। ततस्ते विहितं देवि भारस्य युधि नाशनं। २२०
गच्छ शीघ्रं स्वकं स्थानं लोकान् धारय शोभने। य एष ते सुतो राजन् लोकसंहारकारणात्।
कलेरंशः समुत्पन्नो गान्धार्य्या जठरे नृप। अमर्षी चपलश्चापि क्रोधनो दुष्प्रसाधनः।
दैवयोगात्समुत्पन्ना भ्रातरश्चास्य तादृशाः। शकुनिर्म्मातुलश्चैव कर्णश्च परमः सखा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृपाः। यादृशो जायते राजा तादृशोऽस्य जनो भवेत्।
अधर्म्मो धर्म्मतां याति स्वामी चेद्धार्म्मिको भवेत्। स्वामिनो गुणदोषाभ्यां भृत्याः स्युर्नात्र संशयः। २२५
दुष्टं राजानमासाद्य गतास्ते तनया नृप। एतमर्थं महाबाहो नारदो वेद तत्त्ववित्।
आत्मापराधात् पुत्त्रास्ते विनष्टाः पृथिवीपते। मा तान् शोचस्व राजेन्द्र नहि शोकेऽस्ति कारणं।
नहि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत। पुत्त्रास्तव दुरात्मानो यैरियं घातिता मही।
नारदेन च भद्रन्ते पूर्व्वमेव न संशयः। युधिष्ठिरस्य समितौ राजसूये निवेदितं।
पाण्डवाः कौरवाः सर्व्वे समासाद्य परस्परं। न भविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर। २३०
नारदस्य वचः श्रुत्वा तदाऽशोचन्त पाण्डवाः। एवन्ते सर्व्वमाख्यातं देवगुह्यं सनातनं।
कथन्ते शोकनाशः स्यात्प्राणेषु च दया प्रभो। स्नेहश्च पाण्डुपुत्त्रेषु ज्ञात्वा दैवकृतं विधिं।
एष चार्थो महाबाहो पूर्व्वमेव मया श्रुतः। कथितो धर्म्मराजस्य राजसूये क्रतूत्तमे।
यतितं धर्म्मपुत्त्रेण मया गुह्ये निवेदिते। अविग्रहे कौरवाणां दैवन्तु बलवत्तरं।
अनतिक्रमणीयो हि विधीराजन् कथञ्चन। कृतान्तस्य तु भूतेन स्थावरेण चलेन च। २३५
भवान् धर्म्मपरो यत्र बुद्धिश्रेष्ठश्च भारत। मुह्यते प्राणिनां ज्ञात्वा गतिञ्चागतिमेव च।
त्वान्तु शोकेन सन्तप्तं मुह्यमानं मुहुर्म्मुहुः। ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत्।
कृपालुर्नित्यशो धीरस्तिर्य्यग्योनिगतेष्वपि। स कथं त्वयि राजेन्द्र कृपां वै न करिष्यति।
मम चैव नियोगेन विधेश्चाप्यनिवर्त्तनात्। पाण्डवानाञ्च कारुण्यात् प्राणान् धारय भारत।
एवन्ते वर्त्तमानस्य लोके कीर्त्तिर्भविष्यति। धर्म्मार्थः सुमहांस्तात तप्तं स्याच्च तपश्चिरात्। २४०
पुत्त्रशोकंसमुत्पन्नं हुताशं ज्वलितं यथा। प्रज्ञाम्भसा महाभाग निर्व्वापय सदा मम।
॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा तस्य वचनं व्यासस्यामिततेजसः। मुहूर्त्तं समनुध्याय धृतराष्ट्रोऽभ्यभाषत।
महता शोकजालेन प्रणुन्नोऽस्मि द्विजोत्तम। नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः।
इदन्तु वचनं श्रुत्वा तव दैवनियोगजं। धारयिष्याम्यहं प्राणान् घटिष्ये नतु शोचितुं।
एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः। धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत। २४५
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रविशोके अष्टमोऽध्यायः॥ ८ ॥
॥ जनमेजय उवाच ॥ गते भगवति व्यासे धृतराष्ट्रो महीपतिः। किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि।
तथैव कौरवो राजा धर्म्मपुत्त्रो महामनाः। कृपप्रभृतयश्चैव किमकुर्व्वत ते त्रयः।
अश्वत्थाम्नः श्रुतं कर्म्म पापस्यान्योन्यकारितः। वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः।
॥ वैशम्पायन उवाच ॥ हते दुर्य्योधने चैव हते सैन्ये च सर्व्वशः। सञ्जयो विगतप्रज्ञो धृतराष्ट्रमुपस्थितः।
॥ सञ्जय उवाच ॥ आगम्य नानादेशेभ्यो नानाजनपदेश्वराः। पितृलोकं गता राजन् सर्व्वे तव सुतैः सह।
याच्यमानेन सततं तव पुत्त्रेण भारत। घातिता पृथिवी सर्व्वा वैरस्यान्तं विधित्सता। २५०
पुत्त्राणामथ पौत्त्राणां पितॄणाञ्च महीपते। आनुपूर्व्व्येण सर्व्वेषां प्रेतकार्य्याणि कारय।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा वचनं घोरं सञ्जयस्य महीपतिः। गतासुरिव निश्चेष्टो न्यपतत् पृथिवीतले।
तं शयानमुपागम्य पृथिव्यां पृथिवीपतिं। विदुरः सर्व्वधर्म्मज्ञ इदं वचनमब्रवीत्।
उत्तिष्ठ राजन् किं शेषे मा शुचो भरतर्षभ। एषा वै सर्व्वसत्त्वानां नरेश्वर परा गतिः। २५५
अभावादीनि भूतानि भावमध्यानि भारत। अभावनिधनान्येव तत्र का परिदेवना।
न शोचन् मृतमन्वेति न शोचन् म्रियते नरः। एवं सांसिद्धिके लोके किमर्थमनुशोचसि।
अयुध्यमानो म्रियते युध्यमानश्च जीवति। कालं प्राप्य महाराज न कश्चिदतिवर्त्तते।
कालः कर्षति भूतानि सर्व्वाणि विविधान्युत। न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम।
यथा वायुस्तृणाग्राणि संवर्त्तयति सर्व्वतः। तथा कालवशं यान्ति भूतानि भरतर्षभ। २६०
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनां। यस्य कालः प्रयात्यग्रे तत्र का परिदेवना।
यांश्चापि निहतान् युद्धे राजंस्त्वमनुशोचसि। अशोच्या हि महात्मानः सर्व्वे ते त्रिदिवङ्गताः।
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया। तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः।
सर्व्वे वेदविदः शूराः सर्व्वे च चरितव्रताः। सर्व्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना।
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः। हूयमानान् शरांश्चैव सेहुरुत्तमपूरुषाः। २६५
एवं राजंस्तवाचक्षे स्वर्ग्यं पन्थानमुत्तमं। न युद्धादधिकं किञ्चित् क्षत्रियस्येह विद्यते।
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः। आशिषं परमां प्राप्ता न शोच्याः सर्व्व एव हि।
आत्मनात्मानमाश्वास्य मा शुचो भरतर्षभ। नाद्य शोकाभिभूतस्त्वं कार्य्यमुत्स्रष्टुमर्हसि।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि नवमोऽध्यायः॥ ९ ॥
॥ वैशम्पायन उवाच ॥ विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः। युज्यतां यानमित्युक्त्वा पुनर्व्वचनमब्रवीत्।
क्षिप्रमानय गान्धारीं सर्व्वाश्च भरतस्त्रियः। वधूं कुन्तीमुपादाय याश्चान्यास्तत्र योषितः। २७०
एवमुक्त्वा स धर्म्मात्मा विदुरं धर्म्मवित्तमं। शोकविप्रहतज्ञानो यानमेवान्वपद्यत।
गान्धारी पुत्त्रशोकार्त्ता भर्त्तुर्व्वचनचोदिता। सह कुन्त्या यतो राजा सह स्त्रीभिरुपाद्रवत्।
ताः समासाद्य राजानं भृशं शोकसमन्विताः। आमन्त्र्यान्योन्यमीयुः स्म भृशमुच्चुक्रुशुस्ततः।
ताः समाश्वासयत्क्षत्ता ताभ्यश्चार्त्ततरः स्वयं। अश्रुकण्ठीः समारोप्य ततोऽसौ निर्य्ययौ पुरात्।
ततः प्रणादः सञ्जज्ञे सर्व्वेषु कुरुवेश्मसु। आकुमारञ्च तत् सर्व्वमभवच्छोककर्षितं। २७५
अदृष्टपूर्व्वा या नार्य्यः पुरा देवगणैरपि। पृथग्जनेन दृश्यन्ते तास्तदा निहतेश्वराः।
प्रकीर्य्य केशान् सुशुभान् भूषणान्यवमुच्य च। एकवस्त्रधरा नार्य्यः परिपेतुरनाथवत्।
श्वेतपर्व्वतरूपेभ्यो गृहेभ्यस्तास्त्वपाक्रमन्। गुहाभ्य इव शैलानां पृषत्यो हतयूथपाः।
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः। शोकार्त्तान्यद्रवन्राजन् किशोरीणामिवाङ्गने।
प्रगृह्य बाहून् क्रोशन्त्यः पुत्त्रान् भ्रातॄन् पितॄनपि। दर्शयन्तीव ता ह स्म युगान्ते लोकसङ्क्षयं। २८०
विलपन्त्यो रुदन्त्यः स्म धावमानास्ततस्ततः। शोकेनाभ्याहतज्ञानाः कर्त्तव्यं न प्रजज्ञिरे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः । एकवस्त्रास्च निर्लज्जाः श्वश्रूणां पुरतोऽभवन् ।
परस्परं सुसूक्ष्मेषु शोकेष्वाश्वासयंस्तदा । ताः शोकविह्वला राजन्नवैक्षन्त परस्परं ।
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः । निर्ययौ नगराद्दीनस्तूर्णमायोधनं प्रति ।
शिल्पिनो वणिजो वैश्याः सर्व्वे कर्म्मोपजीविनः । ते पार्थिवं पुरस्कृत्य निर्ययुर्नगराद्वहिः । २८५
तासां विक्रोशमानानामार्त्तानां कुरुसङ्क्षये । प्रादुरासीन्महाञ्छब्दो व्यथयन् भुवनान्युत ।
युगान्तकाले सम्प्राप्ते भूतानां दह्यतामिव । अभावः स्यादयं प्राप्त इति भूतानि मेनिरे ।
भृशमुद्विग्नमनसस्ते पौराः कुरुसङ्क्षये । प्राक्रोशन्त महाराज स्वनुरक्तास्तदा भृशं ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रगमने दशमोऽध्यायः ॥ १० ॥
॥ वैशम्पायन उवाच ॥ क्रोशमात्रं ततो गत्वा ददृशुस्तान् महारथान् । शारद्वतं कृपं द्रौणिं कृतवर्म्माणमेव च ।
ते तु दृष्ट्वैव राजानं प्रज्ञाचक्षुषमीश्वरं । अश्रुकण्ठा विनिश्वस्य रुदन्तमिदमब्रुवन् । २९०
सुतस्तव महाराज कृत्वा कर्म्म सुदुष्करं । गतः सानुचरो राजन् शक्रलोकं महीपते ।
दुर्य्योधनबलान्मुक्ता वयमेव त्रयो रथाः । सर्व्वमन्यत् परिक्षीणं सैन्यन्ते भरतर्षभ ।
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः । गान्धारीं पुत्रशोकार्त्तामिदं वचनमब्रवीत् ।
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान् बहून् । वीरकर्म्माणि कुर्व्वाणाः पुत्रास्ते निधनङ्गताः ।
ध्रुवं सम्प्राप्य लोकांस्ते निर्म्मलान् शस्त्रनिर्ज्जितान् । भास्वरं देहमास्थाय विचरन्त्यमरा इव । २९५
न हि कश्चिद्धि शूराणां युध्यमानः पराङ्मुखः । शस्त्रेण निधनं प्राप्तो न च कश्चित कृताञ्जलिः ।
एवं तां क्षत्रियस्याहुः पुराणाः परमां गतिं । शस्त्रेण निधनं सङ्ख्ये तन्न शोचितुमर्हसि ।
न चापि शत्रवस्तेषामृध्यन्ते राज्ञि पाण्डवाः । शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ।
अधर्म्मेण हतं श्रुत्वा भीमसेनेन ते सुतं । सुप्तं शिविरमाविश्य पाण्डूनां कदनं कृतं ।
पाञ्चाला निहताः सर्व्वे धृष्टद्युम्नपुरोगमाः । द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः । ३००
तथा विशसनं कृत्वा पुत्रशत्रुगणस्य ते । प्रद्रवाम रणे स्थातुं न हि शक्यामहे त्रयः ।
ते हि शूरा महेष्वासा क्षिप्रमेष्यन्ति पाण्डवाः । अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः ।
ते हतानात्मजान् श्रुत्वा प्रमत्ताः पुरुषर्षभाः । निनीषन्तः पदं शूराः क्षिप्रमेव यशस्विनि ।
तेषान्तु कदनं कृत्वा संस्थातुं नोत्सहामहे । अनुजानीहि नो राज्ञि मा च शोके मनः कृथाः ।
राजंस्त्वमनुजानीहि धैर्य्यमातिष्ठ चोत्तमं । निष्ठान्तं पश्य चापि त्वं क्षात्रं धर्म्मञ्च केवलं । ३०५
इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणं । कृपश्च कृतवर्म्मा च द्रोणपुत्रश्च भारत ।
अवेक्षमाणा राजानं धृतराष्ट्रं मनीषिणं । गङ्गामनु महात्मानस्तूर्णमश्वानचोदयन् ।
अपक्रम्य तु ते राजन् सर्व्व एव महारथाः । आमन्त्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्तदा ।
जगाम हास्तिनपुरं कृपः शारद्वतस्तदा । स्वमेव राष्ट्रं हार्द्दिक्यो द्रौणिर्व्यासाश्रमं ययौ ।
एवं ते प्रययुर्व्वीरा वीक्षमाणाः परस्परं । भयार्त्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनां । ३१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समेत्य वीरा राजानं तदा त्वनुदिते रवौ । विप्रजग्मुर्महाराज यथेच्छकमरिन्दमाः ।
समासाद्याथ वै द्रौणिं पाण्डुपुत्त्रा महारथाः । व्यजयंस्ते रणे राजन् विक्रम्य तदनन्तरं ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि कृपद्रौणिभोजदर्शने एकादशोऽध्यायः ॥ ११ ॥
॥ वैशम्पायन उवाच ॥ हतेषु तेषु सैन्येषु धर्म्मराजो युधिष्ठिरः । शुश्रुवे पितरं वृद्धं निर्यातं नागसाह्वयात् ।
सोऽभ्ययात् पुत्त्रशोकार्त्तः पुत्त्रशोकपरिप्लुतं । शोचमानं महाराज भ्रातृभिः सहितस्तदा ।
अन्वीयमानो वीरेण दाशार्हेण महात्मना । युयुधानेन च तथा तथा चैव युयुत्सुना । २१५
तमन्वयात् सुदुःखार्त्ता द्रौपदी शोककर्षिता । सह पाञ्चालयोषिद्भिर्यास्तत्रासन् समागताः ।
सगङ्गामनुवृन्दानि स्त्रीणां भरतसत्तम । कुररीणामिवार्त्तानां क्रोशन्तीनां ददर्श ह ।
ताभिः परिवृतो राजा क्रोशन्तीभिः सहस्रशः । ऊर्द्ध्वबाहुभिरार्त्ताभीरुदन्तीभिः प्रियाप्रियैः ।
क्व नु धर्म्मज्ञता राज्ञः क्व नु साऽद्यानृशंसता । यच्चावधीत् पितॄन् भ्रातॄन् गुरुपुत्त्रान् सखीनपि ।
घातयित्वा कथं द्रोणं भीष्मञ्चापि पितामहं । मनस्तेऽभून्महाराज हत्वा चापि जयद्रथं । २२०
किन्नु राज्येन ते कार्य्यं पितॄन् भ्रातॄनपश्यतः । अभिमन्युञ्च दुर्द्धर्षं द्रौपदेयांश्च भारत ।
अतीत्य ता महाबाहुः क्रोशन्तीः कुररीरिव । ववन्दे पितरं ज्येष्ठं धर्म्मराजो युधिष्ठिरः ।
ततोऽभिवाद्य पितरं धर्म्मेण मित्रकर्षणः । न्यवेदयन्त नामानि पाण्डवास्तेऽपि सर्व्वशः ।
तमात्मजान्तकरणं पिता पुत्त्रवधार्द्दितः । अप्रीयमाणः शोकार्त्तः पाण्डवं परिषस्वजे ।
धर्म्मराजं परिष्वज्य सान्त्वयित्वा च भारत । दुष्टात्मा भीममन्विच्छन् दिधक्षुरिव पावकः । २२५
स कोपपावकस्तस्य शोकवायुसमीरितः । भीमसेनमयं दावं दिधक्षुरिव दृश्यते ।
तस्य सङ्कल्पमाज्ञाय भीमं प्रत्यशुभं हरिः । भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसं ।
प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येङ्गितं हरिः । संविधानं महाप्राज्ञस्तत्र चक्रे जनार्द्दनः ।
तं गृहीत्वैव पाणिभ्यां भीमसेनमयस्मयं । बभञ्ज बलवान् राजा मन्यमानो वृकोदरं ।
नागायुतबलप्राणः स राजा भीममायसं । भंक्त्वा विमथितोरस्कः सुस्राव रुधिरं मुखात् । २३०
ततः पपात मेदिन्यां तथैव रुधिरोक्षितः । प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः ।
प्रत्यगृह्णाच्च तं विद्वान् सूतो गावल्गणिस्तदा । मैवमित्यब्रवीत् चैनं शमयन् सान्त्वयन्निव ।
स तु कोपं समुत्सृज्य गतमन्युर्महामनाः । हाहा भीमेति चुक्रोश नृपः शोकसमन्वितः ।
तं विदित्वा गतक्रोधं भीमसेनवधार्द्दितं । वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ।
मा शुचो धृतराष्ट्र त्वं नैष भीमस्त्वया हतः । आयसी प्रतिमा ह्येषा त्वया राजन्निपातिता । २३५
त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ । मयाऽपकृष्टः कौन्तेयो मृत्योर्दंष्ट्रान्तरं गतः ।
न हि ते राजशार्द्दूल बले तुल्योऽस्ति कश्चन । कः सहेत महाबाहो बाह्वोर्व्विग्रहणं नरः ।
यथान्तकमनुप्राप्य जीवन् कश्चिन्न मुच्यते । एवं बाह्वन्तरं प्राप्य तव जीवेन्न कश्चन ।
तस्मात् पुत्त्रेण या तेऽसौ प्रतिमा कारितायसी । भीमस्य सेयं कौरव्य तवैवोपहृता मया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

पुत्रशोकाभिसन्तप्तं धर्म्मादपकृतं मनः । तदा राजेन्द्र तेन त्वं भीमसेनं जिघांससि । १४०
न त्वेतत्ते क्षमं राजन् हन्यास्त्वं यद्वृकोदरं । न हि पुत्त्रा महाराज जीवेयुस्ते कथञ्चन ।
तस्माद्यत् कृतमस्माभिर्मन्यमानैः शमं प्रति । अनुमन्यस्व तत् सर्व्वं मा च शोके मनः कृथाः ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि आयसभीमभङ्गे द्वादशोऽध्यायः ॥ १२ ॥
॥ वैशम्पायन उवाच ॥ तत एनमुपातिष्ठन् शौचार्थं परिचारकाः । कृतशौचं पुनस्त्वेनं प्रोवाच मधुसूदनः ।
राजन्नधीता वेदास्ते शास्त्राणि विविधानि च । श्रुतानि च पुराणानि राजधर्म्माश्च केवलाः ।
एवं विद्वान् महाप्राज्ञः समर्थः सन् बलाबले । आत्मापराधात् कस्मात्त्वं कुरुषे कोपमीदृशं । १४५
उक्तवांस्त्वां तदैवाहं भीष्मद्रोणौ च भारत । विदुरः सञ्जयश्चैव त्वन्तु राजन्न तत्कृथाः ।
स वार्य्यमाणो नास्माकमकार्षीर्व्वचनं तदा । पाण्डवानधिकान्राजन् बले शौर्य्ये च कौरव ।
राजा हि यः स्थिरप्रज्ञः स्वयं दोषानवेक्षते । देशकालविभागञ्च परं श्रेयः स विन्दति ।
उच्यमानस्तु यः श्रेयो गृह्णीते नो हिताहिते । आपदः समनुप्राप्य स शोचत्यनये स्थितः ।
ततोऽन्यवृत्तमात्मानं समवेक्षस्व भारत । राजंस्त्वं ह्यभिधेयात्मा दुर्य्योधनवशे स्थितः । १५०
आत्मापराधादापन्नस्तत् किं भीमं जिघांससि । तस्मात् संयच्छ कोपं त्वं स्वमनुस्मृत्य दुष्कृतं ।
यस्तु तां स्पर्द्धया क्षुद्रः पाञ्चालीमानयत् सभां । स हतो भीमसेनेन वैरं प्रतिजिहीर्षता ।
आत्मनोऽतिक्रमं पश्य पुत्त्रस्य च दुरात्मनः । यदनागसि पाण्डूनां परित्यागः परन्तप ।
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु कृष्णेन सर्व्वं सत्यं जनाधिप । उवाच देवकीपुत्त्रं धृतराष्ट्रो महीपतिः ।
एवमेतन्महाबाहो यथा वदसि माधव । पुत्त्रस्नेहस्तु धर्म्मात्मन् धैर्य्यान्मां समचालयत् । १५५
दिष्ट्या तु पुरुषव्याघ्रो बलवान् सत्यविक्रमः । त्वद्गुप्तो नागमत् कृष्ण भीमो बाह्वन्तरं मम ।
इदानीं त्वहमेकाग्रो गतमन्युर्गतज्वरः । मध्यमं पाण्डवं वीरं प्रष्टुमिच्छामि केशव ।
हतेषु पार्थिवेन्द्रेषु पुत्त्रेषु निहतेषु वै । पाण्डुपुत्त्रेषु वै शर्म्म प्रीतिश्चाप्यवतिष्ठति ।
ततः स भीमञ्च धनञ्जयञ्च माद्र्याश्च पुत्त्रौ पुरुषप्रवीरौ । पस्पर्श गात्रैः प्ररुदन् सुगात्रानाश्वास्य कल्याणमुवाच चैतान् ।
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि धृतराष्ट्रकोपविमोचने त्रयोदशोऽध्यायः ॥ १३ ॥
॥ वैशम्पायन उवाच ॥ धृतराष्ट्राभ्यनुज्ञातास्ततस्ते कुरुपाण्डवाः । अभ्ययुर्भ्रातरः सर्व्वे गान्धारीं सहकेशवाः । १६०
ततो ज्ञात्वा हतामित्रं धर्म्मराजं युधिष्ठिरं । गान्धारी पुत्त्रशोकार्त्ता शप्तुमैच्छदनिन्दिता ।
तस्याः पापमभिप्रायं विदित्वा पाण्डवान् प्रति । ऋषिः सत्यवतीपुत्त्रः प्रागेव समबुध्यत ।
स गङ्गायामुपस्पृश्य पुण्यगन्धि पयः शुचि । तं देशमुपसम्पेदे परमर्षिर्म्मनोजवः ।
दिव्येन चक्षुषा पश्यन् मनसा गद्गदेन च । सर्व्वप्राणभृतां भावं स तत्र समबुध्यत ।
स स्नुषामब्रवीत् काले कल्यवादी महातपाः । शापकालमवाक्षिप्य क्षमाकालमुदैरयत् । १६५
न कोपः पाण्डवे कार्य्यो गान्धारि शममाप्नुहि । वचो निगृह्यतामेतत् शृणु चेदं वचो मम ।
उक्ताऽस्यष्टादशाहानि पुत्त्रेण जयमिच्छता । शिवमाशंससे मातर्युध्यमानस्य शत्रुभिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सा तथा वाच्यमाना त्वं काले काले जयैषिणा। उक्तवत्यसि गान्धारि यतो धर्म्मस्ततो जयः।
न चाप्यतीतां गान्धारि वाचं ते वितथामहं। स्मरामि तोषमानायास्तथा प्रणिहिता ह्यसि।
विग्रहे तुमुले राज्ञां गत्वा पारमसंशयं। जितं पाण्डुसुतैर्युद्धे नूनं धर्म्मस्ततोऽधिकः। १७०
क्षमाशीला पुरा भूत्वा साऽद्य न क्षमसे कथं। अधर्म्मं जहि धर्म्मज्ञे यतो धर्म्मस्ततो जयः।
स्वञ्च धर्म्मं परिस्मृत्य वाचञ्चोक्तां मनस्विनि। कोपं संयच्छ गान्धारि मैवं भूः सत्यवादिनि।
॥ गान्धार्य्युवाच ॥ भगवन्नाभ्यसूयामि नैतानिच्छामि नश्यतः। पुत्त्रशोकेन तु बलान्मनो विह्वलतीव मे।
यथैव कुन्त्या कौन्तेया रक्षितव्यास्तथा मया। तथैव धृतराष्ट्रेण रक्षितव्या मया यथा।
दुर्य्योधनापराधेन शकुनेः सौबलस्य च। कर्णदुःशासनाभ्याञ्च हृतोऽयं कुरुसङ्क्षयः। १७५
नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः। नकुलः सहदेवो वा नैव जातु युधिष्ठिरः।
युध्यमाना हि कौरव्याः कृन्तमानाः परस्परं। निहताः सहितास्त्वन्यैस्तत्र नास्त्यप्रियं मम।
किन्तु कर्म्माकरोद्भीमो वासुदेवस्य पश्यतः। दुर्य्योधनं समाहूय गदायुद्धे महामनाः।
शिक्षयाऽभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे। अधो नाभ्यां प्रहृतवान् तन्मे कोपमवर्द्धयत्।
कथं नु धर्म्मं धर्म्मज्ञैः समुद्दिष्टं महात्मभिः। त्यजेयुराहवे शूराः प्राणहेतोः कथञ्चन। १८०
इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि गान्धारीसान्त्वनायां चतुर्द्दशोऽध्यायः॥ १४ ॥
॥ वैशम्पायन उवाच॥ तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत्। गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा।
अधर्म्मो यदि वा धर्म्मस्त्रासात्तत्र मया कृतः। आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि।
न हि धर्म्मेण पुत्त्रस्ते पातितोऽसौ महाबलः। न शक्यः केनचिद्धन्तुमतो विषममाचरं।
सैन्यस्यैकोऽवशिष्टोऽयं गदायुद्धेन वीर्य्यवान्। मां हत्वा न हरेद्राज्यमिति वै तत् कृतं मया।
अधर्म्मेण जितः पूर्व्वं तेन चापि युधिष्ठिरः। निकृताश्च सदैव स्म ततो विषममाचरं। १८५
राजपुत्त्रीञ्च पाञ्चालीमेकवस्त्रां रजस्वलां। भवत्या विदितं सर्व्वमुक्तवान् यत् सुतस्तव।
दुर्य्योधनमसंगृह्य न शक्या भूः ससागरा। केवला भोक्तुमस्माभिरतश्चैतत् कृतं मया।
तथाऽप्यप्रियमस्माकं पुत्त्रस्ते समुदाचरत्। द्रौपद्या यत् सभामध्ये सव्यमूरुमदर्शयत्।
तदैव वध्यः सोऽस्माकं दुराचारस्ते सुतः। धर्म्मराजाज्ञया चैव स्थिताः स्मः समये तदा।
वैरमुद्दीपितं राज्ञि पुत्त्रेण तव तन्महत्। क्लेशितास्तु वने नित्यं तत एतत् कृतं मया। १९०
वैरस्यास्य गतः पारं हत्वा दुर्य्योधनं रणे। राज्यं युधिष्ठिरः प्राप्तो वयञ्च गतमन्यवः।
॥ गान्धार्य्युवाच ॥ न तस्यैष वधस्तात यत् प्रशंससि मे सुतं। कृतवांश्चापि तत् सर्व्वं यदिदं भाषसे मयि।
हताश्वे नकुले यत्तु वृषसेनेन भारत। अपिबः शोणितं संख्ये दुःशासनशरीरजं।
सद्भिर्विगर्हितं घोरमनार्य्यजनसेवितं। क्रूरं कर्म्माकरोस्तस्मात्तदयुक्तं वृकोदर।
॥ भीमसेन उवाच ॥ अन्यस्यापि न पातव्यं रुधिरं किं पुनः स्वकं। यथैवात्मा तथा भ्राता विशेषो नास्ति कश्चन। १९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation- Jalgaon

रुधिरं न व्यतिक्रामद्दन्तोष्ठादम्ब मा शुचः । वैवस्वतस्तु तद्वेद हस्तौ मे रुधिरोक्षितौ ।
हताश्वं नकुलं दृष्ट्वा वृषसेनेन संयुगे । भ्रातॄणां संप्रहृष्टानां त्रासः संजनितो मया ।
केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते । क्रोधाद्यदब्रुवञ्चाहं तच्च मे हृदि वर्त्तते ।
क्षत्त्रधर्म्माच्च्युतो राज्ञी भवेयं शाश्वतीः समाः । प्रतिज्ञान्तामनिस्तीर्य्य ततस्तत् कृतवानहं ।
न मामर्हसि गान्धारि दोषेण परिशङ्कितुं । अनिगृह्य पुरा पुत्त्रानस्मास्वनपराधिषु । ४००
अधुना किं नु दोषेण परिशङ्कितुमर्हसि ।
॥ गान्धार्य्युवाच ॥ वृद्धस्यास्य शतं पुत्त्रान्निघ्नंस्त्वमपराजितः । कस्मान्न शेषयेः कञ्चिद्येनाल्पमपराधितं ।
सन्तानमावयोस्तात वृद्धयोर्हृतराज्ययोः । कथमन्धद्वयस्यास्य यष्टिरेका न वर्ज्जिता ।
शेषे ह्यवस्थिते तात पुत्त्राणामन्तके त्वयि । न मे दुःखं भवेदेतद्यदि त्वं धर्म्ममाचरेः ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु गान्धारी युधिष्ठिरमपृच्छत । क्व च राजेति सक्रोधा पुत्त्रपौत्त्रबधार्द्दिता । ४०५
तामभ्यगच्छद्राजेन्द्रो वेपमानः कृताञ्जलिः । युधिष्ठिर इदञ्चैनां मधुरं वाक्यमब्रवीत् ।
पुत्त्रहन्ता नृशंसोऽहं तव देवि युधिष्ठिरः । शापार्हः पृथिवीनाशे हेतुभूतः शपस्व मां ।
न हि मे जीवितेनार्थो न राज्येन धनेन वा । तादृशान् सुहृदो हत्वा मूढस्यास्य सुहृद्द्रुहः ।
तमेवंवादिनं भीतं सन्निकर्षगतं तदा । नोवाच किञ्चिद्गान्धारी निश्वासपरमा भृशं ।
तस्यावनतदेहस्य पादयोर्निपतिष्यतः । युधिष्ठिरस्य नृपतेर्धर्म्मज्ञा दीर्घदर्शिनी । ४१०
अङ्गुल्यग्राणि ददृशे देवीपट्टान्तरेण सा । ततः स कुनखीभूतो दर्शनीयनखो नृपः ।
तं दृष्ट्वा चार्ज्जुनोऽगच्छद्वासुदेवस्य पृष्ठतः । एवं सञ्चेष्टमानांस्तानितस्ततश्च भारत ।
गान्धारी विगतक्रोधा सान्त्वयामास मातृवत् । तया ते समनुज्ञाता मातरं वीरमातरं ।
अभ्यगच्छन्त सहिताः पृथां पृथुलवक्षसः । चिरस्य दृष्ट्वा सा पुत्त्रान् पुत्त्राधिभिरभिप्लुता ।
वाष्पमाहारयद्देवी वस्त्रेणावृत्य वै मुखं । ततो वाष्पं समुत्सृज्य सह पुत्त्रैण वै पृथा । ४१५
अपश्यदेतान् शस्त्रौघैर्ब्बहुधा परिविक्षतान् । सा तानेकैकशः पुत्त्रान् संस्पृशन्ती पुनः पुनः ।
अन्वशोचत दुःखार्त्ता द्रौपदीञ्च हतात्मजां । रुदन्तीमथ पाञ्चालीं ददर्श पतितां भुवि ।
॥ द्रौपद्युवाच ॥ आर्य्यपुत्त्राः क्व ते सर्व्वे सौभद्रसहिता गताः । न त्वान्तेऽद्याभिगच्छन्ति चिरं दृष्ट्वा तपस्विनीं ।
किन्नु राज्येन वै कार्य्यं विहीनायाः सुतैर्म्मम । तां समाश्वासयामास पृथा पृथुललोचना ।
उत्थाप्य याज्ञसेनीन्तु रुदतीं शोककर्षितां । तयैव सहिता चापि पुत्त्रैरनुगता नृप । ४२०
अभ्यगच्छत गान्धारीमार्त्तामार्त्ततरा स्वयं । तामुवाचाथ गान्धारी सह वध्वा यशस्विनीं ।
मैवं पुत्त्रीति दुःखार्त्ता पश्य मामपि दुःखितां । मन्ये लोकविनाशोऽयं कालपर्य्यायचोदितः ।
अवश्यभावी सम्प्राप्तः स्वभावाल्लोमहर्षणः । इदन्तत् समनुप्राप्तं विदुरस्य वचो महत् ।
असिद्धानुनये कृष्णे यदुवाच महामतिः । तस्मिन्नपरिहार्य्येऽर्थे व्यतीते च विशेषतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मा शुचो न हि शोच्यास्ते संग्रामे निधनं गताः। यथैव त्वं तथैवाहं को वामाश्वासयिष्यति। ४२५
ममैव ह्यपराधेन कुलमग्र्यं विनाशितं।

इति श्रीमहाभारते स्त्रीपर्व्वणि जलप्रदानिकपर्व्वणि पृथापुत्रदर्शने पञ्चदशोऽध्यायः १५ ॥ समाप्तञ्च जलप्रदानिकपर्व्व ॥

॥ अथ स्त्रीविलापपर्व्व ॥

॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु गान्धारी कुरूणामवकर्त्तनं। अपश्यत्तत्र तिष्ठन्ती दूराद्दिव्येन चक्षुषा।
पतिव्रता महाभागा समानव्रतचारिणी। उग्रेण तपसा युक्ता सततं ब्रह्मचारिणी।
वरदानेन कृष्णस्य महर्षेः पुण्यकर्म्मणः। दिव्यज्ञानबलोपेता विविधं पर्य्यदेवयत्।
ददर्श सा बुद्धिमती दूरादेव यथाऽन्तिके। रणाजिरं नृवीराणामद्भुतं लोमहर्षणं। ४३०
अस्थिकेशपरिस्तीर्णं शोणितौघपरिप्लुतं। शरीरैर्व्वहुसाहस्रैर्व्विनिकीर्णं समन्ततः।
गजाश्वरथयोधानामावृतं रुधिराविलैः। शरीरैरशिरस्कैश्च विदेहैश्च शिरोगणैः।
गजाश्वनरनारीणां निःस्वनैरभिसंवृतं। सृगालबककाकोलकङ्ककाकनिषेवितं।
रक्षसां पुरुषादानां मोदनं कुरराकुलं। अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितं।
ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः। पाण्डुपुत्राश्च ते सर्व्वे युधिष्ठिरपुरोगमाः। ४३५
वासुदेवं पुरस्कृत्य हतबन्धुञ्च पार्थिवं। कुरुस्त्रियः समासाद्य जग्मुरायोधनं प्रति।
समासाद्य कुरुक्षेत्रं तास्त्रियो निहतेश्वराः। अपश्यन्त हतांस्तत्र भ्रातॄन् पुत्रान् पितॄन् पतीन्।
क्रव्याद्भिर्भक्ष्यमाणान् वै गोमायुबलवायसैः। भूतैः पिशाचै रक्षोभिर्व्विविधैश्च निशाचरैः।
रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः। महार्हेभ्योऽथ यानेभ्यो विक्रोशन्त्यो निपेतिरे।
अदृष्टपूर्व्वं पश्यन्त्यो दुःखार्त्ता भरतस्त्रियः। शरीरेष्वस्खलन्नन्या न्यपतंश्चापरा भुवि। ४४०
श्रान्तानाञ्चाप्यनाथानां नासीत् काचन चेतना। पाञ्चालकुरुयोषाणां कृपणं तदभून्महत्।
दुःखोपहतचित्ताभिः समन्तादनुनादितं। दृष्ट्वायोधनमत्युग्रं धर्म्मज्ञा सुबलात्मजा।
ततः सा पुण्डरीकाक्षमामन्त्र्य पुरुषोत्तमं। कुरूणां वैशसं दृष्ट्वा दुःखाद्वचनमब्रवीत्।
पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः। प्रकीर्णकेशाः क्रोशन्त्यः कुरर्य्य इव माधव।
अमूस्त्वाऽभिसमागम्य स्मरन्त्यो भरतर्षभान्। पृथगेवाभ्यधावन्त्यः पुत्रान् भ्रातॄन् पितॄन् पतीन्। ४४५
वीरसूभिर्म्महाबाहो हतपुत्राभिरावृतं। क्वचिच्च वीरपत्नीभिर्हतवीराभिरावृतं।
शोभितं पुरुषव्याघ्रैर्भीष्मकर्णाभिमन्युभिः। द्रोणद्रुपदशल्यैश्च ज्वलद्भिरिव पावकैः।
काञ्चनैः कवचैर्द्दिव्यैर्म्मणिभिश्च महात्मनां। अङ्गदैर्हस्तकेयूरैः स्रग्भिश्च समलङ्कृतं।
वीरबाहुविसृष्टाभिः शक्तिभिः परिघैरपि। खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः।
क्रव्यादसङ्घैः सहितैस्तिष्ठद्भिर्व्विविधैः क्वचित्। क्वचिदाक्रीडमानैश्च शयानैरपरैः क्वचित्। ४५०
एतदेवंविधं वीर सम्पश्यायोधनं विभो। पश्यमाना हि दह्यामि शोकेनाहं जनार्द्दन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पाञ्चालानां कुरूणाञ्च विनाशे मधुसूदन । पञ्चानामपि भूतानामहं वधमचिन्तयं ।
तान् सुपर्णाश्च गृध्राश्च विकर्षन्त्यसृगुक्षिताः । निगृह्य चरणौ गृध्रा भक्षयन्ति सहस्रशः ।
जयद्रथस्य कर्णस्य तथैव द्रोणभीष्मयोः । अभिमन्योर्व्विनाशञ्च कश्चिन्तयितुमर्हति ।
अवध्यकल्पान्निहतान् दृष्ट्वाऽहं मधुसूदन । गृध्रकङ्कबकश्येनश्वशृगालादनीकृतान् ।
अमर्षवशमापन्नान् दुर्य्योधनवशे स्थितान् । पश्यैतान् पुरुषव्याघ्रान् संशान्तान् पावकानिव ।
शयनान्युचिताः सर्व्वे मृदूनि विमलानि च । विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ।
वन्दिभिः सततं काले स्तुवद्भिरभिनन्दिताः । शिवानामशिवा घोराः शृण्वन्ति विविधा गिरः ।
ये पुरा शेरते वीराः शयनेषु यशस्विनः । चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांशुषु शेरते ।
तेषामाभरणान्येते गृध्रा गोमायुवायसाः । आक्षिपन्त्यशिवा घोरा विनदन्तः पुनः पुनः ।
वाणान् विनिशितान् पीतान् निस्त्रिंशान् विमला गदा । युद्धाभिमानिनः प्रीता जीवन्त इव बिभ्रति ।
सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः । ऋषभप्रतिरूपाश्च शेरते हरितस्रजः ।
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः । शेरतेऽभिमुखाः शूरा दयिता इव योषितः ।
बिभ्रतः कवचान्यन्ये निर्म्मलान्यायुधानि च । न धर्षयन्ति क्रव्यादा जीवन्तीति जनार्द्दन ।
क्रव्यादैः कृष्यमाणानामपरेषां महात्मनां । शातकौम्भ्यः स्रजश्चित्रा विनिकीर्णाः समन्ततः ।
एते गोमायवो भीता निहतानां महात्मनां । कण्ठान्तरगतान् हारानाक्षिपन्ति सहस्रशः ।
सर्व्वेष्वपररात्रेषु याननन्दत वन्दिनः । स्तुतिभिश्च परार्द्ध्याभिरुपचारैश्च शिक्षिताः ।
तानिमाः परिदेवन्ति दुःखार्त्ताः परमाङ्गनाः । कृपणं वृष्णिशार्दूल दुःखशोकार्द्दिता भृशं ।
रक्तोत्पलवनानीव विभान्ति रुचिराणि च । मुखानि परमस्त्रीणां परिशुष्काणि केशव ।
रुदितोपरता ह्येता ध्यायन्त्यः सम्परिप्लुताः । कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः ।
एतान्यादित्यवर्णानि तपनीयनिभानि च । रोषरोदनताम्राणि वक्त्राणि कुरुयोषितां ।
आसामपरिपूर्णार्थं निशम्य परिदेवितं । इतरेतरसंक्रन्दान्न विजानन्ति योषितः ।
एता दीर्घं विनिश्वस्य विलप्य च पुनः पुनः । विस्पन्दमाना दुःखेन वीरा जहति जीवितं ।
बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति विलपन्ति च । पाणिभिश्चापरा घ्नन्ति शिरांसि मृदुपाणयः ।
शिरोभिः पातितैर्हस्तैः सर्व्वाङ्गैर्यूथशः कृतैः । इतरेतरसम्पृक्तैराकीर्णा भाति मेदिनी ।
विशिरस्कानथो कायान् दृष्ट्वा घोराभिनन्दिनः । मुह्यन्त्यनुचिता नार्य्यो विदेहानि शिरांसि च ।
शिरः कायेन सन्धाय प्रेक्षमाणा विचेतसः । अपश्यन्त्योऽपरं तत्र नेदमस्येति दुःखिताः ।
बाहूरुचरणानन्यान् विशिखोन्मथितान् पृथक् । सन्दधत्योऽसुखाविष्टा मूर्च्छन्त्येताः पुनः पुनः ।
उत्कृत्य शिरसश्चान्यान् विजग्धान् मृगपक्षिभिः । दृष्ट्वा काश्चिन्न जानन्ति भर्त्तॄन् भरतयोषितः ।
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन । प्रेक्ष्य भ्रातॄन् पितॄन् पुत्रान् पतींश्च निहतान् परैः ।
बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः । अगम्यकल्पा पृथिवी मांसशोणितकर्द्दमा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न दुःखेषूचिताः पूर्व्वं दुःखं नाहन्त्यनिन्दिताः। भ्रातृभिः पितृभिः पुत्रैरुपकीर्णां वसुन्धरां।
यूथानीव किशोरीणां सुकेशीनां जनार्द्दन। स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः।
इतो दुःखतरं किन्नु केशव प्रतिभाति मे। यदिमाः कुर्व्वते सर्व्वा रूपमुच्चावचं स्त्रियः।
नूनमाचरितं पापं मया पूर्व्वेषु जन्मसु। या पश्यामि हतान् पुत्त्रान् पौत्त्रान् भ्रातॄंश्च केशव। ४८५
एवमार्त्ता विलपती ददर्श निहतं सुतं।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि स्त्रीणां युद्धभूमिदर्शने षोडशोऽध्यायः॥ १६॥
॥ वैशम्पायन उवाच॥ ततो दुर्य्योधनं दृष्ट्वा गान्धारी शोकमूर्च्छिता। सहसा न्यपतद्भूमौ छिन्नेव कदली वने।
सा तु लब्ध्वा पुनः संज्ञां विक्रुश्य च पुनः पुनः। दुर्य्योधनमभिप्रेक्ष्य शयानं रुधिरोक्षितं।
परिष्वज्य च गान्धारी कृपणं पर्य्यदेवयत्। हा हा पुत्त्रेति शोकार्त्ता विललापाकुलेन्द्रिया।
सुगूढजत्रु विपुलं हारनिष्कनिषेवितं। वारिणा नेत्रजेनोरः सिञ्चन्ती शोकतापिता। ४९०
समीपस्थं हृषीकेशमिदं वचनमब्रवीत्। उपस्थितेऽस्मिन् संग्रामे ज्ञातीनां संक्षये विभो।
मामयं प्राह वार्ष्णेय प्राञ्जलिर्नृपसत्तमः। अस्मिन् ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु मे।
इत्युक्ते जानती सर्व्वमहं स्वव्यसनागमं। अब्रुवं पुरुषव्याघ्र यतो धर्म्मस्ततो जयः।
यथा च युध्यमानस्त्वं न वै मुह्यसि पुत्त्रक। ध्रुवं शस्त्रजितान् लोकान् प्राप्स्यस्यमरवत् प्रभो।
इत्येवमब्रुवं पूर्व्वं नैनं शोचाम्यहं सुतं। धृतराष्ट्रञ्च शोचामि कृपणं हतबान्धवं। ४९५
अमर्षणं युधां श्रेष्ठं कृतास्त्रं युद्धदुर्म्मदं। शयानं वीरशयने पश्य माधव मे सुतं।
योऽयं मूर्द्धाभिषिक्तानामग्रे याति परन्तपः। सोऽयं पांशुषु शेतेऽद्य पश्य कालस्य पर्य्ययं।
ध्रुवं दुर्य्योधनो वीरो गतिं न सुलभां गतः। तथा ह्यभिमुखः शेते शयने वीरसेविते।
यं पुरा पर्य्युपासीना रमयन्ति वरस्त्रियः। तं वीरशयने सुप्तं रमयन्त्यशिवाः शिवाः।
यं पुरा पर्य्युपासीना रमयन्ति मनीषिणः। महीतलस्थं निहतं गृध्रास्तं पर्य्युपासते। ५००
यं पुरा व्यजनैरग्र्यैरुपवीजन्ति योषितः। तमद्य पक्षव्यजनैरुपवीजन्ति पक्षिणः।
एष शेते महाबाहुर्ब्बलवान् सत्यविक्रमः। सिंहेनेव द्विपः संख्ये भीमसेनेन पातितः।
पश्य दुर्य्योधनं कृष्ण शयानं रुधिरोक्षितं। निहतं भीमसेनेन गदां संयुज्य भारत।
अक्षौहिणीर्महाबाहुर्द्दश चैकाञ्च केशव। आनयद्यः पुरा संख्ये सोऽनयान्निधनं गतः।
एष दुर्य्योधनः शेते महेष्वासो महारथः। शार्द्दूल इव सिंहेन भीमसेनेन पातितः। ५०५
विदुरं ह्यवमन्यैष पितरञ्चैव मन्दभाक्। बालो वृद्धावमानेन मन्दो मृत्युवशं गतः।
निःसपत्ना मही यस्य त्रयोदशसमाः स्थिता। स शेते निहतो भूमौ सुतो मे पृथिवीपतिः।
अपश्यं कृष्ण पृथिवीं धार्त्तराष्ट्रानुशासितां। पूर्णां हस्तिगवाश्वैश्च वार्ष्णेय न तु तच्चिरं।
तामेवाद्य महाबाहो पश्याम्यन्यानुशासनां। हीनां हस्तिगवाश्वेन किन्नु जीवामि माधव।
इदं कष्टतरं पश्य पुत्त्रस्यापि वधान्मम। यदिमाः पर्य्युपासन्ते हताञ्छूरान्रणे स्त्रियः। ५१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

प्रकीर्णकेशां सुश्रोणीं दुर्य्योधनशुभाङ्गगां । रुक्मवेदीनिभां पश्य कृष्ण लक्ष्मणमातरं ।
नूनमेषा पुरा बाला जीवमाने महाभुजे । भुजावाश्रित्य रमते सुभुजस्य मनस्विनी ।
कथन्नु शतधा नेदं हृदयं मे विदीर्य्यते । पश्यन्त्या निहतं पुत्रं पुत्रेण सहितं रणे ।
पुत्रं रुधिरसंसिक्तमुपजिघ्रत्यनिन्दिता । दुर्य्योधनन्तु वामोरुः पाणिना परिमार्जति ।
किन्नु शोचति भर्त्तारं पुत्रञ्चैषा मनस्विनी । तथा ह्यवस्थिता भाति पुत्रञ्चाप्यभिवीक्ष्य सा । ५०५
स्वशिरः पञ्चशाखाभ्यामभिहत्यायतेक्षणा । पतत्युरसि वीरस्य कुरुराजस्य माधव ।
पुण्डरीकमिवाभाति पुण्डरीकान्तरप्रभा । मुखं प्रमृज्य पुत्रस्य भर्त्तुश्चैव तपस्विनी ।
यदि वाप्यागमाः सन्ति यदि वा श्रुतयस्तथा । ध्रुवं लोकानवाप्तोऽयं नृपो बाहुबलार्ज्जितान् ।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि दुर्य्योधनदर्शने सप्तदशोऽध्यायः ॥ १७ ॥
॥ गान्धार्य्युवाच ॥ पश्य माधव पुत्रान्मे शतसंख्यान् जितक्लमान् । गदया भीमसेनेन भूयिष्ठं निहतान्रणे ।
इदं दुःखतरं मेऽद्य यदिमा मुक्तमूर्द्धजाः । हतपुत्रा रणे बालाः परिधावन्ति मे स्नुषाः । ५१०
प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः । आपन्ना यत् स्पृशन्तीमा रुधिरार्द्रां वसुन्धरां ।
गृध्रानुत्सारयन्त्यश्च तथा गोमायुवायसान् । शोकेनार्त्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत ।
एषा वै ह्यनवद्याङ्गी करसम्मितमध्यमा । घोरं तद्वैशसं दृष्ट्वा निपतत्यतिदुःखिता ।
दृष्ट्वा मे पार्थिवसुतामेतां लक्ष्मणमातरं । राजपुत्रीं महाबाहो मनो न ह्युपशाम्यति ।
भ्रातॄंश्चान्याः पतींश्चान्याः पुत्रांश्च निहतान्रणे । दृष्ट्वा परिपतन्त्येताः प्रगृह्य सुभुजा भुजान् । ५१५
मध्यमानान्तु नारीणां वृद्धानां चापराजित । आक्रन्दं हतबन्धूनां दारुणे वैशसे शृणु ।
रथनीडानि देहांश्च हतानां गजवाजिनां । आश्रिताः श्रममोहार्त्ताः स्थिताः पश्य महाबल ।
अन्याश्चापहृतं कायात् चारुकुण्डलमुन्नसं । स्वस्य बन्धोः शिरः कृष्ण गृहीत्वा पश्य तिष्ठतीं ।
पूर्व्वजातिकृतं पापं मन्ये नाल्पमिवानघ । एताभिरनवद्याभिर्मया चैवाल्पमेधया ।
यदिदं धर्म्मराजेन पातितं नो जनार्द्दन । न हि नाशोऽस्ति वार्ष्णेय कर्म्मणोः शुभपापयोः । ५२०
प्रत्यग्रवयसश्चैव दर्शनीयकुचोदराः । कुलेषु जाता ह्रीमत्यः कृष्णपक्ष्माक्षिमूर्द्धजाः ।
हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः । सारस्य इव रासन्त्यः पतिताः पश्य माधव ।
फुल्लपद्मप्रकाशानि पुण्डरीकाक्ष योषितां । अनवद्यानि वक्त्राणि तापयत्येव रश्मिवान् ।
ईर्षूणां मम पुत्राणां वासुदेवावरोधनं । मत्तमातङ्गदर्पाणां पश्यन्त्यद्य पृथग्जनाः ।
शतचन्द्राणि चर्म्माणि ध्वजांश्चादित्यसन्निभान् । रौक्माणि चैव वर्म्माणि निष्कानपि च काञ्चनान् । ५२५
शीर्षत्राणानि चैतानि पुत्राणां मे महीतले । पश्य दीप्तानि गोविन्द पावकान् सुहुतानिव ।
एष दुःशासनः शेते शूरेणामित्रघातिना । पीतशोणितसर्व्वाङ्गो युधि भीमेन पातितः ।
गदया भीमसेनेन पश्य माधव मे सुतं । द्यूतक्लेशाननुस्मृत्य द्रौपद्या चोदितेन च ।
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्ज्जिता । प्रियञ्चिकीर्षता भ्रातुः कर्णस्य च जनार्द्दन ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सहैव सहदेवेन नकुलेनार्ज्जुनेन च । दासभार्य्याऽसि पाञ्चालि क्षिप्रं प्रविश नो गृहं । ५४०
ततोऽहमब्रुवं कृष्ण तदा दुर्य्योधनं नृपं । मृत्युपाशपरिच्छिन्नं शकुनिं पुत्त्र वर्ज्जय ।
निबोधैनं सुदुर्ब्बुद्धिं मातुलं कलहप्रियं । क्षिप्रमेनं परित्यज्य पुत्त्र शाम्यस्व पाण्डवैः ।
न बुध्यसे त्वं दुर्ब्बुद्धे भीमसेनममर्षणं । वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरं ।
तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् । उत्ससर्ज्ज विषं तेषु सर्पो गोवृषभेष्विव ।
एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ । निहतो भीमसेनेन सिंहेनेव महागजः । ५४५
अत्यर्थमकरोद्रौद्रं भीमसेनोऽत्यमर्षणः । दुःशासनस्य यत् क्रुद्धोऽपिबच्छोणितमाहवे ।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये अष्टादशोऽध्यायः ॥ १८ ॥

॥ गान्धार्य्युवाच ॥ एष माधव पुत्त्रो मे विकर्णः प्राज्ञसम्मतः । भूमौ विनिहतः शेते भीमेन शतधा कृतः ।
गजमध्ये हतः शेते विकर्णो मधुसूदन । नीलमेघपरिक्षिप्तः शरदीव निशाकरः ।
अस्य चापग्रहेणैव पाणिः कृतकिणो महान् । कथञ्चिच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ।
अस्य भार्य्यामिषप्रेप्सून् गृध्रानेतान् तपस्विनी । वारयत्यनिशं बाला न च शक्नोति माधव । ५५०
युवा वृन्दारकः शूरो विकर्णः पुरुषर्षभ । सुखोषितः सुखार्हश्च शेते पांशुषु माधव ।
कर्णिनालीकनाराचैर्भिन्नमर्म्माणमाहवे । अद्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमं ।
एष सङ्ग्रामशूरेण प्रतिज्ञाः पालयिष्यता । दुर्म्मुखो विमुखः शेते हतोऽरिगणहा रणे ।
अस्यैतद्वदनं कृष्ण श्वापदैरर्द्धभक्षितं । विभात्यभ्यधिकं तात सप्तम्यामिव चन्द्रमाः ।
शूरस्य हि रणे कृष्ण पश्याननमथेदृशं । स कथं निहतोऽमित्रैः पांशून् ग्रसति मे सुतः । ५५५
यस्याहवमुखे सौम्य स्थाता नैवोपपद्यते । स कथं दुर्म्मुखोऽमित्रैर्हतो विबुधलोकजित् ।
चित्रसेनं हतं भूमौ शयानं मधुसूदन । धार्त्तराष्ट्रमिमं पश्य प्रतिमानं धनुष्मतां ।
तं चित्रमाल्याभरणं युवत्यः शोककर्षिताः । क्रव्यादसङ्घैः सहिता रुदन्त्यः पर्य्युपासते ।
स्त्रीणां रुदितनिर्घोषः श्वापदानाञ्च गर्जितं । चित्ररूपमिदं कृष्ण विचित्रं प्रतिभाति मे ।
युवा वृन्दारको नित्यं प्रवरस्त्रीनिषेवितः । विविंशतिरसौ शेते ध्वस्तः पांशुषु माधव । ५६०
शरसंकृत्तवर्म्माणं वीरं विशसने हतं । परिवार्य्यासते गृध्राः परिविंशद्विविंशतिं ।
प्रविश्य समरे वीरः पाण्डवानामनीकिनीं । स वीरशयने शेते परः सत्पुरुषोचिते ।
स्मितोपपन्नं सुनसं सुभ्रु ताराधिपोपमं । अतीव शुभ्रं वदनं पश्य कृष्ण विविंशतेः ।
यं स्म तं पर्य्युपासन्ते वसुं वासवयोषितः । क्रीडन्तमिव गन्धर्व्वं देवकन्याः सहस्रशः ।
हन्तारं वीरसेनानां शूरं समितिशोभनं । निवर्हणममित्राणां दुःसहं विषहेत कः । ५६५
दुःसहस्यैतदाभाति शरीरं संवृतं शरैः । गिरिरात्मरुहैः फुल्लैः कर्णिकारैरिवावृतः ।
शातकौम्भ्या स्रजा भाति कवचेन च भास्वता । अग्निनेव गिरिः श्वेतो गतासुरपि दुःसहः ।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये ऊनविंशोऽध्यायः ॥ १९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

॥ गान्धार्य्युवाच ॥ अध्यर्द्धगुणमाहुर्यं बले शौर्य्ये च केशव । पित्रा त्वया च दाशार्ह दृप्तं सिंहमिवोत्कटं ।
यो बिभेद चमूमेको मम पुत्रस्य दुर्भिदां । स भूत्वा मृत्युरन्येषामयं मृत्युवशं गतः ।
तस्योपलक्षये कृष्ण कार्ष्णेरमिततेजसः । अभिमन्योर्हतस्यापि प्रभा नैवोपशाम्यति । ५७०
एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः । आर्त्ता बालं पतिं वीरं दृष्ट्वा शोचत्यनिन्दिता ।
तमेषा हि समासाद्य भार्य्या भर्त्तारमन्तिके । विराटदुहिता कृष्ण पाणिना परिमार्ज्जति ।
तस्य वक्त्रमुपाघ्राय सौभद्रस्य मनस्विनी । विबुद्धकमलाकारं कम्बुवृत्तशिरोधरं ।
काम्यरूपवती चैषा परिष्वजति भामिनी । लज्जमाना पुरा चैनं माध्वीकमदमूर्च्छिता ।
तस्य क्षतजसन्दिग्धं जातरूपपरिष्कृतं । विमुच्य कवचं वीर शरीरमभिवीक्ष्यते । ५७५
अवेक्षमाणा सा बाला कृष्ण त्वामभिभाषते । अयन्ते पुण्डरीकाक्ष सदृशाक्षो निपातितः ।
बले वीर्य्ये च सदृशस्तेजसा चैव तेऽनघ । रूपेण च तथाऽत्यर्थं शेते भुवि निपातितः ।
अत्यन्तसुकुमारस्य राङ्कवाजिनशायिनः । कच्चिदद्य शरीरन्ते भूमौ न परितप्यते ।
मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ । काञ्चनाङ्गदिनौ शेते निक्षिप्य विपुलौ भुजौ ।
व्यायम्य बहुधा नूनं सुखसुप्तः श्रमादिव । एवं विलपतीमार्त्तां न हि मामभिभाषसे । ५८०
न स्मराम्यपराधन्ते किं मां न प्रतिभाषसे । न तु मां त्वं पुरा दूरादभिवीक्ष्याभिभाषसे ।
न स्मराम्यपराधं मे किं मां न प्रतिभाषसे । आर्य्यामार्य्य सुभद्रां त्वमिमांश्च त्रिदशोपमान् ।
पितॄन् माञ्चैव दुःखार्त्तां विहाय क्व गमिष्यसि । तस्य शोणितदिग्धान् वै केशानुद्यम्य पाणिना ।
उत्सङ्गे वक्त्रमाधाय जीवन्तमिव पृच्छति । स्वस्रीयं वासुदेवस्य सुतं गाण्डीवधन्वनः ।
कथं त्वां रणमध्यस्थं जघ्नुरेते महारथाः । धिगस्तु क्रूरकर्त्तॄंस्तान् कृपकर्णजयद्रथान् । ५८५
द्रोणद्रौणायनी चोभौ यैरसि व्यसनीकृतः । नरर्षभाणां सर्व्वेषां कथमासीत्तदा मनः ।
बालं त्वां परिवार्य्यैकं मम दुःखाय जघ्नुषां । कथं नु पाण्डवेयानां पाञ्चालानाञ्च पश्यतां ।
त्वं वीर निधनं प्राप्तो नाथवान् सन्ननाथवत् । दृष्ट्वा च बहुभिः संख्ये हतं वीर पिता तव ।
वीरः पुरुषशार्दूल कथं जीवति पाण्डवः । न राज्यलाभो विपुलः शत्रूणां वा पराभवः ।
प्रीतिं धास्यति पार्थानां त्वामृते पुष्करेक्षण । तव शस्त्रजिताल्लोकान् धर्म्मेण च दमेन च । ५९०
क्षिप्रमन्वागमिष्यामि तत्र मां परिपालय । दुर्म्मरं पुनरप्राप्ते लोके भवति केनचित् ।
यदहं त्वां रणे दृष्ट्वा हतं जीवामि दुर्भगा । कामिदानीं नरव्याघ्र श्लक्ष्णया स्मितया गिरा ।
पितृलोके समेत्यान्यां मामिवामन्त्रयिष्यसि । नूनमप्सरसां स्वर्गे मनांसि प्रमथिष्यसि ।
परमेण च रूपेण गिरा च स्मितपूर्व्वया । प्राप्य पुण्यकृताल्लोकानप्सरोभिः समेयिवान् ।
सौभद्र विहरन् काले स्मरेथाः सुकृतानि मे । एतावानिह संवासो विहितस्ते मया सह । ५९५
षण्मासान् सप्तमे मासि त्वं वीर निधनं गतः । इत्युक्तवचनामेतामपकर्षन्ति दुःखितां ।
उत्तरां मोघसंकल्पां मत्स्यराजकुलस्त्रियः । उत्तरामपकृष्यैनामार्त्तामार्त्ततराः स्वयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च। द्रोणास्त्रशरसंछन्नं शयानं रुधिरोक्षितं।
विराटं विनदन्त्येते गृध्रगोमायुवायसाः। विनद्यमानं विहगैर्व्विराटमसितेक्षणा।
न शक्नुवन्ति विवशा विवर्त्तयितुमातुराः। आसामातपतप्तानामायासेन च योषितां। ६००
श्रमेण च विवर्णानां वक्त्राणां विप्लुतं वपुः। उत्तरञ्चाभिमन्युञ्च काम्बोजञ्च सुदक्षिणं।
शिशूनेतान् हतान् पश्य लक्ष्मणञ्च सुदर्शनं। आयोधनशिरोमध्ये शयानं पश्य माधव।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये विंशतितमोऽध्यायः॥ २० ॥
॥ गान्धार्य्युवाच ॥ एष वैकर्त्तनः शेते महेष्वासो महाबलः। ज्वलितानलवत् संख्ये संशान्तः पार्थतेजसा।
पश्य वैकर्त्तनं कर्णं निहत्यातिरथान् बहून्। शोणितौघपरीताङ्गं शयानं पतितं भुवि।
अमर्षी दीर्घरोषश्च महेष्वासो महारथः। रणे विनिहतः शेते शूरो गाण्डीवधन्वना। ६०५
यं स्म पाण्डवसंत्रासान्मम पुत्त्रा महारथाः। प्रायुध्यन्त पुरस्कृत्य मातङ्गा इव यूथपं।
शार्द्दूलमिव सिंहेन समरे सव्यसाचिना। मातङ्गमिव मत्तेन मातङ्गेन निपातितं।
समेताः पुरुषव्याघ्र निहतं शूरमाहवे। प्रकीर्णमूर्द्धजाः पत्न्यो रुदन्त्यः पर्य्युपासते।
उद्विग्नः सततं यस्माद्धर्म्मराजो युधिष्ठिरः। त्रयोदश समा निद्रां चिन्तयन्नाध्यगच्छत।
अनाधृष्यः परैर्युद्धे शत्रुभिर्म्मघवानिव। युगान्ताग्निरिवार्च्चिष्मान् हिमवानिव च स्थिरः। ६१०
स भूत्वा शरणं वीरो धार्त्तराष्ट्रस्य माधव। भूमौ विनिहतः शेते वातरुग्ण इव द्रुमः।
पश्य कर्णस्य पत्नीं त्वं वृषसेनस्य मातरं। लालप्यमानां करुणं रुदतीं पतितां भुवि।
आचार्य्यशापोऽनुगतो ध्रुवं त्वां यदग्रसच्चक्रमियं धरा ते। ततः शरेणापहृतं शिरस्ते धनञ्जयेनाहवशत्रुमध्ये।
हाहा धिगेषा पतिता विसंज्ञा समीक्ष्य जाम्बूनदबद्धकक्षं। कर्णं महाबाहुमदीनसत्त्वं सुषेणमाता रुदती भृशार्त्ता।
अल्पावशेषोऽपि कृतो महात्मा शरीरभक्षैः परिभक्षयद्भिः। द्रष्टुं न नः प्रीतिकरः शशीव कृष्णस्य पक्षस्य चतुर्द्दशाहे। ६१५
सा वर्त्तमाना पतिता पृथिव्यामुत्थाय दीना पुनरेव चैषा। कर्णस्य वक्त्रं परिजिघ्रमाणा रोरूयते पुत्त्रवधाभितप्ता।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये एकविंशोऽध्यायः॥ २१ ॥
॥ गान्धार्य्युवाच ॥ आवन्त्यं भीमसेनेन भक्षयन्ति निपातितं। गृध्रगोमायवः शूरं बहुबन्धुमबन्धुवत्।
तं पश्य कदनं कृत्वा शत्रूणां मधुसूदन। शयानं वीरशयने रुधिरेण समुक्षितं।
तं शृगालाश्च कङ्काश्च क्रव्यादाश्च पृथग्विधाः। तेन तेन विकर्षन्ति पश्य कालस्य पर्य्ययं।
शयानं वीरशयने वीरमाक्रन्दकारिणं। आवन्त्यं सहिता नार्य्यो रुदन्त्यः पर्य्युपासते। ६२०
प्रातिपेयं महेष्वासं हतं भल्लेन बाह्लिकं। प्रसुप्तमिव शार्द्दूलं पश्य कृष्ण मनस्विनं।
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते। सोमस्येवाभिपूर्णस्य पौर्णमास्यां समुद्यतः।
पुत्त्रशोकाभितप्तेन प्रतिज्ञां परिरक्षता। पाकशासनिना संख्ये वार्द्धक्षत्रिर्निपातितः।
एकादशचमूर्भित्त्वा रक्ष्यमाणं महात्मना। सत्यञ्चिकीर्षता पश्य हतमेनं जयद्रथं।
सिन्धुसौवीरभर्त्तारं दर्पपूर्णं मनस्विनं। भक्षयन्त्यशिवा गृध्रा जनार्द्दन जयद्रथं। ६२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संरक्ष्यमाणं भार्य्याभिरनुरक्ताभिरच्युत। वसन्त्या व्यवकर्षन्ति गहनं निम्नमन्तिकात्।
तमेताः पर्य्युपासन्ते रक्ष्यमाणं महाभुजं। सिन्धुसौवीरभर्त्तारं काम्बोजयवनस्त्रियः।
यदा कृष्णामुपादाय प्राद्रवत् केकयैः सह। तदैव बध्यः पाण्डूनां जनार्द्दन जयद्रथः।
कथमद्य न तां कृष्णामानयन्ति स्म ते पुनः। दुःशलामानयद्भिस्तु यदा त्यक्तो जयद्रथः।
सैषा मम सुता बाला विलपन्ती सुदुःखिता। प्रमापयति चात्मानमाक्रोशन्ती च पाण्डवान्। ६३०
किं नु दुःखतरं कृष्ण परं मम भविष्यति। मत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः।
हा हा धिग्दुःशलां पश्य वीतशोकभयामिव। शिरो भर्त्तुरनासाद्य धावमानामितस्ततः।
वारयामास यः सर्व्वान् पाण्डवान् पुत्त्रगृद्धिनः। हत्वा स विपुलां सेनां स्वयं मृत्युवशं गतः।
तं मत्तमिव मातङ्गं वीरं परमदुर्ज्जयं। परिवार्य्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये द्वाविंशोऽध्यायः॥ २२ ॥
॥ गान्धार्य्युवाच ॥ एष शल्यो हतः शेते साक्षान्नकुलमातुलः। धर्म्मज्ञेन हतस्तात धर्म्मराजेन संयुगे। ६३५
यस्त्वया स्पर्द्धते नित्यं सर्व्वत्र पुरुषर्षभ। स एष निहतः शेते मद्रराजो महारथः।
येन संगृहता तात रथमाधिरथेर्युधि। जयार्थं पाण्डुपुत्त्राणां तदा तेजोबधः कृतः।
हा हा धिक् पश्य शल्यस्य पूर्णचन्द्रसुदर्शनं। मुखं पद्मपलाशाक्षं काकैरादष्टमव्रणं।
अस्य चामीकराभस्य तप्तकाञ्चनसप्रभा। आस्याद्विनिःसृता जिह्वा भक्ष्यते कृष्ण पक्षिभिः।
युधिष्ठिरेण निहतं शल्यं समितिशोभनं। रुदन्त्यः पर्य्युपासन्ते मद्रराजं कुलस्त्रियः। ६४०
एताः सुसूक्ष्मवसना मद्रराजं नरर्षभं। क्रोशन्त्योऽथ समासाद्य क्षत्त्रियाः क्षत्त्रियर्षभं।
शल्यं निपतितं शूरं परिवार्य्याभितःस्थिताः। वाशिताग्टष्टयः पङ्के परिमग्नमिव द्विपं।
शल्यं शरणदं शूरं पश्यैनं रथसत्तमं। शयानं वीरशयने शरैर्व्विशकलीकृतं।
एष शैलालयो राजा भगदत्तः प्रतापवान्। गजाङ्कुशधरः श्रेष्ठः शेते भुवि निपातितः।
यस्य रुक्ममयी माला शिरस्येषा विराजते। श्वापदैर्भक्ष्यमाणस्य शोभयन्तीव मूर्द्धजान्। ६४५
एतेन किल पार्थस्य युद्धमासीत् सुदारुणं। लोमहर्षणमत्यर्थं शक्रस्य बलिना यथा।
योधयित्वा महाबाहुरेष पार्थं धनञ्जयं। संशयं गमयित्वा च कुन्तीपुत्त्रेण पातितः।
यस्य नास्ति समो लोके शौर्य्ये वीर्य्ये च कश्चन। स एष निहतः शेते भीष्मो भीष्मकृदाहवे।
पश्य शान्तनवं कृष्ण शयानं सूर्य्यवर्च्चसं। युगान्त इव कालेन पतितं सूर्य्यमम्बरात्।
एष तप्त्वा रणे शत्रून् शस्त्रतापेन वीर्य्यवान्। नरसूर्य्योऽस्तमभ्येति सूर्य्योऽस्तमिव केशव। ६५०
शरतल्पगतं वीरं धर्म्मे देवापिना समं। शयानं वीरशयने पश्य शूरनिषेविते।
कर्णिनालीकनाराचैरास्तीर्य्य शयनोत्तमं। आविश्य शेते भगवान् स्कन्दः शरवणं यथा।
अतूलपूर्णं गाङ्गेयस्त्रिभिर्व्वाणैः समन्वितं। उपधायोपधानाग्र्यं दत्तं गाण्डीवधन्वना।
पालयानः पितुः शास्त्रमूर्द्ध्वरेता महायशाः। एष शान्तनवः शेते माधवाप्रतिमो युधि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मात्मा तव धर्म्मज्ञः पारावर्य्येण निश्चये। अमर्त्य इव मर्त्यः सन्निष प्राणानधारयत्। ६५५
नास्ति युद्धे कृती कश्चिन्न विद्वान्न पराक्रमी। यत्र शान्तनवो भीष्मः शेतेऽद्य निहतः परैः।
स्वयमेतेन शूरेण पृच्छ्यमानेन पाण्डवैः। धर्म्मज्ञेनाहवे मृत्युराख्यातः सत्यवादिना।
प्रनष्टकुरुवंशः स पुनर्येन समुद्धृतः। स गतः कुरुभिः सार्द्धं महाबुद्धिः पराभवं।
धर्म्मेषु कुरवः कन्नु परिप्रच्छ्यन्ति माधव। गते देवव्रते स्वर्गं देवकल्पे नरर्षभे।
अर्ज्जुनस्य विनेतारमाचार्य्यं सात्यकेस्तथा। तं पश्य पतितं द्रोणं कुरूणां द्विजसत्तमं। ६६०
अस्त्रं चतुर्व्विधं वेद यथैव त्रिदशेश्वरः। भार्गवो वा महावीर्य्यस्तथा द्रोणोऽपि माधव।
यस्य प्रसादाद्वीभत्सुः पाण्डवः कर्म्म दुष्करं। चकार स हतः शेते नैनमस्त्राण्यपालयन्।
यं पुरोधाय कुरव आह्वयन्ते स्म पाण्डवान्। सोऽयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रैः परिष्कृतः।
यस्य निर्द्दहतः सेनां गतिरग्नेरिवाभवत्। स भूमौ निहतः शेते शान्तार्च्चिरिव पावकः।
धनुर्मुष्टिरशीर्णश्च हस्तावापश्च माधव। द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा। ६६५
वेदा यस्माच्च चत्वारः सर्व्वास्त्राणि च केशव। अनपेतानि वै शूराद्यथैवादौ प्रजापतेः।
वन्दनार्हाविमौ तस्य वन्दिभिर्व्वन्दितौ शुभौ। गोमायवो विकर्षन्ति पादौ शिष्यगणार्च्चितौ।
द्रोणं द्रुपदपुत्त्रेण निहतं मधुसूदन। कृपी कृपणमन्वास्ते दुःखोपहतचेतना।
तां पश्य पतितामार्त्तां मुक्तकेशीमधोमुखीं। हतं पतिमुपासन्तीं द्रोणं शस्त्रभृताम्वरं।
वाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव। उपास्ते वै मृधे द्रोणं जटिला ब्रह्मचारिणी। ६७०
प्रेतकृत्ये च यतते कृपी कृपणमातुरा। हतस्य समरे भर्त्तुः सुकुमारी यशस्विनी।
अग्नीनाहृत्य विधिवच्चितां प्रज्वाल्य सर्व्वशः। द्रोणमाधाय गायन्ति त्रीणि सामानि सामगाः।
कुर्व्वन्ति च चितामेते जटिला ब्रह्मचारिणः। धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव।
शस्त्रैश्च विविधैरन्यैर्धक्ष्यन्तो भूरितेजसं। इति द्रोणं समाधाय शंसन्ति च रुदन्ति च।
सामभिस्त्रिभिरन्तस्थैरनुशंसन्ति चापरे। अग्नावग्निं समाधाय द्रोणं हुत्वा हुताशने। ६७५
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः। अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं तदा।
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ गान्धार्य्युवाच ॥ सोमदत्तसुतं पश्य युयुधानेन पातितं। वितुद्यमानं विहगैर्ब्बहुभिर्म्माधवान्तिके।
पुत्त्रशोकाभिसन्तप्तः सोमदत्तो जनार्द्दन। युयुधानं महेष्वासं गर्हयन्निव दृश्यते।
असौ हि भूरिश्रवसो माता परमदुःखिता। आश्वासयति भर्त्तारं सोमदत्तमनिन्दिता।
दिष्ट्या नैनं महाराज दारुणं भरतक्षयं। कुरुसंक्रन्दनं घोरं युगान्तमनुपश्यति। ६८०
दिष्ट्या यूपध्वजं वीरं पुत्त्रं भूरिसहस्रदं। अनेकक्रतुयज्वानं निहतं नाद्य पश्यसि।
दिष्ट्या स्नुषाणामाक्रन्दे घोरं विलपितं बहु। न शृणोषि महाराज सारसीनामिवार्णवे।
एकवस्त्रानुसंवीताः प्रकीर्णाः सितमुर्द्धजाः। स्नुषास्ते परिधावन्ति हतापत्या हतेश्वराः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्वापदैर्भक्ष्यमाणं त्वमहो दिष्ट्या न पश्यसि । छिन्नबाहुं नरव्याघ्रमर्ज्जुनेन निपातितं ।
शलं विनिहतं संख्ये भूरिश्रवसमेव च । स्नुषाश्च विविधाः सर्व्वा दृष्ट्वा नाद्येह पश्यसि । ६८५
दिष्ट्या तत् काञ्चनं छत्रं यूपकेतोर्महात्मनः । विनिकीर्णं रथोपस्थे सौमदत्तेर्न पश्यसि ।
अमूस्तु भूरिश्रवसो भार्य्याः सात्यकिना हतं । परिवार्य्यानुशोचन्ति भर्त्तारमसितेक्षणाः ।
एता विलप्य बहुलं भर्त्तुः शोकेन कर्षिताः । पतन्त्यभिमुखं भूमौ कृपणं तव केशव ।
वीभत्सुरतिवीभत्सं कर्म्मेदमकरोत् कथं । प्रमत्तस्य यदच्छैत्सीत् बाहुं शूरस्य यज्वनः ।
ततः पापतरं कर्म्म कृतवानपि सात्यकिः । तस्मात् प्रायोपविष्टस्य प्राहार्षीत् शंसितात्मनः । ६९०
एको द्वाभ्यां हतः शेषे त्वमधर्म्मेण धार्म्मिक । इति यूपध्वजस्यैताः स्त्रियः क्रोशन्ति माधव ।
भार्य्या यूपध्वजस्यैषा करसम्मितमध्यमा । कृत्वोत्सङ्गे भुजं भर्त्तुः कृपणं पर्य्यदेवयत् ।
अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः । नाभ्यूरुजघनस्पर्शी नीविविस्रंसनः करः ।
अयं स हन्ता शत्रूणां मित्राणामभयप्रदः । प्रदाता गोसहस्राणां क्षत्रियान्तकरः करः ।
वासुदेवस्य सान्निध्ये पार्थेनाक्लिष्टकर्म्मणा । युध्यतः समरेऽन्येन प्रमत्तस्य निपातितः । ६९५
किं नु वक्ष्यसि संसत्सु कथासु च जनार्द्दन । अर्ज्जुनस्य महत् कर्म्म स्वयं वा स किरीटवान् ।
इत्येवं गर्हयित्वैषा तूष्णीमास्ते वराङ्गना । तामेतामनुशोचन्ति सपत्न्यः स्वामिव स्नुषां ।
गान्धारराजः शकुनिर्ब्बलवान् सत्यविक्रमः । निहतः सहदेवेन भागिनेयेन मातुलः ।
यः पुरा हेमदण्डाभ्यां व्यजनाभ्यां स्म वीज्यते । स एव पक्षिभिः पक्षैः शयान उपवीज्यते ।
यः स्वरूपाणि कुरुते शतशोऽथ सहस्रशः । तस्य मायाविनो माया दग्धाः पाण्डवतेजसा । ७००
मायया निकृतिप्रज्ञो जितवान् यो युधिष्ठिरं । सभायां विपुलं राज्यं स पुनर्जीवितं जितः ।
शकुन्ताः शकुनिं कृष्ण समन्तात् पर्य्युपासते । कैतवं मम पुत्राणां विनाशायोपशिक्षितं ।
एतेनैतन्महद्वैरं प्रसक्तं पाण्डवैः सह । वधाय मम पुत्राणामात्मनः सगणस्य च ।
यथैव मम पुत्राणां लोकाः शस्त्रजिता विभो । एवमस्यापि दुर्ब्बुद्धेर्लोकाः शस्त्रेण वै जिताः ।
कथञ्च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह । विरोधयेदृजुप्रज्ञाननृजुर्म्मधुसूदन । ७०५
इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीवाक्ये चतुर्विंशोऽध्यायः ॥ २४ ॥
॥ गान्धार्य्युवाच ॥ काम्बोजं पश्य दुर्द्धर्षं काम्बोजास्तरणोचितं । शयानमृषभस्कन्धं हतं पांशुषु माधव ।
यस्य क्षतजसन्दिग्धौ बाहू चन्दनभूषितौ । अवेक्ष्य कृपणं भार्य्या विलपत्यतिदुःखिता ।
इमौ तौ परिघप्रख्यौ बाहू शुभतलाङ्गुली । ययोर्व्विवरमापन्नां न रतिर्मां पुराजहात् ।
कां गतिं नु गमिष्यामि त्वया हीना जनेश्वर । हतबन्धुरनाथेव वेपन्ती मधुरस्वरा ।
आतपे क्लाम्यमानानां विविधानामिव स्रजां । क्लान्तानामपि नारीणां न श्रीस्त्यजति वै तनुं । ७१०
श[illegible]नमभितः शूरं कालिङ्गं मधुसूदन । पश्य दीप्ताङ्गदयुगप्रतिबद्धमहाभुजं ।
मागधानामधिपतिं जयत्सेनं जनार्द्दन । परिवार्य्य प्ररुदिता मागध्यः पश्य योषितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आसामायतनेत्राणां सुस्वराणां जनार्द्दन। मनःश्रुतिहरो नादो मनो मोहयतीव मे।
प्रकीर्णसर्व्वाभरणा रुदन्त्यः शोककर्षिताः। आस्तीर्णशयनोपेता मागध्यः शेरते भुवि।
कोशलानामधिपतिं राजपुत्रं बृहद्बलं। भर्त्तारं परिवार्य्यैताः पृथक् प्ररुदिताः स्त्रियः। ७१५
अस्य गात्रगतान् वाणान् कार्ष्णिबाहुबलार्प्पितान्। उद्धरन्त्यसुखाविष्टा मूर्च्छमानाः पुनः पुनः।
आसां सर्व्वानवद्यानामातपेन परिश्रमात्। प्रम्लाननलिनाभानि भान्ति वक्त्राणि माधव।
द्रोणेन निहताः शूराः शेरते रुचिराङ्गदाः। धृष्टद्युम्नसुताः सर्व्वे शिशवो हेममालिनः।
रथाग्न्यगारञ्चापार्च्चिः शरवृष्टिगदेन्धनं। द्रोणमासाद्य निर्द्दग्धाः शलभा इव पावकं
तथैव निहताः शूराः शेरते [illegible]चिराङ्गदाः। द्रोणेनाभिमुखाः सर्व्वे भ्रातरः पञ्च केकयाः। ७२०
तप्तकाञ्चनवर्म्माणस्तालध्वजरथस्रजः। भासयन्ती महीं भासा ज्वलिता इव पावकाः।
द्रोणेन द्रुपदं सङ्ख्ये पश्य माधव पातितं। महा द्विपमिवारण्ये सिंहेन महता हतं।
पाञ्चालराज्ञो विमलं पुण्डरीकाक्ष पाण्डुरं। आतपत्रं समाभाति शरदीव निशाकरः।
एतास्तु द्रुपदं वृद्धं स्नुषा भार्य्याः सुदुःखिताः। दग्ध्वा गच्छन्ति पाञ्चाल्यं राजानमपसव्यतः।
धृष्टकेतुं महेष्वासं चेदिपुङ्गवमङ्गनाः। द्रोणेन निहतं शूरं हरन्ति हृतचेतसः। ७२५
द्रोणास्त्रमभिहत्यैष विमर्द्दे मधुसूदन। महेष्वासो हतः शेते नद्याहृत इव द्रुमः।
एष चेदिपतिः शूरो धृष्टकेतुर्म्महारथः। शेते विनिहतः संख्ये हत्वा शत्रून् सहस्रशः।
विच्छिद्यमानं विहगैस्तं भार्य्याः प्रत्युपस्थिताः। चेदिराजं हृषीकेश सुवेशञ्चारुकुण्डलं।
दाशार्हपुत्त्रजं वीरं शयानं सत्यविक्रमं। आरोप्याङ्के रुदन्त्येताश्चेदिराजं वराङ्गनाः।
अस्य पुत्त्रं हृषीकेश सुकेशञ्चारुकुण्डलं। द्रोणेन समरे पश्य निकृत्तं बहुधा शरैः। ७३०
पितरं नूनमाजिस्थं युध्यमानं परैः सह। नाजहात् पितरं वीरमद्यापि मधुसूदन।
एवं ममापि पुत्त्रस्य पुत्त्रः पितरमन्वगात्। दुर्य्योधनं महाबाहो लक्ष्मणः परवीरहा।
विन्दानुविन्दावावन्त्यौ पतितौ पश्य केशव। हिमान्ते पुष्पितौ शालौ मरुता गलिताविव।
काञ्चनाङ्गदवर्म्माणौ रणे खड्गधनुर्द्धरौ। ऋषभप्रतिरूपाक्षौ शयानौ विमलस्रजौ।
अवध्याः पाण्डवाः कृष्ण सर्व्व एव त्वया सह। ये मुक्ता द्रोणभीष्माभ्यां कर्णात् वैकर्त्तनात् कृपात्। ७३५
दुर्य्योधनाद्द्रोणसुतात् सैन्धवाच्च महारथात्। सोमदत्तादिकर्णाच्च शूराच्च कृतवर्म्मणः।
ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः। त इमे निहताः सर्व्वे पश्य कालस्य पर्य्ययं।
नातिभारोऽस्ति दैवस्य ध्रुवं माधव कश्चन। यदिमे निहताः शूराः क्षत्त्रियाः क्षत्त्रियर्षभाः।
तदैव निहताः कृष्ण मम पुत्त्रास्तरस्विनः। यदैवाकृतकामस्त्वमुपप्लव्यं गतः पुनः।
शान्तनोश्चैव पुत्त्रेण प्राज्ञेन विदुरेण च। तदैवोक्ताऽस्मि मा स्नेहं कुरुष्वात्मसुतेष्विति। ७४०
तयोर्न दर्शनं तात मिथ्या भवितुमर्हति। अचिरेणैव पुत्त्रा मे भस्मीभूता जनार्द्दन।
॥ वैशम्पायन उवाच॥ इत्युक्त्वा न्यपतद्भूमौ गान्धारी शोकमूर्च्छिता। दुःखोपहतविज्ञाना धैर्य्यमुत्सृज्य भारत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

ततः कोपपरीताङ्गी पुत्त्रशोकपरिप्लुता । जगाम शौरिं दोषेण गान्धारी व्यथितेन्द्रिया ।

॥ गान्धार्य्युवाच ॥ पाण्डवा धार्त्तराष्ट्राश्च दग्धाः कृष्ण परस्परं । उपेक्षिता विनश्यन्तस्त्वया कस्माज्जनार्द्दन ।

शक्तेन बहुभृत्येन विपुले तिष्ठता बले । उभयत्र समर्थेन श्रुतवाक्येन चैव ह । ७४५

इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन । यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ।

पतिशुश्रूषया यन्मे तपः किञ्चिदुपार्ज्जितं । तेन त्वां दुरवापेन शप्स्ये चक्रगदाधर ।

यस्मात् परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः । उपेक्षितास्ते गोविन्द तस्माज्ज्ञातीन् वधिष्यसि ।

त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन । हतज्ञातिर्हतामात्यो हतपुत्त्रो वनेचरः ।

कुत्सितेनाप्युपायेन निधनं समवाप्स्यसि । तवाप्येवं हतसुता निहतज्ञातिबान्धवाः । ७५०

स्त्रियः परिपतिष्यन्ति यथैव भरतस्त्रियः ।

॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु वचनं वासुदेवो महामनाः । उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव ।

संहर्त्ता वृष्णिचक्रस्य नान्यो मद्विद्यते शुभे । जानेऽहमेतदप्येवं चीर्णं चरसि क्षत्रिये ।

अवध्यास्ते नरैरन्यैरपि वा देवदानवैः । परस्परकृतं नाशं यतः प्राप्स्यन्ति यादवाः ।

इत्युक्तवति दाशार्हे पाण्डवास्त्रस्तचेतसः । बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते । ७५५

इति श्रीमहाभारते स्त्रीपर्व्वणि स्त्रीविलापपर्व्वणि गान्धारीशापदाने पञ्चविंशोऽध्यायः ॥ २५ ॥

समाप्तञ्चेदं स्त्रीविलापपर्व्व ॥

॥ अथ श्राद्धपर्व्व ॥

॥ श्रीभगवानुवाच ॥ उत्तिष्ठोत्तिष्ठ गान्धारि मा च शोके मनः कृथाः । तवैव ह्यपराधेन बहवो निधनं गताः ।

यत्त्वं पुत्त्रं दुरात्मानमीर्षुमत्यन्तमानिनं । दुर्य्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे ।

निष्ठुरं वैरपुरुषं वृद्धानां शासनातिगं । कथमात्मकृतं दोषं मय्याधातुमिहेच्छसि ।

मृतं वा यदि वा नष्टं योऽतीतमनुशोचति । दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ।

तपोऽर्थीयं ब्राह्मणी धत्त गर्भं गौर्व्वोढारं धावितारं तुरङ्गी । शूद्रा दासं पशुपालञ्च वैश्या बधार्थीयं त्वद्विधा राजपुत्त्री । ७६०

॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा वासुदेवस्य पुनरुक्तं वचोऽप्रियं । तूष्णीं बभूव गान्धारी शोकव्याकुललोचना ।

धृतराष्ट्रस्तु राजर्षिर्निगृह्याबुद्धिजं तमः । पर्य्यपृच्छत धर्म्मात्मा धर्म्मराजं युधिष्ठिरं ।

जीवतां परिमाणज्ञ सैन्यानामपि पाण्डव । हतानां यदि जानीषे परिमाणं वदस्व मे ।

॥ युधिष्ठिर उवाच ॥ दशायुतानामयुतं सहस्राणि च विंशतिः । कोट्यः षष्टिश्च षट् चैव येऽस्मिन् राजन्मृधे हताः ।

अलक्षाणान्तु वीराणां सहस्राणि चतुर्द्दश । दश चान्यानि राजेन्द्र शतं षष्टिश्च पञ्च च । ७६५

॥ धृतराष्ट्र उवाच ॥ युधिष्ठिर गतिं कां ते गताः पुरुषसत्तम । आचक्ष्व मे महाबाहो सर्व्वज्ञो ह्यसि मे मतः ।

॥ युधिष्ठिर उवाच ॥ यैर्हुतानि शरीराणि हृष्टैः परमसंयुगे । देवराजसमान् लोकान् गतास्ते सत्यविक्रमाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ये त्वहृष्टेन मनसा मर्त्तव्यमिति भारत। युध्यमाना हताः संख्ये ते गन्धर्व्वैः समागताः।
ये च संग्रामभूमिष्ठा याचमानाः पराङ्मुखाः। शस्त्रेण निधनं प्राप्ता गतास्ते गुह्यकान् प्रति।
पात्यमानाः परैर्य्ये तु हीयमाना निरायुधाः। ह्रीनिषेवा महात्मानः परानभिमुखा रणे।
छिद्यमानाः शितैः शस्त्रैः क्षत्त्रधर्म्मपरायणाः। गतास्ते ब्रह्मसदनं हता वीराः सुवर्च्चसः।
ये तत्र निहता राजन्नन्तरायोधनं प्रति। यथाकथञ्चित्ते राजन् संप्राप्तास्तूत्तरान् कुरून्।
॥ धृतराष्ट्र उवाच ॥ केन ज्ञानबलेनैवं पुत्त्र पश्यसि सिद्धवत्। तन्मे वद महाबाहो श्रोतव्यं यदि मन्यसे।
॥ युधिष्ठिर उवाच ॥ निदेशाद्भवतः पूर्व्वं वने विचरता मया। तीर्थयात्राप्रसङ्गेन सम्प्राप्तोऽयमनुग्रहः।
देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिं। दिव्यं चक्षुरनुप्राप्तं ज्ञानयोगेन वै पुरा।
॥ धृतराष्ट्र उवाच ॥ येऽत्रानाथा जनस्यास्य सनाथा ये च भारत। कच्चित्तेषां शरीराणि धक्ष्यन्ति विधिपूर्व्वकं।
न येषां सन्ति कर्त्तारो न च येऽत्राहिताग्नयः। वयञ्च कस्य कुर्य्यामो बहुलत्वात्तात कर्म्मणः।
यान् सुपर्णाश्च गृध्राश्च विकर्षन्ति यतस्ततः। तेषां नु कर्म्मणा लोका भविष्यन्ति युधिष्ठिर।
॥ वैशम्पायन उवाच ॥ एवमुक्तो महाप्राज्ञः कुन्तीपुत्त्रो युधिष्ठिरः। आदिदेश सुधर्म्माणं धौम्यं सूतञ्च सञ्जय।
विदुरञ्च महाबुद्धिं युयुत्सुञ्चैव कौरवं। इन्द्रसेनमुखांश्चैव भृत्यान् सूतांश्च सर्व्वशः।
भवन्तः कारयन्त्वेषां प्रेतकार्य्याण्यनेकशः। यथा चानाथवत् किञ्चिच्छरीरं न विनश्यति।
शासनाद्धर्म्मराजस्य क्षत्ता सूतश्च सञ्जयः। सुधर्म्मा धौम्यसहित इन्द्रसेनादयस्तथा।
चन्दनागुरुकाष्ठानि तथा कालीयकान्युत। घृतं तैलञ्च गन्धांश्च क्षौमाणि वसनानि च।
समाहृत्य महार्हाणि दारूणाञ्चैव सञ्चयान्। रथांश्च मृदितांस्तत्र नानाप्रहरणानि च।
चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान्। दाहयामासुरव्यग्रा विधिदृष्टेन कर्म्मणा।
दुर्य्योधनञ्च राजानं भ्रातॄंश्चास्य शताधिकान्। शल्यं शलञ्च राजानं भूरिश्रवसमेव च।
जयद्रथञ्च राजानमभिमन्युञ्च भारत। दौःशासनं लक्ष्मणञ्च धृष्टकेतुञ्च पार्थिवं।
बृहन्तं सोमदत्तञ्च सृञ्जयांश्च शताधिकान्। राजानं क्षेमधन्वानं विराटद्रुपदौ तथा।
शिखण्डिनञ्च पाञ्चाल्यं धृष्टद्युम्नञ्च पार्षतं। युधामन्युञ्च विक्रान्तमुत्तमौजसमेव च।
कौशल्यं द्रौपदेयांश्च शकुनिञ्चैव सौबलं। अचलं वृषकञ्चैव भगदत्तञ्च पार्थिवं।
कर्णं वैकर्त्तनञ्चैव सहपुत्त्रममर्षणं। केकयांश्च महेष्वासान् त्रिगर्त्तांश्च महारथान्।
घटोत्कचं राक्षसेन्द्रं बकभ्रातरमेव च। अलम्बुषं राक्षसेन्द्रं जलसन्धञ्च पार्थिवं।
अन्यांश्च पार्थिवान्राजन् शतशोऽथ सहस्रशः। घृतधाराहुतैर्दीप्तैः पावकैः समदाहयन्।
पितृमेधाश्च केषाञ्चिदवर्त्तन्त महात्मनां। सामभिश्चाप्यगायन्त तेऽन्वशोचन्त चापरैः।
साम्नामृचाञ्च नादेन स्त्रीणाञ्च रुदितस्वनैः। कश्मलं सर्व्वभूतानां निशायां समजायत।
ते विधूमाः प्रदीप्ताश्च दीप्यमानाश्च पावकाः। नभसीवान्वदृश्यन्त ग्रहास्तन्वभ्रसंवृताः।
ये चाप्यनाथास्तत्रासन् नानादेशसमागताः। तांश्च सर्व्वान समानाय्यराशीन् कृत्वा सहस्रशः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चित्वा दारुभिरव्यग्रैः प्रभूतैः स्नेहपाचितैः। दाहयामास विदुरो धर्म्मराजस्य शासनात्।
कारयित्वा क्रियास्तेषां कुरुराजो युधिष्ठिरः। धृतराष्ट्रं पुरस्कृत्य गङ्गामभिमुखोऽगमत्।
इति श्रीमहाभारते स्त्रीपर्व्वणि श्राद्धपर्व्वणि कुरूणामौर्द्ध्वदेहिके षड्विंशोऽध्यायः॥ २६ ॥

॥ वैशम्पायन उवाच ॥ ते समासाद्य गङ्गान्तु शिवां पुण्यजलोचितां। ह्रदिनीञ्च प्रसन्नाञ्च महारूपां महावनां। ८००
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च। ततः पितॄणां भ्रातॄणां पौत्त्राणां स्वजनस्य च।
पुत्त्राणामार्य्यकाणाञ्च पतीनाञ्च कुरुस्त्रियः। उदकञ्चक्रिरे सर्व्वा रुदन्त्यो भृशदुःखिताः।
सुहृदाञ्चापि धर्म्मज्ञाः प्रचक्रुः सलिलक्रियाः। उदके क्रियमाणे तु वीराणां वीरपत्निभिः।
सूपतीर्थाऽभवद्गङ्गा भूयो विप्रससार च। तन्महोदधिसङ्काशं निरानन्दमनुत्सवं।
वीरपत्नीभिराकीर्णं गङ्गातीरमशोभत। ततः कुन्ती महाराज सहसा शोककर्षिता। ८०५
रुदन्ती मन्दया वाचा पुत्त्रान् वचनमब्रवीत्। यः स शूरो महेष्वासो रथयूथपयूथपः।
अर्ज्जुनेन हतः संख्ये वीरलक्षणलक्षितः। यं सूतपुत्त्रं मन्यध्वं राधेयमिति पाण्डवाः।
यो व्यराजच्चमूमध्ये दिवाकर इव प्रभुः। प्रत्ययुध्यत यः सर्व्वान् पुरा वः सपदानुगान्।
दुर्य्योधनबलं सर्व्वं यः प्रकर्षन् व्यरोचत। यस्य नास्ति समो वीर्य्ये पृथिव्यामपि कश्चन।
यो वृणीत यशः शूरः प्राणैरपि सदा भुवि। सत्यसन्धस्य शूरस्य संग्रामेष्वपलायिनः। ८१०
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकर्म्मणः। स हि वः पूर्व्वजो भ्राता भास्करान्मय्यजायत।
कुण्डली कवची शूरो दिवाकरसमप्रभः। श्रुत्वा तु पाण्डवाः सर्व्वे मातुर्व्वचनमप्रियं।
कर्णमेवान्वशोचन्त भूयश्चार्त्ततराऽभवन्। ततः स पुरुषव्याघ्रः कुन्तीपुत्त्रो युधिष्ठिरः।
उवाच मातरं वीरो निश्वसन्निव पन्नगः। यः शरोर्म्मिर्ध्वजावर्त्तो महाभुजमहाग्रहः।
तलशब्दानुनदितो महारथमहाह्रदः। यस्येषुपातमासाद्य नान्यस्तिष्ठेद्धनञ्जयात्। ८१५
भवत्याः स कथं पुत्त्रो देवगर्भः पुराऽभवत्। यस्य बाहुप्रतापेन तापिताः सर्व्वतो वयं।
तमग्निमिव वस्त्रेण कथं छादितवत्यसि। यस्य बाहुबलं नित्यं धार्त्तराष्ट्रैरुपासितं।
उपासितं यथाऽस्माभिर्ब्बलं गाण्डीवधन्वनः। भूमिपानाञ्च सर्व्वेषां बलं बलवताम्बरः।
नान्यः कुन्तीसुतात् कर्णादग्रहाद्रथिनां रथी। स नः प्रथमजो भ्राता सर्व्वशस्त्रभृताम्बरः।
असूत तं भवत्यग्रे कथमद्भुतविक्रमं। अहो भवत्या मन्त्रस्य गूहनेन वयं हताः। ८२०
निधनेन हि कर्णस्य पीडिताः स्म सबान्धवाः। अभिमन्योर्व्विनाशेन द्रौपदेयवधेन च।
पाञ्चालानाञ्च नाशेन कुरूणां पतनेन च। ततः शतगुणं दुःखमिदं मामस्पृशद्भृशं।
कर्णमेवानुशोचन् हि सन्दह्येऽग्नाविवाहितः। नेह स्म किञ्चिदप्राप्यं भवेदपि दिवि स्थितं।
न च स्म वैशसं घोरं कौरवान्तकरं भवेत्। एवं विलप्य बहुलं धर्म्मराजो युधिष्ठिरः।
व्यरुदन् दुःखितो राजंश्चकारास्योदकं प्रभुः। ततो विनेदुः सहसा स्त्रियस्ताः खलु सर्व्वशः। ८२५
अभितो याः स्थितास्तत्र तस्मिन्नुदककर्म्मणि। तत आनाययामास कर्णस्य सपरिच्छदाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्त्रियः कुरुपतिर्धीमान् भ्रातुः प्रेम्णा युधिष्ठिरः। स ताभिः सह धर्म्मात्मा प्रेतकृत्यमनन्तरं।
कृत्वोत्ततार गङ्गायाः सलिलादाकुलेन्द्रियः।
इति श्रीमहाभारते स्त्रीपर्व्वणि श्राद्धपर्व्वणि कर्णस्य गूढजत्वकथने सप्तविंशोऽध्यायः॥ २७॥

॥ समाप्तञ्चेदं स्त्रीपर्व्व ॥

३ ३ भ

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीमहाभारतं

॥ अथ शान्तिपर्व्व ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं । देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ।

॥ वैशम्पायन उवाच ॥ कृतोदकास्ते सुहृदां सर्व्वेषां पाण्डुनन्दनाः । विदुरो धृतराष्ट्रश्च सर्व्वाश्च भरतस्त्रियः ।
तत्र ते सुमहात्मानो न्यवसन् पाण्डुनन्दनाः । शौचं निर्व्वर्त्तयिष्यन्तो मासमात्रं वहिः पुरात् ।
कृतोदकन्तु राजानं धर्म्मराजं युधिष्ठिरं । अभिजग्मुर्महात्मानः सिद्धा ब्रह्मर्षिसत्तमाः ।
द्वैपायनो नारदश्च देवलश्च महानृषिः । देवस्थानश्च कण्वश्च तेषां शिष्याश्च सत्तमाः ।
अन्ये च वेदविद्वांसः कृतप्रज्ञा द्विजातयः । गृहस्थाः स्नातकाः सन्तो ददृशुः कुरुसत्तमं । ५
तेऽभिगम्य महात्मानः पूजिताश्च यथाविधि । आसनेषु महार्हेषु विविशुस्ते महर्षयः ।
प्रतिगृह्य ततः पूजान्तत्कालसदृशीं तदा । पर्य्युपासन्यथान्यायं परिवार्य्य युधिष्ठिरं ।
पुण्ये भागीरथीतीरे शोकव्याकुलचेतसं । आश्वासयन्तो राजेन्द्रं विप्राः शतसहस्रशः ।
नारदस्त्वब्रवीत्काले धर्म्मपुत्त्रं युधिष्ठिरं । सम्भाष्य मुनिभिः सार्द्धं कृष्णद्वैपायनादिभिः ।
भवतो बाहुवीर्य्येण प्रसादान्माधवस्य च । जितेयमवनिः कृत्स्ना धर्म्मेणैव युधिष्ठिर । १०
दिष्ट्या मुक्तस्तु संग्रामादस्माल्लोकभयङ्करात् । क्षत्त्रधर्म्मरतश्चापि कच्चिन्मोदसि पाण्डव ।
कच्चिच्च निहतामित्रः प्रीणासि सुहृदो नृप । कच्चिच्छ्रियमिमां प्राप्य न त्वां शोकः प्रबाधते ।
॥ युधिष्ठिर उवाच ॥ विजितेयं मही कृत्स्ना कृष्णबाहुबलाश्रयात् । ब्राह्मणानां प्रसादेन भीमार्जुनबलेन च ।
इदन्तु मे महत् दुःखं वर्त्तते हृदि नित्यदा । कृत्वा ज्ञातिक्षयमिमं महान्तं लोभकारितं ।
सौभद्रं द्रौपदेयांश्च घातयित्वा सुतान् प्रियान् । जयोऽयमजयाकारो भगवन् प्रतिभाति मे । १५
किन्तु वक्ष्यति वार्ष्णेयी वधूर्म्मे मधुसूदनं । द्वारकावासिनी कृष्णमितः प्रतिगतं हरिं ।
द्रौपदी हतपुत्त्रेयं कृपणा हतबान्धवा । अस्मत्प्रियहिते युक्ता भूयः पीडयतीव मां ।
इदमन्यच्च भगवन् यत्त्वां वक्ष्यामि नारद । मन्त्रसंवरणेनास्मि कुन्त्या दुःखेन योजितः ।
यः स नागायुतबलो लोकेऽप्रतिरथो रणे । सिंहदर्पगतिर्द्धीमान् घृणी दाता यतव्रतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

आश्रयो धार्त्तराष्ट्राणां मानी तीक्ष्णपराक्रमः। अमर्षी नित्यसंरम्भी चेप्ताऽस्माकं रणे रणे।
शीघ्रास्त्रश्चित्रयोधी च कृती चाद्भुतविक्रमः। गूढोत्पन्नः सुतः कुन्त्या भ्राताऽस्माकमसौ किल।
तोयकर्म्मणि तं कुन्ती कथयामास सूर्य्यजं। पुत्रं सर्व्वगुणोपेतमवकीर्णं जले पुरा।
मञ्जूषायां समाधाय गङ्गास्रोतस्यमज्जयत्। यं सूतपुत्रं लोकोऽयं राधेयञ्चाप्यमन्यत।
स ज्येष्ठपुत्रः कुन्त्या वै भ्राताऽस्माकञ्च मातृजः। अजानता मया भ्राता राज्यलुब्धेन घातितः।
तन्मे दहति गात्राणि तूलराशिमिवानलः। न हि तं वेद पार्थोऽपि भ्रातरं श्वेतवाहनः।
नाहं न भीमो न यमौ स त्वस्मान्वेद सुव्रतः। गता किल पृथा तस्य सकाशमिति नः श्रुतं।
अस्माकं शमकामा वै त्वञ्च पुत्रो समेत्यथ। पृथाया न कृतः कामस्तेन चापि महात्मना।
अथ पश्चादिदं मातर्य्यवोचदिति नः श्रुतं। न हि शक्ष्याम्यहन्त्यक्तुं नृपं दुर्य्योधनं रणे।
अनार्य्यत्वं नृशंसत्वं कृतघ्नत्वं हि मे भवेत्। युधिष्ठिरेण सन्धिं हि यदि कुर्य्यां मते तव।
भीतो रणे श्वेतवाहादिति मां मंस्यते जनः। सोऽहं विजित्य समरे विजयं सहकेशवं।
सन्धास्ये धर्म्मपुत्रेण पश्चादिति च सोऽब्रवीत्। तमुवाच किल पृथा पुनः पृथुलवक्षसं।
चतुर्णां मेऽभयन्देहि कामं युध्यस्व फाल्गुनं। सोऽब्रवीन्मातरं धीमान्वेपमानां कृताञ्जलिः।
प्राप्तान्विषह्यांश्चतुरो न हनिष्यामि ते सुतान्। पञ्चैव हि सुता देवि भविष्यन्ति तव ध्रुवाः।
सार्जुना वा हते कर्णे सकर्णा वा हतेऽर्ज्जुने। तं पुत्रगृद्धिनी भूयो माता पुत्रमथाब्रवीत्।
भ्रातॄणां स्वस्ति कुर्व्वीथा येषां स्वस्ति चिकीर्षसि। एवमुक्त्वा किल पृथा विसृज्योपययौ गृहान्।
सोऽर्ज्जुनेन हतो वीरो भ्राता भ्रात्रा सहोदरः। न चैव विवृतो मन्त्रः पृथायास्तस्य वा विभो।
अथ शूरो महेष्वासः पार्थेनाजौ निपातितः। अहन्त्वज्ञासिषं पश्चात्स्वसोदर्य्यं द्विजोत्तम।
पूर्व्वजं भ्रातरं कर्णं पृथाया वचनात्प्रभो। तेन मे दूयते तीव्रं हृदयं भ्रातृघातिनः।
कर्णार्ज्जुनसहायोऽहं जयेयमपि वासवं। सभायां क्लिश्यमानस्य धार्त्तराष्ट्रैर्दुरात्मभिः।
सहसोत्पतितः क्रोधः कर्णं दृष्ट्वा स शाम्यति। यदा ह्यस्य गिरो रूक्षाः शृणोमि कटुकोदयाः।
सभायां गदतो द्यूते दुर्य्योधनहितैषिणः। तदा नश्यति मे क्रोधः पादौ तस्य निरीक्ष्य ह।
कुन्त्या हि सदृशौ पादौ कर्णस्येति मतिर्म्मम। सादृश्यहेतुमन्विच्छन् पृथायास्तस्य चैव ह।
कारणं नाधिगच्छामि कथञ्चिदपि चिन्तयन्। कथन्नु तस्य संग्रामे पृथिवी चक्रमग्रसत्।
कथन्नु शप्तो भ्राता मे तन्मे त्वं वक्तुमर्हसि। श्रोतुमिच्छामि भगवंस्त्वत्तः सर्व्वं यथातथं।
भवान् हि सर्व्वविद्विप्रो लोके वेद कृताकृतं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कर्णाभिज्ञाने प्रथमोऽध्यायः॥ १॥
॥ वैशम्पायन उवाच॥ स एवमुक्तस्तु मुनिर्न्नारदो वदताम्बरः। कथयामास तत्सर्व्वं यथा शप्तः स सूतजः।
॥ नारद उवाच॥ एवमेतन्महाबाहो यथा वदसि भारत। न कर्णार्ज्जुनयोः किञ्चिदविषह्यं भवेद्रणे।
गुह्यमेतत्तु देवानां कथयिष्यामि तेऽनघ। तन्निबोध महाबाहो यथा वृत्तमिदं पुरा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्षत्त्रं स्वर्गं कथङ्गच्छेच्छस्त्रपूतमिति प्रभो । सङ्कर्वजननस्तस्मात्कन्यागर्भो विनिर्म्मितः ।
स बालस्तेजसा युक्तः स्तूतपुत्त्रत्वमागतः । चकाराङ्गिरसां श्रेष्ठाद्धनुर्व्वेदं गुरोस्तदा । ५०
स बलं भीमसेनस्य फाल्गुनस्य च लाघवं । बुद्धिञ्च तव राजेन्द्र यमयोर्व्विनयं तथा ।
सख्यञ्च वासुदेवेन बाल्ये गाण्डीवधन्वनः । प्रजानामनुरागञ्च चिन्तयानो व्यदह्यत ।
स सख्यमकरोद्बाल्ये राज्ञा दुर्य्योधनेन च । युष्माभिर्न्नित्यसंद्विष्टो दैवाचापि स्वभावतः ।
सर्व्वाधिकमथालक्ष्य धनुर्व्वेदे धनञ्जयं । द्रोणं रहस्युपागम्य कर्णो वचनमब्रवीत ।
ब्रह्मास्त्रं वेत्तुमिच्छामि सरहस्यनिवर्त्तनं । अर्ज्जुनेन समञ्चाहं युध्येयमिति मे मतिः । ५५
समः शिष्येषु च स्नेहः पुत्त्रे चैव तव ध्रुवं । त्वत्प्रसादान्न मां ब्रूयुरकृतास्त्रं विचक्षणाः ।
द्रोणस्तथोक्तः कर्णेन सापेक्षः फाल्गुनं प्रति । दौरात्म्यञ्चैव कर्णस्य विदित्वा तमुवाच ह ।
ब्रह्मास्त्रं ब्राह्मणो विद्यात् यथावच्चरितव्रतः । क्षत्त्रियो वा तपस्वी यो नान्यो विद्यात्कथञ्चन ।
इत्युक्तोऽङ्गिरसां श्रेष्ठमामन्त्र्य प्रतिपूज्य च । जगाम सहसा रामं महेन्द्रं पर्व्वतम्प्रति ।
स तु राममुपागम्य शिरसाऽभिप्रणम्य च । ब्राह्मणो भार्गवोऽस्मीति गौरवेणाभ्यगच्छत । ६०
रामस्तं प्रतिजग्राह पृष्ट्वा गोत्रादि सर्व्वशः । स उक्तः स्वागतञ्चेति प्रीतिमांश्चाभवद्भृशं ।
तत्र कर्णस्य वसतो महेन्द्रे स्वर्गसन्निभे । गन्धर्व्वैराक्षसैर्य्यक्षैर्देवैश्चासीत्समागमः ।
स तत्रेष्वस्त्रमकरोद्भृगुश्रेष्ठात् यथाविधि । प्रियश्चाभवदत्यर्थं देवदानवरक्षसां ।
स कदाचित्समुद्रान्ते विचचाराश्रमान्तिके । एकः खड्गधनुष्पाणिः परिचक्राम सूर्य्यजः ।
सोऽग्निहोत्रप्रसक्तस्य कस्यचिद्ब्रह्मवादिनः । जघानाज्ञानतः पार्थ होमधेनुं यदृच्छया । ६५
तदज्ञानकृतं मत्वा ब्राह्मणाय न्यवेदयत् । कर्णः प्रसादयंश्चैवमिदमित्यब्रवीद्वचः ।
अबुद्धिपूर्व्वं भगवन् धेनुरेषा हता तव । मया तत्र प्रसादञ्च कुरुष्वेति पुनः पुनः ।
तं स विप्रोऽब्रवीत्क्रुद्धो वाचा निर्भर्त्सयन्निव । दुराचार बधार्हस्त्वं फलं प्राप्नुहि दुर्म्मते ।
येन विस्पर्द्धसे नित्यं यदर्थं घटसे भृशं । युध्यतस्तेन ते पाप चक्रं भूमिर्ग्रसिष्यति ।
ततश्चक्रे महीग्रस्ते मूर्द्धानं ते विचेतसः । पातयिष्यति विक्रम्य शत्रुर्गच्छ नराधम । ७०
यथेयं गौर्हता मूढ प्रमत्तेन त्वया मम । प्रमत्तस्य तथाऽरातिः शिरस्ते पातयिष्यति ।
शप्तः प्रसादयामास ततस्तं द्विजसत्तमं । गोभिर्द्धनैश्च रत्नैश्च स चैनं पुनरब्रवीत् ।
न हि मे व्याहृतं कुर्य्यात्सर्व्वलोकोऽपि वै मृषा । गच्छ वा तिष्ठ वा यद्वा कार्य्यन्तत्ते समाचर ।
इत्युक्तो ब्राह्मणेनाथ कर्णो दैन्यादधोमुखः । राममभ्यगमद्भीतस्तदेव मनसा स्मरन् ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कर्णशापकथने द्वितीयोऽध्यायः ॥ २ ॥
॥ नारद उवाच ॥ कर्णस्य बाहुवीर्य्येण प्रणयेन दमेन च । तुतोष भृगुशार्दूलो गुरुशुश्रूषया तथा । ७५
तस्मै स विधिवत्कृत्स्नं ब्रह्मास्त्रं सनिवर्त्तनं । प्रोवाचाखिलमव्यग्रं तपस्वी तत्तपस्विने ।
विदितास्त्रस्ततः कर्णो रममाणोऽश्रमे भृगोः । चकारैवन्धनुर्व्वेदे यत्नमद्भुतविक्रमः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततः कदाचिद्रामस्तु चरन्नाश्रममन्तिकात् । कर्णेन सहितो धीमानुपवासेन कर्षितः ।
सुष्वाप जामदग्न्यो वै विस्रम्भोत्पन्नसौहृदः । कर्णस्योत्सङ्ग आधाय शिरः क्लान्तमना गुरुः ।
अथ कृमिः श्लेष्ममेदोमांसशोणितभोजनः । दारुणो दारुणस्पर्शः कर्णस्याभ्याससमागतः । ८०
स तस्योरुमथासाद्य बिभेद रुधिराशनः । न चैनमशकत् क्षेप्तुं हन्तुं वापि गुरोर्भयात् ।
स दश्यमानस्तु तथा कृमिणा तेन भारत । गुरोः प्रबोधनाशङ्की तमुपैक्षत सूर्य्यजः ।
कर्णस्तु वेदनां धैर्य्यादसह्यां विनिगृह्य तां । अकम्पयन्नव्यथयन् धारयामास भार्गवं ।
यदास्य रुधिरेणाङ्गं परिस्पृष्टं भृगूद्वहः । तदाऽबुध्यत तेजस्वी सन्तप्तश्चेदमब्रवीत् ।
अहोऽस्म्यशुचितांप्राप्तः किमिदं क्रियते त्वया । कथयस्व भयं त्यक्त्वा याथातथ्यमिदं मम । ८५
तस्य कर्णस्तदाचष्ट कृमिणा परिभक्षणं । ददर्श रामस्तं चापि कृमिं शूकरसन्निभं ।
अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतं । रोमभिः सन्निरुद्धाङ्गमलर्कं नाम नामतः ।
स दृष्टमात्रो रामेण कृमिः प्राणानवासृजत् । तस्मिन्नेवासृग्क्लिन्नस्तदद्भुतमिवाभवत् ।
ततोऽन्तरीक्षे ददृशे विश्वरूपः करालवान् । राक्षसो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः ।
स रामं प्राञ्जलिर्भूत्वा बभाषे पूर्णमानसः । स्वस्ति ते भृगुशार्दूल गमिष्यामि यथागतं । ९०
मोक्षितो नरकादस्माद्भवता मुनिसत्तम । भद्रञ्च तेऽस्तु वन्दे त्वां प्रियं मे भवता कृतं ।
तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान् । कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत् ।
सोऽब्रवीदहमासं प्राग्दंशो नाम महासुरः । पुरा देवयुगे तात भृगोस्तुल्यवया इव ।
सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात् । महर्षेरभिशापेन कृमीभूतोऽपतं भुवि ।
अब्रवीद्धि स मां क्रोधात्तव पूर्व्वपितामहः । मूत्रश्लेष्माशनः पाप निरयं प्रतिपत्स्यसे । ९५
शापस्यान्तो भवेद्ब्रह्मन्नित्येवं तमथाब्रुवं । भविता भार्गवाद्रामादिति मामब्रवीद्भृगुः ।
सोऽहमेतां गतिं प्राप्तो यथा ह्यकुशलस्तथा । त्वया साधो समागम्य विमुक्तः पापयोनितः ।
एवमुक्त्वा नमस्कृत्य ययौ रामं महासुरः । रामः कर्णञ्च सक्रोधमिदं वचनमब्रवीत् ।
अतिदुःखमिदं मूढ न जातु ब्राह्मणः सहेत् । क्षत्त्रियस्यैव ते धैर्य्यं कामया सत्यमुच्यतां ।
तमुवाच ततः कर्णः शापभीतः प्रसादयन् । ब्रह्मक्षत्त्रान्तरे जातं सूतं मां विद्धि भार्गव । १००
राधेयः कर्ण इति मां प्रवदन्ति जना भुवि । प्रसादं कुरु मे ब्रह्मन्नस्त्रलुब्धस्य भार्गव ।
पिता गुरुर्न सन्देहो वेदविद्याप्रदः प्रभुः । अतो भार्गव इत्युक्तं मया गोत्रं तवान्तिके ।
तमुवाच भृगुश्रेष्ठः सरोषः प्रहसन्निव । भूमौ निपतितं दीनं वेपमानं कृताञ्जलिं ।
यस्मान्मिथ्योपचरितो ह्यस्त्रलोभादिह त्वया । तस्मादेतन्न ते मूढ ब्रह्मास्त्रं प्रतिभास्यति ।
अन्यत्र वधकालात्ते सदृशेन समेयुषः । अब्राह्मणे न हि ब्रह्म ध्रुवं तिष्ठेत्कदाचन । १०५
गच्छेदानीं न ते स्थानमनृतस्येह विद्यते । न त्वया सदृशो युद्धे क्षत्त्रियो भविता युधि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवमुक्तः स रामेण न्यायेनोपजगाम ह । दुर्य्योधनमुपागम्य कृतास्त्रोऽस्मीति चाब्रवीत् ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कर्णस्यास्त्रप्राप्तौ तृतीयोऽध्यायः ॥ ३ ॥

॥ नारद उवाच ॥ कर्णस्तु समवाप्यैवं शस्त्रं भार्गवनन्दनात् । दुर्य्योधनेन सहितो मुमुदे भरतर्षभ ।
ततः कदाचिद्राजानः समाजग्मुः स्वयम्बरे । कलिङ्गविषये राजन् राज्ञश्चित्राङ्गदस्य च ।
श्रीमद्राजपुरं नाम नगरं तत्र भारत । राजानः शतशस्तत्र कन्यार्थं समुपागमन् । ११०
श्रुत्वा दुर्य्योधनस्तत्र समेतान् सर्व्वपार्थिवान् । रथेन काञ्चनाङ्गेन कर्णेन सहितो ययौ ।
ततः स्वयम्बरे तस्मिन् सम्प्रवृत्ते महोत्सवे । समापेतुर्नृपतयः कन्यार्थं नृपसत्तम ।
शिशुपालो जरासन्धो भीष्मको वक्र एव च । कपोतरोमा नीलश्च रुक्मी च दृढविक्रमः ।
शृगालश्च महाराजः स्त्रीराज्याधिपतिश्च यः । अशोकः शतधन्वा च भोजो वीरश्च नामतः ।
एतेऽप्यन्ये च बहवो दक्षिणां दिशमाश्रिताः । म्लेच्छाचार्य्याश्च राजानः प्राच्योदीच्याश्च भारत । ११५
काञ्चनाङ्गदिनः सर्व्वे शुद्धजाम्बूनदप्रभाः । सर्व्वे भासुरदेहाश्च व्याघ्रा इव बलोत्कटाः ।
ततः समुपविष्टेषु तेषु राजसु भारत । विवेश रङ्गं सा कन्या धात्रीवर्षवरान्विता ।
ततः संश्राव्यमाणेषु राज्ञां नामसु भारत । अत्यक्रामद्धार्त्तराष्ट्रं सा कन्या वरवर्णिनी ।
दुर्य्योधनस्तु कौरव्यो नामर्षयत लङ्घनं । प्रत्यषेधच्च तां कन्यामसत्कृत्य नराधिपान् ।
स वीर्य्यमदमत्तत्वाद्भीष्मद्रोणावुपाश्रितः । रथमारोप्य तां कन्यामाजहार नराधिपः । १२०
तमन्वयाद्रथी खड्गी बद्धगोधाङ्गुलित्रवान् । कर्णः शस्त्रभृतां श्रेष्ठः पृष्ठतः पुरुषर्षभ ।
ततो विमर्दः सुमहान् राज्ञामासीद्युयुत्सतां । सन्नह्यतां तनुत्राणि रथान् योजयतामपि ।
तेऽभ्यधावन्त सक्रोधाः कर्णदुर्य्योधनावुभौ । शरवर्षाणि मुञ्चन्तो मेघाः पर्व्वतयोरिव ।
कर्णस्तेषामापततामेकैकेन शरेण ह । धनूंषि च शरांश्चान्यान्पातयामास भूतले ।
ततो विधनुषः कांश्चित्कांश्चिदुद्यतकार्मुकान् । कांश्चिदुद्वहतो वाणान् रथशक्तिगदास्तथा । १२५
लाघवादाकुलीकृत्य कर्णः प्रहरतां वरः । हतसूतांश्च भूयिष्ठान् स विजिग्ये नराधिपान् ।
ते स्वयं वाहयन्तोऽश्वान् याहि याहीति वादिनः । व्यपेयुस्ते रणं हित्वा राजानो भग्नमानसाः ।
दुर्य्योधनस्तु कर्णेन पाल्यमानोऽभ्ययात्तदा । हृष्टः कन्यामुपादाय नगरं नागसाह्वयं ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि दुर्य्योधनस्य स्वयम्बर कन्याहरणे चतुर्थोऽध्यायः ॥ ४ ॥

॥ नारद उवाच ॥ आविष्कृतबलं कर्णं श्रुत्वा राजा स मागधः । आह्वयद्द्वैरथेनाजौ जरासन्धो महीपतिः ।
तयोः समभवद्युद्धं दिव्यास्त्रविदुषोर्द्वयोः । युधि नानाप्रहरणैरन्योन्यमभिवर्षतोः । १३०
क्षीणवाणौ विधनुषौ भग्नखड्गौ महीं गतौ । बाहुभिः समसज्जेतामुभावपि बलान्वितौ ।
बाहुकण्टकयुद्धेन तस्य कर्णोऽथ युध्यतः । विभेद सन्धिं देहस्य जरया श्लेषितस्य हि ।
स विकारं शरीरस्य दृष्ट्वा नृपतिरात्मनः । प्रीतोऽस्मीत्यब्रवीत्कर्णं वैरमुत्सृज्य भारत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ। अङ्गेषु नरशार्दूल स राजासीत् सपत्नजित्।
पालयामास चम्पाञ्च कर्णः परबलार्द्दनः। दुर्य्योधनस्यानुमते तवापि विदितं तथा। १२५
एवं शस्त्रप्रतापेन प्रथितः सोऽभवत्क्षितौ। लङ्घितार्थं सुरेन्द्रेण भिक्षिते वर्म्मकुण्डले।
स दिव्ये सहजे प्रादात् कुण्डले परमार्च्चिते। सहजं कवचं चापि मोहितो देवमायया।
विमुक्तः कुण्डलाभ्याञ्च सहजेन च वर्म्मणा। निहतो विजयेनाजौ वासुदेवस्य पश्यतः।
ब्राह्मणस्यापि शापेन रामस्य च महात्मनः। कुन्त्याश्च वरदानेन मायया च शतक्रतोः।
भीष्मावमानात्संख्यायां रथस्यार्द्धानुकीर्त्तनात्। शल्यतेजोवधाच्चापि वासुदेवनयेन च। १४०
रुद्रस्य देवराजस्य यमस्य वरुणस्य च। कुवेरद्रोणयोश्चैव कृपस्य च महात्मनः।
अस्त्राणि दिव्यान्यादाय युद्धे गाण्डीवधन्वना। हतो वैकर्त्तनः कर्णो दिवाकरसमद्युतिः।
एवं शप्तस्तव भ्राता वहुभिश्चापि वञ्चितः। न शोच्यः स नरव्याघ्रो युद्धे हि निधनं गतः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कर्णवीर्य्यकथने पञ्चमोऽध्यायः ॥ ५ ॥
॥ वैशम्पायन उवाच ॥ एतावदुक्त्वा देवर्षिर्व्विरराम स नारदः। युधिष्ठिरस्तु राजर्षिर्द्दध्यौ शोकपरिप्लुतः।
तन्दीनमनसं वीरं शोकोपहतमातुरं। निःश्वसन्तं यथा नागं पर्य्यश्रुनयनं तथा। १४५
कुन्ती शोकपरीताङ्गी दुःखोपहतचेतना। अब्रवीन्मधुराभाषा काले वचनमर्थवत्।
युधिष्ठिर महाबाहो नैनं शोचितुमर्हसि। जहि शोकं महाप्राज्ञ शृणुष्वेदं वचो मम।
यतितः स मया पूर्व्वं भ्रात्र्यं ज्ञापयितुं तव। भास्करेण च देवेन पित्रा धर्म्मभृतां वर।
यद्वाच्यं हितकामेन सुहृदा हितमिच्छता। तथा दिवाकरेणोक्तः स्वप्नान्ते मम चाग्रतः।
न चैनमशकद्भानुरहं वा स्नेहकारणैः। पुरा प्रत्यनुनेतुं वा गन्तुं वाऽप्येकतां त्वया। १५०
ततः कालपरीतः स वैरस्योद्धरणे रतः। प्रतीपकारी युष्माकमिति चोपेक्षितो मया।
इत्युक्तो धर्म्मराजस्तु मात्रा वाष्पाकुलेक्षणः। उवाच वाक्यं धर्म्मात्मा शोकव्याकुलचेतनः।
भवत्या गूढमन्त्रत्वात्पीडितोऽस्मीत्युवाच तां। शशाप च महातेजाः सर्व्वलोकेषु योषितः।
न गुह्यं धारयिष्यन्तीत्येवं दुःखसमन्वितः। स राजा पुत्त्रपौत्त्राणां सम्बन्धिसुहृदां तथा।
स्मरन्नुद्विग्नहृदयो बभूवोद्विग्नचेतनः। ततः शोकपरीतात्मा सधूम इव पावकः। १५५
निर्व्वेदमगमद्धीमान् राजा सन्तापपीडितः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि स्त्रीशापे षष्ठोऽध्यायः ॥ ६ ॥
॥ वैशम्पायन उवाच ॥ युधिष्ठिरस्तु धर्म्मात्मा शोकव्याकुलचेतनः। शुशोच दुःखसन्तप्तः स्मृत्वा कर्णं महारथं।
आविष्टो दुःखशोकाभ्यां निःश्वसंश्च पुनः पुनः। दृष्ट्वाऽर्ज्जुनमुवाचेदं वचनं शोककर्षितः।
॥ युधिष्ठिर उवाच ॥ यद्भैक्ष्यमाचरिष्यामो वृष्ण्यन्धकपुरे वयं। ज्ञातीन् निष्पुरुषान् कृत्वा नेमां प्राप्स्याम दुर्गतिं।
अमित्रा नः समृद्धार्था वृत्तार्थाः कुरवः कृताः। आत्मानमात्मना हत्वा किं धर्म्मफलमाप्नुमः। १६०
धिगस्तु क्षात्त्रमाचारं धिगस्तु बलपौरुषं। धिगस्त्वमर्षं येनेमामापदं गमिता वयं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

साधु क्षमा दमः शौचं सवैराग्यं ह्यमत्सरः । अहिंसा सत्यवचनं नित्यानि वनचारिणां ।
वयं तु लोभान्मोहाच्च दम्भं मानं च संश्रिताः । इमामवस्थामापन्ना राज्यलाभबुभुक्षया ।
त्रैलोक्यस्यापि राज्येन नास्मान् कश्चित्प्रहर्षयेत् । बान्धवान्निहतान्दृष्ट्वा पृथिव्यां विजयैषिणः ।
ते वयं पृथिवीहेतोरवध्यान् पृथिवीश्वरान् । सम्परित्यज्य जीवामो हीनार्था हतबान्धवाः । १६५
आमिषे गृद्ध्यमानानामशुभं नः शुनामिव । आमिषं चैव नो हीष्टमामिषस्य विवर्ज्जनं ।
न पृथिव्या सकलया न हिरण्यस्य राशिभिः । न गवाश्वेन सर्व्वेण ते त्याज्या य इमे हताः ।
काममन्युपरीतास्ते क्रोधहर्षसमन्विताः । मृत्युयानं समारुह्य गता वैवस्वतक्षयं ।
बहुकल्याणसंयुक्तानिच्छन्ति पितरः सुतान् । तपसा ब्रह्मचर्य्येण सत्येन च तितिक्षया ।
उपवासैस्तथेज्याभिर्व्रतकौतुकमङ्गलैः । लभन्ते मातरो गर्भांस्तान्मासान्दश बिभ्रति । १७०
यदि स्वस्ति प्रजायन्ते जाता जीवन्ति वा यदि । सम्भाविता जातबलास्ते दद्युर्यदि नः सुखं ।
इह वाऽमुत्र वा चेति कृपणाः फलहेतुकाः । तासामयं समारम्भो निर्वृत्तः केवलोऽफलः ।
यदासां निहताः पुत्रा युवानो मृष्टकुण्डलाः । अभुक्त्वा पार्थिवान् भोगान् ऋणान्यनपहाय च ।
पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयं । यदैषामम्ब पितरौ जातकामावुभावपि ।
सञ्जातबलरूपेषु तदैव निहता नृपाः । संयुक्ताः काममन्युभ्यां क्रोधहर्षासमञ्जसः । १७५
न ते जन्मफलं किञ्चिद्भोक्तारो जातु कर्हिचित् । पाञ्चालानां कुरूणाञ्च हता एव हि ते हताः ।
न चेत्सर्व्वानयं लोकान् प्रपश्येत स्वकर्म्मणा । वयमेवास्य लोकस्य विनाशे कारणं स्मृताः ।
धृतराष्ट्रस्य पुत्रेषु तत् सर्व्वं प्रतिपत्स्यति । सदैव निकृतिप्रज्ञो द्वेष्टा मायोपजीवनः ।
मिथ्यावृत्तस्य सततमस्मास्वनपकारिषु । न सकामा वयं ते च न चास्माभिर्न तैर्ज्जितं ।
न तैर्भुक्तेयमवनिर्न्न नार्य्यो गीतवादितं । नामात्यसुहृदां वाक्यं न च श्रुतवतां श्रुतं । १८०
न दत्तानि परार्द्ध्यानि न भूर्न द्रविणागमः । अस्मद्द्वेषेण सन्तप्तः सुखं नस्तेषु विन्दति ।
वृद्धिमस्मासु तां दृष्ट्वा विवर्णो हरिणः कृशः । धृतराष्ट्रस्य नृपतिः सौबलेन निवेदितः ।
तं पितापुत्रगृद्धित्वादनुमेनेऽनये स्थितं । अनवेक्ष्यैव विदुरं गाङ्गेयञ्च महामतिं ।
असंशयं क्षयं राजा यथैवाहं तथा गतः । अनियम्याशुचिं लुब्धं पुत्रं कामवशानुगं ।
पतितो यशसो दीप्तात् घातयित्वा सहोदरान् । इमौ हि वृद्धौ शोकाग्नौ प्रक्षिप्य स सुयोधनः । १८५
अस्मत्प्रद्वेषसन्तप्तः पापबुद्धिः सदैव हि । को हि बन्धुः कुलीनः संस्तथा ब्रूयात्सुहृज्जने ।
यथाऽसावुक्तवान्वाक्यं युयुत्सुः कृष्णसन्निधौ । आत्मनो हि वयं दोषाद्विनष्टाः शाश्वतीः समाः ।
प्रदहन्तो दिशः सर्व्वा भास्करा इव तेजसा । सोऽस्माकं वैरपुरुषो दुर्म्मतिः प्रग्रहं गतः ।
दुर्य्योधनकृते ह्येतत्कुलं नो विनिपातितं । अवध्यानां वधं कृत्वा लोके प्राप्ताः स्म वाच्यतां ।
कुलस्यास्यान्तकरणं दुर्म्मतिं पापकारिणं । राजा राष्ट्रेश्वरं कृत्वा धृतराष्ट्रोऽद्य शोचति । १९०
हताः शूराः कृतं पापं विषयः स्वो विनाशितः । हत्वा नो विगतो मन्युः शोको मां रुन्धयत्यसौ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धनञ्जय कृतं पापं कल्याणेनापहन्यते। ख्यापनेनानुतापेन दानेन तपसाऽपि वा।
निवृत्त्या तीर्थगमनात् श्रुतिस्मृतिजपेन वा। त्यागवांश्च पुनः पापं नालं कर्त्तुमिति श्रुतिः।
त्यागवान् जन्ममरणे नाप्नोतीति श्रुतिर्यदा। प्राप्तवर्त्मा कृतमतिर्ब्रह्म सम्पद्यते तदा।
स धनञ्जय निर्द्वन्द्वो मुनिर्ज्ञानसमन्वितः। वनमामन्त्र्य वः सर्व्वान् गमिष्यामि परन्तप। १९५
न हि कृत्स्नतमो धर्म्मः शक्यः प्राप्तुमिति श्रुतिः। परिग्रहवता तन्मे प्रत्यक्षमरिसूदन।
मया सृष्टं तु पापं हि परिग्रहमभीप्सता। जन्मक्षयनिमित्तञ्च शक्यं प्राप्तुमिति श्रुतिः।
स परिग्रहमुत्सृज्य कृत्स्नं राज्यं तथैव च। गमिष्यामि विनिर्मुक्तो विशोको विज्वरस्तथा।
प्रशाधि त्वमिमामुर्व्वीं क्षेमां निहतकण्टकां। न ममार्थोऽस्ति राज्येन भोगैर्व्वा कुरुसत्तम।
इत्येवमुक्त्वा वचनं धर्म्मराजो युधिष्ठिरः। व्युपारमत तं पार्थः कनीयान् प्रत्यभाषत। २००
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरपरिदेवनायां सप्तमोऽध्यायः॥ ७ ॥
॥ वैशम्पायन उवाच ॥ अथार्ज्जुन उवाचेदमधिक्षिप्त इवाक्षमी। अभिनीततरं वाक्यं दृढवादपराक्रमः।
दर्शयन् स तदात्मानमुग्रमुग्रपराक्रमः। स्मयमानो महातेजाः सृक्कणी परिसंलिहन्।
॥ अर्ज्जुन उवाच ॥ अहो दुःखमहो कृच्छ्रमहो वैक्लव्यमुत्तमं। यत्कृत्वामानुषं कर्म्म त्यजेथाः श्रियमुत्तमां।
शत्रून्हत्वा महीं लब्ध्वा स्वधर्म्मेणोपपादितां। एवंविधं कथं सर्व्वं त्यजेया बुद्धिलाघवात्।
क्लीवस्येह कुतो राज्यं दीर्घसूत्रस्य वा पुनः। किमर्थं च महीपालानवधीः क्रोधमूर्च्छितः। २०५
यो ह्याजिजीविषुर्भैक्ष्यं कर्म्मणा येन केनचित्। समारम्भान् बुभूषेत हतस्वस्तिरकिञ्चनः।
सर्व्वलोकेषु विख्यातो न पुत्त्रपशुसंहितः। कापालीं नृप पापिष्ठां वृत्तिमासाद्य जीवतः।
सन्त्यज्य राज्यमृद्धन्ते लोकोऽयं किं वदिष्यति। सर्व्वारम्भान् परित्यज्य हतस्वस्तिरकिञ्चनः।
कस्मादाशंससे भैक्ष्यं कर्त्तुं प्राकृतवत्प्रभो। अस्मिन्राजकुले जातो जित्वा कृत्स्नां वसुन्धरां।
धर्म्मार्थावखिलौ हित्वा वनं मौर्ख्यात्प्रतिष्ठसे। यदिमानि हवींषीह विमथिष्यन्त्यसाधवः। २१०
भवता विप्रहीणानि प्राप्तं त्वामेव किल्बिषं। आकिञ्चन्यमनाशंस्यमिति वै नहुषोऽब्रवीत्।
कृत्वा नृशंसं ह्यधने धिगस्त्वधनतामिह। अश्वस्तनमृषीणां हि विद्यते वेद तद्भवान्।
यन्त्विमं धर्म्ममित्याहुर्द्धनादेष प्रवर्त्तते। धर्म्मं संहरते तस्य धनं हरति यस्य सः।
ह्रियमाणे धने राजन् वयं कस्य क्षमेमहि। अभिशस्तं प्रपश्यन्ति दरिद्रं पार्श्वतः स्थितं।
दारिद्र्यं पातकं लोके न तच्छंसितुमर्हति। पतितः शोचते राजन्निर्द्धनश्चापि शोचते। २१५
विशेषं नाधिगच्छामि निर्द्धनस्यावरस्य च। अर्थेभ्यो हि विवृद्धेभ्यः सम्भृतेभ्यस्ततस्ततः।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः। अर्थाद्धर्म्मश्च कामश्च स्वर्गश्चैव नराधिप।
प्राणयात्राऽपि लोकस्य विनाऽर्थं न प्रसिध्यति। अर्थेनेह विहीनस्य पुरुषस्याल्पमेधसः।
विच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा। यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः। अधनेनार्थकामेन नार्थः शक्यो विधित्सता। २२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अर्थैरर्था निबध्यन्ते गजैरिव महागजाः । धर्म्मः कामश्च हर्षश्च धृतिः क्रोधः श्रुतं मदः । २२५
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिप । धनात्कुलं प्रभवति धनाद्धर्म्मः प्रवर्द्धते ।
नाधनस्यास्त्ययं लोको न परः पुरुषोत्तम । नाधनो धर्म्मकृत्यानि यथावदनुतिष्ठति ।
धनाद्धर्म्मः प्रभवति शैलादभि नदी यथा । यः कृशाश्वः कृशगवः कृशभृत्यः कृशातिथिः ।
स वै राजन् कृशो नाम न शरीरकृशः कृशः । अवेक्षस्व यथान्यायं पश्य देवासुरं यथा ।
राजन् किमन्यज्ज्ञातीनां बधादृध्यन्ति देवताः । न चेद्भर्त्तव्यमन्यस्य कथं तद्धर्म्ममारभेत् । २३०
एतावानेव वेदेषु निश्चयः कविभिः कृतः । अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता ।
सर्व्वथा धनमाहार्य्यं यष्टव्यं चापि यत्नतः । द्रोहाद्देवैरवाप्तानि दिवि स्थानानि सर्व्वशः ।
द्रोहात्किमन्यज्ज्ञातीनां गृध्यन्ते येन देवताः । इति देवा व्यवसिता वेदवादाश्च शाश्वताः ।
अधीयन्तेऽध्यापयन्ति यजन्ते याजयन्ति च । कृत्स्नं तदेव तच्छ्रेयो यदप्याददतेऽन्यतः ।
न पश्यामोऽनपकृतं धनं किञ्चित्क्वचिद्वयं । एवमेव हि राजानो जयन्ति पृथिवीमिमां । २३५
जित्वा ममेयं ब्रुवते पुत्त्रा इव पितुर्द्धने । राजर्षयोऽपि ते स्वर्ग्या धर्म्मो ह्येषां निरुच्यते ।
यथैव पूर्णादुदधेः स्यन्दन्त्यापो दिशो दश । एवं राजकुलाद्वित्तं पृथिवीं प्रति तिष्ठति ।
आसीदियं दिलीपस्य नृगस्य नहुषस्य च । अम्बरीषस्य मान्धातुः पृथिवी सा त्वयि स्थिता ।
स त्वां द्रव्यमयो यज्ञः सम्प्राप्तः सर्व्वदक्षिणः । तच्चेन्न यजसे राजन् प्राप्तस्त्वं राज्यकिल्विषं ।
येषां राजाऽश्वमेधेन यजते दक्षिणावता । उपेत्य तस्यावभृथं पूताः सर्व्वे भवन्ति ते । २४०
विश्वरूपो महादेवः सर्व्वमेधे महामखे । जुहाव सर्व्वभूतानि तथैवात्मानमात्मना ।
शाश्वतोऽयं भूतिपथो नास्यान्तमनुशुश्रुम । महान् दाशरथः पन्था मा राजन् कुपथं गमः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अर्ज्जुनवाक्ये अष्टमोऽध्यायः ॥ ८ ॥
॥ युधिष्ठिर उवाच ॥ मुहूर्त्तं तावदेकाग्रो मनः श्रोत्रेऽन्तरात्मनि । धारयस्वेति तच्छ्रुत्वा रोचेत वचनं मम ।
साधुगम्यमहं मार्गं न जातु त्वत्कृते पुनः । गच्छेयं तं गमिष्यामि हित्वा ग्राम्यसुखान्युत ।
क्षेम्यश्चैकाकिना गम्यः पन्थाः कोऽस्तीति पृच्छ मां । अथवा नेच्छसि प्रष्टुमपृच्छन्नपि मे शृणु । २४५
हित्वा ग्राम्यसुखाचारं तप्यमानो महत्तपः । अरण्ये फलमूलाशी चरिष्यामि मृगैः सह ।
जुह्वानोऽग्निं यथाकालमुभौ कालावुपस्पृशन् । कृशः परिमिताहारश्चर्म्मचीरजटाधरः ।
शीतवातातपसहः क्षुत्पिपासाश्रमक्षमः । तपसा विधिदृष्टेन शरीरमुपशोषयन् ।
मनःकर्णसुखा नित्यं शृण्वन्नुच्चावचा गिरः । मुदितानामरण्येषु वसतां मृगपक्षिणां ।
आजिघ्रन्पेशलान् गन्धान् फुल्लानां वृक्षवीरुधां । नानारूपान्वने पश्यन् रमणीयान्वनौकसः । २५०
वानप्रस्थजनस्यापि दर्शनं कुलवासिनां । नाप्रियाण्याचरिष्यामि किं पुनर्ग्रामवासिनां ।
एकान्तशीली विमृशन् पक्वापक्वेन वर्त्तयन् । पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ।
एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिं । सेवमानः प्रतीक्षिष्ये देहस्यास्य समापनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ वैकोऽहमेकाहमेकैकस्मिन्वनस्पतौ। चरन् भैक्षं मुनिर्मुण्डः क्षपयिष्ये कलेवरं।
पांशुभिः समभिच्छन्नः शून्यागारप्रतिश्रयः। वृक्षमूलनिकेतो वा त्यक्तसर्व्वप्रियाप्रियः। २५५
न शोचन्न प्रहृष्यंश्च तुल्यनिन्दात्मसंस्तुतिः। निराशीर्निर्म्ममो भूत्वा निर्द्वन्द्वो निष्परिग्रहः।
आत्मारामः प्रसन्नात्मा जडान्धवधिराकृतिः। अकुर्व्वाणः परैः काञ्चित्संविदं जातु कैरपि।
जङ्गमाजङ्गमान् सर्व्वानविहिंसंश्चतुर्व्विधान्। प्रजाः सर्व्वाः स्वधर्म्मस्थाः समः प्राणभृतः प्रति।
न चाप्यवहसन् कञ्चिन्न कुर्व्वन् भ्रुकुटीः क्वचित्। प्रसन्नवदनो नित्यं सर्व्वेन्द्रियसुसंयतः।
अपृच्छन् कस्यचिन्मार्गं प्रव्रजन्नेव केनचित्। नादेशं न दिशं काञ्चिद्गन्तुमिच्छन्विशेषतः। २६०
गमने निरपेक्षश्च पश्चादनवलोकयन्। ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्ज्जकः।
स्वभावस्तु प्रयात्यग्रे प्रभवन्त्यशनान्यपि। द्वन्द्वानि च विरुद्धानि तानि सर्व्वाण्यचिन्तयन्।
अल्पं वा स्वादुभोज्यं वा पूर्व्वालाभेन जातुचित्। अन्येष्वपि चरन् लाभमलाभे सप्त पूरयन्।
विधूमे न्यस्तमुषले व्यङ्गारे भुक्तवज्जने। अतीतपात्रसञ्चारे काले विगतभिक्षुके।
एककालं चरन् भैक्षं त्रीनथ द्वे च पञ्च वा। स्पृहापाशं विमुच्याहं चरिष्यामि महीमिमां। २६५
अलाभे सति वा लाभे समदर्शी महातपाः। न जिजीविषुवत्किञ्चिन्न मुमूर्षुवदाचरन्।
जीवितं मरणञ्चैव नाभिनन्दन्न च द्विषन्। वास्यैकं तक्षतो बाहुञ्चन्दनेनैकमुक्षतः।
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः। याः काश्चिज्जीवता शक्याः कर्त्तुमभ्युदयक्रियाः।
सर्व्वास्ताः समभित्यज्य निमेषादिव्यवस्थितः। तेषु नित्यमशक्तश्च त्यक्तसर्व्वेन्द्रियक्रियः।
अपरित्यक्तसङ्कल्पः सुनिर्णिक्तात्मकल्मषः। विमुक्तः सर्व्वसङ्गेभ्यो व्यतीतः सर्व्ववागुराः। २७०
न वशे कस्य चित्तिष्ठन् सधर्म्मा मातरिश्वनः। वीतरागश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीं।
तृष्णया हि महत्पापमज्ञानादस्मि कारितः। कुशलाकुशलान्येके कृत्वा कर्म्माणि मानवाः।
कार्य्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति। आयुषोऽन्ते प्रहायेदं क्षीणप्राणं कलेवरं।
प्रतिगृह्णाति तत्पापं कर्त्तुः कर्म्मफलं हि तत्। एवं संसारचक्रेऽस्मिन् व्याविद्धे रथचक्रवत्।
समेति भूतग्रामोऽयं भूतग्रामेण कार्य्यवान्। जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं।
अपारमिव चास्वस्थं संसारं त्यजतः सुखं। दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु।
को हि नाम भवेनार्थी भवेत्कारणतत्त्ववित्। कृत्वा हि विविधं कर्म्म तत्तद्विविधलक्षणं।
पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते। तस्मात्प्रज्ञामृतमिदं चिरान्मामप्रत्युपस्थितं।
तत्प्राप्य प्रार्थये स्थानमव्ययं शाश्वतं ध्रुवं। एतया सततं धृत्या चरन्नेवंप्रकारया। २८५
जन्ममृत्युजराव्याधिवेदनाभिरतिद्रुतं। देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरवाक्ये नवमोऽध्यायः॥ ९ ॥
॥ भीमसेन उवाच ॥ श्रोत्रियस्येव ते राजन् मन्दकस्याविपश्चितः। अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी।
आलस्ये कृतचित्तस्य राजधर्म्मानसूयतः। विनाशे धार्त्तराष्ट्राणां किं फलं भरतर्षभ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्षमाऽनुकम्पा कारुण्यमानृशंस्यं न विद्यते। क्षात्त्रमाचरतो मार्गमपि बन्धोस्त्वदन्तरे।
यदीमां भवतो बुद्धिं विद्याम वयमीदृशीं। शस्त्रं न वै ग्रहीष्यामो न बधिष्याम कञ्चन। १८०
भैक्ष्यमेवाचरिष्याम शरीरस्याविमोक्षणात्। न चेदं दारुणं युद्धमभविष्यन्महीक्षितां।
प्राणस्यान्नमिदं सर्व्वमिति वै कवयो विदुः। स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनं।
आददानस्य चेद्राज्यं ये केचित्परिपन्थिनः। हन्तव्यास्त इति प्राज्ञाः क्षत्त्रधर्म्मविदो विदुः।
ते सदोषा हतास्माभीराज्यस्य परिपन्थिनः। तान् हत्वा भुङ्क्ष्व धर्म्मेण युधिष्ठिर महीमिमां।
यथा हि पुरुषः खात्वा कूपमप्राप्य चोदकं। पङ्कदिग्धो निवर्त्तेत कर्म्मेदं नस्तथोपमं। १८५
यथारुह्य महावृक्षमपहृत्य ततो मधु। अप्राप्य निधनं गच्छेत्कर्म्मेदं नस्तथोपमं।
यथा महान्तमध्वानमाशया पुरुषो व्रजन्। स निराशो निवर्त्तेत कर्म्मैतन्नस्तथोपमं।
यथा शत्रून् घातयित्वा पुरुषः कुरुनन्दन। आत्मानं घातयेत्पश्चात्कर्म्मेदं नस्तथाविधं।
यथाऽन्नं क्षुधितो लब्ध्वा न भुञ्जीयाद्यदृच्छया। कामी च कामिनीं लब्ध्वा कर्म्मेदं नस्तथोपमं।
वयमेवात्र गर्ह्या हि यद्वयं मन्दचेतसं। त्वां राजन्ननुगच्छामो ज्येष्ठोऽयमिति भारत। १९०
वयं हि बाहुबलिनः कृतविद्या मनस्विनः। क्लीवस्य वाक्ये तिष्ठामो यथैवाशक्तयस्तथा।
अगतीकगतीनस्मान्नष्टार्थानर्थसिद्धये। कथं वै नानुपश्येयुर्जनाः पश्यत यादृशं।
आपत्काले हि संन्यासः कर्त्तव्य इति शिष्यते। जरयाऽभिपरीतेन शत्रुभिर्व्यंसितेन वा।
तस्मादिह कृतप्रज्ञास्त्यागं न परिचक्षते। धर्म्मव्यतिक्रमञ्चैव मन्यन्ते सूक्ष्मदर्शिनः।
कथं तस्मात्समुत्पन्नास्तन्निष्ठास्तदुपाश्रयाः। तदेव निन्दां भाषेयुर्धाता तत्र न गर्ह्यते। १९५
श्रिया विहीनैरधनैर्नास्तिकैः सम्प्रवर्त्तितं। वेदवादस्य विज्ञानं सत्याभासमिवानृतं।
शक्यन्तु मौण्ड्यमास्थाय बिभ्रतात्मानमात्मना। धर्म्मच्छद्म समास्थाय च्यवितुं न तु जीवितुं।
शक्यं पुनररण्येषु सुखमेकेन जीवितुं। अबिभ्रता पुत्त्रपौत्त्रान्देवर्षीनतिथीन्पितॄन्।
नेमे मृगाः स्वर्गजितो न वराहा न पक्षिणः। तथाऽन्येन प्रकारेण पुण्यमाहुर्न ते जनाः।
यदि संन्यासतः सिद्धिं राजन् कश्चिदवाप्नुयात्। पर्व्वताश्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः। २००
एते हि नित्यसंन्यासा दृश्यन्ते निरुपद्रवाः। अपरिग्रहवन्तश्च सततं ब्रह्मचारिणः।
अथ चेदात्मभाग्येषु नान्येषां सिद्धिमश्नुते। तस्मात्कर्म्मैव कर्त्तव्यं नास्ति सिद्धिरकर्म्मणः।
औदकाः सृष्टयश्चैव जन्तवः सिद्धिमाप्नुयुः। येषामात्मैव भर्त्तव्यो नान्यः कश्चन विद्यते।
अवेक्षस्व यथा स्वैः स्वैः कर्म्मभिर्व्यापृतं जगत्। तस्मात्कर्म्मैव कर्त्तव्यं नास्ति सिद्धिरकर्म्मणः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि भीमसेनवाक्ये दशमोऽध्यायः॥ १० ॥
॥ अर्ज्जुन उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं। तापसैस्सह संवादं शक्रस्य भरतर्षभ। २०५
केचिद्गृहान् परित्यज्य वनमभ्यागमन्द्विजाः। अजातश्मश्रवो मन्दाः कुले जाताः प्रवव्रजुः।
धर्म्मोऽयमिति मन्वाना: समृद्धा ब्रह्मचारिणः। त्यक्त्वा भ्रातॄन् पितॄंश्चैव तानिन्द्रोऽन्वकृपायत।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तानाबभाषे भगवान्पक्षी भूत्वा हिरण्मयः । सुदुष्करं मनुष्यैश्च यत्कृतं विघसाशिभिः ।
पुण्यं भवति कर्म्मेदं प्रशस्तञ्चैव जीवितं । सिद्धार्थास्ते गतिं मुख्यां प्राप्ता धर्म्मपरायणाः ।
॥ ऋषय ऊचुः ॥ अहो बताऽयं शकुनिर्व्विघसाशान् प्रशंसति । अस्मान्नूनमयं शास्ति वयं च विघसाशिनः । २१०
॥ शकुनिरुवाच ॥ नाहं युष्मान् प्रशंसामि पङ्कदिग्धान् रजस्वलान् । उच्छिष्टभोजिनो मन्दान्न वै वो विघसाशिनः ।
॥ ऋषय ऊचुः ॥ इदं श्रेयः परमिति वयमेवाभ्युपास्महे । शकुने ब्रूहि यच्छ्रेयो भृशं वै श्रद्दधामहे ।
॥ शकुनिरुवाच ॥ यदि मां नाभिशङ्कध्वं विभज्यात्मानमात्मना । ततोऽहं वः प्रवक्ष्यामि याथातथ्यं हितं वचः ।
॥ ऋषय ऊचुः ॥ शृणुमस्ते वचस्तात पन्थानो विदितास्तव । नियोगे चैव धर्म्मात्मन् स्थातुमिच्छाम शाधि नः ।
॥ शकुनिरुवाच ॥ चतुष्पदां गौः प्रवरा लोहानां काञ्चनं वरं । शब्दानां प्रवरो मन्त्रो ब्राह्मणो द्विपदां वरः । २१५
मन्त्रोऽयं जातकर्म्मादिर्ब्राह्मणस्य विधीयते । जीवतोऽपि यथाकालं श्मशाननिधनादिभिः ।
कर्म्माणि वैदिकान्यस्य स्वर्ग्यः पन्थाः क्रतूत्तमः । कथं मे सर्व्वकर्म्माणि मन्त्रसिद्धानि चक्रिरे ।
आत्मानं दृढवादीति तथा सिद्धिरिहेष्यते । मासार्द्धमासा ऋतव आदित्यशशितारकं ।
ईहन्ते सर्व्वभूतानि तदिदं कर्म्मसंज्ञितं । सिद्धिक्षेत्रमिदं पुण्यमयमेवाश्रमो महान् ।
अथ ये कर्म्मनिन्दन्तो मनुष्याः कापथं गताः । मूढानामर्थहीनानां तेषामेनस्तु विद्यते । २२०
देववंशान्पितृवंशान् ब्रह्मवंशांश्च शाश्वतान् । सन्त्यज्य मूढा वर्त्तन्ते ततो यान्त्यश्रुतीपथं ।
एतद्वोऽस्तु तपो युक्तं ददामीत्यृषिचोदितं । तस्मात्तत्तद्ध्यवस्थानं तपस्वितप उच्यते ।
देववंशान् ब्रह्मवंशान्पितृवंशांश्च शाश्वतान् । संविभज्य गुरोश्चर्य्यान्तद्वै दुष्करमुच्यते ।
देवा वै दुष्करं कृत्वा विभूतिं परमां गताः । तस्माद्गार्हस्थ्यमुद्वोढुं दुष्करं प्रब्रवीमि वः ।
तपः श्रेष्ठं प्रजानां वै मूलमेतन्न संशयः । कुटुम्बविधिनाऽनेन यस्मिन् सर्व्वं प्रतिष्ठितं । २२५
एतद्विदुस्तपो विप्रा द्वन्द्वातीता विमत्सराः । तस्माद्व्रतं मध्यमन्तु लोकेषु तप उच्यते ।
दुराधर्षपदञ्चैव गच्छन्ति विघसाशिनः । सायम्प्रातर्व्विभज्यान्नं स्वकुटुम्बे यथाविधि ।
दत्त्वाऽतिथिभ्यो देवेभ्यः पितृभ्यः स्वजनस्य च । अवशिष्टानि येऽश्नन्ति तानाहुर्व्विघसाशिनः ।
तस्मात्स्वधर्म्ममास्थाय सुव्रताः सत्यवादिनः । लोकस्य गुरवो भूत्वा ते भवन्त्यनुपस्कृताः ।
त्रिदिवं प्राप्य शक्रस्य स्वर्गलोके विमत्सराः । वसन्ति शाश्वतान्वर्षान् जना दुष्करकारिणः । २३०
॥ अर्ज्जुन उवाच ॥ ततस्ते तद्वचः श्रुत्वा धर्म्मार्थसहितं हितं । उत्सृज्य नास्तीति गता गार्हस्थ्यं समुपाश्रिताः ।
तस्मात्त्वमपि धर्म्मज्ञ धैर्य्यमालम्ब्य शाश्वतं । प्रशाधि पृथिवीं कृत्स्नां हतामित्रान्नराधिप ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषिशकुनिसंवादकथने एकादशोऽध्यायः ॥ ११ ॥
॥ वैशम्पायन उवाच ॥ अर्ज्जुनस्य वचः श्रुत्वा नकुलो वाक्यमब्रवीत् । राजानमभिसम्प्रेक्ष्य सर्व्वधर्म्मभृताम्वरः ।
अनुरुध्य महाप्राज्ञो भ्रातुश्चित्तमरिन्दमः । व्यूढोरस्को महाबाहुस्ताम्रास्यो मितभाषिता ।
॥ नकुल उवाच ॥ विशाखयूपे देवानां सर्व्वेषामग्नयश्चिताः । तस्माद्विद्धि महाराज देवाः कर्म्मफले स्थिताः । २३५
अनास्तिकानां भूतानां प्राणदाः पितरश्च ये । तेऽपि कर्म्मैव कुर्व्वन्ति विधिं सम्प्रेक्ष्य पार्थिव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेदवादापविद्धांश्च तान्विद्धि भृशनास्तिकान् । न हि वेदोक्तमुत्सृज्य विप्रः सर्व्वेषु कर्म्मसु ।
वेदयानेन नाकस्य पृष्ठमाप्नोति भारत । अत्याश्रमानयं सर्व्वानित्याहुर्व्वेदनिश्चयाः ।
ब्राह्मणाः श्रुतिसम्पन्नास्तान्निबोध जनाधिप । वित्तानि धर्म्मलब्धानि क्रतुमुख्येष्ववासृजन् ।
कृतात्मा स महाराज स वै त्यागी स्मृतो नरः । अनवेक्ष्य सुखादानं तथैवोर्द्धं प्रतिष्ठितः । २४०
आत्मत्यागी महाराज स त्यागी तामसः प्रभो । अनिकेतः परिपतन् वृक्षमूलाश्रयो मुनिः ।
अयाचकः सदा योगी स त्यागी पार्थ भिक्षुकः । क्रोधहर्षावनादृत्य पैशुन्यं च विशेषतः ।
विप्रो वेदानधीते यः स त्यागी पार्थ भिक्षुकः । आश्रमांस्तुलया सर्व्वान् धृतानाहुर्म्मनीषिणः ।
एकतस्ते त्रयो राजन् गृहस्थाश्रम एकतः । समीक्ष्य तुलया पार्थ कामं स्वर्गञ्च भारत ।
अयं पन्था महर्षीणामियं लोकविदां गतिः । इति यः कुरुते भावं स त्यागी भरतर्षभ । २४५
न यः परित्यज्य गृहान् वनमेति विमूढवत् । यदा कामान् समीक्षेत धर्म्मवैतंसिको नरः ।
अथैनं मृत्युपाशेन कण्ठे बध्नाति मृत्युराट् । अभिमानकृतं कर्म्म नैतत् फलवदुच्यते ।
त्यागयुक्तं महाराज सर्व्वमेव महाफलं । शमो दमस्तथा धैर्य्यं सत्यं शौचमथार्ज्जवं ।
यज्ञो धृतिश्च धर्म्मश्च नित्यमार्षो विधिः स्मृतः । पितृदेवातिथिकृते समारम्भोऽत्र शस्यते ।
अत्रैव हि महाराज त्रिवर्गः केवलं फलं । एतस्मिन्वर्त्तमानस्य विधावप्रतिषेधिते । २५०
त्यागिनः प्रसृतस्येह नोच्छित्तिर्व्विद्यते क्वचित् । असृजद्वै प्रजा राजन् प्रजापतिरकल्मषः ।
मां यक्ष्यन्तीति धर्म्मात्मा यज्ञैर्व्विविधदक्षिणैः । वीरुधश्चैव वृक्षांश्च यज्ञार्थं वै तथौषधीः ।
पशूंश्चैव तथामेध्यान्यज्ञार्थानि हवींषि च । गृहस्थाश्रमिणस्तच्च यज्ञकर्म्म विरोधकं ।
तस्माद्गार्हस्थ्यमेवेह दुष्करं दुर्लभं तथा । तत्सम्प्राप्य गृहस्था ये पशुधान्यधनान्विताः ।
न यजन्ते महाराज शाश्वतं तेषु किल्बिषं । स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथाऽपरे । २५५
अथाऽपरे महायज्ञान् मनसैव वितन्वते । एवं मनःसमाधानं मार्गमातिष्ठतो नृप ।
द्विजातेर्ब्रह्मभूतस्य स्पृहयन्ति दिवौकसः । स रत्नानि विचित्राणि संहृतानि ततस्ततः ।
मखेष्वनभिसन्त्यज्य नास्तिक्यमभिजल्पसि । कुटुम्बमास्थिते त्यागं न पश्यामि नराधिप ।
राजसूयाश्वमेधेषु सर्व्वमेधेषु वा पुनः । ये चान्ये क्रतवस्तात ब्राह्मणैरभिपूजिताः ।
तैर्यजस्व महीपाल शक्रो देवपतिर्यथा । राज्ञः प्रमाददोषेण दस्युभिः परिमुष्यतां । २६०
अशरण्यः प्रजानां यः स राजा कलिरुच्यते । अश्वान् गाश्चैव दासीश्च करेणूश्च स्वलङ्कृताः ।
ग्रामान् जनपदांश्चैव क्षेत्राणि च गृहाणि च । अप्रदाय द्विजातिभ्यो मात्सर्य्याविष्टचेतसः ।
वयं ते राजकलयो भविष्याम विशाम्पते । अदातारोऽशरण्याश्च राजकिल्बिषभागिनः ।
दोषाणामेव भोक्तारो न सुखानां कदाचन । अनिष्ट्वा च महायज्ञैरकृत्वा च पितृस्वधां ।
तीर्थेष्वनभिसंप्लुत्य प्रव्रजिष्यसि चेत्प्रभो । छिन्नाभ्रमिव गन्ताऽसि विलयं मारुतेरितं । २६५
लोकयोरुभयोर्भ्रष्टो ह्यन्तराले व्यवस्थितः । अन्तर्व्वहिश्च यत्किञ्चिन्मनोव्यासङ्गकारकं ।

CC-0. In Public Domain Srl Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परित्यज्य भवेत्त्यागी न हित्वा प्रतितिष्ठति। एतस्मिन्वर्त्तमानस्य विधावप्रतिषेधिते।
ब्राह्मणस्य महाराज नोच्छित्तिर्व्विद्यते क्वचित्।
निहत्य शत्रूंस्तरसा समृद्धान् शक्रो यथा दैत्यबलानि संख्ये। कः पार्थ शोचेन्निरतः स्वधर्म्मे पूर्व्वैः स्मृते पार्थिवशिष्टजुष्टे।
क्षात्त्रेण धर्म्मेण पराक्रमेण जित्वा महीं मन्त्रविद्भ्यः प्रदाय। नाकस्य पृष्ठेऽसि नरेन्द्र गन्ता न शोचितव्यं भवताऽद्य पार्थ। २७०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि नकुलवाक्ये द्वादशोऽध्यायः ॥ १२ ॥
॥ सहदेव उवाच ॥ न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत। शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा।
बाह्यद्रव्यविमुक्तस्य शारीरेष्वनुगृध्यतः। यो धर्म्मो यत्सुखं वा स्याद्द्विषतां तत्तथाऽस्तु नः।
शारीरं द्रव्यमुत्सृज्य पृथिवीमनुशासतः। यो धर्म्मो यत्सुखं वा स्यात्सुहृदां तत्तथाऽस्तु नः।
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतं। ममेति च भवेन्मृत्युर्न ममेति च शाश्वतं।
ब्रह्ममृत्यू ततो राजन्नात्मन्येव समाश्रितौ। अदृश्यमानौ भूतानि योधयेतामसंशयं। २७५
अविनाशोऽस्य सत्त्वस्य नियतो यदि भारत। हत्वा शरीरं भूतानां न हिंसा प्रतिपत्स्यते।
अथाऽपि च सहोत्पत्तिः सत्त्वस्य प्रलयस्तथा। नष्टे शरीरे नष्टं स्याद्वृथा च स्यात् क्रियापथः।
तस्मादेकान्तमुत्सृज्य पूर्व्वैः पूर्व्वतरैश्च यः। पन्था निषेवितः सद्भिः स निषेव्यो विजानता।
लब्ध्वाऽपि पृथिवीं कृत्स्नां सहस्थावरजङ्गमां। न भुङ्क्ते यो नृपः सम्यङ्निष्फलं तस्य जीवितं।
अथ वा वसतो राजन्वने वन्येन जीवतः। द्रव्येषु यस्य ममता मृत्योरास्ये स वर्त्तते। २८०
बाह्यान्तरञ्च भूतानां स्वभावं पश्य भारत। ये तु पश्यन्ति तद्भूतं मुच्यन्ते ते महाभयात्।
भवान् पिता भवांस्त्राता भवान्भ्राता भवान् गुरुः। दुःखप्रलापानार्त्तस्य तन्मे त्वं क्षन्तुमर्हसि।
तथ्यं वा यदि वाऽतथ्यं यन्मयैतत्प्रभाषितं। तद्विद्धि पृथिवीपाल भक्त्या भरतसत्तम।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सहदेववाक्ये त्रयोदशोऽध्यायः ॥ १३ ॥
॥ वैशम्पायन उवाच ॥ अव्याहरति कौन्तेये धर्म्मराजे युधिष्ठिरे। भ्रातॄणां ब्रुवतां तांस्तान्विविधान्वेदनिश्चयान्।
महाभिजनसम्पन्ना श्रीमत्यायतलोचना। अभ्यभाषत राजेन्द्र द्रौपदी योषितांवरा। २८५
आसीनमृषभं राज्ञां भ्रातृभिः परिवारितं। सिंहशार्दूलसदृशैर्व्वारणैरिव यूथपं।
अभिमानवती नित्यं विशेषेण युधिष्ठिरे। लालिता सततं राज्ञा धर्म्मज्ञा धर्म्मदर्शिनी।
आमन्त्र्य विपुलश्रोणी साम्ना परमवल्गुना। भर्त्तारमभिसम्प्रेक्ष्य ततो वचनमब्रवीत्।
॥ द्रौपद्युवाच ॥ इमे ते भ्रातरः पार्थ शुष्यन्ते स्तोकका इव। वाराश्यमानास्तिष्ठन्ति न चैतानभिनन्दसे।
नन्दयैतान्महाराज मत्तानिव महाद्विपान्। उपपन्नेन वाक्येन सततं दुःखभागिनः। २९०
कथं द्वैतवने राजन्पूर्व्वमुक्त्वा तथा वचः। भ्रातॄनेतान् स्म सहितान् शीतवातातपार्द्दितान्।
वयं दुर्य्योधनं हत्वा मृधे भोक्ष्याम मेदिनीं। सम्पूर्णां सर्व्वकामानामाहवे विजयैषिणः।
विरथांश्च रथान् कृत्वा निहत्य च महागजान्। संस्तीर्य्य च रथैर्भूमिं ससादिभिररिन्दमाः।
यजतां विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः। वनवासकृतं दुःखं भविष्यति सुखाय वः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्येतानेवमुक्त्वा त्वं स्वयं धर्म्मभृतां वर। कथमद्य पुनर्वीर विनिहंसि मनांसि नः। ३९५
न क्लीबो वसुधां भुङ्क्ते न क्लीबो धनमश्नुते। न क्लीबस्य गृहे पुत्त्रा मत्स्याः पङ्क इवासते।
नादण्डः क्षत्त्रियो भाति नादण्डो भूमिमश्नुते। नादण्डस्य प्रजा राज्ञः सुखं विन्दन्ति भारत।
मित्रता सर्व्वभूतेषु दानमध्ययनं तपः। ब्राह्मणस्यैव धर्म्मः स्यान्न राज्ञो राजसत्तम।
असतां प्रतिषेधश्च सताञ्च परिपालनं। एष राज्ञां परो धर्म्मः समरे चापलायनं।
यस्मिन् क्षमा च क्रोधश्च दानादाने भयाभये। निग्रहानुग्रहौ चोभौ स वै धर्म्मविदुच्यते। ४००
न श्रुतेन न दानेन न सान्त्वेन न चेज्यया। त्वयेयं पृथिवी लब्धा न सङ्कोचेन चाप्युत।
यत्तद्बलममित्राणां तथा वीर समुद्यतं। हस्त्यश्वरथसंपन्नं त्रिभिरङ्गैरनुत्तमं।
रक्षितं द्रोणकर्णाभ्यामश्वत्थाम्ना कृपेण च। तत्त्वया निहतं वीर तस्माद्भुङ्क्ष्व वसुन्धरां।
जम्बूद्वीपो महाराज नानाजनपदायुतः। त्वया पुरुषशार्दूल दण्डेन मृदितः प्रभो।
जम्बूद्वीपेन सदृशः क्रौञ्चद्वीपो नराधिप। अपरेण महामेरोर्दण्डेन मृदितस्त्वया। ४०५
क्रौञ्चद्वीपेन सदृशः शाकद्वीपो नराधिप। पूर्व्वेण च महामेरोर्दण्डेन मृदितस्त्वया।
उत्तरेण महामेरोः शाकद्वीपेन सम्मितः। भद्राश्वः पुरुषव्याघ्र दण्डेन मृदितस्त्वया।
द्वीपाश्च सान्तरद्वीपा नानाजनपदाश्रयाः। विगाह्य सागरं वीर दण्डेन मृदितास्त्वया।
एतान्यप्रतिमेयानि कृत्वा कर्म्माणि भारत। न प्रीयसे महाराज पूज्यमानो द्विजातिभिः।
स त्वं भ्रातॄनिमान्दृष्ट्वा प्रतिनन्दस्व भारत। ऋषभानिव सम्मत्तान् गजेन्द्रानूर्जितानिव। ४१०
अमरप्रतिमाः सर्व्वे शत्रुसाहाः परन्तपाः। एकोऽपि हि सुखायैषां मम स्यादिति मे मतिः।
किं पुनः पुरुषव्याघ्र पतयो मे नरर्षभाः। समस्तानीन्द्रियाणीव शरीरस्य विचेष्टने।
अनृतं नाब्रवीच्छ्वश्रूः सर्व्वज्ञा सर्व्वदर्शिनी। युधिष्ठिरस्त्वां पाञ्चालि सुखे धास्यत्यनुत्तमे।
हत्वा राजसहस्राणि बहून्याशुपराक्रमः। तद्व्यर्थं सम्प्रपश्यामि मोहात्तव जनाधिप।
येषामुन्मत्तको ज्येष्ठः सर्व्वे तेऽप्यनुसारिणः। तवोन्मादान्महाराज सोन्मादाः सर्व्वपाण्डवाः। ४१५
यदि हि स्युरनुन्मत्ता भ्रातरस्ते नराधिप। बद्ध्वा त्वां नास्तिकैः सार्द्धं प्रशासेयुर्वसुन्धरां।
कुरुते मूढ एवं हि यः श्रेयो नाधिगच्छति। धूपैरञ्जनयोगैश्च नस्यकर्म्मभिरेव च।
भेषजैः स चिकित्स्यः स्याद्य उन्मार्गेण गच्छति। साऽहं सर्व्वाधमा लोके स्त्रीणां भरतसत्तम।
तथा विनाकृता पुत्त्रैर्याऽहमिच्छामि जीवितुं। एतेषां यतमानानां न मेऽद्य वचनं मृषा।
त्वं तु सर्व्वां महीं त्यक्त्वा कुरुषे स्वयमापदं। यथास्तां सम्मतौ राज्ञां पृथिव्यां राजसत्तमौ। ४२०
मान्धाता चाम्बरीषश्च तथा राजन्विराजसे। प्रशाधि पृथिवीं देवीं प्रजा धर्म्मेण पालयन्।
सपर्व्वतवनद्वीपां मा राजन्विमना भव। यजस्व विविधैर्यज्ञैर्युध्यस्वारीन् प्रयच्छ च।
धनानि भोगान्वासांसि द्विजातिभ्यो नृपोत्तम।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि द्रौपदीवाक्ये चतुर्द्दशोऽध्यायः॥ १४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ याज्ञसेन्या वचः श्रुत्वा पुनरेवार्जुनोऽब्रवीत् । अनुमान्य महाबाहुं ज्येष्ठं भ्रातरमच्युतं ।
॥ अर्जुन उवाच ॥ दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति । दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्ब्बुधाः । ४२५
धर्म्मं संरक्षते दण्डस्तथैवार्थं जनाधिप । कामं संरक्षते दण्डस्त्रिवर्गो दण्ड उच्यते ।
दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते । एवं विद्वन्नुपादत्स्व भावं पश्यस्व लौकिकं ।
राजदण्डभयादेके पापाः पापं न कुर्व्वते । यमदण्डभयादेके परलोकभयादपि ।
परस्परभयादेके पापाः पापं न कुर्व्वते । एवं सांसिद्धिके लोके सर्व्वं दण्डे प्रतिष्ठितं ।
दण्डस्यैव भयादेके न खादन्ति परस्परं । अन्धे तमसि मज्जेयुर्यदि दण्डो न पालयेत् । ४३०
यस्माददान्तान्दमयत्यशिष्टान्दण्डयत्यपि । दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्ब्बुधाः ।
वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणं । दानदण्डाः स्मृता वैश्या निर्द्दण्डः शूद्र उच्यते ।
असंमोहाय मर्त्यानामर्थसंरक्षणाय च । मर्य्यादा स्थापिता लोके दण्डसंज्ञा विशाम्पते ।
यत्र श्यामो लोहिताक्षो दण्डश्चरति सूद्यतः । प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ।
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । दण्डस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः । ४३५
नाभीतो यजते राजन् नाभीतो दातुमिच्छति । नाभीतः पुरुषः कश्चित्समये स्थातुमिच्छति ।
नाच्छित्त्वा परमर्म्माणि नाकृत्वा कर्म्म दुष्करं । नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियं ।
नाघ्नतः कीर्त्तिरस्तीह न वित्तं न पुनः प्रजाः । इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत ।
य एव देवा हन्तारस्तान् लोकोऽर्चयते भृशं । हन्ता रुद्रस्तथा स्कन्दः शक्रोऽग्निर्वरुणो यमः ।
हन्ता कालस्तथा मृत्युर्व्वायुर्व्वैश्रवणो रविः । वसवो मरुतः साध्या विश्वेदेवाश्च भारत । ४४०
एतान्देवान्नमस्यन्ति प्रतापप्रणता जनाः । न ब्रह्माणं न धातारं न पूषाणं कथञ्चन ।
मध्यस्थान्सर्व्वभूतेषु दान्तान् शमपरायणान् । यजन्ते मानवाः केचित्प्रशान्ताः सर्व्वकर्म्मसु ।
न हि पश्यामि जीवन्तं लोके कञ्चिदहिंसया । सत्त्वैः सत्त्वा हि जीवन्ति दुर्ब्बलैर्ब्बलवत्तराः ।
नकुलो मूषिकानत्ति विडालो नकुलं तथा । विडालमत्ति श्वा राजन् श्वानं व्यालमृगस्तथा ।
तानत्ति पुरुषः सर्व्वान्पश्य कालो यथागतः । प्राणस्यान्नमिदं सर्व्वं जङ्गमं स्थावरञ्च यत् । ४४५
विधानं देवविहितं तत्र विद्वान्न मुह्यति । यथा सृष्टोऽसि राजेन्द्र तथा भवितुमर्हसि ।
विनीतक्रोधहर्षा हि मन्दा वनमुपाश्रिताः । विना वधं न कुर्व्वन्ति तापसाः प्राणयापनं ।
उदके बहवः प्राणाः पृथिव्यां च फलेषु च । न च कश्चिन्न तान्हन्ति किमन्यत्प्राणयापनात् ।
सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित । पक्ष्मणोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः ।
ग्रामान्निष्क्रम्य मुनयो विगतक्रोधमत्सराः । वने कुटुम्बधर्म्माणो दृश्यन्ते परिमोहिताः । ४५०
भूमिं भित्त्वौषधीश्छित्त्वा वृक्षादीनण्डजान्पशून् । मनुष्यास्तन्वते यज्ञांस्ते स्वर्गं प्राप्नुवन्ति च ।
दण्डनीत्यां प्रणीतायां सर्व्वे सिध्यन्त्युपक्रमाः । कौन्तेय सर्व्वभूतानां तत्र मे नास्ति संशयः ।
दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः । जले मत्स्यानिवाभक्ष्यन्दुर्ब्बलान् बलवत्तराः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

सत्यं चेदं ब्रह्मणा पूर्व्वमुक्तं दण्डः प्रजा रक्षति साधुनीतः । पश्याग्नयश्च प्रतिशाम्य भीताः सन्तर्ज्जिता दण्डभयाज्ज्वलन्ति ।
अन्धन्तम इवेदं स्यान्न प्राज्ञायेत किञ्चन । दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधुनी । ४५५
येऽपि सम्भिन्नमर्य्यादा नास्तिका वेदनिन्दकाः । तेऽपि भोगाय कल्पन्ते दण्डेनाशु निपीडिताः ।
सर्व्वो दण्डजितो लोके दुर्लभो हि शुचिर्न्नरः । दण्डस्य हि भयाद्भीतो भोगायैव प्रवर्त्तते ।
चातुर्व्वर्ण्यप्रमोदाय सुनीतनयनाय च । दण्डो विधात्रा विहितो धर्म्मार्थावभिरक्षितुं ।
यदि दण्डान्न बिभ्येयुर्व्वयांसि श्वापदानि च । अद्युः पशून्मनुष्यांश्च यज्ञार्थानि हवींषि च ।
न ब्रह्म चाप्यधीयीत कल्याणीं न दुहेत गां । न कन्योद्वहनं गच्छेद्यदि दण्डो न पालयेत् । ४६०
विश्वग्लोपः प्रवर्त्तेत भिद्येरन्सर्व्वसेतवः । ममत्वं न प्रजानीयुर्यदि दण्डो न पालयेत् ।
न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः । विधिवद्दक्षिणावन्ति यदि दण्डो न पालयेत् ।
चरेयुर्नाश्रमे धर्म्मं यथोक्तं विधिमाश्रिताः । न विद्यां प्राप्नुयात् कश्चित् यदि दण्डो न पालयेत् ।
न चोष्ट्रा न बलीवर्द्दा नाश्वाश्वतरगर्द्दभाः । युक्ता वहेयुर्यानानि यदि दण्डो न पालयेत् ।
न प्रेष्या वचनं कुर्य्युर्न्न बाला जातु कर्हिचित् । तिष्ठेत्पितृमतो धर्म्मे यदि दण्डो न पालयेत् । ४६५
दण्डे स्थिताः प्रजाः सर्व्वा दण्डे सर्व्वं विदुर्ब्बुधाः । दण्डे स्वर्गो मनुष्याणां लोकोऽयञ्च प्रतिष्ठितः ।
न तत्र कूटं पापं वा वञ्चना वाऽपि दृश्यते । यत्र दण्डः सुविहितश्चरत्यरिविनाशनः ।
हविः श्वाऽपि लिहेद्दृष्ट्वा दण्डश्चेन्नोद्यतो भवेत् । हरेत्काकः पुरोडाशं यदि दण्डो न पालयेत् ।
यदिदं धर्म्मतो राज्यं विहितं यद्यधर्म्मतः । कार्य्यस्तत्र न शोको वै भुंक्ष्व भोगान् व्ययस्व च ।
सुखेन धर्म्मं श्रीमन्तश्चरन्ति शुचिवाससः । संवसन्तः प्रियैर्द्दारैर्भुञ्जानाश्चान्नमुत्तमं । ४७०
अर्थे सर्व्वे समारम्भाः समायत्ता न संशयः । स च दण्डे समायत्तः पश्य दण्डस्य गौरवं ।
लोकयात्रार्थमेवेह धर्म्मप्रवचनं कृतं । अहिंसा साधुहिंसेति श्रेयान् धर्म्मपरिग्रहः ।
नात्यन्तं गुणवत्किञ्चिन्न चाप्यत्यन्तनिर्गुणं । उभयं सर्व्वकार्य्येषु दृश्यते साध्वसाधु च ।
पशूनां वृषणं छित्वा ततो भिन्दन्ति मस्तकं । वहन्ति बहवो भारान् बध्नन्ति दमयन्ति च ।
एवं पर्य्याकुले लोके वितथे जर्ज्जरीकृते । तैस्तैर्न्यायैर्म्महाराज पुराणं धर्म्ममाचर । ४७५
यज देहि प्रजा रक्ष धर्म्मं समनुपालय । अमित्राञ्जहि कौन्तेय मित्राणि परिपालय ।
मा च ते निघ्नतः शत्रून् मन्युर्भवतु पार्थिव । न तत्र किल्बिषं किञ्चित्कर्त्तुर्भवति भारत ।
आततायी हि यो हन्यादाततायिनमागतं । न तेन भ्रूणहा स स्यान्मन्युस्तन्मन्युमृच्छति ।
अवध्यः सर्व्वभूतानामन्तरात्मा न संशयः । अवध्ये चात्मनि कथं बध्यो भवति कस्यचित् ।
यथा हि पुरुषः शालां पुनः सम्प्रविशेन्नवां । एवं जीवः शरीराणि तानि तानि प्रपद्यते । ४८०
देहान्पुराणानुत्सृज्य नवान्सम्प्रतिपद्यते । एवं मृत्युमुखान्याहुर्ज्जना ये तत्त्वदर्शिनः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अर्ज्जुनवाक्ये पञ्चदशोऽध्यायः ॥ १५ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ अर्ज्जुनस्य वचः श्रुत्वा भीमसेनोऽत्यमर्षणः । धैर्य्यमास्थाय तेजस्वी ज्येष्ठं भ्रातरमब्रवीत् ।
राजन्विदितधर्म्मोऽसि न तेऽस्त्यविदितं क्वचित् । उपशिक्षाम ते वृत्तं सदैव न च शक्नुमः ।
न वक्ष्यामि न वक्ष्यामीत्येवं मनसि मे स्थितं । अतिदुःखात्तु वक्ष्यामि तन्निबोध जनाधिप ।
भवतः सम्प्रमोहेन सर्व्वं संशयितं कृतं । विक्लवत्वं च नः प्राप्तमबलत्वं तथैव च ।
कथं हि राजा लोकस्य सर्व्वशास्त्रविशारदः । मोहमापद्यसे दैन्याद्यथा कापुरुषस्तथा ।
अगतिश्च गतिश्चैव लोकस्य विदिता तव । आयत्यां च तदात्वे च न तेऽस्त्यविदितं प्रभो ।
एवं गते महाराज राज्यं प्रति जनाधिप । हेतुमत्र प्रवक्ष्यामि तमिहैकमनाः शृणु ।
द्विविधो जायते व्याधिः शारीरो मानसस्तथा । परस्परं तयोर्जन्म निर्द्वन्द्वं नोपलभ्यते ।
शारीराज्जायते व्याधिर्म्मानसो नात्र संशयः । मानसाज्जायते चापि शारीर इति निश्चयः ।
शारीरं मानसं दुःखं योऽतीतमनुशोचति । दुःखेन लभते दुःखं द्वावनर्थौ च विन्दति ।
शीतोष्णे चैव वायुश्च त्रयः शारीरजा गुणाः । तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणं ।
तेषामन्यतमोद्रेके विधानमुपदिश्यते । उष्णेन बाध्यते शीतं शीतेनोष्णं प्रबाध्यते ।
सत्वं रजस्तम इति मानसाः स्युस्त्रयो गुणाः । तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणं ।
तेषामन्यतमोत्सेके विधानमुपदिश्यते । हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ।
कश्चित्सुखे वर्त्तमानो दुःखस्य स्मर्त्तुमिच्छति । कश्चिद्दुःखे वर्त्तमानः सुखस्य स्मर्त्तुमिच्छति ।
स त्वं न दुःखी दुःखस्य न सुखी च सुखस्य वा । न दुःखी सुखजातस्य न सुखी दुःखजस्य वा ।
स्मर्त्तुमर्हसि कौरव्य दिष्टं हि बलवत्तरं । अथवा ते स्वभावोऽयं येन पार्थिव क्लिश्यसे ।
दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलां । मिषतां पाण्डुपुत्राणां न तस्य स्मर्त्तुमर्हसि ।
प्रव्राजनं च नगरादजिनैश्च विवासनं । महारण्यनिवासश्च न तस्य स्मर्त्तुमर्हसि ।
जटासुरात्परिक्लेशं चित्रसेनेन चाहवं । सैन्धवाच्च परिक्लेशं कथं विस्मृतवानसि ।
पुनरज्ञातचर्य्यायां कीचकेन पदा वधं । द्रौपद्या राजपुत्र्याश्च कथं विस्मृतवानसि ।
यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिन्दम । मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितं ।
यत्र नास्ति शरैः कार्य्यं न मित्रैर्न च बन्धुभिः । आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितं ।
तस्मिन्ननिर्ज्जिते युद्धे प्राणान्यदि विमोक्ष्यसे । अन्यं देहं समास्थाय ततस्तैरपि योत्स्यसे ।
तस्मादद्यैव गन्तव्यं युध्यस्व भरतर्षभ । परमव्यक्तरूपस्य व्यक्तं त्यक्त्वा स्वकर्म्मभिः ।
तस्मिन्ननिर्ज्जिते युद्धे कामवस्थां गमिष्यसि । एतज्जित्वा महाराज कृतकृत्यो भविष्यसि ।
एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिं । पितृपैतामहे वृत्ते शाधि राज्यं यथोचितं ।
दिष्ट्या दुर्य्योधनः पापो निहतः सानुगो युधि । द्रौपद्याः केशपाशस्य दिष्ट्या त्वं पदवीं गतः ।
यजस्व वाजिमेधेन विधिवद्दक्षिणावता । वयं ते किङ्कराः पार्थ वासुदेवश्च वीर्य्यवान् ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि भीमसेनवाक्ये षोडशोऽध्यायः ॥ १६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ असन्तोषः प्रमादश्च मदो रागोऽप्रशान्तता । बलं मोहोऽभिमानश्चाप्युद्वेगश्चैव सर्व्वशः ।
एभिः पाप्मभिराविष्टो राज्यं त्वमभिकाङ्क्षसे । निरामिषो विनिर्मुक्तः प्रशान्तः सुसुखी भव ।
य इमामखिलां भूमिं शिष्यादेको महीपतिः । तस्याप्युदरमेकं वै किमिदं त्वं प्रशंससि ।
नाह्ना पूरयितुं शक्यां न मासैर्भरतर्षभ । अपूर्य्यां पूरयन्निच्छामायुषाऽपि न शक्नुयात् ।
यथेद्धः प्रज्वलत्यग्निरसमिद्धः प्रशाम्यति । अल्पाहारतया त्वग्निं शमयौदर्य्यमुत्थितं । ५१५
आत्मोदरकृते प्राज्ञः करोति विघसं बहु । जयोदरं पृथिव्या ते श्रेयो निर्ज्जितया जितं ।
मानुषान् कामभोगांस्त्वमैश्वर्य्यञ्च प्रशंससि । अभोगिनोऽबलाश्चैव यान्ति स्थानमनुत्तमं ।
योगक्षेमश्च राष्ट्रस्य धर्म्माधर्म्मौ त्वयि स्थितौ । मुच्यस्व महतो भारात्त्यागमेवाभिसंश्रय ।
एकोदरकृते व्याघ्रः करोति विघसं बहु । तमन्येऽप्युपजीवन्ति मन्दा लोभवशा मृगाः ।
विषयान् प्रतिसंगृह्य संन्यासं कुर्व्वते यदि । न च तुष्यन्ति राजानः पश्य बुद्ध्यन्तरं यथा । ५२०
पत्राहारैरश्मकुट्टैर्दन्तोलूखलिकैस्तथा । अब्भक्षैर्व्वायुभक्षैश्च तैरयं नरको जितः ।
यश्चेमां वसुधां कृत्स्नां प्रशासेदखिलां नृपः । तुल्याश्मकाञ्चनो यश्च स कृतार्थो न पार्थिवः ।
सङ्कल्पेषु निरारम्भो निराशो निर्म्ममो भव । अशोकं स्थानमातिष्ठन्निह चामुत्र चाव्ययं ।
निरामिषा न शोचन्ति शोचसि त्वं किमामिषं । परित्यज्यामिषं सर्व्वं मृषा वादात्प्रमोक्ष्यसे ।
पन्थानौ पितृयानश्च देवयानश्च विश्रुतौ । ईजानः पितृयानेन देवयानेन मोक्षिणः । ५२५
तपसा ब्रह्मचर्य्येण स्वाध्यायेन महर्षयः । विमुच्य देहांस्ते यान्ति मृत्योरविषयं गताः ।
आमिषं बन्धनं लोके कर्म्मेहोक्तं तथामिषं । ताभ्यां विमुक्तः पापाभ्यां पदमाप्नोति तत्परं ।
अपि गाथां पुरा गीतां जनकेन वदन्त्युत । निर्द्वन्द्वेन विमुक्तेन मोक्षं समनुपश्यता ।
अनन्तं वत मे वित्तं यस्य मे नास्ति किञ्चन । मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन ।
प्रज्ञाप्रासादमारुह्य न शोच्यान् शोचतो जनान् । जगतीस्थानिवाद्रिस्थो मन्दबुद्धिर्न्न चेक्षते । ५३०
दृश्यं पश्यति यः पश्यन्स चक्षुष्मान्स बुद्धिमान् । अज्ञातानाञ्च विज्ञानात्सम्बोधाद्बुद्धिरुच्यते ।
यस्तु वाचं विजानाति बहुमानमियात्स वै । ब्रह्मभावप्रपन्नानां वैद्यानां भावितात्मनां ।
यदा भूतपृथग्भावमेकस्थमनुपश्यति । तत्र तत्र च विस्तारं ब्रह्म सम्पद्यते तदा ।
ते जनास्तां गतिं यान्ति नाविद्वांसोऽल्पचेतनाः । नाबुद्धयो नातपसः सर्व्वं बुद्धौ प्रतिष्ठितं ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरवाक्ये सप्तदशोऽध्यायः ॥ १७ ॥
॥ वैशम्पायन उवाच ॥ तूष्णींभूतं तु राजानं पुनरेवार्जुनोऽब्रवीत् । सन्तप्तः शोकदुःखाभ्यां राज्ञो वाक्शल्यपीडितः । ५३५
॥ अर्ज्जुन उवाच ॥ कथयन्ति पुरावृत्तमितिहासमिमं जनाः । विदेहराज्ञः संवादं भार्य्यया सह भारत ।
उत्सृज्य राज्यं भैक्ष्यार्थं कृतबुद्धिं नरेश्वरं । विदेहराजमहिषी दुःखिता यदभाषत ।
धनान्यपत्यं दारांश्च रत्नानि विविधानि च । पन्थानं पावकं हित्वा जनको मौण्ड्यमास्थितः ।
तं ददर्श प्रिया भार्य्या भैक्ष्यवृत्तिमकिञ्चनं । धानामुष्टिमुपासीनं निरीहं गतमत्सरं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तमुवाच समागम्य भर्त्तारमकुतोभयं। क्रुद्धा मनस्विनी भार्य्या विविक्ते हेतुमद्वचः ।
कथमुत्सृज्य राज्यं स्वं धनधान्यसमन्वितं। कापालीं वृत्तिमास्थाय धानामुष्टिर्न ते वरः।
प्रतिज्ञा तेऽन्यथा राजन्विचेष्टा चान्यथा तव। यद्राज्यं महदुत्सृज्य स्वल्पे लुभ्यसि पार्थिव।
नैते नातिथयो राजन् देवर्षिपितरस्तथा। अद्य शक्यास्त्वया भर्त्तुं मोघस्तेऽयं परिश्रमः।
देवतातिथिभिश्चैव पितृभिश्चैव पार्थिव। सर्व्वैरेतैः परित्यक्तः परिव्रजसि निष्क्रियः।
यस्त्वं त्रैविद्यवृद्धानां ब्राह्मणानां सहस्रशः। भर्त्ता भूत्वा च लोकस्य सोऽद्य तैर्भृतिमिच्छसि।
श्रियं हित्वा प्रदीप्तां त्वं श्ववत्सम्प्रतिवीक्ष्यसे। अपुत्त्रा जननी तेऽद्य कौशल्या चापतिस्त्वया।
अमी च धर्म्मकामास्त्वां क्षत्त्रियाः पर्य्युपासते। त्वदाशामभिकाङ्क्षन्तः कृपणाः फलहेतुकाः।
तांश्च त्वं विफलान् कुर्व्वन् कं नु लोकं गमिष्यसि। राजन् संशयिते मोक्षे परतन्त्रेषु देहिषु।
नैव तेऽस्ति परो लोको नापरः पापकर्म्मणः। धर्म्मान् दारान्परित्यज्य यस्त्वमिच्छसि जीवितुं।
स्रजो गन्धानलङ्कारान्वासांसि विविधानि च। किमर्थमभिसन्त्यज्य परिव्रजसि निष्क्रियः।
निपानं सर्व्वभूतानां भूत्वा त्वं पावनं महत्। आढ्यो वनस्पतिर्भूत्वा सोऽन्यांस्त्वं पर्य्युपाससे।
खादन्ति हस्तिनं न्यासैः क्रव्यादा बहवोऽप्युत। बहवः कृमयश्चैव किं पुनस्त्वामनर्थकं।
य इमां कुण्डिकां भिन्द्यात्त्रिविष्टब्धञ्च यो हरेत्। वासश्चापहरेत्तस्मिन् कथं ते मानसं भवेत्।
यस्त्वयं सर्व्वमुत्सृज्य धानामुष्टेरनुग्रहः। यदाऽनेन समं सर्व्वं किमिदं ह्यवसीयते।
धानामुष्टिरिहार्थश्चेत्प्रतिज्ञा ते विनश्यति। का चाहं तव को मे त्वं कश्च ते मय्यनुग्रहः।
प्रशाधि पृथिवीं राजन्यदि तेऽनुग्रहो भवेत्। प्रासादं शयनं यानं वासांस्याभरणानि च।
श्रिया विहीनैरधनैस्त्यक्तमित्त्रैरकिञ्चनैः। सौखिकैः सम्भृतानर्थान् यः सन्त्यजति किन्नु तत्।
योऽत्यन्तं प्रतिगृह्णीयाद्यश्च दद्यात्सदैव हि। तयोस्त्वमन्तरं विद्धि श्रेयांस्ताभ्यां क उच्यते।
सदैव याचमानेषु तथा दम्भान्वितेषु च। एतेषु दक्षिणा दत्ता दावाग्नाविव दुर्हुतं।
जातवेदा यथा राजन्नादग्ध्वैवोपशाम्यति। सदैव याचमानो हि तथा शाम्यति वै द्विजः।
सतां वै ददतोऽन्नञ्च लोकेऽस्मिन् प्रकृतिर्ध्रुवा। न चेद्राजा भवेद्दाता कुतः स्युर्म्मोक्षकाङ्क्षिणः।
अन्नाद्गृहस्था लोकेऽस्मिन् भिक्षवस्तत एव च। अन्नात्प्राणः प्रभवति अन्नदः प्राणदो भवेत्।
गृहस्थेभ्यो विनिर्मुक्ता गृहस्थानेव संश्रिताः। प्रभवञ्च प्रतिष्ठाञ्च दान्ता विन्दन्त आसते।
त्यागान्न भिक्षुकं विद्यान्न मौण्ड्यान्न च याचनात्। ऋजुस्तु योऽर्थं त्यजति न सुखं विद्धि भिक्षुकं।
असक्तः सक्तवद्गच्छन्निस्सङ्गो मुक्तबन्धनः। समः शत्रौ च मित्त्रे च स वै मुक्तो महीपते।
परिव्रजन्ति दानार्थं मुण्डाः काषायवाससः। सिता बहुविधैः पाशैः सञ्चिन्वन्तो वृथामिषं।
त्रयीञ्च नाम वार्त्ताञ्च त्यक्त्वा पुत्त्रान् व्रजन्ति ये। त्रिविष्टब्धञ्च वासश्च प्रतिगृह्णन्त्यबुद्धयः।
अनिष्कषाये काषायमीहार्थमिति विद्धि तं। धर्म्मध्वजानां मुण्डानां वृत्त्यर्थमिति मे मतिः।
काषायैरजिनैश्चीरैर्नग्नान्मुण्डान् जटाधरान्। बिभ्रत् साधून् महाराज जय लोकान् जितेन्द्रियः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्याधेयानि गुर्व्वर्थं क्रतून् सपशुदक्षिणान् । ददात्यहरहः पूर्व्वं को नु धर्म्मरतस्ततः । ५७०
॥ अर्ज्जुन उवाच ॥ तत्त्वज्ञो जनको राजा लोकेऽस्मिन्निति गीयते । सोऽप्यस्मिन्मोहसम्पन्नो मा मोहवशमन्वगाः ।
एवं धर्म्ममनुक्रान्तं सदा दानपरैर्न्नरैः । अनृशंस्यगुणोपेताः कामक्रोधविवर्ज्जिताः ।
प्रजानां पालने युक्ता दानमुत्तममास्थिताः । इष्टाल्लोकानवाप्स्यामो गुरुवृद्धोपचायिनः ।
देवतातिथिभूतानां निर्व्वपन्तो यथाविधि । स्थानमिष्टमवाप्स्यामो ब्राह्मणाः सत्यवादिनः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अर्ज्जुनवाक्ये अष्टादशोऽध्यायः ॥ १८ ॥
॥ युधिष्ठिर उवाच ॥ वेदाहं तात शास्त्राणि अपराणि पराणि च । उभयं वेदवचनं कुरु कर्म्म त्यजेति च । ५७५
आकुलानि च शास्त्राणि हेतुभिश्चिन्तितानि च । निश्चयश्चैव यो मन्त्रे वेदाहं तं यथाविधि ।
त्वन्तु केवलमस्त्रज्ञो वीरव्रतसमन्वितः । शास्त्रार्थं तत्त्वतो गन्तुमसमर्थः कथञ्चन ।
शास्त्रार्थसूक्ष्मदर्शी यो धर्म्मनिश्चयकोविदः । तेनाप्येवं न वाच्योऽहं यदि धर्म्मं प्रपश्यसि ।
भ्रातृसौहृदमास्थाय यदुक्तं वचनं त्वया । न्याय्यं युक्तञ्च कौन्तेय प्रीतोऽहं तेन तेऽर्ज्जुन ।
युद्धधर्म्मेषु सर्व्वेषु क्रियाणां नैपुणेषु च । न त्वया सदृशः कश्चित्त्रिषु लोकेषु विद्यते । ५८०
धर्म्मं सूक्ष्मतरं वाच्यं तत्र दुष्प्रतरं त्वया । धनञ्जय न मे बुद्धिमभिशङ्कितुमर्हसि ।
युद्धशास्त्रविदेव त्वं न वृद्धाः सेवितास्त्वया । सङ्क्षिप्तविस्तरविदां न तेषां वेत्सि निश्चयं ।
तपस्त्यागोऽविधिरिति निश्चयस्त्वेष धीमतां । परं परं ज्याय एषां येषां नैःश्रेयसी मतिः ।
यत्त्वेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति । तत्र ते वर्त्तयिष्यामि यथा नैतत्प्रधानतः ।
तपःस्वाध्यायशीला हि दृश्यन्ते धार्म्मिका जनाः । ऋषयस्तपसा युक्ता येषां लोकाः सनातनाः । ५८५
अजातशत्रवो धीरास्तथाऽन्ये वनवासिनः । अरण्ये बहवश्चैव स्वाध्यायेन दिवङ्गताः ।
उत्तरेण तु पन्थानमार्य्या विषयनिग्रहात् । अबुद्धिजं तमस्त्यक्त्वा लोकांस्त्यागवतां गताः ।
दक्षिणेन तु पन्थानं यं भास्वन्तं प्रचक्षते । एते क्रियावतां लोका ये श्मशानानि भेजिरे ।
अनिर्द्देश्या गतिः सा तु यां प्रपश्यन्ति मोक्षिणः । तस्माद्योगः प्रधानेष्टः स तु दुःखं प्रवेदितुं ।
अनुसृत्य तु शास्त्राणि कवयः समवस्थिताः । अपीह स्यादपीह स्यात्साराशारदिदृक्षया । ५९०
वेदवादानतिक्रम्य शास्त्राण्यारण्यकानि च । विपाट्य कदलीस्तम्भं सारं ददृशिरे न ते ।
तथैकान्तव्युदासेन शरीरे पाञ्चभौतिके । इच्छाद्वेषसमायुक्तमात्मानं प्राज्ञरिङ्गितैः ।
अग्राह्यं चक्षुषा सूक्ष्ममनिर्द्देश्यं च तद्गिरा । कर्म्महेतुपुरस्कारं भूतेषु परिवर्त्तते ।
कल्याणगोचरं कृत्वा मनस्तृष्णां निगृह्य च । कर्म्मसन्ततिमुत्सृज्य स्यान्निरालम्बनः सुखी ।
अस्मिन्नेवं सूक्ष्मगम्ये मार्गे सद्भिर्न्निषेविते । कथमर्थमनर्थाढ्यमर्ज्जुन त्वं प्रशंससि । ५९५
पूर्व्वशास्त्रविदोऽप्येवं जनाः पश्यन्ति भारत । क्रियासु निरता नित्यं दाने यज्ञे च कर्म्मणि ।
भवन्ति सुदुरावर्त्ता हेतुमन्तोऽपि पण्डिताः । दृढपूर्व्वं स्मृता मूढा नैतदस्तीति वादिनः ।
अमृतस्यावमन्तारो वक्तारो जनसंसदि । चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पार्थ यन्न विजानीमः कस्तान् ज्ञातुमिहार्हसि । एवं प्राज्ञान् सतश्चापि महतः शास्त्रवित्तमान् ।
तपसा महदाप्नोति बुद्ध्या वै विन्दते महत् । त्यागेन सुखमाप्नोति सदा कौन्तेय तत्त्ववित् । ६००
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरवाक्ये ऊनविंशोऽध्यायः ॥ १९ ॥
॥ वैशम्पायन उवाच ॥ तस्मिन्वाक्यान्तरे वक्ता देवस्थानो महातपाः । अभिनीततरं वाक्यमित्युवाच युधिष्ठिरं ।
॥ देवस्थान उवाच ॥ यद्वचः फाल्गुनेनोक्तं न ज्यायोऽस्ति धनादिति । अत्र ते वर्त्तयिष्यामि तदेकाग्रमनाः शृणु ।
अजातशत्रो धर्म्मेण कृत्स्ना च वसुधा जिता । तां जित्वा च वृथा राजन् न परित्यक्तुमर्हसि ।
चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता । तां क्रमेण महाबाहो यथावज्जय पार्थिव ।
तस्मात्पार्थ महायज्ञैर्यजस्व बहुदक्षिणैः । स्वाध्याययज्ञा ऋषयो ज्ञानयज्ञास्तथाऽपरे । ६०५
कर्म्मनिष्ठांश्च बुध्येथास्तपोनिष्ठांश्च भारत । वैखानसानां कौन्तेय वचनं श्रूयते यथा ।
ईहेत धनहेतोर्यस्तस्यानीहा गरीयसी । भूयान्दोषो हि वर्द्धेत यस्तं धर्म्ममुपाश्रयेत् ।
कृत्स्नञ्च द्रव्यसंहारं कुर्व्वन्ति विधिकारणात् । आत्मानं दूषितो बुद्ध्या भ्रूणहत्यां न बुध्यते ।
अनर्हते यद्ददाति न ददाति यदर्हते । अर्हानर्हापरिज्ञानात् दानधर्म्मोऽपि दुष्करः ।
यज्ञाय सृष्टानि धनानि धात्रा यज्ञो दिष्टः पुरुषो रक्षिता च । तस्मात्सर्व्वं यज्ञ एवोपयोज्यं धनं ततोऽनन्तरएव
कामः । ६१०
यज्ञैरिन्द्रो विविधैरन्नवद्भिर्देवान् सर्व्वानत्ययाद्भूरितेजाः । तेनेन्द्रत्वं प्राप्य विभ्राजतेऽसौ तस्माद्यज्ञे सर्व्वमेवोपयोज्यं ।
महादेवः सर्व्वयज्ञे महात्मा हुत्वात्मानं देवदेवो बभूव । विश्वाल्लोकान् व्याप्य विष्टभ्य कीर्त्त्या विराजते द्युतिमान् कृत्ति
वासाः ।
आविक्षितः पार्थिवोऽसौ मरुत्त ऋद्ध्या शक्रं योजयेद्देवराजं । यज्ञे यस्य श्रीः स्वयं सन्निविष्टा यस्मिन् भाण्डं काञ्चनं
सर्व्वमासीत् ।
हरिश्चन्द्रः पार्थिवेन्द्रः श्रुतस्ते यज्ञैरिष्ट्वा पुण्यभाग्वीतशोकः । ऋद्ध्या शक्रं योजयन्मानुषः संस्तस्माद्यज्ञे सर्व्वमेवोपयोज्यं ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि देवस्थानवाक्ये विंशतितमोऽध्यायः ॥ २० ॥
॥ देवस्थान उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं । इन्द्रेण समये पृष्टो यदुवाच बृहस्पतिः । ६१५
सन्तोषो वै स्वर्गतमः सन्तोषः परमं सुखं । तुष्टेर्न किञ्चित्परतः सा सम्यक् प्रतितिष्ठति ।
यदा संहरते कामान् कूर्म्मोऽङ्गानीव सर्व्वशः । तदात्मज्योतिरचिरात्स्वात्मन्येव प्रसीदति ।
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति । कामद्वेषौ च जयति तदात्मानं प्रपश्यति ।
यदाऽसौ सर्व्वभूतानां न द्रुह्यति न काङ्क्षति । कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ।
एवं कौन्तेय भूतानि तं तं धर्म्मं तथा तथा । तदात्मना प्रपश्यन्ति तस्माद्बुध्यस्व भारत । ६२०
अन्ये साम प्रशंसन्ति व्यायाममपरे जनाः । नैकं न चापरे केचिदुभयं च तथाऽपरे ।
यज्ञमेके प्रशंसन्ति संन्यासमपरे जनाः । दानमेके प्रशंसन्ति केचिच्चैव प्रतिग्रहं ।
केचित्सर्व्वं परित्यज्य तूष्णीन्ध्यायन्त आसते । राज्यमेके प्रशंसन्ति प्रजानां परिपालनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हित्वा छित्त्वा च भित्त्वा च केचिदेकान्तशीलिनः । एतत्सर्व्वं समालोक्य बुधानामेव निश्चयः ।
अद्रोहेणैव भूतानां यो धर्म्मः स सतां मतः । अद्रोहः सत्यवचनं संविभागो दया दमः । ६२५
प्रजनं स्वेषु दारेषु मार्द्दवं ह्रीरचापलं । एवं धर्म्मं प्रधानेष्टं मनुः स्वायम्भुवोऽब्रवीत् ।
तस्मादेतत्प्रयत्नेन कौन्तेय परिपालय । यो हि राज्ये स्थितः शश्वद्वशी तुल्यप्रियाप्रियः ।
क्षत्त्रियो यज्ञशिष्टाशी राजशास्त्रार्थतत्त्ववित् । असाधुनिग्रहरतः साधूनां प्रग्रहे रतः ।
धर्म्मवर्त्मनि संस्थाप्य प्रजा वर्त्तेत धर्म्मतः । पुत्त्रसंक्रामितश्रीश्च वने वन्येन वर्त्तयन् ।
विधिना श्रावणेनैव कुर्य्यात्कर्म्माण्यतन्द्रितः । य एवं वर्त्तते राजा राजधर्म्मविनिश्चितः । ६३०
तस्यायञ्च परश्चैव लोकः स्यात्सफलोदयः । निर्व्वाणं हि सुदुष्प्राप्यं बहुविघ्नञ्च मे मतं ।
एवं धर्म्ममनुक्रान्ताः सत्यदानतपःपराः । आनृशंस्यगुणैर्युक्ताः कामक्रोधविवर्जिताः ।
प्रजानां पालने युक्ता धर्म्ममुत्तममाश्रिताः । गोब्राह्मणार्थं युध्यन्तः प्राप्ता गतिमनुत्तमां ।
एवं रुद्राः सवसवस्तथादित्याः परन्तप । साध्या राजर्षिसङ्घाश्च धर्म्ममेतं समाश्रिताः ।
अप्रमत्तास्ततः स्वर्गं प्राप्ताः पुण्यैः स्वकर्म्मभिः । ६३५
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि देवस्थानवाक्ये एकविंशोऽध्यायः ॥ २१ ॥
॥ वैशम्पायन उवाच ॥ अस्मिन्नेवान्तरे वाक्यं पुनरेवार्जुनोऽब्रवीत् । निर्व्विसमनसं ज्येष्ठमिदं भ्रातरमच्युतं ।
क्षत्त्रधर्म्मेण धर्म्मज्ञ प्राप्य राज्यं सुदुर्लभं । जित्वा चारीन्नरश्रेष्ठ तप्यते किं भृशं भवान् ।
क्षत्त्रियाणां महाराज संग्रामे निधनं मतं । विशिष्टं बहुभिर्यज्ञैः क्षत्त्रधर्म्मविधिः स्मृतः ।
ब्राह्मणानां तपस्त्यागः प्रेत्य धर्म्मविधिः स्मृतः । क्षत्त्रियाणाञ्च निधनं संग्रामे विहितं प्रभो ।
क्षात्त्रधर्म्मो महारौद्रः शस्त्रनित्य इति स्मृतः । बधश्च भरतश्रेष्ठ काले शस्त्रेण संयुगे । ६४०
ब्राह्मणस्यापि चेद्राजन् क्षत्त्रधर्म्मेण वर्त्ततः । प्रशस्तं जीवितं लोके क्षत्त्रं हि ब्रह्मसम्भवं ।
न त्यागो न पुनर्यज्ञो न तपो मनुजेश्वर । क्षत्त्रियस्य विधीयन्ते न परस्वोपजीवनं ।
स भवान् सर्व्वधर्म्मज्ञो धर्म्मात्मा भरतर्षभ । राजा मनीषी निपुणो लोके दृष्टपरापरः ।
त्यक्त्वा सन्तापजं शोकं दंशितो भव कर्म्मणि । क्षत्त्रियस्य विशेषेण हृदयं वज्रसन्निभ ।
जित्वाऽरीन् क्षत्त्रधर्म्मेण प्राप्य राज्यमकण्टकं । विजितात्मा मनुष्येन्द्र यज्ञदानपरो भव । ६४५
इन्द्रो वै ब्रह्मणः पुत्त्रः क्षत्त्रियः कर्म्मणाऽभवत् । ज्ञातीनां पापवृत्तानां जघान नवतीर्नव ।
तच्चास्य कर्म्म पूज्यञ्च प्रशस्यञ्च विशाम्पते । तेनेन्द्रत्वं समापेदे देवानामिति नः श्रुतं ।
स त्वं यज्ञैर्म्महाराज यजस्व बहुदक्षिणैः । यथैवेन्द्रो मनुष्येन्द्र चिराय विगतज्वरः ।
मा त्वमेवं गते किञ्चिच्छोचिथाः क्षत्त्रियर्षभ । गतास्ते क्षत्त्रधर्म्मेण शस्त्रपूताः परां गतिं ।
भवितव्यं तथा तच्च यद्वृत्तं भरतर्षभ । दिष्टं हि राजशार्दूल न शक्यमतिवर्त्तितुं । ६५०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अर्ज्जुनवाक्ये द्वाविंशोऽध्याऽयः ॥ २२ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु कौन्तेयो गुडाकेशेन पाण्डवः । नोवाच किञ्चित्कौरव्यस्ततो द्वैपायनोऽब्रवीत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-IKS Grant-2 Equipment Heritage Foundation, Jalgaon

॥ व्यास उवाच ॥ बीभत्सोर्वचनं सौम्य सत्यमेतद्युधिष्ठिर। शास्त्रदृष्टः परो धर्म्मः स्थितो गार्हस्थ्यमाश्रितः
स्वधर्म्मं चर धर्म्मज्ञ यथाशास्त्रं यथाविधि। न हि गार्हस्थ्यमुत्सृज्य तवारण्यं विधीयते।
गृहस्थं हि सदा देवाः पितरोऽतिथयस्तथा। भृत्याश्चैवोपजीवन्ति तान् भरस्व महीपते।
वयांसि पशवश्चैव भूतानि च जनाधिप। गृहस्थैरेव धार्य्यन्ते तस्माच्छ्रेष्ठो गृहाश्रमी। ६५५
सोऽयं चतुर्णामेतेषामाश्रमाणां दुराचरः। तं चराद्य विधिं पार्थ दुश्चरं दुर्ब्बलेन्द्रियैः।
वेदज्ञानञ्च ते कृत्स्नं तपश्चाचरितं महत्। पितृपैतामहं राज्यं धुर्य्यवद्वोढुमर्हसि।
तपो यज्ञः क्षमा विद्या भैक्षमिन्द्रियसंयमः। ध्यानमेकान्तशीलत्वं तुष्टिर्ज्ञानञ्च शक्तितः।
ब्राह्मणानां महाराज चेष्टा संसिद्धिकारिका। क्षत्रियाणान्तु वक्ष्यामि तवापि विदितं पुनः।
यज्ञो विद्या समुत्थानमसन्तोषः श्रियं प्रति। दण्डधारणमुग्रत्वं प्रजानां परिपालनं। ६६०
वेदज्ञानं तथा कृत्स्नं तपः सुचरितं तथा। द्रविणोपार्जनं भूरि पात्रे च प्रतिपादनं।
एतानि राज्ञां कर्म्माणि सुकृतानि विशाम्पते। इमं लोकममुञ्चैव साधयन्तीति नः श्रुतं।
एषां ज्यायस्तु कौन्तेय दण्डधारणमुच्यते। बलं हि क्षत्रिये नित्यं बले दण्डः समाहितः।
एताश्चेष्टाः क्षत्रियाणां राजन् संसिद्धिकारिकाः। अपि गाथामिमाञ्चैव बृहस्पतिरगायत।
भूमिरेतौ निगिरति सर्प्पो बिलशयानि च। राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनं। ६६५
सुद्युम्नश्चापि राजर्षिः श्रूयते दण्डधारणात्। प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा।
॥ युधिष्ठिर उवाच ॥ भगवन् कर्म्मणा केन सुद्युम्नो वसुधाधिपः। संसिद्धिं परमां प्राप्तः श्रोतुमिच्छामि तं नृपं।
॥ व्यास उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। शङ्खश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ।
तयोरावसथावास्तां रमणीयौ पृथक् पृथक्। नित्यं पुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु।
ततः कदाचिल्लिखितः शङ्खस्याश्रममागतः। यदृच्छयाऽथ शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात्। ६७०
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा। फलानि पातयामास सम्यक् परिणतान्युत।
अभ्युपादाय विस्रब्धो भक्षयामास स द्विजः। तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागतः।
भक्षयन्तन्तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत्। कुतः फलान्यवाप्तानि हेतुना केन खादसि।
सोऽब्रवीद्भ्रातरं ज्येष्ठमुपस्पृश्याभिवाद्य च। इत एव गृहीतानि मयेति प्रहसन्निव।
तमब्रवीत्तथा शङ्खस्तीव्ररोषसमन्वितः। स्तेयं त्वया कृतमिदं फलान्याददता स्वयं। ६७५
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै। अदत्तादानमेवं हि कृतं पार्थिवसत्तम।
स्तेनं मां त्वं विदित्वा च स्वधर्म्ममनुपालयन्। शीघ्रं धारय चौरस्य मम दण्डं नराधिप।
इत्युक्तस्तस्य वचनात्सुद्युम्नं स नराधिपं। अभ्यगच्छन्महाभागो लिखितः संशितव्रतः।
सुद्युम्नस्त्वन्तपालेभ्यः श्रुत्वा लिखितमागतं। अभ्यगच्छत्सहामात्यः पद्भ्यामेव जनेश्वरः।
तमब्रवीत्समागम्य स राजा धर्म्मवित्तमं। किमागमनमाचक्ष्व भगवन् कृतमेव तत्। ६८०
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत्। प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्त्तुमर्हसि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनिसृष्टानि गुरुणा फलानि मनुजर्षभ । भक्षितानि महाराज तत्र मां शाधि मा चिरं ।
॥ सुद्युम्न उवाच ॥ प्रमाणं चेन्मतो राजा भवतो दण्डधारणे । अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ।
स भवानभ्यनुज्ञातः शुचिकर्म्मा महाव्रतः । ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ।
॥ व्यास उवाच ॥ सच्छन्द्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना । नान्यं स वरयामास तस्माद्दण्डादृते वरं । ६८५
ततः स पृथिवीपालो लिखितस्य महात्मनः । करौ प्रच्छेदयामास धृतदण्डो जगाम सः ।
स गत्वा भ्रातरं शङ्खमार्त्तरूपोऽब्रवीदिदं । धृतदण्डस्य दुर्बुद्धेर्भवांस्तत्क्षन्तुमर्हसि ।
॥ शङ्ख उवाच ॥ न कुप्ये तव धर्म्मज्ञ न त्वं दूषयसे मम । धर्म्मस्तु ते व्यतिक्रान्तस्ततस्ते निष्कृतिः कृता ।
स गत्वा बाहुदां शीघ्रं तर्प्पयस्व यथाविधि । देवानृषीन् पितॄंश्चैव मा चाधर्म्मे मनः कृथाः ।
तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा । अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे । ६९०
प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ । ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ।
ततस्तमब्रवीच्छङ्खस्तपसेदं कृतं मया । मा च तत्र विशङ्काऽभूद्दैवमत्र विधीयते ।
॥ लिखित उवाच ॥ किं नु नाहं त्वया पूतः पूर्व्वमेव महाद्युते । यस्य ते तपसो वीर्य्यमीदृशं द्विजसत्तम ।
॥ शङ्ख उवाच ॥ एवमेतन्मया कार्य्यं नाहं दण्डधरस्तव । स च पूतो नरपतिस्त्वञ्चापि पितृभिस्सह ।
॥ व्यास उवाच ॥ स राजा पाण्डवश्रेष्ठ श्रेयानेतेन कर्म्मणा । प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा । ६९५
एष धर्म्मः क्षत्रियाणां प्रजानां परिपालनं । उत्पथोऽन्यो महाराज मा स्म शोके मनः कृथाः ।
भ्रातुरस्य हितं वाक्यं शृणु धर्म्मज्ञ सत्तमं । दण्ड एव हि राजेन्द्र क्षत्रधर्म्मो न मुण्डनं ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्यासवाक्ये त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ वैशम्पायन उवाच ॥ पुनरेव महर्षिस्तं कृष्णद्वैपायनो मुनिः । अजातशत्रुं कौन्तेयमिदं वचनमब्रवीत् ।
अरण्ये वसतां तात भ्रातॄणां ते मनस्विनां । मनोरथा महाराज ये तत्रासन् युधिष्ठिर ।
तानिमे भरतश्रेष्ठ प्राप्नुवन्तु महारथाः । प्रशाधि पृथिवीं पार्थ ययातिरिव नाहुषः । ७००
अरण्ये दुःखवसतिरनुभूता तपस्विभिः । दुःखस्यान्ते नरव्याघ्र सुखान्यनुभवन्तु वै ।
धर्म्ममर्थञ्च कामञ्च भ्रातृभिः सह भारत । अनुभूय ततः पश्चात्प्रस्थाताऽसि विशाम्पते ।
अर्थिनाञ्च पितॄणाञ्च देवतानाञ्च भारत । आनृण्यं गच्छ कौन्तेय तत्सर्व्वञ्च करिष्यसि ।
सर्व्वमेधाश्वमेधाभ्यां यजस्व कुरुनन्दन । ततः पश्चान्महाराज गमिष्यसि परां गतिं ।
भ्रातॄंश्च सर्व्वान् क्रतुभिः संयोज्य बहुदक्षिणैः । सम्प्राप्तः कीर्त्तिमतुलां पाण्डवेय भविष्यसि । ७०५
विद्मते पुरुषव्याघ्र वचनं कुरुसत्तम । शृणुष्वैवं यथा कुर्व्वन्न धर्म्माच्च्यवसे नृप ।
आददानस्य विजयं विग्रहञ्च युधिष्ठिर । समानधर्म्मकुशलाः स्थापयन्ति नरेश्वरं ।
देशकालप्रतीक्षी यो दस्यून्मर्षयते नृप । शास्त्रजां बुद्धिमास्थाय युज्यते नैनसा हि सः ।
आदाय बलिषड्भागं यो राष्ट्रं नाभिरक्षति । प्रतिगृह्णाति तत्पापं चतुर्थांशेन भूमिपः ।
निबोध च यथा तिष्ठन् धर्म्मान्न च्यवते नृपः । निग्रहात् धर्म्मशास्त्राणामनुरुध्यन्नपेतभीः । ७१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कामक्रोधावनादृत्य पितेव समदर्शनः । शास्त्रजां बुद्धिमास्थाय युज्यते नैनसा हि सः ।
दैवेनाभ्याहतो राजा कर्म्मकाले महाद्युते । न साधयति यत्कर्म्म न तत्राऽऽहुरतिक्रमं ।
तरसा बुद्धिपूर्व्वं वा निग्राह्या एव शत्रवः । पापैः सह न सन्दध्याद्राष्ट्रं पण्यञ्च कारयेत् ।
शूराश्चार्य्याश्च सत्कार्य्या विद्वांसश्च युधिष्ठिर । गोमिनो धनिनश्चैव परिपाल्या विशेषतः ।
व्यवहारेषु धर्म्मेषु योक्तव्याश्च बहुश्रुताः । गुणयुक्तेऽपि नैकस्मिन्विश्वसेत विचक्षणः । ७१५
अरक्षिता दुर्व्विनीतो मानी स्तब्धोऽभ्यसूयकः । एनसा युज्यते राजा दुर्दान्त इति चोच्यते ।
येऽरक्ष्यमाणा हीयन्ते दैवेनाभ्याहता नृप । तस्करैश्चापि हृयन्ते सर्व्वं तद्राजकिल्बिषं ।
सुमन्त्रिते सुनीतश्च सर्व्वतश्चोपपादिते । पौरुषे कर्म्मणि कृते नास्त्यधर्म्मो युधिष्ठिर ।
विच्छिद्यन्ते समारम्भाः सिध्यन्ते चापि दैवतः । कृते पुरुषकारे तु नैनः स्पृशति पार्थिवं ।
अत्र ते राजशार्दूल वर्त्तयिष्ये कथामिमां । यद्वृत्तं पूर्व्वराजर्षेर्हयग्रीवस्य पाण्डव । ७२०
शत्रून् हत्वा हतस्याजौ शूरस्याक्लिष्टकर्म्मणः । असहायस्य सङ्ग्रामे निर्जितस्य युधिष्ठिर ।
यत्कर्म्म वै निग्रहे शात्रवाणां योगश्चाग्र्यः पालने मानवानां । कृत्वा कर्म्म प्राप्य कीर्त्तिं स युद्धाद्वाजिग्रीवो मोदते स्वर्गलोके ।
सन्त्यक्तात्मा समरेष्वाततायी शस्त्रैश्छिन्नो दस्युभिर्व्वध्यमानः । अश्वग्रीवः कर्म्मशीलो महात्मा संसिद्धार्थो मोदते स्वर्गलोके ।
धनुर्यूपो रशना ज्या शरः स्रुक् स्रुवः खड्गो रुधिरं यत्र चाज्यं । रथो वेदी कामगो युद्धमग्निश्चातुर्होत्रं चतुरो वाजिमुख्याः ।
हुत्वा तस्मिन्यज्ञवह्नावथारीन्पापान्मुक्तो राजसिंहस्तरस्वी । प्राणान् हुत्वा चावभृथे रणे स वाजिग्रीवो मोदते देवलोके । ७२५
राष्ट्रं रक्षन्बुद्धिपूर्व्वं नयेन सन्त्यक्तात्मा यज्ञशीलो महात्मा । सर्व्वाल्लोकान्व्याप्य कीर्त्त्या मनस्वी वाजिग्रीवो मोदते देवलोके ।
दैवीं सिद्धिं मानुषीं दण्डनीतिं योगन्यासैः पालयित्वा महीञ्च । तस्माद्राजा धर्म्मशीलो महात्मा वाजिग्रीवो मोदते देवलोके ।
विद्वांस्त्यागी श्रद्दधानः कृतज्ञस्त्यक्त्वा लोकं मानुषं कर्म्म कृत्वा । मेधाविनां विदुषां सम्मतानां तनुत्यजां लोकमाक्रम्य राजा ।
सम्यग्वेदान् प्राप्य शास्त्राण्यधीत्य सम्यग्राज्यं पालयित्वा महात्मा । चातुर्व्वर्ण्यं स्थापयित्वा स्वधर्म्मे वाजिग्रीवो मोदते देवलोके ।
जित्वा सङ्ग्रामान्पालयित्वा प्रजाश्च सोमं पीत्वा तर्पयित्वा द्विजाग्र्यान् । युक्त्या दण्डं धारयित्वा प्रजानां युद्धे क्षीणो मोदते देवलोके । ७३०
वृत्तं यस्य श्लाघनीयं मनुष्याः सन्तो विद्वांसश्चार्हयन्त्यर्हणीयं । स्वर्गं जित्वा वीरलोकानवाप्य सिद्धिं प्राप्तः पुण्यकीर्त्तिर्म्महात्मा ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्यासवाक्ये चतुर्व्विंशोऽध्यायः ॥ २४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ द्वैपायनवचः श्रुत्वा कुपिते च धनञ्जये । व्याससामन्त्र्य कौन्तेयः प्रत्युवाच युधिष्ठिरः ।

॥ युधिष्ठिर उवाच ॥ न पार्थिवमिदं राज्यं न भोगाश्च पृथग्विधाः । प्रीणयन्ति मनो मेऽद्य शोको मां रुन्धयत्ययं ।

श्रुत्वा वीरविहीनानामपुत्त्राणाञ्च योषितां । परिदेवयमानानां शान्तिं नोपलभे मुने ।

इत्युक्तः प्रत्युवाचेदं व्यासो योगविदाम्बरः । युधिष्ठिरं महाप्राज्ञो धर्म्मज्ञो वेदपारगः । ७३५

॥ व्यास उवाच ॥ न कर्म्मणा लभ्यते चेज्यया वा नाप्यस्ति दाता पुरुषस्य कश्चित् । पर्य्याययोगाद्विहितं विधात्रा कालेन सर्व्वं लभते मनुष्यः ।

न बुद्धिशास्त्राध्ययनेन शक्यं प्राप्तुं विशेषं मनुजैरकाले । मूर्खोऽपि चाप्नोति कदाचिदर्थान् कालो हि कार्य्यं प्रति निर्व्विशेषः ।

नाभूतिकालेषु फलं ददन्ति शिल्पानि मन्त्राश्च तथौषधानि । तान्येव कालेन समाहितानि सिद्ध्यन्ति वर्द्धन्ति च भूतिकाले ।

कालेन शीघ्राः प्रवहन्ति वाताः कालेन वृष्टिर्ज्जलदानुपैति । कालेन पद्मोत्पलवज्जलञ्च कालेन पुष्यन्ति नगा वनेषु ।

कालेन कृष्णाश्च सिताश्च रात्र्यः कालेन चन्द्रः प्रतिपूर्णविम्बः । नाकालतः पुष्पफलं द्रुमाणां नाकालवेगाः सरितो वहन्ति । ७४०

नाकालमत्ताः खगपन्नगाश्च मृगद्विपाः शैलमृगाश्च लोके । नाकालतः स्त्रीषु भवन्ति गर्भा नायान्त्यकाले शिशिरोष्णवर्षाः ।

नाकालतो म्रियते जायते वा नाकालतो व्याहरते च बालः । ना कालतो यौवनमभ्युपैति नाकालतो रोहति वीजमुप्तं ।

नाकालतो भानुरुपैति योगं नाकालतोऽस्तं गिरिमभ्युपैति । नाकालतो हीयते वर्द्धते च चन्द्रः समुद्रोऽपि महोर्म्मिमाली ।

अत्राप्युदाहरन्तीममितिहासं पुरातनं । गीतं राज्ञा सेनजिता दुःखार्त्तेन युधिष्ठिर ।

सर्व्वानेवैष पर्य्यायो मर्त्यान् स्पृशति दुःसहः । कालेन परिपक्वा हि म्रियन्ते सर्व्वपार्थिवाः । ७४५

घ्नन्ति चान्यान्नरान् राजंस्तानप्यन्ये तथा नराः । संज्ञैषा लौकिकी राजन्न हिनस्ति न हन्यते ।

हन्तीति मन्यते कश्चिन्न हन्तीत्यपि चापरः । स्वभावतस्तु नियतौ भूतानां प्रभवाप्ययौ ।

नष्टे धने वा दारे वा पुत्त्रे पितरि वा मृते । अहो दुःखमिति ध्यायन् दुःखस्यापचितिं चरेत् ।

स किं शोचसि मूढस्सन् शोच्यान् किमनुशोचसि । पश्य दुःखेषु दुःखानि भयेषु च भयान्यपि ।

आत्माऽपि चायं न मम सर्व्वा वा पृथिवी मम । यथा मम तथाऽन्येषामिति पश्यन्न मुह्यति । ७५०

शोकस्थानसहस्राणि हर्षस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितं ।

एवमेतानि कालेन प्रियद्वेष्याणि भागशः । जीवेषु परिवर्त्तन्ते दुःखानि च सुखानि च ।

दुःखमेवास्ति न सुखं तस्मात्तदुपलभ्यते । तृष्णार्त्तिप्रभवं दुःखं दुःखार्त्तिप्रभवं सुखं ।

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखं । न नित्यं लभ्यते दुःखं न नित्यं लभते सुखं ।

सुखमेवं हि दुःखान्तं कदाचिद्दुःखतः सुखं । तस्मादेतद्द्वयं जह्याद्य इच्छेच्छाश्वतं सुखं । ७५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यन्निमित्तं भवेच्छोकस्तापो वा दुःखमूर्च्छितः। आयासो वाऽपि यन्मूलस्तदेकाङ्गमपि त्यजेत्।

सुखं वा यदि वा दुःखं प्रियं वा यदि वाऽप्रियं। प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः।

ईषदप्यङ्ग दाराणां पुत्त्राणामचरन् प्रियं। ततो ज्ञास्यसि कः कस्य केन वा कथमेव च।

ये च मूढतमा लोके ये च बुद्धेः परङ्गताः। त एव सुखमेधन्ते मध्यमः क्लिश्यते जनः।

इत्यब्रवीन्महाप्राज्ञो युधिष्ठिर स सेनजित्। परापरज्ञो लोकस्य धर्म्मवित्सुखदुःखवित्। ७६०

परदुःखेन यो दुःखी न स जातु सुखी भवेत्। दुःखानां हि क्षयो नास्ति जायते ह्यपरात्परं।

सुखञ्च दुःखञ्च भवाभवौ च लाभालाभौ मरणं जीवितञ्च। पर्य्यायतः सर्व्वमवाप्नुवन्ति तस्माद्धीरो नैव हृष्येन्न शोचेत्।

दीक्षां राज्ञः संयुगे युद्धमाहुर्योगं राज्ये दण्डनीत्याञ्च सम्यक्। वित्तत्यागो दक्षिणानाञ्च यज्ञे सम्यक् ज्ञानं पावनानीति विद्यात्।

रक्षन् राष्ट्रं बुद्धिपूर्व्वं नयेन सन्त्यक्तात्मा यज्ञशीलो महात्मा। सर्व्वांल्लोकान् धर्म्मदृष्ट्या चरंश्चाप्यूर्द्ध्वं देहान्मोदते देवलोके।

जित्वा संग्रामान्पालयित्वा च राष्ट्रं सोमं पीत्वा वर्द्धयित्वा प्रजाश्च। युक्त्या दण्डं धारयित्वा प्रजानां युद्धे क्षीणो मोदते देवलोके। ७६५

सम्यग्वेदान् प्राप्य शास्त्राण्यधीत्य सम्यग्राज्यं पालयित्वा च राजा। चातुर्व्वर्ण्यं स्थापयित्वा स्वधर्म्मे पूतात्मा वै मोदते देवलोके।

यस्य वृत्तं नमस्यन्ति स्वर्गस्थस्यापि मानवाः। पौरजानपदामात्याः स राजा राजसत्तमः।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सेनजिदुपाख्याने पञ्चविंशोऽध्यायः॥ २५॥

॥ वैशम्पायन उवाच॥ अस्मिन्नेव प्रकरणे धनञ्जयमुदारधीः। अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः।

यदेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति। न स्वर्गो न सुखं नार्थो निर्द्धनस्येति तन्मृषा।

स्वाध्याययज्ञसंसिद्धा दृश्यन्ते बहवो जनाः। तपोरताश्च मुनयो येषां लोकाः सनातनाः। ७७०

ऋषीणां समयं शश्वद्ये रक्षन्ति धनञ्जय। आश्रिताः सर्व्वधर्म्मज्ञा देवास्तान् ब्राह्मणान्विदुः।

स्वाध्यायनिष्ठान्हि ऋषीन् ज्ञाननिष्ठांस्तथाऽपरान्। बुध्येथाः सततं चापि धर्म्मनिष्ठान्धनञ्जय।

ज्ञाननिष्ठेषु कार्य्याणि प्रतिष्ठाप्यानि पाण्डव। वैखानसानां वचनं यथा नो विदितं प्रभो।

अजाश्च पृश्नयश्चैव सिकताश्चैव भारत। अरुणाः केतवश्चैव स्वाध्यायेन दिवङ्गताः।

अवाप्यैतानि कर्म्माणि वेदोक्तानि धनञ्जय। दानमध्ययनं यज्ञो निग्रहश्चैव दुर्ग्रहः। ७७५

दक्षिणेन च पन्थानमर्य्यम्णो ये दिवं गताः। एतान् क्रियावतां लोकानुक्तवान् पूर्व्वमप्यहं।

उत्तरेण तु पन्थानं नियमाद्यं प्रपश्यसि। एते योगवतां लोका भान्ति पार्थ सनातनाः।

तत्रोत्तरां गतिं पार्थ प्रशंसन्ति पुराविदः। सन्तोषात्स्वर्गमाप्नोति सन्तोषात्परमं सुखं।

तुष्टेर्न किञ्चित्परमं सा सम्यक् प्रतितिष्ठति। क्रोधहर्षविनीतस्य सततं सिद्धिरुत्तमा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अत्राप्युदाहरन्तीमा गाथा गीता ययातिना। याभिः प्रत्याहरेत्कामान् कूर्म्मोऽङ्गानीव सर्व्वशः। ७८०
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति। यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा।
यदा न भावं कुरुते सर्व्वभूतेषु पापकं। कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा।
विनीतमानमोहस्य बहुसङ्गविवर्जितः। तदात्मज्योतिषः साधोर्निर्वाणमुपपद्यते।
इदन्तु शृणु मे पार्थ ब्रुवतः संयतेन्द्रियः। धर्म्ममन्ये वृत्तमन्ये धनमीहन्ति चापरे।
धनहेतोर्य्य ईहेत तस्यानीहा गरीयसी। भूयान्दोषो हि वित्तस्य यश्च धर्म्मस्तदाश्रयः। ७८५
प्रत्यक्षमनुपश्यामि त्वमपि द्रष्टुमर्हसि। वर्ज्जनं वर्ज्जनीयानामीहमानेन दुष्करं।
ये वित्तमभिपद्यन्ते सम्यक्त्वं तेषु दुर्लभं। द्रुह्यतः प्रैति तत्प्राहुः प्रतिकूलं यथातथं।
यस्तु सम्भिन्नवृत्तः स्याद्वीतशोकभयो नरः। अल्पेन तर्षितो द्रुह्यन् भ्रूणहत्यां न बुध्यते।
दुष्यन्त्याददतो भृत्या नित्यं दस्युभयादिव। दुर्लभं च धनं प्राप्य भृशं दत्त्वाऽनुतप्यते।
अधनः कस्य किं वाच्यो विमुक्तः सर्व्वशः सुखी। देवस्वमुपगृह्यैव धनेन न सुखी भवेत्। ७९०
तत्र गाथां यज्ञगीतां कीर्त्तयन्ति पुराविदः। त्रयीमपाश्रितां लोके यज्ञसंस्तरकारिकां।
यज्ञाय सृष्टानि धनानि धात्रा यज्ञाय सृष्टः पुरुषो रक्षिता च। तस्मात्सर्व्वं यज्ञ एवोपयोज्यं धनं न कामाय हितं प्रशस्तं।
एतत् स्वार्थं च कौन्तेय धनं धनवताम्बर। धाता ददाति मर्त्त्येभ्यो यज्ञार्थमिति विद्धि तत्।
तस्माद्बुध्यन्ति पुरुषा न हि तत्कस्यचित् ध्रुवं। श्रद्दधानस्ततो लोके दद्याच्चैव यजेत च।
लब्धस्य त्यागमेवाहुर्न भोगं न च सञ्चयं। तस्य किं सञ्चयेनार्थः कार्य्ये ज्यायसि तिष्ठति। ७९५
ये स्वधर्म्मादपेतेभ्यः प्रयच्छन्त्यल्पबुद्धयः। शतं वर्षाणि ते प्रेत्य पुरीषं भुञ्जते जनाः।
अनर्हते यद्ददाति न ददाति यदर्हते। अर्हानर्हापरिज्ञानाद्दानधर्म्मोऽपि दुष्करः।
लब्धानामपि वित्तानां बोद्धव्यौ द्वावतिक्रमौ। अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरवाक्ये षड्विंशोऽध्यायः ॥ २६ ॥
॥ युधिष्ठिर उवाच ॥ अभिमन्यौ हते बाले द्रौपद्यास्तनयेषु च। धृष्टद्युम्ने विराटे च द्रुपदे च महीपतौ।
वसुषेणे च धर्म्मज्ञे धृष्टकेतौ च पार्थिवे। तथाऽन्येषु नरेन्द्रेषु नानादेश्येषु संयुगे। ८००
न च मुञ्चति मां शोको ज्ञातिघातिनमातुरं। राज्यकामुकमत्युग्रं स्ववंशोच्छेदकारिणं।
यस्याङ्के क्रीडमानेन मया वै परिवर्त्तितं। स मया राज्यलुब्धेन गाङ्गेयो युधि पातितः।
यदा ह्येनं विघूर्णन्तमपश्यं पार्थसायकैः। कम्पमानं यथा वज्रैः प्रेक्ष्यमाणं शिखण्डिना।
जीर्णं सिंहमिव प्रांशुं नरसिंहं पितामहं। कीर्य्यमाणं शरैर्दीप्तैर्दृष्ट्वा मे व्यथितं मनः।
प्राङ्मुखं सीदमानञ्च रथे पररथारुजं। घूर्णमानं यथा शैलं तदा मे कश्मलोऽभवत्। ८०५
यः सबाणधनुष्पाणिर्य्योधयामास भार्गवं। बहून्यहानि कौरव्यः कुरुक्षेत्रे महामृधे।
समेतं पार्थिवं क्षत्त्रं वाराणस्यां नदीसुतः। कन्यार्थमाह्वयद्वीरो रथेनैकेन संयुगे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येन चोग्रायुधो राजा चक्रवर्त्ती दुरासदः । दग्धस्त्वास्त्रप्रतापेन स मया युधि घातितः ।
स्वयं मृत्युं रक्षमाणः पाञ्चाल्यं यः शिखण्डिनं । न बाणैः पातयामास सोऽर्जुनेन निपातितः ।
यदैनं पतितं भूमावपश्यं रुधिरोक्षितं । तदैवाविशदत्युग्रो ज्वरो मां मुनिसत्तम । ८१०
येन संवर्द्धिता बाला येन स्म परिरक्षिताः । स मया राज्यलुब्धेन पापेन गुरुघातिना ।
अल्पकालस्य राज्यस्य कृते मूढेन घातितः । आचार्य्यश्च महेष्वासः सर्व्वपार्थिवपूजितः ।
अभिगम्य रणे मिथ्या पापेनोक्तः सुतं प्रति । तन्मे दहति गात्राणि यन्मां गुरुरभाषत ।
सत्यमाख्याहि राजंस्त्वं यदि जीवति मे सुतः । सत्यमामर्षयन्विप्रो मयि तत्परिपृष्टवान् ।
कुञ्जरञ्चान्तरं कृत्वा मिथ्योपचरितं मया । सुभृशं राज्यलुब्धेन पापेन गुरुघातिना । ८१५
सत्यकञ्चुकमुन्मुच्य मया स गुरुराहवे । अश्वत्थामा हत इति मयोक्तः कुञ्जरे हते ।
काल्लोकान्नु गमिष्यामि कृत्वा कर्म्म सुदुष्करं । अघातयञ्च यत्कर्णं समरेष्वपलायिनं ।
ज्येष्ठं भ्रातरमत्युग्रं को मत्तः पापकृत्तमः । अभिमन्युञ्च यद्बालं जातं सिंहमिवाद्रिषु ।
प्रावेशयमहं लुब्धो वाहिनीं द्रोणपालितां । तदा प्रभृति बीभत्सुं न शक्नोमि निरीक्षितुं ।
कृष्णञ्च पुण्डरीकाक्षं किल्बिषी भ्रूणहा यथा । द्रौपदीं चापि दुःखार्त्तां पञ्चपुत्त्रैर्व्विनाकृतां । ८२०
शोचामि पृथिवीं हीनाम्पञ्चभिः पर्व्वतैरिव । सोऽहमागस्कृरः पापः पृथिवीनाशकारकः ।
आसीन एवमेवेदं शोषयिष्ये कलेवरं । प्रायोपविष्टं जानीध्वमथ मां गुरुघातिनं ।
जातिष्वन्यास्वपि यथा न भवेयं कुलान्तकृत् । न भोक्ष्ये न च पानीयमुपभोक्ष्ये कथञ्चन ।
शोषयिष्ये प्रियान् प्राणानिहस्थोऽहं तपोधन । यथेष्टं गम्यतां काममनुजाने प्रसाद्य वः ।
सर्व्वे मामनुजानीत त्यक्ष्यामीदं कलेवरं । ८२५
॥ वैशम्पायन उवाच ॥ तमेवं वादिनं पार्थं बन्धुशोकेन विक्लवं । मैवमित्यब्रवीद्व्यासो निगृह्य मुनिसत्तमः ।
॥ व्यास उवाच ॥ अतिवेलं महाराज न शोकं कर्त्तुमर्हसि । पुनरुक्तन्तु वक्ष्यामि दिष्टमेतदिति प्रभो ।
संयोगा विप्रयोगान्ता जातानां प्राणिनां ध्रुवाः । बुद्बुदा इव तोयेषु भवन्ति न भवन्ति च ।
सर्व्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तं हि जीवितं ।
सुखं दुःखान्तमालस्यं दाक्ष्यं दुःखं सुखोदयं । भूतिः श्रीर्ह्रीर्धृतिः कीर्त्तिर्दक्षे वसति नालसे । ८३०
नालं सुखाय सुहृदो नालं दुःखाय शत्रवः । न च प्रज्ञाऽलमर्थेभ्यो न सुखेभ्यो ह्यलम्बनं ।
यथा सृष्टोऽसि कौन्तेय धात्रा कर्म्मसु तत्कुरु । अत एव हि सिद्धिस्ते नेशस्त्वं कर्म्मणां नृप ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्यासवाक्ये सप्तविंशोऽध्यायः ॥ २७ ॥
॥ वैशम्पायन उवाच ॥ ज्ञातिशोकाभितप्तस्य प्राणानभ्युत्सिसृक्षतः । ज्येष्ठस्य पाण्डुपुत्त्रस्य व्यासः शोकमपानुदत् ।
॥ व्यास उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । अश्मगीतं नरव्याघ्र तन्निबोध युधिष्ठिर ।
अश्मानं ब्राह्मणं प्राज्ञं वैदेहो जनको नृप । संशयं परिपप्रच्छ दुःखशोकसमन्वितः । ८३५
॥ जनक उवाच ॥ आगमे यदि वाऽपाये ज्ञातीनां द्रविणस्य च । नरेण प्रतिपत्तव्यं कल्याणं कथमिच्छता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अश्मोवाच ॥ उत्पन्नमिममात्मानं नरस्यानन्तरं ततः। तानि तान्यनुवर्त्तन्ते दुःखानि च सुखानि च।
तेषामन्यतरापत्तौ यद्यदेवोपपद्यते। तदस्य चेतनामाशु हरत्यभ्रमिवानिलः ।
अभिजातोस्मि सिद्धो स्मिऽनास्मि केवलमानुषः। इत्येभिर्हेतुभिस्तस्य त्रिभिश्चित्तं प्रसिच्यते।
सम्प्रसक्तमनाभोगान्विसृज्य पितृसञ्चितान्। परिक्षीणः परस्वानामादानं साधु मन्यते। ८४०
तमतिक्रान्तमर्य्यादमाददानमसाम्प्रतं। प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः।
ये च विंशतिवर्षा वा त्रिंशद्वर्षाश्च मानवाः। परेण ते वर्षशतान्न भविष्यन्ति पार्थिव।
तेषां परमदुःखानां बुद्ध्या भैषज्यमाचरेत्। सर्व्वप्राणभृतां वृत्तं प्रेक्षमाणस्ततस्ततः।
मानसानां पुनर्योनिर्दुःखानां चित्तविभ्रमः। अनिष्टोऽपनिपातो वा तृतीयं नोपपद्यते।
एवमेतानि दुःखानि तानि तानीह मानवं। विविधान्युपवर्त्तन्ते तथा संसर्गजान्यपि। ८४५
जरामृत्यू हि भूतानां खादितारौ वृकाविव। बलिनां दुर्व्वलानाञ्च ह्रस्वानां महतामपि।
न कश्चिज्जात्वतिक्रामेत् जरामृत्यू हि मानवः। अपि सागरपर्य्यन्तां विजित्येमां वसुन्धरां।
सुखं वा यदि वा दुःखं भूतानां पर्य्युपस्थितं। प्राप्तव्यमवशैः सर्व्वं परिहारो न विद्यते।
पूर्व्वे वयसि मध्ये वाऽप्युत्तरे वा नराधिप। अवर्जनीयास्तेऽर्था वै काङ्क्षितापि ततोऽन्यथा।
सुप्रियैर्व्विप्रयोगश्च सम्प्रयोगश्च विप्रियैः। अर्थानर्थौ सुखं दुःखं विधानमनुवर्त्तते। ८५०
प्रादुर्भावश्च भूतानां देहत्यागस्तथैव च। प्राप्तिर्व्यायामयोगश्च सर्व्वमेतत्प्रतिष्ठितं।
गन्धवर्णरसस्पर्शा निवर्त्तन्ते स्वभावतः। तथैव सुखदुःखानि विधानमनुवर्त्तते।
आसनं शयनं यानमुत्थानं पानभोजनं। नियतं सर्व्वभूतानां कालेनैव भवत्युत।
वैद्याश्चाप्यातुराः सन्ति बलवन्तश्च दुर्व्वलाः। श्रीमन्तश्चापरे षण्ढाः विचित्रः कालपर्य्ययः।
कुले जन्म तथा वीर्य्यमारोग्यं रूपमेव च। सौभाग्यमुपभोगश्च भवितव्येन लभ्यते। ८५५
सन्ति पुत्त्राः सुबहवो दरिद्राणामनिच्छतां। नास्ति पुत्त्रः समृद्धानां विचित्रं विधिचेष्टितं।
व्याधिरग्निर्ज्जलं शस्त्रं बुभुक्षाश्वापदो विषं। ज्वरश्च मरणं जन्तोरुच्चाच्च पतनं तथा।
निर्म्माणे यस्य यद्दृष्टं तेन गच्छन्ति सेतुना। दृश्यते नाप्रतिक्रामन्न निष्क्रान्तोऽथ वा पुनः।
दृश्यते चाप्यतिक्रामन् न निग्राह्योऽथ वा पुनः। दृश्यते हि युवैवेह विनश्यन् वसुमान्नरः।
दरिद्रश्च परिक्लिष्टः शतवर्षो जरान्वितः। अकिञ्चनाश्च दृश्यन्ते पुरुषाश्चिरजीविनः। ८६०
समृद्धे च कुले जाता विनश्यन्ति पतङ्गवत्। प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न्न विद्यते।
काष्ठान्यपि हि जीर्य्यन्ते दरिद्राणाञ्च सर्व्वशः। अहमेतत्करोमीति मन्यते कालचोदितः।
यद्यदिष्टमसन्तोषाद्दुरात्मा पापमाचरेत्। मृगयाक्षाः स्त्रियः पानं प्रसङ्गा निन्दिता बुधैः।
दृश्यन्ते पुरुषाश्चात्र सम्प्रसक्ता बहुश्रुताः। इति कालेन सर्व्वार्थानीप्सितानीप्सितानिह।
स्पृशन्ति सर्व्वभूतानि निमित्तं नोपलभ्यते। वायुमाकाशमग्निञ्च चन्द्रादित्यावहःक्षपे। ८६५
ज्योतींषि सरितः शैलान् कः करोति बिभर्त्ति च। शीतमुष्णं तथा वर्षं कालेन परिवर्त्तते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवमेव मनुष्याणां सुखदुःखे नरर्षभ । नौषधानि न मन्त्राश्च न होमा न पुनर्ज्जपाः ।
त्रायन्ते मृत्युनोपेतं जरया चापि मानवं । यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः । ये चैव पुरुषाः स्त्रीभिर्गीतवाद्यैरुपस्थिताः ।
ये चानाथाः परान्नादाः कालस्तेषु समक्रियः । मातापितृसहस्राणि पुत्त्रदारशतानि च । ८७०
संसारेष्वनुभूतानि कस्य ते कस्य वा वयं । नैवास्य कश्चिद्भविता नायं भवति कस्यचित् ।
पथि सङ्गतमेवेदं दारबन्धुसुहृज्जनैः । क्वासि क्व च गमिष्यामि को न्वहं किमिह स्थितः ।
कस्मात्किमनुशोचेयमित्येवं स्थापयेन्मनः । अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ ।
पथि सङ्गतमेवैतद्भ्राता माता पिता सखा । न दृष्टपूर्व्वं प्रत्यक्षं परलोकं विदुर्ब्बुधाः ।
आगमांस्त्वनतिक्रम्य श्रद्धातव्यं बुभूषता । कुर्व्वीत पितृदैवत्यं धर्म्म्याणि च समाचरेत् । ८७५
यजेच्च विद्वान्विधिवत्त्रिवर्गं चाप्युपाचरेत् । सन्निमज्जज्जगदिदं गम्भीरे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदवबुध्यते । आयुर्व्वेदमधीयानाः केवलं सपरिग्रहाः ।
दृश्यन्ते बहवो वैद्या व्याधिभिः समभिप्लुताः । ते पिबन्तः कषायांश्च सर्पींषि विविधानि च ।
न मृत्युमतिवर्त्तन्ते वेलामिव महोदधिः । रसायनविदश्चैव सुप्रयुक्तरसायनाः ।
दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः । तथैव तपसोपेताः स्वाध्यायाभ्यसने रताः । ८८०
दातारो यज्ञशीलाश्च न तरन्ति जरान्तकौ । न ह्यहानि निवर्त्तन्ते न मासा न पुनः समाः ।
जातानां सर्व्वभूतानां न पक्षा न पुनः क्षपाः । सोऽयं विपुलमध्वानं कालेन ध्रुवमध्रुवः ।
नरोऽवशः समभ्येति सर्व्वभूतनिषेवितं । देहो वा जीवतोऽभ्येति जीवो वाऽभ्येति देहतः ।
पथि सङ्गतमेवेदं दारैरन्यैश्च बन्धुभिः । नायमत्यन्तसंवासो लभ्यते जातु केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् । क्व नु तेऽद्य पिता राजन् क्व नु तेऽद्य पितामहाः । ८८५
न त्वं पश्यसि तानद्य न त्वां पश्यन्ति तेऽनघ । न चैव पुरुषो द्रष्टा स्वर्गस्य नरकस्य च ।
आगमस्तु सतां चक्षुर्नृपते तमिहाचर । चरितब्रह्मचर्य्यो हि प्रजायेत यजेत च ।
पितृदेवमनुष्याणामानृण्यादनसूयकः ।
स यज्ञशीलः प्रजने निविष्टः प्राग्ब्रह्मचारी प्रविविक्तचक्षुः । आराधयेत् स्वर्गमिमञ्च लोकं परञ्च मुक्त्वा हृदयव्यलीकं ।
समं हि धर्म्मं चरतो नृपस्य द्रव्याणि चाप्याहरतो यथावत् । प्रवृत्तधर्म्मस्य यशोऽभिवर्द्धते सर्व्वेषु लोकेषु चराचरेषु । ८९०
इत्येवमाज्ञाय विदेहराजो वाक्यं समग्रं परिपूर्णहेतु । अश्मानमामन्त्र्य विशुद्धबुद्धिर्ययौ गृहं स्वं प्रतिशान्तशोकः ।
तथा त्वमप्यच्युत मुञ्च शोकमुत्तिष्ठ शक्रोपम हर्षमेहि । क्षात्त्रेण धर्म्मेण मही जिता ते तां भुङ्क्ष्व कुन्तीसुत मा ऽवमंस्थाः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्यासवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ वैशम्पायन उवाच ॥ अव्याहरति राजेन्द्रे धर्म्मपुत्त्रे युधिष्ठिरे । गुडाकेशो हृषीकेशमभ्यभाषत पाण्डवः ।
॥ अर्ज्जुन उवाच ॥ ज्ञातिशोकाभिसन्तप्तो धर्म्मपुत्त्रः परन्तपः । एष शोकार्णवे मग्नस्तमाश्वासय माधव । ८९५
सर्व्वे स्म ते संशयिताः पुनरेव जनार्द्दन । अस्य शोकं महाबाहो प्रणाशयितुमर्हसि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु गोविन्दो विजयेन महात्मना। पर्य्यवर्त्तत राजानं पुण्डरीकेक्षणोऽच्युतः।
अनतिक्रमणीयो हि धर्म्मराजस्य केशवः। बाल्यात्प्रभृति गोविन्दः प्रीत्या चाभ्यधिकोऽर्जुनात्।
सम्प्रगृह्य महाबाहुर्भुजं चन्दनभूषितं। शैलस्तम्भोपमं शौरिरुवाचाभिविनोदयन्।
शुशुभे वदनं तस्य सुदंष्ट्रं चारुलोचनं। व्याकोशमिव विस्पष्टं पद्मं सूर्य्य इवोदिते।
॥ वासुदेव उवाच ॥ मा कृथाः पुरुषव्याघ्र शोकं त्वं गात्रशोषणं। न हि ते सुलभा भूयो ये हताऽस्मिन् रणाजिरे। ९००
स्वप्नलब्धा यथा लाभा वितथाः प्रतिबोधने। एवं ते क्षत्त्रिया राजन् ये व्यतीता महारणे।
सर्व्वेऽप्यभिमुखाः शूरा विजिता रणशोभिनः। नैषां कश्चित्पृष्ठतो वा पलायन् वाऽपि पातितः।
सर्व्वे त्यक्त्वात्मनः प्राणान्युद्ध्वा वीरान्महामृधे। शस्त्रपूता दिवं प्राप्ता न ताञ्छोचितुमर्हसि।
क्षत्त्रधर्म्मरताः शूराः वेदवेदाङ्गपारगाः। प्राप्ता वीरगतिं पुण्यां तान्न शोचितुमर्हसि।
मृतान्महानुभावांस्त्वं श्रुत्वैव पृथिवीपतीन्। अत्रैवोदाहरन्तीममितिहासं पुरातनं। ९०५
सृञ्जयं पुत्त्रशोकार्त्तं यथाऽयं नारदोऽब्रवीत्। सुखदुःखैरहं त्वञ्च प्रजाः सर्व्वाश्च सृञ्जय।
अविमुक्ता मरिष्यामस्तत्र का परिदेवना। महाभाग्यं पुरा राज्ञां कीर्त्त्यमानं मया शृणु।
यथाऽवधानं नृपते ततो दुःखं प्रहास्यसि। एतान्महानुभावांस्त्वं श्रुत्वैव पृथिवीपतीन्।
शमयानय सन्तापं शृणु विस्तरशश्च मे। क्रूरग्रहाभिशमनमायुर्व्वर्द्धनमुत्तमं।
अग्रिमाणां क्षितिभुजामुपादानं मनोहरं। आविक्षितं मरुत्तं वै मृतं सृञ्जय शुश्रुम। ९१०
यस्य सेन्द्राः सवरुणा बृहस्पतिपुरोगमाः। देवा विश्वसृजो राज्ञो यज्ञमीयुर्म्महात्मनः।
यः स्पर्द्धयाऽजयच्छक्रं देवराजं पुरन्दरं। शक्रप्रियैषी यं विद्वान् प्रत्याचष्ट बृहस्पतिः।
संवर्त्तो याजयामास यवीयान् स बृहस्पतेः। यस्मिन्प्रशासति महीं नृपतौ राजसत्तम।
अकृष्टपच्या पृथिवी विबभौ चैत्यमालिनी। आविक्षितस्य वै सत्रे विश्वेदेवाः सभासदः।
मरुतः परिवेष्टारः साध्याश्चासन्महात्मनः। मरुद्गणा मरुत्तस्य यत्सोममपिबंस्ततः। ९१५
देवान्मनुष्यान्गन्धर्व्वानत्यरिच्यन्त दक्षिणाः। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया।
पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः। सुहोत्रञ्चैवातिथिनं मृतं शुश्रुम सृञ्जय।
यस्मिन् हिरण्यं ववृषे मघवा परिवत्सरं। सत्यनामा वसुमती यं प्राप्यासीज्जनाधिपं।
हिरण्यमवहन्नद्यस्तस्मिन् जनपदेश्वरे। कूर्म्मान्कर्क्कटकान्नक्रान्मकराञ्छिशुकानपि।
नदीष्वपातयद्राजन्मघवा लोकपूजितः। हिरण्यान्पातितान् दृष्ट्वा मत्स्यान्मकरकच्छपान्। ९२०
सहस्रशोऽथ शतशस्ततोऽस्मयदथोऽतिथिः। तद्धिरण्यमपर्य्यन्तमावृत्तं कुरुजाङ्गले।
ईजानो वितते यज्ञे ब्राह्मणेभ्यः समार्प्पयत्। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया।
पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः। अदक्षिणमयज्वानं श्वैरं संशाम्य मा शुचः।
अङ्गं बृहद्रथं चैव मृतं सृञ्जय शुश्रुम। यः सहस्रं सहस्राणां श्वेतानश्वानवासृजत्।
सहस्रञ्च सहस्राणां कन्या हेमपरिष्कृताः। ईजानो वितते यज्ञे दक्षिणामत्यकालयत्। ९२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यः सहस्रं सहस्राणां गजानामतिपद्मिनां। ईजानो वितते यज्ञे दक्षिणामत्यकालयत्।
शतं शतसहस्राणां वृषाणां हेममालिनां । गवां सहस्रानुचरं दक्षिणामत्यकालयत्।
अङ्गस्य यजमानस्य तदा विष्णुपदे गिरौ । अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः।
यस्य यज्ञेषु राजेन्द्र शतसंख्येषु वै पुरा । देवान्मनुष्यान्गन्धर्व्वानत्यरिच्यन्त दक्षिणाः।
न जातो जनिता चान्यः पुमान्यस्तत्प्रदास्यति । यदङ्गः प्रददौ वित्तं सोमसंस्थासु सप्तसु । ९३०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः।
शिबिमौशीनरञ्चैव मृतं सृञ्जय शुश्रुम। य इमां पृथिवीं सर्व्वां चर्म्मवत्समवेष्टयत्।
महता रथघोषेण पृथिवीमनुनादयन्। एकच्छत्रां महीं चक्रे जैत्रेणैकरथेन यः।
यावदस्य गवाश्वं स्यादारण्यैः पशुभिः सह। तावतीः प्रददौ गाः स शिबिरौशीनरोऽध्वरे।
न वोढारं धुरं तस्य कञ्चिन्मेने प्रजापतिः। न भूतं न भविष्यञ्च सर्व्वराजसु सृञ्जय। ९३५
अन्यत्रौशीनराच्छैव्याद्राजर्षेरिन्द्रविक्रमात्। अदक्षिणमयज्वानं मा पुत्रमनुतप्यथाः।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः।
भरतञ्चैव दौश्मन्तिं मृतं शुश्रुम सृञ्जय। शाकुन्तलं महात्मानं भूरिद्रविणसञ्चयं।
यो बद्ध्वा त्रिशतं चाश्वान्देवेभ्यो यमुनामनु। सरस्वतीं विंशतिञ्च गङ्गामनु चतुर्द्दश।
अश्वमेधसहस्रेण राजसूयशतेन च। इष्टवान् स महातेजा दौश्मन्तिर्भरतः पुरा। ९४०
भरतस्य महत्कर्म्म सर्व्वराजसु पार्थिवाः। खमर्त्त्या इव बाहुभ्यां नानुगन्तुमशक्नुवन्।
परं सहस्राद्यो बद्धान् हयान्वेदीर्व्वितत्य च। सहस्रं यत्र पद्मानां कण्वाय भरतो ददौ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः।
रामं दाशरथिञ्चैव मृतं शुश्रुम सृञ्जय। योऽन्वकम्पत वै नित्यं प्रजाः पुत्रानिवौरसान्।
विधवा यस्य विषये नानाथाः काश्चनाभवन्। सदैवासीत्पितृसमो रामो राज्यं यदाऽन्वशात्। ९४५
कालवर्षी च पर्ज्जन्यः शस्यानि समुपादयत्। नित्यं सुभिक्षमेवासीद्रामे राज्यं प्रशासति।
प्राणिनो नाप्सु मज्जन्ति नान्यथा पावकोऽदहत्। रुजा भयं न तत्रासीद्रामे राज्यं प्रशासति।
आसन्वर्षसहस्रिण्यस्तथा पुत्रसहस्रिकाः। अरोगाः सर्व्वसिद्धार्था रामे राज्यं प्रशासति।
नान्योन्येन विवादोऽभूत् स्त्रीणामपि कुतो नृणां। धर्म्मनित्याः प्रजास्त्वासन् रामे राज्यं प्रशासति।
सन्तुष्टाः सर्व्वसिद्धार्था निर्भयाः स्वैरचारिणः। नराः सत्यव्रतास्त्वासन् रामे राज्यं प्रशासति। ९५०
नित्यपुष्पफलाश्चैव पादपा निरुपद्रवाः। सर्व्वा द्रोणदुघा गावो रामे राज्यं प्रशासति।
स चतुर्द्दश वर्षाणि वने प्रोष्य महातपाः। दशाश्वमेधाञ्जारूथ्यानाजहार निरर्गलान्।
युवा श्यामो लोहिताक्षो मातङ्ग इव यूथपः। आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः।
दशवर्षसहस्राणि दशवर्षशतानि च। अयोध्याधिपतिर्भूत्वा रामो राज्यमकारयत। ९५५
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

भगीरथञ्च राजानं मृतं शुश्रुम सृञ्जय । यस्येन्द्रो वितते यज्ञे सोमं पीत्वा मदोत्कटः ।
असुराणां सहस्राणि बहूनि सुरसत्तमः । अजयद्बाहुवीर्य्येण भगवान्पाकशासनः ।
यः सहस्रं सहस्राणां कन्या हेमविभूषिताः । ईजानो वितते यज्ञे दक्षिणामत्यकालयत् ।
सर्व्वा रथगताः कन्या रथाः सर्व्वे चतुर्युजः । शतं शतं रथे नागाः पद्मिनो हेममालिनः ।
सहस्रमश्वा एकैकं हस्तिनं पृष्ठतोऽन्वयुः । गवां सहस्रमश्वेऽश्वे सहस्रं गव्यजाविकं ।
उपह्वरे निवसतो यस्याङ्के निषसाद ह । गङ्गा भागीरथी तस्मादुर्व्वशी ह्यभवत्पुरा ।
भूरिदक्षिणमैक्ष्वाकुं यजमानं भगीरथं । त्रिलोकपथगा गङ्गा दुहितृत्वमुपेयुषी ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
दिलीपञ्च महात्मानं मृतं शुश्रुम सृञ्जय । यस्य कर्म्माणि भूरीणि कथयन्ति द्विजातयः ।
य इमां वसुसम्पूर्णां वसुधां वसुधाधिपः । ददौ तस्मिन्महायज्ञे ब्राह्मणेभ्यः समाहितः ।
यस्येह यजमानस्य यज्ञे यज्ञे पुरोहितः । सहस्रं वारणान् हैमान् दक्षिणामत्यकालयत् ।
यस्य यज्ञे महानासीद्यूपः श्रीमान् हिरण्मयः । तं देवाः कर्म्म कुर्व्वाणाः शक्रज्येष्ठा उपाश्रयन् ।
चषाले यस्य सौवर्णे तस्मिन् यूपे हिरण्मये । ननृतुर्देवगन्धर्व्वाः षट् सहस्राणि सप्तधा ।
अवादयत्तत्र वीणां मध्ये विश्वावसुः स्वयं । सर्व्वभूतान्यमन्यन्त मम वादयतीत्ययं ।
एतद्राज्ञो दिलीपस्य राजानो नानुचक्रिरे । यस्येभा हेमसञ्छन्नाः पथि मत्ताः स्म शेरते ।
राजानं शतधन्वानं दिलीपं सत्यवादिनं । येऽपश्यन् सुमहात्मानं तेऽपि स्वर्गजितो नराः ।
त्रयः शब्दा न जीर्य्यन्ते दिलीपस्य निवेशने । स्वाध्यायघोषो ज्याघोषो दीयतामिति वै त्रयः ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
मान्धातारं यौवनाश्वं मृतं शुश्रुम सृञ्जय । यं देवा मरुतो गर्भं पितुः पार्श्वादपाहरन् ।
समृद्धो युवनाश्वस्य जठरे यो महात्मनः । पृषदाज्योद्भवः श्रीमांस्त्रिलोकविजयी नृपः ।
यं दृष्ट्वा पितुरुत्सङ्गे शयानं देवरूपिणं । अन्योन्यमब्रुवन् देवाः कमयं धास्यतीति वै ।
मामेव धास्यतीत्येवमिन्द्रोऽथाभ्युपपद्यत । मान्धातेति ततस्तस्य नाम चक्रे शतक्रतुः ।
ततस्तु पयसो धारां पुष्टिहेतोर्महात्मनः । तस्यास्ये यौवनाश्वस्य पाणिरिन्द्रस्य चास्रवत् ।
तं पिबन्पाणिमिन्द्रस्य शतमह्ना व्यवर्द्धत । स आसीद्द्वादशसमो द्वादशाहेन पार्थिवः ।
तमिमं पृथिवी सर्व्वा एकाह्ना समपद्यत । धर्म्मात्मानं महात्मानं शूरमिन्द्रसमं युधि ।
यस्याङ्गारन्तु नृपतिं मरुत्तमसितङ्गयं । अङ्गं बृहद्रथञ्चैव मान्धाता समरेऽजयत् ।
यौवनाश्वो यदाऽङ्गारं समरे प्रत्ययुध्यत । विस्फारैर्धनुषो देवा द्यौरभेदीति मेनिरे ।
यत्र सूर्य्य उदेति स्म यत्र च प्रतितिष्ठति । सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ।
अश्वमेधशतेनेष्ट्वा राजसूयशतेन च । अददद्रोहितान्मत्स्यान् ब्राह्मणेभ्यो विशाम्पते ।
हैरण्यान्योजनोत्सेधानायतान् दशयोजनं । अतिरिक्तान्द्विजातिभ्यो व्यभजंस्त्वितरे जनाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः।
ययातिं नाहुषं चैव मृतं शुश्रुम सृञ्जय। य इमां पृथिवीं कृत्स्नां विजित्य सहसागरां।
शम्यापातेनाभ्यतीयाद्वेदीभिश्चित्रयन्महीं। ईजानः क्रतुभिर्मुख्यैः पर्य्यगच्छद्वसुन्धरां।
इष्ट्वा क्रतुसहस्रेण वाजपेयशतेन च। तर्पयामास विप्रेन्द्रांस्त्रिभिः काञ्चनपर्व्वतैः।
व्यूढेनासुरयुद्धेन हत्वा दैतेयदानवान्। व्यभजत्पृथिवीं कृत्स्नां ययातिर्नहुषात्मजः। ९९०
अन्त्येषु पुत्त्रान्निक्षिप्य यदुद्रुह्युपुरोगमान्। पूरुं राज्येऽभिषिच्य स्वे सदारः प्राविशद्वनं।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः।
अम्बरीषञ्च नाभागिं मृतं शुश्रुम सृञ्जय। यं प्रजा वव्रिरे पुण्यं गोप्तारं नृपसत्तमं।
यः सहस्रं सहस्राणां राज्ञामयुतयाजिनां। ईजानो वितते यज्ञे ब्राह्मणेभ्यः सुसंहितः।
नैतत्पूर्व्वे जनाश्चक्रुर्न करिष्यन्ति चापरे। इत्यम्बरीषं नाभागिमन्वमोदन्त दक्षिणाः। ९९५
शतं राजसहस्राणि शतं राजशतानि च। सर्व्वेऽश्वमेधैरीजानास्तेऽन्वयुर्दक्षिणायनं।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः।
शशविन्दुं चैत्ररथं मृतं शुश्रुम सृञ्जय। यस्य भार्य्यासहस्राणां शतमासीन्महात्मनः।
सहस्रन्तु सहस्राणां यस्यासन् शशविन्दवः। हिरण्यकवचाः सर्व्वे सर्व्वे चोत्तमधन्विनः।
शतं कन्या राजपुत्त्रमेकैकं पृथगन्वयुः। कन्यां कन्यां शतं नागा नागं नागं शतं रथाः। १०००
रथे रथे शतं चाश्वा देशजा हेममालिनः। अश्वे अश्वे शतं गावो गवां तद्वदजाविकं।
एतद्धनमपर्य्यन्तमश्वमेधे महामखे। शशविन्दुर्म्महाराज ब्राह्मणेभ्यः समार्प्पयत्।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः।
गयं चामूर्त्तरयसं मृतं शुश्रुम सृञ्जय। यः स वर्षशतं राजा हुतशिष्टाशनोऽभवत्।
यस्मै वह्निर्व्वरं प्रादात्ततो वव्रे वरान्गयः। ददतो मेऽक्षयं वित्तं धर्म्मे श्रद्धा च वर्त्ततां। १००५
मनो मे रमतां सत्ये त्वत्प्रसादाद्धुताशन। लेभे च कामांस्तान्सर्व्वान्पावकादिति नः श्रुतं।
दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः। अयजद्धयमेधेन सहस्रं परिवत्सरान्।
शतं गवां सहस्राणि शतमश्वतराणि च। उत्थायोत्थाय वै प्रादात्सहस्रं परिवत्सरान्।
तर्प्पयामास सोमेन देवान्वित्तैर्द्विजानपि। पितॄन्स्वधाभिः कामैश्च स्त्रियः स पुरुषर्षभः।
सौवर्णीं पृथिवीं कृत्वा दशव्यामां द्विरायतां। दक्षिणामददद्राजा वाजिमेधे महाक्रतौ। १०१०
यावत्यः सिकता राजन्गङ्गायाः पुरुषर्षभ। तावतीरेव गाः प्रादादामूर्त्तरयसो गयः।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्त्रात्पुण्यतरश्चैव मा पुत्त्रमनुतप्यथाः।
रन्तिदेवञ्च साङ्कृत्यं मृतं शुश्रुम सृञ्जय। सम्यगाराध्य यः शक्राद्वरं लेभे महातपाः।
अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि। श्रद्धा च नो मा व्यगमन्मा च याचिष्म कञ्चन।
उपातिष्ठंश्च पशवः स्वयं तं संशितव्रतं। ग्राम्यारण्या महात्मानं रन्तिदेवं यशस्विनं। १०१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महानदी चर्म्मराशेरुत्क्लेदात्सुस्रुवे यतः । ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी ।
ब्राह्मणेभ्यो ददौ निष्कान् सदसि प्रतते नृप । तुभ्यं निष्कन्तुभ्यं निष्कमिति क्रोशन्ति वै द्विजाः ।
सहस्रं तुभ्यमित्युक्ता ब्राह्मणान् संप्रपद्यते । अन्वाहार्य्योपकरणं द्रव्योपकरणञ्च यत् ।
घटाः पात्र्यः कटाहानि स्थाल्यश्च पिठराणि च । नासीत्किञ्चिदसौवर्णं रन्तिदेवस्य धीमतः ।
साङ्कृतेरन्तिदेवस्य यां रात्रिमवसन् गृहे । आलभ्यन्त शतं गावः सहस्राणि च विंशतिः । १०२०
तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः । सूपभूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
सगरञ्च महात्मानं मृतं शुश्रुम सृञ्जय । ऐक्ष्वाकुं पुरुषव्याघ्रमतिमानुषविक्रमं ।
षष्टिः पुत्रसहस्राणि यं यान्तमनुजग्मिरे । नक्षत्रराजे वर्षान्ते व्यभ्रे ज्योतिर्गणा इव ।
एकच्छत्रा मही यस्य प्रतापादभवत्पुरा । योऽश्वमेधसहस्रेण तर्पयामास देवताः । १०२५
यः प्रादात्कनकस्तम्भं प्रासादं सर्व्वकाञ्चनं । पूर्णपद्मदलाक्षीणां स्त्रीणां शयनसङ्कुलं ।
द्विजातिभ्योऽनुरूपेभ्यः कामांश्च विविधान्बहून् । यस्यादेशेन तद्वित्तं व्यभजन्त द्विजातयः ।
खनयामास यः कोपात्पृथिवीं सागराङ्किताम् । यस्य नाम्ना समुद्रश्च सागरत्वमुपागतः ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।
राजानञ्च पृथुं वैन्यं मृतं शुश्रुम सृञ्जय । यमभ्यषिञ्चन् सम्भूय महारण्ये महर्षयः । १०३०
प्रथयिष्यति वै लोकान् पृथुरित्येव शब्दितः । क्षताद्यो वै त्रायतीति स तस्मात्क्षत्रियः स्मृतः ।
पृथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् । ततो राजेति नामास्य अनुरागादजायत ।
अकृष्टपच्या पृथिवी पुटके पुटके मधु । सर्व्वा द्रोणदुघा गावो वैन्यस्यासन् प्रशासतः ।
अरोगाः सर्व्वसिद्धार्था मनुष्या अकुतोभयाः । यथाऽभिकाममवसन् क्षेत्रेषु च गृहेषु च ।
आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः । सरितश्चान्वदीर्यन्त ध्वजभङ्गश्च नाभवत् । १०३५
हैरण्यांस्त्रिनलोत्सेधान्पर्व्वतानेकविंशतिं । ब्राह्मणेभ्यो ददौ राजा योऽश्वमेधे महामखे ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ।

किं वा तूष्णीं ध्यायसे सृञ्जय त्वं न मे राजन्वाचमिमां शृणोषि । न चेन्मोघं विप्रलप्तं मयेदं पथ्यं मुमूर्षोरिव सम्प्रयुक्तं ।

॥ सृञ्जय उवाच ॥ शृणोमि ते नारद वाचमेनां विचित्रार्थां स्रजमिव पुण्यगन्धां । राजर्षीणां पुण्यकृतां महात्मनां कीर्त्या युक्तानां शोकनिर्नाशनार्थं ।

न ते मोघं विप्रलप्तं महर्षे दृष्ट्वैवाहं नारद त्वां विशोकः । शुश्रूषे ते वचनं ब्रह्मवादिन्न ते तृप्याम्यमृतस्येव पानात् । १०४०
अमोघदर्शिन्मम चेत्प्रसादं सुतापदग्धस्य विभो प्रकुर्य्याः । सुतस्य संजीवनमद्य मे स्यात्तव प्रसादात्सुतसङ्गमश्च ।

॥ नारद उवाच ॥ यस्ते पुत्रो गमितोऽयं विजातः स्वर्णष्ठीवी यमदात्पर्व्वतस्ते । पुनस्तु ते पुत्रमहं ददामि हिरण्यनाभं वर्षसहस्रिणञ्च ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि षोडशराजिकोपाख्याने एकोनत्रिंशोऽध्यायः ॥ २९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ स कथं काञ्चनष्ठीवी सृञ्जयस्य सुतोऽभवत्। पर्व्वतेन किमर्थं वा दत्तस्तेन ममार च।
यदा वर्षसहस्रायुस्तदा भवति मानवः। कथमप्राप्तकौमारः सृञ्जयस्य सुतो मृतः।
उताहो नाममात्रं वै सुवर्णष्ठीविनोऽभवत्। कथं वा काञ्चनष्ठीवीत्येतदिच्छामि वेदितुं। १०४५
॥ श्रीकृष्ण उवाच ॥ अत्र ते वर्णयिष्यामि यथावृत्तं जनेश्वर। नारदः पर्व्वतश्चैव द्वावृषी लोकसत्तमौ।
मातुलो भागिनेयश्च देवलोकादिहागतौ। विहर्त्तुकामौ सम्प्रीत्या मानुषेषु पुरा विभो।
हविःपवित्रभोज्येन देवभोज्येन चैव हि। नारदो मातुलश्चैव भागिनेयश्च पर्व्वतः।
तावुभौ तपसोपेताववनीतलचारिणौ। भुञ्जानौ मानुषान् भोगान्यथावत्पर्य्यधावतां।
प्रीतिमन्तौ मुदा युक्तौ समयञ्चैव चक्रतुः। यो भवेद्धृदि सङ्कल्पः शुभो वा यदि वाऽशुभः। १०५०
अन्योन्यस्य स आख्येयो मृषा शापोऽन्यथा भवेत्। तौ तथेति प्रतिज्ञाय महर्षी लोकपूजितौ।
सृञ्जयं श्वैत्यमभ्येत्य राजानमिदमूचतुः। आवां भवति वत्स्यावः कञ्चित्कालं हिताय ते।
यथावत्पृथिवीपाल आवयोः प्रगुणो भव। तथेति कृत्वा राजा तौ सत्कृत्योपचचार ह।
ततः कदाचित्तौ राजा महात्मानौ तपोधनौ। अब्रवीत्परमप्रीतः सुतेयं वरवर्णिनी।
एकैव मम कन्यैषा युवां परिचरिष्यति। दर्शनीयाऽनवद्याङ्गी शीलवृत्तसमाहिता। १०५५
सुकुमारी कुमारी च पद्मकिञ्जल्कसुप्रभा। परमं सौम्यमित्युक्तं ताभ्यां राजा शशास तां।
कन्ये विप्रावुपचर देववत्पितृवच्च ह। सा तु कन्या तथेत्युक्त्वा पितरं धर्म्मचारिणी।
यथानिदेशं राज्ञस्तौ सत्कृत्योपचचार ह। तस्यास्तेनोपचारेण रूपेणाप्रतिमेन च।
नारदं हृच्छयस्तूर्णं सहसैवाभ्यपद्यत। ववृधे हि ततस्तस्य हृदि कामो महात्मनः।
यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः। न च तं भागिनेयाय पर्व्वताय महात्मने। १०६०
शशंस हृच्छयं तीव्रं व्रीडमानः स धर्म्मवित्। तपसा चेङ्गितेनैव पर्व्वतोऽथ बुबोध तं।
कामार्त्तं नारदं क्रुद्धः शशापैनं ततो भृशं। कृत्वा समयमव्यग्रो भवान्वै सहितो मया।
यो भवेद्धृदि सङ्कल्पः शुभो वा यदि वाऽशुभः। अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतं।
भवता वचनं ब्रह्मंस्तस्मादेष शपाम्यहम्। न हि कामं प्रवर्त्तन्तं भवानाचष्ट मे पुरा।
सुकुमार्य्यां कुमार्य्यां ते तस्मादेष शपाम्यहं। ब्रह्मचारी गुरुर्यस्मात्तपस्वी ब्राह्मणश्च सन्। १०६५
अकार्षीत्समयभ्रंशमावाभ्यां यः कृतो मिथः। शप्स्ये तस्मात्सुसंक्रुद्धो भवन्तं तं निबोध मे।
सुकुमारी च ते भार्य्या भविष्यति न संशयः। वानरञ्चैव ते रूपं विवाहात्प्रभृति प्रभो।
संद्रक्ष्यन्ति नरास्त्वान्ये स्वरूपेण विनाशनं। स तद्वाक्यन्तु विज्ञाय नारदः पर्व्वतं तथा।
अशपत्तमपि क्रोधाद्भागिनेयं स मातुलः। तपसा ब्रह्मचर्य्येण सत्येन च दमेन च।
युक्तोऽपि नित्यधर्म्मश्च न वै स्वर्गमवाप्स्यसि। तौ तु शप्त्वा भृशं क्रुद्धौ परस्परममर्षणौ। १०७०
प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ। पर्व्वतः पृथिवीं कृत्स्नां विचचार महामतिः।
पूज्यमानो यथान्यायं तेजसा स्वेन भारत। अथ तामलभत्कन्यां नारदः सृञ्जयात्मजां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मेण विप्रप्रवरः सुकुमारीमनिन्दितां। सा तु कन्या यथाशापं नारदं तं ददर्श ह।
पाणिग्रहणमन्त्राणां नियोगादेव नारदं। सुकुमारी च देवर्षिं वानरप्रतिमाननं।
नैवावमन्यत तदा प्रीतिमत्येव चाभवत्। उपतस्थे च भर्त्तारं न चान्यं मनसाऽप्यगात्। १०७५
देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला। ततः कदाचिद्भगवान्पर्व्वतोऽनुचचार ह।
वनं विरहितं किञ्चित्तत्रापश्यत्स नारदं। ततोऽभिवाद्य प्रोवाच नारदं पर्व्वतस्तदा।
भवान् प्रसादं कुरुतात्स्वर्गादेशाय मे प्रभो। तमुवाच ततो दृष्ट्वा पर्व्वतं नारदस्तथा।
कृताञ्जलिमुपासीनं दीनं दीनतरः स्वयं। त्वयाऽहं प्रथमं शप्तो वानरस्त्वं भविष्यसि।
इत्युक्तेन मया पश्चाच्छप्तस्त्वमपि मत्सरात्। अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह। १०८०
तव नैतद्धि सदृशं पुत्रस्थाने हि मे भवान्। निवर्त्तयेतां तौ शापावन्योन्येन तदा मुनी।
श्रीसमृद्धं तदा दृष्ट्वा नारदं देवरूपिणं। सुकुमारी प्रदुद्राव परपत्यभिशङ्कया।
तां पर्व्वतस्ततो दृष्ट्वा प्रद्रवन्तीमनिन्दितां। अब्रवीत्तव भर्त्तैष नात्र कार्य्या विचारणा।
ऋषिः परमधर्म्मात्मा नारदो भगवान्प्रभुः। तवैवाभेद्यहृदयो मा तेऽभूदत्र संशयः।
साऽनुनीता बहुविधं पर्व्वतेन महात्मना। शापदोषञ्च तं भर्त्तुः श्रुत्वा प्रकृतिमागता। १०८५
पर्व्वतोऽथ ययौ स्वर्गं नारदोऽभ्यगमद्गृहान्।
॥ वासुदेव उवाच ॥ प्रत्यक्षकर्त्ता सर्व्वस्य नारदो भगवानृषिः। एष वक्ष्यति ते पृष्टो यथावृत्तं नरोत्तम।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि नारदपर्व्वतोपाख्याने त्रिंशत्तमोऽध्यायः॥ ३०॥
॥ वैशम्पायन उवाच ॥ ततो राजा पाण्डुसुतो नारदं प्रत्यभाषत। भगवन् श्रोतुमिच्छामि सुवर्णष्ठीविसम्भवं।
एवमुक्तस्तु स मुनिर्द्धर्म्मराजेन नारदः। आचचक्षे यथावृत्तं सुवर्णष्ठीविनं प्रति।
॥ नारद उवाच ॥ एवमेतन्महाबाहो यथाऽयं केशवोऽब्रवीत्। कार्य्यस्यास्य तु यच्छेषं तत्ते वक्ष्यामि पृच्छतः। १०९०
अहञ्च पर्व्वतश्चैव स्वस्रीयो मे महामुनिः। वस्तुकामावभिगतौ सृञ्जयं जयतां वरं।
तत्रावां पूजितौ तेन विधिदृष्टेन कर्म्मणा। सर्व्वकामैः सुविहितौ निवसावोऽस्य वेश्मनि।
व्यतिक्रान्तासु वर्षासु समये गमनस्य च। पर्व्वतो मामुवाचेदं काले वचनमर्थवत्।
आवामस्य नरेन्द्रस्य गृहे परमपूजितौ। उषितौ समये ब्रह्मंस्तद्विचिन्तय साम्प्रतं।
ततोऽहमब्रुवं राजन्पर्व्वतं शुभदर्शनं। सर्व्वमेतत्त्वयि विभो भागिनेयोपपद्यते। १०९५
वरेणच्छन्द्यतां राजा लभतां यद्यदिच्छति। आवयोस्तपसा सिद्धिं प्राप्नोतु यदि मन्यसे।
तत आहूय राजानं सृञ्जयं जयताम्वरं। पर्व्वतोऽनुमतं वाक्यमुवाच कुरुपुङ्गव।
प्रीतौ स्वो नृप सत्कारैर्भवदार्ज्जवसंभृतैः। आवाभ्यामभ्यनुज्ञातो वरं नृवर चिन्तय।
देवानामविहिंसायां न भवेन्मानुषक्षयं। तद्गृहाण महाराज पूजार्हो नौ मतो भवान्।
॥ सृञ्जय उवाच ॥ प्रीतौ भवन्तौ यदि मे कृतमेतावता मम। एष एव परो लाभो निर्वृत्तो मे महाफलः। ११००
तमेवंवादिनं भूयः पर्व्वतः प्रत्यभाषत। वृणीष्व राजन् संकल्पं यत्ते हृदि चिरं स्थितं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ सृञ्जय उवाच ॥ अभीप्सामि सुतं वीरं वीर्य्यवन्तं दृढव्रतं । आयुष्मन्तं महाभागं देवराजसमद्युतिं ।
॥ पर्व्वत उवाच ॥ भविष्यत्येष ते कामो नत्वायुष्मान् भविष्यति । देवराजाभिभूत्यर्थं संकल्पोह्येष ते हृदि ।
ख्यातः सुवर्णष्ठीवीति पुत्त्रस्तव भविष्यति । रक्ष्यश्च देवराजात्स देवराजसमद्युतिः ।
तच्छ्रुत्वा सृञ्जयो वाक्यं पर्व्वतस्य महात्मनः । प्रसादयामास तदा नैतदेवं भवेदिति । ११०५
आयुष्मान्मे भवेत्पुत्त्रो भवतस्तपसा मुने । न च तं पर्व्वतः किञ्चिदुवाचेन्द्रव्यपेक्षया ।
तमहं नृपतिं दीनमब्रुवं पुनरेव च । स्मर्त्तव्योऽस्मि महाराज दर्शयिष्यामि ते सुतं ।
अहन्ते दयितं पुत्त्रं प्रेतराजवशङ्गतं । पुनर्दास्यामि तद्रूपं मा शुचः पृथिवीपते ।
एवमुक्त्वा तु नृपतिं प्रयातौ स्वो यथेप्सितं । सृञ्जयश्च यथाकामं प्रविवेश स्वमन्दिरं ।
सृञ्जयस्याथ राजर्षेः कस्मिंश्चित्कालपर्य्यये । जज्ञे पुत्त्रो महावीर्य्यस्तेजसा प्रज्वलन्निव । १११०
ववृधे स यथाकालं सरसीव महोत्पलं । बभूव काञ्चनष्ठीवी यथार्थं नाम तस्य तत् ।
तदद्भुततमं लोके पप्रथे कुरुसत्तम । बुबुधे तच्च देवेन्द्रो वरदानं महर्षितः ।
ततः स्वाभिभवाद्भीतो बृहस्पतिमते स्थितः । कुमारस्यान्तरप्रेक्षी बभूव बलवृत्रहा ।
चोदयमास तद्वज्रं दिव्यास्त्रं मूर्त्तिमत्स्थितं । व्याघ्रो भूत्वा जहीमं त्वं राजपुत्त्रमिति प्रभो ।
प्रवृद्धः किल कार्य्येण मामेषोऽभिभविष्यति । सृञ्जयस्य सुतो वज्र यथैनं पर्व्वतोऽब्रवीत् । १११५
एवमुक्तस्तु शक्रेण वज्रः परपुरञ्जयः । कुमारमन्तरप्रेक्षी नित्यमेवान्वपद्यत ।
सृञ्जयोऽपि सुतं प्राप्य देवराजसमद्युतिं । हृष्टः सान्तःपुरो राजा वननित्यो बभूव ह ।
ततो भागीरथीतीरे कदाचिन्निर्जने वने । धात्रीद्वितीयो बालस्स क्रीडार्थं पर्य्यधावत ।
पञ्चवर्षकदेशीयो बालो नागेन्द्रविक्रमः । सहसोत्पतितं व्याघ्रमाससाद महाबलं ।
स बालस्तेन निष्पिष्टो वेपमानो नृपात्मजः । व्यसुः पपात मेदिन्यां ततो धात्री विचुक्रुशे । ११२०
हत्वा तु राजपुत्त्रं स तत्रैवान्तरधीयत । शार्दूलो देवराजस्य माययाऽन्तर्हितस्तदा ।
धात्र्यास्तु निनदं श्रुत्वा रुदन्त्याः परमार्त्तवत् । अभ्यधावत तं देशं स्वयमेव महीपतिः ।
स ददर्श शयानं तं गतासुं पीतशोणितं । कुमारं विगतानन्दं निशाकरमिव च्युतं ।
सुतमुत्सङ्गमारोप्य परिपीडितमानसः । पुत्त्रं रुधिरसंसिक्तं पर्य्यदेवयदातुरः ।
ततस्ता मातरस्तस्य रुदन्त्यः शोककर्षिताः । अभ्यधावन्त तं देशं यत्र राजा स सृञ्जयः । ११२५
ततः स राजा सस्मार मामेव गतमानसः । तदाऽहं चिन्तनं ज्ञात्वा गतवांस्तस्य दर्शनं ।
मयैतानि च वाक्यानि श्रावितः शोकलालसः । यानि ते यदुवीरेण कथितानि महीपते ।
सञ्जीवितश्चापि पुनर्व्वासवानुमते तदा । भवितव्यं तथा तच्च न तच्छक्यमतोऽन्यथा ।
तत ऊर्द्ध्वं कुमारस्तु स्वर्णष्ठीवी महायशाः । चित्तं प्रसादयामास पितुर्म्मातुश्च वीर्य्यवान् ।
कारयामास राज्यं च पितरि स्वर्गते नृप । वर्षाणां शतमेकञ्च सहस्रं भीमविक्रमः । ११३०
तत ईजे महायज्ञैर्बहुभिर्भूरिदक्षिणैः । तर्पयामास देवांश्च पितॄंश्चैव महाद्युतिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उत्पाद्य च बहून्पुत्रान् कुलसन्तानकारिणः । कालेन महता राजन् कालधर्म्ममुपेयिवान् ।
स त्वं राजेन्द्र सञ्जातं शोकमेनं निवर्त्तय । यथा त्वां केशवः प्राह व्यासश्च सुमहातपाः ।
पितृपैतामहं राज्यमास्थाय धुरमुद्वह । इष्ट्वा पुण्यैर्म्महायज्ञैरिष्टं लोकमवाप्स्यसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सुवर्णष्ठीविसम्भवोपाख्याने एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ वैशम्पायन उवाच ॥ तूष्णीम्भूतं तु राजानं शोचमानं युधिष्ठिरं । तपस्वी धर्म्मतत्त्वज्ञः कृष्णद्वैपायनोऽब्रवीत् । ११७५
॥ व्यास उवाच ॥ प्रजानां पालनं धर्म्मो राज्ञां राजीवलोचन । धर्म्मः प्रमाणं लोकस्य नित्यं धर्म्मानुवर्त्तिनः ।
अनुतिष्ठस्व तद्राजन्पितृपैतामहं पदं । ब्राह्मणेषु तपो धर्म्मः स नित्यो वेदनिश्चितः ।
तत्प्रमाणं ब्राह्मणानां शाश्वतं भरतर्षभ । तस्य धर्म्मस्य कृत्स्नस्य क्षत्त्रियः परिरक्षिता ।
यः स्वयं प्रतिहन्ति स्म शासनं विषये रतः । स बाहुभ्यां विनिग्राह्यो लोकयात्राविघातकः ।
प्रमाणमप्रमाणं यः कुर्य्यान्मोहवशङ्गतः । भृत्यो वा यदि वा पुत्त्रस्तपस्वी वाऽथ कश्चन । ११८०
पापान् सर्व्वैरुपायैस्तान्नियच्छेच्छातयीत वा । अतोऽन्यथा वर्त्तमानो राजा प्राप्नोति किल्बिषं ।
धर्म्मं विनश्यमानं हि यो न रक्षेत्स धर्म्महा । ते त्वया धर्म्महन्तारो निहताः सपदानुगाः ।
स्वधर्म्मे वर्त्तमानस्त्वं किन्नु शोचसि पाण्डव । राजा हि हन्याद्दद्याच्च प्रजा रक्षेच्च धर्म्मतः ।
॥ युधिष्ठिर उवाच ॥ न तेऽभिशङ्के वचनं यद्ब्रवीषि तपोधन । अपरोक्षो हि ते धर्म्मः सर्व्वधर्म्मविदाम्बर ।
मया त्ववध्या बहवो घातिता राज्यकारणात् । तानि कर्म्माणि मे ब्रह्मन्दहन्ति च पचन्ति च । ११८५
॥ व्यास उवाच ॥ ईश्वरो वा भवेत्कर्त्ता पुरुषो वाऽपि भारत । हठो वा वर्त्तते लोके कर्म्मजं वा फलं स्मृतं ।
ईश्वरेण नियुक्तो हि साध्वसाधु च भारत । कुरुते पुरुषः कर्म्म फलमीश्वरगामि तत् ।
यथा हि पुरुषश्छिन्द्याद्वृक्षं परशुना वने । छेत्तुरेव भवेत्पापं परशोर्न कथञ्चन ।
अथवा तदुपादानात्प्राप्नुयात्कर्म्मणः फलं । दण्डशस्त्रकृतं पापं पुरुषे तन्न विद्यते ।
न चैतदिष्टं कौन्तेय यदन्येन कृतं फलं । प्राप्नुयादिति यस्माच्च ईश्वरे तन्निवेशय । ११९०
अथापि पुरुषः कर्त्ता कर्म्मणोः शुभपापयोः । न परो विद्यते तस्मादेवमेतच्छुभं कृतं ।
न हि कश्चित्क्वचिद्राजन्दिष्टात्प्रतिनिवर्त्तते । दण्डशस्त्रकृतं पापं पुरुषे तन्न विद्यते ।
यदि वा मन्यसे राजन् हतमेकम्प्रतिष्ठितं । एवमप्यशुभं कर्म्म न भूतं न भविष्यति ।
अथाभिपत्तिर्ल्लोकस्य कर्त्तव्या शुभपापयोः । अभिपन्नमिदं लोके राज्ञामुद्यतदण्डनं ।
तथाऽपि लोके कर्म्माणि समावर्त्तन्ति भारत । शुभाशुभं फलं चैते प्राप्नुवन्तीति मे मतिः । ११९५
एवमप्यशुभं कर्म्म कर्म्मणस्तत्फलात्मकं । त्यज त्वं राजशार्दूल मैवं शोके मनः कृथाः ।
स्वधर्म्मे वर्त्तमानस्य सापवादेऽपि भारत । एवमात्मपरित्यागस्तव राजन्न शोभनः ।
विहितानि हि कौन्तेय प्रायश्चित्तानि कर्म्मणां । शरीरवांस्तानि कुर्य्यादशरीरः पराभवेत् ।
तद्राजन् जीवमानस्त्वं प्रायश्चित्तं करिष्यसि । प्रायश्चित्तमकृत्वा तु प्रेत्य तप्तासि भारत ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि प्रायश्चित्तोपाख्याने द्वात्रिंशोऽध्यायः ॥ ३२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ हता पुत्त्राश्च पौत्त्राश्च भ्रातरः पितरस्तथा। श्वशुरा गुरवश्चैव मातुलाश्च पितामहाः। ११६०
क्षत्त्रियाश्च महात्मानः सम्बन्धिसुहृदस्तथा। वयस्या भागिनेयाश्च ज्ञातयश्च पितामह।
बहवश्च मनुष्येन्द्रा नानादेशसमागताः। घातिता राज्यलुब्धेन मयैकेन पितामह।
तांस्तादृशानहं हत्वा धर्म्मनित्यान्महीक्षितः। असकृत्सोमपान् वीरान् किं प्राप्स्यामि तपोधन।
दह्याम्यनिशमद्यापि चिन्तयानः पुनः पुनः। हीनां पार्थिवसिंहैस्तैः श्रीमद्भिः पृथिवीमिमां।
दृष्ट्वा ज्ञातिवधं घोरं हतांश्च शतशः परान्। कोटिशश्च नरानन्यान्परितप्ये पितामह। ११६५
का नु तासां वरस्त्रीणामवस्थाऽद्य भविष्यति। विहीनानां तु तनयैः पतिभिर्भ्रातृभिस्तथा।
अस्मानन्तकरान् घोरान् पाण्डवान्वृष्णिसंहतान्। आक्रोशन्त्यः कृशा दीना प्रपतिष्यन्ति भूतले।
अपश्यन्त्यः पितॄन् भ्रातॄन्पतीन् पुत्त्रांश्च योषितः। त्यक्त्वा प्राणान् स्त्रियः सर्व्वा गमिष्यन्ति यमक्षयं।
वत्सलत्वाद्द्विजश्रेष्ठ तत्र मे नास्ति संशयः। व्यक्तं सौक्ष्म्याच्च धर्म्मस्य प्राप्स्यामः स्त्रीवधं वयं।
यद्वयं सुहृदो हत्वा कृत्वा पापमनन्तकं। नरके निपतिष्यामो ह्यधःशिरस एव ह। ११७०
शरीराणि विमोक्ष्यामस्तपसोग्रेण सत्तम। आश्रमाणां विशेषांस्त्वमथाचक्ष्व पितामह।
॥ वैशम्पायन उवाच ॥ युधिष्ठिरस्य तद्वाक्यं श्रुत्वा द्वैपायनस्तदा। निरीक्ष्य निपुणं बुद्ध्या ऋषिः प्रोवाच पाण्डवं।
॥ व्यास उवाच ॥ मा विषादं कृथा राजन् क्षत्त्रधर्म्ममनुस्मरन्। स्वधर्म्मेण हता ह्येते क्षत्त्रियाः क्षत्त्रियर्षभ।
काङ्क्षमाणाः श्रियं कृत्स्नां पृथिव्यां च महद्यशः। कृतान्तविधिसंयुक्ताः कालेन निधनं गताः।
न त्वं हन्ता न भीमोऽयं नार्ज्जुनो न यमावपि। कालः पर्य्यायधर्म्मेण प्राणानादत्त देहिनां। ११७५
न तस्य मातापितरौ नानुग्राह्यो हि कश्चन। कर्म्मसाक्षी प्रजानां यस्तेन कालेन संहृताः।
हेतुमात्रमिदं तस्य विहितं भरतर्षभ। यद्धन्ति भूतैर्भूतानि तदस्मै रूपमैश्वरं।
कर्म्मसूत्रात्मकं विद्धि साक्षिणं शुभपापयोः। सुखदुःखगुणोदर्कं कालं कालफलप्रदं।
तेषामपि महाबाहो कर्म्माणि परिचिन्तय। विनाशहेतुकानि त्वं यैस्ते कालवशङ्गताः।
आत्मनश्च विजानीहि नियतव्रतशासनं। यदा त्वमीदृशं कर्म्म विधिनाक्रम्य कारितः। ११८०
त्वष्ट्रेव विहितं यन्त्रं तथा चेष्टयितुर्वशे। कर्म्मणा कालयुक्तेन तथेदं चेष्टते जगत्।
पुरुषस्य हि दृष्ट्वेमामुत्पत्तिमनिमित्ततः। यदृच्छया विनाशश्च शोकहर्षावनर्थकौ।
व्यलीकमपि यत्त्वत्र चित्तवैतंसिकं तव। तदर्थमिष्यते राजन् प्रायश्चित्तं तदाचर।
इदन्तु श्रूयते पार्थ युद्धे देवासुरे पुरा। असुरा भ्रातरो ज्येष्ठा देवाश्चापि यवीयसः।
तेषामपि श्रीनिमित्तं महानासीत्समुच्छ्रयः। युद्धं वर्षसहस्राणि द्वात्रिंशदभवत्किल। ११८५
एकार्णवां महीं कृत्वा रुधिरेण परिप्लुतां। जघ्नुर्दैत्यांस्तथा देवास्त्रिदिवं चाभिलेभिरे।
तथैव पृथिवीं लब्ध्वा ब्राह्मणा वेदपारगाः। संश्रिता दानवानां वै साह्यार्थं दर्पमोहिताः।
शालावृका इति ख्यातास्त्रिषु लोकेषु भारत। अष्टाशीतिसहस्राणि ते चापि विबुधैर्हताः।
धर्म्मव्युच्छित्तिमिच्छन्तो येऽधर्म्मस्य प्रवर्त्तकाः। हन्तव्यास्ते दुरात्मानो देवैर्दैत्या इवोल्वणाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एकं हत्वा यदि कुले शिष्टानां स्यादनामयं । कुलं हत्वा च राष्ट्रं च न तद्वृत्तोपघातकं । ११९०
अधर्म्मरूपो धर्म्मो हि कश्चिदस्ति नराधिप । धर्म्मश्चाधर्म्मरूपोऽस्ति तच्च ज्ञेयं विपश्चिता ।
तस्मात्संस्तम्भयात्मानं श्रुतवानसि पाण्डव । देवैः पूर्व्वगतं मार्गमनुयातोऽसि भारत ।
न हीदृशा गमिष्यन्ति नरकं पाण्डवर्षभ । भ्रातॄनाश्वासयैतांस्त्वं सुहृदश्च परन्तप ।
यो हि पापसमारम्भे कार्य्ये तद्भावभावितः । कुर्व्वन्नपि तथैव स्यात् कृत्वा च निरपत्रपः ।
तस्मिंस्तत्कलुषं सर्व्वं समाप्तमिति शब्दितं । प्रायश्चित्तं न तस्यास्ति ह्रासो वा पापकर्म्मणः । ११९५
त्वन्तु शुक्लाभिजातीयः परदोषेण कारितः । अनिच्छमानः कर्म्मेदं कृत्वा च परितप्यसे ।
अश्वमेधो महायज्ञः प्रायश्चित्तमुदाहृतं । तमाहर महाराज विपाप्मैवं भविष्यसि ।
मरुद्भिः सह जित्वाऽरीन् भगवान्पाकशासनः । एकैकं क्रतुमाहृत्य शतकृत्वः शतक्रतुः ।
धूतपाप्मा जितस्वर्गो लोकानप्राप्य सुखोदयान् । मरुद्गणैर्वृतः शक्रः शुशुभे भासयन्दिशः ।
स्वर्गलोके महीयन्तमप्सरोभिः शचीपतिं । ऋषयः पर्य्युपासन्ते देवाश्च विबुधेश्वरं । १२००
सेयं त्वामनुसम्प्राप्ता विक्रमेण वसुन्धरा । निर्जिताश्च महीपाला विक्रमेण त्वयाऽनघ ।
तेषां पुराणि राष्ट्राणि गत्वा राजन् सुहृद्वृतः । भ्रातॄन्पुत्त्रांश्च पौत्त्रांश्च स्वे स्वे राज्येऽभिषेचय ।
बालानपि च गर्भस्थान् सान्त्वेन समुदाचरन् । रञ्जयन्प्रकृतीः सर्व्वाः परिपाहि वसुन्धरां ।
कुमारो नास्ति येषाञ्च कन्यास्तत्राभिषेचय । कामाशयो हि स्त्रीवर्गः शोकमेवं प्रहास्यसि ।
एवमाश्वासनं कृत्वा सर्व्वराष्ट्रेषु भारत । यजस्व वाजिमेधेन यथेन्द्रो विजयी पुरा । १२०५
अशोच्यास्ते महात्मानः क्षत्त्रियाः क्षत्त्रियर्षभ । स्वकर्म्मभिर्गता नाशं कृतान्तबलमोहिताः ।
अवाप्तः क्षत्त्रधर्म्मस्ते राज्यं प्राप्तमकण्टकं । रक्षस्व धर्म्मं कौन्तेय श्रेयान्यः प्रेत्य भारत ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि प्रायश्चित्तीयोपाख्याने त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ युधिष्ठिर उवाच ॥ कानि कृत्वेह कर्म्माणि प्रायश्चित्तीयते नरः । किं कृत्वा मुच्यते तत्र तन्मे ब्रूहि पितामह ।
॥ व्यास उवाच ॥ अकुर्व्वन्विहितं कर्म्म प्रतिषिद्धानि चाचरन् । प्रायश्चित्तीयते ह्येवं नरो मिथ्यानुवर्त्तयन् ।
सूर्य्येणाभ्युदितो यश्च ब्रह्मचारी भवत्युत । तथा सूर्य्याभिनिर्मुक्तः कुनखी श्यावदन्त्यपि । १२१०
परिवित्तिः परिवेत्ता ब्रह्मघ्नो यश्च कुत्सकः । दिधिषूपपतिर्यः स्यादग्रेदिधिषुरेव च ।
अवकीर्णी भवेद्यश्च द्विजातिवधकस्तथा । अतीर्थे ब्राह्मणस्त्यागी तीर्थे चाप्रतिपादकः ।
ग्रामघाती च कौन्तेय मांसस्य परिविक्रयी । यश्चाग्नीन्परिमुच्येत तथैव ब्रह्मविक्रयी ।
गुरुस्त्रीवधको यश्च पूर्व्वः पूर्व्वस्तु गर्हितः । वृथापशुसमालम्भी गृहदाहस्य कारकः ।
अनृतेनोपवर्त्ती च प्रतिरोद्धा गुरोस्तथा । एतान्येनांसि सर्व्वाणि व्युत्क्रान्तसमयश्च यः । १२१५
अकार्य्याणि तु वक्ष्यामि यानि तानि निबोध मे । लोकवेदविरुद्धानि तान्येकाग्रमनाः शृणु ।
स्वधर्म्मस्य परित्यागः परधर्म्मस्य च क्रिया । अयाज्ययाजनञ्चैव तथाऽभक्ष्यस्य भक्षणं ।
शरणागतसन्त्यागो भृत्यस्याभरणं तथा । रसानां विक्रयश्चापि तिर्य्यग्योनिवधस्तथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आधानादीनि कर्म्माणि शक्तिमान्न करोति यः। अप्रपद्यंश्च कर्म्माणि नित्यदेयानि भारत।
दक्षिणानामदानञ्च ब्राह्मणस्याभिमर्षणं। सर्व्वाण्येतान्यकार्य्याणि प्राहुर्धर्म्मविदो जनाः। १२२०
पित्रा विवदते पुत्रो यश्च स्याद्गुरुतल्पगः। अप्रजायन्नरव्याघ्र भवत्यधार्म्मिको नरः।
उक्तान्येतानि कर्म्माणि विस्तरेणेतरेण च। यानि कुर्व्वन्नकुर्व्वंश्च प्रायश्चित्तीयते नरः।
एतान्येव तु कर्म्माणि क्रियमाणानि मानवाः। येषु येषु निमित्तेषु न लिप्यन्तेऽथ तान् शृणु।
प्रगृह्य शस्त्रमायान्तमपि वेदान्तगं रणे। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्।
इति चाप्यत्र कौन्तेय मन्त्रो वेदेषु पठ्यते। वेदप्रमाणविहितं धर्म्मं च प्रब्रवीमि ते। १२२५
अपेतं ब्राह्मणं वृत्ताद्यो हन्यादाततायिनं। न तेन ब्रह्महा स स्यान्मन्युस्तन्मन्युमृच्छति।
प्राणात्यये तथाऽज्ञानादाचरन्मदिरामपि। अदेशितो धर्म्मपरैः पुनः संस्कारमर्हति।
एतत्ते सर्व्वमाख्यातं कौन्तेयाभक्ष्यभक्षणं। प्रायश्चित्तविधानेन सर्व्वमेतेन शुध्यति।
गुरुतल्पं हि गुर्व्वर्थे न दूषयति मानवं। उद्दालकः श्वेतकेतुं जनयामास शिष्यतः।
स्तेयं कुर्व्वंश्च गुर्व्वर्थमापत्सु न निषिध्यते। बहुशः कामकारेण न चेद्यः सम्प्रवर्त्तते। १२३०
अन्यत्र ब्राह्मणस्वेभ्य आददानो न दुष्यति। स्वयमप्राशिता यश्च न स पापेन लिप्यते।
प्राणत्राणेऽनृतं वाच्यमात्मनो वा परस्य च। गुर्व्वर्थे स्त्रीषु चैव स्याद्विवाहकरणेषु च।
नावर्त्तते व्रतं स्वप्ने शुक्रमोक्षे कथञ्चन। आज्यहोमः समिद्धेऽग्नौ प्रायश्चित्तं विधीयते।
पारिवित्त्यन्तु पतिते नास्ति प्रव्रजिते तथा। भिक्षिते पारदार्य्यञ्च तद्धर्म्मस्य न दूषकं।
वृथापशुसमालम्भं नैव कुर्य्यान्न कारयेत्। अनुग्रहः पशूनां हि संस्कारो विधिनोदितः। १२३५
अनर्हे ब्राह्मणे दत्तमज्ञानात्तन्न दूषकं। सत्काराणां तथा तीर्थे नित्यं वाऽप्रतिपादनं।
स्त्रियास्तथाऽपचारिण्या निष्कृतिः स्याददूषिका। अपि सा पूयते तेन न तु भर्त्ता प्रदुष्यति।
तत्त्वं ज्ञात्वा तु सोमस्य विक्रयः स्याददोषवान्। असमर्थस्य भृत्यस्य विसर्गः स्याददोषवान्।
वनदाहो गवामर्थे क्रियमाणो न दूषकः। उक्तान्येतानि कर्म्माणि यानि कुर्व्वन्न दुष्यति।
प्रायश्चित्तानि वक्ष्यामि विस्तरेणैव भारत। १२४०

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि प्रायश्चित्तीयोपाख्याने चतुस्त्रिंशोऽध्यायः॥ ३४॥

॥ व्यास उवाच ॥ तपसा कर्म्मभिश्चैव प्रदानेन च भारत। पुनाति पापं पुरुषः पुनश्चेन्न प्रवर्त्तते।
एककालं तु भुञ्जीत चरन् भैक्ष्यं स्वकर्म्मकृत्। कपालपाणिः खट्वाङ्गी ब्रह्मचारी सदोत्थितः।
अनसूयुरधःशायी कर्म्म लोके प्रकाशयन्। पूर्णैर्द्वादशभिर्व्वर्षैर्ब्रह्महा विप्रमुच्यते।
लक्ष्यः शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः। प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः।
जपन्वाऽन्यतमं वेदं योजनानां शतं व्रजेत्। सर्व्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्। १२४५
धनं वा जीवनायालं गृहं वा सपरिच्छदं। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च।
षड्भिर्व्वर्षैः कृच्छ्रभोजी ब्रह्महा पूयते नरः। मासे मासे समश्नंस्तु त्रिभिर्व्वर्षैः प्रमुच्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संवत्सरेण मासाशी पूयते नात्र संशयः । तथैवापवसन्राजन् स्वल्पेनापि प्रपूयते ।
क्रतुना वाऽश्वमेधेन पूयते नात्र संशयः । ये चाप्यवभृथस्नाताः केचिदेवंविधा नराः ।
ते सर्व्वे धूतपाप्मानो भवन्तीति परा श्रुतिः । ब्राह्मणार्थे हतो युद्धे मुच्यते ब्रह्महत्यया । १२५०
गवां शतसहस्रन्तु पात्रेभ्यः प्रतिपादयेत् । ब्रह्महा विप्रमुच्येत सर्व्वपापेभ्य एव च ।
कपिलानां सहस्राणि यो दद्यात्पञ्चविंशतिं । दोग्ध्रीणां स च पापेभ्यः सर्व्वेभ्यो विप्रमुच्यते ।
गोसहस्रं सवत्सानां दोग्ध्रीणां प्राणसंशये । साधुभ्यो वै दरिद्रेभ्यो दत्त्वा मुच्येत किल्विषात् ।
शतं वै यस्तु काम्बोजान् ब्राह्मणेभ्यः प्रयच्छति । नियतेभ्यो महीपाल स च पापात्प्रमुच्यते ।
मनोरथन्तु यो दद्यादेकस्मा अपि भारत । न कीर्त्तयेत दत्त्वा यः स च पापात्प्रमुच्यते । १२५५
सुरापानं सकृत्कृत्वा योऽग्निवर्णां सुरां पिबेत् । स पावयत्यथात्मानमिह लोके परत्र च ।
मेरुप्रपातं प्रपतन् ज्वलनं वा समाविशन् । महाप्रस्थानमातिष्ठन् मुच्यते सर्व्वकिल्विषैः ।
बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः । समितिं ब्राह्मणो गच्छेदिति वै ब्रह्मणः श्रुतिः ।
भूमिप्रदानं कुर्य्याद्यः सुरां पीत्वा विमत्सरः । पुनर्न्न च पिबेद्राजन् संस्कृतः स च शुध्यति ।
गुरुतल्पी शिलां तप्तामायसीमभिसंविशेत् । अवकृत्यात्मनः शेफं प्रव्रजेदूर्द्ध्वदर्शनः । १२६०
शरीरस्य विमोक्षेण मुच्यते कर्म्मणोऽशुभात् । कर्म्मभ्यो विप्रमुच्यन्ते यताः संवत्सरं स्त्रियः ।
महाव्रतं चरेद्यस्तु दद्यात्सर्व्वस्वमेव तु । गुर्व्वर्थे वा हतो युद्धे स मुच्येत्कर्म्मणोऽशुभात् ।
अनृतेनोपवर्त्ती चेत् प्रतिरोद्धा गुरोस्तथा । उपाहृत्य प्रियं तस्मै तस्मात्पापात्प्रमुच्यते ।
अवकीर्णिनिमित्तन्तु ब्रह्महत्याव्रतं चरेत् । गोचर्म्मवासाः षण्मासांस्तथा मुच्येत किल्विषात् ।
परदारापचारी तु परस्यापहरन्वसु । संवत्सरं व्रती भूत्वा तथा मुच्येत किल्विषात् । १२६५
धनन्तु यस्यापहरेत्तस्मै दद्यात्समं वसु । विविधेनाभ्युपायेन तदा मुच्येत किल्विषात् ।
कृच्छ्राद्द्वादशरात्रेण संयतात्मा व्रते स्थितः । परिवेत्ता भवेत्पूतः परिवित्तिस्तथैव च ।
निवेश्यन्तु पुनस्तेन सदा तारयता पितॄन् । न तु स्त्रिया भवेद्दोषो न तु सा तेन लिप्यते ।
भोजनं ह्यन्तरा शुद्धं चातुर्मास्ये विधीयते । स्त्रियस्तेन प्रशुध्यन्ति इति धर्म्मविदो विदुः ।
स्त्रियस्त्वाशङ्किताः पापा नोपगम्या विजानता । रजसा ता विशुध्यन्ते भस्मना भाजनं तथा । १२७०
पादजोच्छिष्टकांस्यं यत् गवाघ्रातमथाऽपि वा । गण्डूषोच्छिष्टमपि वा विशुध्येद्दशभिस्तु तत् ।
चतुष्पात्सकलो धर्म्मो ब्राह्मणस्य विधीयते । पादावकृष्टो राजन्ये तथा धर्म्मो विधीयते ।
तथा वैश्ये च शूद्रे च पादः पादो विधीयते । विद्यादेवंविधेनैषां गुरुलाघवनिश्चयं ।
तिर्य्यग्योनिवधङ्कृत्वा द्रुमांश्छित्त्वेतरान् बहून् । त्रिरात्रं वायुभक्षः स्यात् कर्म्म च प्रथयन्नरः ।
अगम्यागमने राजन् प्रायश्चित्तं विधीयते । आर्द्रवस्त्रेण षण्मासान् विहार्य्यं भस्मशायिना । १२७५
एष एव तु सर्व्वेषामकार्य्याणां विधिर्भवेत् । ब्राह्मणोक्तेन विधिना दृष्टान्तागमहेतुभिः ।
सावित्रीमप्यधीयीत शुचौ देशे मिताशनः । अहिंस्रो मन्दकोऽजल्पो मुच्यते सर्व्वकिल्विषैः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अहःसु सततं तिष्ठेदभ्याकाशं निशां स्वपन् । त्रिरह्नि त्रिर्निशायाञ्च सवासा जलमाविशेत् ।
स्त्रीशूद्रं पतितं चापि नाभिभाषेद्व्रतान्वितः । पापान्यज्ञानतः कृत्वा मुच्येदेवंव्रतो द्विजः ।
शुभाशुभफलं प्रेत्य लभते भूतसाक्षिकं । अतिरिच्येत यो यत्र तत्कर्त्ता लभते फलं । ११८०
तस्माज्ज्ञानेन तपसा कर्म्मणा च फलं शुभं । वर्द्धयेदशुभं कृत्वा यथा स्यादतिरेकवान् ।
कुर्य्याच्छुभानि कर्म्माणि निवर्त्तेत्पापकर्म्मणः । दद्यान्नित्यञ्च वित्तानि तथा मुच्येत किल्बिषात् ।
अनुरूपं हि पापस्य प्रायश्चित्तमुदाहृतं । महापातकवर्ज्जन्तु प्रायश्चित्तं विधीयते ।
भक्ष्याभक्ष्येषु चान्येषु वाच्यावाच्ये तथैव च । अज्ञानज्ञानयोराजन् विहितान्यनुजानतः ।
जानता तु कृतं पापं गुरु सर्व्वं भवत्युत । अज्ञानात्स्वल्पको दोषः प्रायश्चित्तं विधीयते । ११८५
शक्यते विधिना पापं यथोक्तेन व्यपोहितुं । आस्तिके श्रद्दधाने च विधिरेष विधीयते ।
नास्तिकाश्रद्दधानेषु पुरुषेषु कदाचन । दम्भद्वेषप्रधानेषु विधिरेष न दृश्यते ।
शिष्टाचारश्च शिष्टश्च धर्म्मो धर्म्मभृताम्वर । सेवितव्यो नरव्याघ्र प्रेत्येह च सुखेप्सुना ।
स राजन्मोक्ष्यसे पापात्तेन पूर्व्वेण हेतुना । प्राणार्थं वा धनैर्नैषामथवा नृप कर्म्मणा ।
अथवा ते घृणा काचित् प्रायश्चित्तं चरिष्यसि । मा त्वेवानार्य्यजुष्टेन मन्युना निधनङ्गमः । ११९०
॥ वैशम्पायन उवाच ॥ एवमुक्तो भगवता धर्म्मराजो युधिष्ठिरः । चिन्तयित्वा मुहूर्त्तेन प्रत्युवाच तपोधनं ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि प्रायश्चित्तीयोपाख्याने पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
॥ युधिष्ठिर उवाच ॥ किं भक्ष्यञ्चाप्यभक्ष्यञ्च किञ्च देयं प्रशस्यते । किञ्च पात्रमपात्रं वा तन्मे ब्रूहि पितामह ।
॥ व्यास उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । सिद्धानाञ्चैव संवादं मनोश्चैव प्रजापतेः ।
ऋषयस्तु व्रतपराः समागम्य परं विभुं । धर्म्मं पप्रच्छुरासीनमादिकाले प्रजापतिं ।
कथमन्नं कथं पात्रं दानमध्ययनं तपः । कार्य्याकार्य्यञ्च यत्सर्व्वं शंस वै त्वं प्रजापते । ११९५
तैरेवमुक्तो भगवान् मनुः स्वायम्भुवोऽब्रवीत् । शुश्रूषध्वं यथावृत्तं धर्म्मं व्याससमासतः ।
अनादेशे जपो होम उपवासस्तथैव च । आत्मज्ञानं पुण्यनद्यो यत्र प्रायश्च तत्पराः ।
दिष्टान्येतानि पुण्यानि पुण्याश्च धरणीभृतः । सुवर्णप्राशनमपि रत्नादिस्नानमेव च ।
देवस्थानाभिगमनमाज्यप्राशनमेव च । एतानि मेध्यं पुरुषं कुर्व्वन्त्याशु न संशयः ।
न गर्व्वेण भवेत्प्राज्ञः कदाचिदपि मानवः । दीर्घमायुरथेच्छन्ति त्रिरात्रञ्चोष्णपो भवेत् । १२००
अदत्तस्यानुपादानं दानमध्ययनं तपः । अहिंसा सत्यमक्रोध इज्या धर्म्मस्य लक्षणं ।
स एव धर्म्मस्सोऽधर्म्मोऽदेशकाले प्रतिष्ठितः । आदानमनृतं हिंसा धर्म्मो ह्यावस्थिकः स्मृतः ।
द्विविधौ चाप्युभावेतौ धर्म्माधर्म्मौ विजानतां । अप्रवृत्तिः प्रवृत्तिश्च द्वैविध्यं लोकवेदयोः ।
अप्रवृत्तेरमर्त्त्यत्वं मर्त्त्यत्वं कर्म्मणः फलं । अशुभस्याशुभं विद्यात् शुभस्य शुभमेव च ।
एतयोश्चोभयोः स्यातां शुभाशुभतया तथा । दैवञ्च दैवसंयुक्तं प्राणश्च प्राणदश्च ह । १२०५
अपेक्षापूर्व्वकरणादशुभानां शुभं फलं । ऊर्द्ध्वं भवति सन्देहादिह दृष्टार्थमेव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अपेक्षापूर्व्वकरणात् प्रायश्चित्तं विधीयते । क्रोधमोहकृतं चैव दृष्टान्तागमहेतुभिः ।
शरीराणामुपक्लेशो मनसश्च प्रियाप्रिये । तदौषधैश्च मन्त्रैश्च प्रायश्चित्तैश्च शाम्यति ।
उपवासमेकरात्रं दण्डोत्सर्गे नराधिपः । विशुध्येदात्मशुद्ध्यर्थं त्रिरात्रे तु पुरोहितः ।
क्षयं शोकं प्रकुर्व्वाणो न म्रियेत यदा नरः । शस्त्रादिभिरुपाविष्टस्त्रिरात्रं तत्र निर्द्दिशेत् । ११९०
जातिश्रेण्यधिवासानां कुलधर्म्मांश्च सर्व्वतः । वर्ज्जयन्ति च ये धर्म्मं तेषां धर्म्मो न विद्यते ।
दश वा वेदशास्त्रज्ञास्त्रयो वा धर्म्मपाठकाः । यद्ब्रूयुः कार्य्यउत्पन्ने स धर्म्मो धर्म्मसंशये ।
अनड्वान्मृत्तिका चैव तथा क्षुद्रपिपीलिकाः । श्लेष्मातकस्तथा विप्रैरभक्ष्यं विषमेव च ।
अभक्ष्या ब्राह्मणैर्म्मत्स्याः शल्कैर्ये वै विवर्ज्जिताः । चतुष्पात्कच्छपादन्यो मण्डूका जलजाश्च ये ।
भासा हंसाः सुपर्णाश्च चक्रवाकाः प्लवा बकाः । काको मद्गुश्च गृध्रश्च श्येनोलूकस्तथैव च । ११९५
क्रव्यादा दंष्ट्रिनः सर्व्वे चतुष्पात्पक्षिणश्च ये । येषां चोभयतो दन्ताश्चतुर्द्दंष्ट्राश्च सर्व्वशः ।
एडकाश्वखरोष्ट्रीणां सूतिकानां गवामपि । मानुषीणां मृगीणां च न पिवेद्ब्राह्मणः पयः ।
प्रेतान्नं सूतिकान्नं च यच्च किञ्चिदनिर्द्दशं । अभोज्यञ्चाप्यपेयञ्च धेन्वाद्दुग्धमनिर्द्दशं ।
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्च्चसं । आयुः सुवर्णकारान्नमवीरायाश्च योषितः ।
विष्ठा वार्द्धुषिकस्यान्नं गणिकान्नमथेन्द्रियं । मृष्यन्ति ये चोपपतिं स्त्रीजितान्नञ्च सर्व्वशः । १२००
दीक्षितस्य कदर्य्यस्य क्रतुविक्रयिकस्य च । तक्ष्णश्चर्म्मावकर्त्तुश्च पुंश्चल्या रजकस्य च ।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा । गणग्रामाभिशस्तानां रङ्गस्त्रीजीविनां तथा ।
परिवित्तीनां पुंसाञ्च वन्दिद्यूतविदान्तथा । वामहस्ताहृतञ्चान्नं भक्तं पर्य्युषितञ्च यत् ।
सुरानुगतमुच्छिष्टमभोज्यं शेषितञ्च यत । पिष्टस्य चेक्षुशाकानां विकाराः पयसस्तथा ।
सक्तुधानाकरम्भाणां नोपभोग्याश्चिरस्थिताः । पायसं कृसरं मांसमपूपाश्च वृथाकृताः । १२०५
अपेयाश्चाप्यभक्ष्याश्च ब्राह्मणैर्गृहमेधिभिः । देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चात् गृहस्थो भोक्तुमर्हति । यथा प्रव्रजितो भिक्षुस्तथैव स्वे गृहे वसेत् ।
एवं वृत्तः प्रियैर्दारैः संवसन् धर्म्ममाप्नुयात् । न दद्याद्यशसे दानं न भयान्नोपकारिणे ।
न नृत्यगीतशीलेषु हासकेषु च धार्म्मिकः । न मत्ते चैव नोन्मत्ते न स्तेने च न कुत्सके ।
न वाग्घीने विवर्णे वा नाङ्गहीने न वामने । न दुर्ज्जने दौष्कुले वा व्रतैर्यो वा न संस्कृतः । १२१०
न श्रोत्रियमृते दानं ब्राह्मणे ब्रह्मवर्ज्जिते । असम्यक् चैव यद्दत्तमसम्यक् च प्रतिग्रहः ।
उभयं स्यादनर्थाय दातुरादातुरेव च । यथा खादिरमालम्ब्य शिलां वाऽप्यर्णवन्तरन् ।
मज्जेत मज्जतस्तद्वद्दाता यश्च प्रतिग्रही । काष्ठैरार्द्रैर्यथा वह्निरुपस्तीर्णो न दीप्यते ।
तपःस्वाध्यायचारित्रैरेवं हीनः प्रतिग्रही । कपाले यद्वदापः स्युः श्वदृतौ च यथा पयः ।
आश्रयस्थानदोषेण वृत्तहीने तथा श्रुतं । निर्मन्त्रो निर्व्रतो यः स्यादशास्त्रज्ञोऽनसूयकः । १२१५
अनुक्रोशात्प्रदातव्यं हीनेष्वव्रतिकेषु च । न वै देयमनुक्रोशाद्दीनार्त्तातुरकेष्वपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आशाचरितइत्येव धर्म्मइत्येव वा पुनः। निष्कारणं स्मृतं दत्तं ब्राह्मणे ब्रह्मवर्ज्जिते।
अवेदपात्रदोषेण न चात्रास्ति विचारणा। यथा दारुमयो हस्ती यथा चर्म्ममयो मृगः।
ब्राह्मणश्चानधीयानस्त्रयस्ते नाम बिभ्रति। यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला।
शकुनिर्व्वाऽप्यपक्षः स्यान्निर्म्मन्त्रो ब्राह्मणस्तथा। ग्रामधान्यं यथा शून्यं यथा कूपश्च निर्ज्जलः।
यथा हुतमनग्नौ च तथैव स्यान्निराकृतौ। देवतानां पितॄणाञ्च हव्यकव्यविनाशकः।
शत्रुरर्थहरो मूर्खो न लोकान्प्राप्तुमर्हति। एतत्ते कथितं सर्व्वं यथावृत्तं युधिष्ठिर।
समासेन महद्ध्येतच्छ्रोतव्यं भरतर्षभ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्यासवाक्ये षट्त्रिंशोऽध्यायः॥ ३६॥

॥ युधिष्ठिर उवाच॥ श्रोतुमिच्छामि भगवन् विस्तरेण महामुने। राजधर्म्मान् द्विजश्रेष्ठ चातुर्व्वर्ण्यस्य चाखिलान्।
आपत्सु च यथानीतिः प्रणेतव्या द्विजोत्तम। धर्म्ममालम्ब्य पन्थानं विजयेयं कथं महीं।
प्रायश्चित्तकथा ह्येषा भक्ष्याभक्ष्यविवर्जिता। कौतूहलानुप्रवणा हर्षं जनयतीव मे।
धर्म्मचर्य्या च राज्यञ्च नित्यमेव विरुध्यते। एवं मुह्यति मे चेतश्चिन्तयानस्य नित्यशः।
॥ वैशम्पायन उवाच॥ तमुवाच महाराज व्यासो वेदविदाम्वरः। नारदं समभिप्रेक्ष्य सर्व्वज्ञानां पुरातनं।
श्रोतुमिच्छसि चेद्धर्म्मं निखिलेन नराधिप। प्रैहि भीष्मं महाबाहो वृद्धं कुरुपितामहं।
स ते धर्म्मरहस्येषु संशयान्मनसि स्थितान्। छेत्ता भागीरथीपुत्त्रः सर्व्वज्ञः सर्व्वधर्म्मवित्।
जनयामास यं देवी दिव्या त्रिपथगा नदी। साक्षाद्ददर्श यो देवान् सर्व्वानिन्द्रपुरोगमान्।
वृहस्पतिपुरोगांश्च देवर्षीनसकृत्प्रभुः। तोषयित्वोपचारेण राजनीतिमधीतवान्
उशना वेद यच्छास्त्रं यच्च देवगुरुर्द्विजः। यच्च धर्म्मं सवैयाख्यं प्राप्तवान् कुरुसत्तमः।
भार्गवाच्च्यवनाच्चापि वेदानङ्गोपवृंहितान्। प्रतिपेदे महाबाहुर्व्वशिष्ठाच्चरितव्रतः।
पितामहसुतं ज्येष्ठं कुमारं दीप्ततेजसं। अध्यात्मगतितत्त्वज्ञमुपाशिक्षत यः पुरा।
मार्कण्डेयमुखात्कृत्स्नं यतिधर्म्ममवाप्तवान्। रामादस्त्राणि शक्राच्च प्राप्तवान् पुरुषर्षभः।
मृत्युरात्मेच्छया यस्य जातस्य मनुजेष्वपि। यथाऽनपत्यस्य सतः पुण्या लोका दिवि श्रुताः।
यस्य ब्रह्मर्षयः पुण्या नित्यमासन् सभासदः। यस्य नाविदितं किञ्चित् ज्ञानज्ञेयेषु विद्यते।
स ते वक्ष्यति धर्म्मज्ञः सूक्ष्मधर्म्मार्थतत्त्ववित्। तमभ्येहि पुरा प्राणान् स विमुञ्चति धर्म्मवित्।
एवमुक्तस्तु कौन्तेयो दीर्घप्रज्ञो महामतिः। उवाच वदतां श्रेष्ठं व्यासं सत्यवतीसुतं।
॥ युधिष्ठिर उवाच॥ वैशसं सुमहत्कृत्वा ज्ञातीनां रोमहर्षणं। आगस्कृत्सर्व्वलोकस्य पृथिवीनाशकारकः।
घातयित्वा तमेवाजौ छलेनाजिह्मयोधिनं। उपसम्प्रष्टुमर्हामि तमहं केन हेतुना।
॥ वैशम्पायन उवाच॥ ततस्तं नृपतिश्रेष्ठं चातुर्व्वर्ण्यहितेच्छया। पुनराह महाबाहुर्य्यदुश्रेष्ठो महामतिः।
॥ वासुदेव उवाच॥ नेदानीमतिनिर्ब्बन्धं शोके त्वं कर्त्तुमर्हसि। यदाह भगवान् व्यासस्तत् कुरुष्व नृपोत्तम।
ब्राह्मणास्त्वां महाबाहो भ्रातरश्च महौजसः। पर्जन्यमिव घर्मान्ते नाथमाना उपासते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हतशिष्टास्च राजानः क्षत्त्रं चैव समागतं। चातुर्व्वर्ण्यं महाराज राष्ट्रं ते कुरुजाङ्गलं।
प्रियार्थमपि चैतेषां ब्राह्मणानां महात्मनां। नियोगादस्य च गुरोर्व्यासस्यामिततेजसः।
सुहृदामस्मदादीनां द्रौपद्याश्च परन्तप। कुरु प्रियममित्रघ्न लोकस्य च हितं कुरु।
॥ वैशम्पायन उवाच ॥ एवमुक्तः स कृष्णेन राजा राजीवलोचनः। हितार्थं सर्व्वलोकस्य समुत्तस्थौ महामनाः।
सोऽनुनीतो नरव्याघ्रो विष्टरश्रवसा स्वयं। द्वैपायनेन च तथा देवस्थानेन जिष्णुना।
एतैरन्यैश्च बहुभिरनुनीतो युधिष्ठिरः। व्यजहान्मानसं दुःखं सन्तापञ्च महायशाः।
श्रुतवाक्यः श्रुतनिधिः श्रुतश्रव्यविशारदः। ततः स मनसः शान्तिमगच्छत्पाण्डुनन्दनः।
स तैः परिवृतो राजा नक्षत्रैरिव चन्द्रमाः। धृतराष्ट्रं पुरस्कृत्य स्वपुरं प्रविवेश ह।
प्रविविक्षुः स धर्म्मज्ञः कुन्तीपुत्त्रो युधिष्ठिरः। अर्च्चयामास देवांश्च ब्राह्मणांश्च सहस्रशः।
ततो नवं रथं शुभ्रं कम्बलाजिनसंवृतं। युक्तं षोडशभिर्गोभिः पाण्डरैः शुभलक्षणैः।
मन्त्रैरभ्यर्च्चितं पुण्यैःस्तूयमानश्च वन्दिभिः। आरुरोह रथञ्चैव सोमोऽमृतमयं यथा।
जग्राह रश्मीन् कौन्तेयो भीमो भीमपराक्रमः। अर्ज्जुनः पाण्डुरं छत्त्रं धारयामास भानुमत्।
ध्रियमाणञ्च तच्छत्त्रं पाण्डुरं रथमूर्ध्वनि। शुशुभे तारकाकीर्णं सितमभ्रमिवाम्बरे।
चामरव्यजने तस्य वीरौ जगृहतुस्तदा। चन्द्ररश्मिप्रभे शुभ्रे माद्रीपुत्त्रावलङ्कृते।
ते पञ्च रथमास्थाय भ्रातरः समलङ्कृताः। भूतानीव समस्तानि राजन् ददृशिरे तदा।
आस्थाय तु रथं शुभ्रं युक्तमश्वैर्मनोजवैः। अन्वयात्पृष्ठतो राजन् युयुत्सुः पाण्डवाग्रजं।
रथं हेममयं शुभ्रं शैव्यसुग्रीवयोजितं। सह सात्यकिना कृष्णः समास्थायान्वयात्कुरून्।
नरयानेन तु ज्येष्ठः पिता पार्थस्य भारत। अग्रतो धर्म्मराजस्य गान्धारीसहितो ययौ।
कुरुस्त्रियश्च ताः सर्व्वाः कुन्ती कृष्णा तथैव च। यानैरुच्चावचैर्जग्मुर्व्विदुरेण पुरस्कृताः।
ततो रथाश्च बहुला नागाश्च समलङ्कृताः। पादाताश्च हयाश्चैव पृष्ठतः समनुव्रजन्।
ततो वैतालिकैः सूतैर्मागधैश्च सुभाषितैः। स्तूयमानो ययौ राजा नगरं नागसाह्वयं।
तत्प्रयाणं महाबाहोर्ब्बभूवाप्रतिमं भुवि। आकुलाकुलमुत्कुष्टं हृष्टपुष्टजनाकुलं।
अभियाने तु पार्थस्य नरैर्नगरवासिभिः। नगरं राजमार्गञ्च यथावत्समलङ्कृतं।
पाण्डुरेण च माल्येन पताकाभिश्च मेदिनी। संस्कृता राजमार्गोऽभूद्धूपनैश्च प्रधूपितः।
अथ चूर्णैश्च गन्धानां नानापुष्पप्रियङ्गुभिः। माल्यदामभिरासक्तै राजवेश्माभिसंवृतं।
कुम्भाश्च नगरद्वारि वारिपूर्णा नवा दृढाः। कन्याः सुमनसो गौराः स्थापितास्तत्र तत्र ह।
तथा स्वलङ्कृतद्वारं नगरं पाण्डुनन्दनः। स्तूयमानः शुभैर्व्वाक्यैः प्रविवेश सुहृद्वृतः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरस्य पुरप्रवेशे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ वैशम्पायन उवाच ॥ प्रवेशने तु पार्थानां जनानां पुरवासिनां। दिदृक्षूणां सहस्राणि समाजग्मुः सहस्रशः।
स राजमार्गः शुशुभे समलङ्कृतचत्वरः। यथा चन्द्रोदये राजन् वर्द्धमानो महोदधिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गृहाणि राजमार्गेषु रत्नवन्ति महान्ति च। प्राकम्पन्तीव भारेण स्त्रीणां पूर्णानि भारत। १३९५
ताः शनैरिव सव्रीडं प्रशशंसुर्युधिष्ठिरं। भीमसेनार्जुनौ चैव माद्रीपुत्रौ च पाण्डवौ।
धन्या त्वमसि पाञ्चालि या त्वं पुरुषसत्तमान्। उपतिष्ठसि कल्याणि महर्षीनिव गौतमी।
तव कर्म्माण्यमोघानि व्रतचर्य्या च भाविनि। इति कृष्णां महाराज प्रशशंसुस्तदा स्त्रियः।
प्रशंसावचनैस्तासां मिथः शब्दैश्च भारत। प्रीतिजैश्च तदा शब्दैः पुरमासीत्समाकुलं।
तमतीत्य यथायुक्तं राजमार्गं युधिष्ठिरः। अलङ्कृतं शोभमानमुपायाद्राजवेश्म ह। १४००
ततः प्रकृतयः सर्व्वाः पौरजानपदास्तदा। ऊचुः कर्णसुखा वाचः समुपेत्य ततस्ततः।
दिष्ट्या जयसि राजेन्द्र शत्रूञ्छत्रुनिषूदन। दिष्ट्या राज्यं पुनः प्राप्तं धर्म्मेण च बलेन च।
भव नस्त्वं महाराज राजेह शरदां शतं। प्रजाः पालय धर्म्मेण यथेन्द्रस्त्रिदिवं तथा।
एवं राजकुलद्वारि मङ्गलैरभिपूजितः। आशीर्व्वादान् द्विजैरुक्तान् प्रतिगृह्य समन्ततः।
प्रविश्य भवनं राजा देवराजगृहोपमं। श्रुत्वा विजयसंयुक्तं रथात्पश्चादवातरत्। १४०५
प्रविश्याभ्यन्तरं श्रीमान् दैवतान्यभिगम्य च। पूजयामास रत्नैश्च गन्धमाल्यैश्च सर्व्वशः।
निश्चक्राम ततः श्रीमान् पुनरेव महायशाः। ददर्श ब्राह्मणांश्चैव सोऽभिरूपानवस्थितान्।
स संवृतस्तदा विप्रैराशीर्व्वादविवक्षुभिः। शुशुभे विमलश्चन्द्रस्तारागणवृतो यथा।
तांस्तु वै पूजयामास कौन्तेयो विधिवद्द्विजान्। धौम्यं गुरुं पुरस्कृत्य ज्येष्ठं पितरमेव च।
सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा। गोभिर्व्वस्त्रैश्च राजेन्द्र विविधैश्च किमिच्छकैः। १४१०
ततः पुण्याहघोषोऽभूद्दिवं स्तब्ध्वेव भारत। सुहृदां प्रीतिजननः पुण्यः श्रुतिसुखावहः।
हंसवन्नेदुषां राजा द्विजानां तत्र भारतीं। शुश्रुवे वेदविदुषां पुष्कलार्थपदाक्षरां।
ततो दुन्दुभिनिर्घोषः शङ्खानाञ्च मनोरमः। जयं प्रवदतां तत्र स्वनः प्रादुरभून्नृप।
निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः। राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत्।
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः। साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः। १४१५
वृतः सर्व्वैस्तथा विप्रैराशीर्व्वादविवक्षुभिः। परं सहस्रै राजेन्द्र तपोनियमसंश्रितैः।
स दुष्टः पापमाशंसुः पाण्डवानां महात्मनां। अनामन्त्र्यैव तान् विप्रांस्तमुवाच महीपतिं।
॥ चार्व्वाक उवाच ॥ इमे प्राहुर्द्विजाः सर्व्वे समारोप्य वचो मयि। धिग्भवन्तं कुनृपतिं ज्ञातिघातिनमस्तु वै।
किं तेन स्याद्धि कौन्तेय कृत्वेमं ज्ञातिसङ्क्षयं। घातयित्वा गुरूंश्चैव मृतं श्रेयो न जीवितं।
इति ते वै द्विजाः श्रुत्वा तस्य दुष्टस्य रक्षसः। विव्यथुश्चुक्रुशुश्चैव तस्य वाक्यप्रधर्षिताः। १४२०
ततस्ते ब्राह्मणाः सर्व्वे स च राजा युधिष्ठिरः। व्रीडिताः परमोद्विग्नास्तूष्णीमासन् विशाम्पते।
॥ युधिष्ठिर उवाच ॥ प्रसीदन्तु भवन्तो मे प्रणतस्याभियाचतः। प्रत्यासन्नव्यसनिनं न मां धिक्कर्त्तुमर्हथ।
॥ वैशम्पायन उवाच ॥ ततो राजन् ब्राह्मणास्ते सर्व्व एव विशाम्पते। ऊचुर्नैतद्वचोऽस्माकं श्रीरस्तु तव पार्थिव।
जज्ञुश्चैव महात्मानस्ततस्तु ज्ञानचक्षुषा। ब्राह्मणा वेदविद्वांसस्तपोभिर्व्विमलीकृताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ ब्राह्मणा ऊचुः ॥ एष दुर्य्योधनसखा चार्व्वाको नाम राक्षसः । परिव्राजकरूपेण हितं तस्य चिकीर्षति । १४२५
न वयं ब्रूम धर्म्मात्मन् व्येतु ते भयमीदृशं । उपतिष्ठतु कल्याणं भवन्तं भ्रातृभिः सह ।
॥ वैशम्पायन उवाच ॥ ततस्ते ब्राह्मणाः सर्व्वे हुङ्कारैः क्रोधमूर्च्छिताः । निर्भर्त्सयन्तः शुचयो निजघ्नुः पापराक्षसं ।
स पपात विनिर्द्दग्धस्तेजसा ब्रह्मवादिनां । माहेन्द्राशनिनिर्द्दग्धः पादपोऽङ्कुरवानिव ।
पूजिताश्च ययुर्व्विप्रा राजानमभिनन्द्य तं । राजा च हर्षमापेदे पाण्डवः ससुहृज्जनः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि चार्व्वाकबधे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥
॥ वैशम्पायन उवाच ॥ ततस्तत्र तु राजानं तिष्ठन्तं भ्रातृभिस्सह । उवाच देवकीपुत्त्रः सर्व्वदर्शी जनार्द्दनः । १४३०
॥ वासुदेव उवाच ॥ ब्राह्मणास्तात लोकेऽस्मिन्नर्चनीयाः सदा मम । एते भूमिचरा देवा वाग्विषाः सुप्रसादकाः ।
पुरा कृतयुगे राजंश्चार्व्वाको नाम राक्षसः । तपस्तेपे महाबाहो वदर्य्यां बहुवार्षिकं ।
छन्द्यमानस्य ब्रह्मणा च पुनः पुनः । अभयं सर्व्वभूतेभ्यो वरयामास भारत ।
द्विजावमानादन्यत्र प्रादाद्वरमनुत्तमं । अभयं सर्व्वभूतेभ्यो ददौ तस्मै जगत्पतिः ।
स तु लब्धवरः पापो देवानमितविक्रमः । राक्षसस्तापयामास तीव्रकर्म्मा महाबलः । १४३५
ततो देवाः समेताश्च ब्रह्माणमिदमब्रुवन् । बधाय रक्षसस्तस्य बलविप्रकृतास्तदा ।
तानुवाचाव्ययो देवो विहितस्तत्र वै मया । यथाऽस्य भविता मृत्युरचिरेणेति भारत ।
राजा दुर्य्योधनो नाम सखाऽस्य भविता नृषु । तस्य स्नेहावबद्धोऽसौ ब्राह्मणानवमंस्यते ।
तत्रैनं रुषिता विप्रा विप्रकारप्रधर्षिताः । धक्ष्यन्ति वाग्बलाः पापं ततो नाशं गमिष्यति ।
स एष निहतः शेते ब्रह्मदण्डेन राक्षसः । चार्व्वाको नृपतिश्रेष्ठ मा शुचो भरतर्षभ । १४४०
हतास्ते क्षत्त्रधर्म्मेण ज्ञातयस्तव पार्थिव । स्वर्गताश्च महात्मानो वीराः क्षत्त्रियपुङ्गवाः ।
स त्वमातिष्ठ कार्य्याणि मा तेऽभूत् ग्लानिरच्युत । शत्रून् जहि प्रजा रक्ष द्विजांश्च परिपूजय ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि चार्व्वाकबधोपायकथने ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ वैशम्पायन उवाच ॥ ततः कुन्तीसुतो राजा गतमन्युर्गतज्वरः । काञ्चने प्राङ्मुखो हृष्टो न्यषीदत्परमासने ।
तमेवाभिमुखौ पीठे प्रदीप्ते काञ्चने शुभे । सात्यकिर्व्वासुदेवश्च निषीदतुररिन्दमौ ।
मध्ये कृत्वा तु राजानं भीमसेनार्ज्जुनावुभौ । निषीदतुर्म्महात्मानौ श्लक्ष्णयोर्म्मणिपीठयोः । १४४५
दान्ते सिंहासने शुभ्रे जाम्बूनदविभूषिते । पृथाऽपि सहदेवेन सहास्ते नकुलेन च ।
सुधर्म्मा विदुरो धौम्यो धृतराष्ट्रश्च कौरवः । निविविशुर्ज्ज्वलनाकारेष्वासनेषु पृथक् पृथक् ।
युयुत्सुः सञ्जयश्चैव गान्धारी च यशस्विनी । धृतराष्ट्रो यतो राजा ततः सर्व्वे समाविशन् ।
तत्रोपविष्टो धर्म्मात्मा श्वेताः सुमनसोऽस्पृशत् । स्वस्तिकानक्षतान् भूमिं सुवर्णं रजतं मणिं ।
ततः प्रकृतयः सर्व्वाः पुरस्कृत्य पुरोहितं । ददृशुर्धर्म्मराजानमादाय बहुमङ्गलं । १४५०
पृथिवीञ्च सुवर्णञ्च रत्नानि विविधानि च । आभिषेचनिकं भाण्डं सर्व्वसम्भारसम्भृतं ।
काञ्चनौदुम्बरास्तत्र राजताः पृथिवीमयाः । पूर्णाः कुम्भाः सुमनसो लाजा वर्हींषि गोरसं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शमीपिप्पलपालाशसमिधो मधुसर्पिषी । स्रुव औदुम्बरः शङ्खस्तथा हेमविभूषितः ।
दाशार्हेणाभ्यनुज्ञातस्तत्र धौम्यः पुरोहितः । प्रागुदक्प्रवने वेदीं लक्षणेनोपलिख्य च ।
व्याघ्रचर्म्मोत्तरे शुक्ले सर्व्वतोभद्र आसने । दृढपादप्रतिष्ठाने हुताशनसमत्विषि । १४५५
उपवेश्य महात्मानं कृष्णाञ्च द्रुपदात्मजां । जुहाव पावकं धीमान् विधिमन्त्रपुरस्कृतं ।
ततउत्थाय दाशार्हः शङ्खमादाय पूजितं । अभ्यषिञ्चत्पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरं ।
धृतराष्ट्रश्च राजर्षिः सर्व्वाः प्रकृतयस्तथा । अनुज्ञातोऽथ कृष्णेन भ्रातृभिः सह पाण्डवः ।
पाञ्चजन्याभिषिक्तश्च राजाऽमृतमुखोऽभवत् । ततोऽनु वादयामासुः पणवानकदुन्दुभीन् ।
धर्म्मराजोऽपि तत्सर्व्वं प्रतिजग्राह धर्म्मतः । पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः । १४६०
ततो निष्कसहस्रेण ब्राह्मणान् स्वस्ति वाचयन् । वेदाध्ययनसम्पन्नान् धृतिशीलसमन्वितान् ।
ते प्रीता ब्राह्मणा राजन् स्वस्त्यूचुर्जयमेव च । हंसा इव च नर्द्दन्तः प्रशशंसुर्युधिष्ठिरं ।
युधिष्ठिर महाबाहो दिष्ट्या जयसि पाण्डव । दिष्ट्या स्वधर्म्मं प्राप्तोऽसि विक्रमेण महाद्युते ।
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः । त्वञ्चापि कुशली राजन् माद्रीपुत्रौ च पाण्डवौ ।
मुक्ता वीरवधात्तस्मात्सङ्ग्रामादिजितद्विषः । क्षिप्रमुत्तरकार्य्याणि कुरु सर्व्वाणि भारत । १४६५
ततः प्रत्यर्च्चितः सद्भिर्धर्म्मराजो युधिष्ठिरः । प्रतिपेदे महद्राज्यं सुहृद्भिः सह भारत ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिराभिषेके चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ वैशम्पायन उवाच ॥ प्रकृतीनाञ्च तद्वाक्यं देशकालोपसंहितं । श्रुत्वा युधिष्ठिरो राजा सोऽन्तरं प्रत्यभाषत ।
धन्याः पाण्डुसुता नूनं तेषां ब्राह्मणपुङ्गवाः । तथ्यान्वाप्यथ वातथ्यान् गुणानाहुः समागताः ।
अनुग्राह्या वयं नूनं भवतामिति मे मतिः । यदेवं गुणसम्पन्नानस्मान् ब्रूथ विमत्सराः ।
धृतराष्ट्रो महाराजः पिता मे दैवतं परं । शासनेऽस्य प्रिये चैव स्थेयं मत्प्रियकाङ्क्षिभिः । १४७०
एतदर्थं हि जीवामि कृत्वा ज्ञातिबधं महत् । अस्य शुश्रूषणं कार्य्यं मया नित्यमतन्द्रिणा ।
यदि चाहमनुग्राह्यो भवतां सुहृदां तथा । धृतराष्ट्रे यथा पूर्व्वं वृत्तिं वर्त्तितुमर्हथ ।
एष नाथो हि जगतो भवताञ्च मया सह । अस्यैव पृथिवी कृत्स्ना पाण्डवाः सर्व्व एव च ।
एतन्मनसि कर्त्तव्यं भवद्भिर्व्वचनं मम । अनुज्ञाप्याथ तान् राजा यथेष्टं गम्यतामिति ।
पौरजानपदान् सर्व्वान् विसृज्य कुरुनन्दनः । यौवराज्येन कौन्तेयं भीमसेनमयोजयत् । १४७५
मन्त्रे च निश्चये चैव षाड्गुण्यस्य च चिन्तने । विदुरं बुद्धिसम्पन्नं प्रीतिमान् समादिशत् ।
कृताकृतपरिज्ञाने तथायव्ययचिन्तने । सञ्जयं योजयामास वृद्धं सर्व्वगुणैर्युतं ।
बलस्य परिमाणे च भक्तवेतनयोस्तथा । नकुलं व्यादिशद्राजा कर्म्मणाञ्चान्ववेक्षणे ।
परचक्रोपरोधे च दुष्टानाञ्चावमर्द्दने । युधिष्ठिरो महाराजः फाल्गुनं व्यादिदेश ह ।
द्विजानां देवकार्य्येषु कार्य्येष्वन्येषु चैव ह । धौम्यं पुरोधसां श्रेष्ठं नित्यमेव समादिशत् । १४८०
सहदेवं समीपस्थं नित्यमेव समादिशत् । तेन गोप्यो हि नृपतिः सर्व्वावस्थो विशाम्पते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यान्यानमन्यद्योग्यांश्च येषु येष्विह कर्म्मसु । तांस्तांस्तेष्वेव युयुजे प्रीयमाणो महीपतिः ।
विदुरं सञ्जयञ्चैव युयुत्सुञ्च महामतिं । अब्रवीत् परवीरघ्नो धर्म्मात्मा धर्म्मवत्सलः ।
उत्थायोत्थाय तत्कार्य्यमस्य राज्ञः पितुर्म्मम । सर्व्वं भवद्भिः कर्त्तव्यमप्रमत्तैर्यथायथं ।
पौरजानपदानाञ्च यानि कार्य्याणि सर्व्वशः । राजानं समनुज्ञाप्य तानि कार्य्याणि भागशः । १४८५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि भीमादिकर्म्मनियोगे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ वैशम्पायन उवाच ॥ ततो युधिष्ठिरो राजा ज्ञातीनां ये हता युधि । श्राद्धानि कारयामास तेषां पृथगुदारधीः ।
धृतराष्ट्रो ददौ राजा पुत्त्राणामौर्द्ध्वदेहिकं । सर्व्वकामगुणोपेतमन्नं गाश्च धनानि च ।
रत्नानि च विचित्राणि महार्हाणि महायशाः । युधिष्ठिरस्तु द्रोणस्य कर्णस्य च महात्मनः ।
धृष्टद्युम्नाभिमन्युभ्यां हैडिम्बस्य च रक्षसः । विराटप्रभृतीनाञ्च सुहृदामुपकारिणां ।
द्रुपदद्रौपदेयानां द्रौपद्या सहितो ददौ । ब्राह्मणानां सहस्राणि पृथगेकैकमुद्दिशन् । १४९०
धनैरत्नैश्च गोभिश्च वस्त्रैश्च समतर्पयत् । ये चान्ये पृथिवीपाला येषां नास्ति सुहृज्जनः ।
उद्दिश्योद्दिश्य तेषाञ्च चक्रे राजौर्द्ध्वदेहिकं । सभाः प्रपाश्च विविधास्तडागानि च पाण्डवः ।
सुहृदां कारयामास सर्व्वेषामौर्द्ध्वदेहिकं । स तेषामनृणो भूत्वा गत्वा लोकेष्ववाच्यतां ।
कृतकृत्योऽभवद्राजा प्रजा धर्म्मेण पालयन् । धृतराष्ट्रं यथापूर्व्वं गान्धारीं विदुरं तथा ।
सर्व्वांश्च कौरवान्मान्यान् भृत्यांश्च समपूजयत् । याश्च तत्र स्त्रियः काश्चिद्धतवीरा हतात्मजाः । १४९५
सर्व्वास्ताः कौरवो राजा सम्पूज्यापालयद्घृणी । नीचान्धकृपणानाञ्च गृहाच्छादनभोजनैः ।
आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः । स विजित्य महीं कृत्स्नामानृण्यं प्राप्य वैरिषु ।
निःसपत्नः सुखी राजा विजहार युधिष्ठिरः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि श्राद्धक्रियोपाख्याने द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

॥ वैशम्पायन उवाच ॥ अभिषिक्तो महाप्राज्ञो राज्यं प्राप्य युधिष्ठिरः । दाशार्हं पुण्डरीकाक्षमुवाच प्राञ्जलिः शुचिः ।
तव कृष्ण प्रसादेन नयेन च बलेन च । बुद्ध्या च यदुशार्दूल तथा विक्रमणेन च । १५००
पुनः प्राप्तमिदं राज्यं पितृपैतामहं मया । नमस्ते पुण्डरीकाक्ष पुनः पुनररिन्दम ।
त्वामेकमाहुः पुरुषं त्वामाहुः सात्वतां गतिं । नामभिस्त्वां बहुविधैः स्तुवन्ति प्रयता द्विजाः ।
विश्वकर्म्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसम्भव । विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम ।
अदित्याः सप्तधा त्वन्तु पुराणे गर्भतां गतः । पृश्निगर्भस्त्वमेवैकस्त्रियुगं त्वां वदन्त्यपि ।
शुचिश्रवा हृषीकेशो घृतार्चिर्हंस उच्यसे । त्रिचक्षुः शम्भुरेकस्त्वं विभुर्दामोदरोऽपि च । १५०५
वराहोऽग्निर्बृहद्भानुर्वृषभस्तार्क्ष्यलक्षणः । अनीकसाहः पुरुषः शिपिविष्ट उरुक्रमः ।
वरिष्ठ उग्रसेनानीः सत्यो वाजसनिर्गुहः । अच्युतश्च्यावनोऽरीणां संस्कृतिर्विकृतिर्वृषः ।
ऊर्द्ध्ववर्त्मा त्वमेवाद्रिर्वृषदर्भो वृषाकपिः । सिन्धुर्विधर्म्मस्त्रिककुत् त्रिधामा त्रिदिवाच्युतः ।
सम्राट विराट् स्वराट् चैव सुरराजो भवोद्भवः । विभुर्भूरभिभूः कृष्णः कृष्णवर्त्मा त्वमेव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्रिककुत्त्रिषजावर्त्तः कपिलस्त्वञ्च वामनः। यज्ञो ध्रुवः पतङ्गश्च यज्ञसेनस्त्वमुच्यसे। १५१०

शिखण्डी नहुषो बभ्रुर्दिवस्पृक् त्वं पुनर्व्वसुः। सुवभ्रुरुक्थयज्ञश्च सुषेणो दुन्दुभिस्तथा।

गभस्तिनेमिः श्रीपद्मः पुष्करः पुष्पधारणः। क्रतुर्व्विभुः सर्व्वसूक्ष्मश्चारित्रञ्चैव पठ्यसे।

अम्भोनिधिस्त्वं ब्रह्मा त्वं पवित्रं धाम धामवित्। हिरण्यगर्भं त्वामाहुः स्वधा स्वाहा च केशवः।

योनिस्त्वमस्य प्रलयश्च कृष्ण त्वमेवेदं सृजसि विश्वमग्रे। विश्वञ्चेदं त्वद्वशे विश्वयोने नमोऽस्तु ते शार्ङ्गचक्रासिपाणे।

एवं स्तुतो धर्म्मराजेन कृष्णः सभामध्ये प्रीतिमान्पुष्कराक्षः। तमभ्यनन्दद्भारतं पुष्कलाभिर्व्वाग्भिर्ज्येष्ठं पाण्डवं यादवाग्र्यः। १५१५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वासुदेवस्तुतौ त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

॥ वैशम्पायन उवाच ॥ ततो विसर्ज्जयामास सर्व्वाः प्रकृतयो नृपः। विविशुश्चाभ्यनुज्ञाता यथा स्वानि गृहाणि ते।

ततो युधिष्ठिरो राजा भीमं भीमपराक्रमं। सान्त्वयन्नब्रवीच्छ्रीमानर्ज्जुनं यमजौ तथा।

शत्रुभिर्व्विविधैः शस्त्रैः क्षतदेहा महारणे। श्रान्ता भवन्तः सुभृशं तापिताः शोकमन्युभिः।

अरण्ये दुःखवसतीर्म्मत्कृते भरतर्षभाः। भवद्भिरनुभूता हि यथा कुपुरुषैस्तथा।

यथासुखं यथाजोषं जयोऽयमनुभूयतां। विश्रान्ताल्लब्धविज्ञानान् श्वः समेतास्मि वः पुनः। १५२०

ततो दुर्य्योधनगृहं प्रासादैरुपशोभितं। बहुरत्नसमाकीर्णं दासीदाससमाकुलं।

धृतराष्ट्राभ्यनुज्ञातं भ्रात्रा दत्तं वृकोदरः। प्रतिपेदे महाबाहुर्म्मन्दिरं मघवानिव।

यथा दुर्य्योधनगृहं तथा दुःशासनस्य तु। प्रासादमालासंयुक्तं हेमतोरणभूषितं।

दासीदाससुसम्पूर्णं प्रभूतधनधान्यवत्। प्रतिपेदे महाबाहुरर्ज्जुनो राजशासनात्।

दुर्म्मर्षणस्य भवनं दुःशासनगृहाद्वरं। कुवेरभवनप्रख्यं मणिहेमविभूषितं। १५२५

नकुलाय वरार्हाय कर्षिताय महावने। ददौ प्रीतो महाराज धर्म्मपुत्त्रो युधिष्ठिरः।

दुर्मुखस्य च वेश्माग्र्यं श्रीमत्कनकभूषणं। पूर्णं पद्मदलाक्षीणां स्त्रीणां शयनसङ्कुलं।

प्रददौ सहदेवाय सततं प्रियकारिणे। मुमुदे तच्च लब्ध्वा स कैलासं धनदो यथा।

युयुत्सुर्व्विदुरश्चैव सञ्जयश्च विशाम्पते। सुधर्म्मा चैव धौम्यश्च यथास्वं जग्मुरालयान्।

सह सात्यकिना शौरिरर्ज्जुनस्य निवेशनं। विवेश पुरुषव्याघ्रो व्याघ्रो गिरिगुहामिव। १५३०

तत्र भक्षान्नपानैस्ते मुदिताः सुसुखोषिताः। सुखप्रबुद्धा राजानमुपतस्थुर्य्युधिष्ठिरं।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि गृहविभागे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ जनमेजय उवाच ॥ प्राप्य राज्यं महाबाहुर्धर्म्मपुत्त्रो युधिष्ठिरः। यदन्यदकरोद्विप्र तन्मे वक्तुमिहार्हसि।

भगवान्वा हृषीकेशस्त्रैलोक्यस्य परो गुरुः। ऋषे यदकरोद्वीरस्तच्च व्याख्यातुमर्हसि।

॥ वैशम्पायन उवाच ॥ शृणु तत्त्वेन राजेन्द्र कीर्त्त्यमानं मयानघ। वासुदेवं पुरस्कृत्य यदकुर्व्वत पाण्डवाः।

प्राप्य राज्यं महाराज कुन्तीपुत्त्रो युधिष्ठिरः। चातुर्व्वर्ण्यं यथायोग्यं स्वे स्वे स्थाने न्यवेशयत्। १५३५

ब्राह्मणानां सहस्रञ्च स्नातकानां महात्मनां। सहस्रं निष्कमेकैकं दापयामास पाण्डवः।

तथानुजीविनो भृत्यान् संश्रितानतिथीनपि। कामैः सन्तर्पयामास कृपणांस्तर्क्ककानपि

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पुरोहिताय धौम्याय प्रादादयुतशः स गाः । धनं सुवर्णं रजतं वासांसि विविधान्यपि ।
कृपाय च महाराज गुरुवृत्तिमवर्त्तत । विदुराय च राजासौ पूजाञ्चक्रे यतव्रतः ।
भक्ष्यान्नपानैर्व्विविधैर्व्वासोभिः शयनासनैः । सर्व्वान् सन्तोषयामास संश्रितान् ददताम्वरः । १५४०
लब्धप्रशमनं कृत्वा स राजा राजसत्तम । युयुत्सोर्धार्त्तराष्ट्रस्य पूजाञ्चक्रे महायशाः ।
धृतराष्ट्राय तद्राज्यं गान्धार्य्यै विदुराय च । निवेद्य सुस्थवद्राजा सुखमास्ते युधिष्ठिरः ।
तथा सर्व्वं सनगरं प्रसाद्य भरतर्षभ । वासुदेवं महात्मानमभ्यगच्छत्कृताञ्जलिः ।
ततो महति पर्य्यङ्के मणिकाञ्चनभूषिते । ददर्श कृष्णमासीनं नीलमेघसमद्युतिं ।
जाज्वल्यमानं वपुषा दिव्याभरणभूषितं । पीतकौशेयवसनं हेम्नैवोपगतं मणिं । १५४५
कौस्तुभेनोरसिस्थेन मणिनाभिविराजितं । उद्यतेवोदयं शैलं सूर्य्येणाभिविराजितं ।
नौपम्यं विद्यते तस्य त्रिषु लोकेषु किञ्चन । सोऽभिगम्य महात्मानं विष्णुं पुरुषविग्रहं ।
उवाच मधुरं राजा स्मितपूर्व्वमिदं तदा । सुखेन ते निशा कच्चिद्व्युष्टा बुद्धिमताम्वर ।
कच्चित् ज्ञानानि सर्व्वाणि प्रसन्नानि तवाच्युत । तथैवोपश्रिता देवी बुद्धिर्बुद्धिमताम्वर ।
वयं राज्यमनुप्राप्ताः पृथिवी च वशे स्थिता । तव प्रसादाद्भगवंस्त्रिलोकगतिविक्रम । १५५०
जयं प्राप्ता यशश्चाग्र्यं न च धर्म्माच्च्युता वयं । तं तथा भाषमाणन्तु धर्म्मराजमरिन्दमं ।
नोवाच भगवान् किञ्चिद्ध्यानमेवान्वपद्यत ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरप्रश्ने पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ युधिष्ठिर उवाच ॥ किमिदं परमाश्चर्य्यं ध्यायस्यमितविक्रम । कच्चिल्लोकत्रयस्यास्य स्वस्ति लोकपरायण ।
चतुर्थं ध्यानमार्गं त्वमालम्ब्य पुरुषर्षभ । अपक्रान्तो यतो देवस्तेन मे विस्मितं मनः ।
निगृहीतो हि वायुस्ते पञ्चकर्म्मा शरीरगः । इन्द्रियाणि प्रसन्नानि मनसि स्थापितानि ते । १५५५
वाक् च सत्त्वञ्च गोविन्द बुद्धौ संवेशितानि ते । सर्व्वे चैव गुणादेव क्षेत्रे क्षेत्रे निवेशिताः ।
नेङ्गन्ति तव रोमाणि स्थिरा बुद्धिस्तथा मनः । काष्ठकुड्यशिलाभूतो निरीहश्चासि माधव ।
यथा दीपो निवातस्थो निरिङ्गो ज्वलते पुनः । तथासि भगवन्देव पाषाणइव निश्चलः ।
यदि श्रोतुमिहार्हामि न रहस्यञ्च ते यदि । छिन्धि मे संशयं देव प्रपन्नायाभियाचते ।
त्वं हि कर्त्ता विकर्त्ता च क्षरश्चैवाक्षरश्च हि । अनादिनिधनश्चाद्यस्त्वमेव पुरुषोत्तम । १५६०
त्वत्प्रपन्नाय भक्ताय शिरसा प्रणताय च । ध्यानस्यास्य यथातत्त्वं ब्रूहि धर्म्मभृताम्वर ।
ततः स्वे गोचरे न्यस्य मनोबुद्धीन्द्रियाणि सः । स्मितपूर्व्वमुवाचेदं भगवान्वासवानुजः ।
॥ वासुदेव उवाच ॥ शरतल्पगतो भीष्मः शाम्यन्निव हुताशनः । मां ध्याति पुरुषव्याघ्रस्ततो मे तद्गतं मनः ।
यस्य ज्यातलनिर्घोषं विस्फूर्ज्जितमिवाशनेः । न सेहे देवराजोऽपि तमस्मि मनसा गतः ।
येनाभिजित्य तरसा समस्तं राजमण्डलं । ऊढास्तिस्रस्तु ताः कन्यास्तमस्मि मनसा गतः । १५६५
त्रयोविंशतिरात्रं यो योधयामास भार्गवं । न च रामेण निस्तीर्णस्तमस्मि मनसा गतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एकीकृत्येन्द्रियग्रामं मनः संयम्य मेधया । शरणं मामुपागच्छत्ततो मे तद्गतं मनः ।
यं गङ्गा गर्भविधिना धारयामास पार्थिव । वशिष्ठशिष्यं तं तात तमस्मि मनसा गतः ।
दिव्यास्त्राणि महातेजा यो धारयति बुद्धिमान् । साङ्गांश्च चतुरो वेदांस्तमस्मि मनसा गतः ।
रामस्य दयितं शिष्यं जामदग्न्यस्य पाण्डव । आधारं सर्व्वविद्यानां तमस्मि मनसा गतः । १५७०
स हि भूतं भविष्यच्च भवच्च भरतर्षभ । वेत्ति धर्म्मविदां श्रेष्ठं तमस्मि मनसा गतः ।
तस्मिन्हि पुरुषव्याघ्रे कर्म्मभिः स्वैर्दिवं गते । भविष्यति मही पार्थ नष्टचन्द्रेव शर्व्वरी ।
तद्युधिष्ठिर गाङ्गेयं भीष्मं भीमपराक्रमं । अभिगम्योपसङ्गृह्य पृच्छ यत्ते मनोगतं ।
चातुर्व्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च । राजधर्म्मांश्च निखिलान् पृच्छैनं पृथिवीपते ।
तस्मिन्नस्तमिते भीष्मे कौरवाणां धुरन्धरे । ज्ञानान्यस्तं गमिष्यन्ति तस्मात्त्वा चोदयाम्यहं । १५७५
तच्छ्रुत्वा वासुदेवस्य तथ्यं वचनमुत्तमं । साश्रुकण्ठः स धर्म्मज्ञो जनार्द्दनमुवाच ह ।
यद्भवानाह भीष्मस्य प्रभावं प्रति माधव । तथा तन्नात्र सन्देहो विद्यते मम माधव ।
महाभागयश्च भीष्मस्य प्रभावश्च महाद्युते । श्रुतं मया कथयतां ब्राह्मणानां महात्मनां ।
भवांश्च कर्त्ता लोकानां यद्ब्रवीत्यरिसूदन । तथा तदनभिध्येयं वाक्यं यादवनन्दन ।
यदि त्वनुग्रहवती बुद्धिस्ते मयि माधव । त्वामग्रतः पुरस्कृत्य भीष्मं यास्यामहे वयं । १५८०
आवृत्ते भगवत्यर्के स हि लोकान् गमिष्यति । त्वद्दर्शनं महाबाहो तस्मादर्हति कौरवः ।
तव चाद्यस्य देवस्य क्षरस्यैवाक्षरस्य च । दर्शनं तस्य लाभः स्यात्त्वं हि ब्रह्ममयो निधिः ।
॥ वैशम्पायन उवाच ॥ श्रुत्वैवं धर्म्मराजस्य वचनं मधुसूदनः । पार्श्वस्थं सात्यकिं प्राह रथो मे युज्यतामिति ।
सात्यकिस्त्वाशु निष्क्रम्य केशवस्य समीपतः । दारुकं प्राह कृष्णस्य युज्यतां रथइत्युत ।
स सात्यकेराशु वचो निशम्य रथोत्तमं काञ्चनभूषिताङ्गं । मसारगल्वर्क्कमयैर्व्विकण्टकैर्व्विभूषितं हेमनिबद्धचक्रं । १५८५
दिवाकरांशुप्रभमाशुगामिनं विचित्रनानामणिभूषितान्तरं । नवोदितं सूर्य्यमिव प्रतापिनं विचित्रतार्क्ष्यध्वजिनं पताकिनं ।
सुग्रीवशैब्यप्रमुखैर्व्वराश्वैर्म्मनोजवैः काञ्चनभूषिताङ्गैः । संयुक्तमावेदयदच्युताय कृताञ्जलिर्दारुको राजसिंह ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि महापुरुषस्तवोपाख्याने षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ जनमेजय उवाच ॥ शरतल्पे शयानस्तु भरतानां पितामहः । कथमुत्सृष्टवान् देहं कञ्च योगमधारयत् ।
॥ वैशम्पायन उवाच ॥ शृणुष्वावहितो राजन् शुचिर्भूत्वा समाहितः । भीष्मस्य कुरुशार्दूल देहोत्सर्गं महात्मनः ।
निवृत्तमात्रेत्वयने उत्तरे वै दिवाकरे । समावेशयदात्मानमात्मन्येव समाहितः । १५९०
विकीर्णांशुरिवादित्यो भीष्मः शरशतैश्चितः । शुशुभे परया लक्ष्म्या वृतो ब्राह्मणसत्तमैः ।
व्यासेन वेदविदुषा नारदेन सुरर्षिणा । देवस्थानेन वात्स्येन तथाश्मकसुमन्तुना ।
तथा जैमिनिना चैव पैलेन च महात्मना । शाण्डिल्यदेवराताभ्यां मैत्रेयेण च धीमता ।
असितेन वशिष्ठेन कौशिकेन महात्मना । हारीतलोमशाभ्याञ्च तथात्रेयेण धीमता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बृहस्पतिश्च शुक्रश्च च्यवनश्च महामुनिः । सनत्कुमारः कपिलो वाल्मीकिस्तुम्बुरुः कुरुः । १५९५
मौद्गल्यो भार्गवो रामस्तृणविन्दुर्महामुनिः । पिप्पलादोऽथ वायुश्च सम्वर्त्तः पुलहः कचः ।
काश्यपश्च पुलस्त्यश्च क्रतुर्दक्षः पराशरः । मरीचिरङ्गिराः काश्यो गौतमो गालवो मुनिः ।
धौम्यो विभाण्डो माण्डव्यो धौम्रः कृष्णानुभौतिकः । उलूकः परमो विप्रो मार्कण्डेयो महामुनिः ।
भास्करिः पूरणः कृष्णः सूतः परमधार्म्मिकः । एतैश्चान्यैर्मुनिगणैर्म्महाभागैर्म्महात्मभिः ।
श्रद्धादमशमोपेतैर्वृतश्चन्द्र इव ग्रहैः । भीष्मः स पुरुषव्याघ्रः कर्म्मणा मनसा गिरा । १६००
शरतल्पगतः कृष्णं प्रदध्यौ प्राञ्जलिः शुचिः । स्वरेण हृष्टपुष्टेन तुष्टाव मधुसूदनं ।
योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जगत्पतिं । कृताञ्जलिपुटो भूत्वा वाग्विदां प्रवरः प्रभुः ।
भीष्मः परमधर्म्मात्मा वासुदेवमथास्तुवत् ।
॥ भीष्म उवाच ॥ आरिराधयिषुः कृष्णं वाचं जिगदिषामि यां । तया व्याससमासिन्या प्रीयतां पुरुषोत्तम ।
शुचिं शुचिपदं हंसं तत्पदं परमेष्ठिनं । युक्त्वा सर्व्वात्मनात्मानं तं प्रपद्ये प्रजापतिं । १६०५
अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः । एकोऽयं वेद भगवान् धाता नारायणो हरिः ।
नारायणादृषिगणास्तथा सिद्धमहोरगाः । देवा देवर्षयश्चैव यं विदुः परमव्ययं ।
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः । यं न जानन्ति को ह्येष कुतो वा भगवानिति ।
यस्मिन्विश्वानि भूतानि तिष्ठन्ति च विशन्ति च । गुणभूतानि भूतेशे सूत्रे मणिगणाइव ।
यस्मिन्नित्ये तते तन्तौ दृढे स्रगिव तिष्ठति । सदसद्ग्रथितं विश्वं विश्वाङ्गे विश्वकर्म्मणि । १६१०
हरिं सहस्रशिरसं सहस्रचरणेक्षणं । सहस्रबाहुमुकुटं सहस्रवदनोज्ज्वलं ।
प्राहुर्नारायणं देवं यं विश्वस्य परायणं । अणीयसामणीयांसं स्थविष्ठञ्च स्थवीयसां ।
गरीयसाङ्गरिष्ठञ्च श्रेष्ठञ्च श्रेयसामपि । यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु । चतुर्भिश्चतुरात्मानं सत्त्वस्थं सात्वतां पतिं ।
यं दिव्यैर्देवमर्चन्ति गुह्यैः परमनामभिः । यस्मिन्नित्यं तपस्तप्तं यदङ्गेष्वनुतिष्ठति । १६१५
सर्व्वात्मा सर्व्ववित् सर्व्वः सर्व्वज्ञः सर्व्वभावनः । यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः । यमनन्यो व्यपेताशीरात्मानं वीतकल्मषं ।
दृष्ट्वानन्त्याय गोविन्दं पश्यत्यात्मानमात्मनि । अतिवाय्विन्द्रकर्म्माणमतिसूर्य्यातितेजसं ।
अतिबुद्धीन्द्रियात्मानं तं प्रपद्ये प्रजापतिं । पुराणे पुरुषं प्रोक्तं ब्रह्म प्रोक्तं युगादिषु ।
क्षये सङ्कर्षणं प्रोक्तं तमुपास्यमुपास्महे । यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजं । १६२०
नान्यभक्ताः क्रियावन्तो यजन्ते सर्व्वकामदं । यमाहुर्जगतः कोषं यस्मिन्सन्निहिताः प्रजाः ।
यस्मिन् लोकाः स्फुरन्तीमे जले शकुनयो यथा । ऋतमेकाक्षरं ब्रह्म यत्तत्सदसतोः परं ।
अनादिमध्यपर्य्यन्तं न देवा नर्षयो विदुः । यं सुरासुरगन्धर्व्वाः सिद्धा ऋषिमहोरगाः ।
प्रयता नित्यमर्चन्ति परमं दुःखभेषजं । अनादिनिधनं देवमात्मयोनिं सनातनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्रेत्यमनभिज्ञेयं हरिं नारायणं प्रभुं। यं वै विश्वस्य कर्त्तारं जगतस्तस्थुषां पतिं। १६२५
वदन्ति जगतोध्यक्षमक्षरं परमम्पदं। हिरण्यवर्णं यं गर्भमदितिर्दैत्यनाशनं।
एकं द्वादशधा जज्ञे तस्मै सूर्य्यात्मने नमः। शुक्ले देवान्पितॄन्कृष्णे तर्पयत्यमृतेन यः।
यश्च राजा द्विजातीनां तस्मै सोमात्मने नमः। महतस्तमसः पारे पुरुषं ह्यतितेजसं।
यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः। यं बृहन्तं बृहत्युक्थे यमग्नौ यं महाध्वरे।
यं विप्रसङ्घा गायन्ति तस्मै वेदात्मने नमः। ऋग्यजुःसामधामानं दशार्द्धहविरात्मकं। १६३०
यं सप्ततन्तुं तन्वन्ति तस्मै यज्ञात्मने नमः। चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै होमात्मने नमः। यः सुपर्णो यजुर्नाम छन्दोगात्रस्त्रिवृच्छिराः।
रथन्तरं बृहत्साम तस्मै स्तोत्रात्मने नमः। यः सहस्रसमे सत्रे जज्ञे विश्वसृजामृषिः।
हिरण्यपक्षः शकुनिस्तस्मै हंसात्मने नमः। पादाङ्गं सन्धिपर्व्वाणं स्वरव्यञ्जनभूषणं।
यमाहुरक्षरं दिव्यं तस्मै वागात्मने नमः। यज्ञाङ्गो यो वराहो वै भूत्वा गामुज्जहार ह। १६३५
लोकत्रयहितार्थाय तस्मै वीर्य्यात्मने नमः। यः शेते योगमास्थाय पर्य्यङ्के नागभूषिते।
फणासहस्ररचिते तस्मै निद्रात्मने नमः। यस्तनोति सतां सेतुमृतेनामृतयोनिना।
धर्म्मार्थव्यवहाराङ्गैस्तस्मै सत्यात्मने नमः। यं पृथग्धर्म्मचरणाः पृथग्धर्म्मफलैषिणः।
पृथग्धर्म्मैः समर्चन्ति तस्मै धर्म्मात्मने नमः। यतः सर्व्वे प्रसूयन्ते ह्यनङ्गात्माङ्गदेहिनः।
उन्मादः सर्व्वभूतानां तस्मै कामात्मने नमः। यञ्च व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः। १६४०
क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः। यन्त्रिधात्मानमात्मस्थं वृतं षोडशभिर्गुणैः।
प्राहुः सप्तदशं साङ्ख्यास्तस्मै साङ्ख्यात्मने नमः। यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः। अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः।
शान्ताः सन्न्यासिनो यान्ति तस्मै मोक्षात्मने नमः। योऽसौ युगसहस्रान्ते प्रदीप्तार्च्चिर्व्विभावसुः।
सम्भक्षयति भूतानि तस्मै घोरात्मने नमः। सम्भक्ष्य सर्व्वभूतानि कृत्वा चैकार्णवं जगत्। १६४५
बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः। अजस्य नाभौ सम्भूतं यस्मिन्विश्वं प्रतिष्ठितं।
पुष्करे पुष्कराक्षस्य तस्मै पद्मात्मने नमः। सहस्रशिरसे चैव पुरुषायामितात्मने।
चतुःसमुद्रपर्य्याय योगनिद्रात्मने नमः। यस्य केशेषु जीमूता नद्यः सर्व्वाङ्गसन्धिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः। यस्मात्सर्व्वाः प्रसूयन्ते सर्गप्रलयविक्रियाः।
यस्मिंश्चैव प्रलीयन्ते तस्मै हेत्वात्मने नमः। यो निषण्णो भवेद्रात्रौ दिवा भवति विष्ठितः। १६५०
इष्टानिष्टस्य च द्रष्टा तस्मै द्रष्ट्रात्मने नमः। अकुण्ठं सर्व्वकार्य्येषु धर्म्मकार्य्यार्थमुद्यतं।
वैकुण्ठस्य च यद्रूपन्तस्मै कार्य्यात्मने नमः। त्रिः सप्तकृत्वो यः क्षत्रं धर्म्मव्युत्क्रान्तगौरवं।
क्रुद्धो निजघ्ने समरे तस्मै क्रौर्य्यात्मने नमः। विभज्य पञ्चधात्मानं वायुर्भूत्वा शरीरगः।
यश्चेष्टयति भूतानि तस्मै वाय्वात्मने नमः। युगेष्वावर्त्तते योगैर्मासर्त्वयनहायनैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्गप्रलययोः कर्त्ता तस्मै कालात्मने नमः । ब्रह्म वक्त्रं भुजौ चत्रं कृत्स्नमूरूदरं विशः । १६५५
पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने नमः । यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः ।
सूर्य्यश्चक्षुर्द्दिशः श्रोत्रं तस्मै लोकात्मने नमः । परः कालात्परो यज्ञात्परात्परतरश्च यः ।
अनादिरादिर्व्विश्वस्य तस्मै विश्वात्मने नमः । विषये वर्त्तमानानां यं ते वैशेषिकैर्गुणैः ।
प्राहुर्व्विषयगोप्तारं तस्मै गोप्त्रात्मने नमः । अन्नपानेन्धनमयो रसप्राणविवर्द्धनः ।
यो धारयति भूतानि तस्मै प्राणात्मने नमः । प्राणानां धारणार्थाय योऽन्नं भुङ्क्ते चतुर्विधं । १६६०
अन्तर्भूतः पचत्यग्निस्तस्मै पाकात्मने नमः । पिङ्गेक्षणसटं यस्य रूपं दंष्ट्रानखायुधं ।
दानवेन्द्रान्तकरणं तस्मै दृप्तात्मने नमः । यं न देवा न गन्धर्व्वा न दैत्या न च दानवाः ।
तत्त्वतो हि विजानन्ति तस्मै सूक्ष्मात्मने नमः । रसातलगतः श्रीमाननन्तो भगवान्विभुः ।
जगद्धारयते कृत्स्नं तस्मै वीर्य्यात्मने नमः । यो मोहयति भूतानि स्नेहपाशानुबन्धनैः ।
सर्गस्य रक्षणार्थाय तस्मै मोहात्मने नमः । आत्मज्ञानमिदं ज्ञानं ज्ञात्वा पञ्चस्ववस्थितं । १६६५
यं ज्ञानेनाभिगच्छन्ति तस्मै ज्ञानात्मने नमः । अप्रमेयशरीराय सर्व्वतो बुद्धिचक्षुषे ।
अनन्तपरिमेयाय तस्मै दिव्यात्मने नमः । जटिले दण्डिने नित्यं लम्बोदरशरीरिणे ।
कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः । शूलिने त्रिदशेशाय त्र्यम्बकाय महात्मने ।
भस्मदिग्धाङ्गलिङ्गाय तस्मै रुद्रात्मने नमः । चन्द्रार्द्धकृतशीर्षाय व्यालयज्ञोपवीतिने ।
पिनाकशूलहस्ताय तस्मै उग्रात्मने नमः । सर्व्वभूतात्मभूताय भूतादिनिधनाय च । १६७०
अक्रोधद्रोहमोहाय तस्मै शान्तात्मने नमः । यस्मिन्सर्व्वं यतः सर्व्वं यः सर्व्वं सर्व्वतश्च यः ।
यश्च सर्व्वमयो नित्यं तस्मै सर्व्वात्मने नमः । विश्वकर्म्मन्नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव ।
अपवर्गस्तु भूतानां पञ्चानां परतः स्थितः । नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ।
नमस्ते दिक्षु सर्व्वासु त्वं हि सर्व्वमयो निधिः । नमस्ते भगवन्विष्णो लोकानां प्रभवाव्यय ।
त्वं हि कर्त्ता हृषीकेश संहर्त्ता चापराजितः । न हि पश्यामि ते भावं दिव्यं हि त्रिषु वर्त्मसु । १६७५
त्वान्तु पश्यामि तत्त्वेन यत्ते रूपं सनातनं । दिवन्ते शिरसा व्याप्तं पद्भ्यां देवी वसुन्धरा ।
विक्रमेण त्रयो लोकाः पुरुषोऽसि सनातनः । दिशो भुजा रविश्चक्षुर्वीर्य्यं शुक्रः प्रजापतिः ।
सप्तमार्गा निरुद्धास्ते वायोरमिततेजसः । अतसीपुष्पसङ्काशं पीतवाससमच्युतं ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयं ।
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय । १६८०
कृष्णव्रताः कृष्णमनुस्मरन्तो रात्रौ च कृष्णं पुनरुत्थिता ये । ते कृष्णदेहाः प्रविशन्ति कृष्णमाज्यं यथा मन्त्रहुतं
हुताशे ।
नमो नरकसन्त्रासरक्षामण्डलकारिणे । संसारनिम्नगावर्त्ततरिकाष्ठाय विष्णवे ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राणकान्तारपाथेयं संसारोच्छेदभेषजं । दुःखशोकपरित्राणं हरिरित्यक्षरद्वयं ।
यथा विष्णुमयं सत्यं यथा विष्णुमयं जगत् । यथा विष्णुमयं सर्व्वं पाप्मा मे नश्यतां तथा । १९८५
त्वां प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे । यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ।
इति विद्यातपोयोनिरयोनिर्व्विष्णुरीडितः । वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्द्दनः ।
नारायणपरं ब्रह्म नारायणपरं तपः । नारायणपरो देवः सर्व्वं नारायणः सदा ।
॥ वैशम्पायन उवाच ॥ एतावदुक्त्वा वचनं भीष्मस्तद्गतमानसः । नम इत्येव कृष्णाय प्रणाममकरोत्तदा
अभिगम्य तु योगेन भक्तिं भीष्मस्य माधवः । त्रैकाल्यदर्शनं ज्ञानं दिव्यं दत्त्वा ययौ हरिः । १९९०
तस्मिन्नुपरते शब्दे ततस्ते ब्रह्मवादिनः । भीष्मं वाग्भिर्व्वाष्पकण्ठास्तमानर्चुर्महामतिं ।
ते स्तुवन्तश्च विप्राग्र्याः केशवं पुरुषोत्तमं । भीष्मञ्च शनकैः सर्व्वे प्रशशंसुः पुनः पुनः ।
विदित्वा भक्तियोगन्तु भीष्मस्य पुरुषोत्तमः । सहसोत्थाय संहृष्टो यानमेवान्वपद्यत ।
केशवः सात्यकिश्चापि रथेनैकेन जग्मतुः । अपरेण महात्मानौ युधिष्ठिरधनञ्जयौ ।
भीमसेनो यमौ चोभौ रथमेकं समास्थिताः । कृपो युयुत्सुः सूतश्च सञ्जयश्च परन्तपः । १९९५
ते रथैर्नगराकारैः प्रयाताः पुरुषर्षभाः । नेमिघोषेण महता कम्पयन्तो वसुन्धरां ।
ततो गिरः पुरुषवरस्तवान्विता द्विजेरिताः पथि सुमनाः स शुश्रुवे । कृताञ्जलिं प्रणतमथापरं जनं स केशिहा मुदितमनाभ्यनन्दत ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि स्तवराजोपाख्याने सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

॥ वैशम्पायन उवाच ॥ ततः स च हृषीकेशः स च राजा युधिष्ठिरः । कृपादयश्च ते सर्व्वे चत्वारः पाण्डवाश्च ते ।
रथैस्तैर्नगरप्रख्यैः पताकाध्वजशोभितैः । ययुराशु कुरुक्षेत्रं वाजिभिः शीघ्रगामिभिः ।
तेऽवतीर्य्य कुरुक्षेत्रं केशमज्जास्थिसङ्कुलं । देहन्यासः कृतो यत्र क्षत्रियैस्तैर्म्महात्मभिः । २०००
गजाश्वदेहास्थिचयैः पर्व्वतैरिव सञ्चितं । नरशीर्षकपालैश्च शङ्खैरिव च सर्व्वशः ।
चितासहस्रप्रचितं वर्म्मशस्त्रसमाकुलं । आपानभूमिं कालस्य तदा भुक्तोज्झितामिव ।
भूतसङ्घानुचरितं रक्षोगणनिषेवितं । पश्यन्तस्ते कुरुक्षेत्रं ययुराशु महारथाः ।
गच्छन्नेव महाबाहुः सर्व्वयादवनन्दनः । युधिष्ठिराय प्रोवाच जामदग्न्यस्य विक्रमं ।
अमी रामह्रदाः पञ्च दृश्यन्ते पार्थ दूरतः । येषु सन्तर्पयामास पितॄन् क्षत्रियशोणितैः । २००५
त्रिःसप्तकृत्वो वसुधां कृत्वा निःक्षत्त्रियां प्रभुः । इहेदानीं ततो रामः कर्म्मणो विरराम ह ।
॥ युधिष्ठिर उवाच ॥ त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्त्रिया पुरा । रामेणेति यथात्थ त्वमत्र मे संशयो महान् ।
क्षत्त्रबीजं यदा दग्धं रामेण यदुपुङ्गव । कथं भूयः समुत्पत्तिः क्षत्त्रस्यामितविक्रम ।
महात्मना भगवता रामेण यदुपुङ्गव । कथमुत्सादितं क्षत्त्रं कथं वृद्धिमुपागतं ।
महता रथयुद्धेन कोटिशः क्षत्त्रिया हताः । तथाभूच्च मही कीर्णा क्षत्त्रियैर्व्वदताम्वर । २०१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

किमर्थं भार्गवेणेदं क्षत्रमुत्सादितं पुरा । रामेण यदुशार्दूल कुरुक्षेत्रे महात्मना ।
एतन्मे छिन्धि वार्ष्णेय संशयं तार्क्ष्यकेतन । आगमो हि परः कृष्ण त्वत्तो नो वासवानुज ।
॥ वैशम्पायन उवाच ॥ ततो यथावत् स गदाग्रजः प्रभुः । शशंस तस्मै निखिलेन तत्त्वतः ।
युधिष्ठिरायाप्रतिमौजसे तदा यथाऽभवत् क्षत्रियसङ्कुला मही ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि रामोपाख्यानेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ वासुदेव उवाच ॥ शृणु कौन्तेय रामस्य प्रभावो यो मया श्रुतः । महर्षीणां कथयतां विक्रमं तस्य जन्म च ।
यथा च जामदग्न्येन कोटिशः क्षत्रिया हताः । उद्भूता राजवंशेषु ये भूयो भारते हताः ।
जह्नोरजस्तु तनयो बलाकाश्वस्तु तत्सुतः । कुशिको नाम धर्म्मज्ञस्तस्य पुत्त्रो महीपते ।
अग्र्यं तपः समातिष्ठत्सहस्राक्षसमो भुवि । पुत्त्रं लभेयमजितं त्रिलोकेश्वरमित्युत ।
तमुग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः । समर्थं पुत्त्रजनने स्वयमेवाभ्यपद्यत ।
पुत्त्रत्वमगमद्राजंस्तस्य लोकेश्वरेश्वरः । गाधिर्नामाभवत्पुत्त्रः कौशिकः पाकशासनः ।
तस्य कन्याभवद्राजन्नाम्ना सत्यवती प्रभो । तां गाधिर्भृगुपुत्त्राय सौचीकाय ददौ प्रभुः ।
तस्याः प्रीतः स शौचेन भार्गवः कुरुनन्दन । पुत्त्रार्थं श्रपयामास चरुं गाधेस्तथैव च ।
आहूयोवाच तां भार्य्यां सौचीको भार्गवस्तदा । उपयोज्यश्चरुरयं त्वया मात्राऽप्ययं तव ।
तस्या जनिष्यते पुत्त्रो दीप्तिमान् क्षत्त्रियर्षभः । अजय्यः क्षत्त्रियैर्लोके क्षत्त्रियर्षभसूदनः ।
तवापि पुत्त्रं कल्याणि धृतिमन्तं शमात्मकं । तपोन्वितं द्विजश्रेष्ठं चरुरेष विधास्यति ।
इत्येवमुक्त्वा तां भार्य्यां सौचीको भृगुनन्दनः । तपस्यभिरतः श्रीमान् जगामारण्यमेव हि ।
एतस्मिन्नेव काले तु तीर्थयात्रापरो नृपः । गाधिः सदारः सम्प्राप्तः सौचीकस्याश्रमं प्रति ।
चरुद्वयं गृहीत्वा च राजन् सत्यवती तदा । भर्त्तुर्व्वाक्यं तथा व्यग्रा मात्रे हृष्टा न्यवेदयत् ।
माता तु तस्याः कौन्तेय दुहित्रे स्वं चरुं ददौ । तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह ।
अथ सत्यवती गर्भं क्षत्त्रियान्तकरं तदा । धारयामास दीप्तेन वपुषा घोरदर्शनं ।
तामृचीकस्तदा दृष्ट्वा तस्या गर्भगतं द्विजं । अब्रवीद्भृगुशार्दूलः स्वां भार्य्यां देवरूपिणीं ।
मात्राऽसि व्यंसिता भद्रे चरुव्यत्यासहेतुना । भविष्यति हि ते पुत्त्रः क्रूरकर्म्मात्यमर्षणः ।
उत्पत्स्यति च ते भ्राता ब्रह्मभूतस्तपोरतः । विश्वं हि ब्रह्म सुमहच्चरौ तव समाहितं ।
क्षत्त्रवीर्य्यञ्च सकलं तव मात्रे समर्पितं । विपर्य्ययेण ते भद्रे नैतदेवं भविष्यति ।
मातुस्ते ब्राह्मणो भूयात्तव च क्षत्त्रियः सुतः । सैवमुक्ता महाभागा भर्त्रा सत्यवती तदा ।
पपात शिरसा तस्मै वेपन्ती चाब्रवीदिदं । नार्होऽसि भगवन्नद्य वक्तुमेवंविधं वचः ।
ब्राह्मणापसदं पुत्त्रं प्राप्स्यसीति हि मां प्रभो ।
॥ ऋचीक उवाच ॥ नैष सङ्कल्पितः कामो मया भद्रे तथा त्वयि । उग्रकर्म्मा समुत्पन्नश्चरुव्यत्यासहेतुना ।
॥ सत्यवत्युवाच ॥ इच्छंल्लोकानपि मुने सृजेयाः किं पुनः सुतं । शमात्मकमृजुं पुत्त्रं दातुमर्हसि मे प्रभो ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment.Heritage Foundation, Jalgaon

॥ ऋचीक उवाच ॥ नोक्तपूर्व्वानृतं भद्रे स्वैरेष्वपि कदाचन । किमुताग्निं समाधाय मन्त्रवच्चरुसाधने । १७४०
दृष्टमेतत्पुरा भद्रे ज्ञातञ्च तपसा मया । ब्रह्मभूतं हि सकलं पितुस्तव कुलं भवेत् ।
॥ सत्यवत्युवाच ॥ काममेवं भवेत्पौत्त्रो ममेह तव च प्रभो । शमात्मकमहं पुत्त्रं लभेयं जपताम्वर ।
॥ ऋचीक उवाच ॥ पुत्त्रे नास्ति विशेषो मे पौत्त्रे च वरवर्णिनि । यथा त्वयोक्तं वचनं तथा भद्रे भविष्यति ।
॥ वासुदेव उवाच ॥ ततः सत्यवती पुत्त्रं जनयामास भार्गवं । तपस्यभिरतं शान्तं जमदग्निं यतव्रतं ।
विश्वामित्रञ्च दायादं गाधिः कुशिकनन्दनः । यं प्राप ब्रह्मसमितं विश्वैर्ब्रह्मगुणैर्युतं । १७४५
ऋचीको जनयामास जमदग्निं तपोनिधिं । सोऽपि पुत्त्रं ह्यजनयज्जमदग्निः सुदारुणं ।
सर्व्वविद्यान्तगं श्रेष्ठं धनुर्व्वेदस्य पारगं । रामं क्षत्त्रियहन्तारं प्रदीप्तमिव पावकं ।
तोषयित्वा महादेवं पर्व्वते गन्धमादने । अस्त्राणि वरयामास परशुञ्चातितेजसं ।
स तेनाकुण्ठधारेण ज्वलितानलवर्च्चसा । कुठारेणाप्रमेयेण लोकेष्वप्रतिमोऽभवत् ।
एतस्मिन्नेव काले तु कृतवीर्य्यात्मजो वली । अर्ज्जुनो नाम तेजस्वी क्षत्त्रियो हैहयाधिपः । १७५०
दत्तात्रेयप्रसादेन राजा बाहुसहस्रवान् । चक्रवर्त्ती महातेजा विप्राणामाश्वमेधिके ।
ददौ स पृथिवीं सर्व्वां सप्तद्वीपां सपर्व्वतां । स्वबाहुस्त्रवलेनाजौ जित्वा परमधर्म्मवित् ।
तृषितेन च कौन्तेय भिक्षितश्चित्रभानुना । सहस्रबाहुर्व्विक्रान्तः प्रादाद्भिक्षामथाग्नये ।
ग्रामान् पुराणि राष्ट्राणि घोषांश्चैवानुवीर्य्यवान् । जज्वाल तस्य बाणाग्राच्चित्रभानुर्दिधक्षया ।
स तस्य पुरुषेन्द्रस्य प्रभावेण महौजसः । ददाह कार्त्तवीर्य्यस्य शैलानथ वनस्पतीन् । १७५५
स शून्यमाश्रमं रम्यमापवस्य महात्मनः । ददाह पवनेनेद्धश्चित्रभानुः स हैहयः ।
आपवस्तु ततो रोषाच्छशापार्जुनमच्युतः । दग्धे ऽश्रमे महाबाहो कार्त्तवीर्य्येण वीर्य्यवान् ।
त्वया न वर्ज्जितं यस्मान्ममेदं हि मवद्वनं । दग्धं तस्माद्रणे रामो बाहूंस्ते छेत्स्यतेऽर्ज्जुन ।
अर्ज्जुनस्तु महातेजा वली नित्यं शमात्मकः । ब्रह्मण्यश्च शरण्यश्च दाता शूरश्च भारत ।
नाचिन्तयत्तदा शापन्तेन दत्तं महात्मना । तस्य पुत्त्रास्तु बलिनः शापेनासन् पितुर्व्वधे । १७६०
निमित्तादवलिप्ता वै नृशंसाश्चैव सर्व्वदा । जमदग्निधेन्वास्ते वत्समानिन्युर्भरतर्षभ ।
अज्ञातं कार्त्तवीर्य्येण हैहयेन्द्रेण धीमता । तन्निमित्तमभूद्युद्धं जामदग्नेर्म्महात्मनः ।
ततोऽर्ज्जुनस्य बाहूंस्तान् छित्त्वा रामो रुषान्वितः । तं भ्रमन्तं ततो वत्सं जामदग्न्यः स्वमाश्रमं ।
प्रत्यानयत राजेन्द्र तेषामन्तःपुरात्प्रभुः । अर्ज्जुनस्य सुतास्ते तु सम्भूयाबुद्धयस्तदा ।
गत्वाश्रममसम्बुद्धा जमदग्नेर्म्महात्मनः । अपातयन्त भल्लाग्रैः शिरः कायान्नराधिप । १७६५
समित्कुशार्थं रामस्य निर्यातस्य यशस्विनः । ततः पितृवधामर्षाद्रामः परममन्युमान् ।
निःक्षत्त्रियां प्रतिश्रुत्य महीं शस्त्रमगृह्णत । ततः स भृगुशार्दूलः कार्त्तवीर्य्यस्य वीर्य्यवान् ।
विक्रम्य निजघानाशु पुत्त्रान् पौत्त्रांश्च सर्व्वशः । स हैहयसहस्राणि हत्वा परममन्युमान् ।
चकार भार्गवो राजन् महीं शोणितकर्द्दमां । स तथाशु महातेजा कृत्वा निःक्षत्त्रियां महीं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृपया परयाविष्टो वनमेव जगाम ह । ततो वर्षसहस्रेषु समतीतेषु केषुचित् । १०७०
क्षेपं सम्प्राप्तवांस्तत्र प्रकृत्या कोपनः प्रभुः । विश्वामित्रस्य पौत्रस्तु रैभ्यपुत्त्रो महातपाः ।
परावसुर्म्महाराज क्षिप्त्वाह जनसंसदि । ये ते ययातिपतने यज्ञे सन्तः समागताः ।
प्रतर्द्दनप्रभृतयो राम किं क्षत्त्रिया न ते । मिथ्याप्रतिज्ञो राम त्वं कत्थसे जनसंसदि ।
भयात् क्षत्त्रियवीराणां पर्व्वतं समुपाश्रितः । सा पुनः क्षत्त्रियशतैः पृथिवी सर्व्वतस्तृता ।
परावसोर्व्वचः श्रुत्वा शस्त्रं जग्राह भार्गवः । ततो ये क्षत्त्रिया राजन् शतशस्तेन वर्ज्जिताः । १०७५
ते विवृद्धा महावीर्य्याः पृथिवीपतयोऽभवन् । स पुनस्तान् जघानाशु बालानपि नराधिप ।
गर्भस्थैस्तु मही व्याप्ता पुनरेवाभवत्तदा । जातं जातं स गर्भन्तु पुनरेव जघान ह ।
अरक्षंश्च सुतान्कांश्चित्तदा क्षत्त्रिययोषितः । त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्त्रियां प्रभुः ।
दक्षिणामश्वमेधान्ते कश्यपायाददत्ततः । स क्षत्त्रियाणां शेषार्थं करेणोद्दिश्य कश्यपः ।
स्रुक्प्रग्रहवता राजंस्ततो वाक्यमथाब्रवीत् । गच्छ तीरं समुद्रस्य दक्षिणस्य महामुने । १०८०
न ते मद्विषये राम वस्तव्यमिह कर्हिचित् । ततः शूर्पारकं देशं सागरस्तस्य निर्ममे ।
सहसा जामदग्न्यस्य सोऽपरान्तमहीतलं । कश्यपस्तां महाराज प्रतिगृह्य वसुन्धरां ।
कृत्वा ब्राह्मणसंस्थां वै प्रविष्टः सुमहावनं । ततः शूद्राश्च वैश्याश्च यथा स्वैरप्रचारिणः ।
अवर्त्तन्त द्विजाग्र्याणां दारेषु भरतर्षभ । अराजके जीवलोके दुर्ब्बला बलवत्तरैः ।
पीड्यन्ते न हि वित्तेषु प्रभुत्वं कस्यचित्तदा । ततः कालेन पृथिवी पीड्यमाना दुरात्मभिः । १०८५
विपर्य्ययेण तेनाशु प्रविवेश रसातलं । अरक्ष्यमाणा विधिवत् क्षत्त्रियैर्द्धर्म्मरक्षिभिः ।
तां दृष्ट्वा द्रवतीं तत्र सन्त्रासात्स महामनाः । ऊरुणा धारयामास कश्यपः पृथिवीं ततः ।
धृता तेनोरुणा येन तेनोर्व्वीति मही स्मृता । रक्षणार्थं समुद्दिश्य ययाचे पृथिवी तदा ।
प्रसाद्य कश्यपन्देवी वरयामास भूमिपं ।
॥ पृथिव्युवाच ॥ सन्ति ब्रह्मन्मया गुप्ताःस्त्रीषु क्षत्त्रियपुङ्गवाः । हैहयानां कुले जातास्ते संरक्षन्तु मां मुने । १०९०
अस्ति पौरवदायादो विदूरथसुतः प्रभो । ऋक्षैः सम्वर्द्धितो विप्र ऋक्षवत्यथ पर्व्वते ।
तथानुकम्पमानेन यज्वनाप्यमितौजसा । पराशरेण दायादः सौदासस्याभिरक्षितः ।
सर्व्वकर्म्माणि कुरुते शूद्रवत्तस्य स द्विजः । सर्व्वकर्मेत्यभिख्यातः स मां रक्षतु पार्थिवः ।
शिबिपुत्त्रो महातेजा गोपतिर्नाम नामतः । वने सम्वर्द्धितो गोभिः सोऽभिरक्षतु मां मुने ।
प्रतर्द्दनस्य पुत्त्रस्तु वत्सो नाम महाबलः । वत्सैः सम्वर्द्धितो गोष्ठे स मां रक्षतु पार्थिवः । १०९५
दधिवाहनपौत्त्रस्तु पुत्त्रो दिविरथस्य च । गुप्तस्स गौतमेनासीद्गङ्गाकूलेऽभिरक्षितः ।
बृहद्रथो महातेजा भूरिभूतिपरिष्कृतः । गोलाङ्गूलैर्म्महाभागो गृध्रकूटेऽभिरक्षितः ।
मरुत्तस्यान्ववाये च रक्षिताः क्षत्त्रियात्मजाः । मरुत्पतिसमा वीर्य्ये समुद्रेणाभिरक्षिताः ।
एते क्षत्त्रियदायादास्तत्र तत्र परिश्रिताः । व्योकारहेमकारादिजातिं नित्यं समाश्रिताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदि मामभिरक्षन्ति ततः स्थास्यामि निश्चला। एतेषां पितरश्चैव तथैव च पितामहाः। १८००
मदर्थं निहता युद्धे रामेणाक्लिष्टकर्म्मणा। तेषामपचितिश्चैव मया कार्य्या महामुने।
नह्यहं कामये नित्यमतिक्रान्तेन रक्षणं। वर्त्तमानेन वर्त्तेयं तत् क्षिप्रं संविधीयतां।
॥ वासुदेव उवाच ॥ ततः पृथिव्या निर्द्दिष्टांस्तान् समानीय कश्यपः। अभ्यषिञ्चन्महीपालान् क्षत्रियान्वीर्य्यसम्मतान्।
तेषां पुत्त्राश्च पौत्त्राश्च येषां वंशाः प्रतिष्ठिताः। एवमेतत्पुरावृत्तं यन्मां पृच्छसि पाण्डव।
॥ वैशम्पायन उवाच ॥ एवं ब्रुवंस्तच्च यदुप्रवीरो युधिष्ठिरं धर्म्मभृतां वरिष्ठं। रथेन तेनाशु ययौ महात्मा दिशः प्रकाशन्
भगवानिवार्कः। १८०५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि रामोपाख्याने ऊनपञ्चाशोऽध्यायः ॥ ४९ ॥

॥ वैशम्पायन उवाच ॥ ततो रामस्य तत्कर्म्म श्रुत्वा राजा युधिष्ठिरः। विस्मयं परमं गत्वा प्रत्युवाच जनार्द्दनं।
अहो रामस्य वार्ष्णेय शक्रस्येव महात्मनः। विक्रमो वसुधा येन क्रोधान्निःक्षत्रिया कृता।
गोभिः समुद्रेण तथा गोलाङ्गूलर्क्षवानरैः। गुप्ता रामभयोद्विग्नाः क्षत्रियाणां कुलोद्वहाः।
अहो धन्यो नृलोकोऽयं सभाग्याश्च नरा भुवि। यत्र कर्म्मेदृशं धर्म्म्यं द्विजेन कृतमित्युत।
तथावृत्तौ तदा तात तावच्युतयुधिष्ठिरौ। जग्मतुर्यत्र गाङ्गेयः शरतल्पगतः प्रभुः। १८१०
ततस्ते ददृशुर्भीष्मं शरसंस्तरशायिनं। स्वरश्मिजालसंवीतं सायंसूर्य्यसमप्रभं।
उपास्यमानं मुनिभिर्द्देवैरिव शतक्रतुं। देशे परमधर्म्मिष्ठे नदीमोघवतीमनु।
दूरादेव तमालोक्य कृष्णो राजा च धर्म्मजः। चत्वारः पाण्डवाश्चैव ते च शारद्वतादयः।
अवस्कन्द्याथ वाहेभ्यः संयम्य प्रचलं मनः। एकीकृत्येन्द्रियग्राममुपतस्थुर्महामुनीन्।
अभिवाद्य तु गोविन्दः सात्यकिस्ते च पार्थिवाः। व्यासादीनृषिमुख्यांश्च गाङ्गेयमुपतस्थिरे। १८१५
तपोवृद्धं तथा दृष्ट्वा गाङ्गेयं यदुकौरवाः। परिवार्य्य ततः सर्व्वे निषेदुः पुरुषर्षभाः।
ततो निशाम्य गाङ्गेयं शाम्यमानमिवानलं। किञ्चिद्दीनमना भीष्ममिति होवाच केशवः।
कच्चिज्ज्ञानानि सर्व्वाणि प्रसन्नानि यथा पुरा। कच्चिन्न व्याकुला चैव बुद्धिस्ते वदताम्बर।
शराभिघातदुःखार्त्तं कच्चिद्गात्रं न दूयते। मानसादपि दुःखाद्धि शारीरं बलवत्तरं।
वरदानात्पितुः कामं छन्दमृत्युरसि प्रभो। शान्तनोर्धर्म्मनित्यस्य नत्वेतन्मम कारणं। १८२०
सुसूक्ष्मोऽपि तु देहे वै शल्यो जनयते रुजं। किं पुनः शरसङ्घातैश्चितस्य तव पार्थिव।
कामं नैतत्तवाख्येयं प्राणिनां प्रभवाप्ययौ। उपदेष्टुं भवान् शक्तो देवानामपि भारत।
यच्च भूतं भविष्यच्च भवच्च पुरुषर्षभ। सर्व्वं तज्ज्ञानवृद्धस्य तव भीष्म प्रतिष्ठितं।
संहारश्चैव भूतानां धर्म्मस्य च फलोदयः। विदितस्ते महाप्राज्ञ त्वं हि धर्म्ममयो निधिः।
त्वां हि राज्ये स्थितं स्फीते समग्राङ्गमरोगिणं। स्त्रीसहस्रैः परिवृतं पश्यामीवोर्द्ध्वरेतसं। १८२५
ऋते शान्तनवाद्भीष्मात्त्रिषु लोकेषु पार्थिव। सत्यधर्म्मात् महावीर्य्याच्छूराद्धर्म्मैकतत्परात्।
मृत्युमावार्य्य तपसा शरसंस्तरशायिनः। निसर्गप्रभवं किञ्चिन्न च तातानुशुश्रुम।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सत्ये तपसि दाने च यज्ञाधिकरणे तथा । धनुर्व्वेदे च वेदे च नीत्याञ्चैवानुरक्षणे ।
अनृशंसं शुचिं दान्तं सर्व्वभूतहिते रतं । महारथं त्वत्सदृशं न कश्चिदनुशुश्रुम ।
त्वं हि देवान् सगन्धर्व्वानसुरान् यक्षराक्षसान् । शक्तस्त्वेकरथेनैव विजेतुं नात्र संशयः । १८२०
स त्वं भीष्म महाबाहो वसूनां वासवोपमः । नित्यं विप्रैः समाख्यातोऽनवमोऽनवमो गुणैः ।
अहञ्च त्वाभिजानामि यस्त्वं पुरुषसत्तम । त्रिदशेष्वपि विख्यातस्त्वं शक्त्या पुरुषोत्तमः ।
मनुष्येषु मनुष्येन्द्र न दृष्टो न च मे श्रुतः । भवतो वा गुणैर्युक्तः पृथिव्यां पुरुषः क्वचित् ।
त्वं हि सर्व्वगुणैराजन् देवानप्यतिरिच्यते । तपसा हि भवान् शक्तः स्रष्टुं लोकांश्चराचरान् ।
किं पुनश्चात्मनो लोकानुत्तमानुत्तमैर्गुणैः । तदस्य तप्यमानस्य ज्ञातीनां सङ्क्षयेण वै । १८२५
ज्येष्ठस्य पाण्डुपुत्त्रस्य शोकं भीष्म व्यपानुद । ये हि धर्म्माः समाख्याता चातुर्व्वर्ण्यस्य भारत ।
चातुराश्रम्यसंयुक्ताः सर्व्वे ते विदितास्तव । चातुर्व्विद्ये च ये प्रोक्ताश्चातुर्होत्रे च भारत ।
योगे साङ्ख्ये च नियता ये च धर्म्माः सनातनाः । चातुर्व्वर्ण्यस्य यश्चोक्तो धर्म्मो न स्म विरुध्यते ।
सेव्यमानः स वैयाख्यो गाङ्गेय विदितस्तव । प्रतिलोमप्रसूतानां वर्णानाञ्चैव यः स्मृतः ।
देशजातिकुलानाञ्च जानीषे धर्म्मलक्षणं । वेदोक्तो यश्च शिष्टोक्तः सदैव विदितस्तव । १८३०
इतिहासपुराणार्थाः कार्त्स्न्येन विदितास्तव । धर्म्मशास्त्रञ्च सकलं नित्यं मनसि ते स्थितं ।
ये च केचन लोकेऽस्मिन्नर्थाः संशयकारकाः । तेषां छेत्ता नास्ति लोके त्वदन्यः पुरुषर्षभ ।
स पाण्डवेयस्य मनःसमुत्थितं नरेन्द्र शोकं व्यपकर्ष मेधया । भवद्विधा ह्युत्तमबुद्धिविस्तरा विमुह्यमानस्य नरस्य शान्तये ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कृष्णवाक्ये पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

॥ वैशम्पायन उवाच ॥ श्रुत्वा तु वचनं भीष्मो वासुदेवस्य धीमतः । किञ्चिदुन्नाम्य वदनं प्राञ्जलिर्व्वाक्यमब्रवीत् ।
॥ भीष्म उवाच ॥ नमस्ते भगवन् कृष्ण लोकानां प्रभवाप्यय । त्वं हि कर्त्ता हृषीकेश संहर्त्ता चापराजितः । १८३५
विश्वकर्म्मन्नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव । अपवर्गस्तु भूतानां पञ्चानां परतः स्थितः ।
नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु । योगीश्वर नमस्ते तु त्वं हि सर्व्वपरायणः ।
मत्संश्रितं यदात्थ त्वं वचः पुरुषसत्तम । तेन पश्यामि ते भावान् दिव्यान् हि त्रिषु वर्त्मसु ।
तच्च पश्यामि गोविन्द यत्ते रूपं सनातनं । सप्तमार्गा निरुद्धास्ते वायोरमिततेजसः ।
दिवन्ते शिरसा व्याप्तं पद्भ्यां देवी वसुन्धरा । दिशो भुजौ रविश्चक्षुर्वीर्य्ये शक्रः प्रतिष्ठितः । १८४०
अतसीपुष्पसङ्काशं पीतवाससमच्युतं । वपुर्ह्यनुमिमीमस्ते मेघस्येव सविद्युतः ।
त्वत्प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे । यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ।
॥ वासुदेव उवाच ॥ यतः खलु परा भक्तिर्मयि ते पुरुषर्षभ । ततो मया वपुर्दिव्यं त्वयि राजन् प्रदर्शितं ।
न ह्यभक्ताय राजेन्द्र भक्तायानृजवे न च । दर्शयाम्यहमात्मानं न चाशान्ताय भारत ।
भवांस्तु मम भक्तश्च नित्यञ्चार्ज्जवमास्थितः । दमे तपसि नित्ये च दाने च निरतः शुचिः । १८४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अर्हस्त्वं भीष्म मां द्रष्टुं तपसा स्वेन पार्थिव । तव ह्युपस्थिता लोका येभ्यो नावर्त्तते पुनः ।

पञ्चाशतं षट् च कुरुप्रवीर शेषं दिनानां तव जीवितस्य । ततः शुभे कर्म्मफलोदये त्वं समेष्यसे भीष्म विमुच्य देहं ।

एते हि देवा वसवो विमानान्यास्थाय सर्व्वे ज्वलिताग्निकल्पाः । अन्तर्हितास्त्वां प्रतिपालयन्ति काष्ठां प्रपद्यन्तमुदक् पतङ्गं ।

व्यावर्त्तमाने भगवत्युदीचीं सूर्य्ये जगत्कालवशं प्रपन्ने । गन्तासि लोकान् पुरुषप्रवीर नावर्त्तते यानुपलभ्य विद्वान् ।

अमुञ्च लोकं त्वयि भीष्म याते ज्ञानानि नङ्क्ष्यन्त्यखिलेन वीर । अतस्तु सर्व्वे त्वयि सन्निकर्षं समागता धर्म्मविवेचनाय । १८६०

तज्ज्ञातिशोकोपहतश्रुताय सत्याभिसन्धाय युधिष्ठिराय । प्रब्रूहि धर्म्मार्थसमाधियुक्तं सत्यं वचोऽस्यापनुदाशु शोकं ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कृष्णवाक्ये एकपञ्चाशोऽध्यायः ॥ ५१ ॥

॥ वैशम्पायन उवाच ॥ ततः कृष्णस्य तद्वाक्यं धर्म्मार्थसहितं हितं । श्रुत्वा शान्तनवो भीष्मः प्रत्युवाच कृताञ्जलिः ।

लोकनाथ महाबाहो शिव नारायणाच्युत । तव वाक्यमुपश्रुत्य हर्षेणास्मि परिप्लुतः ।

किञ्चाहमभिधास्यामि वाक्पते तव सन्निधौ । यदा वाचो गतं सर्व्वं तव वाचि समाहितं ।

यच्च किञ्चित् क्वचिल्लोके कर्त्तव्यं क्रियते च यत् । त्वत्तस्तन्निःसृतं देव लोके बुद्धिमतो हि ते । १८६५

कथयेद्देवलोकं यो देवराजसमीपतः । धर्म्मकामार्थमोक्षाणां सोऽर्थं ब्रूयात्तवाग्रतः ।

शराभितापाद्व्यथितं मनो मे मधुसूदन । गात्राणि चावसीदन्ति न च बुद्धिः प्रसीदति ।

न च मे प्रतिभा काचिदस्ति किञ्चित् प्रभाषितुं । पीड्यमानस्य गोविन्द विषानलसमैः शरैः ।

बलं मे प्रजहातीव प्राणाः सन्त्वरयन्ति च । मर्म्माणि परितप्यन्ति भ्रान्तचित्तस्तथा ह्यहं ।

दौर्ब्बल्यात् सज्जते वाङ्मे स कथं वक्तुमुत्सहे । साधु मे त्वं प्रसीदस्व दाशार्हकुलवर्द्धन । १८७०

तत् क्षमस्व महाबाहो न ब्रूयां किञ्चिदच्युत । त्वत्सन्निधौ च सीदेद्धि वाचस्पतिरपि ब्रुवन् ।

न दिशः सम्प्रजानामि नाकाशं न च मेदिनीं । केवलं तव वीर्य्येण तिष्ठामि मधुसूदन ।

स्वयमेव भवांस्तस्माद्धर्म्मराजस्य यद्धितं । तद्ब्रवीत्वाशु सर्व्वेषामागमानां त्वमागमः ।

कथं त्वयि स्थिते कृष्णे शाश्वते लोककर्त्तरि । प्रब्रूयान्मद्विधः कश्चिद्गुरौ शिष्य इव स्थिते ।

॥ वासुदेव उवाच ॥ उपपन्नमिदं वाक्यं कौरवाणां धुरन्धरे । महावीर्य्ये महासत्त्वे स्थिरे सर्व्वार्थदर्शिनि । १८७५

यच्च मामात्थ गाङ्गेय बाणाघातरुजं प्रति । गृहाणात्र वरं भीष्म मत्प्रसादकृतं प्रभो ।

न ते ग्लानिर्न ते मूर्च्छा न दाहो न च ते रुजा । प्रभविष्यन्ति गाङ्गेय क्षुत्पिपासे न चाच्युत ।

ज्ञानानि च समग्राणि प्रतिभास्यन्ति तेऽनघ । न च ते क्वचिदासक्तिर्बुद्धेः प्रादुर्भविष्यति ।

सत्त्वस्थञ्च मनो नित्यं तव भीष्म भविष्यति । रजस्तमोभ्यां रहितं घनैर्मुक्त इवोडुराट् ।

यद्यच्च धर्म्मसंयुक्तमर्थयुक्तमथापि च । चिन्तयिष्यसि तत्राग्र्या बुद्धिस्तव भविष्यति । १८८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इमञ्च राजशार्दूल भूतग्रामञ्चतुर्व्विधं। चतुर्द्दिधं समाश्रित्य द्रच्यसमितविक्रम।
संसरन्तं प्रजाजालं संयुक्तो ज्ञानचक्षुषा। भीष्म द्रच्यसि तत्त्वेन जले मीन इवामले।
॥ वैशम्पायन उवाच ॥ ततस्ते व्याससहिताः सर्व्व एव महर्षयः। ऋग्यजुःसामसहितैर्व्वचोभिः कृष्णमार्चयन्।
ततः सर्व्वार्त्तवं दिव्यं पुष्पवर्षं नभस्तलात्। पपात यत्र वार्ष्णेयः सगाङ्गेयः सपाण्डवः।
वादित्राणि च सर्व्वाणि जगुश्चाप्सरसाङ्गणाः। न चाहितमनिष्टञ्च किञ्चित्तत्र प्रदृश्यते। १८८
ववौ शिवः सुखो वायुः सर्व्वगन्धवहः शुचिः। शान्तायां दिशि शान्ताश्च प्राद्रवन्मृगपक्षिणः।
ततो मुहूर्त्ताद्भगवान् सहस्रांशुर्द्दिवाकरः। दहन् वनमिवैकान्ते प्रतीच्यां प्रत्यदृश्यत।
ततो महर्षयः सर्व्वे समुत्थाय जनार्द्दनं। भीष्ममामन्त्रयाञ्चक्रू राजानञ्च युधिष्ठिरं।
ततः प्रणाममकरोत् केशवः सहपाण्डवः। सात्यकिः सञ्जयश्चैव स च शारद्वतः कृपः।
ततस्ते धर्म्मनिरताः सम्यक् तैरपि पूजिताः। श्वः समेष्याम इत्युक्त्वा यथेष्टं त्वरिता ययुः। १८९०
तथैवामन्त्र्य गाङ्गेयं केशवः पाण्डवास्तथा। प्रदक्षिणमुपावृत्य रथानारुरुहुः शुभान्।
ततो रथैः काञ्चनचित्रकूवरैर्महीधराभैः समदैश्च दन्तिभिः। हयैः सुपर्णैरिव चाशुगामिभिः पदातिभिश्चात्तशरासनादिभिः।
ययौ रथानां पुरतो हि सा चमूस्तथैव पश्चादतिमात्रसारिणी। पुरश्च पश्चाच्च यथा महानदी तमृक्षवन्तं गिरिमेत्य नर्म्मदा।
ततः पुरस्ताद्भगवान्निशाकरः समुत्थितस्तामभिहर्षयंश्चमूं। दिवाकरापीतरसा महौषधीः पुनः स्वकेनैव गुणेन योजयन्।
ततः पुरं सुरपुरसम्मितद्युतिं प्रविश्य ते यदुवृषपाण्डवास्तदा। यथोचितान् भवनवरान् समाविशन् श्रमान्विता मृगपतया गुहा इव। १८९५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिराद्यागमने द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

॥ वैशम्पायन उवाच ॥ ततः शयनमाविश्य प्रसुप्तो मधुसूदनः। याममात्रार्द्धशेषायां यामिन्यां प्रत्यबुध्यत।
स ध्यानपथमाविश्य सर्व्वज्ञानानि माधवः। अवलोक्य ततः पश्चाद्दध्यौ ब्रह्म सनातन।
ततः स्तुतिपुराणज्ञा रक्तकण्ठाः सुशिक्षिताः। अस्तुवन् विश्वकर्म्माणं वासुदेवं प्रजापतिं।
पठन्ति पाणिस्वनिकास्तथा गायन्ति गायकाः। शङ्खानथ मृदङ्गांश्च प्रवाद्यन्ति सहस्रशः।
वीणापणववेणूनां स्वनश्चातिमनोरमः। प्रहास इव विस्तीर्णः शुश्रुवे तस्य वेश्मनः। १९००
ततो युधिष्ठिरस्यापि राज्ञो मङ्गलसंहिताः। उच्चेरुर्म्मधुरा वाचो गीतवादित्रनिःस्वनाः।
तत उत्थाय दाशार्हः स्नातः प्राञ्जलिरच्युतः। जप्त्वा गुह्यं महाबाहुरग्नीनाश्रित्य तस्थिवान्।
ततः सहस्रं विप्राणां चतुर्व्वेदविदान्तथा। गवां सहस्रेणैकैकं वाचयामास माधवः।
मङ्गलालम्भनं कृत्वा आत्मानमवलोक्य च। आदर्शे विमले कृष्णस्ततः सात्यकिमब्रवीत्।
गच्छ शैनेय जानीहि गत्वा राजनिवेशनं। अपि सज्जो महातेजा भीष्मं द्रष्टुं युधिष्ठिरः। १९०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततः कृष्णस्य वचनात् सात्यकिस्त्वरितो ययौ । उपगम्य च राजानं युधिष्ठिरमभाषत ।
युक्तो रथवरो राजन् वासुदेवस्य धीमतः । समीपमापगेयस्य प्रयास्यति जनार्द्दनः ।
भवत्प्रतीक्षः कृष्णोऽसौ धर्म्मराज महाद्युते । यदत्रानन्तरं कृत्यं तद्भवान् कर्त्तुमर्हति ।
एवमुक्तः प्रत्युवाच धर्म्मपुत्त्रो युधिष्ठिरः ।
॥ युधिष्ठिर उवाच ॥ युज्यतां मे रथवरः फाल्गुनाप्रतिमद्युते । न सैनिकैश्च यातव्यं यास्यामो वयमेव हि । १९१०
न च पीडयितव्यो मे भीष्मो धर्म्मभृताम्वरः । अतः पुरःसराश्चापि निवर्त्तन्तु धनञ्जय ।
अद्यप्रभृति गाङ्गेयः परं गुह्यं प्रवक्ष्यति । अतो नेच्छामि कौन्तेय पृथग्जनसमागमं ।
॥ वैशम्पायन उवाच॥ स तद्वाक्यमथाज्ञाय कुन्तीपुत्त्रो धनञ्जयः । युक्तं रथवरं तस्मा आचचक्षे नरर्षभः ।
ततो युधिष्ठिरो राजा यमौ भीमार्ज्जुनावपि । भूतानीव समस्तानि ययुः कृष्णनिवेशनं ।
आगच्छत्स्वथ कृष्णोऽपि पाण्डवेषु महात्मसु । शैनेयसहितो धीमान्रथमेवान्वपद्यत । १९१५
रथस्थाः संविदं कृत्वा सुखां पृष्ट्वा च शर्व्वरीं । मेघघोषैरथवरैः प्रययुस्ते नरर्षभाः ।
बलाहकं मेघपुष्पं शैब्यं सुग्रीवमेव च । दारुकश्चोदयामास वासुदेवस्य वाजिनः ।
ते हया वासुदेवस्य दारुकेण प्रचोदिताः । गां खुराग्रैस्तथा राजन् लिखन्तः प्रययुस्तदा ।
ते ग्रसन्त इवाकाशं वेगवन्तो महाबलाः । क्षेत्रं धर्म्मस्य कृत्स्नस्य कुरुक्षेत्रमवातरन् ।
ततो ययुर्यत्र भीष्मः शरतल्पगतः प्रभुः । आस्ते महर्षिभिः सार्द्धं ब्रह्मा देवगणैर्यथा । १९२०
ततोऽवतीर्य्य गोविन्दो रथात्स च युधिष्ठिरः । भीमो गाण्डीवधन्वा च यमौ सात्यकिरेव च ।
ऋषीनभ्यर्च्चयामासुः करानुद्यम्य दक्षिणान् । स तैः परिवृतो राजा नक्षत्रैरिव चन्द्रमाः ।
अभ्याजगाम गाङ्गेयं ब्रह्माणमिव वासवः । शरतल्पे शयानन्तमादित्यं पतितं यथा ।
स ददर्श महाबाहुर्भयाच्चागतसाध्वसः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कृष्णादिभीष्मसमीपयाने त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

॥ जनमेजय उवाच ॥ धर्म्मात्मनि महावीर्य्ये सत्यसन्धे जितात्मनि । देवव्रते महाभागे शरतल्पगतेऽच्युते । १९२५
शयाने वीरशयने भीष्मे शान्तनुनन्दने । गाङ्गेये पुरुषव्याघ्रे पाण्डवैः पर्य्युपासिते ।
काः कथास्समवर्त्तन्त तस्मिन् वीरसमागमे । हतेषु सर्व्वसैन्येषु तन्मे शंस महामुने ।
॥ वैशम्पायन उवाच ॥ शरतल्पगते भीष्मे कौरवाणां धुरन्धरे । आजग्मुर्ऋषयः सिद्धा नारदप्रमुखा नृप ।
हतशिष्टाश्च राजानो युधिष्ठिरपुरोगमाः । धृतराष्ट्रश्च कृष्णश्च भीमार्जुनयमास्तथा ।
तेऽभिगम्य महात्मानो भरतानां पितामहं । अन्वशोचन्त गाङ्गेयमादित्यं पतितं यथा । १९३०
मुहूर्त्तमिव च ध्यात्वा नारदो देवदर्शनः । उवाच पाण्डवान् सर्व्वान् हतशिष्टांश्च पार्थिवान् ।
प्राप्तकालं समाचक्षे भीष्मोऽयमनुयुज्यतां । अस्तमेति हि गाङ्गेयो भानुमानिव भारत ।
अयं प्राणानुत्सिसृक्षुस्तं सर्व्वेऽभ्यनुपृच्छत । कृत्स्नान् हि विविधान् धर्म्मांश्चातुर्व्वर्ण्यस्य वेत्त्ययं ।
एष वृद्धः परान् लोकान् सम्प्राप्नोति तनुं त्यजन् । तं शीघ्रमनुयुञ्जीध्वं संशयान्मनसि स्थितान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ एवमुक्ता नारदेन भीष्ममीयुर्नराधिपाः । प्रष्टुञ्चाशक्नुवन्तस्ते वीचाञ्चक्रुः परस्परं ।
अथोवाच हृषीकेशं पाण्डुपुत्त्रो युधिष्ठिरः । नान्यस्तु देवकीपुत्त्राच्छक्तः प्रष्टुं पितामहं ।
प्रव्याहर यदुश्रेष्ठ त्वमग्रे मधुसूदन । त्वं हि नस्तात सर्व्वेषां सर्व्वधर्म्मविदुत्तमः ।
एवमुक्तः पाण्डवेन भगवान् केशवस्तदा । अभिगम्य दुराधर्षं प्रव्याहारयदच्युतः ।
॥ वासुदेव उवाच ॥ कच्चित् सुखेन रजनी व्युष्टा ते राजसत्तम । विस्पष्टलक्षणा बुद्धिः कच्चिच्चोपस्थिता तव ।
कच्चिज्ज्ञानानि सर्व्वाणि प्रतिभान्ति च तेऽनघ । न ग्लायेत च हृदयं न च ते व्याकुलं मनः ।
॥ भीष्म उवाच ॥ दाहो मोहः श्रमश्चैव क्लमो ग्लानिस्तथा रुजा । तव प्रसादाद्वार्ष्णेय सद्यः प्रतिगतानि मे ।
यच्च भूतं भविष्यच्च भवच्च परमद्युते । तत् सर्व्वमनुपश्यामि पाणौ फलमिवार्पितं ।
वेदोक्ताश्चैव ये धर्म्मा वेदान्ताधिगताश्च ये । तान् सर्व्वान् सम्प्रपश्यामि वरदानात्तवाच्युत ।
शिष्टैश्च धर्म्मो यः प्रोक्तः स च मे हृदि वर्त्तते । देशजातिकुलानाञ्च धर्म्मज्ञोऽस्मि जनार्द्दन ।
चतुर्ष्वाश्रमधर्म्मेषु योऽर्थः स च हृदि स्थितः । राजधर्म्मांश्च सकलानवगच्छामि केशव ।
यच्च यत्र च वक्तव्यं तद्वक्ष्यामि जनार्द्दन । तव प्रसादाद्धि शुभा मनो मे बुद्धिराविशत् ।
पुनरेवास्मि समावृत्तस्त्वदनुध्यानबृंहितः । वक्तुं श्रेयः समर्थोऽस्मि त्वत्प्रसादाज्जनार्द्दन ।
स्वयं किमर्थन्तु भवान् श्रेयो नः प्राह पाण्डवं । किन्ते विवक्षितञ्चात्र तदाशु वद माधव ।
॥ वासुदेव उवाच ॥ यशसः श्रेयसश्चैव मूलं मां विद्धि कौरव । मत्तः सर्व्वेऽभिनिर्वृत्ता भावाः सदसदात्मकाः ।
शीतांशुश्चन्द्र इत्युक्ते लोके को विस्मयिष्यति । तथैव यशसा पूर्णे मयि को विस्मयिष्यति ।
आधेयन्तु मया भूयो यशस्तव महाद्युते । ततो मे विपुला बुद्धिस्त्वयि भीष्म समर्पिता ।
यावद्धि पृथिवीपाल पृथ्वीयं स्थास्यति ध्रुवा । तावत्तवाक्षया कीर्त्तिर्लोकाननुचरिष्यति ।
यच्च त्वं वक्ष्यसे भीष्म पाण्डवायानुपृच्छते । वेदप्रवाद इव ते स्थास्यते वसुधातले ।
यश्चैतेन प्रमाणेन योक्ष्यत्यात्मानमात्मना । सफलं सर्व्वपुण्यानां प्रेत्य चानुभविष्यति ।
एतस्मात् कारणाद्भीष्म मतिर्द्दिव्या मया हि ते । दत्ता यशो विप्रथयेत् कथं भूयस्तवेति ह ।
यावद्धि प्रथते लोके पुरुषस्य यशो भुवि । तावत्तस्याक्षया कीर्त्तिर्भवतीति विनिश्चितं ।
राजानो हतशिष्टास्त्वां राजन्नभित आसते । धर्म्माननुयुयुक्षन्तस्तेभ्यः प्रब्रूहि भारत ।
भवान् हि वयसा वृद्धः श्रुताचारसमन्वितः । कुशलो राजधर्म्माणां सर्व्वेषामपराश्च ये ।
जन्मप्रभृति ते कश्चिद्वृजिनं न ददर्श ह । ज्ञातारं सर्व्वधर्म्माणां त्वां विदुः सर्व्वपार्थिवाः ।
तेभ्यः पितेव पुत्त्रेभ्यो राजन् ब्रूहि परं नयं । ऋषयश्चैव देवाश्च त्वया नित्यमुपासिताः ।
तस्माद्वक्तव्यमेवेदं त्वयाऽवश्यमशेषतः । धर्म्मं शुश्रूषमाणेभ्यः पृष्टेन च सतां पुनः ।
वक्तव्यं विदुषा चेति धर्म्ममाहुर्म्मनीषिणः । अप्रतिब्रुवतः कष्टो दोषो हि भविता प्रभो ।
तस्मात् पुत्त्रैश्च पौत्त्रैश्च धर्म्मान् पृष्टान् सनातनान् । विद्वन् जिज्ञासमानैस्त्वं प्रब्रूहि भरतर्षभ ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कृष्णवाक्ये चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ अथाब्रवीन्महातेजा वाक्यं कौरवनन्दनः । हन्त धर्म्मान् प्रवक्ष्यामि दृढे वाङ्मनसी मम ।
तव प्रसादाद्गोविन्द भूतात्मा ह्यसि शाश्वतः । युधिष्ठिरस्तु धर्म्मात्मा मां धर्म्माननुपृच्छतु । १९६५
एवं प्रीतो भविष्यामि धर्म्मान् वक्ष्यामि चाखिलान् । यस्मिन्राजर्षभे जाते धर्म्मात्मनि महात्मनि ।
अहृष्यन् वृष्णयः सर्व्वे स मां पृच्छतु पाण्डवः । सर्व्वेषां दीप्तयशसां कुरूणां धर्म्मचारिणां ।
यस्य नास्ति समः कश्चित् स मां पृच्छतु पाण्डवः । धृतिर्दमो ब्रह्मचर्य्यं क्षमा धर्म्मश्च नित्यदा ।
यस्मिन्नोजश्च तेजश्च स मां पृच्छतु पाण्डवः । सम्बन्धिनोऽतिथीन् भृत्यान् संश्रितांश्चैव यो भृशं ।
सम्मानयति सत्कृत्य स मां पृच्छतु पाण्डवः । सत्यं दानं तपः शौर्य्यं शान्तिर्दाक्ष्यमसम्भ्रमः । १९७०
यस्मिन्नेतानि सर्व्वाणि स मां पृच्छतु पाण्डवः । यो न कामान्न संरम्भान्न भयान्नार्थकारणात् ।
कुर्य्यादधर्म्मं धर्म्मात्मा स मां पृच्छतु पाण्डवः । सत्यनित्यः क्षमानित्यो ज्ञाननित्योऽतिथिप्रियः ।
यो ददाति सतां नित्यं स मां पृच्छतु पाण्डवः । इज्याध्ययननित्यश्च धर्म्मे च निरतः सदा ।
शान्तः श्रुतरहस्यश्च स मां पृच्छतु पाण्डवः ।
॥ वासुदेव उवाच ॥ लज्जया परयोपेतो धर्म्मराजो युधिष्ठिरः । अभिशापभयाद्भीतो भवन्तं नोपसर्पति । १९७५
लोकस्य कदनं कृत्वा लोकनाथो विशाम्पते । अभिशापभयाद्भीतो भवन्तं नोपसर्पति ।
पूज्यान्मान्यांश्च भक्तांश्च गुरून् सम्बन्धिबान्धवान् । अर्घार्हानिषुभिर्भित्त्वा भवन्तं नोपसर्पति ।
॥ भीष्म उवाच ॥ ब्राह्मणानां यथा धर्म्मो दानमध्ययनं तपः । क्षत्रियाणां तथा कृष्ण समरे देहपातनं ।२
पितॄन् पितामहान् भ्रातॄन् गुरून् सम्बन्धिबान्धवान् । मिथ्याप्रवृत्तान् यः संख्ये निहन्याद्धर्म्म एव सः ।
समयत्यागिनो लुब्धान् गुरूनपि च केशव । निहन्ति समरे पापान् क्षत्रियः स हि धर्म्मवित् । १९८०
यो लोभान्न समीक्षेत धर्म्मसेतुं सनातनं । निहन्ति यस्तं समरे क्षत्रियो वै स धर्म्मवित् ।
लोहितोदां केशतृणां गजशैलां ध्वजद्रुमां । महीं करोति युद्धेषु क्षत्रियो यः स धर्म्मवित् ।
आहूतेन रणे नित्यं योद्धव्यं क्षत्त्रबन्धुना । धर्म्म्यं स्वर्ग्यञ्च लोक्यञ्च युद्धं हि मनुरब्रवीत् ।
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु भीष्मेण धर्म्मपुत्रो युधिष्ठिरः । विनीतवदुपागम्य तस्थौ सन्दर्शनेऽग्रतः ।
अथास्य पादौ जग्राह भीष्मश्चापि ननन्द तं । मूर्द्ध्नि चैनमुपाघ्राय निषीदेत्यब्रवीत्तदा । १९८५
तमुवाचाथ गाङ्गेयो वृषभः सर्व्वधन्विनां । मां पृच्छ तात विश्रब्धं मा भैस्त्वं कुरुसत्तम ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिराश्वासने पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
॥ वैशम्पायन उवाच ॥ प्रणिपत्य हृषीकेशमभिवाद्य पितामहं । अनुमान्य गुरून् सर्व्वान् पर्य्यपृच्छद्युधिष्ठिरः ।
॥ युधिष्ठिर उवाच ॥ राज्ञां वै परमो धर्म्म इति धर्म्मविदो विदुः । महान्तमेतं भारञ्च मन्ये तद्ब्रूहि पार्थिव ।
राजधर्म्मान् विशेषेण कथयस्व पितामह । सर्व्वस्य जीवलोकस्य राजधर्म्मः परायणं ।
त्रिवर्गो हि समासक्तो राजधर्म्मेषु कौरव । मोक्षधर्म्मश्च विस्पष्टः सकलोऽत्र समाहितः । १९९०
यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा । नरेन्द्रधर्म्मो लोकस्य तथा प्रग्रहणं स्मृतं ।
तत्र चेत् सम्प्रमुह्येत धर्म्मे राजर्षिसेविते । लोकस्य संस्था न भवेत् सर्व्वञ्च व्याकुलीभवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उद्यन् हि यथा सूर्य्यो नाशयत्यशुभं तमः । राजधर्म्मास्तथाऽलोक्यामाक्षिपन्त्यशुभां गतिं ।
तदग्रे राजधर्म्मान् हि मदर्थे त्वं पितामह । प्रब्रूहि भरतश्रेष्ठ त्वं हि धर्म्मभृताम्वरः ।
आगमस्तु परस्त्वत्तः सर्व्वेषां नः परन्तप । भवन्तं हि परं बुद्धौ वासुदेवोऽभिमन्यते ।
॥ भीष्म उवाच ॥ नमो धर्म्माय महते नमः कृष्णाय वेधसे । ब्राह्मणेभ्यो नमस्कृत्य धर्म्मान् वक्ष्यामि शाश्वतान् ।
शृणु कार्त्स्न्येन मत्तस्त्वं राजधर्म्मान् युधिष्ठिर । निरुच्यमानान्नियतो यच्चान्यदपि वाञ्छसि ।
आदावेव कुरुश्रेष्ठ राज्ञा रञ्जनकाम्यया । देवतानां द्विजानाञ्च वर्त्तितव्यं यथाविधि ।
दैवतान्यर्च्चयित्वा हि ब्राह्मणांश्च कुरूद्वह । आनृण्यं याति धर्म्मस्य लोकेन च समर्च्यते ।
उत्थानेन सदा पुत्र प्रयतेथा युधिष्ठिर । न ह्युत्थानमृते दैवं राज्ञामर्थं प्रसाधयेत् ।
साधारणं द्वयं ह्येतद्दैवमुत्थानमेव च । पौरुषं हि परं मन्ये दैवं निश्चित्य मुच्यते ।
विपन्ने च समारम्भे सन्तापं मास्म वै कृथाः । घटस्वैवं सदात्मानं राज्ञामेष परो नयः ।
न हि सत्यादृते किञ्चिद्राज्ञां वै सिद्धिकारकं । सत्ये हि राजा निरतः प्रेत्य चेह च नन्दति ।
ऋषीणामपि राजेन्द्र सत्यमेव परं धनं । तथा राज्ञः परं सत्यान्नान्यद्विश्वासकारणं ।
गुणवान् शीलवान् दान्तो मृदुर्धर्म्म्यो जितेन्द्रियः । सुदर्शः स्थूललक्ष्यश्च न भ्रश्येत सदा श्रियः ।
आर्जवं सर्व्वकार्य्येषु श्रयेथाः कुरुनन्दन । पुनर्नयविचारेण त्रयीसम्वरणेन च ।
मृदुर्हि राजा सततं लङ्घ्यो भवति सर्व्वशः । तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाचर ।
अदण्ड्याश्चैव ते पुत्र विप्राश्च वदताम्वर । भूतमेतत् परं लोके ब्राह्मणो नाम पाण्डव ।
मनुना चैव राजेन्द्र गीतौ श्लोकौ महात्मना । धर्म्मेषु स्वेषु कौरव्य हृदि तौ कर्त्तुमर्हसि ।
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं । तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति ।
अयो हन्ति यदाश्मानमग्निना वारि हन्यते । ब्रह्म च क्षत्रियो द्वेष्टि तदा सीदन्ति ते त्रयः ।
एवं कृत्वा महाराज नमस्या एव ते द्विजाः । भौमं ब्रह्म द्विजश्रेष्ठा धारयन्ति समर्च्चिताः ।
एवञ्चैव नरव्याघ्र लोकत्रय विघातकाः । निग्राह्या एव सततं बाहुभ्यां ये स्युरीदृशाः ।
श्लोकौ चोशनसा गीतौ पुरा तात महर्षिणा । तौ निबोध महाराज त्वमेकाग्रमना नृप ।
उद्यम्य शस्त्रमायान्तमपि वेदान्तगं रणे । निगृह्णीयात् स्वधर्म्मेण धर्म्मापेक्षी नराधिपः ।
विनश्यमानं धर्म्मं हि योऽभिरक्षेत् स धर्म्मवित् । न तेन धर्म्महा स स्यान्मन्युस्तन्मन्युमृच्छति ।
एवञ्चैव नरश्रेष्ठ रक्ष्या एव द्विजातयः । सापराधानपि हि तान् विषयान्ते समुत्सृजेत् ।
अभिशस्तमपि ह्येषां कृपायीत विशाम्पते । ब्रह्मघ्ने गुरुतल्पे च भ्रूणहत्ये तथैव च ।
राजद्विष्टे च विप्रस्य विषयान्ते विसर्ज्जनं । विधीयते न शारीरं दण्डमेषां कदाचन ।
दयिताश्च नरास्ते स्युर्भक्तिमन्तो द्विजेषु ये । न कोषः परमोऽन्योऽस्ति राज्ञां पुरुषसञ्चयात् ।
दुर्गेषु च महाराज षट्सु ये शास्त्रनिश्चिताः । सर्व्वदुर्गेषु मन्यन्ते नरदुर्गं सुदुस्तरं ।
तस्मान्नित्यं दया कार्य्या चातुर्व्वर्ण्ये विपश्चिता । धर्म्मात्मा सत्यवाक् चैव राजा रञ्जयति प्रजाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न च क्षान्तेन ते नित्यं भाव्यं पुत्त्र समन्ततः। अधमो हि नरो राजा क्षमावानिव कुञ्जरः।
क्षममाणं नृपं नित्यं नीचः परिभवेज्जनः। हस्तियन्ता गजस्येव शिर एवारुरुक्षति।
तस्मान्नैव मृदुर्न्नित्यं तीक्ष्णो नैव भवेन्नृपः। वासन्तार्क इव श्रीमान्न शीतो न च घर्म्मदः। २०२५
प्रत्यक्षेणानुमानेन तथौपम्यागमैरपि। परीक्ष्यास्ते महाराज स्वे परे चैव नित्यशः।
व्यसनानि च सर्व्वाणि त्यजेथा भूरिदक्षिणः। न चैव न प्रयुञ्जीत सङ्गन्तु परिवर्जयेत्।
लोकस्य व्यसनी नित्यं परिभूतो भवत्युत। उद्वेजयति लोकञ्च योऽतिद्वेषी महीपतिः।
भवितव्यं सदा राज्ञा गर्भिणीसहधर्म्मिणा। कारणञ्च महाराज शृणु येनेदमिष्यते।
यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगं। गर्भस्य हितमाधत्ते तथा राज्ञाऽप्यसंशयं। २०३०
वर्त्तितव्यं कुरुश्रेष्ठ सदा धर्म्मानुवर्त्तिना। स्वं प्रियन्तु परित्यज्य यद्यल्लोकहितं भवेत्।
न सन्त्याज्यञ्च ते धैर्य्यं कदाचिदपि पाण्डव। धीरस्य स्पष्टदण्डस्य न भयं विद्यते क्वचित्।
परिहासश्च भृत्यैस्ते नात्यर्थं वदताम्बर। कर्त्तव्यो राजशार्द्दूल दोषमत्र हि मे शृणु।
अवमन्यन्ति भर्त्तारं संहर्षादुपजीविनः। स्वे स्थाने न च तिष्ठन्ति लङ्घयन्त च तत्त्वतः।
प्रेष्यमाणा विकल्पन्ते गुह्यञ्चाप्यनुयुञ्जते। अयाच्यञ्चैव याचन्ते भोज्यान्याहारयन्ति च। २०३५
क्रुध्यन्ति परिदीप्यन्ति भूमिपायाधितिष्ठते। उत्कोचैर्व्वञ्चनाभिश्च कार्य्याण्यनुविहन्ति च।
जर्ज्जरञ्चास्य विषयं कुर्व्वन्ति प्रतिरूपकैः। स्त्रीरक्षिभिश्च सज्जन्ते तुल्यवेशा भवन्ति च।
वातं निष्ठीवनञ्चैव कुर्व्वते चास्य सन्निधौ। निर्लज्जा राजशार्द्दूल व्याहरन्ति च तद्वचः।
हयं वा दन्तिनं वापि रथं वा नृपसम्मतं। अभिरोहन्त्यनादृत्य हर्षुले पार्थिवे मृदौ।
इदन्ते दुष्करं राजन्निदन्ते दुष्टचेष्टितं। इत्येवं सुहृदो वाचं वदन्ते परिसङ्गताः। २०४०
क्रुद्धे चास्मिन् हसन्त्येव न च हृष्यन्ति पूजिताः। संहर्षशीलाश्च तदा भवन्त्यन्योन्यकारणात्।
विस्रंसयन्ति मन्त्रञ्च विवृण्वन्ति च दुष्कृतं। लीलया चैव कुर्व्वन्ति सावज्ञास्तस्य शासनं।
अलङ्कारे च भोज्ये च तथा स्नानानुलेपने। क्रियमाणे नरव्याघ्र स्वस्थास्तस्योपशृण्वतः।
निन्दन्ते स्वानधीकारान् सन्त्यजन्ते च भारत। न वृत्त्या परितुष्यन्ति राजदेयं हरन्ति च।
क्रीडितुं तेन चेच्छन्ति ससूत्रेणेव पक्षिणा। अस्मत्प्रणेयो राजेति लोकांश्चैव वदन्त्युत। २०४५
एते चैवापरे चैव दोषाः प्रादुर्भवन्त्युत। नृपतौ मार्द्दवोपेते हर्षुले च युधिष्ठिर।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि षट्पञ्चाशोऽध्यायः॥ ५६ ॥
॥ भीष्म उवाच ॥ नित्योद्युक्तेन वै राज्ञा भवितव्यं युधिष्ठिर। प्रशस्यते न राजा हि नारीवोद्यमवर्जितः।
भगवानुशना आह श्लोकमत्र विशाम्पते। तदिहैकमना राजन् गदतस्तं निबोध मे।
द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव। राजानञ्चाविरोद्धारं ब्राह्मणञ्चाप्रवासिनं।
तदेतन्नरशार्द्दूल हृदि त्वं कर्त्तुमर्हसि। सन्धेयानपि सन्धत्स्व विरोध्यांश्च विरोधय २०५०
सप्ताङ्गस्य च राज्यस्य विपरीतं य आचरेत्। गुरुर्व्वा यदि वा मित्रं प्रतिहन्तव्य एव सः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मरुत्तेन हि राज्ञा वै गीतः श्लोकः पुरातनः । राजाधिकारे राजेन्द्र बृहस्पतिमते पुरा ।
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः । उत्पथप्रतिपन्नस्य दण्डो भवति शाश्वतः ।
बाहोः पुत्त्रेण राज्ञा च सगरेण च धीमता । असमञ्जाः सुतो ज्येष्ठस्त्यक्तः पौरहितैषिणा ।
असमञ्जाः सरय्वां स पौराणां बालकान्नृप । न्यमज्जयदतः पित्रा निर्भर्त्स्य स विवासितः । २०५५
ऋषिणोद्दालकेनापि श्वेतकेतुर्महातपाः । मिथ्या विप्रानुपचरन् सन्त्यक्तो दयितः सुतः ।
लोकरञ्जनमेवात्र राज्ञां धर्म्मः सनातनः । सत्यस्य रक्षणञ्चैव व्यवहारस्य चार्जनं ।
न हिंस्यात् परवित्तानि देयं काले च दापयेत् । विक्रान्तः सत्यवाक् क्षान्तो नृपो न चलते पथः ।
आत्मवांश्च जितक्रोधः शास्त्रानुगतनिश्चयः । धर्म्मे चार्थे च कामे च मोक्षे च सततं रतः ।
त्रय्यां संवृतमन्त्रश्च राजा भवितुमर्हति । वृजिनञ्च नरेन्द्राणां नान्यच्चारक्षणात् परं । २०६०
चातुर्व्वर्ण्यस्य धर्म्माश्च रक्षितव्या महीक्षिता । धर्म्मसत्काररक्षा च राज्ञां धर्म्मः सनातनः ।
न विश्वसेच्च नृपतिर्न चात्यर्थञ्च विश्वसेत् । षाड्गुण्यगुणदोषांश्च नित्यं बुद्ध्याऽवलोकयेत् ।
द्विट्छिद्रदर्शी नृपतिर्नित्यमेव प्रशस्यते । त्रिवर्गे विदितार्थश्च युक्तचारोपधिश्च यः ।
कोषस्योपार्ज्जनरतिर्यमवैश्रवणोपमः । वेत्ता च गुणदोषस्य स्थानवृद्धिक्षयात्मनः ।
अभृतानां भवेद्भर्त्ता भृतानामन्ववेक्षकः । नृपतिः सुमुखश्च स्यात् स्मितपूर्व्वाभिभाषिता । २०६५
उपासिता च वृद्धानां जिततन्द्रिरलोलुपः । सतां वृत्ते स्थितमतिः सन्तोषाचारदर्शनः ।
न चाददीत वित्तानि सतां हस्तात् कदाचन । असद्भ्यश्च समादद्यात् सद्भ्यस्तु प्रतिपादयेत् ।
स्वयं प्रहर्त्ता दाता च वश्यात्मा रम्यसाधनः । काले दाता च भोक्ता च शुद्धाचारस्तथैव च ।
शूरान् भक्तानसंहार्य्यान् कुले जातानरोगिणः । शिष्टान् शिष्टाभिसम्बन्धान् मानिनोऽनवमानिनः ।
विद्याविदो लोकविदः परलोकान्ववेक्षकान् । धर्म्मे च निरतान् साधूनचलानचलानिव । २०७०
सहायान् सततं कुर्य्याद्राजा भूतिपरिष्कृतः । तैश्च तुल्यो भवेद्भोगैश्छत्रमात्राज्ञयाधिकः ।
प्रत्यक्षा च परोक्षा च वृत्तिश्चास्य भवेत् समा । एवं कुर्व्वन्नरेन्द्रोऽपि न खेदमिह विन्दति ।
सर्व्वाभिशङ्की नृपतिर्यश्च सर्व्वहरो भवेत् । स क्षिप्रमनृजुर्लुब्धः स्वजनेनैव बध्यते ।
शुचिस्तु पृथिवीपालो लोकचित्तग्रहे रतः । न पतत्यरिभिर्ग्रस्तः पतितश्चावतिष्ठते ।
अक्रोधनो ह्यव्यसनी मृदुदण्डो जितेन्द्रियः । राजा भवति भूतानां विश्वास्यो हिमवानिव । २०७५
प्राज्ञस्त्यागगुणोपेतः पररन्ध्रेषु तत्परः । सुदर्शः सर्व्ववर्णानां नयापनयवित्तथा ।
क्षिप्रकारी जितक्रोधः सुप्रसादो महामनाः । अरोषप्रकृतिर्युक्तः क्रियावानविकत्थनः ।
आरब्धान्येव क[illegible]णि सुपर्य्यवसितानि च । यस्य राज्ञः प्रदृश्यन्ते स राजा राजसत्तमः ।
पुत्त्रा इव पितुर्गेहे विषये यस्य मानवाः । निर्भया विचरिष्यन्ति स राजा राजसत्तमः ।
अगूढविभवा यस्य पौरा राष्ट्रनिवासिनः । नयापनयवेत्तारः स राजा राजसत्तमः । २०८०
स्वकर्म्मनिरता यस्य जना विषयवासिनः । असङ्घातरता दान्ताः पाल्यमाना यथाविधि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वश्या नेया विधेयाश्च न च सर्व्वंशीलिनः। विषये दानरुचयो नरा यस्य स पार्थिवः।
न यस्य कूटं कपटं न माया न च मत्सरः। विषये भूमिपालस्य तस्य धर्म्मः सनातनः।
यः सत्करोति ज्ञानानि ज्ञेये पौरहिते रतः। सतां वर्त्मानुगस्त्यागी स राजा राज्यमर्हति।
यस्य चाराश्च मन्त्राश्च नित्यञ्चैव कृताकृताः। न ज्ञायन्ते हि रिपुभिः स राजा राज्यमर्हति। २०८५
श्लोकश्चायं पुरा गीतो भार्गवेण महात्मना। आख्याने रामचरिते नृपतिं प्रति भारत।
राजानम्प्रथमं विन्देत्ततो भार्य्यां ततो धनं। राजन्यसति लोकस्य कुतो भार्य्या कुतो धनं।
तद्राज्ये राज्यकामानां नान्यो धर्म्मः सनातनः। ऋते रक्षान्तु विस्पष्टां रक्षा लोकस्य धारिणी।
प्राचेतसेन मनुना श्लोकौ चेमावुदाहृतौ। राजधर्म्मेषु राजेन्द्र ताविहैकमनाः शृणु।
षडेतान् पुरुषो जह्याद्भिन्नां नावमिवार्णवे। अप्रवक्तारमाचार्य्यमनधीयानमृत्विजं। २०९०
अरक्षितारं राजानं भार्य्याञ्चाप्रियवादिनीं। ग्रामकामञ्च गोपालं वनकामञ्च नापितं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्तपञ्चाशोऽध्यायः॥ ५७ ॥
॥ भीष्म उवाच॥ एतत्ते राजधर्म्माणां नवनीतं युधिष्ठिर। बृहस्पतिर्हि भगवान् नान्यं धर्म्मं प्रशंसति।
विशालाक्षश्च भगवान् काव्यश्चैव महातपाः। सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः।
भारद्वाजश्च भगवांस्तथा गौरशिरा मुनिः। राजशास्त्रप्रणेतारो ब्रह्मण्या ब्रह्मवादिनः।
रक्षामेव प्रशंसन्ति धर्म्मं धर्म्मभृताम्बर। राज्ञां राजीवताम्राक्ष साधनञ्चात्र मे शृणु। २०९५
चारश्च प्रणिधिश्चैव काले दानममत्सरात्। युक्त्यादानं न चादानमयोगेन युधिष्ठिर।
सतां संग्रहणं शौर्य्यं दाक्ष्यं सत्यं प्रजाहितं। अनार्ज्जवैरार्ज्जवैश्च शत्रुपक्षस्य भेदनं।
केतनानाञ्च जीर्णानामवेक्षा चैव सीदतां। द्विविधस्य च दण्डस्य प्रयोगः कालचोदितः।
साधूनामपरित्यागः कुलीनानाञ्च धारणं। निचयश्च निचेयानां सेवा बुद्धिमतामपि।
बलानां हर्षणं नित्यं प्रजानामन्ववेक्षणं। कार्य्येष्वखेदः कोषस्य तथैव च विवर्द्धनं। २१००
पुरगुप्तिरविश्वासः पौरसंघातभेदनं। अरिमध्यस्थमित्राणां यथावच्चान्ववेक्षणं।
उपजापश्च भृत्यानामात्मनः पुरदर्शनं। अविश्वासः स्वयञ्चैव परस्याश्वासनं तथा।
नीतिधर्म्मानुसरणं नित्यमुत्थानमेव च। रिपूणामनवज्ञानं नित्यञ्चानार्य्यवर्ज्जनं।
उत्थानं हि नरेन्द्राणां बृहस्पतिरभाषत। राजधर्म्मस्य तन्मूलं श्लोकांश्चात्र निबोध मे।
उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः। उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च। २१०५
उत्थानवीरः पुरुषो वाग्वीरानधितिष्ठति। उत्थानवीरान् वाग्वीरा रमयन्त उपासते।
उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः। प्रधर्षणीयः शत्रूणां भुजङ्ग इव निर्व्विषः।
न च शत्रुरवज्ञेयो दुर्व्बलोऽपि बलीयसा। अल्पोऽपि हि दहत्यग्निर्व्विषमल्पं हिनस्ति च।
एकाङ्गेनापि सम्भूतः शत्रुर्दुर्गमुपाश्रितः। सर्व्वं तापयते देशमपि राज्ञः समृद्धिनः।
राज्ञो रहस्यं तद्वाक्यं यथार्थं लोकसंग्रहः। हृदि यच्चास्य जिह्मं स्यात् कारणेन च यद्भवेत्। २११०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यच्चास्य कार्य्यं वृजिनमार्ज्जवेनेह निर्ज्जयेत् । दम्भनार्थञ्च लोकस्य धर्म्मिष्ठामाचरेत् क्रियां ।
राज्यं हि सुमहत्तन्त्रं धार्य्यते नाकृतात्मभिः । न शक्यं मृदुना वोढुं भार्य्यासंस्थानमुत्तमं ।
राज्यं सर्व्वाभिरं नित्यमार्ज्जवे नेह धार्य्यते । तस्मान्मिश्रेण सततं वर्त्तितव्यं युधिष्ठिर ।
यद्यप्यस्य विपत्तिः स्याद्रक्षमाणस्य वै प्रजाः । सोऽप्यस्य विपुलो धर्म्म एवं वृत्ता हि भूमिपाः ।
एष ते राजधर्म्माणां लेशः समनुवर्णितः । भूयस्ते यत्र सन्देहस्तद्ब्रूहि कुरुसत्तम । २११५
॥ वैशम्पायन उवाच ॥ ततो व्यासश्च भगवान् देवस्थानोऽश्म एव च । वासुदेवः कृपश्चैव सात्यकिः सञ्जयस्तथा ।
साधुसाध्विति संहृष्टाः पुष्यमाणैरिवाननैः । अस्तुवंस्तु नरव्याघ्रं भीष्मं धर्म्मभृताम्वरं ।
ततो दीनमना भीष्ममुवाच कुरुसत्तमः । नेत्राभ्यामश्रुपूर्णाभ्यां पादौ तस्य शनैः स्पृशन् ।
श्व इदानीं स्वसन्देहं प्रक्ष्यामि त्वां पितामह । उपैति सविता ह्यस्तं रसमापीय पार्थिवं ।
ततो द्विजातीनभिवाद्य केशवः कृपश्च ते चैव युधिष्ठिरादयः । प्रदक्षिणीकृत्य महानदीसुतं ततो रथानारुरुहुर्मुदा
न्विताः । २१२०
दृषद्वतीञ्चाप्यवगाह्य सुव्रता. कृतोदकार्थाः कृतजप्यमङ्गलाः । उपास्य सन्ध्या विधिवत् परन्तपास्ततः पुरं ते विविशुर्गजाह्वय ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि युधिष्ठिरादिसायङ्कमे अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ वैशम्पायन उवाच ॥ ततः कल्यं समुत्थाय कृतपूर्व्वाह्णिकक्रियाः । ययुस्ते नगराकारै रथैः पाण्डवयादवाः ।
प्रतिपद्य कुरुक्षेत्रं भीष्ममासाद्य चानघं । सुखाञ्च रजनीं पृष्ट्वा गाङ्गेयं रथिनाम्वरं ।
व्यासादीनभिवाद्यर्षीन् सर्व्वैस्तैश्चाभिनन्दिताः । निषेदुरभितो भीष्मं परिवार्य्य समन्ततः ।
ततो राजा महातेजा धर्म्मराजो युधिष्ठिरः । अब्रवीत् प्राञ्जलिर्भीष्मं प्रतिपूज्य यथाविधि । २१२५
॥ युधिष्ठिर उवाच ॥ य एष राजन् राजेति शब्दश्चरति भारत । कथमेष समुत्पन्नस्तन्मे ब्रूहि परन्तप ।
तुल्यपाणिभुजग्रीवस्तुल्यबुद्धीन्द्रियात्मकः । तुल्यदुःखसुखात्मा च तुल्यपृष्ठमुखोदरः ।
तुल्यशुक्रास्थिमज्जाश्च तुल्यमांसासृगेव च । निश्वासोच्छ्वासतुल्यश्च तुल्यप्राणशरीरवान् ।
समानजन्ममरणः समः सर्व्वैर्गुणैर्नृणां । विशिष्टबुद्धीन् शूरांश्च कथमेकोऽधितिष्ठति ।
कथमेकोमहीं कृत्स्नां शूरवीरार्य्यसङ्कुलां । रक्षत्यपि च लोकस्य प्रसादमभिवाञ्छति । २१३०
एकस्य तु प्रसादेन कृत्स्नो लोकः प्रसीदति । व्याकुले चाकुलः सर्व्वो भवतीति विनिश्चयः ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन भरतर्षभ । कृत्स्नं तन्मे यथातत्त्वं प्रब्रूहि वदताम्वर ।
नैतत्कारणमल्पं हि भविष्यति विशाम्पते । यदेकस्मिन् जगत् सर्व्वं देववद्याति सन्नतिं ।
॥ भीष्म उवाच ॥ नियतस्त्वं नरव्याघ्र शृणु सर्व्वमशेषतः । यथा राज्यं समुत्पन्नमादौ कृतयुगेऽभवत् ।
नैव राज्यं न राजासीन्न च दण्डो न दाण्डिकः । धर्म्मेणैव प्रजाः सर्व्वा रक्षन्ति स्म परस्परं । २१३५
पाल्यमानास्तथान्योन्यं नरा धर्म्मेण भारत । खेदं परमुपाजग्मुस्ततस्तान्मोह आविशत् ।
ते मोहवशमापन्ना मनुजा मनुजर्षभ । प्रतिपत्तिविमोहाच्च धर्म्मस्तेषामनीनशत् ।
नष्टायां प्रतिपत्तौ च मोहवश्या नरास्तथा । लोभस्य वशमापन्नाः सर्व्वे भरतसत्तम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अप्राप्तयाभिमर्षन्तु कुर्व्वन्तो मनुजास्ततः । कामो नामापरस्तत्र प्रत्यपद्यत वै प्रभो ।
तांस्तु कामवशं प्राप्तान् रागो नामाभिसंस्पृशत् । रक्ताश्च नाभ्यजानन्त कार्य्याकार्य्ये युधिष्ठिर ।
अगम्यागमनञ्चैव वाच्यावाच्यन्तथैव च । भक्ष्याभक्ष्यञ्च राजेन्द्र दोषादोषञ्च नात्यजन् ।
विप्लुते नरलोके वै ब्रह्म चैव ननाश ह । नाशाच्च ब्रह्मणो राजन् धर्म्मो नाशमथागमत् ।
नष्टे ब्रह्मणि धर्म्मे च देवांस्त्रासः समाविशत् । ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः ।
प्रसाद्य भगवन्तं ते देवं लोकपितामहं । ऊचुः प्राञ्जलयः सर्व्वे दुःखवेगसमाहताः ।
भगवन्नरलोकस्थं ग्रस्तं ब्रह्म सनातनं । लोभमोहादिभिर्भावैस्ततो नो भयमाविशत् ।
ब्रह्मणश्च प्रणाशेन धर्म्मो व्यनशदीश्वर । ततः स्म समतां याता मर्त्यैस्त्रिभुवनेश्वर ।
अधो वर्षाम हि वयं नरास्तूर्द्ध्वप्रवर्षिणः । क्रियाव्युपरमात्तेषां ततो गच्छाम संशयं ।
अत्र निःश्रेयसं यन्नस्तद्ध्यायस्व पितामह । त्वत्प्रभावसमुत्थोऽसौ स्वभावो नो विनश्यति ।
तानुवाच सुरान् सर्व्वान् स्वयम्भूर्भगवांस्ततः । श्रेयोऽहञ्चिन्तयिष्यामि व्येतु वो भीः सुरर्षभाः ।
ततोऽध्यायसहस्राणां शतञ्चक्रे स्वबुद्धिजं । यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णितः ।
त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा । चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः ।
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वरजस्तमः । स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ।
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च । सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः ।
त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ । दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ।
अमात्यरक्षा प्रणिधी राजपुत्त्रस्य लक्षणं । चारश्च विविधोपायः प्रणिधेयः पृथग्विधः ।
सामभेदः प्रदानञ्च ततो दण्डश्च पार्थिव । उपेक्षा पञ्चमी चात्र कार्त्स्न्येनैवमुदाहृता ।
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च । विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलं ।
सन्धिश्च त्रिविधाभिख्यो हीनो मध्यस्तथोत्तमः । भयसत्कारवित्ताख्यः कार्त्स्न्येन परिवर्णितं ।
यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः । विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह ।
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः । लक्षणं पञ्चवर्गस्य त्रिविधञ्चात्र वर्णितं ।
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः । प्रकाशोऽष्टविधस्तत्र गुह्यस्य च सुविस्तरः ।
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव । विष्टिर्नावश्चराश्चेह दैशिका इति चाष्टमं ।
अङ्गान्येतानि कौरव्य प्रकाशानि बलस्य तु । जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ।
स्पर्शे चाभ्यवहार्य्ये चाप्युपांशुस्त्रिविधः स्मृतः । अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः ।
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह । आत्मरक्षणमाश्वासः स्पशानाञ्चान्ववेक्षणं ।
कल्पना विविधाश्चापि नृनागरथवाजिनां । व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलं ।
उत्पातांश्च निपातांश्च सुयुद्धं सुपलायितं । शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ।
बलव्यसनमुक्तञ्च तथैव बलहर्षणं । पीडा चापदकालश्च पत्तिज्ञानञ्च पाण्डव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा ख्यातविधानञ्च योगसञ्चार एव च। चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीडनं।
अग्निदैर्गरदैश्चैव प्रतिरूपककारकैः। श्रेणीमुख्योपजापेन वीरुधश्छेदनेन च। २१७०
भूषणेन च नागानामातङ्कजननेन च। आराधनेन भक्तस्य प्रत्ययोपार्ज्जनेन च।
सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धी समञ्जसं। कृतसामर्थ्ययोगाश्च राष्ट्रस्य च विवर्द्धनं।
अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनं। अवमर्द्दः प्रतीघातस्तथा चैव बलीयसां।
व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनं। शमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः।
अभृतानाञ्च भरणं भृतानाञ्चान्ववेक्षणं। अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता। २१७५
तथा राजगुणाश्चैव सेनापतिगुणाश्च ह। कारणञ्च त्रिवर्गस्य गुणा दोषास्तथैव च।
दुष्टेङ्गितञ्च विविधं वृत्तिश्चैवानुवर्त्तिनां। शङ्कितत्वञ्च सर्व्वस्य प्रसादस्य च वर्ज्जनं।
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनं। प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्ततः।
विसर्गोऽर्थस्य धर्म्मार्थं कामहेतुकमुच्यते। चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितं।
क्रोधजानि तथोग्राणि कामजानि तथैव च। दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैव ह। २१८०
मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ। कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा।
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च। निग्रहोऽप्यात्मनस्त्यागमर्थदूषणमेव च।
यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः। अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनं।
चैत्यद्रुमावमर्द्दश्च रोधः कर्म्मानुशासनं। अपस्करोऽथ गमन तथोपायाश्च वर्णिताः।
पणवानकशङ्खानां भेरीणाञ्च युधिष्ठिर। उपार्ज्जनञ्च द्रव्याणां परिमर्द्दश्च तानि षट्। २१८५
लब्धस्य च प्रशमनं सताञ्चैवाभिपूजनं। विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता।
मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया। आहारयोजनञ्चैव नित्यमास्तिक्यमेव च।
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः। उत्सवानां समाजानां क्रिया केतनजास्तथा।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ। वृत्ते भरतशार्द्दूल नित्यञ्चैवान्ववेक्षणं।
अदण्ड्यत्वञ्च विप्राणां युक्त्या दण्डनिपातनं। अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भवः। २१९०
रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनं। मण्डलस्था च या चिन्ता राजन् द्वादशराजिका।
द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया। देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः।
धर्म्मस्यार्थस्य कामस्य मोक्षस्यात्रानुवर्णितः। उपायश्चार्थलिप्सा च विविधा भूरिदक्षिण।
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः। दूषणं स्रोतसाञ्चैव वर्णितञ्च स्थिराम्भसां।
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः। तत्सर्व्वं राजशार्द्दूल नीतिशास्त्रेऽभिवर्णितं। २१९५
एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः। देवानुवाच संहृष्टः सर्व्वाञ्छक्रपुरोगमान्।
उपकाराय लोकस्य त्रिवर्गस्थापनाय च। नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता।
दण्डेन सहिता ह्येषा लोकरक्षणकारिका। निग्रहानुग्रहरता लोकाननुचरिष्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दण्डेन नीयते चेदं दण्डं नयति वा पुनः । दण्डनीतिरिति ख्याता त्रींल्लोकानभिवर्त्तते ।
षाड्गुण्यगुणसारैषा स्थास्यत्यग्रे महात्मसु । धर्म्मार्थकाममोक्षाश्च सकला ह्यत्र शब्दिताः ।
ततस्तां भगवान्नीतिं पूर्व्वं जग्राह शङ्करः । बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः ।
प्रजानामायुषो ह्रासं विज्ञाय भगवान् शिवः । सञ्चिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतं ।
विशालाक्षमिति प्रोक्तं तदिदं प्रत्यपद्यत । दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः ।
भगवानपि तच्छास्त्रं सञ्चिक्षेप पुरन्दरः । सहस्रैः पञ्चभिस्तात यदुक्तं बाहुदन्तकं ।
अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः । सञ्चिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं यदुच्यते ।
अध्यायानां सहस्रेण काव्यः सङ्क्षेपमब्रवीत् । तच्छास्त्रममितप्रज्ञो योगाचार्य्यो महायशाः ।
एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः । संक्षिप्तमायुर्व्विज्ञाय मर्त्यानां ह्रासमेव च ।
अथ देवाः समागम्य विष्णुमूचुः प्रजापतिं । एको योऽर्हति मर्त्येभ्यः श्रैष्ठं तं वै समादिश ।
ततः सञ्चिन्त्य भगवान् देवो नारायणः प्रभुः । तैजसं वै विरजसं सोऽसृजन्मानसं सुतं ।
विरजास्तु महाभागः प्रभुत्वं भुवि नैच्छत । न्यासायैवाभवद्बुद्धिः प्रणीता तस्य पाण्डव ।
कीर्त्तिमांस्तस्य पुत्त्रोऽभूत् सोऽपि पञ्चातिगोऽभवत् । कर्द्दमस्तस्य तु सुतः सोऽप्यतप्यन्महत्तपः ।
प्रजापतेः कर्द्दमस्य त्वनङ्गो नाम वै सुतः । प्रजा रक्षयिता साधुर्द्दण्डनीतिविशारदः ।
अनङ्गपुत्त्रोऽतिबलो नीतिमानभिगम्य वै । प्रतिपेदे महाराज्यमथेन्द्रियवशोऽभवत् ।
मृत्योस्तु दुहिता राजन् सुनीथा नाम मानसी । प्रख्याता त्रिषु लोकेषु या सा वेनमजीजनत् ।
तं प्रजासु विधर्म्माणं रागद्वेषवशानुगं । मन्त्रपूतैः कुशैर्जघ्नुर्ऋषयो ब्रह्मवादिनः ।
ममन्थुर्द्दक्षिणञ्चोरुमृषयस्तस्य मन्त्रतः । ततोऽस्य विकृतो जज्ञे ह्रस्वाङ्गः पुरुषो भुवि ।
दग्धेन्धनप्रतीकाशो रक्ताक्षः कृष्णमूर्द्धजः । निषीदेत्येवमूचुस्तमृषयो ब्रह्मवादिनः ।
तस्मान्निषादाः सम्भूताः क्रूराः शैलवनाश्रयाः । ये चान्ये विन्ध्यनिलया म्लेच्छाः शतसहस्रशः ।
भूयोऽस्य दक्षिणं पाणिं ममन्थुस्ते महर्षयः । ततः पुरुष उत्पन्नो रूपेणेन्द्र इवापरः ।
कवची बद्धनिस्त्रिंशः सशरः सशरासनः । वेदवेदाङ्गविच्चैव धनुर्व्वेदे च पारगः ।
तं दण्डनीतिः सकलाश्रिता राजन्नरोत्तमं । ततस्तु प्राञ्जलिर्व्वैन्यो महर्षींस्तानुवाच ह ।
सुसूक्ष्मा मे समुत्पन्ना बुद्धिर्धर्म्मार्थदर्शिनी । अनया किं मया कार्य्यं तन्मे तत्त्वेन शंसत ।
यन्मां भवन्तो वक्ष्यन्ति कार्य्यमर्थसमन्वितं । तदहं वै करिष्यामि नात्र कार्य्या विचारणा ।
तमूचुस्तत्र देवास्ते ते चैव परमर्षयः । नियतो यत्र धर्म्मो वै तमशङ्कः समाचर ।
प्रियाप्रिये परित्यज्य समः सर्व्वेषु जन्तुषु । कामक्रोधौ च लोभञ्च मानञ्चोत्सृज्य दूरतः ।
यश्च धर्म्मात् प्रविचलेल्लोके कश्चन मानवः । निग्राह्यास्ते स्वबाहुभ्यां शश्वद्धर्म्ममवेक्षता ।
प्रतिज्ञाञ्चाधिरोहस्व मनसा कर्म्मणा गिरा । पालयिष्याम्यहं भौमं ब्रह्म इत्येव चासकृत् ।
यश्चात्र धर्म्मो नीत्युक्तो दण्डनीतिव्यपाश्रयः । तमशङ्कः करिष्यामि स्ववशो न कदाचन ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अदण्ड्या मे द्विजाश्चेति प्रतिजानीहि हे विभो। लोकञ्च सङ्करात् कृत्स्नं त्राताऽस्मीति परन्तप।
वैन्यस्ततस्तानुवाच देवानृषिपुरोगमान्। ब्राह्मणा मे महाभागा नमस्याः पुरुषर्षभाः।
एवमस्त्विति वैन्यस्तु तैरुक्तो ब्रह्मवादिभिः। पुरोधाश्चाभवत्तस्य शुक्रो ब्रह्ममयो निधिः।
मन्त्रिणो बालखिल्याश्च सारस्वत्योगणस्तथा। महर्षिर्भगवान् गर्गस्तस्य सांवत्सरोऽभवत्।
आत्मनाष्टमइत्येव श्रुतिरेषा परा नृषु। उत्पन्नौ वन्दिनौ चास्य तत्पूर्व्वौ सूतमागधौ।
तयोः प्रीतो ददौ राजा पृथुर्व्वैन्यः प्रतापवान्। अनूपदेशं सूताय मगधं मागधाय च।
समतां वसुधायाश्च स सम्यगुदपादयत्। वैषम्यं हि परं भूमेरासीदिति च नः श्रुतं।
मन्वन्तरेषु सर्व्वेषु विषमा जायते मही। उज्जहार ततो वैन्यः शिलाजालान् समन्ततः।
धनुष्कोट्या महाराज तेन शैला विवर्द्धिताः। स विष्णुना च देवेन शक्रेण विबुधैः सह।
ऋषिभिश्च प्रजापालैर्ब्राह्मणैश्चाभिषेचितः। तं साक्षात् पृथिवी भेजे रत्नान्यादाय पाण्डव।
सागरः सरितां भर्त्ता हिमवांश्चाचलोत्तमः। शक्रश्च धनमक्षय्यं प्रादात्तस्मै युधिष्ठिर।
रुक्मञ्चापि महामेरुः स्वयं कनकपर्व्वतः। यक्षराक्षसभर्त्ता च भगवान्नरवाहनः।
धर्म्मे चार्थे च कामे च समर्थं प्रददौ धनं। हया रथाश्च नागाश्च कोटिशः पुरुषास्तथा।
प्रादुर्ब्बभूवुर्व्वैन्यस्य चिन्तनादेव पाण्डव। न जरा न च दुर्भिक्षं नाधयो व्याधयस्तथा।
सरीसृपेभ्यः स्तेनेभ्यो न चान्योऽन्यात् कदाचन। भयमुत्पद्यते तत्र तस्य राज्ञोऽभिरक्षणात्।
आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः। पर्व्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत्।
तेनेयं पृथिवी दुग्धा सस्यानि दश सप्त च। यक्षराक्षसनागैश्चापीप्सितं यस्य यस्य यत्।
तेन धर्म्मोत्तरश्चायं कृतो लोको महात्मना। रञ्जिताश्च प्रजाः सर्व्वास्तेन राजेति शब्द्यते।
ब्राह्मणानां क्षतत्राणात्ततः क्षत्त्रिय उच्यते। प्रथिता धर्म्मतस्त्वेयं पृथिवी बहुभिः स्तुता।
स्थापनञ्चाकरोद्विष्णुः स्वयमेव सनातनः। नातिवर्त्तिष्यते कश्चिद्राजंस्त्वामिति भारत।
तपसा भगवान् विष्णुराविवेश च भूमिपं। देववन्नरदेवानां नमते यं जगन्नृप।
दण्डनीत्या च सततं रक्षितव्यं नरेश्वर। नाधर्षयेत्तथा कश्चिच्चारनिष्ठानुदर्शनात्।
शुभं हि कर्म्म राजेन्द्र शुभत्वायोपकल्पते। आत्मना कारणैश्चैव समस्येह महीक्षितः।
को हेतुर्यद्वशे तिष्ठेल्लोको दैवादृते गुणात्। विष्णोर्ललाटात् कमलं सौवर्णमभवत्तदा।
श्रीः सम्भूता यतो देवी पत्नी धर्म्मस्य धीमतः। श्रियः सकाशादर्थश्च जातो धर्म्मेण पाण्डव।
अथ धर्म्मस्तथैवार्थः श्रीश्च राज्ये प्रतिष्ठिता। सुकृतस्य क्षयाच्चैव स्वर्लोकादेत्य मेदिनीं।
पार्थिवो जायते तात दण्डनीतिविशारदः। महत्त्वेन च संयुक्तो वैष्णवेन नरो भुवि।
बुद्ध्या भवति संयुक्तो माहात्म्यञ्चाधिगच्छति। स्थापितञ्च ततो देवैर्न कश्चिदतिवर्त्तते।
तिष्ठत्येकस्य च वशे तच्चेदं न विधीयते। शुभं हि कर्म्म राजेन्द्र शुभत्वायोपकल्पते।
तुल्यलोकस्य यस्यायं लोको वचसि तिष्ठति। योऽस्य वै मुखमद्राक्षीत् सौम्यं सोऽस्य वशानुगः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुभगश्चार्थवन्तश्च रूपवन्तश्च पश्यति। महत्त्वात्तस्य दण्डस्य नीतिर्व्विस्पष्टलक्षणा।
नयचारश्च विपुलो येन धर्म्मिदं ततं। आगमश्च पुराणानां महर्षीणाञ्च सम्भवः।
तीर्थवंशश्च वंशश्च नक्षत्राणां युधिष्ठिर। सकलञ्चातुराश्रम्यं चातुर्हौत्रं तथैव च।
चातुर्व्वर्ण्यन्तथैवात्र चातुर्व्विद्यञ्च कीर्त्तितं। इतिहासाश्च वेदाश्च न्यायः कृत्स्नश्च वर्णितः।
तपो ज्ञानमहिंसा च सत्यासत्ये नयः परः। वृद्धोपसेवा दानञ्च शौचमुत्थानमेव च।
सर्व्वभूतानुकम्पा च सर्व्वमत्रोपवर्णितं। भुवि चाधोगतं यच्च तच्च सर्व्वं समर्पितं।
तस्मिन् पैतामहे शास्त्रे पाण्डवैतन्न संशयः। ततो जगति राजेन्द्र सततं शब्दितं बुधैः।
देवाश्च नरदेवाश्च तुल्या इति विशाम्पते। एतत्ते सर्व्वमाख्यातं महत्त्वं प्रतिराजसु।
कार्त्स्न्येन भरतश्रेष्ठ किमन्यदिह वर्त्तते।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सूत्राध्याये ऊनषष्टोऽध्यायः॥ ५९॥

॥ वैशम्पायन उवाच॥ ततः पुनः स गाङ्गेयमभिवाद्य पितामहं। प्राञ्जलिर्नियतो भूत्वा पर्य्यपृच्छद्युधिष्ठिरः।
के धर्म्माः सर्व्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक्। चातुर्व्वर्ण्याश्रमाणाञ्च राजधर्म्माश्च के मताः।
केन वै वर्द्धते राष्ट्रं राजा केन विवर्द्धते। केन पौराश्च भृत्याश्च वर्द्धन्ते भरतर्षभ।
कोशं दण्डञ्च दुर्गञ्च सहायान्मन्त्रिणस्तथा। ऋत्विक्पुरोहिताचार्य्यान् कीदृशान् वर्ज्जयेन्नृपः।
केषु विश्वसितव्यं स्याद्राज्ञा कस्याञ्चिदापदि। कुतो वात्मा दृढं रक्ष्यस्तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ नमो धर्म्माय महते नमः कृष्णाय वेधसे। ब्राह्मणेभ्यो नमस्कृत्य धर्म्मान् वक्ष्यामि शाश्वतान्।
अक्रोधः सत्यवचनं संविभागः क्षमा तथा। प्रजनः स्वेषु दारेषु शौचमद्रोह एव च।
आर्ज्जवं भृत्यभरणं न वैते सार्व्ववर्णिकाः। ब्राह्मणस्य तु यो धर्म्मस्तन्ते वक्ष्यामि केवलं।
दममेव महाराज धर्म्ममाहुः पुरातनं। स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते।
तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्म्मणि। अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितं।
कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च। संविभज्य हि भोक्तव्यं धनं सद्भिरितीर्य्यते।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते।
क्षत्रियस्यापि यो धर्म्मस्तन्ते वक्ष्यामि भारत। दद्याद्राजन्न याचेत यजेत न च याजयेत।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमं।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च भूमिपाः। य एवाहवजेतारस्त एषां लोकजित्तमाः।
अविक्षतेन देहेन समराद्यो निवर्त्तते। क्षत्रियो नास्य तत् कर्म्म प्रशंसन्ति पुराविदः।
एवं हि क्षत्रबन्धूनां मार्गमाहुः प्रधानतः। नास्य कृत्यतमं किञ्चिदन्यद्दस्युनिवर्हणात्।
दानमध्ययनं यज्ञो राज्ञां क्षेमो विधीयते। तस्माद्राज्ञा विशेषेण योद्धव्यं धर्म्ममीप्सता।
स्वेषु धर्म्मेष्ववस्थाप्य प्रजाः सर्व्वा महीपतिः। धर्म्मेण सर्व्वकृत्यानि शमनिष्ठानि कारयेत्।
परिनिष्ठितकार्य्यस्तु नृपतिः परिपालनात्। कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वैश्यस्यापि हि यो धर्म्मस्तन्ते वक्ष्यामि शाश्वतं । दानमध्ययनं यज्ञः शौचेन धनसञ्चयः ।
पितृवत् पालयेद्वैश्यो युक्तः सर्व्वान् पशूनिह । विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत् ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् । प्रजापतिर्हि वैश्याय सृष्ट्वा परिददौ पशून् । २२९०
ब्राह्मणाय च राज्ञे च सर्व्वाः परिददे प्रजाः । तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनं ।
षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं हरेत् । लब्धाच्च सप्तमं भागं तथाऽशृङ्गे कलाऽखुरे ।
शस्यानि सर्व्वबीजानामेषा सांवत्सरी भृतिः । न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन । शूद्रस्यापि हि यो धर्म्मस्तन्ते वक्ष्यामि भारत ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् । तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते । २२९५
तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात् । शूद्र एतान् परिचरेत्त्रीन् वर्णाननुपूर्व्वशः ।
सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन । पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः । तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनं ।
अवश्यभरणीयो हि वर्णानां शूद्र उच्यते । छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे । अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः । २३००
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत् । यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् ।
कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः । देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्व्बलौ ।
शूद्रेण तु न हातव्यो भर्त्ता कस्याञ्चिदापदि । अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये ।
न हि स्वमस्ति शूद्रस्य भर्तृहार्य्यधनो हि सः । उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च भारत ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते । तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान् स्वयं । २३०५
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणां । शूद्रः पैजवनो नाम सहस्राणां शतं ददौ ।
ऐन्द्राग्नेन विधानेन दक्षिणामिति नः श्रुतं । यतो हि सर्व्ववर्णानां यज्ञस्तस्यैव भारत ।
अग्रे सर्व्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते । दैवतं हि महच्छ्रद्धापवित्रं यजताञ्च यत् ।
दैवतं हि परं विप्राः स्वेन स्वेन परस्परं । अयजन्निह सत्रैस्ते तैस्तैः कामैः समाहितैः ।
संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः । देवानामपि ये देवा यद्ब्रूयुस्ते परं हितं । २३१०
तस्माद्वर्णैः सर्व्वयज्ञाः संसृज्यन्ते न काम्यया । ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्देववद्द्विजः ।
अनृग्यजुरसामा च प्राजापत्य उपद्रवः । यज्ञो मनीषया तात सर्व्ववर्णेषु भारत ।
नास्य यज्ञकृतो देवा ईहन्ते नेतरे जनाः । ततः सर्व्वेषु वर्णेषु श्रद्धायज्ञो विधीयते ।
स्वं दैवतं ब्राह्मणस्तेन नित्यं परान् वर्णानयजन्नैवमासीत् । अधरो वितानः संसृष्टो वैश्या ब्राह्मणस्त्रिषु वर्णेषु यज्ञसृष्टः ।
तस्माद्वर्णा ऋजवो ज्ञातिवर्णाः संसृज्यन्ते तस्य विकार एव । एकं साम यजुरेकं ऋगेका विप्रश्चैको निश्चये तेषु सृष्टः । २३१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अत्र गाथा यज्ञगीताः कीर्त्तयन्ति पुराविदः । वैखानसानां राजेन्द्र मुनीनां यष्टुमिच्छतां ।
उदितेऽनुदिते वापि श्रद्दधानो जितेन्द्रियः । वह्निं जुहोति धर्म्मेण श्रद्धा वै कारणं महत् ।
यत् स्कन्नमस्य तत् पूर्व्वं तदस्कन्नं यदुत्तरं । बहूनि यज्ञरूपाणि नानाकर्म्मफलानि च ।
तानि यः सम्प्रजानाति ज्ञाननिश्चयनिश्चितः । द्विजातिः श्रद्धयोपेतः स यष्टुं पुरुषोऽर्हति ।
स्तेनो वा यदि वा पापो यदि वा पापकृत्तमः । यष्टुमिच्छति यज्ञं यः साधुमेव वदन्ति तं । २२२०
ऋषयस्तं प्रशंसन्ति साधु चैतदसंशयं । सर्व्वथा सर्व्वदा वर्णैर्यष्टव्यमिति निर्णयः ।
न हि यज्ञसमं किञ्चित्त्रिषु लोकेषु विद्यते । तस्माद्यष्टव्यमित्याहुः पुरुषेणानसूयता ।
श्रद्धापवित्रमाश्रित्य यथाशक्ति यथेच्छया ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने षष्टितमोऽध्यायः ॥ ६० ॥
॥ भीष्म उवाच ॥ आश्रमाणां महाबाहो शृणु सत्यपराक्रम । चतुर्णामपि नामानि कर्म्माणि च युधिष्ठिर ।
वानप्रस्थं भैक्षचर्य्यं गार्हस्थ्यञ्च महाश्रमं । ब्रह्मचर्य्याश्रमं प्राहुश्चतुर्थं ब्राह्मणैर्वृतं । २२२५
जटाधरणसंस्कारं द्विजातित्वमवाप्य च । आधानादीनि कर्म्माणि प्राप्य वेदमधीत्य च ।
सदारो वाऽप्यदारो वा आत्मवान् संयतेन्द्रियः । वानप्रस्थाश्रमं गच्छेत् कृतकृत्यो गृहाश्रमात् ।
तत्रारण्यकशास्त्राणि समधीत्य स धर्म्मवित् । ऊर्द्ध्वरेताः प्रव्रजित्वा गच्छत्यक्षरसात्मतां ।
एतान्येव निमित्तानि मुनीनामूर्द्ध्वरेतसां । कर्त्तव्यानीह विप्रेण राजन्नादौ विपश्चिता ।
चरितब्रह्मचर्य्यस्य ब्राह्मणस्य विशाम्पते । भैक्षचर्य्यास्वधीकारः प्रशस्त इह मोक्षिणः । २२३०
यत्रास्तमितशायी स्यान्निराशीरनिकेतनः । यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ।
निराशीः स्यात् सर्व्वसमो निर्भोगो निर्व्विकारवान् । विप्रः क्षेमाश्रमं प्राप्तो गच्छत्यक्षरसात्मतां ।
अधीत्य वेदान् कृतसर्व्वकृत्यः सन्तानमुत्पाद्य सुखानि भुक्त्वा । समाहितः प्रचरेद्दुश्चरं यो गार्हस्थ्यधर्म्मं मुनिधर्म्मजुष्टं ।
स्वदारतुष्टस्त्वृतुकालगामी नियोगसेवी न शठो न जिह्मः । मिताशनो देवरतः कृतज्ञः सत्यो मृदुश्चानृशंसः क्षमावान् ।
दान्तो विधेयो हव्यकव्येऽप्रमत्तो ह्यन्नस्य दाता सततं द्विजेभ्यः । अमत्सरी सर्व्वलिङ्गिप्रदाता वैताननित्यश्च गृहाश्रमी स्यात् । २२३५
अथात्र नारायणगीतमाहुर्म्महर्षयस्तात महानुभावाः । महार्थमत्यन्ततपःप्रयुक्तं तदुच्यमानं हि मया निबोध ।
सत्यार्ज्जवञ्चातिथिपूजनञ्च धर्म्मस्तथाऽर्थश्च रतिः स्वदारैः । निषेवितव्यानि सुखानि लोके ह्यस्मिन् परे चैव मतं ममैतत् ।
भरणं पुत्त्रदाराणां वेदानां धारणं तथा । वसतामाश्रमश्रेष्ठं वदन्ति परमर्षयः ।
एवं हि यो ब्राह्मणो यज्ञशीलो गार्हस्थ्यमध्यावसते यथावत् । गृहस्थवृत्तिं प्रविशोध्य सम्यक् स्वर्गे विशुद्धं फलमाप्नुते सः ।
तस्य देहपरित्यागादिष्टाः कामाक्षया मताः । आनन्त्यायोपतिष्ठन्ति सर्व्वतोऽक्षिशिरोमुखाः । २२४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्मरन्नेको जपन्नेकः सर्व्वानेको युधिष्ठिर । एकस्मिन्नेव चाचार्य्ये शुश्रूषुर्म्मलपङ्कवान् ।

ब्रह्मचारी व्रती नित्यं नित्यं दीक्षापरो वशी । परिचर्य्य तथा वेदं कृत्यं कुर्व्वन् वसेत् सदा ।

शुश्रूषां सततं कुर्व्वन् गुरोः सम्प्रणमेत च । षट्कर्म्मसु निवृत्तस्य न प्रवृत्तस्य सर्व्वशः ।

न चरत्यधिकारेण सेवेत द्विषतो न च । एषोऽश्रमपदस्तात ब्रह्मचारिण इष्यते ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने एकषष्टोऽध्यायः ॥ ६१ ॥

॥ युधिष्ठिर उवाच ॥ शिवान् सुखान् महोदर्कानहिंस्रान् लोकसम्मतान् । ब्रूहि धर्म्मान् सुखोपायान् मद्विधानां सुखावहान् । २२४५

॥ भीष्म उवाच ॥ ब्राह्मणस्य तु चत्वारस्त्वाश्रमा विहिताः प्रभो । वर्णास्ताननुवर्त्तन्ते त्रयो भरतसत्तम ।

उक्तानि कर्म्माणि बहूनि राजन् स्वर्ग्याणि राजन्यपरायणानि । नेमानि दृष्टान्तविधौ स्मृतानि क्षात्त्रे हि सर्व्वं विहितं यथावत् ।

क्षात्त्राणि वैश्यानि च सेवमानः शौद्राणि कर्म्माणि च ब्राह्मणः सन् । अस्मिन् लोके निन्दितो मन्दचेताः परे च लोके निरयं प्रयाति ।

या संज्ञा विहिता लोके दासे शुनि वृके पशौ । विकर्म्मणि स्थिते विप्रे सैव संज्ञा च पाण्डव ।

षट्कर्म्मसम्प्रवृत्तस्य आश्रमेषु चतुर्ष्वपि । सर्व्वधर्म्मोपपन्नस्य संवृतस्य कृतात्मनः । २२५०

ब्राह्मणस्य विशुद्धस्य तपस्यभिरतस्य च । निराशिषो वदान्यस्य लोका ह्यक्षरसंमिताः ।

यो यस्मिन् कुरुते कर्म्म यादृशं येन यत्र च । तादृशं तादृशेनैव सगुणं प्रतिपद्यते ।

वृद्ध्या कृषिवणिक्त्वेन जीवसञ्जननेन च । वेत्तुमर्हसि राजेन्द्र स्वाध्यायगणितं महत् ।

कालसञ्चोदितः कालः कालपर्य्यायनिश्चितः । उत्तमाधममध्यानि कर्म्माणि कुरुतेऽवशः ।

अन्तवन्ति प्रधानानि पुरा श्रेयस्कराणि च । स्वकर्म्मनिरतो लोको ह्यक्षरः सर्व्वतोमुखः । २२५५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने द्वाषष्टोऽध्यायः ॥ ६२ ॥

॥ भीष्म उवाच ॥ ज्याकर्षणं शत्रुनिवर्हणञ्च कृषिर्व्वणिज्या पशुपालनञ्च । शुश्रूषणञ्चापि तथाऽर्थहेतोरकार्य्यमेतत् परमं द्विजस्य ।

सेव्यन्तु ब्रह्म षट्कर्म्म गृहस्थेन मनीषिणा । कृतकृत्यस्य चारण्ये वासो विप्रस्य शस्यते ।

राजप्रेष्यं कृषिधनं जीवनञ्च वणिग्यया । कौटिल्यं कौलटेयञ्च कुशीदञ्च विवर्ज्जयेत् ।

शूद्रो राजन् भवति ब्रह्मबन्धुर्दुश्चारित्रो यश्च धर्म्मादपेतः । वृषलीपतिः पिशुनो नर्त्तनश्च ग्रामप्रेष्यो यश्च भवेद्विकर्म्मा ।

जपन् वेदानजपंश्चापि राजन् समः शूद्रैर्दासवच्चापि भोज्यः । एते सर्व्वे शूद्रसमा भवन्ति राजन्नेतान् वर्ज्जयेद्देवकृत्ये । २२६०

निर्म्मर्य्यादे चाशुचौ क्रूरवृत्तौ हिंसात्मके त्यक्तधर्म्मस्ववृत्ते । हव्यं कव्यं यानि चान्यानि राजन् देयान्यदेयानि भवन्ति चास्मै ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्माद्धर्म्मो विहितो ब्राह्मणस्य दमः शौचमार्ज्जवञ्चापि राजन्। तथा विप्रस्याश्रमाः सर्व्व एव पुरा राजन् ब्राह्मणा वै विसृष्टाः।

यः स्याद्दान्तः सोमपश्चार्य्यशीलः सानुक्रोशः सर्व्वसहो निराशीः। ऋजुर्मृदुरनृशंसः क्षमावान् स वै विप्रो नेतरः पापकर्म्मा।

शूद्रं वैश्यं राजपुत्त्रञ्च राजन् लोकाः सर्व्वे संश्रिता धर्म्मकामाः। तस्माद्वर्णान् शान्तिधर्म्मेष्वसक्तान् मत्वा विष्णुर्नेच्छति पाण्डुपुत्त्र।

लोके चेदं सर्व्वलोकस्य न स्याच्चातुर्व्वर्ण्यं वेदवादाश्च न स्युः। सर्व्वाश्चेज्याः सर्व्वलोकक्रियाश्च सद्यः सर्व्वे चाश्रमस्था न वै स्युः। २१६५

यश्च त्रयाणां वर्णानामिच्छेदाश्रमसेवनं। चातुराश्रम्यदृष्टांश्च धर्म्मांस्तान् शृणु पाण्डव।

शुश्रूषोः कृतकार्य्यस्य कृतसन्तानकर्म्मणः। अभ्यनुज्ञातराजस्य शूद्रस्य जगतीपते।

अल्पान्तरगतस्यापि दशधर्म्मगतस्य वा। आश्रमा विहिताः सर्व्वे वर्ज्जयित्वा निरामिषं।

भैक्षचर्य्यां ततः प्राहुस्तस्य तद्धर्म्मचारिणः। तथा वैश्यस्य राजेन्द्र राजपुत्त्रस्य चैव हि।

कृतकृत्यो वयोऽतीतो राज्ञः कृतपरिश्रमः। वैश्यो गच्छेदनुज्ञातो नृपेणाश्रमसंश्रयं। २१७०

वेदानधीत्य धर्म्मेण राजशास्त्राणि चानघ। सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च।

पालयित्वा प्रजाः सर्व्वा धर्म्मेण वदताम्वर। राजसूयाश्वमेधादीन् मखानन्यांस्तथैव च।

आनयित्वा यथापाठं विप्रेभ्यो दत्तदक्षिणः। संग्रामे विजयं प्राप्य तथाऽल्पं यदि वा बहु।

स्थापयित्वा प्रजापालं पुत्त्रं राज्ये च पाण्डव। अन्यगोत्रं प्रशस्तं वा क्षत्त्रियं क्षत्त्रियर्षभ।

अर्च्चयित्वा पितॄन् सम्यक् पितृयज्ञैर्यथाविधि। देवान् यज्ञैरृषीन् वेदैरर्च्चयित्वा तु यत्नतः। २१७५

अन्तकाले तु सम्प्राप्ते य इच्छेदाश्रमान्तरं। सोऽनुपूर्व्व्याश्रमाद्राजन् गत्वा सिद्धिमवाप्नुयात्।

राजर्षित्वेन राजेन्द्र भैक्ष्यं चर्य्यान्नसेवया। अपेतगृहधर्म्मोऽपि चरेज्जीवितकाम्यया।

न चैतन्नैष्ठिकं धर्म्मं त्रयाणां भूरिदक्षिण। चतुर्णां राजशार्दूल प्राहुराश्रमवासिनां।

बाह्वायत्तं क्षत्त्रियैर्म्मानवानां लोकश्रेष्ठं धर्म्ममासेवमानैः। सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां राज्ञो धर्म्मादिति वेदात् शृणोमि।

यथा राजन् हस्तिपदे पदानि संलीयन्ते सर्व्वसत्त्वोद्भवानि। एवं धर्म्मान्राजधर्म्मेषु सर्व्वान् सर्व्वावस्थं सम्प्रलीनान्निबोध। २१८०

अल्पाश्रयानल्पफलान् वदन्ति धर्म्मानन्यान् धर्म्मविदो मनुष्याः। महाश्रयं बहुकल्याणरूपं क्षात्त्रं धर्म्मं नेतरं प्राहुरार्य्याः।

सर्व्वे धर्म्मा राजधर्म्मप्रधानाः सर्व्वे वर्णाः पाल्यमाना भवन्ति। सर्व्वस्त्यागो राजधर्म्मेषु राजंस्त्यागं धर्म्मञ्चाहुरग्र्यं पुराणं।

मज्जेत्त्रयी दण्डनीतौ हतायां सर्व्वे धर्म्माः प्रक्षयेयुर्व्विवृद्धाः। सर्व्वे धर्म्मास्त्वाश्रमाणां हताः स्युः क्षात्त्रे त्यक्ते राजधर्म्मे पुराणे।

सर्व्वे त्यागा राजधर्म्मेषु दृष्टाः सर्व्वा दीक्षा राजधर्म्मेषु युक्ताः। सर्व्वे लोका राजधर्म्मे प्रविष्टाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यथा जीवाः प्राकृतैर्बध्यमाना धर्म्मश्रुतानामुपपीडनाय । एवं धर्म्मा राजधर्म्मैर्व्वियुक्ताः सञ्चिन्वन्तो नाद्रियन्ते स्वधर्म्मं। २३८७

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने त्रिषष्टोऽध्यायः ॥ ६३ ॥

॥ भीष्म उवाच ॥ चातुराश्रमधर्म्माश्च यतिधर्म्माश्च पाण्डव । लोकवेदोत्तराश्चैव क्षात्त्रधर्म्मे समाहिताः ।

सर्व्वाण्येतानि कर्म्माणि क्षात्त्रे भरतसत्तम । निराशिषो जीवलोकाः क्षत्त्रधर्म्मे व्यवस्थिते ।

अप्रत्यक्षं बहुद्वारं धर्म्ममाश्रमवासिनां । प्रकोपयन्ति तद्भावमागमैरेव शाश्वतं ।

अपरे वचनैः पुण्यैर्व्वादिनो लोकनिश्चयं । अनिश्चयज्ञा धर्म्माणामदृष्टान्ते परे हताः ।

प्रत्यक्षं सुखभूयिष्ठमात्मसाक्षिकमच्छलं । सर्व्वलोकहितं धर्म्मं क्षत्त्रियेषु प्रतिष्ठितं । २३९०

धर्म्माश्रमेऽध्यवसिनां ब्राह्मणानां युधिष्ठिर । यथा त्रयाणां वर्णानां संख्यातोपश्रुतिः पुरा ।

राजधर्म्मेष्वनुमता लोकाः सुचरितैः सह । उदाहृतन्ते राजेन्द्र यथा विष्णुं महौजसं ।

सर्व्वभूतेश्वरं देवं प्रभुं नारायणं पुरा । जग्मुः सुबहुशः शूरा राजानो दण्डनीतये ।

एकैकमात्मनः कर्म्म तुलयित्वाश्रमं पुरा । राजानः पर्य्युपासन्त दृष्टान्तवचने स्थिताः ।

साध्या देवा वसवश्चाश्विनौ च रुद्राश्च विश्वे मरुतां गणाश्च । सृष्टाः पुराद्यादिदेवेन देवाः क्षात्त्रे धर्म्मे वर्त्तयन्ते च सिद्धाः। २३९५

अत्र ते वर्त्तयिष्यामि धर्म्ममर्थविनिश्चयं । निर्म्मर्य्यादे वर्त्तमाने दानवैकार्णवे पुरा ।

बभूव राजा राजेन्द्र मान्धाता नाम वीर्य्यवान् । पुरा वसुमतीपालो यज्ञञ्चक्रे दिदृक्षया ।

अनादिमध्यनिधनं देवं नारायणं प्रभुं । स राजा राजशार्द्दूल मान्धाता परमेश्वरं ।

जगाम शिरसा पादौ यज्ञे विष्णोर्म्महात्मनः । दर्शयामास तं विष्णूरूपमास्थाय वासवं ।

स पार्थिवैर्वृतः सद्भिरर्च्चयामास तं प्रभुं । तस्य पार्थिवसिंहस्य तस्य चैव महात्मनः । २४००

संवादोऽयं महानासीद्विष्णुं प्रति महाद्युतिं ।

॥ इन्द्र उवाच ॥ किमिष्यते धर्म्मभृतां वरिष्ठ यद्द्रष्टुकामोऽसि तमप्रमेयं । अनन्तमायामितमन्त्रवीर्य्यं नारायणं ह्यादिदेवं पुराणं ।

नासौ देवो विश्वरूपो मयाऽपि शक्यो द्रष्टुं ब्रह्मणा वापि साक्षात् । येऽन्ये कामास्तव राजन् हृदिस्था दास्ये चैतांस्त्वं हि मर्त्येषु राजा ।

स मे स्थितो धर्म्मपरो जितेन्द्रियः शूरो गूढप्रीतिरतः सुराणां । बुद्ध्या भक्त्या चोत्तमः श्रद्धया च ततस्तेऽहं दद्मि वरान् यथेष्टं ।

॥ मान्धाता उवाच ॥ असंशयं भगवन्नादिदेवं द्रक्ष्यामि त्वाऽहं शिरसा संप्रसाद्य । त्यक्त्वा कामान् धर्म्मकामो ह्यरण्यमिच्छे गन्तुं सत्पथं लोकदृष्टं । २४०५

क्षात्त्राद्धर्म्माद्विपुलादप्रमेयात् लोकाः प्राप्ताः स्थापितं स्वं यशश्च । धर्म्मो योऽसावादिदेवात् प्रवृत्तो लोकश्रेष्ठं तं न जानामि कर्त्तुं ।

॥ इन्द्र उवाच ॥ असैनिका धर्म्मपराश्च धर्म्मे परां गतिं न नयन्ते ह्ययुक्तं । क्षात्त्रो धर्म्मो ह्यादिदेवात् प्रवृत्तो लोकश्रेष्ठं तं न जानामि कर्त्तुं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शेषाः सृष्टा ह्यन्तवन्तो ह्यनन्ताः सप्रस्थानाः क्षत्रधर्म्मा विशिष्टाः । अस्मिन् धर्म्मे सर्व्वधर्म्माः प्रविष्टास्तस्माद्धर्म्मं श्रेष्ठमिमं वदन्ति ।

कर्म्मणा वै पुरा देवा ऋषयश्चामितौजसः । त्राताः सर्व्वे प्रसह्यारीन् क्षत्रधर्म्मेण विष्णुना ।

यदि ह्यसौ भगवान्नाहनिष्यद्रिपून् सर्व्वानसुरानप्रमेयः । न ब्राह्मणा न च लोकादिकर्त्ता नायं धर्म्मो नादिधर्म्मोऽभविष्यत् । २४१०

इमामूर्व्वीं नाजयद्विक्रमेण देवश्रेष्ठः सासुरामादिदेवः । चातुर्व्वर्ण्यं चातुराश्रम्यधर्म्माः सर्व्वे न स्युर्ब्राह्मणानां विनाशात् ।

नष्टा धर्म्माः शतधा शाश्वतास्ते क्षात्त्रेण धर्म्मेण पुनः प्रवृद्धाः । युगे युगे ह्यादिधर्म्माः प्रवृत्ता लोकज्येष्ठं क्षात्त्रधर्म्मं वदन्ति ।

आत्मत्यागः सर्व्वभूतानुकम्पा लोकज्ञानं पालनं मोक्षणञ्च । विषण्णानां मोक्षणं पीडितानां क्षात्त्रे धर्म्मे विद्यते पार्थिवानां ।

निर्म्मर्य्यादाः काममन्युप्रवृत्ता भीता राज्ञो नाधिगच्छन्ति पापं । शिष्टाश्चान्ये सर्व्वधर्म्मोपपन्नाः साध्वाचाराः साधुधर्म्मं वदन्ति ।

पुत्त्रवत् पाल्यमानानि राजधर्म्मेण पार्थिवैः । लोके भूतानि सर्व्वाणि चरन्ते नात्र संशयः । २४१५

सर्व्वधर्म्मपरं क्षात्त्रं लोकश्रेष्ठं सनातनं । शश्वदक्षरपर्य्यन्तमक्षरं सर्व्वतोमुखं ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने चतुःषष्टोऽध्यायः ॥ ६४ ॥

॥ इन्द्र उवाच ॥ एवं वीर्य्यः सर्व्वधर्म्मोपपन्नः क्षात्त्रः श्रेष्ठः सर्व्वधर्म्मेषु धर्म्मः । पाल्यो युष्माभिर्लोकहितैरुदारैर्विपर्य्यये स्यादभावः प्रजानां ।

भूसंस्कारं राजसंस्कारयोगमभैक्षचर्य्यां पालनञ्च प्रजानां । विद्याद्राजा सर्व्वभूतानुकम्पी देहत्यागञ्चाहवे धर्म्ममग्र्यं ।

त्यागश्रेष्ठं मुनयो वै वदन्ति सर्व्वश्रेष्ठं यच्छरीरं त्यजेत । नित्यं युक्ता राजधर्म्मेषु सर्व्वे प्रत्यक्षन्ते भूमिपाला यथैव ।

बहुश्रुत्या गुरुशुश्रूषया च परस्पराः संहननाद्वदन्ति । नित्यं धर्म्मं क्षत्त्रियो ब्रह्मचारी चरेदेको ह्याश्रमं धर्म्मकामः । २४२

सामान्यार्थे व्यवहारे प्रवृत्ते प्रियाप्रिये वर्ज्जयन्नेव यत्नात् । चातुर्व्वर्ण्यस्थापनात् पालनाच्च तैस्तैर्योगैर्नियमैरौरसैश्च ।

सर्व्वोद्योगैराश्रमं धर्म्ममाहुः क्षात्त्रं श्रेष्ठं सर्व्वधर्म्मोपपन्नं । स्वं स्वं धर्म्मं ये न चरन्ति वर्णास्तांस्तान् धर्म्मानन्यथार्थान् वदन्ति ।

निर्म्मर्य्यादान्नित्यमर्थे निविष्टानाहुस्तान् वै पशुभूतान् मनुष्यान् । यथा नीतिं गमयत्यर्थयोगाच्छ्रेयस्तस्मादाश्रमात् क्षत्त्रधर्म्मः ।

त्रैविद्यानां या गतिर्ब्राह्मणानां ये चैवोक्तास्त्वाश्रमा ब्राह्मणानां । एतत् कर्म्म ब्राह्मणस्याहुरग्र्यमन्यत् कुर्व्वञ्छूद्रवच्छस्त्रवध्यः ।

चतुराश्रम्यधर्म्माश्च वेदधर्म्माश्च पार्थिव । ब्राह्मणेनानुगन्तव्या नान्यो विद्यात् कदाचन । २४२५

अन्यथा वर्त्तमानस्य नासौ वृत्तिः प्रकल्प्यते । कर्म्मणा वर्द्धते धर्म्मो यथा धर्म्मस्तथैव सः ।

यो विकर्म्मस्थितो विप्रो न स सम्मानमर्हति । कर्म्म स्वं नोपयुञ्जानमविश्वास्यं हि तं विदुः ।

एते धर्म्माः सर्व्ववर्णेषु लीना उत्स्रष्टव्याः क्षत्त्रियैरेष धर्म्मः । तस्माज्ज्येष्ठा राजधर्म्मा न चान्ये वीरज्येष्ठा वीरधर्म्मा मता मे ।

॥ मान्धातोवाच ॥ यवनाः किराता गान्धाराश्चीनाः शवरवर्व्वराः । शकास्तुषाराः कङ्काश्च पह्लवाश्चान्ध्रमद्रकाः ।

पौण्ड्राः पुलिन्दा रमठाः काम्बोजाश्चैव सर्व्वशः । ब्रह्मक्षत्त्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः । २४३०

कथं धर्म्मांश्चरिष्यन्ति सर्व्वे विषयवासिनः । मद्विधैश्च कथं स्थाप्याः सर्व्वे वै दस्युजीविनः ।

एतदिच्छाम्यहं श्रोतुं भगवंस्तद्ब्रवीहि मे । त्वं बन्धुभूतो ह्यस्माकं क्षत्त्रियाणां सुरेश्वर ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ इन्द्र उवाच ॥ मातापित्रोर्हि शुश्रूषा कर्त्तव्या सर्व्वदस्युभिः । आचार्य्यगुरुशुश्रूषा तथैवाश्रमवासिनां ।
भूमिपानाञ्च शुश्रूषा कर्त्तव्या सर्व्वदस्युभिः । वेदधर्म्मक्रियाश्चैव तेषां धर्म्मो विधीयते ।
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च । दानानि च यथाकालं द्विजेभ्यो विसृजेत् सदा । २४३५
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनं । भरणं पुत्त्रदाराणां शौचमद्रोह एव च ।
दक्षिणा सर्व्वयज्ञानां दातव्या भूतिमिच्छता । पाकयज्ञा महार्हाश्च दातव्याः सर्व्वदस्युभिः ।
एतान्येवंप्रकाराणि विहितानि पुराऽनघ । सर्व्वलोकस्य कर्म्माणि कर्त्तव्यानीह पार्थिव ।
॥ मान्धातोवाच ॥ दृश्यन्ते मानुषे लोके सर्व्ववर्णेषु दस्यवः । लिङ्गान्तरे वर्त्तमाना आश्रमेषु चतुर्ष्वपि ।
॥ इन्द्र उवाच ॥ विनष्टायां दण्डनीत्यां राजधर्म्मे निराकृते । संप्रमुह्यन्ति भूतानि राजदौरात्म्यतोऽनघ । २४४०
असंख्याता भविष्यन्ति भिक्षवो लिङ्गिनस्तथा । आश्रमाणां विकल्पाश्च निवृत्तेऽस्मिन् कृते युगे ।
अशृण्वानाः पुराणानां धर्म्माणां परमा गतीः । उत्पथं प्रतिपत्स्यन्ते काममन्युसमीरिताः ।
यदा निवर्त्त्यते पापो दण्डनीत्या महात्मभिः । तदा धर्म्मो न चलते सद्भूतः शाश्वतः परः ।
सर्व्वलोकगुरुञ्चैव राजानं योऽवमन्यते । न तस्य दत्तं न हुतं न श्राद्धं फलते क्वचित् ।
मानुषाणामधिपतिं देवभूतं सनातनं । देवाऽपि नावमन्यन्ते धर्म्मकामं नरेश्वरं । २४४५
प्रजापतिर्हि भगवान् सर्व्वञ्चैवासृजज्जगत् । स प्रवृत्तिनिवृत्त्यर्थं धर्म्माणां क्षत्त्रमिच्छति ।
प्रवृत्तस्य हि धर्म्मस्य बुद्ध्या यः स्मरते गतिं । स मे मान्यश्च पूज्यश्च तत्र क्षत्त्रं प्रतिष्ठितं ।
॥ भीष्म उवाच ॥ एवमुक्त्वा स भगवान् मरुद्गणवृतः प्रभुः । जगाम भवनं विष्णोरक्षरं शाश्वतं पदं ।
एवं प्रवर्त्तिते धर्म्मे पुरा सुचरितेऽनघ । कः क्षत्त्रमवमन्येत चेतनावान् बहुश्रुतः ।
अन्यायेन प्रवृत्तानि निवृत्तानि तथैव च । अन्तरा विलयं यान्ति यथा पथि विचक्षुषः । २४५०
आदौ प्रवर्त्तिते चक्रे तथैवादिपरायणे । वर्त्तस्व पुरुषव्याघ्र संविजानामि तेऽनघ ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि पञ्चषष्टोऽध्यायः ॥ ६५ ॥

॥ युधिष्ठिर उवाच ॥ श्रुता मे कथिताः पूर्व्वं चत्वारो मानवाश्रमाः । आख्यानयित्वा व्याख्यानमेतदाचक्ष्व पृच्छतः ।
॥ भीष्म उवाच ॥ विदिताः सर्व्व एवेह धर्म्मास्तव युधिष्ठिर । यथा मम महाबाहो विदिताः साधुसम्मताः ।
यत्तु लिङ्गान्तरगतं पृच्छसे मां युधिष्ठिर । धर्म्मं धर्म्मभृतां श्रेष्ठ तन्निबोध युधिष्ठिर ।
सर्व्वाण्येतानि कौन्तेय विद्यन्ते मनुजर्षभ । साध्वाचारप्रवृत्तानां चातुराश्रम्यकारिणां । २४५५
अकामद्वेषयुक्तस्य दण्डनीत्या युधिष्ठिर । समदर्शिनश्च भूतेषु भैक्षाश्रमपदं भवेत् ।
वेत्ति ज्ञानं विसर्गञ्च निग्रहानुग्रहं तथा । यथोक्तवृत्तेर्धीरस्य क्षेमाश्रमपदं भवेत् ।
अर्हान् पूजयतो नित्यं संविभागेन पाण्डव । सर्व्वतस्तस्य कौन्तेय भैक्षाश्रमपदं भवेत् ।
ज्ञातिसंबन्धिमित्राणि व्यापन्नानि युधिष्ठिर । समभ्युद्धरमाणस्य दीक्षाश्रमपदं भवेत् ।
लोकमुख्येषु सत्कारं लिङ्गिमुख्येषु चासकृत् । कुर्व्वतस्तस्य कौन्तेय वन्याश्रमपदं भवेत् । २४६०
आह्निकं पितृयज्ञांश्च भूतयज्ञान् समानुषान् । कुर्व्वतः पार्थ विपुलान् वन्याश्रमपदं भवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संविभागेन भूतानामतिथीनां तथाऽर्च्चनात् । देवयज्ञैश्च राजेन्द्र वन्याश्रमपदं भवेत् ।
मर्द्दनं परराष्ट्राणां शिष्टार्थं सत्यविक्रम । कुर्व्वतः पुरुषव्याघ्र वन्याश्रमपदं भवेत् ।
पालनात् सर्व्वभूतानां स्वराष्ट्रपरिपालनात् । दीक्षा बहुविधा राजन् सत्याश्रमपदं भवेत् ।
वेदाध्ययननित्यत्वं क्षमाऽथाचार्य्यपूजनं । अथोपाध्यायशुश्रूषा ब्रह्माश्रमपदं भवेत् । २५६५
आह्निकं जपमानस्य देवान् पूजयतः सदा । धर्म्मेण पुरुषव्याघ्र धर्म्माश्रमपदं भवेत् ।
मृत्युर्व्वा रक्षणं वेति यस्य राज्ञो विनिश्चयः । प्राणद्यूते ततस्तस्य ब्रह्माश्रमपदं भवेत् ।
अजिह्ममशठं मार्गं वर्त्तमानस्य भारत । सर्व्वदा सर्व्वभूतेषु ब्रह्माश्रमपदं भवेत् ।
वानप्रस्थेषु विप्रेषु त्रैविद्येषु च भारत । प्रयच्छतोऽर्थान् विपुलान् वन्याश्रमपदं भवेत् ।
सर्व्वभूतेष्वनुक्रोशं कुर्व्वतस्तस्य भारत । अनृशंस्यप्रवृत्तस्य सर्व्वावस्थं पदं भवेत् । २५७०
बालवृद्धेषु कौन्तेय सर्व्वावस्थं युधिष्ठिर । अनुक्रोशक्रिया पार्थ सर्व्वावस्थं पदं भवेत् ।
बलात्कृतेषु भूतेषु परित्राणं कुरूद्वह । शरणागतेषु कौरव्य कुर्व्वन् गार्हस्थ्यमावसेत् ।
चराचराणां भूतानां रक्षणञ्चापि सर्व्वशः । यथार्थपूजाञ्च तथा कुर्व्वन् गार्हस्थ्यमावसेत् ।
ज्येष्ठानज्येष्ठपत्नीनां भ्रातॄणां पुत्त्रनप्तृणां । निग्रहानुग्रहौ पार्थ गार्हस्थ्यमिति तत्तपः ।
साधूनामर्च्चनीयानां पूजासु विदितात्मनां । पालनं पुरुषव्याघ्र गृहाश्रमपदं भवेत् । २५७५
आश्रमस्थानि भूतानि यस्तु वेश्मनि भारत । आददीतेह भोज्येन तद्गार्हस्थ्यं युधिष्ठिर ।
यः स्थितः पुरुषो धर्म्मे धात्रा सृष्टे यथार्थवत् । आश्रमाणां हि सर्व्वेषां फलं प्राप्नोत्यनामयं ।
यस्मिन्न नश्यन्ति गुणाः कौन्तेय पुरुषे सदा । आश्रमस्थं तमप्याहुर्नरश्रेष्ठं युधिष्ठिर ।
स्थानमानं कुले मानं वयोमानं तथैव च । कुर्व्वन् वसति सर्व्वेषु ह्याश्रमेषु युधिष्ठिर ।
देशधर्म्मांश्च कौन्तेय कुलधर्म्मांस्तथैव च । पालयन् पुरुषव्याघ्र राजा सर्व्वाश्रमी भवेत् । २५८०
काले विभूतिं भूतानामुपहारांस्तथैव च । अर्हयन् पुरुषव्याघ्र साधूनामाश्रमे वसेत् ।
दशधर्म्मगतश्चापि यो धर्म्मं प्रत्यवेक्षते । सर्व्वलोकस्य कौन्तेय राजा भवति साश्रमी ।
ये धर्म्मकुशला लोके धर्म्मं कुर्व्वन्ति भारत । पालिता यस्य विषये धर्म्मांशस्तस्य भूपतेः ।
धर्म्मारामान् धर्म्मपरान् ये न रक्षन्ति मानवान् । पार्थिवाः पुरुषव्याघ्र तेषां पापं हरन्ति ते ।
ये चाप्यत्र सहायाः स्युः पार्थिवानां युधिष्ठिर । ते चैवांशहराः सर्व्वे धर्म्मे परकृतेऽनघ । २५८५
सर्व्वाश्रमपदेऽप्याहुर्गार्हस्थ्यं दीप्तनिर्णयं । पावनं पुरुषव्याघ्र यं धर्म्मं पर्य्युपास्महे ।
आत्मोपमस्तु भूतेषु यो वै भवति मानवः । न्यस्तदण्डो जितक्रोधः प्रेत्येह लभते सुखं ।
धर्म्मे स्थिता सत्त्ववीर्य्या धर्म्मसेतुवराटका । त्यागवाताध्वगा शीघ्रा नौस्त्वां सन्तारयिष्यति ।
यदा निवृत्तः सर्व्वस्मात् कामो योऽस्य हृदि स्थितः । तदा भवति सत्त्वस्थस्ततो ब्रह्म समश्नुते ।
सुप्रसन्नस्तु भावेन योगेन च नराधिप । धर्म्मं पुरुषशार्द्दूल प्राप्स्यसे पालने रतः । २५९०
वेदाध्ययनशीलानां विप्राणां साधुकर्म्मणां । पालने यत्नमातिष्ठ सर्व्वलोकस्य चैव ह ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वने चरन्ति यं धर्म्ममाश्रमेषु च भारत। रक्षणात्त ब्छतगुणं धर्म्मं प्राप्नोति पार्थिवः।
एष ते विविधो धर्म्मः पाण्डवश्रेष्ठ कीर्त्तितः। अनुतिष्ठ त्वमेवं वै पूर्व्वदृष्टं सनातनं।
चातुराश्रम्यमेकाग्र्यं चातुर्व्वर्ण्यञ्च पाण्डव। धर्म्मं पुरुषशार्द्दूल प्राप्स्यसे पालने रतः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि चातुराश्रम्यविधौ षट्षष्टोऽध्यायः॥ ६६ ॥
॥ युधिष्ठिर उवाच ॥ चातुराश्रम्यमुक्तन्ते चातुर्व्वर्ण्यन्तथैव च। राष्ट्रस्य यत् कृत्यतमं ततो ब्रूहि पितामह।
॥ भीष्म उवाच ॥ राष्ट्रस्यैतत् कृत्यतमं राज्ञ एवाभिषेचनं। अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्त्युत।
अराजकेषु राष्ट्रेषु धर्म्मो न व्यवतिष्ठते। परस्परञ्च खादन्ति सर्व्वथा धिगराजकं।
इन्द्रमेव प्रवृणुते यद्राजानमिति श्रुतिः। यथैवेन्द्रस्तथा राजा सम्पूज्यो भूतिमिच्छता।
नाराजकेषु राष्ट्रेषु वस्तव्यमिति रोचये। नाराजकेषु राष्ट्रेषु हव्यमग्निर्वहत्युत।
अथ चेदभिवर्त्तेत राज्यार्थी बलवत्तरः। अराजकानि राष्ट्राणि हतवीर्य्याणि वा पुनः।
प्रत्युद्गम्याभिपूज्यः स्यादेतदत्र सुमन्त्रितं। न हि पापात् परतरमस्ति किञ्चिदराजकात्।
स चेत् समनुपश्येत समग्रं कुशलं भवेत्। बलवान् हि प्रकुपितः कुर्य्यान्निःशेषतामपि।
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा। अथ या सुदुहा राजन् नैव तां वितुदन्त्यपि।
यदतप्तं प्रणमते नैतत् सन्तापमर्हति। यत् स्वयं नमते दारु न तत् सन्तापयन्त्यपि।
एतयोपमया वीर संनमेत बलीयसे। इन्द्राय स प्रणमते नमते यो बलीयसे।
तस्माद्राजैव कर्त्तव्यः सततं भूतिमिच्छता। न धनार्थी न दारार्थस्तेषां येषामराजकं।
प्रीयते हि हरन् पापः परवित्तमराजके। यदाऽस्य उद्धरन्त्यन्ये तदा राजानमिच्छति।
पापा ह्यपि तदा क्षेमं न लभन्ते कदाचन। एकस्य हि द्वौ हरतो द्वयोश्च बहवोऽपरे।
अदासः क्रियते दासो ह्रियते च बलात् स्त्रियः। एतस्मात् कारणात देवाः प्रजापालं प्रचक्रिरे।
राजा चेन्न भवेल्लोके पृथिव्यां दण्डधारकः। जले मत्स्यानिवाभक्षन् दुर्ब्बलं बलवत्तराः।
अराजकाः प्रजाः पूर्व्वं विनेशुरिति नः श्रुतं। परस्परं भक्षयन्तो मत्स्या इव जले कृशान्।
समेत्य तास्ततश्चक्रुः समयानिति नः श्रुतं। वाक्क्रूरो दण्डपरुषो यश्च स्यात् पारजायिकः।
यः परस्वमथादद्यात् त्याज्या नस्तादृशा इति। विश्वासार्थञ्च सर्व्वेषां वर्णानामविशेषतः।
तास्तथा समयं कृत्वा समयेनावतस्थिरे। सहितास्तास्तदा जग्मुरसुखार्त्ताः पितामहं।
अनीश्वरा विनश्यामो भगवन्नीश्वरं दिश। यं पूजयेम सम्भूय यश्च नः प्रतिपालयेत्।
ततो मनुं व्यादिदेश मनुर्नाभिननन्द ताः।
॥ मनुरुवाच ॥ बिभेमि कर्म्मणः पापाद्राज्यं हि भृशदुस्तरं। विशेषतो मनुष्येषु मिथ्यावृत्तेषु नित्यदा।
॥ भीष्म उवाच ॥ तमब्रुवन् प्रजा माभैः कर्तॄनेनो गमिष्यति। पशूनामधिपञ्चाशद्धिरण्यस्य तथैव च।
धान्यस्य दशमं भागं दास्यामः कोषवर्द्धनं। कन्यां शुल्के चारुरूपां विवादे द्यूततासु च।
मुखेन शस्त्रपत्रेण ये मनुष्याः प्रधानतः। भवन्तं तेऽनुयास्यन्ति महेन्द्रमिव देवताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स त्वं जातबलो राजा दुष्प्रधर्षः प्रतापवान् । सुखे धास्यसि नः सर्व्वान् कुवेर इव नैर्ऋतान् ।
यञ्च धर्म्मञ्चरिष्यन्ति प्रजा राज्ञा सुरक्षिताः । चतुर्थं तस्य धर्म्मस्य तत् संस्थं वै भविष्यति ।
तेन धर्म्मेण महता सुखं लब्धेन भावितः । पाह्यस्मान् सर्व्वतो राजन् देवानिव शतक्रतुः ।
विजयाय हि निर्याहि प्रतपन् रश्मिवानिव । मानं विधम शत्रूणां धर्म्मो जयतु नः सदा ।
स निर्ययौ महातेजा बलेन महता वृतः । महाभिजनसम्पन्नस्तेजसा प्रज्वलन्निव ।
तस्य दृष्ट्वा महत्त्वं ते महेन्द्रस्येव देवताः । अपतत्रसिरे सर्व्वे स्वधर्म्मे च दधुर्म्मनः ।
ततो महीं परिययौ पर्ज्जन्य इव वृष्टिमान् । शमयन् सर्व्वतः पापान् स्वकर्म्मसु च योजयन् ।
एवं ये भूतिमिच्छेयुः पृथिव्यां मानवाः क्वचित् । कुर्य्यूराजानमेवाग्रे प्रजानुग्रहकारणात् ।
नमस्येरंश्च तं भक्त्या शिष्या इव गुरुं सदा । देवा इव च देवेन्द्रं तत्र राजानमन्तिके ।
सत्कृतं स्वजनेनेह परोऽपि बहुमन्यते । स्वजनेन त्ववज्ञातं परे परिभवन्त्युत ।
राज्ञः परैः परिभवः सर्व्वेषामसुखावहः । तस्माच्छत्रञ्च पत्रञ्च वाह्यान्याभरणानि च ।
भोजनान्यथ पानानि राज्ञे दद्युर्गृहाणि च । आसनानि च शय्याश्च सर्व्वोपकरणानि च ।
गोप्ता तस्माद्दुराधर्षः स्मितपूर्व्वाभिभाषिता । आभाषितश्च मधुरं प्रत्याभाषेत मानवान् ।
कृतज्ञो दृढभक्तिः स्यात् संविभागी जितेन्द्रियः । ईक्षितः प्रतिवीक्षेत मृदु वल्गु च सुष्ठु च ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्तषष्टोऽध्यायः ॥ ६७ ॥
॥ युधिष्ठिर उवाच ॥ किमाहुर्द्दैवतं विप्रा राजानं भरतर्षभ । मनुष्याणामधिपतिं तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । वृहस्पतिं वसुमना यथा पप्रच्छ भारत ।
राजा वसुमना नाम कौशल्यो धीमतां वरः । महर्षिं किल पप्रच्छ कृतप्रज्ञं वृहस्पतिं ।
सर्व्वं वैनयिकं कृत्वा विनयज्ञो वृहस्पतिं । दक्षिणानन्तरो भूत्वा प्रणम्य विधिपूर्व्वकं ।
विधिं पप्रच्छ राज्यस्य सर्व्वलोकहिते रतः । प्रजानां सुखमन्विच्छन् धर्म्मशीलं वृहस्पतिं ।
॥ वसुमना उवाच ॥ केन भूतानि वर्द्धन्ते क्षयं गच्छन्ति केन वा । कमर्च्चन्तो महाप्राज्ञ सुखमव्ययमाप्नुयुः ।
एवं पृष्टो महाप्राज्ञः कौशल्येनामितौजसा । राजसत्कारमव्यग्रं शशंसास्मै वृहस्पतिः ।
॥ वृहस्पतिरुवाच ॥ राजमूलो महाप्राज्ञ धर्म्मो लोकस्य लक्ष्यते । प्रजा राजभयादेव न खादन्ति परस्परं
राजा ह्येवाखिलं लोकं समुदीर्णं समुत्सुकं । प्रसादयति धर्म्मेण प्रसाद्य च विराजते ।
यथा ह्यनुदये राजन् भूतानि शशिसूर्य्ययोः । अन्धे तमसि मज्जेयुरपश्यन्तः परस्परं ।
यथा ह्यनुदके मत्स्या निराक्रन्दे विहङ्गमाः । विहरेयुर्यथाकामं विहिंसन्तः पुनः पुनः ।
विमथ्यातिक्रमेरंश्च विषह्यापि परस्परं । अभावमचिरेणैव गच्छेयुर्नात्र संशयः ।
एवमेव विना राज्ञा विनश्येयुरिमाः प्रजाः । अन्धे तमसि मज्जेयुरगोपाः पशवो यथा ।
हरेयुर्बलवन्तोऽपि दुर्व्वलानां परिग्रहान् । हन्युर्व्यायच्छमानांश्च यदि राजा न पालयेत् ।
ममेदमिति लोकेऽस्मिन्न भवेत् सम्परिग्रहः । न दारा न च पुत्त्रः स्यान्न धनं न परिग्रहः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

विश्वलोपः प्रवर्त्तेत यदि राजा न पालयेत्। यानं वस्त्रमलङ्कारान् रत्नानि विविधानि च।
हरेयुः सहसा पापा यदि राजा न पालयेत्। पतेद्बहुविधं शस्त्रं बहुधा धर्म्मचारिषु।
अधर्म्मः प्रगृहीतः स्याद्यदि राजा न पालयेत्। मातरं पितरं वृद्धमाचार्य्यमतिथीन् गुरुं।
क्लिश्नीयुरपि हिंस्युर्व्वा यदि राजा न पालयेत्। बधबन्धपरिक्लेशो नित्यमर्थवताम्भवेत्।
ममत्वञ्च न विन्देयुर्य्यदि राजा न पालयेत्। अन्ताश्चाकाल एव स्युर्लोकोऽयं दस्युसाद्भवेत्।
पतेयुर्नरकं घोरं यदि राजा न पालयेत्। न योनिदोषो वर्त्तेत न कृषिर्न वणिक्पथः।
मज्जेद्धर्म्मस्त्रयी न स्याद्यदि राजा न पालयेत्। न यज्ञाः सम्प्रवर्त्तेयुर्व्विधिवत् स्वाप्तदक्षिणाः।
न विवाहाः समाजो वा यदि राजा न पालयेत्। न वृषाः सम्प्रवर्त्तेरन्न मथ्येरंश्च गर्गराः।
घोषाः प्रणाशं गच्छेयुर्यदि राजा न पालयेत्। त्रस्तमुद्विग्नहृदयं हाहाभूतमचेतनं।
क्षणेन विनश्येत् सर्व्वं यदि राजा न पालयेत्। न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः।
विधिवद्दक्षिणावन्ति यदि राजा न पालयेत्। ब्राह्मणाश्चतुरो वेदान्नाधीयीरंस्तपस्विनः।
विद्यास्नाता व्रतस्नाता यदि राजा न पालयेत्। न लभेद्धर्म्मसंश्लेषं हतविप्रहतो जनः।
हर्त्ता स्वमेन्द्रियो गच्छेद्यदि राजा न पालयेत्। हस्ताद्धस्तं परिमुषेद्भिद्येरन् सर्व्वसेतवः।
भयार्त्तं विद्रवेत् सर्व्वं यदि राजा न पालयेत्। अनयाः सम्प्रवर्त्तेरन् भवेद्वै वर्णसङ्करः।
दुर्भिक्षमाविशेद्राष्ट्रं यदि राजा न पालयेत्। विवृत्य हि यथाकामं गृहद्वाराणि शेरते।
मनुष्या रक्षिता राज्ञा समन्तादकुतोभयाः। नाक्रुष्टं सहते कश्चित् कुतो वा हस्तलाघवं।
यदि राजा न सम्यग्गां रक्षयत्यपि धार्म्मिकः। स्त्रियश्चापुरुषा मार्गं सर्व्वालङ्कारभूषिताः।
निर्भयाः प्रतिपद्यन्ते यदि रक्षति भूमिपः। धर्म्ममेव प्रपद्यन्ते न हिंसन्ति परस्परं।
अनुगृह्णन्ति चान्योन्यं यदा रक्षति भूमिपः। यजन्ते च महायज्ञैस्त्रयो वर्णाः पृथग्विधैः।
युक्ताश्चाधीयते विद्यां यदा रक्षति भूमिपः। वार्त्तामूलो ह्ययं लोकस्त्रयी वै धार्य्यते सदा।
तत्सर्व्वं वर्त्तते सम्यग्यदि रक्षति भूमिपः। यदा राजा धुरं श्रेष्ठामादाय वहति प्रजाः।
महता बलयोगेन तदा लोकः प्रसीदति। यस्याभावेन भूतानामभावः स्यात् समन्ततः।
भावे च भावो नित्यं स्यात् कस्तं न प्रतिपूजयेत्। तस्य यो वहते भारं सर्व्वलोकभयावहं।
तिष्ठन् प्रियहिते राज्ञ उभौ लोकाविमौ जयेत्। यस्तस्य पुरुषः पापं मनसाऽप्यनुचिन्तयेत्।
असंशयमिह क्लिष्टः प्रेत्यापि नरकं व्रजेत्। न हि जात्ववमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति। कुरुते पञ्चरूपाणि कालयुक्तानि यः सदा।
भवत्यग्निस्तथादित्यो मृत्युर्व्वैश्रवणो यमः। यदा ह्यासीदतः पापान् दहत्युग्रेण तेजसा।
मिथ्योपचरितो राजा तदा भवति पावकः। यदा पश्यति चारेण सर्व्वभूतानि भूमिपः।
सपुत्रपौत्रान् सामात्यांस्तदा भवति सोऽन्तकः। यदा त्वधार्म्मिकान् सर्व्वांस्तीक्ष्णैर्दण्डैर्नियच्छति।
धार्म्मिकांश्चानुगृह्णाति भवत्यथ यमस्तदा। यदा तु धनधाराभिस्तर्पयत्युपकारिणः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आच्छिनत्ति च रत्नानि विविधान्यपकारिणां। श्रियं ददाति कस्मैचित् कस्माच्चिदपकर्षति। २५८०
तदा वैश्रवणो राजल्लोके भवति भूमिपः। नास्यापवादे स्थातव्यं दक्षेणाक्लिष्टकर्म्मणा।
धर्म्यमाकाङ्क्षता लोकमीश्वरस्यानुसूयता। न हि राज्ञः प्रतीपानि कुर्व्वन् सुखमवाप्नुयात्।
पुत्त्रो भ्राता वयस्यो वा यद्यप्यात्मसमो भवेत्। कुर्य्यात् कृष्णगतिः शेषं ज्वलितोऽनिलसारथिः।
न तु राजाभिपन्नस्य शेषं क्वचन विद्यते। तस्य सर्व्वाणि रक्ष्याणि दूरतः परिवर्ज्जयेत्।
मृत्योरिव जुगुप्सेत राजस्वहरणान्नरः। नश्येदभिमृषन् सद्यो मृगः कूटमिव स्पृशन्। २५८५
आत्मस्वमिव रक्षेत राजस्वमिह बुद्धिमान्। महान्तं नरकं घोरमप्रतिष्ठमचेतनं।
पतन्ति चिररात्राय राजवित्तापहारिणः। राजा भोजो विराट् सम्राट् क्षत्त्रियो भूपतिर्नृपः।
य एभिस्स्तूयते शब्दैः कस्तं नार्च्चितुमर्हति। तस्माद्बुभूषुर्नियतो जितात्मा नियतेन्द्रियः।
मेधावी स्मृतिमान्दक्षः संश्रयेत महीपतिं। कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियं।
धर्म्मनित्यं स्थितं नीत्यां मन्त्रिणं पूजयेन्नृपः। दृढभक्तिं कृतप्रज्ञं धर्म्मज्ञं संयतेन्द्रियं। २५९०
शूरमक्षुद्रकर्म्माणं निषिद्धजनमाश्रयेत्।
प्रज्ञा प्रगल्भं कुरुते मनुष्यं राजा कृशान् वै कुरुते मनुष्यान्। राजाभिपन्नस्य कुतः सुखानि राजाऽभ्युपेतं सुखिनं करोति।
राजा प्रजानां हृदयं गरीयो गतिः प्रतिष्ठा सुखमुत्तमञ्च। समाश्रिता लोकमिमं परञ्च जयन्ति सम्यक् पुरुषा नरेन्द्र।
नराधिपश्चाप्यनुशिष्य मेदिनीं दमेन सत्येन च सौहृदेन। महद्भिरिष्ट्वा क्रतुभिर्म्महायशास्त्रिविष्टपे स्थानमुपैति शाश्वतं।
स एवमुक्तोऽङ्गिरसा कौशल्यो राजसत्तमः। प्रयत्नात् कृतवान् वीरः प्रजानां परिपालनं। २५९५
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अङ्गिरोवाक्ये अष्टषष्टोऽध्यायः ॥ ६८ ॥
॥ युधिष्ठिर उवाच ॥ पार्थिवेन विशेषेण किं कार्य्यमवशिष्यते। कथं रक्ष्यो जनपदः कथं जेयाश्च शत्रवः।
कथं चारं प्रयुञ्जीत वर्णान् विश्वासयेत् कथं। कथं भृत्यान् कथं दारान् कथं पुत्त्रांश्च भारत।
॥ भीष्म उवाच ॥ राजवृत्तं महाराज शृणुष्वावहितोऽखिलं। यत् कार्य्यं पार्थिवेनादौ पार्थिवप्रकृतेन वा।
आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः। अजितात्मा नरपतिर्व्विजयेत कथं रिपून्।
एतावानात्मविजयः पञ्चवर्गविनिग्रहः। जितेन्द्रियो नरपतिर्बाधितुं शक्नुयादरीन्। २६००
न्यसेत गुल्मान् दुर्गेषु सन्धौ च कुरुनन्दन। नगरोपवने चैव पुरोद्यानेषु चैव ह।
संस्थानेषु च सर्व्वेषु पुरेषु नगरेषु च। मध्ये च नरशार्दूल तथा राजनिवेशने।
प्रणिधींश्च ततः कुर्य्याज्जडान्धबधिराकृतीन्। पुंसः परीक्षितान् प्राज्ञान् क्षुत्पिपासाश्रमक्षमान्।
अमात्येषु च सर्व्वेषु मित्त्रेषु विविधेषु च। पुत्त्रेषु च महाराज प्रणिदध्यात् समाहितः।
पुरे जनपदे चैव तथा सामन्तराजसु। यथा न विद्युरन्योन्यं प्रणिधेयास्तथा हि ते। २६०५
चारांश्च विद्यात् प्रहितान् परेण भरतर्षभ। आपणेषु विहारेषु समाजेषु च भिक्षुषु।
आरामेषु तथोद्याने पण्डितानां समागमे। देशेषु चत्वरे चैव सभास्वावसथेषु च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवं विचिनुयाद्राजा परचारं विचक्षणः । चारे हि विदिते पूर्व्वं हितं भवति पाण्डव।
यदा तु हीनं नृपतिर्व्विद्यादात्मानमात्मना । अमात्यैः सह सम्मन्त्र्य कुर्य्यात् सन्धिं बलीयसा।
अज्ञायमाने हीनत्वे सन्धिं कुर्य्यात् परेण वै। लिप्सुर्वा कञ्चिदेवार्थं त्वरमाणो विचक्षणः। २६१०
गुणवन्तो महोत्साहा धर्म्मज्ञाः साधवश्च ये। सन्दधीत नृपस्तैश्च राष्ट्रं धर्म्मेण पालयन्।
उच्छिद्यमानमात्मानं ज्ञात्वा राजा महामतिः। पूर्व्वापकारिणो हन्याल्लोकद्विष्टांश्च सर्व्वशः।
यो नोपकर्त्तुं शक्नोति नापकर्त्तुं महीपतिः। न शक्यरूपश्चोद्धर्त्तुमुपेक्ष्यस्तादृशो भवेत्।
यात्रां यायादविज्ञातमनाक्रन्दमनन्तरं। व्यासक्तञ्च प्रमत्तञ्च दुर्ब्बलञ्च विशेषतः।
यात्रामाज्ञापयेद्वीरः कल्यः पुष्टबलः सुखी। पूर्व्वं कृत्वा विधानञ्च यात्रायां नगरे तथा। २६१५
न च वश्यो भवेदस्य नृपो यश्चातिवीर्य्यवान्। हीनश्च बलवीर्य्याभ्यां कर्षयंस्तत्परो वसेत्।
राष्ट्रञ्च पीडयेत्तस्य शस्त्राग्निविषमूर्च्छनैः। अमात्यवल्लभानाञ्च विवादांस्तस्य कारयेत्।
वर्ज्जनीयं सदा युद्धं राज्यकामेन धीमता। उपायैस्त्रिभिरादानमर्थस्याह बृहस्पतिः।
सान्त्वेन तु प्रदानेन भेदेन च नराधिप। यमर्थं शक्नुयात् प्राप्तुं तेन तुष्येत पण्डितः।
आददीत बलिञ्चापि प्रजाभ्यः कुरुनन्दन। स षड्भागमपि प्राज्ञस्तासामेवाभिगुप्तये। २६२०
दशधर्म्मगतेभ्यो यद्वसु बह्वल्पमेव च। तदाददीत सहसा पौराणां रक्षणाय वै।
यथा पुत्त्रास्तथा पौरा द्रष्टव्यास्ते न संशयः। भक्तिश्चैषां न कर्त्तव्या व्यवहारे प्रदर्शिते।
श्रोतुञ्चैव न्यसेद्राजा प्राज्ञान् सर्व्वार्थदर्शिनः। व्यवहारेषु सततं तत्र राष्ट्रं प्रतिष्ठितं।
आकरे लवणे शुल्के तरे नागवले तथा। न्यसेदमात्यान्नृपतिः स्वाप्तान् वा पुरुषान् हितान्।
सम्यग्दण्डधरो नित्यं राजा धर्म्ममवाप्नुयात्। राज्ञो हि सततं दण्डः सम्यग्धर्म्मः प्रशस्यते। २६२३
वेदवेदाङ्गवित् प्राज्ञः सुतपस्वी नृपो भवेत्। दानशीलश्च सततं यज्ञशीलश्च भारत।
एते गुणाः समस्ताः स्युर्नृपस्य सततं स्थिराः। व्यवहारलोपे नृपतेः कुतः स्वर्गः कुतो यशः।
यदा तु पीडितो राजा भवेद्राज्ञा बलीयसा। तदाऽभिसंश्रयेद्दुर्गं बुद्धिमान् पृथिवीपतिः।
विधावाक्रम्य मित्राणि विधानमुपकल्पयेत्। सामभेदान् विरोधार्थं विधानमुपकल्पयेत्।
घोषान्न्यसेत मार्गेषु ग्रामानुत्थापयेदपि। प्रवेशयेच्च तान् सर्व्वान् शाखानगरकेष्वपि। २६२०
ये गुप्ताश्चैव दुर्गाश्च देशास्तेषु प्रवेशयेत्। धनिनो बलमुख्यांश्च सान्त्वयित्वा पुनः पुनः।
सस्याभिहारं कुर्य्याच्च स्वयमेव नराधिपः। असम्भवे प्रवेशस्य दहेद्दावाग्निना भृशं।
क्षेत्रस्थेषु च सस्येषु शत्रोरुपजपेन्नरान्। विनाशयेद्वा तत् सर्व्वं बलेनाथ स्वकेन वा।
नदीमार्गेषु च तथा संक्रमानवसादयेत्। जलं विस्रावयेत् सर्व्वमविस्राव्यञ्च दूषयेत्।
तदात्वेनायतीभिश्च निवसेद्भूम्यनन्तरं। प्रतीघाते परस्याजौ मित्रकार्य्येऽप्युपस्थिते। २६२५
दुर्गाणाञ्चाभितो राजा मूलच्छेदं प्रकारयेत्। सर्व्वेषां क्षुद्रवृक्षाणां चैत्यवृक्षान् विवर्ज्जयेत्।
प्रवृद्धानाञ्च वृक्षाणां शाखां प्रच्छेदयेत्तथा। चैत्यानां सर्व्वथा त्याज्यमपि पत्रस्य पातनं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा। आपूरयेच्च परिखां स्थाणुनक्रझषाकुलां।
सङ्कटद्वारकाणि स्युरुच्छ्वासार्थं पुरस्य च। तेषाञ्च द्वारवद्गुप्तिः कार्य्या सर्व्वात्मना भवेत्।
द्वारेषु च गुरूण्येव यन्त्राणि स्थापयेत् सदा। आरोपयेच्छतघ्नीश्च स्वाधीनानि च कारयेत्। २६४०
काष्ठानि चाभिहार्य्याणि तथा कूपांश्च खानयेत्। संशोधयेत्तथा कूपान् कृतपूर्व्वान् पयोऽर्थिभिः।
तृणच्छन्नानि वेश्मानि पङ्केनाथ प्रलेपयेत्। निर्हरेच्च तृणं मासि चैत्रे वह्निभयात्तथा।
नक्तमेव च भक्तानि पाचयेत नराधिपः। न दिवा ज्वालयेदग्निं वर्जयित्वाऽग्निहोत्रिकं।
कर्म्मारारिष्टशालासु ज्वलेदग्निः सुरक्षितः। गृहाणि च प्रविश्यान्तर्व्विधेयः स्याद्धुताशनः।
महादण्डश्च तस्य स्याद्यस्याग्निर्व्वै दिवा भवेत्। प्रघोषयेदथैवञ्च रक्षणार्थं पुरस्य च। २६४५
भिक्षुकांश्चाक्रिकांश्चैव क्लीबोन्मत्तान् कुशीलवान्। वाह्यान् कुर्य्यान्नरश्रेष्ठ दोषाय स्युर्हि तेऽन्यथा।
चत्वरेष्वथ तीर्थेषु सभास्वावसथेषु च। यथार्थवर्णं प्रणिधिं कुर्य्यात् सर्व्वत्र पार्थिवः।
विशालान् राजमार्गांश्च कारयीत नराधिपः। प्रपाश्च विपणांश्चैव यथोद्देशं समादिशेत्।
भाण्डागारायुधागारान् योधागारांश्च सर्व्वशः। अश्वागारान् गजागारान् बलाधिकरणानि च।
परिखाश्चैव कौरव्य प्रतोलीर्निष्कुटानि च। न जात्वन्यः प्रपश्येत गुह्यमेतद्युधिष्ठिर। २६५०
अर्थसंनिचयं कुर्य्याद्राजा परबलार्द्दितः। तैलं वसा मधुघृतमौषधानि च सर्व्वशः।
अङ्गारकुशमुञ्जानां पलाशशरवर्णिनां। यवसेन्धनदग्धानां कारयीत च सञ्चयान्।
आयुधानि च सर्व्वेषां शक्त्यृष्टिप्रासकर्म्मणां। सञ्चयानेवमादीनां कारयीत नराधिपः।
औषधानि च सर्व्वाणि मूलानि च फलानि च। चतुर्व्विधांश्च वैद्यान् वै संगृह्णीयाद्विशेषतः।
नटाश्च नर्त्तकाश्चैव मल्ला मायाविनस्तथा। शोभयेयुः पुरवरं मोदयेयुश्च सर्व्वशः। २६५५
यतः शङ्का भवेच्चापि भृत्यतोऽथापि मन्त्रितः। पौरेभ्यो नृपतेर्व्वाऽपि स्वाधीनान् कारयीत तान्।
कृते कर्म्मणि राजेन्द्र पूजयेद्धनसञ्चयैः। दानेन च यथार्हेण सान्त्वेन विविधेन च।
निर्व्वेदयित्वा तु परं हत्वा वा कुरुनन्दन। ततोऽनृणो भवेद्राजा यथा शास्त्रे निदर्शितं।
राज्ञा सप्तैव रक्ष्याणि तानि चैव निबोध मे। आत्माऽमात्याश्च कोषश्च दण्डो मित्राणि चैव हि।
तथा जनपदाश्चैव पुरञ्च कुरुनन्दन। एतत् सप्तात्मकं राज्यं परिपाल्यं प्रयत्नतः। २६६०
षाड्गुण्यञ्च त्रिवर्गञ्च त्रिवर्गपरमं तथा। यो वेत्ति पुरुषव्याघ्र स भुङ्क्ते पृथिवीमिमां।
षाड्गुण्यमिति यत् प्रोक्तं तन्निबोध युधिष्ठिर। सन्धानासनमित्येव यात्रासन्धानमेव च।
विगृह्यासनमित्येव यात्रां सम्परिगृह्य च। द्वैधीभावस्तथाऽन्येषां संश्रयोऽथ परस्य च।
त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु। क्षयस्थानञ्च वृद्धिश्च त्रिवर्गः परमस्तथा।
धर्म्मश्चार्थश्च कामश्च सेवितव्योऽथ कालतः। धर्म्मेण च महीपालश्चिरं पालयते महीं। २६६५
अस्मिन्नर्थे च श्लोकौ द्वौ गीतावङ्गिरसा स्वयं। यादवीपुत्त्र भद्रन्ते तावपि श्रोतुमर्हसि।
कृत्वा सर्व्वाणि कार्य्याणि सम्यक् सम्पाल्य मेदिनीं। पालयित्वा तथा पौरान् परत्र सुखमेधते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

किं तस्य तपसा राज्ञः किञ्च तस्याध्वरैरपि । सुपालितप्रजो यः स्यात् सर्व्वधर्म्मविदेव सः ।
॥ युधिष्ठिर उवाच ॥ दण्डनीतिश्च राजा च समस्तौ तावुभावपि । तस्य किं कुर्व्वतः सिध्येत्तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ महाभाग्यं दण्डनीत्याः सिद्धैः शब्दैः सहेतुकैः । शृणु मे शंसतो राजन् यथावदिह भारत । २६७०
दण्डनीतिः स्वधर्म्मेभ्यश्चातुर्वर्ण्यं नियच्छति । प्रयुक्ता स्वामिना सम्यगधर्म्मेभ्यो नियच्छति ।
चातुर्वर्ण्ये स्वकर्म्मस्थे मर्य्यादानामसङ्करे । दण्डनीतिकृते क्षेमे प्रजानामकुतोभये ।
साम्ये प्रयत्नं कुर्व्वन्ति त्रयो वर्णा यथाविधि । तस्मादेव मनुष्याणां सुखं विद्धि समाहितं ।
कालो वा कारणं राज्ञो राजा वा कालकारणं । इति ते संशयो माभूद्राजा कालस्य कारणं ।
दण्डनीत्यां यदा राजा सम्यक् कार्त्स्न्येन वर्त्तते । तदा कृतयुगं नाम कालसृष्टं प्रवर्त्तते । २६७५
ततः कृतयुगे धर्म्मो नाधर्म्मो विद्यते क्वचित् । सर्व्वेषामेव वर्णानां नाधर्म्मे रमते मनः ।
योगक्षेमाः प्रवर्त्तन्ते प्रजानां नात्र संशयः । वैदिकानि च सर्व्वाणि भवन्त्यपि गुणान्युत ।
ऋतवश्च सुखाः सर्व्वे भवन्त्युत निरामयाः । प्रसीदन्ति नराणाञ्च स्वरवर्णमनांसि च ।
व्याधयो न भवन्त्यत्र नाल्पायुर्दृश्यते नरः । विधवा न भवन्त्यत्र कृपणो न तु जायते ।
अकृष्टपच्या पृथिवी भवन्त्योषधयस्तथा । त्वक्पत्रफलमूलानि वीर्य्यवन्ति भवन्ति च । २६८०
नाधर्म्मो विद्यते तत्र धर्म्म एव तु केवलं । इति कार्त्तयुगानेतान् धर्म्मान् विद्धि युधिष्ठिर ।
दण्डनीत्यां यदा राजा त्रीनंशाननुवर्त्तते । चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्त्तते ।
अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्त्तते । कृष्टपच्यैव पृथिवी भवन्त्योषधयस्तथा ।
अर्द्धं त्यक्त्वा यदा राजा नीत्यर्थमनुवर्त्तते । ततस्तु द्वापरं नाम स कालः सम्प्रवर्त्तते ।
अशुभस्य यदा त्वर्द्धं द्वावंशावनुवर्त्तते । कृष्टपच्यैव पृथिवी भवत्यर्द्धफला तदा । २६८५
दण्डनीतिं परित्यज्य यदा कार्त्स्न्येन भूमिपः । प्रजाः क्लिश्नात्ययोगेन प्रवर्त्तेत तदा कलिः ।
कलावधर्म्मो भूयिष्ठं धर्म्मो भवति न क्वचित् । सर्व्वेषामेव वर्णानां स्वधर्म्माच्च्यवते मनः ।
शूद्रा भैक्षेण जीवन्ति ब्राह्मणाः परिचर्य्यया । योगक्षेमस्य नाशश्च वर्त्तते वर्णसङ्करः ।
वैदिकानि च कर्म्माणि भवन्ति विगुणान्युत । ऋतवो न सुखाः सर्व्वे भवन्त्यामयिनस्तथा ।
ह्रसन्ति च मनुष्याणां स्वरवर्णमनांस्युत । व्याधयश्च भवन्त्यत्र म्रियन्ते च गतायुषः । २६९०
विधवाश्च भवन्त्यत्र नृशंसा जायते प्रजा । क्वचिद्वर्षति पर्ज्जन्यः क्वचित् शस्यं प्ररोहति ।
रसाः सर्व्वे क्षयं यान्ति यदा नेच्छति भूमिपः । प्रजाः संरक्षितुं सम्यग्दण्डनीतिसमाहितः ।
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च । युगस्य च चतुर्थस्य राजा भवति कारणं ।
कृतस्य कारणाद्राजा स्वर्गमत्यन्तमश्नुते । त्रेतायाः कारणाद्राजा स्वर्गं नात्यन्तमश्नुते ।
प्रवर्त्तनाद्द्वापरस्य यथाभागमुपाश्नुते । कलेः प्रवर्त्तनाद्राजा पापमत्यन्तमश्नुते । २६९५
ततो वसति दुष्कर्म्मा नरके शाश्वतीः समाः । प्रजानां कल्मषे मग्नोऽकीर्त्तिं पापञ्च विन्दति ।
दण्डनीतिं पुरस्कृत्य विजानन् क्षत्त्रियः सदा । अनवाप्तञ्च लिप्सेत लब्धञ्च परिपालयेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोकस्य सीमन्तकरी मर्य्यादा लोकभाविनी। सम्यङ्नीता दण्डनीतिर्यथा माता यथा पिता।

यस्यां भवति भूतानि तद्विद्धि मनुजर्षभ। एष एव परो धर्म्मो यद्राजा दण्डनीतिमान्।

तस्मात् कौरव्य धर्म्मेण प्रजाः पालय नीतिमान्। एवं वृत्तः प्रजा रक्षन् स्वर्गं जेतासि दुर्ज्जयं। २०००

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऊनसप्ततोऽध्यायः॥ ६९॥

॥ युधिष्ठिर उवाच॥ केन वृत्तेन वृत्तज्ञ वर्त्तमानो महीपतिः। सुखेनार्थान् सुखोदर्कानिह च प्रेत्य चाप्नुयात्।

॥ भीष्म उवाच॥ अयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसंयुतः। यान् गुणांस्तु गुणोपेतः कुर्व्वन् गुणमवाप्नुयात्।

चरेद्धर्म्मानकटुको मुञ्चेत् स्नेहं न नास्तिकः। अनृशंसश्चरेदर्थं चरेत् काममनुद्धतः।

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः। दाता नापात्रवर्षी स्यात् प्रगल्भः स्यादनिष्ठुरः।

सन्दधीत न चानार्य्यैर्विगृह्णीयान्न बन्धुभिः। नाभक्तञ्चारयेच्चारं कुर्य्यात्कार्य्यमपीडया। २००५

अर्थं ब्रूयान्न चासत्सु गुणान् ब्रूयान्न चात्मनः। आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत्।

नापरीक्ष्य नयेद्दण्डं न च मन्त्रं प्रकाशयेत्। विसृजेन्न च लुब्धेभ्यो विश्वसेन्नापकारिषु।

अनीर्षुर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः। स्त्रियः सेवेत नात्यर्थं मृष्टं भुञ्जीत नाहितं।

अस्तब्धः पूजयेन्मान्यान् गुरून् सेवेदमायया। अर्च्चेद्देवानदम्भेन श्रियमिच्छेदकुत्सितां।

सेवेत प्रणयं हित्वा दक्षः स्यान्न त्वकालवित्। सान्त्वयेन्न च मोक्षाय अनुगृह्णन्न चाक्षिपेत्। २०१०

प्रहरेन्न त्वविज्ञाय हत्वा शत्रून्न शोचयेत्। क्रोधं कुर्य्यान्न चाकस्मान्मृदुः स्यान्नापकारिषु।

एवञ्चर स्वराज्यस्थो यदि श्रेय इहेच्छसि। अतोऽन्यथा नरपतिर्भयमार्च्छत्यनुत्तमं।

इति सर्व्वान् गुणानेतान् यथोक्तान् योऽनुवर्त्तते। अनुभूयेह भद्राणि प्रेत्य स्वर्गे महीयते।

॥ वैशम्पायन उवाच॥ इदं वचः शान्तनवस्य शुश्रुवान् युधिष्ठिरः पाण्डवमुख्यसंवृतः। तदा ववन्दे च पितामहं नृपो यथो-
क्तमेतच्च चकार बुद्धिमान्।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्ततितमोऽध्यायः॥ ७०॥

॥ युधिष्ठिर उवाच॥ कथं राजा प्रजा रक्षन्नाधिबन्धेन युज्यते। धर्म्मे च नापराध्नोति तन्मे ब्रूहि पितामह। २०१५

॥ भीष्म उवाच॥ समासेनैव ते राजन् धर्म्मान् वक्ष्यामि शाश्वतान्। विस्तरेणैव धर्म्माणां न जात्वन्तमवाप्नुयात्।

धर्म्मनिष्ठान् श्रुतवतो देवव्रतसमाहितान्। अर्च्चयित्वा यजेथास्त्वं गृहे गुणवतो द्विजान्।

प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च। अथ सर्व्वाणि कुर्व्वीथाः कार्य्याणि सपुरोहितः।

धर्म्मकार्य्याणि निर्व्वर्त्य मङ्गलानि प्रयुज्य च। ब्राह्मणान् वाचयेथास्त्वमर्थसिद्धिजयाशिषः।

आर्ज्जवेन च सम्पन्नो धृत्या बुद्ध्या च भारत। यथार्थं प्रतिगृह्णीयात् कामक्रोधौ च वर्ज्जयेत्। २०२०

कामक्रोधौ पुरस्कृत्य योऽर्थं राजाऽनुतिष्ठति। न स धर्म्मं न चाप्यर्थं प्रतिगृह्णाति बालिशः।

मास्म लुब्धांश्च मूर्खांश्च कामार्थेषु प्रयूयुजः। अलुब्धान् बुद्धिसम्पन्नान् सर्व्वकर्म्मसु योजयेत्।

मूर्खो ह्यधिकृतोऽर्थेषु कार्य्याणामविशारदः। प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः।

बलिषष्ठेन शुल्केन दण्डेनाथापराधिनां। शास्त्राणि तेन लिप्सेथा वेतनेन धनागमं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दापयित्वा करं धर्म्म्यं राष्ट्रं नीत्या यथाविधि । तथैतं कल्पयेद्राजा योगक्षेममतन्द्रितः । २०२५
गोपायितारं दातारं धर्म्मनित्यमतन्द्रितं । अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः ।
मास्माधर्म्मेण लोभेन लिप्सेथास्त्वं धनागमं । धर्म्मार्थावध्रुवौ तस्य यो न शास्त्रपरो भवेत् ।
अर्थशास्त्रपरो राजा धर्म्मार्थान्नाधिगच्छति । अस्थाने चास्य तद्वित्तं सर्व्वमेव विनश्यति ।
अर्थमूलो हि हिंसाञ्च कुरुते स्वयमात्मनः । करैरशास्त्रदृष्टैर्हि मोहात् सम्पीडयेत् प्रजाः ।
ऊधश्छिन्द्यात्तु यो धेन्वाः क्षीरार्थी न लभेत् पयः । एवं राष्ट्रमयोगेन पीडितं न विवर्द्धते । २०३०
यो हि दोग्ध्रीमुपास्ते च स नित्यं विन्दते पयः । एवं राष्ट्रमुपायेन भुञ्जानो लभते फलं ।
अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितं । जनयत्यतुलां नित्यं कोषवृद्धिं युधिष्ठिर ।
दोग्ध्री धान्यं हिरण्यञ्च मही राज्ञा सुरक्षिता । नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः ।
मालाकारोपमो राजन् भव माङ्गारिकोपमः । तथा युक्तश्चिरं राज्यं भोक्तुं शक्ष्यसि पालयन् ।
परचक्राभियानेन यदि ते स्याद्धनक्षयः । अथ साम्नैव लिप्सेथा धनमब्राह्मणेषु यत् । २०३५
मास्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रचलेन्मनः । अन्त्यायामप्यवस्थायां किमु स्फीतस्य भारत ।
धनानि तेभ्यो दद्यास्त्वं यथाशक्ति यथाऽर्हतः । सान्त्वयन् परिरक्षंश्च स्वर्गमाप्स्यसि दुर्ज्जयं ।
एवं धर्म्मेण वृत्तेन प्रजास्त्वं परिपालय । स्वन्तं पुण्यं यशो नित्यं प्राप्स्यसे कुरुनन्दन ।
धर्म्मेण व्यवहारेण प्रजाः पालय पाण्डव । युधिष्ठिर यथा युक्तो नाधिबन्धेन योक्ष्यसे ।
एष एव परो धर्म्मो यद्राजा रक्षति प्रजाः । भूतानां हि यदा धर्म्मो रक्षणं परमा दया । २०४०
तस्मादेव परं धर्म्मं मन्यन्ते धर्म्मकोविदाः । यो राजा रक्षणे युक्तो भूतेषु कुरुते दयां ।
यदङ्गः कुरुते पापमरक्षन् भयतः प्रजाः । राजा वर्षसहस्रेण तस्यान्तमधिगच्छति ।
यदङ्गा कुरुते धर्म्मं प्रजा धर्म्मेण पालयन् । दशवर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि ।
स्विष्टैः स्वधीतैः सुतपा लोकान् जयति यावतः । क्षणेन तानवाप्नोति प्रजा धर्म्मेण पालयन् ।
एवं धर्म्मं प्रयत्नेन कौन्तेय परिपालय । ततः पुण्यफलं लब्ध्वा नाधिबन्धेन योक्ष्यसे । २०४५
स्वर्गलोकेषु महतीं श्रियं प्राप्स्यसि पाण्डव । असम्भवश्च धर्म्माणामीदृशानामराजसु ।
तस्माद्राजैव नान्योऽस्ति यो धर्म्मफलमाप्नुयात् । स राज्यं धृतिमान् प्राप्य धर्म्मेण परिपालय ।
इन्द्रं तर्पय सोमेन कामैश्च सुहृदो जनान् ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि एकसप्ततोऽध्यायः ॥ ७१ ॥
॥ भीष्म उवाच ॥ य एव तु सतो रक्षेदसतश्च निवर्त्तयेत् । स एव राज्ञा कर्त्तव्यो राजन् राजपुरोहितः ।
अत्राप्युदाहरन्तीममितिहासं पुरातनं । पुरूरवस ऐलस्य संवादं मातरिश्वनः । २०५०
॥ पुरूरवा उवाच ॥ कुतःस्विद्ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः । कस्माच्च भवति श्रेष्ठस्तन्मे व्याख्यातुमर्हसि ।
॥ मातरिश्वोवाच ॥ ब्रह्मणो मुखतः सृष्टो ब्राह्मणो राजसत्तम । बाहुभ्यां क्षत्त्रियः सृष्ट ऊरुभ्यां वैश्य एव च ।
वर्णानां परिचर्य्यार्थं त्रयाणां भरतर्षभ । वर्णश्चतुर्थः सम्भूतः पद्भ्यां शूद्रो विनिर्म्मितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ब्राह्मणो जायमानो हि पृथिव्यामनुजायते। ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये।
अतः पृथिव्या यन्तारं चत्रियं दण्डधारणे। द्वितीयं दण्डमकरोत् प्रजानामनुरक्तये। २७५५
वैश्यस्तु धनधान्येन त्रीन् वर्णान् बिभृयादिमान्। शूद्रो ह्येतान् परिचरेदिति ब्रह्मानुशासनं।
॥ ऐल उवाच ॥ द्विजस्य चत्त्रबन्धोर्व्वा कस्येयं पृथिवी भवेत्। धर्म्मतः सह वित्तेन सम्यग्वायो प्रचच्व मे।
॥ वायुरुवाच ॥ विप्रस्य सर्व्वमेवैतत् यत् किञ्चिज्जगतीगतं। ज्येष्ठेनाभिजनेनेह तद्धर्म्मकुशला विदुः।
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च। गुरुर्हि सर्व्ववर्णानां ज्येष्ठः श्रेष्ठश्च वै द्विजः।
पत्यभावे यथैव स्त्री देवरं कुरुते पतिं। एष ते प्रथमः कल्प आपद्यन्यो भवेदतः। २७६०
यदि स्वर्गं परं स्थानं स्वधर्म्मं परिमार्गसि। यत्किञ्चिद्विजयेर्भूमिं ब्राह्मणाय निवेदय।
श्रुतवृत्तोपपन्नाय धर्म्मज्ञाय तपस्विने। स्वधर्म्मपरितृप्ताय यो न वित्तपरो भवेत्।
यो राजानं नयेद्बुद्ध्या सर्व्वतः परिपूर्णया। ब्राह्मणो हि कुले जातः कृतप्रज्ञो विनीतवान्।
श्रेयो नयति राजानं ब्रुवंश्चित्रां सरस्वतीं। राजा चरति यं धर्म्मं ब्राह्मणेन निदर्शितं।
शुश्रूषुरनहंवादी चत्रधर्म्मव्रते स्थितः। तावता सत्कृतः प्राज्ञश्चिरं यशसि तिष्ठति। २७६५
तस्य धर्म्मस्य सर्व्वस्य भागी राजपुरोहितः। एवमेव प्रजाः सर्व्वा राजानमभिसंश्रिताः।
सम्यग्वृत्ताः स्वधर्म्मस्था न कुतश्चिद्भयान्विताः। राष्ट्रे चरन्ति यं धर्म्मं राज्ञा साध्वभिरचिताः।
चतुर्थं तस्य धर्म्मस्य राजा भागन्तु विन्दति। देवा मनुष्याः पितरो गन्धर्व्वोरगराचसाः।
यज्ञमेवोपजीवन्ति नास्ति देष्टमराजके। इतो दत्तेन जीवन्ति देवताः पितरस्तथा।
राजन्येवास्य धर्म्मस्य योगः चेमः प्रतिष्ठितः। छायायामप्सु वायौ च सुखमुष्णेऽधिगच्छति। २७७०
अग्नौ वाससि सूर्य्ये च सुखं शीतेऽधिगच्छति। शब्दे स्पर्शे रसे रूपे गन्धे च रमते मनः।
तेषु भोगेषु सर्व्वेषु न भीतो लभते सुखं। अभयस्य हि यो दाता तस्यैव सुमहत् फलं।
न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते। इन्द्रो राजा यमो राजा धर्म्मो राजा तथैव च।
राजा बिभर्त्ति रूपाणि राज्ञा सर्व्वमिदं धृतं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि द्वासप्ततोऽध्यायः ॥ ७२ ॥
॥ भीष्म उवाच ॥ राज्ञा पुरोहितः कार्य्यो भवेद्विद्वान् बहुश्रुतः। उभौ समीच्य धर्म्मार्थावप्रमेयावनन्तरं। २७७५
धर्म्मात्मा मन्त्रविद्येषां राज्ञां राजन् पुरोहितः। राजा चैवंगुणो येषां कुशलं तेषु सर्व्वतः।
उभौ प्रजा वर्द्धयतो देवान् सर्व्वान् सुतान् पितॄन्। भवेयातां स्थितौ धर्म्मे श्रद्धेयौ सुतपस्विनौ।
परस्परस्य सुहृदौ विहितौ समचेतसौ। ब्रह्मचत्रस्य सम्मानात् प्रजा सुखमवाप्नुयात्।
विमाननात्तयोरेव प्रजा नश्येयुरेव हि। ब्रह्म चत्रं हि सर्व्वेषां वर्णानां मूलमुच्यते।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। ऐलकश्यपसंवादं तन्निबोध युधिष्ठिर। २७८०
॥ ऐल उवाच ॥ यदा हि ब्रह्म प्रजहाति चत्त्रं चत्त्रं यदा वा प्रजहाति ब्रह्म। अन्वग्बलं कतमेऽस्मिन् भजन्ते तथा वर्णाः कतमेऽस्मिन् ध्रियन्ते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ कश्यप उवाच ॥ वृद्धं राष्ट्रं क्षत्रियस्य भवति ब्रह्म क्षत्रं यत्र विरुध्यतीह। अन्वग्बलं दस्यवस्तद्भजन्ते तथा वर्णं तत्र भियन्ति
सद्यः।
नैषां ब्रह्म च वर्द्धते नोत पुत्रा न गर्गरो मथ्यते नो यजन्ते। नैषां पुत्रा वेदमधीते च यदा ब्रह्म क्षत्रियाः सन्त्यजन्ति।
नैषामर्थो वर्द्धते जातु गेहे नाधीयते सुप्रजा नो यजन्ते। अपध्वस्ता दस्युभूता भवन्ति ये ब्राह्मणान् क्षत्रियाः सन्त्यजन्ति।
एतौ हि नित्यं संयुक्तावितरेतरधारणे। क्षत्त्रं वै ब्रह्मणो योनिर्य्योनिः क्षत्त्रस्य वै द्विजाः। २७८५
उभावेतौ नित्यमभिप्रपन्नौ सम्प्रापतुर्म्महतीं सम्प्रतिष्ठां। तयोः सन्धिर्भिद्यते चेत् पुराणस्तत. सर्व्वं भवति सम्प्रमूढं।
नात्र पारं लभते पारगामी महागाधे नौरिव सम्प्रपन्ना। चातुर्व्वर्ण्यं भवति हि सम्प्रमूढं प्रजास्ततः क्षयसंस्था भवन्ति।
ब्रह्मवृक्षो रक्ष्यमाणो मधु हेम च वर्षति। अरक्ष्यमाणः सततमश्रु पापञ्च वर्षति।
न ब्रह्मचारी चरणादपेतो यदा ब्रह्म ब्रह्मणि त्राणमिच्छेत्। आश्चर्य्यतो वर्षति तत्र देवस्तत्राभीक्ष्णं दुःसहाश्चाविशन्ति।
स्त्रियं हत्वा ब्राह्मणञ्चापि पापः सभायां यत्र लभतेऽनुवादं। राज्ञः सकाशेन बिभेति चापि ततो भयं विद्यते क्षत्रियस्य। २७९०
पापैः पापे क्रियमाणे हि चैल ततो रुद्रो जायते देव एषः। पापैः पापाः सञ्जनयन्ति रुद्रं ततः सर्व्वान् साध्वसाधून्
हिनस्ति।
॥ ऐल उवाच ॥ कुतो रुद्रः कीदृशो वाऽपि रुद्रः सत्त्वैः सत्त्वं दृश्यते बध्यमानं। एतत् सर्व्वं कश्यप मे प्रचक्ष्व कुतो रुद्रो जाय
ते देव एषः।
॥ कश्यप उवाच ॥ आत्मा रुद्रो हृदये मानवानां स्वं स्वं देहं परदेहञ्च हन्ति। वातोत्पातैः सदृशं रुद्रमाहुर्द्दैवैर्ज्जीमूतैः
सदृशं रूपमस्य।
॥ ऐल उवाच ॥ न वै वातः परिवृणोति कश्चिन्न जीमूतो वर्षति नापि देवः। तथा युक्तो दृश्यते मानुषेषु कामद्वेषात् बध्य
ते मुच्यते च।
॥ कश्यप उवाच ॥ यथैकगेहे जातवेदाः प्रदीप्तः कृत्स्नं ग्रामं दहते चत्वरं वा। विमोहनं कुरुते देव एष ततः सर्व्वं स्पृश्यते
पुण्यपापैः। २७९५
॥ ऐल उवाच ॥ यदि दण्डः स्पृश्यते पुण्यपापं पापैः पापे क्रियमाणे विशेषात्। कस्य हेतोः सुकृतं नाम कुर्य्याद्दुष्कृतं वा
कस्य हेतोर्न कुर्य्यात्।
॥ कश्यप उवाच ॥ असंयोगात् पापकृतामपापास्तुल्यो दण्डः स्पृश्यते मिश्रभावात्। शुष्केणार्द्रं दह्यते मिश्रभावात् न
मिश्रः स्यात् पापकृद्भिः कथञ्चित्।
॥ ऐल उवाच ॥ साध्वसाधून् धारयतीह भूमिः साध्वसाधूंस्तापयतीव सूर्य्यः। साध्वसाधूंश्चापि वातीह वायुरापस्तथा
साध्वसाधून् पुनन्ति।
॥ कश्यप उवाच ॥ एवमस्मिन् वर्त्तते लोक एष नामुत्रैवं वर्त्तते राजपुत्त्र। प्रेत्यैतयोरन्तरावान् विशेषो यो वै पुण्यं चरते
यश्च पापं।
पुण्यस्य लोको मधुमान् घृतार्च्चिर्हिरण्यज्योतिरमृतस्य नाभिः। तत्र प्रेत्य मोदते ब्रह्मचारी न तत्र मृत्युर्न जरा नोत
दुःखं। २८००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पापस्य लोको निरयो दुष्प्रकाशो नित्यं दुःखं शोकभूयिष्ठमेव । तत्रात्मानं शोचति पापकर्म्मा वह्वीः समाः प्रतपन्न प्रतिष्ठः ।

मिथो भेदाद्ब्राह्मणक्षत्रियाणां प्रजा दुःखं दुःसहञ्चाविशन्ति । एवं ज्ञात्वा कार्य्य एवेह नित्यं पुरोहितो नैकविद्यो नृपेण ।

तस्यैवान्वभिषिञ्चेत तथा धर्म्मो विधीयते । अग्रं हि ब्राह्मणः प्रोक्तं सर्व्वस्यैवेह धर्म्मतः ।

पूर्व्वं हि ब्राह्मणःसृष्टिरिति ब्रह्मविदो विदुः । ज्येष्ठेनाभिजनेनास्य प्राप्तं पूर्व्वं यदुत्तरं ।

तस्मान्मान्यश्च पूज्यश्च ब्राह्मणः प्रसृताग्रभुक् । सर्व्वं श्रेष्ठं विशिष्टञ्च निवेद्यं तस्य धर्म्मतः । २८०५

अवश्यमेव कर्त्तव्यं राज्ञा बलवताऽपि हि । ब्रह्म वर्द्धयति क्षत्रं क्षत्रतो ब्रह्म वर्द्धते ।

एवं राज्ञो विशेषेण पूज्या वै ब्राह्मणाः सदा ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि त्रिसप्ततोऽध्यायः ॥ ७३ ॥

॥ भीष्म उवाच ॥ योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते । योगक्षेमो हि राज्ञो हि समायत्तः पुरोहिते ।

यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत । दृष्टञ्च राजा बाहुभ्यां यद्राज्यं सुखमेधते ।

अत्राप्युदाहरन्तीममितिहासं पुरातनं । मुचुकुन्दस्य संवादं राज्ञो वैश्रवणस्य च । २८१०

मुचुकुन्दो विजित्येमां पृथिवीं पृथिवीपतिः । जिज्ञासमानः स्वबलमुपेयादलकाधिपं ।

ततो वैश्रवणो राजा राक्षसानसृजत्तदा । ते बलान्यवमृद्नन्त मुचुकुन्दस्य नैरृताः ।

स हन्यमाने सैन्ये स्वे मुचुकुन्दो नराधिपः । गर्हयामास विद्वांसं पुरोहितमरिन्दम ।

तत उग्रं तपस्तप्त्वा वशिष्ठो धर्म्मवित्तमः । रक्षांस्युपावधीत्तस्य पन्थानञ्चाप्यविन्दत ।

ततो वैश्रवणो राजा मुचुकुन्दमदर्शयत् । बध्यमानेषु सैन्येषु वचनञ्चेदमब्रवीत् । २८१५

॥ धनद उवाच ॥ बलवन्तस्त्वया पूर्व्वं राजानः सपुरोहिताः । न चैवं समवर्त्तन्त यथा त्वमिह वर्त्तसे ।

ते खल्वपि कृतास्त्राश्च बलवन्तश्च भूमिपाः । आगम्य पर्य्युपासन्ते मामीशं सुखदुःखयोः ।

यद्यस्ति बाहुवीर्य्यन्ते तद्दर्शयितुमर्हसि । किं ब्राह्मणबलेन त्वमतिमात्रं प्रवर्त्तसे ।

मुचुकुन्दस्ततः क्रुद्धः प्रत्युवाच धनेश्वरं । न्यायपूर्व्वमसंरब्धमसंभ्रान्तमिदं वचः ।

ब्रह्म क्षत्रमिदं सृष्टमेकयोनि स्वयम्भुवा । पृथग्बलविधानन्तन्नलोकं परिपालयेत् । २८२०

तपोमन्त्रबलं नित्यं ब्राह्मणेषु प्रतिष्ठितं । अस्त्रबाहुबलं नित्यं क्षत्रियेषु प्रतिष्ठितं ।

ताभ्यां सम्भूय कर्त्तव्यं प्रजानां परिपालनं । तथा च मां प्रवर्त्तन्तं किं गर्हस्यलकाधिप ।

ततोऽब्रवीद्वैश्रवणो राजानं सपुरोहितं । नाहं राज्यमनिर्द्दिष्टं कस्मैचिद्विदधाम्युत ।

नाच्छिन्दे चाप्यनिर्द्दिष्टमिति जानीहि पार्थिव । प्रशाधि पृथिवीं कृत्स्नां समन्तादखिलामिमां ।

एवमुक्तः प्रत्युवाच मुचुकुन्दो महीपतिः । २८२५

॥ मुचुकुन्द उवाच ॥ नाहं राज्यं भवद्दत्तं भोक्तुमिच्छामि पार्थिव । बाहुवीर्य्यार्ज्जितं राज्यमश्नीयामिति कामये ।

॥ भीष्म उवाच ॥ ततो वैश्रवणो राजा विस्मयं परमं ययौ । क्षत्रधर्म्मस्थितं दृष्ट्वा मुचुकुन्दमसम्भ्रमं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो राजा मुचुकुन्दः सोऽन्वशासद्वसुन्धरां । बाहुवीर्य्यार्जितं सम्यक् क्षत्रधर्म्ममनुव्रतः ।
एवं यो धर्म्मविद्राजा ब्रह्मपूर्ब्बं प्रवर्त्तते । जयत्यविजितामुर्व्वीं यशश्च महदश्नुते ।
नित्योदकी ब्राह्मणः स्यान्नित्यशस्त्रश्च क्षत्रियः । तयोर्हि सर्व्वमायत्तं यत् किञ्चिज्जगतीगतं । २८३०

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि मुचुकुन्दोपाख्याने चतुःसप्ततोऽध्यायः ॥ ७४ ॥

॥ युधिष्ठिर उवाच ॥ यया वृत्त्या महीपालो विवर्द्धयति मानवान् । पुण्यांश्च लोकान् जयति तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ दानशीलो भवेद्राजा यज्ञशीलश्च भारत । उपवासतपःशीलः प्रजानां पालने रतः ।
सर्व्वाश्चैव प्रजा नित्यं राजा धर्म्मेण पालयन् । उत्थानेन प्रदानेन पूजयेच्चापि धार्म्मिकान् ।
राज्ञा हि पूजितो धर्म्मस्ततः सर्व्वत्र पूज्यते । यद्यदाचरते राजा तत्प्रजानां स्म रोचते ।
नित्यमुद्यतदण्डश्च भवेन्मृत्युरिवारिषु । निहन्यात् सर्व्वतो दस्यून कामात् कस्यचित् क्षमेत् । २८३५
यं हि धर्म्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः । चतुर्थं तस्य धर्म्मस्य राजा भारत विन्दति ।
यदधीते यद्ददाति यज्जुहोति यदर्च्चति । राजा चतुर्थभाक् तस्य प्रजा धर्म्मेण पालयन् ।
यद्राष्ट्रेऽकुशलं किञ्चिद्राज्ञोऽरक्षयतः प्रजाः । चतुर्थं तस्य पापस्य राजा भारत विन्दति ।
अप्याहुः सर्व्वमेवेति भूयोऽर्द्धमिति निश्चितः । कर्म्मणः पृथिवीपाल नृशंसोऽनृतवागपि ।
तादृशात् किल्विषाद्राजा शृणु येन प्रमुच्यते । प्रत्याहर्त्तुमशक्यं स्याद्धनं चौरैर्हृतं यदि । २८४०
तत् स्वकोषात् प्रदेयं स्यादशक्तेनोपजीवतः । सर्व्ववर्णैः सदा रक्ष्यं ब्रह्मस्वं ब्राह्मणा यथा ।
न स्थेयं विषये तेन योऽपकुर्य्याद्द्विजातिषु । ब्रह्मस्वे रक्ष्यमाणे तु सर्व्वं भवति रक्षितं ।
तस्मात्तेषां प्रसादेन कृतकृत्यो भवेन्नृपः । पर्ज्जन्यमिव भूतानि महाद्रुममिव द्विजाः ।
नरास्तमुपजीवन्ति नृपं सर्व्वार्थसाधकं । न हि कामात्मना राज्ञा सततं कामबुद्धिना ।
नृशंसेनातिलुब्धेन शक्यं पालयितुं प्रजाः । २८४४

॥ युधिष्ठिर उवाच ॥ नाहं राज्यसुखान्वेषी राज्यमिच्छाम्यपि क्षणं । धर्म्मार्थं रोचयेद्राज्यं धर्म्मश्चात्र न विद्यते ।
वनमेव गमिष्यामि तस्माद्धर्म्मचिकीर्षया । तत्र मेध्येष्वरण्येषु न्यस्तदण्डो जितेन्द्रियः ।
धर्म्ममाराधयिष्यामि मुनिर्मूलफलाशनः ।
॥ भीष्म उवाच ॥ वेदाहं तव या बुद्धिरानृशंस्यागुणैव सा । न च शुद्धानृशंस्येन शक्यं राज्यमुपासितुं ।
अपि तु त्वां मृदुप्रज्ञमत्यार्य्यमधार्म्मिकं । क्लीवे धर्म्मं घृणायुक्तं न लोको बहुमन्यते । २८५०
वृत्तिन्तु त्वमपेक्षस्व पितृपैतामहोचितां । नैव राज्ञां तथा वृत्तं यथा त्वं स्थातुमिच्छसि ।
न हि वैक्लव्यसंसृष्टमानृशंस्यमिहास्थितः । प्रजापालनसंभूतमाप्ता धर्म्मफलं ह्यसि ।
न ह्येतामाशिषं पाण्डुर्न च कुन्ती त्वयाचत । तथैतत् प्रज्ञया तात यथा चरसि मेधया ।
शौर्य्यं बलञ्च सत्यञ्च पिता तव सदाऽब्रवीत् । माहात्म्यञ्च महौदार्य्यं भवतः कुन्त्ययाचत ।
नित्यं स्वाहा स्वधा नित्यं चोभे मानुषदैवते । पुत्त्रेष्वाशासते नित्यं पितरो दैवतानि च । २८५५
दानमध्ययनं यज्ञं प्रजानां परिपालनं । धर्म्ममेतदधर्म्मं वा जन्मनैवाभ्यजायथाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

काले धुरि च युक्तानां वहतां भारमाहितं । सीदतामपि कौन्तेय नाकीर्त्तिरवसीदति ।

समन्ततो विनियतो वहत्यस्खलितो हयः । निर्द्दोषः कर्म्मवचनात् सिद्धिः कर्म्मण एव सा ।

नैकान्तविनिपातेन विचचारेह कश्चन । धर्म्मी गृही वा राजा वा ब्रह्मचारी यथा पुनः ।

अल्पं हि सारभूयिष्ठं यत् कर्म्मोदारमेव तत् । कृतमेवाकृताच्छ्रेयो न पापीयोऽस्त्यकर्म्मणः ।

यदा कुलीनो धर्म्मज्ञः प्राप्नोत्यैश्वर्य्यमुत्तमं । योगक्षेमस्तदा राज्ञः कुशलायैव कल्पते ।

दानेनान्यं बलेनान्यमन्यं सूनृतया गिरा । सर्व्वतः प्रतिगृह्णीयाद्राज्यं प्राप्येह धार्म्मिकः ।

यं हि वैद्याः कुले जाता ह्यवृत्तिभयपीडिताः । प्राप्य तृप्ताः प्रतिष्ठन्ति धर्म्मः कोऽभ्यधिकस्ततः ।

॥ युधिष्ठिर उवाच ॥ किं तात परमं स्वर्ग्यं का ततः प्रीतिरुत्तमा । किं ततः परमैश्वर्य्यं ब्रूहि मे यदि पश्यसि ।

॥ भीष्म उवाच ॥ यस्मिन् भयार्द्दितः सम्यक् क्षेमं विन्दत्यपि क्षणं । स स्वर्गजित्तमोऽस्माकं सत्यमेतद्ब्रवीमि ते ।

त्वमेव प्रीतिमांस्तस्मात् कुरूणां कुरुसत्तम । भव राजा जय स्वर्गं सतो रक्षाऽसतो जहि ।

अनु त्वां तात जीवन्तु सुहृदः साधुभिः सह । पर्ज्जन्यमिव भूतानि स्वादुद्रुममिव द्विजाः ।

धृष्टं शूरं प्रहर्त्तारमनृशंसं जितेन्द्रियं । वत्सलं संविभक्तारमुपजीवन्ति तं नराः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि पञ्चसप्ततोऽध्यायः ॥ ७५ ॥

॥ युधिष्ठिर उवाच ॥ स्वकर्म्मण्यपरे युक्तास्तथैवान्ये विकर्म्मणि । तेषां विशेषमाचक्ष्व ब्राह्मणानां पितामह ।

॥ भीष्म उवाच ॥ विद्यालक्षणसम्पन्नाः सर्व्वत्र समदर्शिनः । एते ब्रह्मसमा राजन् ब्राह्मणाः परिकीर्त्तिताः ।

ऋग्यजुःसामसम्पन्नाः स्वेषु कर्म्मस्ववस्थिताः । एते देवसमा राजन् ब्राह्मणानां भवन्त्युत ।

जन्मकर्म्मविहीना ये कदर्य्या ब्रह्मबन्धवः । एते शूद्रसमा राजन् ब्राह्मणानां भवन्त्युत ।

अश्रोत्रियाः सर्व्व एव सर्व्वे चानाहिताग्नयः । तान् सर्व्वान् धार्म्मिको राजा बलिं विष्टिञ्च कारयेत् ।

आह्वायका देवलका नक्षत्रग्रामयाजकाः । एते ब्राह्मणचाण्डाला महापथिकपञ्चमाः ।

ऋत्विक् पुरोहितो मन्त्री दूतो वार्त्तानुकर्षकः । एते क्षत्रसमा राजन् ब्राह्मणानां भवन्त्युत ।

अश्वारोहा गजारोहा रथिनोऽथ पदातयः । एते वैश्यसमा राजन् ब्राह्मणानां भवन्त्युत ।

एतेभ्यो बलिमादद्याद्धीनकोषो महीपतिः । ऋते ब्रह्मसमेभ्यश्च देवकल्पेभ्य एव च ।

अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकं । ब्राह्मणानाञ्च ये केचिद्विकर्म्मस्था भवन्त्युत ।

विकर्म्मस्थास्तु नोपेक्ष्या विप्रा राज्ञा कथञ्चन । नियम्याः संविभाज्याश्च धर्म्मानुग्रहकारणात् ।

यस्य स्म विषये राजन् स्तेनो भवति वै द्विजः । राज्ञ एवापराधन्तं मन्यन्ते तद्विदो जनाः ।

अवृत्त्या यो भवेत् स्तेनो वेदवित् स्नातकस्तथा । राजन् स राज्ञा भर्त्तव्य इति वेदविदो विदुः ।

स चेन्नोपनिवर्त्तेत कृतवृत्तिः परन्तप । ततो निर्व्वासनीयः स्यात् तस्माद्देशात् सबान्धवः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि षट्सप्ततोऽध्यायः ॥ ७६ ॥

॥ युधिष्ठिर उवाच ॥ केषां प्रभवते राजा वित्तस्य भरतर्षभ । कया च वृत्त्या वर्त्तेत तन्मे ब्रूहि पितामह ।

॥ भीष्म उवाच ॥ अब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकं । ब्राह्मणानाञ्च ये केचिद्विकर्म्मस्था भवन्त्युत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विकर्म्मस्थाश्च नोपेक्ष्या विप्रा राज्ञा कथञ्चन। इति राज्ञां पुरावृत्तमपि जल्पन्ति साधवः। १८८८
यस्य स्म विषये राज्ञः स्तेनो भवति वै द्विजः। राज्ञ एवापराधन्तं मन्यन्ते किल्बिषं नृप।
अभिशस्तमिवात्मानं मन्यन्ते तेन कर्म्मणा। तस्माद्राजर्षयः सर्व्वे ब्राह्मणानन्वपालयन्।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। गीतं कैकेयराजेन ह्रियमाणेन रक्षसा।
केकयानामधिपतिं रक्षो जग्राह दारुणं। स्वाध्यायेनान्वितं राजन्नरण्ये संशितव्रतं।
॥ राजोवाच ॥ न मे स्तेनो जनपदे न कदर्य्यो न मद्यपः। नानाहिताग्निर्नायज्वा मामकान्तरमाविशः। १८९०
न च मे ब्राह्मणोऽविद्वान् नाव्रती नाप्यसोमपः। नानाहिताग्निर्नायज्वा मामकान्तरमाविशः।
नानाप्तदक्षिणैर्यज्ञैर्यजन्ते विषये मम। नाधीते नाव्रती कश्चिन्मामकान्तरमाविशः।
अध्यापयन्त्यधीयन्ते यजन्ते याजयन्ति च। ददति प्रतिगृह्णन्ति षट्सु कर्म्मस्ववस्थिताः।
पूजिताः संविभक्ताश्च मृदवः सत्यवादिनः। ब्राह्मणा मे स्वकर्म्मस्था मामकान्तरमाविशः।
न याचन्ति प्रयच्छन्ति सत्यधर्म्मविशारदाः। नाध्यापयन्त्यधीयन्ते यजन्ते याजयन्ति न। १८९५
ब्राह्मणान् परिरक्षन्ति संग्रामेष्वपलायिनः। क्षत्रिया मे स्वकर्म्मस्था मामकान्तरमाविशः।
कृषिगोरक्ष्यवाणिज्यमुपजीवन्त्यमायया। अप्रमत्ताः क्रियावन्तः सुव्रताः सत्यवादिनः।
संविभागं दमं शौचं सौहृदञ्च व्यपाश्रिताः। मम वैश्याः स्वकर्म्मस्था मामकान्तरमाविशः।
त्रीन् वर्णानुपजीवन्ति यथावदनसूयकाः। मम शूद्राः स्वकर्म्मस्था मामकान्तरमाविशः।
कृपणानाथवृद्धानां दुर्ब्बलातुरयोषितां। संविभक्ताऽस्मि सर्व्वेषां मामकान्तरमाविशः। १९००
कुलदेशादिधर्म्माणां प्रथितानां यथाविधि। अव्युच्छेत्ताऽस्मि सर्व्वेषां मामकान्तरमाविशः।
तपस्विनो मे विषये पूजिताः परिपालिताः। संविभक्ताश्च सत्कृत्य मामकान्तरमाविशः।
नासंविभज्य भोक्ताऽस्मि नाविशामि परस्त्रियं। स्वतन्त्रो जातु न क्रीडे मामकान्तरमाविशः।
नाब्रह्मचारी भिक्षावान् भिक्षुर्व्वाऽब्रह्मचर्य्यवान्। अनृत्विजा हुतं नास्ति मामकान्तरमाविशः।
नावजानाम्यहं वैद्यान् न वृद्धान्न तपस्विनः। राष्ट्रे स्वपति जागर्म्मि मामकान्तरमाविशः। १९०५
आत्मविज्ञानसम्पन्नस्तपस्वी सर्व्वधर्म्मवित्। स्वामी सर्व्वस्य राष्ट्रस्य धीमान्मम पुरोहितः।
दानेन विद्यामभिवाञ्छयामि लोकान् सत्येनाथो ब्राह्मणानाञ्च गुप्त्या। शुश्रूषया चापि गुरूनुपैमि न मे भयं विद्यते राक्षसेभ्यः।
न मे राष्ट्रे विधवा ब्रह्मबन्धुर्न ब्राह्मणः कितवो नोत चौरः। अयाज्ययाजी न च पापकर्म्मा न मे भयं विद्यते राक्षसेभ्यः।
न मे शस्त्रैरनिर्भिन्नं गात्रे ह्यङ्गुलमन्तरं। धर्म्मार्थं युध्यमानस्य मामकान्तरमाविशः।
गोब्राह्मणेभ्यो यज्ञेभ्यो नित्यं स्वस्त्ययनं मम। आशासते जना राष्ट्रे मामकान्तरमाविशः। १९१०
॥ राक्षस उवाच ॥ यस्मात् सर्व्वास्ववस्थासु धर्म्ममेवान्ववेक्षसे। तस्मात् प्राप्नुहि कैकेय गृहं स्वस्ति व्रजाम्यहं।
येषां गोब्राह्मणं रक्ष्यं प्रजा रक्ष्याश्च कैकय। न रक्षोभ्यो भयं तेषां कुत एव तु पापकात्।
येषां पुरोगमा विप्रा येषां ब्रह्म परं बलं। अतिथिप्रियास्तथा पौरास्ते वै स्वर्गजितो नृपाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ तस्माद्द्विजातीन् रक्षेत ते हि रक्षन्ति रक्षिताः । आशीरेषां भवेद्राजन् राज्ञां सम्यक्प्रवर्त्ततां ।
तस्माद्राज्ञा विशेषेण विकर्म्मस्था द्विजातयः । नियम्याः संविभज्याश्च तदनुग्रहकारणात् । २९१५
एवं यो वर्त्तते राजा पौरजानपदेष्विह । अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकतां ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कैकेयोपाख्याने सप्तसप्ततोऽध्यायः ॥ ७७ ॥
॥ युधिष्ठिर उवाच ॥ व्याख्याता राजधर्म्मेण वृत्तिरापत्सु भारत । कथंश्चिद्वैश्यधर्म्मेण सञ्जीवेद्ब्राह्मणो न वा ।
॥ भीष्म उवाच ॥ अशक्तः क्षत्त्रधर्म्मेण वैश्यधर्म्मेण वर्त्तयेत् । कृषिगोरक्ष्यमास्थाय व्यसने वृत्तिसङ्क्षये ।
॥ युधिष्ठिर उवाच ॥ कानि पण्यानि विक्रीय स्वर्गलोकान्न हीयते । ब्राह्मणो वैश्यधर्म्मेण वर्त्तयन् भरतर्षभ ।
॥ भीष्म उवाच ॥ सुरांल्लवणमित्येव तिलान् केशरिणः पशून् । ऋषभान् मधु मांसञ्च कृतान्नञ्च युधिष्ठिर । २९२०
सर्व्वास्ववस्थास्वेतानि ब्राह्मणः परिवर्ज्जयेत् । एतेषां विक्रयात्तात ब्राह्मणो नरकं व्रजेत् ।
अजोऽग्निर्व्वरुणो मेषः सूर्य्योऽश्वः पृथिवी विराट् । धेनुर्यज्ञश्च सोमश्च न विक्रेयाः कथञ्चन ।
पक्वेनामस्य निमयं न प्रशंसन्ति साधवः । निमयेत् पक्वमामेन भोजनार्थाय भारत ।
वयं सिद्धमशिष्यामो भवान् साधयतामिमं । एवं संवीक्ष्य निमयन्नाधर्म्मोऽस्ति कथञ्चन ।
अत्र ते वर्त्तयिष्यामि पुरा धर्म्मः सनातनः । व्यवहारप्रवृत्तानां तन्निबोध युधिष्ठिर । २९२५
भवतेऽहं ददानीदं भवानेतत् प्रयच्छतु । रुचितो वर्त्तते धर्म्मो न बलात् सम्प्रवर्त्तते ।
इत्येवं सम्प्रवर्त्तन्ते व्यवहाराः पुरातनाः । ऋषीणामितरेषाञ्च साधु चैतदसंशयं ।
॥ युधिष्ठिर उवाच ॥ अथ तात यदा सर्व्वाः शस्त्रमाददते प्रजाः । व्युत्क्रामन्ति स्वधर्म्मेभ्यः क्षत्त्रस्य क्षीयते बलं ।
राजा त्राता तु लोकस्य कथञ्च स्यात् परायणं । एतन्मे संशयं ब्रूहि विस्तरेण नराधिप ।
॥ भीष्म उवाच ॥ दानेन तपसा यज्ञैरद्रोहेण दमेन च । ब्राह्मणप्रमुखा वर्णाः क्षेममिच्छेयुरात्मनः । २९३०
तेषां ये वेदबलिनस्तेऽभ्युत्थाय समन्ततः । राज्ञो बलं वर्द्धयेयुर्म्महेन्द्रस्येव देवताः ।
राज्ञोऽपि क्षीयमाणस्य ब्रह्मैवाहुः परायणं । तस्माद्ब्रह्मबलेनैव समुत्थेयं विजानता ।
यदा भुवि जयी राजा क्षेमं राष्ट्रेऽभिसन्दधेत् । तदा वर्णा यथाधर्म्मं निविशेयुः कथञ्चन ।
उन्मर्य्यादे प्रवृत्ते तु दस्युभिः सङ्करे कृते । सर्व्वे वर्णा न दुष्येयुः शस्त्रवन्तो युधिष्ठिर ।
॥ युधिष्ठिर उवाच ॥ अथ चेत् सर्व्वतः क्षत्त्रं प्रदुष्येद्ब्राह्मणं प्रति । कस्तस्य ब्रह्मणस्त्राता को धर्म्मः किं परायणं । २९३५
॥ भीष्म उवाच ॥ तपसा ब्रह्मचर्य्येण शस्त्रेण च बलेन च । अमायया मायया च नियन्तव्यं तदा भवेत् ।
क्षत्त्रियस्यातिवृत्तस्य ब्राह्मणेषु विशेषतः । ब्रह्मैव संनियन्तृ स्यात् क्षत्त्रं हि ब्रह्मसम्भवं ।
अद्भ्योऽग्निर्ब्रह्मतः क्षत्त्रमश्मनो लोहमुत्थितं । तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति ।
यदाच्छिनत्त्ययोऽश्मानमग्निश्चापोऽभिमर्च्छति । क्षत्त्रञ्च ब्राह्मणं द्वेष्टि तदा नश्यन्ति ते त्रयः ।
तस्माद्ब्रह्मणि शाम्यन्ति क्षत्त्रियाणां युधिष्ठिर । समुदीर्णान्यजेयानि तेजांसि च बलानि च । २९४०
ब्रह्मवीर्य्ये मृदूभूते क्षत्त्रवीर्य्ये च दुर्ब्बले । दुष्टेषु सर्व्ववर्णेषु ब्राह्मणान् प्रति सर्व्वशः ।
ये तत्र युद्धं कुर्व्वन्ति त्यक्त्वा जीवितमात्मनः । ब्राह्मणान् परिरक्षन्तो धर्म्ममात्मानमेव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनस्विनो मन्युमन्तः पुण्यलोका भवन्ति ते। ब्राह्मणार्थं हि सर्व्वेषां शस्त्रग्रहणमिष्यते।
अतिस्विष्टमधीतानां लोकानतितपस्विनां। अनाशकाग्न्योर्व्विशतां शूरा यान्ति पराङ्गतिं।
ब्राह्मणस्त्रिषु वर्णेषु शस्त्रं गृह्णन्न दुष्यति। एवमेवात्मनस्त्यागान्नान्यं धर्म्मं विदुर्जनाः। २९४५
तेभ्यो नमश्च भद्रञ्च ये शरीराणि जुह्वते। ब्रह्मद्विषो नियच्छन्तस्तेषां नोऽस्तु सलोकतां।
ब्रह्मलोकजितः स्वर्ग्यान् वीरांस्तान् मनुरब्रवीत्। यथाऽश्वमेधावभृथे स्नाताः पूता भवन्त्युत।
दुष्कृतस्य प्रणाशेन तथा शस्त्रहता रणे। भवत्यधर्म्मो धर्म्मो हि धर्म्माधर्म्मावुभावपि।
कारणाद्देशकालस्य देशकालः स तादृशः। मैत्राः क्रूराणि कुर्व्वन्तो जयन्ति स्वर्गमुत्तमं।
धर्म्म्याः पापानि कुर्व्वाणा गच्छन्ति परमाङ्गतिं। ब्राह्मणस्त्रिषु कालेषु शस्त्रं गृह्णन्न दुष्यति। २९५०
आत्मत्राणे वर्णदोषे दुर्द्दम्यनियमेषु च।
॥ युधिष्ठिर उवाच ॥ अभ्युत्थिते दस्युबले क्षत्रार्थे वर्णसङ्करे। सम्प्रमूढेषु वर्णेषु यद्यन्योऽभिभवेद्बली।
ब्राह्मणो यदि वा वैश्यः शूद्रो वा राजसत्तम। दस्युभ्योऽथ प्रजा रक्षेद्दण्डं धर्म्मेण धारयन्।
कार्य्यं कुर्य्यान्न वा कुर्य्यात् स वार्य्यो वा भवेन्न वा। तस्मात्क्षत्रं गृहीतव्यमन्यत्र क्षत्रबन्धुतः।
॥ भीष्म उवाच ॥ अपारे यो भवेत् पारमप्लवे यः प्लवो भवेत्। शूद्रो वा यदि वाऽप्यन्यः सर्व्वथा मानमर्हति। २९५५
यमाश्रित्य नरा राजन् वर्त्तयेयुर्यथासुखं। अनाथाः परिकल्पन्ते दस्युभिः परिपीडिताः।
तमेव पूजयेयुस्ते प्रीत्या स्वमिव बान्धवं। अभीरभीक्ष्णं कौरव्य कर्त्ता सम्मानमर्हति।
किन्तैर्य्येऽनडुहो नोह्याः किं धेन्वा वाऽप्यदुग्धया। बन्ध्यया भार्य्यया कोऽर्थः कोऽर्थो राज्ञाऽप्यरक्षता।
यथा दारुमयो हस्ती यथा चर्म्ममयो मृगः। यथा ह्यनर्थः षण्ढो वा पार्थ क्षेत्रं यथोषरं।
एवं विप्रोऽनधीयानो राजा यश्च न रक्षिता। मेघो न वर्षते यश्च सर्व्वथा ते निरर्थकाः। २९६०
नित्यं यस्तु सतो रक्षेदसतश्च निवर्त्तयेत्। स एव राजा कर्त्तव्यस्तेन सर्व्वमिदं धृतं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अष्टसप्ततोऽध्यायः॥ ७८॥
॥ युधिष्ठिर उवाच ॥ क समुत्थाः कथंशीला ऋत्विजः स्युः पितामह। कथंविधाश्च राजेन्द्र तद्ब्रूहि वदताम्बर।
॥ भीष्म उवाच ॥ प्रतिकर्म्म पराचार ऋत्विजां स्म विधीयते। छन्दः सामादि विज्ञाय द्विजानां श्रुतमेव च।
ये त्वेकरतयो नित्यं वीराणां प्रियवादिनः। परस्परस्य सुहृदः समन्तात् समदर्शिनः।
अनृशंसाः सत्यवाक्या अकुसीदा अयर्ज्जवः। अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा दमः शमः। २९६५
धीमान् सत्यव्रती दान्तो भूतानामविहिंसकः। अकामद्वेषसंयुक्तस्त्रिभिः शुक्लैः समन्वितः।
अहिंसको ज्ञानतृप्तः स ब्रह्मासनमर्हति। एते महर्त्विजस्तात सर्व्वे मान्या यथार्हतः।
॥ युधिष्ठिर उवाच ॥ यदिदं वेदवचनं दक्षिणासु विधीयते। इदं देयमिदं देयं न क्वचिद्व्यवतिष्ठते।
नेदं प्रतिधनं शास्त्रमापद्धर्म्मानुशास्त्रतः। आज्ञा शास्त्रस्य घोरेयं न शक्तिं समवेक्षते।
श्रद्धावता च यष्टव्यमित्येषा वैदिकी श्रुतिः। मिथ्योपेतस्य यज्ञस्य किमु श्रद्धा करिष्यति। २९७०
॥ भीष्म उवाच ॥ न वेदानां परिभवात् न शाठ्येन न मायया। कश्चिन्महदवाप्नोति मा तेऽभूद्बुद्धिरीदृशी।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant2 Equipment Heritage Foundation, Jalgaon

यज्ञाङ्गं दक्षिणास्तात वेदानां परिबृंहणं। न यज्ञा दक्षिणाहीनास्तारयन्ति कथञ्चन।
शक्तिस्तु पूर्णपात्रेण सम्मिता न समा भवेत्। अवश्यं तात यष्टव्यं त्रिभिर्व्वर्णैर्यथाविधि।
सोमो राजा ब्राह्मणानामित्येषा वैदिकी स्थितिः। तञ्च विक्रेतुमिच्छन्ति न यथावृत्तिरिष्यते।
तेन क्रीतेन यज्ञेन ततो यज्ञः प्रतायते। इत्येवं धर्म्मतो ख्यातमृषिभिर्द्धर्म्मचारिभिः। २९७५
पुमान् यज्ञश्च सोमश्च न्यायवृत्तो यदा भवेत्। अन्यायवृत्तः पुरुषो न परस्य न चात्मनः।
शरीरवृत्तमास्थाय इत्येषा श्रूयते श्रुतिः। तानि सम्यक् प्रणीतानि ब्राह्मणानां महात्मनां।
तपो यज्ञादपि श्रेष्ठमित्येषा परमा श्रुतिः। तत्ते तपः प्रवक्ष्यामि विद्वंस्तदपि मे शृणु।
अहिंसा सत्यवचनमानृशंस्यन्तपो घृणा। एतत्तपो विदुर्द्धीरा न शरीरस्य शोषणं।
अप्रामाण्यञ्च देवानां शास्त्राणाञ्चाभिलङ्घनं। अव्यवस्था च सर्व्वत्र तद्वै नाशनमात्मनः। २९८०
निबोध दशहोतॄणां विधानं पार्थ यादृशं। चित्तिः स्रुक् चित्तमाज्यञ्च पवित्रं ज्ञानमुत्तमं।
सर्व्वं जिह्मं मृत्युपदमार्ज्जवं ब्रह्मणः पदं। एतावान् ज्ञानविषयः किं प्रलापः करिष्यति।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऊनाशीतोऽध्यायः ॥ ७८ ॥
॥ युधिष्ठिर उवाच ॥ यदप्यल्पतरं कर्म्म तदप्येकेन दुष्करं। पुरुषेणासहायेन किमु राज्ञा पितामह।
किंशीलः किंसमाचारो राज्ञोऽथ सचिवो भवेत्। कीदृशे विश्वसेद्राजा कीदृशे न च विश्वसेत्।
॥ भीष्म उवाच ॥ चतुर्व्विधानि मित्राणि राज्ञां राजन् भवन्त्युत। सहार्थो भजमानश्च सहजः कृत्रिमस्तथा। २९८५
धर्म्मात्मा पञ्चमश्चापि मित्रं नैकस्य न द्वयोः। यतो धर्म्मस्ततो वा स्याद्धर्म्मस्थो वा ततो भवेत्।
यस्तस्यार्थो न रोचेत न तं तस्य प्रकाशयेत्। धर्म्माधर्म्मेण राजानश्चरन्ति विजिगीषवः।
चतुर्णां मध्यमौ श्रेष्ठौ नित्यं शङ्क्यौ तथाऽपरौ। सर्व्वे नित्यं शङ्कितव्याः प्रत्यक्षं कार्य्यमात्मनः।
न हि राज्ञा प्रमादो वै कर्त्तव्यो मित्ररक्षणे। प्रमादिनं हि राजानं लोकाः परिभवन्त्युत।
असाधुः साधुतामेति साधुर्भवति दारुणः। अरिश्च मित्रं भवति मित्रञ्चापि प्रदुष्यति। २९९०
अनित्यचित्तः पुरुषस्तस्मिन् को जातु विश्वसेत्। तस्मात् प्रधानं यत् कार्य्यं प्रत्यक्षं तत् समाचरेत्।
एकान्तेन हि विश्वासः कृत्स्नो धर्म्मार्थनाशकः। अविश्वासश्च सर्व्वत्र मृत्युना च विशिष्यते।
अकालमृत्युर्व्विश्वासो विश्वसन् हि विपद्यते। यस्मिन् करोति विश्वासमिच्छतस्तस्य जीवति।
तस्माद्विश्वसितव्यञ्च शङ्कितव्यञ्च केषुचित्। एषा नीतिगतिस्तात लक्ष्या चैव सनातनी।
यं मन्येत ममाभावादिममर्थागमः स्पृशेत्। नित्यं तस्मात् शङ्कितव्यममित्रं तं विदुर्ब्बुधाः। २९९५
यस्य क्षेत्रादप्युदकं क्षेत्रमन्यस्य गच्छति। न तत्रानिच्छतस्तस्य भिद्येरन् सर्व्वसेतवः।
तथैवात्युदकाद्भीतस्तस्य भेदमनिच्छति। यमेवं लक्षणं विद्यात्तममित्रं विनिर्द्दिशेत्।
यस्य वृद्ध्या न तृप्येत क्षये दीनतरो भवेत्। एतदुत्तममित्रस्य निमित्तमिति चक्षते।
यन्मन्येत ममाभावादस्याभावो भवेदिति। तस्मिन् कुर्व्वीत विश्वासं यथा पितरि वै तथा।
तं शक्त्या वर्द्धमानश्च सर्व्वतः परिबृंहयेत्। नित्यं क्षताद्वारयति यो धर्म्मेष्वपि कर्म्मसु। ३०००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चताङ्गीतं विजानीयादुत्तमं मित्रलक्षणं । ये तस्य क्षतमिच्छन्ति ते तस्य रिपवः स्मृताः ।
व्यसनान्नित्यभीतो यः समृद्ध्या यो न दुष्यति । यत् स्यादेवं विधं मित्रं तदात्मसममुच्यते ।
रूपवर्णस्वरोपेतस्तितिक्षुरनसूयकः । कुलीनः कुलसम्पन्नः स तस्मात् प्रत्यनन्तरः ।
मेधावी स्मृतिमान् दक्षः प्रकृत्या चानृशंस्यवान् । यो मानितोऽमानितो वा न च दुष्येत् कदाचन ।
ऋत्विग्वा यदि वाचार्य्यः सखा वाऽत्यन्तसंस्तुतः । गृहे वसेदमात्यस्ते स स्यात् परमपूजितः ।
स ते विद्यात् परं मन्त्रं प्रकृतिञ्चार्थधर्म्मयोः । विश्वासस्ते भवेत्तत्र यथा पितरि वै तथा ।
नैव द्वौ न त्रयः कार्य्या न मृष्येरन् परस्परं । एकार्थे ह्येव भूतानां भेदो भवति सर्व्वदा ।
कीर्त्तिप्रधानो यस्तु स्याद्यस्य स्यात् समये स्थितः । समर्थान् यश्च न द्वेष्टि नानर्थान् कुरुते च यः ।
यो न कामाद्भयाल्लोभात् क्रोधाद्वा धर्म्ममुत्सृजेत् । दक्षः पर्य्याप्तवचनः स ते स्यात् प्रत्यनन्तरः ।
कुलीनः शीलसम्पन्नस्तितिक्षुरविकत्थनः । शूरश्चार्य्यश्च विद्वांश्च प्रतिपत्तिविशारदः ।
एते ह्यमात्याः कर्त्तव्याः सर्व्वकर्म्मस्ववस्थिताः । पूजिताः संविभक्ताश्च सुसहायाः स्वनुष्ठिताः ।
कृत्स्नमेते विनिक्षिप्ताः प्रतिरूपेषु कर्म्मसु । युक्ता महत्सु कार्य्येषु श्रेयांस्युत्थापयन्त्युत ।
एते कर्म्माणि कुर्व्वन्ति स्पर्द्धमाना मिथः सदा । अनुतिष्ठन्ति चैवार्थमाचक्षाणाः परस्परं ।
ज्ञातिभ्यश्चैव बुध्येथा मृत्योरिव भयं सदा । उपराजेव राजर्द्धिं ज्ञातिर्न सहते सदा ।
ऋजोर्मृदोर्वदान्यस्य ह्रीमतः सत्यवादिनः । नान्यो ज्ञातेर्म्महाबाहो विनाशमभिनन्दति ।
अज्ञातितोपि न सुखा नावज्ञेयास्ततः परं । अज्ञातिमन्तं पुरुषं परे चाभिभवन्त्युत ।
निकृतस्य नरैरन्यैर्ज्ञातिरेव परायणं । नान्यैर्निकारं सहते ज्ञातिर्ज्ञातेः कथञ्चन ।
आत्मानमेव जानाति निकृतं बान्धवैरपि । तेषु सन्ति गुणाश्चैव नैर्गुण्यं चैव लक्ष्यते ।
नाज्ञातिरनुगृह्णाति न चाज्ञातिर्नमस्यति । उभयं ज्ञातिवर्गेषु दृश्यते साध्वसाधु च ।
सम्मानयेत् पूजयेच्च वाचा नित्यञ्च कर्म्मणा । कुर्य्याच्च प्रियमेतेभ्यो नाप्रियं किञ्चिदाचरेत् ।
विश्वस्तवदविश्वस्तस्तेषु वर्त्तेत सर्व्वदा । न हि दोषो गुणो वेति निरूप्यस्तेषु दृश्यते ।
अस्यैवं वर्त्तमानस्य पुरुषस्याप्रमादिनः । अमित्राः संप्रसीदन्ति तथा मित्रीभवन्त्यपि ।
य एवं वर्त्तते नित्यं ज्ञातिसम्बन्धिमण्डले । मित्रेष्वमित्रे मध्यस्थे चिरं यशसि तिष्ठति ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अशीतितमोऽध्यायः ॥ ८० ॥
॥ युधिष्ठिर उवाच ॥ एवमग्राह्यके तस्मिन् ज्ञातिसम्बन्धिमण्डले । मित्रेष्वमित्रेष्वपि च कथं भावो विभाव्यते ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । संवादं वासुदेवस्य सुरर्षेर्नारदस्य च ।
॥ वासुदेव उवाच ॥ नासुहृत् परमं मन्त्रं नारदार्हति वेदितुं । अपण्डितो वापि सुहृत् पण्डितो वाऽप्यनात्मवान् ।
स ते सौहृदमास्थाय किञ्चिद्वक्ष्यामि नारद । कृत्स्नं बुद्धिबलं प्रेक्ष्य संपृच्छे त्रिदिवङ्गम ।
दास्यमैश्वर्य्यवादेन ज्ञातीनां न करोम्यहं । अर्द्धं भोक्ताऽस्मि भोगानां वाग्दुरुक्तानि च क्षमे ।
अरणीमग्निकामो वा मथ्नाति हृदयं मम । वाचा दुरुक्तं देवर्षे तन्मे दहति नित्यदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बलं सङ्कर्षणे नित्यं सौकुमार्य्यं पुनर्गदे । रूपेण मत्तः प्रद्युम्नः सोऽसहायोऽस्मि नारद । ३०३०
अन्ये हि सुमहाभागा बलवन्तो दुरुत्सहाः । नित्योत्थानेन सम्पन्ना नारदान्धकवृष्णयः ।
यस्य न स्युर्न वै स स्याद्यस्य स्युः कृत्स्नमेव तत् । द्वाभ्यां निवारितो नित्यं वृणोम्येकतरं न च ।
स्यातां यस्याहुकाक्रूरौ किन्नु दुःखतरं ततः । यस्य चापि न तौ स्यातां किन्नु दुःखतरं ततः ।
सोऽहं कितवमातेव द्वयोरपि महामते । एकस्य जयमाशंसे द्वितीयस्य पराजयं ।
ममैवं क्लिश्यमानस्य नारदोभयतः सदा । वक्तुमर्हसि यच्छ्रेयो ज्ञातीनामात्मनस्तथा । ३०३५
॥ नारद उवाच ॥ आपदो द्विविधाः कृष्ण वाह्याश्चाभ्यन्तराश्च ह । प्रादुर्भवन्ति वार्ष्णेय स्वभावाद्यदि वाऽन्यतः ।
सेयमभ्यन्तरा तुभ्यमापत् कृत्स्ना स्वकर्म्मजा । अक्रूरभोजप्रभवा सर्व्वे ह्येते तदन्वयाः ।
अर्थहेतोर्हि कामाद्वा वाचा बीभत्सयाऽपि वा । आत्मना प्राप्तमैश्वर्य्यमन्यत्र प्रतिपादितं ।
कृतमूलमिदानीन्तु ज्ञातिशब्दं सहायवन् । न शक्यं पुनरादातुं वान्तमन्नमिव त्वया ।
बभ्रूग्रसेनयोराज्यं नाप्तुं शक्यं कथञ्चन । ज्ञातिभेदभयात् कृष्ण त्वया चापि विशेषतः । ३०४०
तच्चेत् सिध्येत् प्रयत्नेन कृत्वा कर्म्म सुदुष्करं । महाक्षयं व्ययो वा स्याद्विनाशो वा पुनर्भवेत् ।
अनायसेन शस्त्रेण मृदुना हृदयच्छिदा । जिह्वामुद्धर सर्व्वेषां परिमृज्यानुमृज्य च ।
॥ वासुदेव उवाच ॥ अनायसं मुने शस्त्रं मृदु विद्यामहं कथं । येनैषामुद्धरे जिह्वां परिमृज्यानुमृज्य च ।
॥ नारद उवाच ॥ शक्त्याऽन्नदानं सततं तितिक्षार्ज्जवमार्द्दवं । यथार्हप्रतिपूजा च शस्त्रमेतदनायसं ।
ज्ञातीनां वक्तुकामानां कटुकानि लघूनि च । गिरा त्वं हृदयं वाचं शमयस्व मनांसि च । ३०४५
नामहापुरुषः कश्चिन्नानात्मा नासहायवान् । महतीं धुरमाधत्ते तामुद्यम्योरसा वह ।
सर्व्व एव गुरुं भारमनड्वान् वहते समे । दुर्गे प्रतीकः सुगवो भारं वहति दुर्व्वहं ।
भेदाद्विनाशः सङ्घानां सङ्घमुख्योऽसि केशव । यथा त्वां प्राप्य नोत्सीदेदयं सङ्घस्तथा कुरु ।
नान्यत्र बुद्धिक्षान्तिभ्यां नान्यत्रेन्द्रियनिग्रहात् । नान्यत्र धनसन्त्यागाद्गुणः प्राज्ञेऽवतिष्ठते ।
धन्यं यशस्यमायुष्यं स्वपक्षोद्भावनं सदा । ज्ञातीनामविनाशः स्याद्यथा कृष्ण तथा कुरु । ३०५०
आयत्याञ्च तदात्वे च न तेऽस्त्यविदितं प्रभो । षाड्गुण्यस्य विधानेन यात्रायानविधौ तथा ।
यादवाः कुकुरा भोजाः सर्व्वे चान्धकवृष्णयः । त्वय्यासक्ता महाबाहो लोका लोकेश्वराश्च ये ।
उपासन्ते हि त्वद्बुद्धिमृषयश्चापि माधव । त्वं गुरुः सर्व्वभूतानां जानीषे त्वं गतागतं ।
त्वामासाद्य यदुश्रेष्ठमेधन्ते यादवाः सुखं ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वासुदेवनारदसंवादे एकाशीतोऽध्यायः ॥ ८१ ॥

॥ भीष्म उवाच ॥ एषा प्रथमतो वृत्तिर्द्वितीयां शृणु भारत । यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः सदा नरः । ३०५५
ह्रियमाणममात्येन भृतो वा यदि वाऽभृतः । यो राजकोषं नश्यन्तमाचक्षीत युधिष्ठिर ।
श्रोतव्यमस्य च रहो रक्ष्यश्चामात्यतो भवेत् । अमात्या ह्युपहर्त्तारो भूयिष्ठं घ्नन्ति भारत ।
राजकोषस्य गोप्तारं राजकोषविलोपकाः । समेत्य सर्व्वे बाधन्ते स विनश्यत्यरक्षितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अत्राप्युदाहरन्तीममितिहासं पुरातनं । मुनिः कालकवृक्षीयः कौशल्यं यदुवाच ह ।
कोशलानामाधिपत्यं सम्प्राप्तं क्षेमदर्शिनं । मुनिः कालकवृक्षीय आजगामेति नः श्रुतं । ३०६०
स काकं पञ्जरे बद्धा विषयं क्षेमदर्शिनः । सर्व्वं पर्य्यचरद्युक्तः प्रवृत्त्यर्थी पुनः पुनः ।
अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः । अनागतमतीतञ्च यच्च सम्प्रति वर्त्तते ।
इति राष्ट्रे परिपतन् बहुभिः पुरुषैः सह । सर्व्वेषां राजयुक्तानां दुष्कर्म परिदृष्टवान् ।
स बुद्धा तस्य राष्ट्रस्य व्यवसायं हि सर्व्वशः । राजयुक्तापहारांश्च सर्व्वान् बुद्धा ततस्ततः ।
ततः स काकमादाय राजानं द्रष्टुमागमत् । सर्व्वज्ञोऽस्मीति वचनं ब्रुवाणः संशितव्रतः । ३०६५
स्म कौशल्यमागम्य राजाऽमात्यमलङ्कृतं । प्राह काकस्य वचनादमुत्रेदं त्वया कृतं ।
असौ चासौ च जानीते राजकोषस्त्वया हृतः । एवमाख्याति काकोऽयं तच्छीघ्रमनुगम्यतां ।
तथाऽन्यानपि स प्राह राजकोषहरांस्तदा । न चास्य वचनं किञ्चिदनृतं श्रूयते क्वचित् ।
तेन विप्रकृताः सर्व्वे राजयुक्ताः कुरूद्वह । तमस्यभिप्रसुप्तस्य निशि काकमवेधयन् ।
वायसन्तु विनिर्भिन्नं दृष्ट्वा बाणेन पञ्जरे । पूर्व्वाह्णे ब्राह्मणो वाक्यं क्षेमदर्शिनमब्रवीत् । ३०७०
राजंस्त्वामभयं याचे प्रभुं प्राणधनेश्वरं । अनुज्ञातस्त्वया ब्रूयां वचनं भवतो हितं ।
मित्रार्थमभिसन्तप्तो भक्त्या सर्व्वात्मना गतः । अयं तवार्थो ह्रियते यो ब्रूयादक्षमान्वितः ।
सम्बुबोधयिषुर्म्मित्रं सदश्वमिव सारथिः । अतिमन्युप्रसक्तो हि प्रसह्य हितकारणात् ।
तथाविधस्य सुहृदा क्षान्तव्यं स्वं विजानता । ऐश्वर्य्यमिच्छता नित्यं पुरुषेण बुभूषता ।
तं राजा प्रत्युवाचेदं यत्किञ्चिन्मां भवान् वदेत् । कस्मादहं न क्षमेयमाकाङ्क्षन्नात्मनो हितं । ३०७५
ब्राह्मण प्रतिजाने ते प्रब्रूहि यदिहेच्छसि । करिष्यामि हि ते वाक्यं यदस्मान् विप्र वक्ष्यसि ।
॥ मुनिरुवाच ॥ ज्ञात्वाऽनघानघांश्चापि भृत्यतस्ते भयानि च । भक्त्या वृत्तिं समाख्यातुं भवतोऽन्तिकमागमं ।
प्रागेवोक्तस्तु दोषोऽयमाचार्य्यैर्नृपसेविनां । अगतीका गतिर्ह्येषा पापा राजोपसेविनां ।
आशीविषैश्च तस्याहुः सङ्गतं तस्य राजभिः । बहुमित्राश्च राजानो बह्वमित्रास्तथैव च ।
तेभ्यः सर्व्वेभ्य एवाहुर्भयं राजोपजीविनां । तथैषां राजतो राजन् मुहूर्त्तादेव भीर्भवेत् । ३०८०
नैकान्तेन प्रमादो हि शक्यः कर्त्तुं महीपतौ । न तु प्रमादः कर्त्तव्यः कथञ्चिद्भूतिमिच्छता ।
प्रमादाद्धि स्खलेद्राजा स्खलिते नास्ति जीवितं । अग्निदीप्तमिवासीदेद्राजानमुपशिक्षितः ।
आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरं । यत्नेनोपचरेन्नित्यं नाहमस्मीति मानवः ।
दुर्व्याहृतात् शङ्कमानो दुःस्थिताद्दुरधिष्ठितात् । दुरासिताद्दुर्व्रजितादिङ्गितादङ्गचेष्टितात् ।
देवतेव हि सर्व्वार्थान् कुर्य्याद्राजा प्रसादितः । वैश्वानर इव क्रुद्धः समूलमपि निर्द्दहेत् । ३०८५
इति राजन्मयः प्राह वर्त्तते च तथैव तत् । अथ भूयांसमेवार्थं करिष्यामि पुनः पुनः ।
ददात्यस्मद्विधोऽमात्यो बुद्धिसाहाय्यमापदि । वायसस्त्वेष मे राजन् ननु कार्य्याभिसंहितः ।
न च मेऽत्र भवान् गर्ह्यो न च तेषां भवान् प्रियः । हिताहितांस्तु बुध्येथा मा परोक्षमतिर्भवेः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ये त्वादानपरा एव वसन्ति भवतो गृहे । अभूतिकामा भूतानां तादृशैर्म्मेऽभिसंहितं ।
ये वा भवद्विनाशेन राज्यमिच्छन्त्यनन्तरं । आन्तरैरभिसन्धाय राजन् सिध्यति चान्यथा । ३०९०
तेषामहं भयाद्राजन् गमिष्याम्यन्यमाश्रमं । तैर्हि मे सन्धितो वाणः काके निपतितः प्रभो ।
छद्मकामैरकामस्य गमितो यमसादनं । दृष्टं ह्येतन्मया राजंस्तपोदीर्घेण चक्षुषा ।
बहुनक्रझषग्राहां तिमिङ्गिलगणायुतां । काकेन वालिशेनेमां यामतार्षमहं नदीं ।
स्थाण्वश्मकण्टकवतीं सिंहव्याघ्रसमाकुलां । दुरासदां दुष्प्रसहां गुहां हैमवतीमिव ।
अग्निना तामसं दुर्गं नौभिराप्यञ्च गम्यते । राजदुर्गावतरणे नोपायं पण्डिता विदुः । ३०९५
गहनं भवतो राज्यमन्धकारं तमोऽन्वितं । नेह विश्वसितुं शक्यं भवताऽपि कुतो मया ।
अतो नायं शुभो वासस्तुल्ये सदसती इह । बधो ह्येवात्र सुकृते दुष्कृते न च संशयः ।
न्यायतो दुष्कृते घातः सुकृतेन कथञ्चन । नेह युक्तं स्थिरं स्थातुं जवेनैवाव्रजेद्बुधः ।
सीता नाम नदी राजन् प्लवो यस्यां निमज्जति । तथोपमामिमां मन्ये वागुरां सर्व्वघातिनीं ।
मधुप्रपातो हि भवान् भोजनं विषसंयुतं । असतामिव ते भावो वर्त्तते न सतामिव । ३१००
आशीविषैः परिवृतः कूपस्त्वमसि पार्थिव । दुर्गतीर्था बृहत्कूला कारीरा वेत्रसंयुता ।
नदी मधुरपानीया यथा राजंस्तथा भवान् । श्वगृध्रगोमायुयुतो राजहंससमो ह्यसि ।
यथाश्रित्य महावृक्षं कक्षः संवर्द्धते महान् । ततस्तं संवृणोत्येव तमतीत्य च वर्द्धते ।
तेनैवोग्रेन्धनेनैनं दावो दहति दारुणः । तथोपमा ह्यमात्यास्ते राजंस्तान् परिशोधय ।
त्वया चैव कृता राजन् भवता परिपालिताः । भवन्तमभिसन्धाय जिघांसन्ति भवत्प्रियं । ३१०५
उषितं शङ्कमानेन प्रमादं परिरक्षता । अन्तःसर्प इवागारे वीरपत्न्या इवालये ।
शीलं जिज्ञासमानेन राज्ञस्तु सहजीविनः । कच्चिज्जितेन्द्रियो राजा कच्चिदभ्यान्तरा जिताः ।
कच्चिदेषां प्रियो राजा कच्चिद्राज्ञः प्रियाः प्रजाः । विजिज्ञासुरिह प्राप्तस्तवाहं राजसत्तम ।
तस्य मे रोचते राजन् क्षुधितस्येव भोजनं । अमात्या मे न रोचन्ते वितृष्णस्य यथोदकं ।
भवतोऽर्थकृदित्येवं मयि दोषो हि तैः कृतः । विद्यते कारणं नान्यदिति मे नात्र संशयः । ३११०
न हि तेषामहं क्रुद्धस्तत्तेषां दोषदर्शनं । अरेर्हि दुर्हृदाद्भेयं भग्नपृष्ठादिवोरगात् ।
॥ राजोवाच ॥ भूयसा परिहारेण सत्कारेण च भूयसा । पूजितो ब्राह्मणश्रेष्ठ भूयो वस गृहे मम ।
ये त्वां ब्राह्मण नेच्छन्ति ते न वत्स्यन्ति मे गृहे । भवतैव हि तज्ज्ञेयं यत्तदेषामनन्तरं ।
यथा स्यात्सुधृतो दण्डो यथा च सुकृतं कृतं । तथा समीक्ष्य भगवन् श्रेयसे विनियुंक्ष्व मां ।
॥ मुनिरुवाच ॥ अदर्शयन्निमं दोषमेकैकं दुर्ब्बलीकुरु । ततः कारणमाज्ञाय पुरुषं पुरुषं जहि । ३११५
एकदोषा हि बहवो मृद्नीयुरपि कण्टकान् । मन्त्रभेदभयाद्राजंस्तस्मादेतद्ब्रवीमि ते ।
वयन्तु ब्राह्मणा नाम मृदुदण्डाः कृपालवः । स्वस्ति चेच्छाम भवतः परेषाञ्च यथात्मनः ।
राजन्नात्मानमाचक्षे सम्बन्धी भवतो ह्यहं । मुनिः कालकवृक्षीय इत्येवमभिसंज्ञितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पितुः सखा च भवतः सम्मतः सत्यसङ्गरः । व्यापन्ने भवतो राज्ये राजन् पितरि संस्थिते ।
सर्व्वकामान् परित्यज्य तपस्तप्तं तदा मया । स्नेहात्त्वान्तु ब्रवीम्येतन्मा भूयो विभ्रमेदिति । ३१२०
उभे दृष्ट्वा दुःखसुखे राज्यं प्राप्य यदृच्छया । राज्येनामात्यसंस्थेन कथं राजन् प्रमाद्यसि ।
ततो राजकुले मन्त्री सञ्जज्ञे भूयसा पुनः । पुरोहितकुले चैव सम्प्राप्ते ब्राह्मणर्षभे ।
एकच्छत्रां महीं कृत्वा कौशल्याय यशस्विने । मुनिः कालकवृचीय ईजे क्रतुभिरुत्तमैः ।
हितं तद्वचनं श्रुत्वा कौशल्योऽन्वजयन्महीं । तथा च कृतवान्राजा यथोक्तं तेन भारत ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कालकवृचीयोपाख्याने द्व्यशीतोऽध्यायः ॥ ८२ ॥
॥ युधिष्ठिर उवाच ॥ सभासदः सहायाश्च सुहृदश्च विशाम्पते । परिच्छदास्तथाऽमात्याः कीदृशाः स्युः पितामह । ३१२१
॥ भीष्म उवाच ॥ ह्रीनिषेवास्तथा दान्ताः सत्यार्ज्जवसमन्विताः । शक्ताः कथयितुं सम्यक् ते तव स्युः सभासदः ।
अमात्यांश्चातिशूरांश्च ब्राह्मणांश्च परिश्रुतान् । सुसन्तुष्टांश्च कौन्तेय महोत्साहांश्च कर्म्मसु ।
एतान् सहायान् लिप्सेथाः सर्व्वास्वापत्सु भारत । कुलीनः पूजितो नित्यं नहि शक्तिं निगूहति ।
प्रसन्नमप्रसन्नं वा पीडितं हृतमेव वा । आवर्त्तयति भूयिष्ठं तदेव ह्यनुपालितं ।
कुलीना देशजाः प्राज्ञ रूपवन्तो बहुश्रुताः । प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परिच्छदाः । ३१३०
दौष्कुलेयाश्च लुब्धाश्च नृशंसा निरपत्रपाः । ते त्वां तात निषेवेयुर्य्यावदार्द्रकपाणयः ।
कुलीनान् शीलसम्पन्नानिङ्गितज्ञाननिष्ठुरान् । देशकालविधानज्ञान् भर्तृकार्य्यहितैषिणः ।
नित्यमर्थेषु सर्व्वेषु राजा कुर्व्वीत मन्त्रिणः । अर्थमानार्घसत्कारैर्भोगैरुच्चावचैः प्रियान् ।
यानर्थभाजो मन्येथास्ते ते स्युः सुखभागिनः । अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्चरितव्रताः ।
न त्वां नित्यार्थिनो जह्युरक्षुद्राः सत्यवादिनः । अनार्य्या ये न जानन्ति समयं मन्दचेतसः । ३१३५
तेभ्यः परिजुगुप्सेथा ये चापि समयच्युताः । नैकमिच्छेद्गणं हित्वा स्याच्चेदन्यतरग्रहः ।
यस्त्वेको बहुभिः श्रेयान् कामं तेन गणं त्यजेत् । श्रेयसो लक्षणञ्चैतद्विक्रमो यस्य दृश्यते ।
कीर्त्तिप्रधानो यश्च स्यात् समये यश्च तिष्ठति । समर्थान् पूजयेद्यश्च नास्पर्द्धैः स्पर्द्धते च यः ।
न च कामाद्भयात् क्रोधाल्लोभाद्वा धर्म्ममुत्सृजेत् । अमानी सत्यवाक् क्षान्तो जितात्मा मानसंयुतः ।
स ते मन्त्रसहायः स्यात् सर्व्वावस्थापरीक्षितः । कुलीनः कुलसम्पन्नस्तितिक्षुर्दक्ष आत्मवान् । ३१४०
शूरः कृतज्ञः सत्यश्च श्रेयसः पार्थ लक्षणं । तस्यैवं वर्त्तमानस्य पुरुषस्य विजानतः ।
अमित्राः सम्प्रसीदन्ति तथा मित्रीभवन्त्यपि । अत ऊर्द्ध्वममात्यानां परीक्षेत गुणागुणं ।
संयतात्मा कृतप्रज्ञो भूतिकामश्च भूमिपः । सम्बद्धाः पुरुषैराप्तैरभिजातैः स्वदेशजैः ।
अहार्य्यैरव्यभीचारैः सर्व्वशः सुपरीक्षितैः । यौनाः श्रौतास्तथा मौलास्तथैवाऽप्यनहङ्कृताः ।
कर्त्तव्या भूतिकामेन पुरुषेण बुभूषता । येषां वैनयिकी बुद्धिः प्रकृतिश्चैव शोभना । ३१४५
तेजो धैर्य्यं क्षमा शौचमनुरागः स्थितिर्धृतिः । परीक्ष्य च गुणान्नित्यं प्रौढभावान् धुरन्धरान् ।
पञ्चोपधा व्यतीतांश्च कुर्य्याद्राजाऽर्थकारिणः । पर्य्याप्तवचनान् वीरान् प्रतिपत्तिविशारदान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant2 Equipment Heritage Foundation, Jalgaon

कुलीनान् सत्त्वसम्पन्नानिङ्गितज्ञाननिष्ठुरान् । देशकालविधानज्ञान् भर्तृकार्य्यहितैषिणः ।
नित्यमर्थेषु सर्व्वेषु राजन् कुर्व्वीत मन्त्रिणः । हीनतेजोऽभिसृष्टो वै नैव जातु व्यवस्यति ।
अवश्यं जनयत्येव सर्व्वकर्म्मसु संशयं । एवमल्पश्रुतो मन्त्री कल्याणाभिजनोऽप्युत ।
धर्म्मार्थकामसंयुक्तो नालं मन्त्रं परीक्षितुं । तथैवानभिजातोऽपि काममस्तु बहुश्रुतः ।
अनायक इवाचक्षुर्म्मुह्यत्यणुषु कर्म्मसु । यो वाऽप्यस्थिरसङ्कल्पो बुद्धिमानागतागमः ।
उपायज्ञोऽपि नालं स कर्म्म प्रापयितुञ्चिरं । केवलात् पुनरादानात् कर्म्मणो नोपपद्यते ।
परामर्शोऽविशेषाणामश्रुतस्येह दुर्म्मतेः । मन्त्रिण्यननुरक्ते तु विश्वासो नोपपद्यते ।
तस्मादननुरक्ताय नैव मन्त्रं प्रकाशयेत् । व्यथयेद्धि स राजानं मन्त्रिभिः सहितोऽनृजुः ।
मारुतोऽपि हि तच्छिद्रैः प्रविश्याग्निरिव द्रुमं । संक्रुद्धश्चैकदा स्वामी स्थानाच्चैवापकर्षति ।
वाचा क्षिपति संरब्धः पुनः पश्चात् प्रसीदति । तानि तान्यनुरक्तेन शक्यानि हि तितिक्षितुं ।
मन्त्रिणाञ्च भवेत् क्रोधो विस्फूर्ज्जितमिवाशनेः । यस्तु संहरते तानि भर्त्तुः प्रियचिकीर्षया ।
समानसुखदुःखन्तं पृच्छेदर्थेषु मानवं । अनृजुस्त्वनुरक्तोऽपि सम्पन्नश्चेतरैर्गुणैः ।
राज्ञः प्रज्ञानयुक्तोऽपि न मन्त्रं श्रोतुमर्हति । योऽमित्रैः सह सम्बद्धो न पौरान् बहु मन्यते ।
असुहृत्तादृशो ज्ञेयो न मन्त्रं श्रोतुमर्हति । अविद्वानशुचिः स्तब्धः शत्रुसेवी विकत्थनः ।
असुहृत् क्रोधनो लुब्धो न मन्त्रं श्रोतुमर्हति । आगन्तुश्चानुरक्तोऽपि काममस्तु बहुश्रुतः ।
सत्कृतः संविभक्तो वा न मन्त्रं श्रोतुमर्हति । विधर्म्मतो विप्रकृतं पिता यस्याभवत् पुरा ।
सत्कृतः स्थापितः सोऽपि न मन्त्रं श्रोतुमर्हति । यः स्वल्पेनापि कार्य्येण सुहृदा चारितो भवेत् ।
पुनरन्यैर्गुणैर्युक्तो न मन्त्रं श्रोतुमर्हति । कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः ।
सर्व्वकर्म्मसु यः शुद्धः स मन्त्रं श्रोतुमर्हति । ज्ञानविज्ञानसम्पन्नः प्रकृतिज्ञः परात्मनोः ।
सुहृदात्मसमो राज्ञः स मन्त्रं श्रोतुमर्हति । सत्यवाक् शीलसम्पन्नो गम्भीरः सत्रपो मृदुः ।
पितृपैतामहो यः स्यात् स मन्त्रं श्रोतुमर्हति । सन्तुष्टः सम्मतः सत्यः शौण्डीरो द्वेष्यपापकः ।
मन्त्रवित् कालवित् शूरः स मन्त्रं श्रोतुमर्हति । सर्व्वलोकमिमं शक्तः सान्त्वेन कुरुते वशे ।
तस्मै मन्त्रः प्रयोक्तव्यो दण्डमाधित्सता नृप । पौरजानपदा यस्मिन् विश्वासं धर्म्मतो गताः ।
योद्धा नयविपश्चिच्च स मन्त्रं श्रोतुमर्हति । तस्मात् सर्व्वगुणैरेतैरुपपन्नाः सुसत्कृताः ।
मन्त्रिणः प्रकृतिज्ञाः स्युस्त्र्यवरा महदीप्सवः । स्वासु प्रकृतिषु च्छिद्रं लक्षयेरन् परस्य च ।
मन्त्रिणां मन्त्रमूलं हि राज्ञो राष्ट्रं विवर्द्धते । नास्य च्छिद्रं परः पश्येच्छिद्रेषु परमन्वियात् ।
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः । मन्त्रगूढा हि राज्यस्य मन्त्रिणो ये मनीषिणः ।
मन्त्रसंहननो राजा मन्त्राङ्गानीतरे जनाः । राज्यं प्रणिधिमूलं हि मन्त्रसारं प्रचक्षते ।
स्वामिनस्त्वनुवर्त्तन्ते वृत्त्यर्थमिह मन्त्रिणः । संविनीय मदक्रोधौ मानमीर्षाञ्च निर्वृताः ।
नित्यं पञ्चोपधातीतैर्म्मन्त्रयेत् सह मन्त्रिभिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेषां त्रयाणां विविधं विमर्षं विबुध्य चित्तं विनिवेश्य तत्र। सुनिश्चयं तत्परिनिश्चयञ्च निवेदयेदुत्तरमन्त्रकाले।
धर्म्मार्थकामज्ञमुपेत्य पृष्टे युक्तो गुरुं ब्राह्मणमुत्तरार्थं। निष्ठा कृता तेन यदा सह स्यात्तन्मन्त्रमार्गं प्रणयेदशक्तः।
एवं सदा मन्त्रयितव्यमाहुर्य्ये मन्त्रतत्त्वार्थविनिश्चयज्ञाः। तस्मात्तमेव प्रणयेत् सदैव मन्त्रं प्रजासंग्रहणे समर्थं। ३१८०
न वामनाः कुब्जकृशा न खञ्जा नान्धो जडः स्त्री च नपुंसकञ्च। न चात्र तिर्य्यक् च पुरो न पश्चान्नोर्द्ध्वं न चाधः प्रचरेत् कथञ्चित्।
आरुह्य वाऽवन्तु तथैव शून्यं स्थलं प्रकाशं कुशकाशहीनं। वागङ्गदोषान् परिहृत्य सर्व्वान् संमन्त्रयेत् कार्य्यमहीनकालं।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि मन्त्रणोपदेशे त्र्यशीतोऽध्यायः ॥ ८३ ॥

॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। वृहस्पतेश्च संवादं शक्रस्य च युधिष्ठिर।
॥ शक्र उवाच ॥ किंस्विदेकपदं ब्रह्मन् पुरुषः सम्यगाचरन्। प्रमाणं सर्व्वभूतानां यशश्चैवाप्नुयान्महत्।
॥ वृहस्पतिरुवाच ॥ सान्त्वमेकपदं शक्र पुरुषः सम्यगाचरन्। प्रमाणं सर्व्वभूतानां यशश्चैवाप्नुयान्महत्। ३१८५
एतदेकपदं शक्र सर्व्वलोकसुखावहं। आचरन् सर्व्वभूतेषु प्रियो भवति सर्व्वदा।
यो हि नाभाषते किञ्चित् सर्व्वदा भ्रुकुटीमुखः। द्वेष्यो भवति भूतानां स सान्त्वमिह नाचरन्।
यस्तु सर्व्वमभिप्रेक्ष्य पूर्व्वमेवाभिभाषते। स्मितपूर्व्वाभिभाषी च तस्य लोकः प्रसीदति।
दानमेव हि सर्व्वत्र सान्त्वेनानभिजल्पितं। न प्रीणयति भूतानि निर्व्यञ्जनमिवाशनं।
आदानादपि भूतानां मधुरामीरयन् गिरं। सर्व्वलोकमिमं शक्र सान्त्वेन कुरुते वशे। ३१९०
तस्मात् सान्त्वं प्रयोक्तव्यं दण्डमाधित्सताऽपि हि। फलञ्च जनयत्येवं न चास्योद्विजते जनः।
सुकृतेन हि सान्त्वस्य श्लक्ष्णस्य मधुरस्य च। सम्यगासेव्यमानस्य तुल्यं जातु न विद्यते।
॥ भीष्म उवाच ॥ इत्युक्तः कृतवान् सर्व्वं यथा शक्रः पुरोधसा। तथा त्वमपि कौन्तेय सम्यगेतत् समाचर।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि चतुरशीतोऽध्यायः ॥ ८४ ॥

॥ युधिष्ठिर उवाच ॥ कथं स्विदिह राजेन्द्र पालयन् पार्थिवः प्रजाः। प्रीतिं धर्म्मविशेषेण कीर्त्तिमाप्नोति शाश्वतीं।
॥ भीष्म उवाच ॥ व्यवहारेण शुद्धेन प्रजापालनतत्परः। प्राप्य धर्म्मञ्च कीर्त्तिञ्च लोकावाप्नोत्युभौ शुचिः। ३१९५
॥ युधिष्ठिर उवाच ॥ कीदृशैर्व्यवहारैस्तु कैश्च व्यवहरेन्नृपः। एतत् पृष्टो महाप्राज्ञ यथावद्वक्तुमर्हति।
ये चैव पूर्व्वकथिता गुणास्ते पुरुषं प्रति। नैकस्मिन् पुरुषे ह्येते विद्यन्त इव मे मतिः।
॥ भीष्म उवाच ॥ एवमेतन्महाप्राज्ञ यथा वदसि बुद्धिमान्। दुर्ल्लभः पुरुषः कश्चिदेभिर्युक्तो गुणैः शुभैः।
किन्तु सङ्क्षेपतः शीलं प्रयत्नेनेह दुर्लभं। वक्ष्यामि तु यथाऽमात्यान् यादृशांश्च करिष्यसि।
चतुरो ब्राह्मणान् वैद्यान् प्रगल्भान् स्नातकान् शुचीन्। क्षत्रियांश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः। ३२००
वैश्यान् वित्तेन सम्पन्नानेकविंशतिसङ्ख्यया। त्रींश्च शूद्रान् विनीतांश्च शुचीन् कर्म्मणि पूर्व्वके।
अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं तथा। पञ्चाशद्वर्षवयसं प्रगल्भमनसूयकं।
श्रुतिस्मृतिसमायुक्तं विनीतं समदर्शिनं। कार्य्ये विवदमानानां शक्तमर्थेष्वलोलुपं।
वर्ज्जितञ्चैव व्यसनैः सुघोरैः सप्तभिर्भृशं। अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत्।
ततः सम्प्रेषयेद्राष्ट्रे राष्ट्रीयाय च दर्शयेत्। अनेन व्यवहारेण द्रष्टव्यास्ते प्रजाः सदा। ३२०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

न चापि गूढं कार्य्यन्ते ग्राह्यं कार्य्योपघातकं । कार्य्ये खलु विपन्ने त्वां सोऽधर्म्मस्तांश्च पीडयेत् ।
विद्रवेच्चैव राष्ट्रन्ते श्येनात् पक्षिगणा इव । परिस्रवेच्च सततं नौर्व्विशीर्णेव सागरे ।
प्रजाः पालयतो सम्यगधर्म्मेणेह भूपतेः । हार्द्दं भयं सम्भवति स्वर्गश्चास्य विरुध्यते ।
अथ योऽधर्म्मतः पाति राजामात्योऽथ वात्मजः । धर्म्मासने सन्नियुक्तो धर्म्ममूले नरर्षभ ।
कार्य्येष्वधिकृताः सम्यगकुर्व्वन्तो नृपानुगाः । आत्मानं पुरतः कृत्वा यान्त्यधः सहपार्थिवाः । ३२१०
बलात्कृतानां बलिभिः कृपणं बहु जल्पतां । नाथो वै भूमिपो नित्यमनाथानां नृपो भवेत् ।
ततः साक्षिबलं साधु द्वैधवादकृतं भवेत् । असाक्षिकमनाथं वा परीक्ष्यं तद्विशेषतः ।
अपराधानुरूपञ्च दण्डं पापेषु धारयेत् । वियोजनैर्धनैर्ब्बद्धानधनानथ बन्धनैः ।
विनयेच्चापि दुर्व्वृत्तान् प्रहारैरपि पार्थिवः । सान्त्वेनोपप्रदानेन शिष्टांश्च परिपालयेत् ।
राज्ञो वधं चिकीर्षेद्यस्तस्य चित्रो वधो भवेत् । आदीपकस्य स्तेनस्य वर्णसङ्करिकस्य च । ३२१५
सम्यक् प्रणयतो दण्डं भूमिपस्य विशाम्पते । युक्तस्य वा नास्त्यधर्म्मो धर्म्म एव हि शाश्वतः ।
कामकारेण दण्डन्तु यः कुर्य्यादविचक्षणः । स इहाकीर्त्तिसंयुक्तो मृतो नरकमृच्छति ।
न परस्य प्रवादेन परेषां दण्डमर्पयेत् । आगमानुगमं कृत्वा बध्नीयान्मोक्षयीत वा ।
न तु हन्यान्नृपो जातु दूतं कस्याञ्चिदापदि । दूतस्य हन्ता निरयमाविशेत् सचिवैः सह ।
यथोक्तवादिनं दूतं क्षत्त्रधर्म्मरतो नृपः । यो हन्यात् पितरस्तस्य भ्रूणहत्यामवाप्नुयुः । ३२२०
कुलीनः कुलसम्पन्नो वाग्मी दक्षः प्रियंवदः । यथोक्तवादी स्मृतिमान् दूतः स्यात् सप्तभिर्गुणैः ।
एतैरेव गुणैर्युक्तः प्रतीहारोऽस्य रक्षिता । शिरोरक्षश्च भवति गुणैरेतैः समन्वितः ।
धर्म्मशास्त्रार्थतत्त्वज्ञः सन्धिविग्रहिको भवेत् । मतिमान् धृतिमान् ह्रीमान् रहस्यविनिगूहिता ।
कुलीनः सत्त्वसम्पन्नः शुक्लोऽमात्यः प्रशस्यते । एतैरेव गुणैर्युक्तस्तथा सेनापतिर्भवेत् ।
व्यूहयन्त्रायुधानाञ्च तत्त्वज्ञो विक्रमान्वितः । वर्षशीतोष्णवातानां सहिष्णुः पररन्ध्रवित् । ३२२५
विश्वासयेत् परांश्चैव विश्वसेच्च न कस्यचित् । पुत्त्रेष्वपि हि राजेन्द्र विश्वासो न प्रशस्यते ।
एतच्छास्त्रार्थतत्त्वन्तु मयाख्यातं तवानघ । अविश्वासो नरेन्द्राणां गुह्यं परममुच्यते ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि पञ्चाशीतोऽध्यायः ॥ ८५ ॥
॥ युधिष्ठिर उवाच ॥ कथंविधं पुरं राजा स्वयमावस्तुमर्हति । कृतं वा कारयित्वा वा तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ वस्तव्यं यत्र कौन्तेय सपुत्त्रज्ञातिबन्धुना । न्याय्यं तत्र परिप्रष्टुं वृत्तिं गुप्तिञ्च भारत ।
तस्मात्ते वर्त्तयिष्यामि दुर्गकर्म्म विशेषतः । श्रुत्वा तथा विधातव्यमनुष्ठेयञ्च यत्नतः । ३२३०
षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत् । सर्व्वसम्पत्प्रधानं यद्बाहुल्यञ्चापि सम्भवेत् ।
धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च । मनुष्यदुर्गं मृद्दुर्गं वनदुर्गञ्च तानि षट् ।
यत् पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितं । दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलं ।
विद्वांसः शिल्पिनो यत्र निचयाश्च सुचिन्तिताः । धार्म्मिकश्च जनो यत्र दाक्ष्यमुत्तममास्थितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऊर्ज्जस्विनरनागाश्वं चत्वरापणशोभितं । प्रसिद्धव्यवहारञ्च प्रशान्तमकुतोभयं । ३२३५
सुप्रभं शान्तनादञ्च सुप्रशस्तनिवेशनं । शूराढ्यजनसम्पन्नं ब्रह्मघोषानुनादित ।
समाजोत्सवसम्पन्नं सदा पूजितदैवतं । वश्यामात्यबलो राजा तत्पुरं स्वयमाविशेत् ।
तत्र कोषं बलं मित्रं व्यवहारञ्च वर्द्धयेत् । पुरे जनपदे चैव सर्व्वदोषान्निवर्त्तयेत् ।
भाण्डागारायुधागारं प्रयत्नेनाभिवर्द्धयेत् । निचयान् वर्द्धयेत् सर्व्वांस्तथा मन्त्रायुधालयान् ।
काष्ठलोहतुषाङ्गारदारुशृङ्गास्थिवैणवान् । मज्जास्नेहवसाक्षौद्रमौषधग्राममेव च । ३२४०
शणं सर्ज्जरसन्धान्यमायुधानि शरांस्तथा । चर्म्म स्नायुं तथा वेत्रं मुञ्जवल्वजबन्धनान् ।
आशयाश्चोदपानाश्च प्रभूतसलिलाकराः । निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः ।
सत्कृताश्च प्रयत्नेन आचार्य्यर्त्विक्पुरोहिताः । महेष्वासाः स्थपतयः सांवत्सरचिकित्सकाः ।
प्रज्ञामेधाविनो दान्ता दक्षाः शूरा बहुश्रुताः । कुलीनाः सत्त्वसम्पन्ना युक्ताः सर्व्वेषु कर्म्मसु ।
पूजयेद्धार्म्मिकान् राजा निगृह्णीयादधार्म्मिकान् । नियुञ्ज्याच्च प्रयत्नेन सर्व्ववर्णान् स्वकर्म्मसु । ३२४५
वाह्यमभ्यन्तरञ्चैव पौरजानपदं तथा । चारैः सुविदितं कृत्वा ततः कर्म्म प्रयोजयेत् ।
चरान् मन्त्रञ्च कोषञ्च दण्डञ्चैव विशेषतः । अनुतिष्ठेत् स्वयं राजा सर्व्वं ह्यत्र प्रतिष्ठितं ।
उदासीनारिमित्राणां सर्व्वमेव चिकीर्षितं । पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा ।
ततस्तेषां विधातव्यं सर्व्वमेवाप्रमादतः । भक्तान पूजयता नित्यं द्विषतश्च निगृह्णता ।
यष्टव्यं क्रतुभिर्नित्यं दातव्यञ्चाप्यपीडया । प्रजानां रक्षणं कार्य्यं न कार्य्यं धर्म्मबाधकं । ३२५०
कृपणानाथवृद्धानां विधवानाञ्च योषितां । योगक्षेमञ्च वृत्तिञ्च नित्यमेव प्रकल्पयेत् ।
आश्रमेषु यथाकालं चैलभाजनभोजनं । सदैवोपहरेद्राजा सत्कृत्याभ्यर्च्च्य मान्य च ।
आत्मानं सर्व्वकार्य्याणि तापसे राष्ट्रमेव च । निवेदयेत् प्रयत्नेन तिष्ठेत् प्रह्वश्च सर्व्वदा ।
सर्व्वार्थत्यागिनं राजा कुले जातं बहुश्रुतं । पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः ।
तस्मिन् कुर्व्वीत विश्वासं राजा कस्याञ्चिदापदि । तापसेषु हि विश्वासमपि कुर्व्वन्ति दस्यवः । ३२५५
तस्मिन्निधीनादधीत प्रज्ञां पर्य्याददीत च । न चाप्यभीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत् ।
अन्यः कार्य्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः । अटवीषु परः कार्य्यः सामन्तनगरेष्वपि ।
तेषु सत्कारमानाभ्यां संविभागांश्च कारयेत् । परराष्ट्राटवीस्थेषु यथा स्वविषये तथा ।
ते कस्याञ्चिदवस्थायां शरणं शरणार्थिने । राज्ञे दद्युर्य्यथाकामं तापसाः संशितव्रताः ।
एष ते लक्षणोद्देशः सङ्क्षेपेण प्रकीर्त्तितः । यादृशे नगरे राजा स्वयमावस्तुमर्हति । ३२६०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि दुर्गपरीक्षायां षडशीतोऽध्यायः ॥ ८६ ॥
॥ युधिष्ठिर उवाच ॥ राष्ट्रगुप्तिञ्च मे राजन् राष्ट्रस्यैव तु संग्रहं । सम्यग्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ।
॥ भीष्म उवाच ॥ राष्ट्रगुप्तिञ्च ते सम्यग्राष्ट्रस्यैव तु संग्रहं । हन्त सर्व्वं प्रवक्ष्यामि तत्त्वमेकमनाः शृणु ।
ग्रामस्याधिपतिः कार्य्यो दशग्राम्यास्तथाऽपरः । द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ग्रामेयान् ग्रामदोषांश्च ग्रामिकः प्रतिभावयेत्। तान् ब्रूयाद्दशपायासौ स तु विंशतिपाय वै।
सोऽपि विंशत्यधिपतिर्वृत्तं जानपदे जने। ग्रामाणां शतपालाय सर्व्वमेव निवेदयेत्।
यानि ग्राम्याणि भोज्यानि ग्रामिकस्तान्युपाश्नियात्। दशपस्तेन भर्त्तव्यस्तेनापि द्विगुणाधिपः।
ग्रामं ग्रामशताध्यक्षो भोक्तुमर्हति सत्कृतः। महान्तं भरतश्रेष्ठ सुस्फीतं जनसङ्कुलं।
तत्र ह्यनेकपायत्तं राज्ञो भवति भारत। शाखानगरमर्हस्तु सहस्रपतिरुत्तमः।
धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसङ्गतः। तेषां सङ्ग्रामकृत्यं स्याद्ग्रामकृत्यञ्च तेषु यत्।
धर्म्मज्ञः सचिवः कश्चित्तत् प्रपश्येदतन्द्रितः। नगरे नगरे वा स्यादेकः सर्व्वार्थचिन्तकः।
उच्चैः स्थाने घोररूपो नक्षत्राणामिव ग्रहः। भवेत् स तान् परिक्रामेत् सर्व्वानेव सभासदः।
तेषां वृत्तिं परिणयेत् कश्चिद्राष्ट्रेषु तच्चरः। जिघांसवः पापकामाः परस्वादायिनः शठाः।
रक्षाभ्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः। विक्रयं क्रयमध्वानं भक्तञ्च सपरिच्छदं।
योगक्षेमञ्च सम्प्रेक्ष्य वणिजां कारयेत् करान्। उत्पत्तिं दानवृत्तिञ्च शिल्पं सम्प्रेक्ष्य चासकृत्।
शिल्पं प्रति करानेवं शिल्पिनः प्रतिकारयेत्। उच्चावचकरा दाप्याः महाराज्ञा युधिष्ठिर।
यथा यथा न सीदेरंस्तथा कुर्य्यान्महीपतिः। फलं कर्म्म च सम्प्रेक्ष्य ततः सर्व्वं प्रकल्पयेत्।
फलं कर्म्म च निर्हेतु न कश्चित् सम्प्रवर्त्तते। यथा राजा च कर्त्ता च स्यातां कर्म्मणि भागिनौ।
समवेक्ष्य तथा राज्ञा प्रणेयाः सततं कराः। नोच्छिन्द्यादात्मनो मूलं परेषाञ्चापि तृष्णया।
ईहाद्वाराणि संरुध्य राजा सम्प्रीतिदर्शनः। प्रद्विषन्ति परिख्यातं राजानमतिखादिनं।
प्रद्विष्टस्य कुतः श्रेयो नाप्रियो लभते फलं। वत्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना।
भृतो वत्सो जातबलः पीडां सहति भारत। न कर्म्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर।
राष्ट्रमप्यतिदुग्धं हि न कर्म्म कुरुते महत्। यो राष्ट्रमनुगृह्णाति परिरक्षन स्वयं नृपः।
सञ्जातमुपजीवन् स लभते च महत् फलं। आपदर्थञ्च निर्यातं राजा न द्रह विन्दते।
राष्ट्रञ्च कोषभूतं स्यात् कोषो वेश्मगतस्तथा। पौरजानपदान् सर्व्वान् संश्रितोपाश्रितांस्तथा।
यथाशक्त्यनुकम्पेत सर्व्वान् स्वल्पधनानपि। वाह्यं जनं भेदयित्वा भोक्तव्यो मध्यमः सुखं।
एवं नास्य प्रकुप्यन्ति जनाः सुखितदुःखिताः। प्रागेव तु धनादानमनुभाष्य ततः पुनः।
सन्निपत्य स्वविषये भयं राष्ट्रेषु दर्शयेत्। इयमापत् समुत्पन्ना परचक्रभयं महत्।
अपि चान्ताय कल्पन्ते वेणोरिव फलागमः। अरयो मे समुत्थाय बहुभिर्दस्युभिः सह।
इदमात्मवधायैव राष्ट्रमिच्छन्ति बाधितुं। अस्यामापदि घोरायां सम्प्राप्ते दारुणे भये।
परित्राणाय भवतः प्रार्थयिष्ये धनानि वः। प्रतिदास्ये च भवतां सर्व्वञ्चाहं भयक्षये।
नारयः प्रतिदास्यन्ति यद्धरेयुर्ब्बलादितः। कलत्रमादितः कृत्वा सर्व्वं वो विनशेदिति।
अपि चेत् पुत्त्रदारार्थमर्थसञ्चय इष्यते। नन्दामि वः प्रभावेण पुत्त्राणामिव चोदये।
यथाशक्त्युपगृह्णामि राष्ट्रस्यापीडया च वः। आपत्स्वेव हि वोढव्यं भवद्भिः पुङ्गवैरिव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न प्रियं सततं कार्य्यं धनं कस्याञ्चिदापदि । इति वाचा मधुरया स्लक्ष्णया सोपचारया ।
खरश्मीनभ्यवहरेज्जेद्योगमाधाय कालवित् । प्राकारं भृत्यभरणं व्ययं सङ्ग्रामतो भयं । ३२९५
योगक्षेमञ्च सम्प्रेक्ष्य गोमिनः कारयेत् करं । उपेक्षिता हि नश्येयुर्गोमिनोऽरण्यवासिनः ।
तस्मात्तेषु विशेषेण मृदुपूर्व्वं समाचरेत् । सान्त्वनं रक्षणं दानमवस्था चाप्यभीक्ष्णशः ।
गोमिनां पार्थ कर्त्तव्यः संविभागः प्रियाणि च । अजस्रमुपयोक्तव्यं फलं गोमिषु भारत ।
प्रभावयन्ति राष्ट्रञ्च व्यवहारं कृषिन्तथा । तस्माद्गोमिषु यत्नेन प्रीतिं कुर्य्याद्विचक्षणः ।
दयावानप्रमत्तश्च करान् सम्प्रणयेन्मृदून् । सर्व्वत्र क्षेमचरणं सुलभं नाम गोमिषु । ३३००
न ह्यतः सदृशं किञ्चिद्वरमस्ति युधिष्ठिर ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्ताशीतोऽध्यायः ॥ ८७ ॥

॥ युधिष्ठिर उवाच ॥ यदा राजा समर्थोऽपि कोषार्थी स्यान्महामते । कथं प्रवर्त्तेत तदा तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ यथादेशं यथाकालं यथाबुद्धि यथाबलं । अनुशिष्यात् प्रजा राजा धर्म्मार्थी तद्धिते रतः ।
यथा तासाञ्च मन्येत श्रेय आत्मन एव च । तथा कर्म्माणि सर्व्वाणि राजा राष्ट्रेषु वर्त्तयेत् ।
मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपं । वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत् । ३३०५
जलौकावत् पिबेद्राष्ट्रं मृदुनैव नराधिपः । व्याघ्रीव च हरेत् पुत्त्रान् सन्दशेन्न च पीडयेत् ।
यथा शल्यकवानाखुः पदं धूनयते सदा । अतीक्ष्णेनाभ्युपायेन तथा राष्ट्रं समापिवेत् ।
अल्पेनाल्पेन देयेन वर्द्धमानं प्रदापयेत् । ततो भूयस्ततो भूयः क्रमवृद्धिं समाचरेत् ।
दमयन्निव दम्यानि शश्वद्भारं विवर्द्धयेत् । मृदुपूर्व्वं प्रयत्नेन पाशानभ्यवहारयेत् ।
सकृत्पाशावकीर्णास्ते न भविष्यन्ति दुर्द्दमाः । उचितेनैव भोक्तव्या न भविष्यन्ति यत्नतः । ३३१०
तस्मात् सर्व्वसमारम्भो दुर्लभः पुरुषं प्रति । यथामुख्यान् सान्त्वयित्वा भोक्तव्य इतरो जनः ।
ततस्तान् भेदयित्वा तु परस्परविवक्षितान् । भुञ्जीत सान्त्वयंश्चैव यथासुखमयत्नतः ।
न चास्थाने न चाकाले करांस्तेभ्यो निपातयेत् । आनुपूर्व्व्येण सान्त्वेन यथाकालं यथाविधि ।
उपायान् प्रब्रवीम्येतन्न मे माया विवक्षिता । अनुपायेन दमयन् प्रकोपयति वाजिनः ।
पानागारनिवेशाश्च वेश्याः प्रापणिकास्तथा । कुशीलवाः सकितवा ये चान्ये केचिदीदृशाः । ३३१५
नियम्याः सर्व्व एवैते ये राष्ट्रस्योपघातकाः । एते राष्ट्रेऽभितिष्ठन्तो बाधन्ते भद्रिकाः प्रजाः ।
न केनचिद्याचितव्यः कश्चित् कस्याञ्चिदापदि । इति व्यवस्था भूतानां पुरस्तान्मनुना कृता ।
सर्व्वे तथाऽनुजीवेयुर्न कुर्य्युः कर्म्म चेदिह । सर्व्व एव इमे लोका न भवेयुरसंशयं ।
प्रभुर्नियामने राजा य एतान्न नियच्छति । भुङ्क्ते स तस्य पापस्य चतुर्भागमिति श्रुतिः ।
भोक्ता तस्य तु पापस्य सुकृतस्य यथा तथा । नियन्तव्याः सदा राज्ञा पापा ये स्युर्नराधिप । ३३२०
कृतपापस्त्वसौ राजा य एतान्न नियच्छति । यथा कृतस्य धर्म्मस्य चतुर्भागमुपाश्नुते ।
स्थानान्येतानि संयम्य प्रसङ्गो भूतिनाशनः । कामप्रसक्तः पुरुषः किमकार्य्यं विवर्ज्जयेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मद्यमांसपरस्वानि तथा दारा धनानि च। आहरेद्रागवशगस्तथा शास्त्रं प्रवर्त्तयेत्।
आपद्येव तु याचेरन् येषां नास्ति परिग्रहः। दातव्यं धर्म्मतस्तेभ्यस्त्वनुक्रोशाद्भयान्न तु।
मा ते राष्ट्रे याचनका भूवन्मा चापि दस्यवः। एषां दातार एवैते नैते भूतस्य भावकाः। २२२५
ये भूतान्यनुगृह्णन्ति वर्द्धयन्ति च ये प्रजाः। ते ते राष्ट्रेषु वर्त्तन्तां मा भूतानामभावकाः।
दण्ड्यास्ते च महाराज धनादानप्रयोजकाः। प्रयोगं कारयेयुस्तान् यथा बलिकरांस्तथा
कृषिगोरक्ष्यवाणिज्यं यच्चान्यत् किञ्चिदीदृशं। पुरुषैः कारयेत् कर्म्म बहुभिः कर्म्मभेदतः।
नरश्चेत् कृषिगोरक्ष्यवाणिज्यञ्चाप्यनुष्ठितः। संशयं लभते किञ्चित्तेन राजा विगर्ह्यते।
धनिनः पूजयेन्नित्यं पानाच्छादनभोजनैः। वक्तव्याश्चानुगृह्णीध्वं प्रजाः सह मयेति वै। २२३०
अङ्गमेतन्महद्राज्ये धनिनो नाम भारत। ककुदं सर्व्वभूतानां धनस्थो नात्र संशयः।
प्राज्ञः शूरो धनस्थश्च स्वामी धार्म्मिक एव च। तपस्वी सत्यवादी च बुद्धिमांश्चापि रक्षति।
तस्मात् सर्व्वेषु भूतेषु प्रीतिमान् भव पार्थिव। सत्यमार्ज्जवमक्रोधमानृशंस्यञ्च पालय।
एवं दण्डञ्च कोषञ्च मित्रं भूमिञ्च लप्स्यसि। सत्यार्ज्जवपरो राजन्मित्रकोषबलान्वितः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अष्टाशीतोऽध्यायः॥ ८८॥
॥ भीष्म उवाच॥ वनस्पतीन् भक्ष्यफलान्न छिन्द्युर्व्विषये तव। ब्राह्मणानां मूलफलं धर्म्ममाहुर्म्मनीषिणः। २२३५
ब्राह्मणेभ्योऽतिरिक्तञ्च भुञ्जीरन्नितरे जनाः। न ब्राह्मणपराधेन हरेदन्यः कथञ्चन।
विप्रश्चेत्त्यागमातिष्ठेदात्मार्थे वृत्तिकर्षितः। परिकल्प्याऽस्य वृत्तिः स्यात् सदारस्य नराधिप।
स चेन्नापनिवर्त्तेत वाच्यो ब्राह्मणसंसदि। कस्मिन्निदानीं मर्य्यादामयं लोकः करिष्यति।
असंशयं निवर्त्तेत न चेद्वक्ष्यत्यतः परं। पूर्व्वं परोक्षं वर्त्तव्यमेतत् कौन्तेय शाश्वतं।
आहुरेतज्जना ब्रह्मन् न चैतत् श्रद्दधाम्यहं। निमन्त्र्यश्च भवेद्भोगैरवृत्त्या चेत्तदाचरेत्। २२४०
कृषिगोरक्ष्यवाणिज्यं लोकानामिह जीवनं। ऊर्द्ध्वञ्चैव त्रयी विद्या सा भूतान् भावयत्युत।
तस्यां प्रपतमानायां ये स्युस्तत्परिपन्थिनः। दस्यवस्तद्वधायेह ब्रह्मा क्षत्त्रमथासृजत्।
शत्रून् जय प्रजा रक्ष यजस्व क्रतुभिर्नृप। युध्यस्व समरे वीरो भूत्वा कौरवनन्दन।
संरक्ष्यान् पालयेद्राजा स राजा राजसत्तमः। ये केचित्तान्न रक्षन्ति तैरर्थो नास्ति कश्चन।
सदैव राज्ञा बोद्धव्यं सर्व्वलोकाद्युधिष्ठिर। तस्माद्धेतोर्हि भुञ्जीत मनुष्यानेव मानवः। २२४५
आन्तरेभ्यः परान्रक्षन् परेभ्यः पुनरान्तरान्। परान् परेभ्यः स्वान् स्वेभ्यः सर्व्वान् पालय नित्यदा।
आत्मानं सर्व्वतो रक्षन्राजा रक्षेत मेदिनीं। आत्ममूलमिदं सर्व्वमाहुर्व्वै विदुषो जनाः।
किं छिद्रं कोऽनुषङ्गो मे किं वाऽस्त्यविनिपातितं। कुतो मामाश्रयेद्दोष इति नित्यं विचिन्तयेत्।
अतीतदिवसे वृत्तं प्रशंसन्ति न वा पुनः। गुप्तैश्चारैरनुमतैः पृथिवीमनुसारयेत्।
जानीयुर्यदि मे वृत्तं प्रशंसन्ति न वा पुनः। कच्चिद्रोचेज्जनपदे कच्चिद्राष्ट्रे च मे यशः। २२५०
धर्म्मज्ञानां धृतिमतां सङ्ग्रामेष्वपलायिनां। राष्ट्रे तु ये न जीवन्ति ये तु राज्ञो न जीविनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Dalgaon

अमात्यानाञ्च सर्व्वेषां मध्यस्थानाञ्च सर्व्वशः। ये च त्वाभिप्रशंसेयुर्निन्देयुरथ वा पुनः।
सर्व्वान् सुपरिणीतांस्तान् कारयेथा युधिष्ठिर। एकान्तेन हि सर्व्वेषां न शक्यं तात रोचितुं।
मित्रामित्रमथो मध्यं सर्व्वभूतेषु भारत।
॥ युधिष्ठिर उवाच ॥ तुल्यबाहुबलानाञ्च तुल्यानाञ्च गुणैरपि। कथं स्यादधिकः कश्चित् स च भुञ्जीत मानवान्। ३३५५
॥ भीष्म उवाच ॥ यच्चरा ह्यचरानद्युरदंष्ट्रान् दंष्ट्रिणस्तथा। आशीविष इव क्रुद्धा भुजगान् भुजगा इव।
एतेभ्यश्चाप्रमत्तः स्यात् सदा शत्रोर्युधिष्ठिर। भारुण्डसदृशा ह्येते निपतन्ति प्रमादतः।
कच्चित्ते वणिजो राष्ट्रे नोद्विजन्ति करार्द्दिताः। क्रीणन्तो बहुनाऽल्पेन कान्तारकृतविश्रमाः।
कच्चित् कृषिकरा राष्ट्रं न जहत्यतिपीडिताः। ये वहन्ति धुरं राज्ञां ते तरन्तीतरानपि।
इतो दत्तेन जीवन्ति देवाः पितृगणास्तथा। मानुषोरगरक्षांसि वयांसि पशवस्तथा। ३३६०
एषा ते राष्ट्रवृत्तिश्च राज्ञां गुप्तिश्च भारत। एतमेवार्थमाश्रित्य भूयो वक्ष्यामि पाण्डव।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि राष्ट्रगुप्तौ ऊननवतोऽध्यायः ॥ ८९ ॥
॥ भीष्म उवाच ॥ यानङ्गिराः क्षत्रधर्म्मानुतथ्यो ब्रह्मवित्तमः। मान्धात्रे यौवनाश्वाय प्रीतिमानभ्यभाषत।
स यथाऽनुशशासैनमुतथ्यो ब्रह्मवित्तमः। तत्ते सर्व्वं प्रवक्ष्यामि निखिलेन युधिष्ठिर।
॥ उतथ्य उवाच ॥ धर्म्माय राजा भवति न कामकरणाय तु। मान्धातरिति जानीहि राजा लोकस्य रक्षिता।
राजा चरति चेद्धर्म्मं देवत्वायैव कल्पते। स चेदधर्म्मं चरति नरकायैव गच्छति। ३३६५
धर्म्मे तिष्ठन्ति भूतानि धर्म्मो राजनि तिष्ठति। तं राजा साधु यः शास्ति स राजा पृथिवीपतिः।
राजा परमधर्म्मात्मा लक्ष्मीवान् धर्म्म उच्यते। देवाश्च गर्हां गच्छन्ति धर्म्मो नास्तीति चोच्यते।
स्वधर्म्मे वर्त्तमानानामर्थसिद्धिः प्रदृश्यते। तदेव मङ्गलं लोकः सर्व्वः समनुवर्त्तते।
उच्छिद्यते धर्म्मवृत्तमधर्म्मो वर्त्तते महान्। भयमाहुर्द्दिवारात्रं यदा पापो न वार्य्यते।
ममेदमिति नैवैतत् साधूनां तात धर्म्मतः। न वै व्यवस्था भवति यदा पापो न वार्य्यते। ३३७०
नैव भार्य्या न पशवो न क्षेत्रं न निवेशनं। सन्दृश्येत मनुष्याणां यदा पापबलं भवेत्।
देवाः पूजां न जानन्ति न स्वधा पितरस्तदा। न पूज्यन्ते ह्यतिथयो यदा पापो न वार्य्यते।
न वेदानधिगच्छन्ति व्रतवन्तो द्विजातयः। न यज्ञांस्तन्वते विप्रा यदा पापो न वार्य्यते।
वृद्धानामिव सत्त्वानां मनो भवति विह्वलं। मनुष्याणां महाराज यदा पापो न वार्य्यते।
उभौ लोकावभिप्रेक्ष्य राजानमृषयः स्वयं। असृजन् सुमहद्भूतमयं धर्म्मो भविष्यति। ३३७५
यस्मिन् धर्म्मो विराजेत तं राजानं प्रचक्षते। यस्मिन् विलीयते धर्म्मस्तं देवा वृषलं विदुः।
वृषो हि भगवान् धर्म्मो यस्तस्य कुरुते ह्यलं। वृषलं तं विदुर्द्देवास्तस्माद्धर्म्मं विवर्द्धयेत्।
धर्म्मे वर्द्धति वर्द्धन्ति सर्व्वभूतानि सर्व्वदा। तस्मिन् ह्रसति हीयन्ते तस्माद्धर्म्मं न लोपयेत्।
धनात् स्रवति धर्म्मो हि धारणाद्वेति निश्चयः। अकार्य्याणां मनुष्येन्द्र स सीमान्तकरः स्मृतः।
प्रभवार्थं हि भूतानां धर्म्मः सृष्टः स्वयम्भुवा। तस्मात् प्रवर्त्तयेद्धर्म्मं प्रजानुग्रहकारणात्। ३३८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्माद्धि राजशार्दूल धर्म्मः श्रेष्ठतरः स्मृतः। स राजा यः प्रजाः शास्ति साधुकृत् पुरुषर्षभः।
कामक्रोधावनादृत्य धर्म्ममेवानुपालय। धर्म्मः श्रेयस्करतमो राज्ञां भरतसत्तम।
धर्म्मस्य ब्राह्मणो योनिस्तस्मात्तान् पूजयेत् सदा। ब्राह्मणानाञ्च मान्धातः कुर्य्यात् कामानमत्सरी।
तेषां ह्यकामकरणाद्राज्ञः सञ्जायते भयं। मित्राणि न च वर्द्धन्ते तथाऽमित्रीभवन्त्यपि।
ब्राह्मणानां सदाऽसूयाद्बाल्याद्वैरोचनो बलिः। अथाऽस्माच्छ्रीरपाक्रामद्याऽस्मिन्नासीत् प्रतापिनी। ३३८५
ततस्तस्मादपाक्रम्य साऽगच्छत् पाकशासनं। अथ सोऽन्वपतत् पश्चात् श्रियं दृष्ट्वा पुरन्दरे।
एतत् फलमसूयाया अभिमानस्य वा विभो। तस्माद्बुध्यस्व मान्धातर्म्मा त्वां जह्यात् प्रतापिनी।
दर्पो नाम श्रियः पुत्त्रो जज्ञे ऽधर्म्मादिति श्रुतिः। तेन देवासुरा राजन्नीताः सुबहवो वशं।
राजर्षयश्च बहवस्तथा बुध्यस्व पार्थिव। राजा भवति तं जित्वा दासस्तेन पराजितः।
स यथा दर्पसहितमधर्म्मं नानुसेवसे। तथा वर्त्तस्व मान्धातश्चिरं चेत् स्थातुमिच्छसि। ३३९०
मत्तात् प्रमत्तात् पाषण्डादुन्मत्ताच्च विशेषतः। तदभ्यासादुपावर्त्त संहितानाञ्च सेवनात्।
निगृहीतादमात्याच्च स्त्रीभ्यश्चैव विशेषतः। पर्व्वताद्विषमाद्दुर्गाद्धस्तिनोऽश्वात् सरीसृपात्।
एतेभ्यो नित्ययुक्तः स्यान्नक्तञ्चर्य्याञ्च वर्ज्जयेत्। अत्यागञ्चाभिमानञ्च दम्भं क्रोधञ्च वर्ज्जयेत्।
अविज्ञातासु च स्त्रीषु क्लीबासु स्वैरिणीषु च। परभार्य्यासु कन्यासु नाचरेन्मैथुनं नृप।
कुलेषु पापरक्षांसि जायन्ते वर्णसङ्करात्। अपुमांसोऽङ्गहीनाश्च स्थूलजिह्वा विचेतसः। ३३९५
एते चान्ये च जायन्ते यदा राजा प्रमाद्यति। तस्माद्राज्ञा विशेषेण वर्त्तितव्यं प्रजाहिते।
क्षत्त्रियस्य प्रमत्तस्य दोषः सञ्जायते महान्। अधर्म्माः सम्प्रवर्द्धन्ते प्रजासङ्करकारकाः।
अशीते विद्यते शीतं शीते शीतं न विद्यते। अवृष्टिरतिवृष्टिश्च व्याधिश्चाप्याविशेत् प्रजाः।
नक्षत्त्राण्युपतिष्ठन्ति ग्रहा घोरास्तथागते। उत्पाताश्चात्र दृश्यन्ते बहवो राजनाशनाः।
अरक्षितात्मा यो राजा प्रजाश्चापि न रक्षति। प्रजाश्च तस्य क्षीयन्ते ततः सोऽनु विनश्यति। ३४००
द्वावाददाते ह्येकस्य द्वयोः सुबहवोऽपरे। कुमार्य्यः सम्प्रलुप्यन्ते तदाहुर्नृपदूषणं।
ममेदमिति नैकस्य मनुष्येष्ववतिष्ठति। त्यक्त्वा धर्म्मं यदा राजा प्रमादमनुतिष्ठति।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि उतथ्यगीतासु नवतितमोऽध्यायः॥ ९०॥
॥ उतथ्य उवाच॥ कालवर्षी च पर्ज्जन्यो धर्म्मचारी च पार्थिवः। सम्पद्यदैषा भवति सा बिभर्त्ति सुखं प्रजाः।
यो न जानाति निर्हर्त्तुं वस्त्राणां रजको मलं। रक्तानां वा शोधयितुं यथा नास्ति तथैव सः।
एवमेतद्द्विजेन्द्राणां क्षत्त्रियाणां विशां तथा। शूद्रश्चतुर्थो वर्णानां नानाकर्म्मस्ववस्थितः। ३४०५
कर्म्म शूद्रे कृषिर्वैश्ये दण्डनीतिश्च राजनि। ब्रह्मचर्य्यं तपो मन्त्राः सत्यञ्चापि द्विजातिषु।
तेषां यः क्षत्त्रियो वेद वस्त्राणामिव शोधनं। शीलदोषान् विनिर्हर्त्तुं स पिता स प्रजापतिः।
कृतं त्रेता द्वापरञ्च कलिश्च भरतर्षभ। राजवृत्तानि सर्व्वाणि राजैव युगमुच्यते।
चातुर्व्वर्ण्यं तथा वेदाश्चातुराश्रम्यमेव च। सर्व्वं प्रमुह्यते ह्येतद्यदा राजा प्रमाद्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

अग्निर्नेता त्रयी विद्या यज्ञाश्च सहदक्षिणाः । सर्व्व एव प्रमाद्यन्ति यदा राजा प्रमाद्यति । ३४१०
राजैव कर्त्ता भूतानां राजैव च विनाशकः । धर्म्मात्मा यः स कर्त्ता स्यादधर्म्मात्मा विनाशकः ।
राज्ञो भार्य्याश्च पुत्त्राश्च बान्धवाः सुहृदस्तथा । समेत्य सर्व्वे शोचन्ति यदा राजा प्रमाद्यति ।
हस्तिनोऽश्वाश्च गावश्चाप्युष्ट्राश्वतरगर्द्दभाः । अधर्म्मभूते नृपतौ सर्व्वे सीदन्ति जन्तवः ।
दुर्ब्बलार्थं बलं सृष्टं धात्रा मान्धातरुच्यते । अबलन्तु महद्भूतं यस्मिन् सर्व्वं प्रतिष्ठितं ।
यच्च भूतं सम्भजते ये च भूतास्तदन्वयाः । अधर्म्मस्थे हि नृपतौ सर्व्वे शोचन्ति पार्थिव । ३४१५
दुर्ब्बलस्य च यच्चक्षुर्म्मुनेराशीविषस्य च । अविषह्यतमं मन्ये मास्म दुर्ब्बलमासदः ।
दुर्ब्बलांस्तात बुध्येथा नित्यमेवाविमानितान् । मा त्वां दुर्ब्बलचक्षूंषि प्रदहेयुः सबान्धवं ।
न हि दुर्ब्बलदग्धस्य कुले किञ्चित् प्ररोहति । आमूलं निर्दहत्येव मास्म दुर्ब्बलमासदः ।
अबलं वै बलात् श्रेयो यच्चातिबलवद्बलं । बलस्याबलदग्धस्य न किञ्चिदवशिष्यते ।
विमानितो हतः क्रुष्टस्त्रातारञ्चेन्न विन्दति । अमानुषकृतस्तत्र दण्डो हन्ति नराधिपं । ३४२०
मास्म तात बले स्थित्वा भुञ्जीथा दुर्ब्बलं जनं । मा त्वां दुर्ब्बलचक्षूंषि दहन्त्वग्निरिवाश्रयं ।
यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि रोदतां । तानि पुत्त्रान् पशून् घ्नन्ति तेषां मिथ्याभिशंसनात् ।
यदि नात्मनि पुत्त्रेषु न चेत् पौत्त्रेषु नप्तृषु । न हि पापं कृतं कर्म्म सद्यः फलति गौरिव ।
यत्राबलो बध्यमानस्त्रातारं नाधिगच्छति । महान् दैवकृतस्तत्र दण्डः पतति दारुणः ।
युक्ता यदा जनपदा भिक्षन्ते ब्राह्मणा इव । अभीक्ष्णं भिक्षुरूपेण राजानं घ्नन्ति तादृशाः । ३४२५
राज्ञो यदा जनपदे बहवो राजपूरुषाः । अनयेनोपवर्त्तन्ते तद्राज्ञः किल्बिषं महत् ।
यदाऽयुक्ता नयन्त्यर्थान् कामादर्थवशेन वा । कृपणं याचमानानां तद्राज्ञो वैशसं महत् ।
महान् वृक्षो जायते वर्द्धते च तञ्चैव भूतानि समाश्रयन्ति । यदा वृक्षश्छिद्यते दह्यते च तदाश्रया अनिकेता भवन्ति ।
यदा राष्ट्रे धर्म्ममग्र्यं चरन्ति संस्कारं वा राजगुणं ब्रुवाणाः । तैरेवाधर्म्मश्चरितो धर्म्ममोहात्तूर्णं जह्यात् सुकृतं दुष्कृतं वा ।
यत्र पापा ज्ञायमानाश्चरन्ति सतां कलिर्व्विन्दते तत्र राज्ञः । यदा राजा शास्ति नरानशिष्टांस्तदा राज्यं वर्द्धते भूमिपस्य । ३४३०
यश्चामात्यान्मानयित्वा यथार्हं मन्त्रे च युद्धे च नृपो नियुञ्ज्यात् । विवर्द्धते तस्य राष्ट्रं नृपस्य भुङ्क्ते महीं चाप्यखिलां चिराय ।
यत्रापि सुकृतं कर्म्म वाचञ्चैव सुभाषितां । समीक्ष्य पूजयन्राजा धर्म्ममाप्नोत्यनुत्तमं ।
संविभज्य यथा भुङ्क्ते नामात्यानवमन्यते । विहन्ति बलिनं दृप्तं स राज्ञो धर्म्म उच्यते ।
त्रायते हि यदा सर्व्वं वाचा कायेन कर्म्मणा । पुत्त्रस्यापि न मृष्येच्च स राज्ञो धर्म्म उच्यते ।
संविभज्य यदा भुङ्क्ते नृपतिर्दुर्ब्बलान्नरान् । तदा भवन्ति बलिनः स राज्ञो धर्म्म उच्यते । ३४३५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदा रक्षति राष्ट्राणि यदा दस्यूनपोहति। यदा जयति सङ्ग्रामे स राज्ञो धर्म्म उच्यते।
पापमाचरतो यत्र कर्म्मणा व्याहृतेन वा। प्रियस्यापि न मृष्येत स राज्ञो धर्म्म उच्यते।
यदा शारणिकान् राजा पुत्त्रवत् परिरक्षति। भिनत्ति च न मर्य्यादां स राज्ञो धर्म्म उच्यते।
यदाप्तदक्षिणैर्य्यज्ञैर्य्यजते श्रद्धयाऽन्वितः। कामद्वेषावनादृत्य स राज्ञो धर्म्म उच्यते।
कृपणानाथवृद्धानां यदाऽश्रु परिमार्ज्जति। हर्षं सञ्जनयन्नॄणां स राज्ञो धर्म्म उच्यते।
विवर्द्धयति मित्राणि तथाऽरींश्चापकर्षति। सम्पूजयति साधूंश्च स राज्ञो धर्म्म उच्यते।
सत्यं पालयति प्रीत्या नित्यं भूमिं प्रयच्छति। पूजयेदतिथीन् भृत्यान् स राज्ञो धर्म्म उच्यते।
निग्रहानुग्रहौ चोभौ यत्र स्यातां प्रतिष्ठितौ। अस्मिन् लोके परे चैव राजा स प्राप्नुते फलं।
यमो राजा धार्म्मिकाणां मान्धातः परमेश्वरः। संयच्छन् भवति प्राणानसंयच्छंस्तु पातकः।
ऋत्विक्पुरोहिताचार्य्यान् सत्कृत्यानवमन्य च। यदा सम्यक् प्रगृह्णाति स राज्ञो धर्म्म उच्यते।
यमो यच्छति भूतानि सर्व्वाण्येवाविशेषतः। तथा राज्ञाऽनुकर्त्तव्यं यन्तव्या विधिवत् प्रजाः।
सहस्राक्षेण राजा हि सर्व्वथैवोपमीयते। स पश्यति च यं धर्म्मं स धर्म्मः पुरुषर्षभ।
अप्रमादेन शिक्षेथाः क्षमां बुद्धिं धृतिं मतिं। भूतानां सत्त्वजिज्ञासा साध्वसाधु च सर्व्वदा।
सङ्ग्रहः सर्व्वभूतानां दानञ्च मधुरं वचः। पौरजानपदाश्चैव गोप्तव्यास्ते यथासुखं।
न जात्वदक्षो नृपतिः प्रजाः शक्नोति रक्षितुं। भारो हि सुमहांस्तात राज्यं नाम सुदुष्करं।
तद्दण्डविन्नृपः प्राज्ञः शूरः शक्नोति रक्षितुं। न हि शक्यमदण्डेन क्लीवेनाबुद्धिनाऽपि वा।
अभिरूपैः कुले जातैर्द्दक्षैर्भक्तैर्बहुश्रुतैः। सर्व्वा बुद्धीः परीक्षेथास्तापसाश्रमिणामपि।
अतस्त्वं सर्व्वभूतानां धर्म्मं वेत्स्यसि वै परं। स्वदेशे परदेशे वा न ते धर्म्मो विनङ्क्ष्यति।
तस्मादर्थाच्च कामाच्च धर्म्म एवोत्तरोऽभवत्। अस्मिन् लोके परे चैव धर्म्मात्मा सुखमेधते।
त्यजन्ति दारान् पुत्त्रांश्च मनुष्याः परिपूजिताः। सङ्ग्रहश्चैव भूतानां दानञ्च मधुरा च वाक्।
अप्रमादश्च शौचञ्च राज्ञो भूतिकरं महत्। एतेभ्यश्चैव मान्धातः सततं मा प्रमादिथाः।
अप्रमत्तो भवेद्राजा छिद्रदर्शी परात्मनोः। नास्य छिद्रं परः पश्येच्छिद्रेषु परमन्वियात्।
एतद्वृत्तं वासवस्य यमस्य वरुणस्य च। राजर्षीणाञ्च सर्व्वेषां तत्त्वमप्यनुपालय।
तत् कुरुष्व महाराज वृत्तं राजर्षिसेवितं। आतिष्ठ दिव्यं पन्थानमह्नाय भरतर्षभ।
धर्म्मवृत्तं हि राजानं प्रेत्य चेह च भारत। देवर्षिपितृगन्धर्व्वाः कीर्त्तयन्ति महौजसः।
॥ भीष्म उवाच ॥ स एवमुक्तो मान्धाता तेनोतथ्येन भारत। कृतवानविशङ्कस्तु एकः प्राप च मेदिनीं।
भवानपि तथा सम्यक् मान्धातेव महीपते। धर्म्मं कृत्वा महीं रक्ष स्वर्गे स्थानमवाप्स्यसि।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि उतथ्यगीतासु एकनवतोऽध्यायः ॥ ९१ ॥
॥ युधिष्ठिर उवाच ॥ कथं धर्म्मे स्थातुमिच्छन् राजा वर्त्तेत धार्म्मिकः। पृच्छामि त्वां कुरुश्रेष्ठ तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। गीतं दृष्टार्थतत्त्वेन वामदेवेन धीमता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-IKS Equipment Heritage Foundation, Jalgaon

राजा वसुमना नाम ज्ञानवान् धृतिमान् शुचिः । महर्षिं परिपप्रच्छ वामदेवं तपस्विनं । ३५६५
धर्म्मार्थसहितैर्वाक्यैर्भगवन्ननुशाधि मां । येन वृत्तेन वै तिष्ठन्न हीयेयं स्वधर्म्मतः ।
तमब्रवीद्वामदेवस्तेजस्वी तपताम्बरः । हेमवर्णं सुखासीनं ययातिमिव नाहुषं ।
॥ वामदेव उवाच ॥ धर्म्ममेवानुवर्त्तस्व न धर्म्माद्विद्यते परं । धर्म्मे स्थिता हि राजानो जयन्ति पृथिवीमिमां ।
अर्थसिद्धेः परं धर्म्मं मन्यते यो महीपतिः । सताञ्च कुरुते बुद्धिं स धर्म्मेण विराजते ।
अधर्म्मदर्शी यो राजा बलादेव प्रवर्त्तते । क्षिप्रमेवापयातोऽस्मादुभौ प्रथममध्यमौ । ३५७०
असत्पापिष्ठसचिवो बध्यो लोकस्य धर्म्महा । सहैव परिवारेण क्षिप्रमेवावसीदति ।
अर्थानामननुष्ठाता कामचारी विकत्थनः । अपि सर्व्वां महीं लब्ध्वा क्षिप्रमेव विनश्यति ।
अथाददानः कल्याणमनसूयुर्जितेन्द्रियः । वर्द्धते मतिमान्राजा स्रोतोभिरिव सागरः ।
न पूर्णोऽस्मीति मन्येत धर्म्मतः कामतोऽर्थतः । बुद्धितो मित्रतश्चापि सततं वसुधाधिपः ।
एतेष्वेव हि सर्व्वेषु लोकयात्रा प्रतिष्ठिता । एतानि शृण्वन् लभते यशः कीर्त्तिं श्रियः प्रजाः । ३५७५
एवं यो धर्म्मसंरम्भी धर्म्मार्थपरिचिन्तकः । अर्थान् समीक्ष्य भजते स ध्रुवं महदश्नुते ।
अदाता ह्यनतिस्नेहो दण्डेनावर्त्तयन् प्रजाः । साहसप्रकृती राजा क्षिप्रमेव विनश्यति ।
अथ पापकृतं बुद्ध्या न च पश्यत्यबुद्धिमान् । अकीर्त्त्याऽभिसमायुक्तो भूयो नरकमश्नुते ।
अथ मानयितुर्दातुः श्लक्ष्णस्य वशवर्त्तिनः । व्यसनं स्वमिवोत्पन्नं विजिघांसन्ति मानवाः ।
यस्य नास्ति गुरुर्धर्म्मे न चान्यानपि पृच्छति । सुखतन्त्रोऽर्थलाभेषु न चिरं सुखमश्नुते । ३५८०
गुरुप्रधानो धर्म्मेषु स्वयमर्थान्ववेक्षिता । धर्म्मप्रधानो लाभेषु स चिरं सुखमश्नुते ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वामदेवगीतासु द्विनवतोऽध्यायः ॥ ९२ ॥
॥ वामदेव उवाच ॥ यत्राधर्म्मं प्रणयते दुर्ब्बले बलवत्तरः । तां वृत्तिमुपजीवन्ति ये भवन्ति तदन्वयाः ।
राजानमनुवर्त्तन्ते पापं पापप्रवर्त्तकं । अविनीतमनुष्यन्तत् क्षिप्रं राष्ट्रं विनश्यति ।
यद्वृत्तमुपजीवन्ति प्रकृतिस्थस्य मानवाः । तदेव विषमस्थस्य स्वजनोऽपि न मृष्यते ।
साहसप्रकृतिर्यत्र किञ्चिदुल्बणमाचरेत् । अशास्त्रलक्षणो राजा क्षिप्रमेव विनश्यति । ३५८५
योऽत्यन्ताचरितां वृत्तिं क्षत्रियो नानुवर्त्तते । जितानामजितानाञ्च क्षत्रधर्म्मादपैति सः ।
द्विषन्तं कृतकल्याणं गृहीत्वा नृपतिं रणे । यो न मानयते द्वेषात् क्षत्रधर्म्मादपैति सः ।
शक्तः स्यात् सुमुखो राजा कुर्य्यात् कारुण्यमापदि । प्रियो भवति भूतानां न च विभ्रश्यते श्रियः ।
अप्रियं यस्य कुर्व्वीत भूयस्तस्य प्रियञ्चरेत् । न चिरेण प्रियः स स्यात् योऽप्रियः प्रियमाचरेत् ।
मृषावादं परिहरेत् कुर्य्यात् प्रियमयाचितः । न च कामान्न संरम्भान्न द्वेषाद्धर्म्ममुत्सृजेत् । ३५९०
नापत्रपेत प्रश्नेषु नाविभाव्यां गिरं सृजेत् । न त्वरेत न चासूयेत् तथा संगृह्यते परः ।
प्रियेणातिभृशं हृष्येदप्रियेण च संज्वरेत् । न तप्येदर्थकृच्छ्रेषु प्रजाहितमनुस्मरन् ।
यः प्रियं कुरुते नित्यं गुणतो वसुधाधिपः । तस्य कर्म्माणि सिध्यन्ति न च सन्त्यज्यते श्रिया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निवृत्तं प्रतिकूलेषु वर्त्तमानमनुप्रिये। भक्तं भजेत नृपतिः सदैव सुसमाहितः।
अप्रकीर्णेन्द्रियग्राममत्यन्तानुगतं शुचिं। शक्तञ्चैवानुरक्तञ्च युञ्ज्यान्महति कर्म्मणि। ३४९५
एवमेतैर्गुणैर्युक्तो योऽनुरज्यति भूमिपं। भर्त्तुरर्थेष्वप्रमत्तं नियुञ्ज्यादर्थकर्म्मणि।
मूढमैन्द्रियकं लुब्धमनार्य्यचरितं शठं। अनतीतोपधं हिंस्रं दुर्ब्बुद्धिमबहुश्रुतं।
त्यक्तादात्त मद्यरतं द्यूतस्त्रीमृगयापरं। कार्य्ये महति युञ्जानो हीयते नृपतिः श्रिया।
रक्षितात्मा च यो राजा रक्ष्यान् यश्चानुरक्षति। प्रजाश्च तस्य वर्द्धन्ते ध्रुवञ्च महदश्नुते।
ये केचिद्भूमिपतयः सर्व्वांस्तानन्ववेक्षयेत्। सुहृद्भिरनभिख्यातैस्तेन राजाऽतिरिच्यते। ३५००
अपकृत्य बलस्थस्य दूरस्थोऽस्मीति नाश्वसेत्। श्येनाभिपतनैरेते निपतन्ति प्रमाद्यतः।
दृढमूलस्त्वदुष्टात्मा विदित्वा बलमात्मनः। अबलानभियुञ्जीत न तु ये बलवत्तराः।
विक्रमेण महीं लब्ध्वा प्रजा धर्म्मेण पालयेत्। आहवे निधनं कुर्य्याद्राजा धर्म्मपरायणः।
मरणान्तमिदं सर्व्वं नेह किञ्चिदनामयं। तस्माद्धर्म्मे स्थितो राजा प्रजा धर्म्मेण पालयेत्।
रक्ष्याधिकरणं युद्धं तथा धर्म्मानुशासनं। मन्त्रचिन्ता सुखं काले पञ्चभिर्व्वर्द्धते मही। ३५०५
एतानि यस्य गुप्तानि स राजा राजसत्तमः। सततं वर्त्तमानोऽत्र राजा धत्ते महीमिमां।
नैतान्येकेन शक्यानि सातत्येनानुवीक्षितुं। तेषु सर्व्वं प्रतिष्ठाप्य राजा भुङ्क्ते चिरं महीं।
दातारं संविभक्तारं मार्द्दवोपगतं शुचिं। असन्त्यक्तमनुष्यञ्च तं जनाः कुर्व्वते नृपं।
यस्तु निःश्रेयसं श्रुत्वा ज्ञानं तत् प्रतिपद्यते। आत्मनो मतमुत्सृज्य तं लोकोऽनुविधीयते।
योऽर्थकामस्य वचनं प्रातिकूल्यान्न मृष्यते। शृणोति प्रतिकूलानि सर्व्वदा विमना इव। ३५१०
अग्राम्यचरितां वृत्तिं यो न सेवेत नित्यदा। जितानामजितानाञ्च क्षत्रधर्म्मादपैति सः।
निगृहीतादमात्याच्च स्त्रीभ्यश्चैव विशेषतः। पर्व्वताद्विषमाद्दुर्गाद्धस्तिनोऽश्वात् सरीसृपात्।
एतेभ्यो नित्ययुक्तः सन् रक्षेदात्मानमेव तु। मुख्यानमात्यान् यो हित्वा निहीनान् कुरुते प्रियान्।
स वै व्यसनमासाद्य गाधमार्त्तो न विन्दति। यः कल्याणगुणान् ज्ञातीन् द्वेषान्नोपबुभूषति।
अदृढात्मा दृढक्रोधः स मृत्योर्वसते ऽन्तिके। अथ यो गुणसम्पन्नान् हृदयस्य प्रियानपि। ३५१५
प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति। नाकाले प्रणयेदर्थान्नाप्रिये जातु सञ्ज्वरेत्।
प्रिये नातिभृशं तिष्ठेद्युज्येत शुभकर्म्मणि। के वाऽनुरक्ता राजानः के भयात् समुपाश्रिताः।
मध्यस्थदोषाः के चैषामिति नित्यं विचिन्तयेत्। न जातु बलवान् भूत्वा दुर्ब्बले विश्वसेत् क्वचित्।
भारुण्डसदृशा ह्येते निपतन्ति प्रमाद्यतः। अपि सर्व्वगुणैर्युक्तं भर्त्तारं प्रियवादिनं।
अभिद्रुह्यति पापात्मा न तस्माद्विश्वसेज्जनात्। एवं राजोपनिषदं ययातिः स्माह नाहुषः। ३५२०
मनुष्यविषये युक्तो हन्ति शत्रूननुत्तमान्।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वामदेवगीतासु त्रिनवतोऽध्यायः ॥ ९३ ॥
॥ वामदेव उवाच ॥ अयुद्धेनैव विजयं वर्द्धयेद्वसुधाधिपः। जघन्यमाहुर्व्विजयं युद्धेन च नराधिप।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न चाप्यलब्धं लिप्सेत मूलेनातिदृढे सति । न हि दुर्ब्बलमूलस्य राज्ञो लाभो विधीयते ।
यस्य स्फीतो जनपदः सम्पन्नः प्रियराजकः । सन्तुष्टः पुष्टसचिवो दृढमूलः स पार्थिवः ।
यस्य योधाः सुसन्तुष्टाः सान्त्विताः सूपधाःस्थिताः । अल्पेनापि स दण्डेन महीं जयति पार्थिवः । ३५१५
पौरजानपदा यस्य भूतेषु च दयालवः । सधना धान्यवन्तश्च दृढमूलः स पार्थिवः ।
प्रतापकालमधिकं यदा मन्येत चात्मनः । तदा लिप्सेत मेधावी परभूमिधनान्युत ।
भोगेष्वदयमानस्य भूतेषु च दयावतः । वर्द्धते त्वरमाणस्य विजयो रक्षितात्मनः ।
तक्षेदात्मानमेवं स वनं परशुना यथा । यः सम्यग्वर्त्तमानेषु स्वेषु मिथ्या प्रवर्त्तते ।
नैवद्विषन्तो हीयन्ते राज्ञो नित्यमनिघ्नतः । क्रोधं निहन्तुं यो वेद तस्य द्वेष्टा न विद्यते । ३५२०
यदार्य्यजनविद्विष्टं कर्म्म तन्नाचरेद्बुधः । यत्कल्याणमभिध्यायेत्तत्रात्मानं नियोजयेत् ।
नैवमन्येऽवजानन्ति नात्मना परितप्यते । कृत्यशेषेण यो राजा सुखान्यनुबुभूषति ।
इदं वृत्तं मनुष्येषु वर्त्तते यो महीपतिः । उभौ लोकौ विनिर्ज्जित्य विजये सम्प्रतिष्ठते ।
॥ भीष्म उवाच ॥ इत्युक्तो वामदेवेन सर्व्वं तत् कृतवान्नृपः । तथा कुर्व्वंस्त्वमप्येतौ लोकौ जेता न संशयः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वामदेवगीतासु चतुर्नवतोऽध्यायः ॥ ९४ ॥
॥ युधिष्ठिर उवाच ॥ अथ यो विजिगीषेत क्षत्त्रियः क्षत्त्रियं युधि । कस्तस्य विजये धर्म्मो ह्येतत् पृष्टो ब्रवी
हि मे । ३५२५
॥ भीष्म उवाच ॥ ससहायोऽसहायो वा राष्ट्रमागम्य भूमिपः । ब्रूयादहं वो राजेति रक्षिष्यामि च वः सदा ।
मम धर्म्मबलिं दत्त किं वा मां प्रतिपत्स्यथ । ते चेत्तमागतं तत्र वृणुयुः कुशलं भवेत् ।
ते चेदक्षत्त्रियाः सन्तो विरुध्येरन् कथञ्चन । सर्व्वोपायैर्नियन्तव्या विकर्म्मस्था नराधिपाः ।
अशस्त्रं क्षत्त्रियं मत्वा शस्त्रं गृह्णात्यथापरः । त्राणायाप्यसमर्थन्तं मन्यमानमतीव च ।
॥ युधिष्ठिर उवाच ॥ अथ यः क्षत्त्रियो राजा क्षत्त्रियं प्रत्युपव्रजेत् । कथं स प्रतियोद्धव्यस्तन्मे ब्रूहि पितामह । ३५४०
॥ भीष्म उवाच ॥ नैवासन्नद्धकवचो योद्धव्यः क्षत्त्रियो रणे । एक एकेन योध्यश्च विसृजेदक्षमं यथा ।
स चेत् सन्नद्ध आगच्छेत् सन्नद्धव्यं ततो भवेत् । स चेत् ससैन्य आगच्छेत् ससैन्यस्तमथाह्वयेत् ।
स चेन्निकृत्या युध्येत निकृत्या प्रतियोधयेत् । अथ चेद्धर्म्मतो युध्येद्धर्म्मेणैव निवारयेत् ।
नाश्वेन रथिनं यायादुदियाद्रथिनं रथी । व्यसनेन प्रहर्त्तव्यं न भीताय जिताय च ।
इषुर्लिप्तो न कर्णी स्यादसतामेतदायुधं । यथार्थमेव योद्धव्यं न क्रुध्येत जिघांसतः । ३५४५
निष्प्राणो नाभिहन्तव्यो नानपत्यः कथञ्चन । भग्नशस्त्रो विपन्नश्च कृत्तज्यो हतवाहनः ।
चिकित्स्यः स्यात् स्वविषये प्राप्यो वा स्वगृहे भवेत् । साधूनान्तु यदा भेदात् साधुश्चेद्व्यसनी भवेत् ।
निर्व्रणश्च स मोक्तव्य एष धर्म्मः सनातनः । तस्माद्धर्म्मेण योद्धव्य मिति स्वायम्भुवोऽब्रवीत् ।
सत्सु नित्यं सतां धर्म्मन्तमास्थाय न नाशयेत् । यो वै जयत्यधर्म्मेण क्षत्त्रियो धर्म्मसङ्करः ।
आत्मानमात्मना हन्ति पापो निकृतिजीविनः । कर्म्म चैतदसाधूनामसाधुं साधुना जयेत् । ३५५०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मेण निधनं श्रेयो न जयः पापकर्म्मणा । नाधर्म्मश्चरितो राजन् सद्यः फलति गौरिव ।
मूलानि च प्रशाखाश्च दहन् समधिगच्छति । पापेन कर्म्मणा वित्तं लब्ध्वा पापः प्रहृष्यति ।
स वर्द्धमानः स्तेयेन पापः पापे प्रसज्जति । न धर्म्मोऽस्तीति मन्वानः शुचीनवहसन्निव ।
अश्रद्दधानश्च भवेद्विनाशमुपगच्छति । सम्बद्धो वारुणैः पाशैरमर्त्य इव मन्यते ।
महादृतिरिवाध्मातः सुकृतेनैव वर्त्तते । ततः समूलो ह्रियते नदीकूलादिव द्रुमः । ३५५५
अथैनमभिनन्दन्ति भिन्नं कुम्भमिवाश्मनि । तस्माद्धर्म्मेण विजयं कोषं लिप्सेत भूमिपः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि विजिगीषमाणवृत्ते पञ्चनवतोऽध्यायः ॥ ९५ ॥

॥ भीष्म उवाच ॥ नाधर्म्मेण महीं जेतुं लिप्सेत जगतीपतिः । अधर्म्मविजयं लब्ध्वा कोऽनुमन्येत भूमिपः ।
अधर्म्मयुक्तो विजयो ह्यध्रुवोऽस्वर्ग्य एव च । सादयत्येष राजानं महीञ्च भरतर्षभ ।
विशीर्णकवचञ्चैव तवास्मीति च वादिनं । कृताञ्जलिं न्यस्तशस्त्रं गृहीत्वा न विहिंसयेत् ।
बलेन विजितो यश्च नतं युध्येत भूमिपः । संवत्सरं विप्रणयेत्तस्माज्जातः पुनर्भवेत् । ३५६०
नार्व्वाक् संवत्सरात् कन्या प्रष्टव्या विक्रमाहृता । एवमेव धनं सर्व्वं यच्चान्यत् सहसा हृतं ।
न तु बध्यधनं तिष्ठेत् पिबेयुर्ब्राह्मणाः पयः । युञ्जीरन्नप्यनडुहः क्षन्तव्यं वा तदा भवेत् ।
राज्ञा राजैव योद्धव्यस्तथा धर्म्मो विधीयते । नान्यो राजानमभ्यस्येद्राजन्यः कथञ्चन ।
अनीकयोः संहतयोर्यदीयाद्ब्राह्मणोऽन्तरा । शान्तिमिच्छन्नुभयतो न योद्धव्यं तदा भवेत् ।
मर्य्यादां शाश्वतीं भिन्द्याद्ब्राह्मणं योऽभिलङ्घयेत् । अथ चेल्लङ्घयेदेव मर्यादां क्षत्रियब्रुवः । ३५६५
असङ्ख्येयस्तदूर्द्ध्वं स्यादनादेयश्च संसदि । यस्तु धर्म्मविलोपेन मर्यादाभेदनेन च ।
तां वृत्तिं नानुवर्त्तेत विजिगीषुर्म्महीपतिः । धर्म्मलब्धाद्धि विजयाल्लाभः कोऽभ्यधिको भवेत् ।
सहसाऽनार्य्यभूतानि क्षिप्रमेव प्रसादयेत् । सान्त्वेन भोगदानेन स राज्ञां परमो नयः ।
भुज्यमाना ह्ययोगेन स्वराष्ट्रादभितापिताः । अमित्रास्तमुपासीरन् व्यसनौघप्रतीक्षिणः ।
अमित्रोपग्रहं चास्य ते कुर्य्युः क्षिप्रमापदि । सन्तुष्टाः सर्व्वतो राजन् राजव्यसनकाङ्क्षिणः । ३५७०
नामित्रो विनिकर्त्तव्यो नातिच्छेद्यः कथञ्चन । जीवितं ह्यप्यतिच्छिन्नः सन्त्यजेच्च कदाचन ।
अल्पेनापि च संयुक्तस्तुष्यत्येव नराधिपः । शुद्धं जीवितमेवापि तादृशो बहु मन्यते ।
यस्य स्फीतो जनपदः सम्पन्नः प्रियराजकः । सन्तुष्टभृत्यसचिवो दृढमूलः स पार्थिवः ।
ऋत्विक्पुरोहिताचार्य्या ये चान्ये श्रुतसत्तमाः । पूजार्हाः पूजिता यस्य स वै लोकविदुच्यते ।
एतेनैव च वृत्तेन महीं प्राप सुरोत्तमः । अनेन चेन्द्रविषयं विजिगीषन्ति पार्थिवाः । ३५७५
भूमिवर्ज्जं धनं राजा जित्वा राजन्महाहवे । अपि चान्नौषधीः शश्वदाजहार प्रतर्द्दनः ।
अग्निहोत्राग्निशेषञ्च हविर्भोजनमेव च । आजहार दिवोदासस्ततो विप्रकृतोऽभवत् ।
सराजकाणि राष्ट्राणि नाभागो दक्षिणां ददौ । अन्यत्र श्रोत्रियस्वाच्च तापसार्थाच्च भारत ।
उच्चावचानि वित्तानि धर्म्मज्ञानां युधिष्ठिर । आसन्राज्ञां पुराणानां सर्व्वं तन्मम रोचते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वविद्यातिरेकेण जयमिच्छेन्महीपतिः । न मायया न दम्भेन य इच्छेद्भूतिमात्मनः । २५८०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि षसवतोऽध्यायः ॥ ९६ ॥
॥ युधिष्ठिर उवाच ॥ क्षत्त्रधर्म्माद्धि पापीयान् न धर्म्मोऽस्ति नराधिप । अपयानेन युद्धेन राजा हन्ति महाजनं ।
अथ स्वकर्म्मणा केन लोकान् जयति पार्थिवः । विद्वन् जिज्ञासमानाय प्रब्रूहि भरतर्षभ ।
॥ भीष्म उवाच ॥ निग्रहेण च पापानां साधूनां सङ्ग्रहेण च । यज्ञैर्दानैश्च राजानो भवन्ति शुचयोऽमलाः ।
उपरुन्धन्ति राजानो भूतानि विजयार्थिनः । त एव विजयं प्राप्य वर्द्धयन्ति पुनः प्रजाः ।
अपविध्यन्ति पापानि दानयज्ञतपोबलैः । अनुग्रहाय भूतानां पुण्यमेषां विवर्द्धते । २५८५
यथैव क्षेत्रनिर्य्याता निर्य्यातुं क्षेत्रमेव च । हिनस्ति धान्यं कक्षञ्च न च धान्यं विनश्यति ।
एवं शस्त्राणि मुञ्चन्तो घ्नन्ति बध्याननेकधा । तस्यैषा निष्कृतिः कृत्स्ना भूतानां भावनं पुनः ।
यो भूतानि धनाक्रान्त्या बधात् क्लेशाच्च रक्षति । दस्युभ्यः प्राणदानात् स धनदः सुखदो विराट् ।
स सर्व्वयज्ञैरीजानो राजाऽथाभयदक्षिणैः । अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकतां ।
ब्राह्मणार्थे समुत्पन्ने योऽरिभिः सृत्य युध्यति । आत्मानं यूपमुत्सृज्य स यज्ञोऽनन्तदक्षिणः । २५९०
अभीतो विकिरन् शत्रून् प्रतिगृह्य शरांस्तथा । न तस्मात्त्रिदशाः श्रेयो भुवि पश्यन्ति किञ्चन ।
तस्य शस्त्राणि यावन्ति त्वचं भिन्दन्ति संयुगे । तावतः सोऽश्नुते लोकान् सर्व्वकामदुहोऽक्षयान् ।
यदस्य रुधिरं गात्रादाहवे सम्प्रवर्त्तते । सह तेनैव पापेन सर्व्वपापैः प्रमुच्यते ।
यानि दुःखानि सहते क्षत्त्रियो युधि तापितः । तेन तेन तपो भूय इति धर्म्मविदो विदुः ।
पृष्ठतो भीरवः सङ्ख्ये वर्त्तन्ते धर्म्मपूरुषाः । शूराच्छरणमिच्छन्तः पर्ज्जन्यादिव जीवनं । २५९५
यदि शूरस्तथा क्षेमे प्रतिरक्षेद्यथा भये । प्रतिरूपं जनं कुर्य्यान्न च तद्वर्त्तते तथा ।
यदि ते कृतमाज्ञाय नमस्कुर्य्युः सदैव तं । युक्तं न्याय्यञ्च कुर्य्युस्ते न च तद्वर्त्तते तथा ।
पुरुषाणां समानानां दृश्यते महदन्तरं । सङ्ग्रामेऽनीकवेलायामुत्क्रुष्टेऽभिपतत्सु त ।
पतत्यभिमुखः शूरः परान् भीरुः पलायते । आस्थाय स्वर्ग्यमध्वानं सहायान् विषमे त्यजेत् ।
मास्म तांस्तादृशांस्तात जनिष्ठाः पुरुषाधमान् । ये सहायान् रणे हित्वा स्वस्तिमन्तो गृहान् ययुः । २६००
अस्वस्ति तेभ्यः कुर्व्वन्ति देवा इन्द्रपुरोगमाः । त्यागेन यः सहायानां स्वान् प्राणांस्त्रातुमिच्छति ।
तं हन्युः काष्ठलोष्टैर्व्वा दहेयुर्व्वा कटाग्निना । पशुवन्मारयेयुर्व्वा क्षत्त्रिया ये स्युरीदृशाः ।
अधर्म्मः क्षत्त्रियस्यैव यच्छय्यामरणं भवेत् । विसृजन् श्लेष्ममूत्राणि कृपणं परिदेवयन् ।
अविक्षतेन देहेन प्रलयं योऽधिगच्छति । क्षत्त्रियो नास्य तत् कर्म्म प्रशंसन्ति पुराविदः ।
न गृहे मरणं तात क्षत्त्रियाणां प्रशस्यते । शौण्डीराणामशौण्डीर्य्यमधर्म्म्यं कृपणञ्च तत् । २६०५
इदं दुःखं महत् कष्टं पापीय इति निष्टनन् । प्रतिध्वस्तमुखः पूतिरमात्याननुशोचयन् ।
अरोगाणां स्पृहयते मुहुर्म्मृत्युमपीच्छति । वीरो दृप्तोऽभिमानी च नेदृशं मृत्युमर्हति ।
रणेषु कदनं कृत्वा ज्ञातिभिः परिवारितः । तीक्ष्णैः शस्त्रैरभिक्लिष्टः क्षत्त्रियो मृत्युमर्हति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शूरो हि काममन्युभ्यामाविष्टो युध्यते भृशं। हन्यमानानि गात्राणि परैर्नैवावबुध्यते।
स संख्ये निधनं प्राप्य प्रशस्तं लोकपूजितं। स्वधर्म्मं विपुलं प्राप्य शक्रस्यैति सलोकतां। ३६१०
सर्व्वोपायैरणमुखमातिष्ठंस्त्यक्तजीवितः। प्राप्नोतीन्द्रस्य सालोक्यं शूरः पृष्ठमदर्शयन्।
यत्र यत्र हतः शूरः शत्रुभिः परिवारितः। अक्षयान् लभते लोकान् यदि दैन्यं न सेवते।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्तनवतोऽध्यायः॥ ९७॥

॥ युधिष्ठिर उवाच॥ के लोका युध्यमानानां शूराणामनिवर्त्तिनां। भवन्ति निधनं प्राप्य तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। अम्बरीषस्य संवादमिन्द्रस्य च युधिष्ठिर।
अम्बरीषो हि नाभागिः स्वर्गं गत्वा सुदुर्लभं। ददर्श सुरलोकस्थं शक्रेण सचिवं सह। ३६१५
सर्व्वतेजोमयं दिव्यं विमानवरमास्थितं। उपर्य्युपरि गच्छन्तं स्वं वै सेनापतिं प्रभुं।
स दृष्ट्वा परिगच्छन्तं सेनापतिमुदारधीः। ऋद्धिं दृष्ट्वा सुदेवस्य विस्मितः प्राह वासवं।
॥ अम्बरीष उवाच॥ सागरान्तां महीं कृत्स्नामनुशास्य यथाविधि। चातुर्व्वर्ण्ये यथाशास्त्रं प्रवृत्तो धर्म्मकाम्यया।
ब्रह्मचर्य्येण घोरेण गुर्व्वाचारेण सेवया। वेदानधीत्य धर्म्मेण राजशास्त्रञ्च केवलं।
अतिथीनन्नपानेन पितॄंश्च स्वधया तथा। ऋषीन् स्वाध्यायदीक्षाभिर्द्देवान् यज्ञैरनुत्तमैः। ३६२०
क्षत्रधर्म्मस्थितो भूत्वा यथाशास्त्रं यथाविधि। उदीक्षमाणः पृतनां जयामि युधि वासव।
देवराज सुदेवोऽयं मम सेनापतिः पुरा। आसीद्योधः प्रशान्तात्मा सोऽयं कस्मादतीव मां।
॥ इन्द्र उवाच॥ एतस्य विततस्तात सुदेवस्य बभूव ह। सङ्ग्रामयज्ञः सुमहान् यश्चान्यो युध्यते नरः।
सन्नद्धो दीक्षितः सर्व्वो योधः प्राप्य चमूमुखं। युद्धयज्ञाधिकारस्थो भवतीति विनिश्चयः।
॥ अम्बरीष उवाच ॥ कानि यज्ञे हवींष्यस्मिन् किमाज्यं का च दक्षिणा। ऋत्विजश्चात्र के प्रोक्तास्तन्मे ब्रूहि शत
क्रतो। ३६२५
॥ इन्द्र उवाच॥ ऋत्विजः कुञ्जरास्तत्र वाजिनोऽध्वर्य्यवस्तथा। हवींषि परमांसानि रुधिरं त्वाज्यमुच्यते।
शृगालगृध्रकाकोलाः सदस्यास्तत्र पक्षिणः। आज्यशेषं पिवन्त्येते हविः प्राश्नन्ति चाध्वरे।
प्रासतोमरसङ्घाताः खड्गशक्तिपरश्वधाः। ज्वलन्तो निशिताः पीताः स्रुचस्तस्याथ सत्रिणः।
चापवेगायतस्तीक्ष्णः परकायावभेदनः। ऋजुः सुनिशितः पीतः सायकश्च स्रुवो महान्।
द्वीपिचर्म्मावनद्धश्च नागदन्तकृतत्सरुः। हस्तिहस्तहरः खड्गः स्फिग्भवेत्तस्य संयुगे। ३६३०
ज्वलितैर्निशितैः प्रासशक्त्यृष्टिसपरश्वधैः। शैक्यायसमयैस्तीक्ष्णैरभिघातो भवेद्वसु।
सङ्ग्रामसमयविस्तीर्णमभिजातोद्भवं बहु। आवेगाद्यच्च रुधिरं सङ्ग्रामे स्रवते भुवि।
साऽस्य पूर्णाहुतिर्होमे समृद्धा सर्व्वकामधुक्। छिन्धि भिन्धीत्ययं शब्दः श्रूयते वाहिनीमुखे।
सामानि सामगास्तस्य गायन्ति यमसादने। हविर्द्धानन्तु तस्याहुः परेषां वाहिनीमुखं।
कुञ्जराणां हयानाञ्च वर्म्मिणाञ्च समुच्चयः। अग्निः श्येनचितो नाम स च यज्ञे विधीयते। ३६३५
उत्तिष्ठते कबन्धोऽत्र सहस्रे निहते तु यः। स यूपस्तस्य शूरस्य खादिरोऽष्टास्रिरुच्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इडोपहूताः क्रोशन्ति कुञ्जराखङ्कुशेरिताः। व्याघुष्टतलनादेन वषट्कारेण पार्थिव।
उद्गाता तत्र सङ्ग्रामे त्रिसामा दुन्दुभिर्नृप। ब्रह्मस्वे ह्रियमाणे तु त्यक्त्वा युद्धे प्रियां तनुं।
आत्मानं यूपमुत्सृज्य स यज्ञोऽनन्तदक्षिणः। भर्त्तुरर्थे च यः शूरो विक्रमेद्वाहिनीमुखे।
न भयाद्विनिवर्त्तेत तस्य लोका यथा मम। नीलचर्म्मावृतैः खड्गैर्बाहुभिः परिघोपमैः। ३६४०
यस्य वेदिरुपस्तीर्णा तस्य लोका यथा मम। यस्य नापेक्षते किञ्चित् सहायं विजयस्थितः।
विगाह्य वाहिनीमध्यं तस्य लोका यथा मम। यस्य शोणितसङ्घाता भेरीमण्डूककच्छपा।
वीरास्थिशर्करा दुर्गा मांसशोणितकर्द्दमा। असिचर्म्मप्लवा घोरा केशशैवलशाद्वला।
अश्वनागरथैश्चैव सञ्छिन्नैः कृतसंक्रमा। पताकाध्वजवानीरा हतवारणवाहिनी।
शोणितोदा सुसंपूर्णा दुस्तरा पारगैर्नरैः। हतनागमहानक्रा परलोकवहा शिवा। ३६४५
ऋष्टिखड्गमहानौका गृध्रकङ्कवलप्लवा। पुरुषादानुचरिता भीरूणां कश्मलावहा।
नदी योधस्य सङ्ग्रामे तदस्यावभृथं स्मृतं। वेदी यस्य त्वमित्राणां शिरोभिश्च प्रकीर्य्यते।
अश्वस्कन्धैर्गजस्कन्धैस्तस्य लोका यथा मम। पत्नीशाला कृता यस्य परेषां वाहिनीमुखं।
हविर्द्धानं स्ववाहिन्यास्तदस्याहुर्म्मनीषिणः। सदस्या दक्षिणा योधा आग्नीध्रश्चोत्तरां दिशं।
शत्रुसेनाकलत्रस्य सर्व्वलोकानदूरतः। यदा तूभयतो व्यूहे भवत्याकाशमग्रतः। ३६५०
साऽस्य वेदिस्तदा यज्ञैर्नित्यं वेदास्त्रयोऽग्नयः। यस्तु योधः परावृत्तः सन्त्रस्तो हन्यते परैः।
अप्रतिष्ठः स नरकं याति नास्त्यत्र संशयः। यस्य शोणितवेगेन वेदिः स्यात् सम्परिप्लुता।
केशमांसास्थिसंपूर्णा स गच्छेत् परमां गतिं। यस्तु सेनापतिं हत्वा तद्यानमधिरोहति।
स विष्णुविक्रमक्रामी वृहस्पतिसमः प्रभुः। नायकं तत्कुमारं वा यो वा स्यात्तत्र पूजितः।
जीवग्राहं प्रगृह्णाति तस्य लोका यथा मम। आहवे तु हतं शूरं न शोचेत कथञ्चन। ३६५५
अशोच्यो हि हतः शूरः स्वर्गलोके महीयते। न ह्यन्नं नोदकं तस्य न स्नानं नाप्यशौचकं।
हतस्य कर्त्तुमिच्छन्ति तस्य लोकान् शृणुष्व मे। वराप्सरःसहस्राणि शूरमायोधने हतं।
त्वरमाणाऽभिधावन्ति मम भर्त्ता भवेदिति। एतत्तपश्च पुण्यञ्च धर्म्मश्चैव सनातनः।
चत्वारश्चाश्रमास्तस्य यो युद्धमनुपालयेत्। वृद्धबालौ न हन्तव्यौ न च स्त्री नैव पृष्ठतः।
तृणपूर्णमुखश्चैव तवास्मीति च यो वदेत्। जम्भं वृत्रं बलं पाकं शतमायं विरोचनं। ३६६०
दुर्व्वार्य्यञ्चैव नमुचिं नैकमायञ्च शम्बरं। विप्रचित्तञ्च दैतेयं दनोः पुत्त्रांश्च सर्व्वशः।
प्रह्लादञ्च निहत्याजौ ततो देवाधिपोऽभवं।
॥ भीष्म उवाच ॥ इत्येतत् शक्रवचनं निशम्य प्रतिगृह्य च। योधानामात्मनः सिद्धिमम्बरीषोऽभिपन्नवान्।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अष्टनवतोऽध्यायः॥ ९८॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। प्रतर्द्दनो मैथिलश्च सङ्ग्रामं यत्र चक्रतुः।
यज्ञोपवीती सङ्ग्रामे जनको मैथिलो यथा। योधानुद्धर्षयामास तन्निबोध युधिष्ठिर। ३६६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित्। योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च।
अभीरूणामिमे लोका भास्वन्तो हन्त पश्यत। पूर्णा गन्धर्व्वकन्याभिः सर्व्वकामदुहो ऽव्ययाः।
इमे पलायमानानां नरकाः प्रत्युपस्थिताः। अकीर्त्तिः शाश्वती चैव पतितव्यमनन्तरं।
तान् दृष्ट्वाऽरीन् विजयत भूत्वा सन्त्यागबुद्धयः। नरकस्याप्रतिष्ठस्य मा भूत वशवर्त्तिनः।
त्यागमूलं हि शूराणां स्वर्गद्वारमनुत्तमं। इत्युक्तास्ते नृपतिना योधाः परपुरञ्जय। ३६७०
अजयन्त रणे शत्रून् हर्षयन्तो नरेश्वरं। तस्मादात्मवता नित्यं स्थातव्यं रणमूर्द्धनि।
गजानां रथिनो मध्ये रथानामनुसादिनः। सादिनामन्तरे स्थाप्यं पादातमपि दंशितं।
य एवं व्यूहते राजा स नित्यं जयति द्विषः। तस्मादेवं विधातव्यं नित्यमेव युधिष्ठिर।
सर्व्वे स्वर्गतिमिच्छन्ति सुयुद्धेनातिमन्यवः। क्षोभयेयुरनीकानि सागरं मकरा यथा।
हर्षयेयुर्व्विषण्णांश्च व्यवस्थाप्य परस्परं। जिताञ्च भूमिं रक्षेत भग्नान्नात्यनुसारयेत्। ३६७५
पुनरावर्त्तमानानां निराशानाञ्च जीविते। वेगः सुदुःसहो राजंस्तस्मान्नात्यनुसारयेत्।
न हि प्रहर्त्तुमिच्छन्ति शूराः प्रद्रवतो भृशं। तस्मात् पलायमानानां कुर्य्यान्नात्यनुसारणं।
चराणामचरा ह्यन्नमदंष्ट्रा दंष्ट्रिणामपि। आपः पिपासतामन्नमन्नं शूरस्य कातराः।
समानपृष्ठोदरपाणिपादाः पराभवं भीरवो वै व्रजन्ति। अतो भयार्त्ताः प्रणिपत्य भूयः कृताञ्जलीनुपतिष्ठन्ति
शूरान्।
शूरबाहुषु लोकोऽयं लम्बते पुत्त्रवत् सदा। तस्मात् सर्व्वास्ववस्थासु शूरः सम्मानमर्हति। ३६८०
न हि शौर्य्यात् परं किञ्चित्त्रिषु लोकेषु विद्यते। शूरः सर्व्वं पालयति सर्व्वं शूरे प्रतिष्ठितं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि नवनवतोऽध्यायः॥ ९९ ॥
॥ युधिष्ठिर उवाच ॥ यथा जयार्थिनः सेनां नयन्ति भरतर्षभ। ईषद्धर्म्मं प्रपीड्यापि तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच ॥ सत्येन हि स्थितो धर्म्म उपपत्त्या तथाऽपरे। साध्वाचारतया केचित्तथैवौपयिकादपि।
उपायधर्म्मान् वक्ष्यामि सिद्धार्थानर्थधर्म्मयोः। निर्म्मर्य्यादा दस्यवस्तु भवन्ति परिपन्थिनः।
तेषां प्रतिविघातार्थं प्रवक्ष्याम्यथ नैगमं। कार्य्याणां सर्व्वसिद्ध्यर्थं तानुपायान्निबोध मे। ३६८५
उभे प्रज्ञे वेदितव्ये ऋज्वी वक्रा च भारत। जानन् वक्रां न सेवेत प्रतिबाधेत चागतान्।
अमित्रा एव राजानं भेदेनोपचरन्त्युत। तां राजा निकृतिं जानन् यथा मित्रान् प्रबाधते।
गजानां पार्श्वचर्म्माणि गोवृषाजगराणि च। शल्यकण्टकलोहानि तनुत्रचमराणि च।
सितपीतानि शस्त्राणि सन्नाहाः पीतलोहिताः। नानारञ्जनरक्ताः स्युः पताकाः केतवश्च ह।
ऋष्टयस्तोमराः खड्गा निशितास्च परश्वधाः। फलकान्यथ चर्म्माणि प्रतिकल्प्यान्यनेकशः। ३६९०
अभिनीतानि शस्त्राणि योधाश्च कृतनिश्चयाः। चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते।
पक्वशस्या हि पृथिवी भवत्यम्बुमती तदा। नैवातिशीतो नात्युष्णः कालो भवति भारत।
तस्मात्तदा योजयेत परेषां व्यसनेऽथ वा। एते हि योगाः सेनायाः प्रशस्ताः परबाधने।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जलवांस्तृणवान्मार्गः समो गम्यः प्रशस्यते । चारैः सुविदिताभ्यासः कुशलैर्वनगोचरैः ।
न ह्यरण्येन शक्येत गन्तुं मृगगणैरिव । तस्मात् सेनासु तानेव योजयन्ति जयार्थिनः । ३६९५
अग्रतः पुरुषानीकं शक्तञ्चापि कुलोद्गतं । आवासस्तोयवान् दुर्गं एकमार्गः प्रशस्यते ।
परेषामुपसर्प्याणां प्रतिषेधस्तथा भवेत् । आकाशात्तु वनाभ्यासं मन्यन्ते गुणवत्तरं ।
बहुभिर्गुणजातैश्च ये युद्धकुशला जनाः । उपन्यासो भवेत्तत्र बलानां नातिदूरतः ।
उपन्यासावतरणं पदातीनाञ्च गूहनं । अथ शत्रुप्रतीघातमापदर्थं परायणं ।
सप्तर्षीन् पृष्ठतः कृत्वा युध्येयुरचला इव । अनेन विधिना शत्रून् जिगीषेतापि दुर्ज्जयान् । ३७००
यतो वायुर्यतः सूर्य्यो यतः शुक्रस्ततो जयः । पूर्व्वं पूर्व्वं ज्याय एषां सन्निपाते युधिष्ठिर ।
अकर्द्दमामनुदकाममर्य्यादामलोष्टकां । अश्वभूमिं प्रशंसन्ति ये युद्धकुशला जनाः ।
अपङ्का गर्त्तरहिता रथभूमिः प्रशस्यते । नीचद्रुममहाकक्षा सोदका हस्तियोधिनां ।
बहुदुर्गा महाकक्षा वेणुवेत्रसमाकुला । पदातीनां क्षमा भूमिः पर्व्वतोपवनानि च ।
पदातिबहुला सेना दृढा भवति भारत । रथाश्वबहुला सेना सुदिनेषु प्रशस्यते । ३७०५
पदातिनागबहुला प्रावृट्काले प्रशस्यते । गणानेतान् प्रसंख्याय देशकालौ प्रयोजयेत् ।
एवं सञ्चिन्त्य यो याति तिथिनक्षत्रपूजितः । विजयं लभते नित्यं सेनां सम्यक् प्रयोजयन् ।
प्रसुप्तांस्तृषितान् श्रान्तान् विकीर्णान्नाभिघातयेत् । मोक्षे प्रयाणे चलने पानभोजनकालयोः ।
अतिक्षिप्तान् व्यतिक्षिप्तान् निहतान् प्रतनूकृतान् । अविस्रब्धान् कृतारम्भानुपन्यासान् प्रतापितान् ।
वहिश्चरानुपन्यासान् कृतवेश्मानुसारिणः । पारम्पर्य्यागते द्वारे ये केचिदनुवर्त्तिनः । ३७१०
परिचर्य्यावतो द्वारे ये च केचन वर्गिणः । अनीकं ये विभिन्दन्ति भिन्नं संस्थापयन्ति च ।
समानासनपानास्ते कार्य्या द्विगुणवेतनाः । दशाधिपतयः कार्य्याः शताधिपतयस्तथा ।
ततः सहस्राधिपतिं कुर्य्याच्छूरमतन्द्रितं । यथा मुख्यान् सन्निपात्य वक्तव्याः संशयामहे ।
विजयार्थं हि संग्रामे न त्यक्ष्यामः परस्परं । इहैव ते निवर्त्तन्तां ये च केचन भीरवः ।
ये घातयेयुः प्रवरं कुर्व्वाणास्तुमुलं प्रति । न सन्निपाते प्रदरं बधं वा कुर्य्युरीदृशाः । ३७१५
आत्मानञ्च स्वपक्षञ्च पालयन् हन्ति संयुगे । अर्थनाशो वधोऽकीर्त्तिरयशश्च पलायने ।
अमनोज्ञासुखा वाचः पुरुषस्य पलायने । प्रतिध्वस्तोष्ठदन्तस्य न्यस्तसर्व्वायुधस्य च ।
अमित्रैरवरुद्धस्य द्विषतामस्तु नः सदा । मनुष्यापसदा ह्येते ये भवन्ति पराङ्मुखाः ।
राशिवर्द्धनमात्रास्ते नैव ते प्रेत्य नो इह । अमित्रा हृष्टमनसः प्रत्युद्यान्ति पलायिनं ।
जयिनस्तु नरास्तात वन्दनैर्म्मण्डलेन च । यस्य स्वसंग्रामगता यशो वै घ्नन्ति शत्रवः । ३७२०
तदसह्यतरं दुःखमहं मन्ये बधादपि । जयं जानीत धर्म्मस्य मूलं सर्व्वसुखस्य च ।
या भीरूणां परा ग्लानिः शूरस्तामधिगच्छति । ते वयं स्वर्गमिच्छन्तः संग्रामे त्यक्तजीविताः ।
जयन्तो वध्यमाना वा प्राप्नुयाम सद्गतिं । एवं संशप्तशपथाः समभित्यक्तजीविताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अमित्रवाहिनीं वीराः प्रतियाहन्त्यभीरवः। अग्रतः पुरुषानीकमसिचर्म्मवतां भवेत्।
पृष्ठतः शकटानीकं कलत्रं मध्यतस्तथा। परेषाम्प्रतिघातार्थं पदातीनाञ्च गूहनं। १०२५
अपि तस्मिन् पुरे वृद्धा भवेयुर्ये पुरोगमाः। ये पुरस्तादभिमताः सत्त्ववन्तो मनस्विनः।
ते पूर्व्वमभिवर्त्तेरंस्तैताननेवेतरे जनाः। अपि चोद्धर्षणं कार्य्यं भीरूणामपि यत्नतः।
स्कन्धदर्शनमात्रात्तु तिष्ठेयुर्व्वा समीपतः। संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूचीमुखमनीकं स्यादल्पानां बहुभिः सह। सम्प्रयुक्ते निकृष्टे वा सत्यं वा यदि वाऽनृतं।
प्रगृह्य बाहून् क्रोशेत भग्ना भग्नाः परे इति।आगतं मे मित्रबलं प्रहरध्वमभीतवत्। १०३०
सत्त्ववन्तो ऽभिबाधेयुः कुर्व्वन्तो भैरवान्रवान्। क्ष्वेडा किलकिलाः शब्दाः क्रकचा गोविषाणिकाः।
भेरीमृदङ्गपणवान्नादयेयुः पुरस्सरान्।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि शततमोऽध्यायः॥ १०० ॥

॥ युधिष्ठिर उवाच ॥ किंशीलाः किंसमाचाराः कथंरूपाश्च भारत। किंसन्नाहाः कथंशस्त्रा जनाः स्युः सङ्गरे क्षमाः।
॥ भीष्म उवाच ॥ यथा चरितमेवात्र शस्त्रं पत्रं विधीयते। आचरन् वीरपुरुषस्तथा कर्म्मसु वर्त्तते।
गान्धाराः सिन्धुसौवीरा नखरप्रासयोधिनः। अभीरवः सुबलिनस्तद्बलं सर्व्वपारगं। १०३५
सर्व्वशस्त्रेषु कुशलाः सत्त्ववन्तो ह्युशीनराः। प्राच्या मातङ्गयुद्धेषु कुशलाः कूटयोधिनः।
तथा यवनकाम्बोजा मधुरामभितश्च ये। एते नियुद्धकुशला दाक्षिणात्याऽसिपाणयः।
सर्व्वत्र शूरा जायन्ते महासत्त्वा महाबलाः। प्राय एव समुद्दिष्टा लक्षणानि तु मे शृणु।
सिंहशार्दूलवाङ्नेत्राः सिंहशार्दूलगामिनः। पारावतकुलिङ्गाक्षाः सर्व्वे शूराः प्रमाथिनः।
मृगस्वरा द्वीपिनेत्रा ऋषभाक्षास्तरस्विनः। प्रमादिनश्च मन्दाश्च क्रोधनाः किङ्किणीस्वनाः। १०४०
मेघस्वनाः क्रोधमुखाः केचित् करभसन्निभाः। जिह्मनासाग्रजिह्वाश्च दूरगा दूरपातिनः।
विडालकुब्जतनवस्तनुकेशास्तनुत्वचः। शीघ्राश्चपलवृत्ताश्च ते भवन्ति दुरासदाः।
गोधानिमीलिताः केचिन्मृदुप्रकृतयस्तथा। तुरङ्गगतिनिर्घोषास्ते नराः पारयिष्णवः।
सुसंहताः सुतनवो व्यूढोरस्काः सुसंस्थिताः। प्रवादितेषु कुप्यन्ति हृष्यन्ति कलहेषु च।
गम्भीराक्षा निःसृताक्षाः पिङ्गाक्षा भ्रुकुटीमुखाः। नकुलाक्षास्तथा चैव सर्व्वे शूरास्तनुत्यजः। १०४५
जिह्माक्षाः प्रललाटाश्च निर्म्मांसहनवोऽपि च। वज्रबाहङ्गुलीचक्राः कृशा धमनिसन्तताः।
प्रविशन्ति च वेगेन साम्पराये ह्युपस्थिते। वारणा इव संमत्तास्ते भवन्ति दुरासदाः।
दीप्तस्फुटितकेशान्ताः स्थूलपार्श्वहनूमुखाः। उन्नतांसाः पृथुग्रीवा विकटाः स्थूलपिण्डकाः।
उद्धृता इव सुग्रीवा विनता विहगा इव। पिण्डशीर्षाऽतिवक्त्राश्च वृषदंशमुखास्तथा।
उग्रस्वरा मन्युमन्तो युद्धेष्वारावसारिणः। अधर्म्मज्ञाऽवलिप्ताश्च घोरा रौद्रप्रदर्शनाः। १०५०
त्यक्तात्मानः सर्व्व एते अन्त्यजा ह्यनिवर्त्तिनः। पुरस्कार्य्याः सदा सैन्ये हन्यन्ते घ्नन्ति चाप्रिये।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अधार्म्मिका भिन्नवृत्ताः सान्त्वेनैषां पराभवः । एवमेव प्रकुप्यन्ति राज्ञोऽप्येते ह्यभीक्ष्णशः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि विजिगीषमाणवृत्ते एकाधिकशततोऽध्यायः ॥ १०१ ॥

॥ युधिष्ठिर उवाच ॥ जयिष्याः कानि रूपाणि भवन्ति भरतर्षभ । पृतनायाः प्रशस्तानि तानि चेच्छामि वेदितुं ।

॥ भीष्म उवाच ॥ जयिन्या यानि रूपाणि भवन्ति भरतर्षभ । पृतनायाः प्रशस्तानि तानि वक्ष्यामि सर्व्वशः ।

दैवे पूर्व्वं प्रकुपिते मानुषे कालचोदिते । तद्विद्वांसोऽनुपश्यन्ति ज्ञानदिव्येन चक्षुषा । ३७५५

प्रायश्चित्तविधिञ्चात्र जपहोमांश्च तद्विदः । मङ्गलानि च कुर्व्वन्ति शमयन्त्यहितानि च ।

उदीर्णमनसो योधा वाहनानि च भारत । यस्यां भवन्ति सेनायां ध्रुवं तस्यां परो जयः ।

अन्वेतान् वायवो वान्ति तथैवेन्द्रधनूंषि च । अनुप्लवन्ते मेघाश्च तथादित्यस्य रश्मयः ।

गोमायवश्चानुकूला बलगृध्राश्च सर्व्वशः । अर्हयेयुर्यदा सेनां तदा सिद्धिरनुत्तमा ।

प्रसन्नभाः पावकस्योर्द्ध्वरश्मिः प्रदक्षिणावर्त्तशिखो विधूमः । पुण्या गन्धाश्चाहुतानां भवन्ति जयस्यैतद्भाविनो रूप
माहुः । ३७६०

गम्भीरशब्दाश्च महास्वनाश्च शङ्खाश्च भेर्य्यश्च नदन्ति यत्र । युयुत्सवश्चाप्रतीपा भवन्ति जयस्यैतद्भाविनो रूपमाहुः ।

इष्टा मृगाः पृष्ठतो वामतश्च सम्प्रस्थितानाञ्च गमिष्यताञ्च । जिघांसतां दक्षिणाः सिद्धिमाहुर्ये लग्रतस्ते प्रतिषेधयन्ति ।

माङ्गल्यशब्दान् शकुना वदन्ति हंसाः क्रौञ्चाः शतपत्राश्च भासाः । हृष्टा योधाः सत्त्ववन्तो भवन्ति जयस्यैतद्भाविनो
रूपमाहुः ।

शस्त्रैर्यन्त्रैः कवचैः केतुभिश्च सुभानुभिर्मुखवर्णैश्च यूनां । भ्राजिष्मती दुष्प्रतिवीक्षणीया येषां चमूस्तेऽभिभवन्ति शत्रून् ।

शुश्रूषवश्चानभिमानिनश्च परस्परं सौहृदमास्थिताश्च । येषां योधाः शौचमनुष्ठिताश्च जयस्यैतद्भाविनो रूप
माहुः । ३७६५

शब्दाः स्पर्शास्तथा गन्धा विचरन्ति मनःप्रियाः । धैर्य्यञ्च विशते योधान् विजयस्य मुखञ्च तत् ।

इष्टो वामः प्रविष्टस्य दक्षिणः प्रविविक्षतः । पश्चात् संसाधयत्यर्थं पुरस्ताच्च निषेधति ।

सम्भृत्य महतीं सेनां चतुरङ्गां युधिष्ठिर । साम्नैव वर्त्तयेः पूर्व्वं प्रयतेथास्ततो युधि ।

जघन्य एष विजयो यद्युद्धं नाम भारत । यादृच्छिको युधि जयो दैवो वेति विचारणं ।

अपामिव महावेगस्त्रस्ता इव महामृगाः । दुर्न्निवार्य्यतमा चैव प्रभग्ना महती चमूः । ३७७०

भग्ना इत्येव भज्यन्ते विद्वांसोऽपि न कारणं । उदारसारा महती रुरुसङ्घोपमा चमूः ।

परस्परज्ञाः संहृष्टास्त्यक्तप्राणाः सुनिश्चिताः । अपि पञ्चाशतं शूरा मृद्नन्ति परवाहिनीं ।

अपि वा पञ्च षट् सप्त संहताः कृतनिश्चयाः । कुलीनाः पूजिताः सम्यग्विजयन्तीह शात्रवान् ।

सन्निपातो न मन्तव्यः शक्ये सति कथञ्चन । सान्त्वभेदप्रदानानां युद्धमुत्तरमुच्यते ।

सन्दर्शनेनैव सेनाया भयं भीरून् प्रबाधते । वज्रादिव प्रज्वलितादियं क्व नु पतिष्यति । ३७७५

अभिप्रयातां समितिं ज्ञात्वा ये प्रतियान्त्यथ । तेषां स्यन्दन्ति गात्राणि योधानां विजयस्य च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विषयो व्यथते राजन् सर्व्वः स्थाणुजङ्गमः । अस्त्रप्रतापतप्तानां मज्जा सीदति देहिनां ।
तेषां सान्त्वं क्रूरमिश्रं प्रणेतव्यं पुनः पुनः । सम्पीड्यमाना हि परैर्योगमायान्ति सर्व्वतः ।
आन्तराणाञ्च भेदार्थं चरानभ्यवचारयेत् । यश्च तस्मात् परो राजा तेन सन्धिः प्रशस्यते ।
न हि तस्यान्यथा पीडा शक्या कर्त्तुं तथाविधा । यथा सार्द्धममित्रेण सर्व्वतः प्रतिबाधनं । ३७८०
क्षमा वै साधुमायाति न ह्यसाधुं क्षमा सदा । क्षमायाश्चाक्षमायाश्च पार्थ विद्धि प्रयोजनं ।
विजित्य क्षममाणस्य यशो राज्ञो विवर्द्धते । महापराधे ह्यप्यस्मिन् विश्वसन्त्यपि शत्रवः ।
मन्यते कर्षयित्वा तु क्षमा साध्वीति शम्बरः । असन्तप्तन्तु यद्दारु प्रत्येति प्रकृतिं पुनः ।
नैतत् प्रशंसन्त्याचार्य्या न तु साधुनिदर्शनं । अक्रोधेनाविनाशेन नियन्तव्याः स्वपुत्त्रवत् ।
द्वेष्यो भवति भूतानामुग्रो राजा युधिष्ठिर । मृदुमथवमन्यन्ते तस्मादुभयमाचरेत् । ३७८५
प्रहरिष्यन् प्रियं ब्रूयात् प्रहरन्नपि भारत । प्रहृत्य च कृपायीत शोचन्निव रुदन्निव ।
न मे प्रियं यन्निहताः संग्रामे मामकैर्नरैः । न च कुर्व्वन्ति मे वाक्यमुच्यमानाः पुनः पुनः ।
अहो जीवितमाकाङ्क्षे नेदृशो वधमर्हति । सुदुर्लभाः सुपुरुषाः सङ्ग्रामेष्वपलायिनः ।
कृतं ममाप्रियं तेन येनायं निहतो मृधे । इति वाचा वदन् हन्तॄन् पूजयेत रहोगतः ।
हन्तॄणामाहतानाञ्च यत् कुर्य्युरपराधिनः । क्रोशेद्बाहुं प्रगृह्यापि चिकीर्षन् जनसंग्रहं । ३७९०
एवं सर्व्वास्ववस्थासु सान्त्वपूर्व्वं समाचरेत् । प्रियो भवति भूतानां धर्म्मज्ञो वीतभीर्नृपः ।
विश्वासञ्चात्र गच्छन्ति सर्व्वभूतानि भारत । विश्वस्तः शक्यते भोक्तुं यथाकाममुपस्थितः ।
तस्माद्विश्वासयेद्राजा सर्व्वभूतान्यमायया । सर्व्वतः परिरक्षेच्च यो महीं भोक्तुमिच्छति ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सेनानीतिकथने द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
॥ युधिष्ठिर उवाच ॥ कथं मृदौ कथं तीक्ष्णे महापक्षे च पार्थिव । आदौ वर्त्तेत नृपतिस्तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । बृहस्पतेश्च संवादमिन्द्रस्य च युधिष्ठिर । ३७९५
बृहस्पतिं देवपतिरभिवाद्य कृताञ्जलिः । उपसङ्गम्य पप्रच्छ वासवः परवीरहा ।
॥ इन्द्र उवाच ॥ अहितेषु कथं ब्रह्मन् प्रवर्त्तेयमतन्द्रितः । असमुच्छिद्य चैवैतान्नियच्छेयमुपायतः ।
सेनयोर्व्यतिषङ्गेण जयः साधारणो भवेत् । किं कुर्व्वाणं न मां जह्यात् ज्वलिता श्रीः प्रतापिनी ।
ततो धर्म्मार्थकामानां कुशलः प्रतिभानवान् । राजधर्म्मविधानज्ञः प्रत्युवाच पुरन्दरं ।
॥ बृहस्पतिरुवाच ॥ न जातु कलहेनेच्छेन्नियन्तुमपकारिणः । बालैरासेवितं ह्येतद्यदमर्षो यदक्षमा । ३८००
न शत्रुर्व्विवृतः कार्य्यो वधमस्याभिकाङ्क्षता । क्रोधं भयञ्च हर्षञ्च नियम्य स्वयमात्मनि ।
अमित्रमुपसेवेत विश्वस्तवदविश्वसन् । प्रियमेव वदेन्नित्यं नाप्रियं किञ्चिदाचरेत् ।
विरमेच्छुष्कवैरेभ्यः कण्ठायासांश्च वर्ज्जयेत् । यथा वैतंसिको युक्तो द्विजानां सदृशस्वनः ।
तान् द्विजान् कुरुते वश्यांस्तथा युक्तो महीपतिः । वशञ्चोपनयेच्छत्रून्निहन्याच्च पुरन्दर ।
न नित्यं परिभूयारीन् सुखं स्वपिति वासव । जागर्त्त्येव हि दुष्टात्मा सङ्करेऽग्निरिवोत्थितः । ३८०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jagaon

न सन्निपातः कर्त्तव्यः सामान्ये विजये सति । विश्वास्यैवोपसन्नार्थो वशे कृत्वा प्रियः प्रभो ।
सम्प्रधार्य्य सहामात्यैर्म्मन्त्रविद्भिर्म्महात्मभिः । उपेक्ष्यमाणोऽवज्ञातो हृदयेनापराजितः ।
अथास्य प्रहरेत् काले किञ्चिद्विचलिते पदे । दण्डञ्च दूषयेदस्य पुरुषैराप्तकारिभिः ।
आदिमध्यावसानज्ञः प्रच्छन्नञ्च विधारयेत् । बलानि दूषयेदस्य जानन्नेव प्रमाणतः ।
भेदेनोपप्रदानेन संसृजेदौषधैस्तथा । न त्वेवं खलु संसर्गं रोचयेदरिभिः सह ।
दीर्घकालमपीक्षेत निहन्यादेव शात्रवान् । कालाकाङ्क्षी हि क्षपयेद्यथा विश्रम्भमाप्नुयुः ।
न सद्यान् विनिहन्याच्च द्रष्टव्यो विजयो ध्रुवः । न शल्यं वा घटयति न वाचा कुरुते व्रणं ।
प्राप्ते च प्रहरेत् काले न च संवर्त्तते पुनः । हन्तुकामस्य देवेन्द्र पुरुषस्य रिपून् प्रति ।
यो हि कालो व्यतिक्रामेत् पुरुषं कालकाङ्क्षिणं । दुर्लभः स पुनस्तेन कालः कर्म्म चिकीर्षुणा ।
ओजश्च विनयेदेव संगृह्णन् साधुसम्मतं । अकाले साधयेन्मित्रं न च प्राप्ते प्रपीडयेत् ।
विहाय कामं क्रोधञ्च तथाऽहङ्कारमेव च । युक्तो विवरमन्विच्छेदहितानां पुनः पुनः ।
मार्द्दवं दण्ड आलस्यं प्रमादश्च सुरोत्तम । मायाः सुविहिताः शक्र सादयन्त्यविचक्षणं ।
निहत्यैतानि चत्वारि मायां प्रतिविहाय च । ततः शक्नोति शत्रूणां प्रहर्त्तुमविचारयन् ।
यदेवैकेन शक्येत गुह्यं कर्त्तुं तदाचरेत् । यच्छन्ति सचिवा गुह्यं मिथो विश्रावयन्त्यपि ।
अशक्यमिति कृत्वा वा ततोऽन्यैः संविदञ्चरेत् । ब्रह्मदण्डमदृष्टेषु दृष्टेषु चतुरङ्गिणीं ।
भेदञ्च प्रथमं युञ्ज्यात्तूष्णीमपि तथैव च । काले प्रयोजयेद्राजा तस्मिंस्तस्मिंस्तदा तदा ।
प्रणिपातञ्च गच्छेत काले शत्रोर्ब्बलीयसः । युक्तोऽस्य बधमन्विच्छेदप्रमत्तः प्रमाद्यतः ।
प्रणिपातेन दानेन वाचा मधुरया ब्रुवन् । अमित्रमपि सेवेत न च जातु विशङ्कयेत् ।
स्थानानि शङ्कितानाञ्च नित्यमेव विवर्ज्जयेत् । न च तेष्वाश्वसेद्राजा जाग्रतीह निराकृताः ।
न ह्यतो दुष्करं कर्म्म किञ्चिदस्ति सुरोत्तम । यथा विविधवृत्तानामैश्वर्य्यममराधिप ।
तथा विविधशीलानामपि सम्भव उच्यते । यतते योगमास्थाय मित्रामित्रं विचारयेत् ।
मृदुमप्यवमन्यन्ते तीक्ष्णादुद्विजते जनः । मा तीक्ष्णो मा मृदुर्भूस्त्वं तीक्ष्णो भव मृदुर्भव ।
यथा वप्रे वेगवति सर्व्वतः संप्लुतोदके । नित्यं विवरणाद्बाधस्तथा राज्यं प्रमाद्यतः ।
न बहूनभियुञ्जीत यौगपद्येन शात्रवान् । साम्ना दानेन भेदेन दण्डेन च पुरन्दर ।
एकैकमेषां निष्पिष्य शिष्टेषु निपुणश्चरेत् । न तु शक्तोऽपि मेधावी सर्व्वानेवारभेन्नृप ।
यदा स्यान्महती सेना हयनागरथाकुला । पदातियन्त्रबहुला अनुरक्ता षडङ्गिनी ।
यदा बहुविधां वृद्धिं मन्येत प्रतिलोमतः । तदा विवृत्य प्रहरेद्दस्यूनामविचारयन् ।
न सामदण्डोपनिषत् प्रशस्यते न मार्द्दवं शत्रुषु यात्रिकं सदा । न शस्यघातो न च सङ्करक्रिया न चापि भूयः प्रकृते
र्व्विचारणा ।
मायाविभेदानुपसर्ज्जनानि तथैव पापं न यशः प्रयोगात् । आप्तैर्म्मनुष्यैरुपचारयेत पुरेषु राष्ट्रेषु च सम्प्रयुक्तान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पुराणि चैषामनुसृत्य भूमिपाः पुरेषु भोगानखिलान् जयन्ति। पुरेषु नीतिं विहितां यथाविधि प्रयोजयन्तो बलवृत्र सूदन । ३८३५

प्रदाय गूढानि वसूनि राजन् प्रच्छिद्य भोगानवधाय च स्वान्। दुष्टान् स्वदोषैरिति कीर्त्तयित्वा पुरेषु राष्ट्रेषु च योजयन्ति।

तथैव चान्यैरपि शास्त्रवेदिभिः स्वलङ्कृतैः शास्त्रविधानदृष्टिभिः । सुशिक्षितैर्भाष्यकथाविशारदैः पुरेषु कृत्यामुपधारयेच ।

॥ इन्द्र उवाच ॥ कानि लिङ्गानि दुष्टस्य भवन्ति द्विजसत्तम। कथं दुष्टं विजानीयामेतत् पृष्टो ब्रवीहि मे ।

॥ बृहस्पतिरुवाच ॥ परोक्षमगुणानाह सद्गुणानभ्यसूयते। परैर्व्वा कीर्त्त्यमानेषु तूष्णीमास्ते पराङ्मुखः ।

तूष्णीम्भावेऽपि विज्ञेयं न चेद्भवति कारणं। निश्वासञ्चोष्ठसन्दंशं शिरसश्च प्रकम्पनं। ३८४०

करोत्यभीक्ष्णं संसृष्टमसंसृष्टश्च भाषते। अदृष्टितो न कुरुते दृष्टो नैवाभिभाषते।

पृथगेत्य समश्नाति नेदमद्य यथाविधि। आसने शयने याने भावा लक्ष्या विशेषतः।

आर्त्तिरार्त्ते प्रिये प्रीतिरेतावन्मित्रलक्षणं। विपरीतन्तु बोद्धव्यमरिलक्षणमेव तत्।

एतान्येव यथोक्तानि बुध्येत त्रिदशाधिप। पुरुषाणां प्रदुष्टानां स्वभावो बलवत्तरः ।

इति दुष्टस्य विज्ञानमुक्तं ते सुरसत्तम । निशम्य शास्त्रतत्त्वार्थं यथावदमरेश्वर । ३८४५

॥ भीष्म उवाच ॥ स तद्वचः शत्रुनिबर्हणे रतस्तथा चकारावितथं बृहस्पतेः। चचार काले विजयाय चारिहा वशञ्च शत्रूननयत् पुरन्दरः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि इन्द्रबृहस्पतिसंवादे त्र्यधिकशततोऽध्यायः ॥ १०३ ॥

॥ युधिष्ठिर उवाच ॥ धार्म्मिकोऽर्थानसम्प्राप्य राजाऽमात्यैः प्रबाधितः। च्युतः कोषाच दण्डाच सुखमिच्छन् कथञ्चरेत।

॥ भीष्म उवाच ॥ अत्रायं क्षेमदर्शीय इतिहासोऽनुगीयते। तत्तेऽहं सम्प्रवक्ष्यामि तन्निबोध युधिष्ठिर।

क्षेमदर्शी नृपसुतो यत्र क्षीणबलः पुरा। मुनिं कालकवृक्षीयमाजगामेति नः श्रुतं।

तं पप्रच्छानुसंगृह्य कृच्छ्रामापदमास्थितः। ३८५०

॥ राजोवाच ॥ अर्थेषु भागी पुरुष ईहमानः पुनः पुनः। अलब्ध्वा मद्विधो राज्यं ब्रह्मन् किं कर्त्तुमर्हति।

अन्यत्र मरणात् स्तैन्यादन्यत्र परसंश्रयात्। क्षुद्रादन्यत्र चाचारात् तन्ममाचक्ष्व सत्तम।

व्याधिना चाभिपन्नस्य मानसेनेतरेण वा। धर्म्मज्ञस्य कृतज्ञस्य त्वद्विधः शरणं भवेत्।

निर्व्विद्यति नरः कामान्निर्व्विद्य सुखमेधते। त्यक्त्वा प्रीतिञ्च शोकञ्च लब्ध्वा बुद्धिमयं वसु।

सुखमर्थाश्रयं येषामनुशोचामि तानहं। मम ह्यर्थाः सुबहवो नष्टाः स्वप्न इवागताः। ३८५५

दुष्करं बत कुर्व्वन्ति महतोऽर्थांस्त्यजन्ति ये। वयं त्वेतान् परित्यक्तुमसतोऽपि न शक्नुमः।

इमामवस्थां सम्प्राप्तं दीनमार्त्तं श्रिया च्युतं। यदन्यत् सुखमस्तीह तद्ब्रह्मन्ननुशाधि मां।

कौशल्येनैवमुक्तस्तु राजपुत्त्रेण धीमता। मुनिः कालकवृक्षीयः प्रत्युवाच महाद्युतिः।

॥ मुनिरुवाच ॥ पुरस्तादेव ते बुद्धिरियं कार्य्या विजानता। अनित्यं सर्व्वमेवैतदहञ्च मम चास्ति यत्।

यत्किञ्चिन्मन्यसेऽस्तीति सर्व्वं नास्तीति विद्धि तत्। एवं न व्यथते प्राज्ञः कृच्छ्रामप्यापदं गतः। ३८६०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यद्धि भूतं भविष्यञ्च सर्व्वं तन्न भविष्यति । एवं विदितवेद्यस्त्वमधर्म्मेभ्यः प्रमोक्ष्यसे।
यच्च पूर्व्वं समाहारे यच्च पूर्व्वं परे परे। सर्व्वं तन्नास्ति ते चैव तज्ज्ञात्वा को नु सञ्ज्वरेत्।
भूत्वा च न भवत्येतदभूत्वा च भविष्यति। शोके न ह्यस्ति सामर्थ्यं शोकं कुर्य्यात् कथञ्चन।
क्व नु तेऽद्य पिता राजन् क्व नु तेऽद्य पितामहः । न त्वं पश्यसि तानद्य न त्वां पश्यन्ति तेऽपि च।
आत्मनो ऽध्रुवतां पश्य तांस्त्वं किमनुशोचसि । बुद्ध्या चैवानुबुध्यस्व ध्रुवं हि न भविष्यसि । २८६५
अहञ्च त्वञ्च नृपते सुहृदः शत्रवश्च ते। अवश्यं न भविष्यामः सर्व्वञ्च न भविष्यति।
ये तु विंशतिवर्षा वै त्रिंशद्वर्षाश्च मानवाः। अर्व्वागेव हि ते सर्व्वे मरिष्यन्ति शरच्छतात्।
अपि चेन्महतो वित्तान्न प्रमुच्येत पूरुषः। नैतन्ममेति तन्मत्वा कुर्व्वीत प्रियमात्मनः।
अनागतं यन्न ममेति विद्यादतिक्रान्तं यन्न ममेति विद्यात्। दिष्टं बलीय इति मन्यमानास्ते पण्डितास्तत् सतां स्थानमाहुः।
अनाढ्याश्चापि जीवन्ति राज्यञ्चाप्यनुशासति। बुद्धिपौरुषसम्पन्नास्त्वया तुल्याधिका जनाः। २८७०
न च त्वमिव शोचन्ति तस्मात्त्वमपि मा शुचः। किन्न त्वं तैर्नरैः श्रेयांस्तुल्यो वा बुद्धिपौरुषैः।
॥ राजोवाच ॥ यादृच्छिकं सर्व्वमासीत्तद्राज्यमिति चिन्तये। ह्रियते सर्व्वमेवेदं कालेन महता द्विज।
तस्यैव ह्रियमाणस्य स्रोतसेव तपोधन। फलमेतत् प्रपश्यामि यथालब्धेन वर्त्तयन्।
॥ मुनिरुवाच ॥ अनागतमतीतञ्च यथाऽतथ्यविनिश्चयात्। नानुशोचेत कौशल्य सर्व्वार्थेषु तथा भव।
अवाप्यान् कामयन्नर्थान्नानवाप्यान् कदाचन। प्रत्युत्पन्नाननुभवन् मा शुचस्त्वमनागतान्। २८७५
यथालब्धोपपन्नार्थैस्तथा कौशल्य रंस्यसे। कच्चिच्छुद्धस्वभावेन श्रिया हीनो न शोचसि।
पुरस्ताद्भूतपूर्व्वत्वाद्धीनभाग्यो हि दुर्म्मतिः। धातारं गर्हते नित्यं लब्धार्थांश्च न मृष्यते।
अनर्हानपि चैवान्यान्मन्यते श्रीमतो जनान्। एतस्मात् कारणादेतद्दुःखं भूयो ऽनुवर्त्तते।
ईर्ष्याभिमानसम्पन्ना राजन् पुरुषमानिनः। कच्चित्त्वन्न तथा राजन् मत्सरी कोशलाधिप।
सहस्व श्रियमन्येषां यद्यपि त्वयि नास्ति सा। अन्यत्रापि सतीं लक्ष्मीं कुशला भुञ्जते सदा। २८८०
अभिनिष्यन्दते श्रीर्हि सत्यपि द्विषतो जनं। श्रियञ्च पुत्त्रपौत्त्रञ्च मनुष्या धर्म्मचारिणः।
योगधर्म्मविदो धीराः स्वयमेव त्यजन्त्युत। बहुशङ्कुसुकं दृष्ट्वा विधित्सा धनमेवच।
तथाऽन्ये सन्त्यजन्त्येवं मत्वा परमदुर्लभं। त्वं पुनः प्राज्ञरूपः सन् कृपणं परितप्यसे।
अकाम्यान् कामयानोऽर्थान् पराधीनानुपद्रवान्। तां बुद्धिमुपजिज्ञासुस्त्वमेवैतान् परित्यज।
अनर्थांश्चार्थरूपेण ह्यर्थांश्चानर्थरूपिणः। अर्थांचैव हि केषाञ्चिद्धननाशो भवत्युत। २८८५
आनन्त्यं तत् सुखं मत्वा श्रियमन्यः परीप्सति। रममाणः श्रिया कश्चिन्नान्यच्छ्रेयोऽभिमन्यते।
तथा तस्येहमानस्य समारम्भो विनश्यति। कृच्छ्राल्लब्धमभिप्रेतं यदि कौशल्य नश्यति।
तदा निर्व्विद्यते सोऽर्थात् परिभग्नक्रमो नरः। धर्म्ममेकेऽभिपद्यन्ते कल्याणाभिजना नराः।
परत्र सुखमिच्छन्तो निर्व्विद्येयुश्च लौकिकात्। जीवितं सन्त्यजन्त्येके धनलोभपरा जनाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

न जीविताथं मन्यन्ते पुरुषा हि धनादृते। पश्य तेषां कृपणतां पश्य तेषामबुद्धितां। ३८८०
अध्रुवे जीविते मोहादर्थदृष्टिमुपाश्रिताः। सञ्चये च विनाशान्ते मरणान्ते च जीविते।
संयोगे च वियोगान्ते को नु विप्रणयेन्मनः। धनं वा पुरुषो राजन् पुरुषं वा पुनर्द्धनं।
अवश्यं प्रजहात्येव तद्विद्वान् को नु संज्वरेत्। अन्येषामपि नश्यन्ति सुहृदश्च धनानि च।
पश्य बुद्ध्या मनुष्याणां राजन्नापदमात्मनः। नियच्छ यच्छ संयच्छ इन्द्रियाणि मनो गिरं।
प्रतिषिद्धा न चाप्येषु दुर्ब्बलेष्वहितेष्वपि। प्राप्तिरुष्टेषु भावेषु व्यपकृष्टेष्वसम्भवे। ३८८५
प्रज्ञानतृप्तो विक्रान्तस्त्वद्विधो नानुशोचति। अल्पमिच्छन्न चपलो मृदुर्द्दान्तः सुनिश्चितः।
ब्रह्मचर्य्योपपन्नश्च त्वद्विधो नैव शोचति। नत्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि।
नृशंसवृत्तिं पापिष्ठां दुष्टां कापुरुषोचितां। अपि मूलफलाजीवो रमस्वैको महावने।
वाग्यतः संगृहीतात्मा सर्व्वभूतदयान्वितः। सदृशं पण्डितस्यैतदीषादन्तेन दन्तिना।
यदेको रमतेऽरण्येष्वारण्येनैव तुष्यति। महाह्रदः सङ्क्षुभित आत्मनैव प्रसीदति। ३९००
एतदेवं गतस्याहं सुखं पश्यामि जीवितुं। असम्भवे श्रियो राजन् हीनस्य सचिवादिभिः।
दैवे प्रतिनिविष्टे च किं श्रेयो मन्यते भवान्।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कालकवृचीये चतुरधिकशततोऽध्यायः॥ १०४॥
॥ मुनिरुवाच॥ अथ चेत् पौरुषं किञ्चित् चत्रियात्मनि पश्यसि। ब्रवीमि तान्तु ते नीतिं राज्यस्य प्रतिपत्तये।
ताञ्चेच्छक्नोषि निर्म्मातुं कर्म्म चैव करिष्यसि। शृणु सर्व्वमशेषेण यत्त्वां वच्यामि तत्त्वतः।
आचरिष्यसि चेत् कर्म्म महतोऽर्थानवाप्स्यसि। राज्यं राज्यस्य मन्त्रं वा महतीं वा पुनः श्रियं। ३९०५
अथैतद्रोचते राजन् पुनर्ब्रूहि ब्रवीमि ते।
॥ राजोवाच॥ ब्रवीतु भगवान्नीतिमुपपन्नोऽस्म्यहं विभो। अमोघोऽयं भवत्वद्य त्वया सह समागमः।
॥ मुनिरुवाच॥ हित्वा दम्भञ्च कामञ्च क्रोधं हर्षं भयन्तथा। अप्यमित्राणि सेवस्व प्रणिपत्य कृताञ्जलिः।
तमुत्तमेन शौचेन कर्म्मणा चाभिराधय। दातुमर्हति ते वित्तं वैदेहः सत्यसङ्गरः।
प्रमाणं सर्व्वभूतेषु प्रग्रहञ्च भविष्यसि। ततः सहायान् सोत्साहाल्लप्स्यसे व्यसनान् शुचीन्। ३९१०
वर्त्तमानः स्वशास्त्रे वै संयतात्मा जितेन्द्रियः। अभ्युद्धरति चात्मानं प्रसादयति च प्रजाः।
तेनैव त्वं धृतिमता श्रीमता चाभिसत्कृतः। प्रमाणं सर्व्वभूतेषु गत्वा प्रग्रहणं महत्।
ततः सुहृद्बलं लब्ध्वा मन्त्रयित्वा सुमन्त्रिभिः। आन्तरैर्भेदयित्वाऽरीन् विल्वं विल्वेन भेदय।
परैर्व्वा संविदं कृत्वा बलमप्यस्य घातय। अलभ्या ये शुभा भावास्त्रियश्चाच्छादनानि च।
शय्यासनानि यानानि महार्हाणि गृहाणि च। पक्षिणो मृगजातानि रसगन्धाः फलानि च। ३९१५
तेष्वेव सज्जयेथास्त्वं यथा नश्येत्स्वयं परः। यद्येवं प्रतिषेद्धव्यो यद्युपेक्षणमर्हति।
न जातु विवृतः कार्य्यः शत्रुः सुनयमिच्छता। रमस्व परमामित्रे विषये प्राज्ञसम्मतः।
भजस्व श्वेतकाकीयैर्म्मित्रधर्म्ममनर्थकैः। आरम्भांश्चास्य महतो दुस्तरांश्च प्रयोजय।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नदीवच्च विरोधांश्च बलवद्भिर्विरुध्यतां । उद्यानानि महार्हाणि शयनान्यासनानि च ।
प्रतिभोगसुखेनैव कोषमस्य विरेचय । यज्ञदाने प्रशाध्यस्मै ब्राह्मणाननुवर्ण्य तान् । ३९२०
ते त्वां प्रतिकरिष्यन्ति तं भोक्ष्यन्ति वृका इव । असंशयं पुण्यशीलः प्राप्नोति परमां गतिं ।
त्रिविष्टपे पुण्यतमं स्थानं प्राप्नोति मानवः । कोषक्षये त्वमित्राणां वशं कौशल्य गच्छति ।
उभयत्र प्रसक्तस्य धर्म्मे चाधर्म्म एव च । फलार्थमूलं व्युच्छिद्येत्तेन नन्दन्ति शत्रवः ।
न चास्मै मानुषं कर्म्म दैवमस्योपवर्णय । असंशयं दैवपरः क्षिप्रमेव विनश्यति ।
याजयैनं विश्वजिता सर्व्वस्वेन वियुज्यतां । ततो गच्छति सिद्धार्थः पीड्यमानं महाजनं । ३९२५
योगधर्म्मविदं पुण्यं किञ्चिदस्योपवर्णयेः । अपि त्यागं बुभूषेत कच्चिद्गच्छेदनामयं ।
सिद्धेनौषधियोगेन सर्व्वशत्रुविनाशिना । नागानश्वान् मनुष्यांश्च कृतकैरुपघातयेः ।
एते चान्ये च बहवो दम्भयोगाः सुचिन्तिताः । शक्या विषहताः कर्त्तुं पुरुषेण कृतात्मना ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कालकवृक्षीये पञ्चाधिकशततोऽध्यायः ॥ १०५ ॥
॥ राजोवाच ॥ न निकृत्या न दम्भेन ब्रह्मन्निच्छामि जीवितु । नाधर्म्मयुक्तानिच्छेयमर्थान् सुमहतोऽप्यहं ।
पुरस्तादेव भगवन्मयैतदपवर्ज्जितं । येन मां नाभिशङ्केत येन कृत्स्नं हितं भवेत् । ३९३०
आनृशंस्येन धर्म्मेण लोके ह्यस्मिन् जिजीविषुः । नाहमेतदलं कर्त्तुं नैतत्त्वय्युपपद्यते ।
॥ मुनिरुवाच ॥ उपपन्नस्त्वमेतेन यथा क्षत्रिय भाषसे । प्रकृत्या ह्युपपन्नोऽसि बुद्ध्या वा बहुदर्शन ।
उभयोरेव वामर्थे यतिष्ये तव तस्य च । संश्लेषं वा करिष्यामि शाश्वतं ह्यनपायिनं ।
तादृशं हि कुले जातमनृशंसं बहुश्रुतं । अमात्यं को न कुर्व्वीत राज्यप्रणयकोविदं ।
यस्त्वं प्रच्यावितो राज्याद्व्यसनञ्चोत्तमं गतः । आनृशंस्येन वृत्तेन क्षत्रियेच्छसि जीवितुं । ३९३५
आगन्ता मद्गृहे तात वैदेहः सत्यसङ्गरः । अथाहं तं नियोक्ष्यामि तत् करिष्यत्यसंशयं ।
अत आहूय वैदेहं मुनिर्व्वचनमब्रवीत् । अयं राजकुले जातो विदिताभ्यन्तरो मम ।
आदर्श इव शुद्धात्मा शारदश्चन्द्रमा यथा । नास्मिन् पश्यामि वृजिनं सर्व्वतो मे परीक्षितः ।
तेन ते सन्धिरेवास्तु विश्वसास्मिन् यथा मयि । न राज्यमनमात्येन शक्यं शास्तुमपि त्र्यहं ।
अमात्यः शूर एव स्यात् बुद्धिसम्पन्न एव वा । ताभ्याञ्चैवोभयं राजन् पश्य राज्यप्रयोजनं । ३९४०
धर्म्मात्मनां क्वचिल्लोके नान्याऽस्ति गतिरीदृशी । महात्मा राजपुत्त्रोऽयं सतां मार्गमनुष्ठितः ।
सुसंगृहीतस्त्वेवैष त्वया धर्म्मपुरोगमः । संसेव्यमानः शत्रूंस्ते गृह्णीयान्महतो गणान् ।
यद्ययं प्रतियुध्येत्त्वां स्वकर्म्म क्षत्रियस्य तत् । जिगीषमाणस्त्वां युद्धे पितृपैतामहे पदे ।
त्वञ्चापि प्रतियुध्येथा विजिगीषुव्रते स्थितः । अयुद्ध्वैव नियोगान्मे वशे कुरु हिते स्थितः ।
स त्वं धर्म्ममवेक्षस्व हित्वा लोभमसाम्प्रतं । न च कामान्न च द्रोहात् स्वधर्म्मं हातुमर्हसि । ३९४५
नैव नित्यं जयस्तात नैव नित्यं पराजयः । तस्माद्भोजयितव्यश्च भोक्तव्यश्च परो जनः ।
आत्मन्यपि च संदृश्यावुभौ जयपराजयौ । निःशेषकारिणां तात निःशेषकरणाद्भयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

इत्युक्तः प्रत्युवाचेदं वचनं ब्राह्मणर्षभं। प्रतिपूज्याभिसत्कृत्य पूजार्हमनुमान्य च।
यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महाश्रुतः। श्रेयस्कामो यथा ब्रूयादुभयोरेव तत् क्षमं
यद्यद्वचनमुक्तोऽस्मि करिष्यामि च तत्तथा। एतद्धि परमं श्रेयो न मेऽत्रास्ति विचारणा। ३९५०
ततः कौशल्यमाहूय मैथिलो वाक्यमब्रवीत्। धर्म्मतो नीतितश्चैव लोकस्य विजितो मया।
अहं त्वया चात्मगुणैर्ज्जितः पार्थिवसत्तम। आत्मानमनवज्ञाय जितवद्वर्त्ततां भवान्।
नावमन्यामि ते बुद्धिं नावमन्ये च पौरुषं। नावमन्ये जयामीति जितवद्वर्त्ततां भवान्।
यथावत् पूजितो राजन् गृहं गन्ताऽसि मे स्वयं। ततः संपूज्य तौ विप्रं विश्वस्तौ जग्मतुर्गृहान्।
वैदेहस्त्वथ कौशल्यं प्रवेश्य गृहमञ्जसा। पाद्यार्घमधुपर्कैस्तं पूजार्हं प्रत्यपूजयत्। ३९५५
ददौ दुहितरं चास्मै रत्नानि विविधानि च। एष राज्ञां परो धर्म्मोऽनित्यौ जयपराजयौ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कालकवृक्षीये षडधिकशतोऽध्यायः॥ १०६॥
॥ युधिष्ठिर उवाच॥ ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप। धर्म्मवृत्तञ्च वित्तञ्च वृत्त्युपायाः फलानि च।
राज्ञां वृत्तञ्च कोषञ्च कोषसञ्जननं जयः। अमात्यगुणवृत्तिञ्च प्रकृतीनाञ्च वर्द्धनं।
षाड्गुण्यगुणकल्पञ्च सेनावृत्तिस्तथैव च। परिज्ञानञ्च दुष्टस्य लक्षणञ्च सतामपि।
समहीनाधिकानाञ्च यथावल्लक्षणञ्च यत्। मध्यमस्य च तुष्ट्यर्थं यथा स्थेयं विवर्द्धता। ३९६०
क्षीणग्रहणवृत्तिञ्च यथा धर्म्मं प्रकीर्त्तितं। लघुना देशरूपेण ग्रन्थयोगेन भारत।
विजिगीषोस्तथा वृत्तमुक्तञ्चैव तथैव ते। गणानां वृत्तिमिच्छामि श्रोतुं मतिमताम्वर।
यथा गणाः प्रवर्द्धन्ते न भिद्यन्ते च भारत। अरींश्च विजिगीषन्ते सुहृदः प्राप्नुवन्ति च।
भेदमूलो विनाशो हि गणानामुपलक्षये। मन्त्रसंवरणं दुःखं बहूनामिति मे मतिः।
एतदिच्छाम्यहं श्रोतुं निखिलेन परन्तप। यथा च ते न भिद्येरंस्तच्च मे वद पार्थिव। ३९६५
॥ भीष्म उवाच॥ गणानाञ्च कुलानाञ्च राज्ञां भरतसत्तम। वैरसन्दीपनावेतौ लोभामर्षौ नराधिप।
लोभमेको हि वृणुते ततोऽमर्षमनन्तरं। तौ क्षयव्ययसंयुक्तावन्योन्यञ्च विनाशिनौ।
चारमन्त्रबलादानैः सामदानविभेदनैः। क्षयव्ययभयोपायैः कर्षयन्तीतरेतरं।
तत्रादानेन भिद्यन्ते गणाः संघातवृत्तयः। भिन्ना विमनसः सर्व्वे गच्छन्त्यरिवशं भयात्।
भेदे गणा विनश्युर्हि भिन्नास्तु सुजयाः परैः। तस्मात् संघातयोगेन प्रयतेरन् गणाः सदा। ३९७०
अर्थाश्चैवाधिगम्यन्ते संघातबलपौरुषैः। वाह्याश्च मैत्रीं कुर्व्वन्ति तेषु संघातवृत्तिषु।
ज्ञानवृद्धाः प्रशंसन्ति शुश्रूषन्तः परस्परं। विनिवृत्ताभिसन्धानाः सुखमेधन्ति सर्व्वशः।
धर्म्मिष्ठान् व्यवहारांश्च स्थापयन्तश्च शास्त्रतः। यथावत् प्रतिपश्यन्तो विवर्द्धन्ते गणोत्तमाः।
पुत्रान् भ्रातॄन् विगृह्णन्तो विनयन्तश्च तान् सदा। विनीतांश्च प्रगृह्णन्तो विवर्द्धन्ते गणोत्तमाः।
चारमन्त्रविधानेषु कोषसन्निचयेषु च। नित्ययुक्ता महाबाहो वर्द्धन्ते सर्व्वतो गणाः। ३९७५
प्राज्ञान् शूरान्महोत्साहान् कर्म्मसु स्थिरपौरुषान्। मानयन्तः सदा युक्ता विवर्द्धन्ते गणा नृप।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

द्रव्यवन्तश्च शूराश्च शास्त्रज्ञाः शास्त्रपारगाः । कृच्छ्रास्वापत्सु संमूढान् गणाः सन्तारयन्ति ते ।
क्रोधो भेदो भयं दण्डः कर्षणं निग्रहो बधः । नयत्यरिवशं सद्यो गणान् भरतसत्तम ।
तस्मान्मानयितव्यास्ते गणमुख्याः प्रधानतः । लोकयात्रा समायत्ता भूयसी तेषु पार्थिव ।
मन्त्रगुप्तिः प्रधानेषु चारश्चारित्रकर्षण । न गणाः कृत्स्नशो मन्त्रं श्रोतुमर्हन्ति भारत ।
गणमुख्यैस्तु सम्भूय कार्य्यं गणहितं मिथः । पृथग्गणस्य भिन्नस्य विततस्य ततोऽन्यथा ।
अर्थाः प्रत्यवसीदन्ति तथाऽनर्था भवन्ति च । तेषामन्योन्यभिन्नानां स्वशक्तिमनुतिष्ठतां ।
निग्रहः पण्डितैः कार्य्यः क्षिप्रमेव प्रधानतः । कुलेषु कलहा जाताः कुलवृद्धैरुपेक्षिताः ।
गोत्रस्य नाशं कुर्व्वन्ति गणभेदस्य कारकं । आभ्यन्तरभयं रक्ष्यमसारं वाह्यतो भयं ।
आभ्यन्तरं भयं राजन् सद्यो मूलानि कृन्तति । अकस्मात् क्रोधमोहाभ्यां लोभाद्वाऽपि स्वभावजात् ।
अन्योन्यं नाभिभाषन्ते तत् पराभवलक्षणं । जात्या च सदृशाः सर्व्वे कुलेन सदृशास्तथा ।
न चोद्योगेन बुद्ध्या वा रूपद्रव्येण वा पुनः । भेदाच्चैव प्रदानाच्च भिन्दन्ते रिपुभिर्गणाः ।
तस्मात् सङ्घातमेवाहुर्गणानां शरणं महत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सप्ताधिकशतोऽध्यायः ॥ १०७ ॥
॥ युधिष्ठिर उवाच ॥ महानयं धर्म्मपथो बहुशाखश्च भारत । किंस्विदेवेह धर्म्माणामनुष्ठेयतमं मतं ।
किं कार्य्यं सर्व्वधर्म्माणां गरीयो भवतो मतं । यथाऽहं परमं धर्म्ममिह च प्रेत्य चाप्नुयां ।
॥ भीष्म उवाच ॥ मातापित्रोर्गुरूणाञ्च पूजा बहुमता मम । इह युक्तो नरो लोकान् यशश्च महदश्नुते ।
यच्च तेऽभ्यनुजानीयुः कर्म्म तात सुपूजिताः । धर्म्माधर्म्मविरुद्धं वा तत् कर्त्तव्यं युधिष्ठिर ।
न च तैरभ्यनुज्ञातो धर्म्ममन्यं समाचरेत् । यञ्च तेऽभ्यनुजानीयुः स धर्म्म इति निश्चयः ।
एत एव त्रयो लोका एत एवाश्रमास्त्रयः । एत एव त्रयो वेदा एत एव त्रयोऽग्नयः ।
पिता वै गार्हपत्योऽग्निर्म्माताऽग्निर्दक्षिणः स्मृतः । गुरुराहवनीयस्तु साऽग्नित्रेता गरीयसी ।
त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकांश्च विजेष्यसि । पितृवृत्त्या त्विमं लोकं मातृवृत्त्या तथा परं ।
ब्रह्मलोकं गुरोर्वृत्त्या नियमेन तरिष्यसि । सम्यगेतेषु वर्त्तस्व त्रिषु लोकेषु भारत ।
यशः प्राप्स्यसि भद्रन्ते धर्म्मञ्च सुमहत्फलं । नैतानतिशयेज्जातु नात्यश्नीयान्न दूषयेत् ।
नित्यं परिचरेच्चैव तद्वै सुकृतमुत्तमं । कीर्त्तिं पुण्यं यशो लोकान् प्राप्स्यसे राजसत्तम ।
सर्व्वे तस्यादृता लोका यस्यैते त्रय आदृताः । अनादृतास्तु यस्यैते सर्व्वास्तस्याफलाः क्रियाः ।
न चायं न परो लोकस्तस्य चैव परन्तप । अमानिता नित्यमेव यस्यैते गुरवस्त्रयः ।
न चास्मिन्न परे लोके यशस्तस्य प्रकाशते । न चान्यदपि कल्याणं परत्र समुदाहृतं ।
तेभ्य एव हि यत् सर्व्वं कृत्वा च विसृजाम्यहं । तदासीन्मे शतगुणं सहस्रगुणमेव च ।
तस्मान्मे सम्प्रकाशन्ते त्रयो लोका युधिष्ठिर । दशैव तु सदाचार्य्यः श्रोत्रियानतिरिच्यते ।
दशाचार्य्यानुपाध्याय उपाध्यायान् पिता दश । पितॄन्दश तु मातैका सर्व्वां वा पृथिवीमपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

गुरुत्वेनातिभवति नास्ति मातृसमो गुरुः। गुरुर्गरीयान् पितृतो मातृतश्चेति मे मतिः।
उभौ हि मातापितरौ जन्मन्येवोपयुज्यतः। शरीरमेव सृजतः पिता माता च भारत।
आचार्य्यशिष्टा या जातिः सा दिव्या साऽजराऽमरा। अवध्या हि सदा माता पिता चाप्यपकारिणौ।
न संदुष्यति तत् कृत्वा न च ते दूषयन्ति तं। धर्म्माय यतमानानां विदुर्द्देवा महर्षिभिः।
यस्त्वावृणोत्यवितथेन कर्म्मणा ऋतं ब्रुवन्ननृतं सम्प्रयच्छन्। तं वै मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन्। ४०१०
विद्यां श्रुत्वा ये गुरुं नाद्रियन्ते प्रत्यासन्ना मनसा कर्म्मणा वा। तेषां पापं भ्रूणहत्याविशिष्टं नान्यस्तेभ्यः पापकृदस्ति लोके।
तथैव ते गुरुभिर्भावनीयास्तथा तेषां गुरवोऽप्यर्च्चनीयाः।
तस्मात् पूजयितव्याश्च संविभाज्याश्च यत्नतः। गुरवोऽर्च्चयितव्याश्च पुराणं धर्म्ममिच्छता।
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः। प्रीणाति मातरं येन पृथिवी तेन पूजिता।
येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितं। मातृतः पितृतश्चैव तस्मात् पूज्यतमो गुरुः। ४०१५
ऋषयश्च हि देवाश्च प्रीयन्ते पितृभिः सह। पूज्यमानेषु गुरुषु तस्मात् पूज्यतमो गुरुः।
केनचिन्न च वृत्तेन ह्यवज्ञेयो गुरुर्भवेत्। न च माता न च पिता मन्यते यादृशो गुरुः।
न तेऽवमानमर्हन्ति न तेषां दूषयेत् कृतं। गुरूणामेव सत्कारं विदुर्द्देवा महर्षिभिः।
उपाध्यायं पितरं मातरञ्च येऽभिद्रुह्यन्ते मनसा कर्म्मणा वा। तेषां पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति लोके।
भृतो वृद्धो यो न बिभर्त्ति पुत्त्रः स्वयोनिजः पितरं मातरञ्च। तद्वै पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति लोके। ४०२०
मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य गुरुघातिनः। चतुर्णां स्वयमेतेषां निष्कृतिं नानुशुश्रुम।
एतत् सर्व्वमनिर्द्दिश्येनैवमुक्तं यत् कर्त्तव्यं पुरुषेणेह लोके। एतच्छ्रेयो नान्यदस्माद्विशिष्टं सर्व्वान् धर्म्माननुसृत्यैतदुक्तं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि अष्टाधिकशततमोऽध्यायः॥ १०८॥
॥ युधिष्ठिर उवाच॥ कथं धर्म्मे स्थातुमिच्छन्नरो वर्त्तेत भारत। विद्वन् जिज्ञासमानाय प्रब्रूहि भरतर्षभ।
सत्यञ्चैवानृतञ्चोभे लोकानावृत्य तिष्ठतः। तयोः किमाचरेद्राजन् पुरुषो धर्म्मनिश्चितः।
किंस्वित् सत्यं किमनृतं किंस्विद्धर्म्म्यं सनातनं। कस्मिन् काले वदेत् सत्यं कस्मिन् कालेऽनृतं वदेत्। ४०२५
॥ भीष्म उवाच॥ सत्यस्य वचनं साधु न सत्याद्विद्यते परं। यत्तु लोकेषु दुर्ज्ञानं तत्प्रवक्ष्यामि भारत।
भवेत् सत्यं न वक्तव्यं वक्तव्यमनृतं भवेत्। यत्रानृतं भवेत् सत्यं सत्यञ्चाप्यनृतं भवेत्।
तादृशो बध्यते बालो यत्र सत्यमनुष्ठितं। सत्यानृते विनिश्चित्य ततो भवति धर्म्मवित्।
अप्यनार्य्योऽकृतप्रज्ञः पुरुषोऽप्यतिदारुणः। सुमहत् प्राप्नुयात् पुण्यं बलाकोऽन्धबधादिव।
किमाश्चर्य्यञ्च यन्मूढो धर्म्मकामोऽप्यधर्म्मवित्। सुमहत् प्राप्नुयात् पुण्यं गङ्गायामिव कौशिकः। ४०३०
तादृशोऽयमनुप्रश्नो यत्र धर्म्मः सुदुर्लभः। दुष्करः प्रतिसंख्यातुं न केनात्र व्यवस्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रभवार्थाय भूतानां धर्म्मप्रवचनं कृतं। यत् स्यात् प्रभवसंयुक्तं स धर्म्म इति निश्चयः ।
अहिंसार्थाय भूतानां धर्म्मप्रवचनं कृतं। यत् स्यादहिंसासंयुक्तः स धर्म्म इति निश्चयः ।
धारणाद्धर्म्ममित्याहुर्द्धर्म्मेण विधृताः प्रजाः । यत् स्याद्धारणसंयुक्तं स धर्म्म इति निश्चयः ।
श्रुतिधर्म्म इति ह्येके नेत्याहुरपरे जनाः । न च तत् प्रत्यसूयामो न हि सर्व्वं विधीयते। ४०३५
ये न्यायेन जिहीर्षन्तो धनमिच्छन्ति कस्यचित्। तेभ्यस्तु न तदाख्येयं स धर्म्म इति निश्चितः ।
अकूजनेन चेन्मोक्षो नावकूजेत् कथञ्चन। अवश्यकूजितव्ये वा शङ्केरन् वाऽप्यकूजनात् ।
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारितं । यः पापैः सह सम्बन्धान्मुच्यते शपथादपि ।
न तेभ्योऽपि धनं देयं शक्ये सति कथञ्चन । पापेभ्योऽधिधनं दत्तं दातारमपि पीडयेत् ।
स्वशरीरोपरोधेन धनमादातुमिच्छतः । सत्यसम्प्रतिपत्त्यर्थं यद्ब्रूयुः साक्षिणः क्वचित् । ४०४०
अनुक्ता तत्र तद्वाच्यं सर्व्वे तेऽनृतवादिनः । प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत् ।
अर्थस्य रक्षणार्थाय परेषां धर्म्मकारणात् । परेषां सिद्धिमाकाङ्क्षन्नीचः स्याद्धर्म्मभिक्षुकः ।
प्रतिश्रुत्य प्रदातव्यः स्वकार्य्यस्तु बलात् कृतः । यः कश्चिद्धर्म्मसमयात् प्रच्युतो धर्म्मसाधनः ।
दण्डेनैव स हन्तव्यस्तं पन्थानं समाश्रितः । च्युतः सदैव धर्म्मेभ्यो ऽमानवं धर्म्ममास्थितः ।
शठः स्वधर्म्ममुत्सृज्य तमिच्छेदुपजीवितुं । सर्व्वोपायैर्निहन्तव्यः पापो निकृतिजीवनः । ४०४५
धनमित्येव पापानां सर्व्वेषामिह निश्चयः । अविषह्या ह्यसम्भोज्या निकृत्यायतनं गताः ।
च्युता देवमनुष्येभ्यो यथा प्रेतास्तथैव ते । निर्यज्ञास्तपसा हीना मास्म तैः सह सङ्गमः ।
धननाशाद्दुःखतरं जीविताद्विप्रयोजनं । अयन्ते रोचतां धर्म्म इति वाच्यः प्रयत्नतः ।
न कश्चिदस्ति पापानां धर्म्म इत्येष निश्चयः । तथागतञ्च यो हन्यान्नासौ पापेन लिप्यते ।
स्वकर्म्मणा हतं हन्ति हत एव स हन्यते । तेषु यः समयं कश्चित् कुर्व्वीत हतबुद्धिषु । ४०५०
यथा काकश्च गृध्रश्च तथैवोपधिजीविनः । ऊर्द्धं देहविमोक्षान्ते भवन्त्येतासु योनिषु ।
यस्मिन् यथा वर्त्तते यो मनुष्यस्तस्मिंस्तथा वर्त्तितव्यं स धर्म्मः । मायाचारो मायया बाधितव्यः साध्वाचारः साधुना प्रत्युपेयः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सत्यानृतके नवाधिकशतोऽध्यायः ॥ १०९ ॥

॥ युधिष्ठिर उवाच ॥ क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः । दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः । वर्त्तन्ते संयतात्मानो दुर्गाण्यतितरन्ति ते।
ये दम्भान्नाचरन्ति स्म येषां वृत्तिश्च संयता । विषयांश्च निगृह्णन्ति दुर्गाण्यतितरन्ति ते । ४०५५
प्रत्याहुर्नोच्यमाना ये न हिंसन्ति च हिंसिताः । प्रयच्छन्ति न याचन्ते दुर्गाण्यतितरन्ति ते ।
वासयन्त्यतिथीन्नित्यं नित्यं ये चानसूयकाः । नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरन्ति ते ।
मातापित्रोश्च ये वृत्तिं वर्त्तन्ते धर्म्मकोविदाः । वर्ज्जयन्ति दिवास्वप्नं दुर्गाण्यतितरन्ति ते ।
ये वा पापं न कुर्व्वन्ति कर्म्मणा मनसा गिरा । निक्षिप्तदण्डा भूतेषु दुर्गाण्यतितरन्ति ते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

ये न लोभान्नयन्त्यर्थान् राजानो रजसाऽन्विताः। विषयान् परिरचन्ति दुर्गाण्यतितरन्ति ते। ४०६०
स्वेषु दारेषु वर्त्तन्ते नान्यवृत्तिस्तताद्दतौ। अग्निहोत्रपराः सन्तो दुर्गाण्यतितरन्ति ते।
आहवेषु च ये शूरास्त्यक्ता मरणजं भयं। धर्म्मेण जयमिच्छन्ति दुर्गाण्यतितरन्ति ते।
ये वदन्तीह सत्यानि प्राणत्यागेऽप्युपस्थिते। प्रमाणभूता भूतानां दुर्गाण्यतितरन्ति ते।
कर्म्माण्यकुहकार्थानि येषां वाचश्च सूनृताः। येषामर्थाश्च सम्बद्धा दुर्गाण्यतितरन्ति ते।
अनध्यायेषु ये विप्राः स्वाध्यायं नेह कुर्व्वते। तपोनिष्ठाः सुतपसो दुर्गाण्यतितरन्ति ते। ४०६५
ये तपश्च तपस्यन्ति कौमारब्रह्मचारिणः। विद्यावेदव्रतस्नाता दुर्गाण्यतितरन्ति ते।
ये च संशान्तरजसः संशान्ततमसश्च ये। सत्त्वे स्थिता महात्मानो दुर्गाण्यतितरन्ति ते।
येषां न कश्चित्त्रसति न त्रसन्ति हि कस्यचित्। येषामात्मसमो लोको दुर्गाण्यतितरन्ति ते।
परश्रिया न तप्यन्ति ये सन्तः पुरुषर्षभाः। ग्राम्यादर्थान्निवृत्ताश्च दुर्गाण्यतितरन्ति ते।
सर्व्वान्देवान्नमस्यन्ति सर्व्वधर्म्मांश्च शृण्वते। ये श्रद्दधानाः शान्ताश्च दुर्गाण्यतितरन्ति ते। ४०७०
ये न मानित्वमिच्छन्ति मानयन्ति च ये परान्। मान्यमानान्नमस्यन्ति दुर्गाण्यतितरन्ति ते।
ये च श्राद्धानि कुर्व्वन्ति तिथ्यां तिथ्यां प्रजार्थिनः। सुविशुद्धेन मनसा दुर्गाण्यतितरन्ति ते।
ये क्रोधं संनियच्छन्ति क्रुद्धान् संशमयन्ति च। न च कुप्यन्ति भूतानां दुर्गाण्यतितरन्ति ते।
मधु मांसञ्च ये नित्यं वर्ज्जयन्तीह मानवाः। जन्मप्रभृति मद्यञ्च दुर्गाण्यतितरन्ति ते।
यात्रार्थं भोजनं येषां सन्तानार्थञ्च मैथुनं। वाक् सत्यवचनार्थाय दुर्गाण्यतितरन्ति ते। ४०७५
ईश्वरं सर्व्वभूतानां जगतः प्रभवाव्ययं। भक्ता नारायणं देवं दुर्गाण्यतितरन्ति ते।
य एष पद्मरक्ताक्षः पीतवासा महाभुजः। सुहृद्भ्राता च मित्रञ्च सम्बन्धी च तवाऽच्युतः।
य इमान् सकलान् लोकान् चर्म्मवत् परिवेष्टयेत्। इच्छन् प्रभुरचिन्त्यात्मा गोविन्दः पुरुषोत्तमः।
स्थितः प्रियहिते जिष्णोः स एव पुरुषोत्तमः। राजंस्तव च दुर्द्धर्षो वैकुण्ठः पुरुषर्षभः।
य एनं संश्रयन्तीह भक्ता नारायणं हरिं। ते तरन्तीह दुर्गाणि न चात्रास्ति विचारणा। ४०८०
दुर्गातितरणं ये च पठन्ति श्रावयन्ति च। कथयन्ति च विप्रेभ्यो दुर्गाण्यतितरन्ति ते।
इति कृत्यसमुद्देशः कीर्त्तितस्ते मयाऽनघ। तरन्ते येन दुर्गाणि परत्रेह च मानवाः।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि दुर्गातितरणे दशाधिकशतोऽध्यायः॥ ११०॥
॥ युधिष्ठिर उवाच॥ असौम्याः सौम्यरूपेण सौम्याश्चासौम्यदर्शनाः। ईदृशान् पुरुषांस्तात कथं विद्यामहे वयं।
॥ भीष्म उवाच॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। व्याघ्रगोमायुसंवादं तन्निबोध युधिष्ठिर।
पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः। परहिंसारतिः क्रूरो बभूव पुरुषाधमः। ४०८५
स त्वायुषि परिक्षीणे जगामानीप्सितां गतिं। गोमायुत्वञ्च सम्प्राप्तो दूषितः पूर्व्वकर्म्मणा।
संस्मृत्य पूर्व्वभूतिञ्च निर्व्वेदं परमं गतः। न भक्षयति मांसानि परैरुपहृतान्यपि।
अहिंस्रः सर्व्वभूतेषु सत्यवाक् सुदृढव्रतः। स चकार यथाकालमाहारं पतितैः फलैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

श्मशाने तस्य चावासो गोमायोः सम्मतोऽभवत् । जन्मभूम्यनुरोधाच्च नान्यं वासमरोचयत् ।
तस्य शौचममृष्यन्तस्ते सर्व्वे सहजातयः । चालयन्ति स्म तां बुद्धिं वचनैः प्रश्रयोत्तरैः ।
वसन् पितृवने रौद्रे शौचे वर्त्तितुमिच्छसि । इयं विप्रतिपत्तिस्ते यदा त्वं पिशिताशनः ।
तत्समानो भवास्माभिर्भोज्यं दास्यामहे वयं । भुङ्क्ष्व शौचं परित्यज्य यद्धि भुक्तं तदाऽस्तु ते ।
इति तेषां वचः श्रुत्वा प्रत्युवाच समाहितः । मधुरैः प्रसृतैर्व्वाक्यैर्हेतुमद्भिरनिष्ठुरैः ।
अप्रमाणा प्रसूतिर्म्मे शीलतः क्रियते कुलं । प्रार्थयामि च तत् कर्म्म येन विस्तीर्य्यते यशः ।
श्मशाने यदि मे वासो समाधिर्म्मे निशम्यतां । आत्मा फलति कर्म्माणि नाश्रमो धर्म्मकारणं ।
आश्रमे यो द्विजं हन्याद्गां वा दद्यादनाश्रमे । किंनु तत् पातकं न स्यात्तद्वा दत्तं वृथा भवेत् ।
भवन्तः स्वार्थलोभेन केवलं भक्षणे रताः । अनुबन्धे त्रयो दोषास्तान्न पश्यन्ति मोहिताः ।
अप्रत्ययकृतां गर्ह्यामर्थापनयदूषितां । इह चामुत्र चानिष्टां तस्माद्वृत्तिं न रोचये ।
तं शुचिं पण्डितं मत्वा शार्द्दूलः ख्यातविक्रमः । कृत्वात्मसदृशीं पूजां साचिव्येऽवरयत्स्वयं ।
॥ शार्द्दूल उवाच ॥ सौम्य विज्ञातरूपस्त्वं गच्छ यात्रां मया सह । व्रियन्तामीप्सिता भोगाः परिहार्य्याश्च पुष्कलाः ।
तीक्ष्णा इति वयं ख्याता भवन्तं ज्ञापयामहे । मृदुपूर्व्वं हितञ्चैव श्रेयश्चाधिगमिष्यसि ।
अथ संपूज्य तद्वाक्यं मृगेन्द्रस्य महात्मनः । गोमायुः संश्रितं वाक्यं बभाषे किञ्चिदानतः ।
॥ गोमायुरुवाच ॥ सदृशं मृगराजैतत्तव वाक्यं मदन्तरे । यत्सहायान्मृगयसे धर्म्मार्थकुशलान् शुचीन् ।
न शक्यं ह्यनमात्येन महत्त्वमनुशासितुं । दुष्टामात्येन वा वीर शरीरपरिपन्थिना ।
सहायाननुरक्तांश्च नयज्ञानुपसंहितान् । परस्परमसंसृष्टान् विजिगीषूनलोलुपान् ।
अनतीतोपधान् प्राज्ञान् हिते युक्तान्मनस्विनः । पूजयेथा महाभाग यथाचार्य्यान् यथा पितॄन् ।
नत्वेव मम सन्तोषाद्रोचतेऽन्यन्मृगाधिप । न कामये सुखान् भोगानैश्वर्य्यञ्च त्वदाश्रयं ।
न योक्ष्यति हि मे शीलं तव भृत्यैः पुरातनैः । ते त्वां विभेदयिष्यन्ति दुःशीलाश्च मदन्तरं ।
न संश्रयः श्लाघनीयो ह्यन्येषामपि भास्वतां । कृतात्मा सुमहाभागः पापकेष्वप्यदारुणः ।
दीर्घदर्शी महोत्साहः स्थूललक्षो महाबलः । कृती चामोघकर्त्ताऽसि भोगैश्च समलङ्कृतः ।
न स्वल्पेनास्मि सन्तुष्टो दुःखावृत्तिरनुष्ठिता । सेवायाञ्चापि नाभिज्ञः स्वच्छन्देन वनेचरः ।
राजोपक्रोशदोषाश्च सर्व्वे संश्रयवासिनां । व्रतचर्य्या तु निःसङ्गा निर्भया वनवासिनां ।
नृपेणाहूयमानस्य यत्तिष्ठति भयं हृदि । न तत्तिष्ठति तुष्टानां वने मूलफलाशिनां ।
पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं । विचार्य्य खलु पश्यामि तत् सुखं यत्र निर्वृतिः ।
अपराधैर्न तावन्तो भृत्याः शिष्टा नराधिपैः । उपघातैर्यथा भृत्या दूषिता निधनं गताः ।
यदि त्वेतन्मया कार्य्यं मृगेन्द्र यदि मन्यसे । समयं कृतमिच्छामि वर्त्तितव्यं यथा मयि ।
मदीया माननीयास्ते श्रोतव्यञ्च हितं वचः । कल्पिता या च मे वृत्तिः सा भवेत्त्वयि सुस्थिरा ।
न मन्त्रयेयमन्यैस्ते सचिवैः सह कर्हिचित् । नीतिमन्तः परीप्सन्तो वृथा ब्रूयुः परे मयि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एक एकेन संगम्य रहो ब्रूयां हितं वचः। न च ते ज्ञातिकार्य्येषु प्रष्टव्योऽहं हिताहिते।
मया सम्मन्त्र्य पश्चाच्च न हिंस्याः सचिवास्त्वया। मदीयानाञ्च कुपितो मा त्वं दण्डं निपातयेः।
एवमस्त्विति तेनासौ मृगेन्द्रेणाभिपूजितः। प्राप्तवान्मतिसाचिव्यं गोमायुर्व्याघ्रयोनितः।
तं तथा सत्कृतं दृष्ट्वा पूज्यमानं स्वकर्म्मसु। प्राद्विषन् कृतसंघाताः पूर्व्वभृत्या मुहुर्म्मुहुः।
मित्रबुद्ध्या च गोमायुं सान्त्वयित्वा प्रसाद्य च। दोषैस्तु समतां नेतुमैच्छन्नशुभबुद्धयः।
अन्यथा व्युषिताः पूर्व्वं परद्रव्याभिहारिणः। अशक्ताः किञ्चिदादातुं द्रव्यं गोमायुयन्त्रिताः।
व्युत्थानञ्च विकाङ्क्षद्भिः कथाभिः प्रतिलोभ्यते। धनेन महता चैव बुद्धिरस्य विलोभ्यते।
न चापि स महाप्राज्ञस्तस्माद्धैर्य्याच्चचाल ह। अथास्य समयं कृत्वा विनाशाय तथाऽपरे।
ईप्सितन्तु मृगेन्द्रस्य मांसं यत्तत्र संस्कृतं। अपनीय स्वयं तद्धि तैर्न्यस्तं तस्य वेश्मनि।
यदर्थञ्चाप्यपहृतं येन तच्चैव मन्त्रितं। तस्य तद्विदितं सर्व्वं कारणार्थञ्च मर्षितं।
समयोऽयं कृतस्तेन साचिव्यमुपगच्छता। नोपघातस्त्वया कार्य्यो राजन् मैत्रीमिहेच्छता।
॥ भीष्म उवाच ॥ क्षुधितस्य मृगेन्द्रस्य भोक्तुमभ्युत्थितस्य च। भोजनायोपहर्त्तव्यं तन्मांसं नोपदृश्यते।
मृगराजेन चाज्ञप्तं दृश्यतां चौर इत्युत। कृतकैश्चैव तन्मांसं मृगेन्द्रायोपवर्णितं।
सचिवेनापनीतं ते विदुषा प्राज्ञमानिना। सरोषस्त्वथ शार्द्दूलः श्रुत्वा गोमायुचापलं।
बभूवामर्षितो राजा बधञ्चास्य व्यरोचयत्। छिद्रं ते तस्य तद्दृष्ट्वा प्रोचुस्ते पूर्व्वमन्त्रिणः।
सर्व्वेषामेव सोऽस्माकं वृत्तिभङ्गे प्रवर्त्तते। निश्चित्यैवं पुनस्तस्य ते तत् कर्म्माण्यवर्णयन्।
इदं तस्येदृशं कर्म्म किन्तेन न कृतं भवेत्। श्रुतस्ते स्वामिना पूर्व्वं यादृशेनैव तादृशः।
वाङ्मात्रेणैव धर्म्मिष्ठः स्वभावेन तु दारुणः। धर्म्मच्छद्मा ह्ययं पापो वृथाचारपरिग्रहः।
कार्य्यार्थं भोजनार्थेषु व्रतेषु कृतवान् श्रमं। यदि विप्रत्ययो ह्येष तदिदं दर्शयाम ते।
तन्मांसञ्चैव गोमायोस्तैः क्षणादाशु ढौकितं। मांसापनयनं ज्ञात्वा व्याघ्रः श्रुत्वा च तद्वचः।
आज्ञापयामास तदा गोमायुर्व्वध्यतामिति। शार्द्दूलस्य वचः श्रुत्वा शार्द्दूलजननी ततः।
मृगराजं हितैर्व्वाक्यैः सम्बोधयितुमागमत्। पुत्र नैतत्त्वया ग्राह्यं कपटारम्भसंयुतं।
कर्म्मसंघर्षजैर्द्दोषैर्दुष्येताशुचिभिः शुचिः। नोच्छ्रितं सहते कश्चित् प्रक्रिया वैरकारिका।
शुचेरपि हि युक्तस्य दोष एव निपात्यते। मुनेरपि वनस्थस्य स्वानि कर्म्माणि कुर्व्वतः।
उत्पाद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः। लुब्धानां शुचयो द्वेष्याः कातराणां तरस्विनः।
मूर्खाणां पण्डिता द्वेष्या दरिद्राणां महाधनाः। अधार्म्मिकाणां धर्म्मिष्ठा विरूपाणां सुरूपिणः।
बहवः पण्डिता मूर्खा लुब्धा मायोपजीविनः। कुर्य्युर्द्दोषमदोषस्य वृहस्पतिमतेरपि।
शून्यात्तच्च गृहान्मांसं यद्यप्यपहृतं तव। नेच्छते दीयमानञ्च साधु तावद्विमृश्यतां।
असभ्याः सभ्यसंकाशाः सभ्याश्चासभ्यदर्शनाः। दृश्यन्ते विविधा भावास्तेषु युक्तं परीक्षणं।
तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव। न चैवास्ति तलं व्योम्नि खद्योते न हुताशनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मात् प्रत्यक्षदृष्टोऽपि युक्तो ह्यर्थः परीक्षितुं । परीक्ष्य ज्ञापयन्नर्थान् पश्चात् परितप्यते ।
न दुष्करमिदं पुत्र यत् प्रभुर्घातयेत् परं । श्लाघनीया यशस्या च लोके प्रभवतां क्षमा । ४१५०
स्थापितोऽयं त्वया पुत्र सामन्तेष्वपि विश्रुतः । दुःखेनासाद्यते पात्रं धार्य्यतामेष ते सुहृत् ।
दूषितं परदोषैर्हि गृह्णीते योऽन्यथा शुचिं । स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति ।
तस्मादप्यरिसंघाताद्गोमायोः कश्चिदागतः । धर्म्मात्मा तेन चाख्यातं यथैतत् कपटं कृतं ।
ततो विज्ञानचारित्रः सत्कृत्य स विमोक्षितः । परिष्वक्तश्च सस्नेहं मृगेन्द्रेण पुनः पुनः ।
अनुज्ञाप्य मृगेन्द्रन्तु गोमायुर्नीतिशास्त्रवित् । तेनामर्षेण सन्तप्तः प्रायमासितुमैच्छत । ४१५५
शार्दूलस्तन्तु गोमायुं स्नेहात् प्रोत्फुल्ललोचनः । अवारयत् स धर्म्मिष्ठं पूजया प्रतिपूजयन् ।
तं स गोमायुरालोक्य स्नेहादागतसम्भ्रमं । उवाच प्रणतो वाक्यं वाष्पगद्गदया गिरा ।
पूजितोऽहं त्वया पूर्व्वं पश्चाच्चैव विमानितः । परेषामास्पदं नीतो वस्तुं नार्हाम्यहं त्वयि ।
असन्तुष्टाश्च्युताः स्थानान्मानात् प्रत्यवरोपिताः । स्वयञ्चापहृता भृत्या ये चाप्युपहिताः परैः ।
परिक्षीणाश्च लुब्धाश्च क्रुद्धा भीताः प्रतारिताः । हृतस्वा मानिनो ये च त्यक्तादाना महेप्सवः । ४१६०
सन्तापिताश्च ये केचिद्व्यसनौघप्रतीक्षिणः । अन्तर्हिताः सोपहितास्ते सर्व्वे परसाधनाः ।
अवमानेन युक्तस्य स्थानभ्रष्टस्य वा पुनः । कथं यास्यसि विश्वासमहं तिष्ठामि वा कथं ।
समर्थ इति संगृह्य स्थापयित्वा परीक्षितः । कृतञ्च समयं भित्त्वा त्वयाऽहमवमानितः ।
प्रथमं यः समाख्यातः शीलवानिति संसदि । न वाच्यं तस्य वैगुण्यं प्रतिज्ञां परिरक्षता ।
एवञ्चावमतस्येह विश्वासं मे न यास्यसि । त्वयि चापेतविश्वासे ममोद्वेगो भविष्यति । ४१६५
शङ्कितस्त्वमहं भीतः परे च्छिद्रानुदर्शिनः । अस्निग्धाश्चैव दुस्तोषाः कर्म्म चैतद्बहुच्छलं ।
दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते । भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्त्तते ।
कश्चिदेव हि ते भर्त्तुर्दृश्यते न परात्मनोः । कार्य्यापेक्षा हि वर्त्तन्ते भावाः स्निग्धाः सुदुर्लभाः ।
सुदुःखं पुरुषज्ञानं चित्तं येषां चलाचलं । समर्थो वाऽप्यशक्तो वा शतेष्वेकोऽधिगम्यते ।
अकस्मात्प्रक्रिया नृणामकस्माच्चापकर्षणं । शुभाशुभे महत्त्वञ्च प्रकर्त्तुं बुद्धिलाघवं । ४१७०
एवंविधं सान्त्वमुक्त्वा धर्म्मकामार्थहेतुमत् । प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात् ।
प्रगृह्यानुनयं तस्य मृगेन्द्रस्य च बुद्धिमान् । गोमायुः प्रायमास्थाय त्यक्त्वा देहं दिवं ययौ ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि व्याघ्रगोमायुसंवादे एकादशाधिकशतोऽध्यायः ॥ १११ ॥

॥ युधिष्ठिर उवाच ॥ किं पार्थिवेन कर्त्तव्यं किञ्च कृत्वा सुखी भवेत् । एतदाचक्ष्व तत्त्वेन सर्व्वधर्म्मभृताम्वर ।
॥ भीष्म उवाच ॥ हन्त तेऽहं प्रवक्ष्यामि शृणु कार्य्यैकनिश्चयं । यथा राज्ञेह कर्त्तव्यं यच्च कृत्वा सुखी भवेत् ।
नचैवं वर्त्तितव्यं स्म यथेदमनुशुश्रुम । उष्ट्रस्य तु महद्वृत्तं तन्निबोध युधिष्ठिर । ४१७५
जातिस्मरो महानुष्ट्रः प्राजापत्ययुगेऽभवत् । वरेण च्छन्दयामास ततश्चैनं पितामहः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तपः सुमहदातिष्ठदरण्ये शंसितव्रतः । तपसस्तस्य चान्तेऽथ प्रीतिमानभवद्विभुः ।
वरेण छन्दयामास ततश्चैनं पितामहः ।
॥ उष्ट्र उवाच ॥ भगवंस्त्वत्प्रसादान्मे दीर्घा ग्रीवा भवेदियं । योजनानां शतं साग्रं गच्छामि चरितुं विभो ।
एवमस्त्विति चोक्तः स वरदेन महात्मना । प्रतिलभ्य वरं श्रेष्ठं ययावुष्ट्रः स्वकं वनं । ४१८०
स चकार तदालस्यं वरदानात् सुदुर्म्मतिः । न चैच्छच्चरितुं गन्तुं दुरात्मा कालमोहितः ।
स कदाचित् प्रसार्य्यैव तां ग्रीवां शतयोजनां । चचार श्रान्तहृदयो वातश्चागात्ततो महान् ।
स गुहायां शिरोग्रीवां निधाय पशुरात्मनः । आस्तेऽनुवर्षमभ्यागात् सुमहत् प्लावयज्जगत् ।
अथ शीतपरीताङ्गो जम्बुकः क्षुच्छ्रमन्वितः । सदारस्तां गुहामाशु प्रविवेश जलार्द्दितः ।
स दृष्ट्वा मांसजीवी तु सुभृशं क्षुच्छ्रमन्वितः । अभक्षयत्ततो ग्रीवामुष्ट्रस्य भरतर्षभ । ४१८५
यदा त्वबुध्यतात्मानं भक्ष्यमाणं स वै पशुः । तदा सङ्कोचने यत्नमकरोद्भृशदुःखितः ।
यावदूर्द्ध्वमधश्चैव ग्रीवां सङ्क्षिपते पशुः । तावत्तेन सदारेण जम्बुकेन स भक्षितः ।
स हत्वा भक्षयित्वा च तमुष्ट्रं जम्बुकस्तदा । विगते वातवर्षे तु निश्चक्राम गुहामुखात् ।
एवं दुर्ब्बुद्धिना प्राप्तमुष्ट्रेण निधनं तदा । आलस्यस्य क्रमात् पश्य महान्तं दोषमागतं ।
तमप्येवंविधं हित्वा योगेन निहतेन्द्रियः । वर्त्तस्व बुद्धिमूलन्तु विजयं मनुरब्रवीत् । ४१९०
बुद्धिश्रेष्ठानि कर्म्माणि बाहुमध्यानि भारत । तानि जङ्घाजघन्यानि भारप्रत्यवराणि च ।
राज्यं तिष्ठति दक्षस्य संगृहीतेन्द्रियस्य च । आर्त्तस्य बुद्धिमूलं हि विजयं मनुरब्रवीत् ।
गुह्यं मन्त्रं श्रुतवतः ससहायस्य चानघ । परीक्ष्यकारिणो ह्यर्थास्तिष्ठन्तीह युधिष्ठिर ।
सहाययुक्तेन मही कृत्स्ना शक्या प्रशासितुं ।
इदं हि सद्भिः कथितं विधिज्ञैः पुरा महेन्द्रप्रतिमप्रभाव । मयाऽपि चोक्तं तव शास्त्रदृष्ट्या यथैव बुद्ध्वा प्रचरस्व राजन् । ४१९५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि उष्ट्रग्रीवोपाख्याने द्वादशाधिकशततोऽध्यायः ॥ ११२ ॥

॥ युधिष्ठिर उवाच ॥ राजा राज्यमनुप्राप्य दुर्लभं भरतर्षभ । अमित्रस्यातिवृद्धस्य कथं तिष्ठेदसाधनः ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । सरिताञ्चैव संवादं सागरस्य च भारत ।
सुरारिनिलयः शश्वत् सागरः सरितांपतिः । पप्रच्छ सरितः सर्व्वाः संशयं जातमात्मनः ।
॥ सागर उवाच ॥ समूलशाखान् पश्यामि निहतान् कायिनो द्रुमान् । युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसं ।
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः । अवज्ञया वा नानीतः किञ्चि वा तेन वः कृतं । ४२००
तदहं श्रोतुमिच्छामि सर्व्वासामेव वो मतं । यथा चेमानि कूलानि हित्वा नायाति वेतसः ।
तत्र प्राह नदी गङ्गा वाक्यमुत्तममर्थवत् । हेतुमद्ग्राहकञ्चैव सागरं सरितां पतिं ।
॥ गङ्गोवाच ॥ तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः । ते त्यजन्ति ततः स्थानं प्रातिलोम्यान्न वेतसः ।
वेतसो वेगमायान्तं दृष्ट्वा नमति नापरे । सरिद्वेगेऽभ्यतिक्रान्ते स्थानमासाद्य तिष्ठति ।
कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः । अनुलोमस्तथा स्तब्धस्तेन नाभ्येति वेतसः । ४२०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मारुतोदकवेगेन ये नमन्त्युन्नमन्ति च । ओषध्यः पादपा गुल्मा न ते यान्ति पराभवं ।
॥ भीष्म उवाच ॥ यो हि शत्रोर्व्विवृद्धस्य प्रभोर्ब्बधविनाशने । पूर्व्वं न सहते वेगं चिप्रमेव विनश्यति ।
सारासारं बलं वीर्य्यमात्मनो द्विषतश्च यः । जानन् विचरति प्राज्ञो न स याति पराभवं ।
एवमेव यदा विद्वान्मन्यतेऽतिबलं रिपुं । संश्रयेद्वैतसीं वृत्तिमेतत् प्रज्ञानलक्षणं ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि सरित्सागरसंवादे त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

॥ युधिष्ठिर उवाच ॥ विद्वान्मूर्खप्रगल्भेन मृदुतीक्ष्णेन भारत । आक्रुश्यमाणः सदसि कथं कुर्य्यादरिन्दम । ४२१०
॥ भीष्म उवाच ॥ श्रूयतां पृथिवीपाल यथैषोऽर्थोऽनुगीयते । सदा सुचेताः सहते नरस्येहाल्पमेधसः ।
अरुष्यन् क्रुश्यमाणस्य सुकृतं नाम विन्दति । दुष्कृतञ्चात्मनोऽमर्षी रुष्यत्येवापमार्ष्टि वै ।
टिट्टिभं तमुपेक्षेत वाशमानमिवातुरं । लोकविद्वेषमापन्नो निष्फलं प्रतिपद्यते ।
इति संश्लाघते नित्यं तेन पापेन कर्म्मणा । इदमुक्तो मया कश्चित् सम्मतो जनसंसदि ।
स तत्र व्रीडितः शुष्का मृतकल्पोऽवतिष्ठते । श्लाघन्नश्लाघनीयेन कर्म्मणा निरपत्रपः । ४२१५
उपेक्षितव्यो यत्नेन तादृशः पुरुषाधमः । यद्यद्ब्रूयादल्पमतिस्तत्तदस्य सहेद्बुधः ।
प्राकृतो हि प्रशंसन् वा निन्दन् वा किं करिष्यति । वने काक इवाबुद्धिर्व्वाशमानो निरर्थकं ।
यदि वाग्भिः प्रयोगः स्यात् प्रयोगे पापकर्म्मणः । वागेवार्थो भवेत्तस्य न ह्येवार्थो जिघांसतः ।
निषेकं विपरीतं स आचष्टे वृत्तचेष्टया । मयूर इव कौपीनं नृत्यं सन्दर्शयन्निव ।
यस्यावाच्यं न लोकेऽस्ति नाकार्य्यञ्चापि किञ्चन । वाचन्तेन न सन्दध्याच्छुचिः संक्लिष्टकर्म्मणा । ४२२०
प्रत्यक्षं गुणवादी यः परोक्षे चापि निन्दकः । स मानवः श्ववल्लोके नष्टलोकपरावरः ।
तादृग्जनशतस्यापि यद्ददाति जुहोति च । परोक्षेणापवादी यस्तन्नाशयति तत्क्षणात् ।
तस्मात् प्राज्ञो नरः सद्यस्तादृशं पापचेतसं । वर्ज्जयेत् साधुभिर्व्वर्ज्ज्यं सारमेयामिषं यथा ।
परिवादं ब्रुवाणो हि दुरात्मा वै महाजने । प्रकाशयति दोषांस्तु सर्पः फणमिवोच्छ्रितं ।
तं स्वकर्म्माणि कुर्व्वाणं प्रतिकर्त्तुं य इच्छति । भस्मकूट इवाबुद्धिः खरो रजसि मज्जति । ४२२५
मनुष्यशालावृकमप्रशान्तं जनापवादे सततं निविष्टं । मातङ्गमुन्मत्तमिवोन्नदन्तं त्यजेत तं श्वानमिवातिरौद्रं ।
अधीरजुष्टे पथि वर्त्तमानं दमादपेतं विनयाच्च पापं । अरिव्रतं नित्यमभूतिकामं धिगस्तु तं पापमतिं मनुष्यं ।
प्रत्युच्यमानस्त्वभिभूय एभिर्निशाम्य माभूस्त्वमथार्त्तरूपः । उच्चस्य नीचेन हि सम्प्रयोगं विगर्हयन्ति स्थिरबुद्धयो ये ।
क्रुद्धो दशार्द्धेन हि ताडयेद्वा स पांशुभिर्व्वा विकिरेत्तुषैर्व्वा । विवृत्य दन्तांश्च विभीषयेद्वा सिद्धं हि मूढे कुपिते नृशंसे ।
विगर्हणां परमदुरात्मना कृतां सहेत यः संसदि दुर्ज्जनान्नरः । पठेदिदञ्चापि निदर्शनं सदा न वाङ्मयं स लभति किञ्चिदप्रियं । ४२२८

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि टिट्टिभकोपाख्याने चतुर्द्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ संशयो मे महानयं। सञ्छेत्तव्यस्त्वया राजन् भवान् कुलकरो हि नः।
पुरुषाणामयं तात दुर्वृत्तानां दुरात्मनां। कथितो वाक्यसञ्चारस्ततो विज्ञापयामि ते।
यद्धितं राज्यतन्त्रस्य कुलस्य च सुखोदयं। आयत्याञ्च तदात्वे च क्षेमवृद्धिकरञ्च यत्।
पुत्त्रपौत्त्राभिरामञ्च राष्ट्रवृद्धिकरञ्च यत्। अन्नपाने शरीरे च हितं यत्तद्ब्रवीहि मे।
अभिषिक्तो हि यो राजा राष्ट्रस्थोमित्त्रसंवृतः। स सुहृत्समुपेतो वा स कथं रञ्जयेत् प्रजाः। ४२३५
यो ह्यसत्प्रग्रहरतिः स्नेहरागबलात्कृतः। इन्द्रियाणामनीशत्वादसज्जनबुभूषकः।
तस्य भृत्या विगुणतां यान्ति सर्व्वे कुलोद्गताः। न च भृत्यफलैरर्थैः स राजा सम्प्रयुज्यते।
एतन्मे संशयस्थस्य राजधर्म्मान् सुदुर्विदान्। बृहस्पतिसमो बुद्ध्या भवान् शंसितुमर्हति।
शंसिता पुरुषव्याघ्र त्वं नः कुलहिते रतः। क्षत्ता चैको महाप्राज्ञो यो नः शंसति सर्व्वदा।
त्वत्तः कुलहितं वाक्यं श्रुत्वा राज्यहितोदयं। अमृतस्याव्ययस्येव तृप्तः स्वप्स्याम्यहं सुखं। ४२४०
कीदृशाः सन्निकर्षस्था भृत्याः सर्व्वगुणान्विताः। कीदृशैः किं कुलीनैर्वा सह यात्रा विधीयते।
न ह्येको भृत्यरहितो राजा भवति रक्षिता। राज्यञ्चेदं जनः सर्व्वस्तत्कुलीनोऽभिकाङ्क्षति।
॥ भीष्म उवाच ॥ न च प्रशास्तुं राज्यं हि शक्यमेकेन भारत। असहायवता तात नैवार्थाः केचिदच्युत।
लब्धुं लब्ध्वा ह्यपि सदा रक्षितुं भरतर्षभ। यस्य भृत्यजनः सर्व्वो ज्ञानविज्ञानकोविदः।
हितैषी कुलजः स्निग्धः स राज्यफलमश्नुते। मन्त्रिणो यस्य कुलजा असंहार्य्याः सहोषिताः। ४२४५
नृपतेर्म्मतिदाः सन्तः सम्बन्धज्ञानकोविदाः। अनागतविधातारः कालज्ञानविशारदाः।
अतिक्रान्तमशोचन्तः स राज्यफलमश्नुते। समदुःखसुखा यस्य सहायाः प्रियकारिणः।
अर्थचिन्तापराः सत्याः स राज्यफलमश्नुते। यस्य नार्त्तो जनपदः सन्निकर्षगतः सदा।
अक्षुद्रः सत्पथालम्बी स राजा राज्यभाग्भवेत्। कोषाख्यपटलं यस्य कोषवृद्धिकरैर्नरैः।
आप्तैस्तुष्टैश्च सततं चीयते स नृपोत्तमः। कोष्ठागारमसंहार्य्यैराप्तैः सञ्चयतत्परैः। ४२५०
पात्रभूतैरलुब्धैश्च पाल्यमानं गुणी भवेत्। व्यवहारश्च नगरे यस्य कर्म्मफलोदयः।
दृश्यते शङ्खलिखितः स धर्म्मफलभाङ्नृपः। संगृहीतमनुष्यश्च यो राजा राजधर्म्मवित्।
षड्वर्गं प्रतिगृह्णाति स धर्म्मफल श्नुते।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि पञ्चदशाधिकशततोऽध्यायः॥ ११५॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। निदर्शनं परं लोके सज्जनाचरिते सदा।
अस्यैवार्थस्य सदृशं यच्छ्रुतं मे तपोवने। जामदग्न्यस्य रामस्य यदुक्तमृषिसत्तमैः। ४२५५
वने महति कस्मिंश्चिदमनुष्यनिषेविते। ऋषिर्मूलफलाहारो नियतो नियतेन्द्रियः।
दीक्षादमपरः शान्तः स्वाध्यायपरमः शुचिः। उपवासविशुद्धात्मा सततं सत्त्वमास्थितः।
तस्य संदृश्य सद्भावमुपविष्टस्य धीमतः। सर्व्वे सत्त्वाः समीपस्था भवन्ति वनचारिणः।
सहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः। द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ते सुखप्रश्नदाः सर्व्वे भवन्ति च्चतजाशनाः । तस्यर्षेः शिष्यवच्चैव न्यग्भूताः प्रियकारिणः। ४२६०
दत्त्वा च ते सुखप्रश्नं सर्व्वे यान्ति यथागतं । ग्राम्यस्त्वेकः पशुस्तत्र नाजहात् स महामुनिं।
भक्तोऽनुरक्तः सततमुपवासकृशोऽबलः। फलमूलोदकाहारः शान्तः शिष्टाकृतिर्यथा।
तस्यर्षेरुपविष्टस्य पादमूले महामते। मनुष्यवद्गतो भावं स्नेहबद्धोऽभवद्भृशं ।
ततोऽभ्ययान्महावीर्य्यो द्वीपी च्चतजभोजनः। स्वार्थमत्यन्तसन्तुष्टः क्रूरः काल इवान्तकः।
लेलिह्यमानस्तृषितः पुच्छास्फोटनतत्परः । व्यादितास्यः चुधाभुग्नः प्रार्थयानस्तदामिषं। ४२६५
दृष्ट्वा तं क्रूरमायान्तं जीवितार्थी नराधिप। प्रोवाच श्वा मुनिं तत्र तच्छृणुष्व विशाम्पते।
श्वशत्रुर्भगवन्नेष द्वीपी मां हन्तुमिच्छति। त्वत्प्रसादाद्भयं न स्यादस्मान्मम महामुने।
तथा कुरु महाबाहो सर्व्वज्ञस्त्वं न संशयः। स मुनिस्तस्य विज्ञाय भावज्ञो भयकारणं।
रुतज्ञः सर्व्वसत्त्वानां तमैश्वर्य्यसमन्वितः।
॥ मुनिरुवाच ॥ न भयं द्वीपिनः कार्य्यं मृत्युतस्ते कथञ्चन। एष स्वरूपरहितो द्वीपी भवसि पुत्रक। ४२७०
ततः श्वा द्वीपितां नीतो जाम्बूनदनिभाकृतिः। चित्राङ्गो विस्फुरद्दंष्ट्रो वने वसति निर्भयः।
तं दृष्ट्वा संमुखे द्वीपी आत्मनः सदृशं पशुं । अविरुद्धस्ततस्तस्य च्चणेन समपद्यत।
ततोऽभ्ययान्महारौद्रो व्यादितास्यः चुधाऽन्वितः । द्वीपिनं लेलिहद्वक्त्रो व्याघ्रो रुधिरलालसः।
व्याघ्रं दृष्ट्वा चुधाविष्टं दंष्ट्रिणं वनगोचरं। द्वीपी जीवितरचार्थमृषिं शरणमीयिवान्।
संवासजं परं स्नेहमृषिणा कुर्व्वता तदा। स द्वीपी व्याघ्रतां नीतो रिपूणां बलवत्तरः। ४२७५
ततो दृष्ट्वा स शार्दूलो नाहनत्तं विशाम्पते। स तु श्वा व्याघ्रतां प्राप्य बलवान् पिशिताशनः।
न मूलफलभोगेषु स्पृहामप्यकरोत्तदा। यथा मृगपतिर्नित्यं प्रकाङ्क्षति वनौकसः।
तथैव स महाराज व्याघ्रः समभवत्तदा।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषिसंवादे षोडशाधिकशततोऽध्यायः ॥ ११६ ॥
॥ भीष्म उवाच ॥ व्याघ्रस्त्वोटजमूलस्थस्तृप्तः सुप्तो हतैर्मृगैः। गजस्त्वागात्तमुद्देशं मत्तो मेघ इवोत्थितः।
प्रभिन्नकरटः प्रांशुः पद्मी विततकुम्भकः । सुविषाणो महाकायो मेघगम्भीरनिस्वनः। ४२८०
तं दृष्ट्वा कुञ्जरं मत्तमायान्तं बलगर्व्वितं । व्याघ्रो हस्तिभयात्त्रस्तस्तमृषिं शरणं ययौ।
ततोऽनयत् कुञ्जरत्वं व्याघ्रं तमृषिसत्तमः। महामेघनिभं दृष्ट्वा स भीतो ह्यभवद्गजः।
ततः कलमषण्डानि शल्लकीगहनानि च। व्यचरत् स मुदा युक्तः पद्मरेणुविभूषितः।
कदाचिद्भ्रममाणस्य हस्तिनः संमुखं तदा। ऋषेरुटोटजस्थस्य कालोऽगच्छन्निशानिशं।
अथाजगाम तं देशं केशरी केशरारुणः। गिरिकन्दरजो भीमः सिंहो नागकुलान्तकः। ४२८५
तं दृष्ट्वा सिंहमायान्तं नागः सिंहभयार्द्दितः। ऋषिं शरणमापेदे वेपमानो भयातुरः।
स ततः सिंहतां नीतो नागेन्द्रो मुनिना तदा। वनं नागणयत् सिंहं तुल्यजातिसमन्वयात्।
दृष्ट्वा च सोऽभवत् सिंहो वन्यो भयसमन्वितः। स चाश्रमेऽवसत् सिंहस्तस्मिन्नेव महावने।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तद्भयात् पशवो नान्ये तपोवनसमीपतः। व्यदृश्यन्त तदा त्रस्ता जीविताकाङ्क्षिणस्तदा।
कदाचित् कालयोगेन सर्व्वप्राणिविहिंसकः। बलवान् क्षतजाहारो नानासत्त्वभयङ्करः। ४२९०
अष्टपादूर्द्ध्वनयनः शरभो वनगोचरः। तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनं।
तं मुनिः शरभञ्चक्रे बलोत्कटमरिन्दमः। ततः स शरभो वन्यो मुनेः शरभमग्रतः।
दृष्ट्वा बलिनमत्युग्रं द्रुतं सम्प्राद्रवद्वनात्। स एवं शरभस्थाने संन्यस्तो मुनिना तदा।
मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान्। ततः शरभसन्त्रस्ताः सर्व्वे मृगगणास्तदा।
दिशः सम्प्राद्रवन्राजन् भयाज्जीवितकाङ्क्षिणः। शरभोऽप्यतिसंहृष्टो नित्यं प्राणिबधे रतः। ४२९५
फलमूलाशनं कर्त्तुं नैच्छत् स पिशिताशनः। ततो रुधिरतर्षेण बलिना शरभोऽन्वितः।
इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः। ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा।
विज्ञाय स महाप्राज्ञो मुनिः श्वानं तमुक्तवान्। श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः।
व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमागतः। सिंहस्त्वं बलमापन्नो भूयः शरभतां गतः।
महास्नेहपरीतेन विसृष्टो नकुलान्वयः। यस्मादेवमपापं मां पाप हिंसितुमिच्छसि। ४३००
तस्मात् स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि। ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोऽबुधः।
ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान्।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि श्वर्षिसंवादे सप्तदशाधिकशततोऽध्यायः॥ ११७॥
॥ भीष्म उवाच॥ स श्वा प्रकृतिमापन्नः परं दैन्यमुपागतः। ऋषिणा हुङ्कृतः पापस्तपोवनबहिष्कृतः।
एवं राज्ञा मतिमता विदित्वा सत्यशौचतां। आर्ज्जवं प्रकृतिं सत्यं श्रुतं वृत्तं कुलं दमं।
अनुक्रोशं बलं वीर्य्यं प्रभावं प्रश्रयं क्षमां। भृत्या ये यत्र योग्याः स्युस्तत्र स्थाप्याः सुरक्षिताः। ४३०५
नापरीक्ष्य महीपालः सचिवं कर्त्तुमर्हति। अकुलीननराकीर्णो न राजा सुखमेधते।
कुलजः प्रकृतो राज्ञा स्वकुलीनतया सदा। न पापे कुरुते बुद्धिं भिद्यमानोऽप्यनागसि।
अकुलीनस्तु पुरुषः प्राकृतः साधुसंश्रयात्। दुर्लभैश्वर्य्यतां प्राप्तो निन्दितः शत्रुतां व्रजेत्।
कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगं। सर्व्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा।
कृतज्ञं बलवन्तञ्च क्षान्तं दान्तं जितेन्द्रियं। अलुब्धं लब्धसन्तुष्टं स्वामिमित्रबुभूषकं। ४३१०
सचिवं देशकालज्ञं सत्त्वसंग्रहणे रतं। सततं युक्तमनसं हितैषिणमतन्द्रितं।
युक्ताचारं स्वविषये सन्धिविग्रहकोविदं। राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियं।
खातकव्यूहतत्त्वज्ञं बलहर्षणकोविदं। इङ्गिताकारतत्त्वज्ञं यात्राज्ञानविशारदं।
हस्तिशिक्षासु तत्त्वज्ञमहङ्कारविवर्ज्जितं। प्रगल्भं दक्षिणं दान्तं बलिनं युक्तकारिणं।
चौक्षं चौक्षजनाकीर्णं सुमुखं सुखदर्शनं। नायकं नीतिकुशलं गुणचेष्टासमन्वितं। ४३१५
अस्तब्धं प्रसृतं श्लक्ष्णं मृदुवादिनमेव च। धीरं शूरं महर्द्धिञ्च देशकालोपपादकं।
सचिवं यः प्रकुरुते न चैनमवमन्यते। तस्य विस्तीर्य्यते राज्यं ज्योत्स्ना ग्रहपतेरिव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jatgaon

एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः । एष्टव्यो धर्म्मपरमः प्रजापालनतत्परः ।
धीरोऽमर्षी शुचिस्तीक्ष्णः काले पुरुषकारवित् । शुश्रूषुः श्रुतवान् श्रोता ऊहापोहविशारदः ।
मेधावी धारणायुक्तो यथा न्यायोपपादकः । दान्तः सदा प्रियाभाषी क्षमावांश्च विपर्य्यये । ४३१०
दानाच्छेदे स्वयं कारी श्रद्धालुः सुखदर्शनः । आर्त्तहस्तप्रदो नित्यममात्यो हि हिते रतः ।
नाहंवादी न निर्द्वन्द्वो न यत् किञ्चनकारकः । कृते कर्म्मण्यमात्यानां कर्त्ता भक्तजनप्रियः ।
सङ्गृहीतजनोऽस्तब्धः प्रसन्नवदनः सदा । सदा भृत्यजनापेक्षी न क्रोधी सुमहामनाः ।
युक्तदण्डो न निर्द्दण्डो धर्म्मकार्य्यानुशासनः । चारनेत्रः प्रजावेक्षी धर्म्मार्थकुशलः सदा ।
राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत् । योधाश्चैव मनुष्येन्द्र सर्व्वे गुणगणैर्वृताः । ४३१५
अन्वेष्टव्याः सुपुरुषाः सहाया राज्यधारणे । न विमानयितव्यास्ते राज्ञा वृद्धिमभीप्सता ।
योधाः समरशौण्डीराः कृतज्ञाः शास्त्रकोविदाः । धर्म्मशास्त्रसमायुक्ताः पदातिजनसंवृताः ।
अभया गजपृष्ठस्था रथचर्य्याविशारदाः । इष्वस्त्रकुशला यस्य तस्येयं नृपतेर्म्मही ।
सर्व्वसंग्रहणे युक्तो नृपो भवति यः सदा । उत्थानशीलो मित्राढ्यः स राजा राजसत्तमः ।
शक्या चाश्वसहस्रेण वीरारोहेण भारत । संगृहीतमनुष्येण कृत्स्ना जेतुं वसुन्धरा । ४३२०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि श्वर्षिसंवादे अष्टादशाधिकशततोऽध्यायः ॥ ११८ ॥
॥ भीष्म उवाच ॥ एवं शुना समान् भृत्यान् स्वे स्वे स्थाने नराधिपः । नियोजयति कृत्येषु स राज्यफलमश्नुते ।
न श्वा स्वं स्थानमुत्क्रम्य प्रमाणमभिसत्कृतः । आरोप्यः श्वा स्वकात् स्थानादुत्क्रम्यान्यत् प्रमाद्यति ।
स्वजातिगुणसम्पन्नाः स्वेषु कर्म्मसु संस्थिताः । प्रकर्त्तव्या ह्यमात्यास्तु नास्थाने प्रक्रिया क्षमा ।
अनुरूपाणि कर्म्माणि भृत्येभ्यो यः प्रयच्छति । स भृत्यगुणसम्पन्नो राजा फलमुपाश्नुते ।
शरभः शरभस्थाने सिंहः सिंह इवोर्ज्जितः । व्याघ्रो व्याघ्र इव स्थाप्यो द्वीपी द्वीपी यथा तथा । ४३२५
कर्म्मस्विहानुरूपेषु न्यस्या भृत्या यथाविधि । प्रतिलोमं न भृत्यास्ते स्थाप्याः कर्म्मफलैषिणः ।
यः प्रमाणमतिक्रम्य प्रतिलोमं नराधिपः । भृत्यान् स्थापयतेऽबुद्धिर्न स रञ्जयते प्रजाः ।
न वालिशा न च क्षुद्रा नाप्राज्ञा नाजितेन्द्रियाः । नाकुलीना नराः सर्व्वे स्थाप्या गुणगणैषिणा ।
साधवः कुलजाः शूरा ज्ञानवन्तोऽनसूयकाः । अक्षुद्राः शुचयो दक्षाः स्युर्नराः पारिपार्श्वकाः ।
न्यग्भूतास्तत्पराः शान्ताश्चोक्षाः प्रकृतिजैः शुभाः । स्वस्थानानपकृष्टा ये ते स्यू राज्ञां वहिश्चराः । ४३३०
सिंहस्य सततं पार्श्वे सिंह एवानुगो भवेत् । असिंहः सिंहसहितः सिंहवल्लभते फलं ।
यस्तु सिंहः श्वभिः कीर्णः सिंहकर्म्मफले रतः । न स सिंहफलं भोक्तुं शक्तः श्वभिरुपासितः ।
एवमेतन्मनुष्येन्द्र शूरैः प्राज्ञैर्ब्बहुश्रुतैः । कुलीनैः सह शक्येत कृत्स्ना जेतुं वसुन्धरा ।
नाविद्यो नानृजुः पार्श्वे नाप्राज्ञो नामहाधनः । संग्राह्यो वसुधपालैर्भृत्या भृत्यवताम्बरः ।
वाणवद्विसृता यान्ति स्वामिकार्य्यपरा नराः । ये भृत्याः पार्थिवहितास्तेषां सान्त्वं प्रयोजयेत् । ४३३५
कोषश्च सततं रक्ष्यो यत्नमास्थाय राजभिः । कोषमूला हि राजानः कोषो वृद्धिकरो भवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कोष्ठागारञ्च ते नित्यं स्फीतैर्द्धान्यैः सुसंवृतं । सदाऽस्तु सत्सु संन्यस्तं धनधान्यपरो भव ।
नित्ययुक्ताश्च ते भृत्या भवन्तु रणकोविदाः । वाजिनाञ्च प्रयोगेषु वैशारद्यमिहेष्यते ।
ज्ञातिबन्धुजनावेक्षी मित्रसम्बन्धिसंवृतः । पौरकार्य्यहितान्वेषी भव कौरवनन्दन ।
एषा ते नैष्ठिकी बुद्धिः प्रजास्वभिहिता मया । शुनो निदर्शनं तात किं भूयः श्रोतुमिच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषिसंवादे ऊनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

॥ युधिष्ठिर उवाच ॥ राजवृत्तान्यनेकानि त्वया प्रोक्तानि भारत । पूर्व्वैः पूर्व्वनियुक्तानि राजधर्म्मार्थवेदिभिः ।
तदेव विस्तरेणोक्तं पूर्व्वदृष्टं सतां मतं । प्रणेयं राजधर्म्माणां प्रब्रूहि भरतर्षभ ।
॥ भीष्म उवाच ॥ रक्षणं सर्व्वभूतानामिति क्षात्रं परं मतं । तद्यथा रक्षणं कुर्य्यात्तथा शृणु महीपते ।
यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः । तथा बहुविधं राजा रूपं कुर्व्वीत धर्म्मवित् ।
तैक्ष्ण्यं जिह्मत्वमादानं सत्यमार्ज्जवमेव च । मध्यस्थः सत्त्वमातिष्ठंस्तथा वै सुखमृच्छति ।
यस्मिन्नर्थे हितं यत् स्यात्तद्वर्णं रूपमाविशेत् । बहुरूपस्य राज्ञो हि सूक्ष्मोऽप्यर्थो न सीदति ।
नित्यं रक्षितमन्त्रः स्याद्यथा मूकः शरच्छिखी । श्लक्ष्णाक्षरतनुः श्रीमान् भवेच्छास्त्रविशारदः ।
आपद्द्वारेषु युक्तः स्याज्जलप्रस्रवणेष्विव । शैलवर्षोदकानीव द्विजान् सिद्धान् समाश्रयेत् ।
अर्थकामः शिखां राजा कुर्य्याद्धर्म्मध्वजोपमां । नित्यमुद्यतदण्डः स्यादाचरेदप्रमादतः ।
लोके चायव्ययौ दृष्ट्वा वृहद्वृक्षमिवास्रवत् । मृजावान् स्यात् स्वयूथ्येषु भौमानि चरणैः क्षिपेत् ।
जातपक्षः परिस्पन्देत् प्रेक्षेद्वैकल्यमात्मनः । दोषान् विवृणुयाच्छत्रोः परपक्षान् विधूनयेत् ।
काननेष्विव पुष्पाणि बर्हिरर्थान् समाचरन् । उच्छ्रितान्नाशयेत् स्फीतान् नरेन्द्रानचलोपमान् ।
श्रयेच्छायामविज्ञातां गुप्तं रणमुपश्रयेत् । प्रावृषीवासितग्रीवो मज्जेत निशि निर्ज्जने ।
मायूरेण गुणेनैव स्त्रीभिश्चावेक्षितश्चरेत् । न जह्याच्च तनुत्राणं रक्षेदात्मानमात्मना ।
चारभूमिष्वभिगतान् पाशांश्च परिवर्ज्जयेत् । प्रणयेद्वापि तां भूमिं प्रणश्येद्गहने पुनः ।
हन्यात् क्रुद्धानतिविषान् ये जिह्मगतयो हितान् । नाशयेद्बलबर्हाणि सन्निवासान्निवासयेत् ।
सदा बर्हिनिभः कामं प्रशस्तं कृतमाचरेत् । सर्व्वतश्चाददेत् प्रज्ञां पतङ्गं गहनेष्विव ।
एवं मयूरवद्राजा स्वराज्यं परिपालयेत् । आत्मवृद्धिकरीं नीतिं विदधीत विचक्षणः ।
आत्मसंयमनं बुद्ध्या परबुद्ध्याऽवधारणं । बुद्ध्या चात्मगुणप्राप्तिरेतच्छास्त्रनिदर्शनं ।
परं विश्वासयेत् साम्ना स्वशक्तिञ्चोपलक्षयेत् । आत्मनः परिमर्षेण बुद्धिं बुद्ध्या विचारयेत् ।
सान्त्वयोगमतिः प्राज्ञः कार्य्याकार्य्यप्रयोजकः । निगूढबुद्धेर्धीरस्य वक्तव्ये वा कृतं तथा ।
संनिकृष्टां कथां प्राज्ञो यदि बुद्ध्या बृहस्पतिः । स्वभावमेष्यते तप्तं कृष्णायसमिवोदके ।
अनुयुञ्जीत कृत्यानि सर्व्वाण्येव महीपतिः । आगमैरुपदिष्टानि स्वस्य चैव परस्य च ।
मृदुशीलं तथा प्राज्ञं शूरञ्चार्थविधानवित् । स्वकर्म्मणि नियुञ्जीत ये चान्ये च बलाधिकाः ।
अथ दृष्ट्वा नियुक्तानि स्वानुरूपेषु कर्म्मसु । सर्व्वांस्ताननुवर्त्तेत शरास्तन्त्रीरिवायताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्माणामविरोधेन सर्व्वेषां प्रियमाचरेत् । ममायमिति राजा यः स पर्व्वत इवाचलः ।
व्यवसायं समाधाय सूर्य्यो रश्मीनिवायतान् । धर्म्ममेवाभिरक्षेत कृत्वा तुल्ये प्रियाप्रिये ।
कुलप्रकृतिदेशानां धर्म्मज्ञान्मृदुभाषिणः । मध्ये वयसि निर्द्दोषान् हिते युक्तानविक्लवान् ।
अलुब्धान् शिक्षितान् दान्तान् धर्म्मेषु परिनिष्ठितान् । स्थापयेत् सर्व्वकार्य्येषु राजा धर्म्मार्थरक्षिणः ।
एतेन च प्रकारेण कृत्यानामागतिं गतिं । युक्तः समनुतिष्ठेत तुष्टश्चारैरुपस्कृतः । ४३८०
अमोघक्रोधहर्षस्य स्वयं कृत्यान्ववेक्षितुः । आत्मप्रत्ययकोषस्य वसुदैव वसुन्धरा ।
व्यक्तश्चानुग्रहो यस्य यथार्थश्चापि निग्रहः । गुप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्म्मवित् ।
नित्यं राष्ट्रमवेक्षेत गोभिः सूर्य्य इवोदितः । चरान् स्वनुचरान् विद्यात्तथा बुद्ध्या स्वयं चरेत् ।
कालं प्राप्तमुपादद्यान्नार्थं राजा प्रसूचयेत् । अहन्यहनि सन्दुह्यान्महीं गामिव बुद्धिमान् ।
यथाक्रमेण पुष्पेभ्यश्चिनोति मधु षट्पदः । तथा द्रव्यमुपादाय राजा कुर्व्वीत सञ्चयं । ४३८५
यद्धि गुप्तावशिष्टं स्यात्तद्वित्तं धर्म्मकामयोः । सञ्चयान्न विसर्गी स्याद्राजा शास्त्रविदात्मवान् ।
नार्थमल्पं परिभवेन्नावमन्येत शात्रवान् । बुद्ध्या तु बुध्येदात्मानं न चाबुद्धिषु विश्वसेत् ।

धृतिर्द्दाक्ष्यं संयमो बुद्धिरात्मा धैर्य्यं शौर्य्यं देशकालाप्रमादः । अल्पस्य वा बहुनो वापि वृद्धौ धनस्यैतान्यष्ट समिन्धनानि ।

अग्निः स्तोको वर्द्धते ऽप्याज्यसिक्तो वीजञ्चैकं रोहसहस्रमेति । आयव्ययौ विपुलौ संनिशाम्य तस्मादल्पं नावमन्येत वित्तं ।

बालोऽप्यबालः स्थविरो रिपुर्यः सदा प्रमत्तं पुरुषं निहन्यात् । कालेनान्यस्तस्य मूलं हरेत कालज्ञाता पार्थिवानां वरिष्ठः । ४३९०

हरेत् कीर्त्तिं धर्म्ममस्योपरुन्ध्यादर्थे दीर्घं वीर्य्यमस्योपहन्यात् । रिपुर्द्वेष्टा दुर्ब्बलो वा बली वा तस्माच्छत्रौ नैव हीयेद्यतात्मा ।

क्षयं वृद्धिं पालनं सञ्चयं वा बुद्ध्वाऽप्युभौ संहतौ सर्व्वकामौ । ततश्चान्यन्मतिमान् सन्दधीत तस्माद्राजा बुद्धिमतां श्रयेत ।

बुद्धिर्द्दीप्ता बलवन्तं हिनस्ति बलं बुद्ध्या पाल्यते वर्द्धमानं । शत्रुर्ब्बुद्ध्या सीदते वर्द्धमानो बुद्धेः पश्चात् कर्म्म यत्तत् प्रशस्तं ।

सर्व्वान् कामान् कामयानो हि धीरः सत्त्वेनाल्पेनाप्नुते हीनदोषः । यश्चात्मानं प्रार्थयतेऽर्थ्यमानैः श्रेयःपात्रं पूरयते च नाल्पं ।

तस्माद्राजा प्रगृहीतः प्रजासु मूलं लक्ष्म्याः सर्व्वशो ह्याददीत । दीर्घं कालं ह्यपि सम्पीड्यमानो विद्युत्सम्पातमपि वा नोर्ज्जितः स्यात् । ४३९५

विद्या तपो वा विपुलं धनं वा सर्व्वं ह्येतद्व्यवसायेन शक्यं । बुद्ध्यायत्तं तन्निवसेद्देहवत्सु तस्माद्विद्याद्व्यवसायं प्रभूतं ।
यत्रासते मतिमन्तो मनस्विनः शक्रो विष्णुर्यत्र सरस्वती च । वसन्ति भूतानि च यत्र नित्यं तस्माद्विद्वान्नावमन्येत देहं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

लुब्धं हन्यात् सम्प्रदानेन नित्यं लुब्धस्तृप्तिं परवित्तस्य नैति । सर्व्वो लुब्धः कर्म्मगुणोपभोगे योऽर्थैर्हीनो धर्म्मकामौ जहाति ।

धनं भोगं पुत्त्रदारं समृद्धिं सर्व्वं लुब्धः प्रार्थयते परेषां । लुब्धे दोषाः सम्भवन्तीह सर्व्वे तस्माद्राजा न प्रगृह्णीत लुब्धं ।

सन्दर्शनेन पुरुषं जघन्यमपि चोदयेत् । आरम्भान् द्विषतां प्राज्ञः सर्व्वार्थांश्च प्रसूदयेत् । ४४००

धर्म्मान्वितेषु विज्ञाता मन्त्री गुप्तश्च पाण्डव । आप्तो राजा कुलीनश्च पर्य्याप्तो राजसंग्रहे ।

विधिप्रयुक्तान्नरदेवधर्म्मानुक्तान् समासेन निबोध बुद्ध्या । इमान् विदध्याद्व्यतिसृत्य यो वै राजा महीं पालयितुं स शक्तः ।

न नीतिजं यस्य विधानजं सुखं हठप्रणीतं विधिवत् प्रदृश्यते । न विद्यते तस्य गतिर्म्महीपतेर्न विद्यते राज्यसुखं ह्यनुत्तमं ।

धनैर्व्विशिष्टान्मतिशीलपूजितान् गुणोपपन्नान् युधि दृष्टविक्रमान् । गुणेषु दृष्ट्वा न चिरादिवात्मवान् यतोऽभिसन्धाय निहन्ति शात्रवान् ।

पश्येदुपायान् विविधैः क्रियापथैर्न चानुपायेन मतिं निवेशयेत् । श्रियं विशिष्टां विपुलं यशोधनं न दोषदर्शी पुरुषः समश्नुते । ४४०५

प्रीतिप्रवृत्तौ विनिवर्त्तितौ यथा सुहृत्सु विज्ञाय निवृत्त्य चोभयोः । यदेव मित्रं गुरुभारमावहेत्तदेव सुस्निग्धमुदाहरेद्बुधः ।

एतान्मयोक्तांश्चर राजधर्म्मान् नृणाञ्च गुप्तौ मतिमादधत्स्व । अवाप्स्यसे पुण्यफलं सुखेन सर्व्वो हि लोको नृप धर्म्ममूलः ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि विंशत्यधिकशतोऽध्यायः ॥ १२० ॥

॥ युधिष्ठिर उवाच ॥ अयं पितामहेनोक्तो राजधर्म्मः सनातनः । ईश्वरश्च महान् दण्डो दण्डे सर्व्वं प्रतिष्ठितं ।

देवतानामृषीणाञ्च पितॄणाञ्च महात्मनां । यक्षरक्षःपिशाचानां साध्यानाञ्च विशेषतः ।

सर्व्वेषां प्राणिनां लोके तिर्य्यग्योनिनिवासिनां । सर्व्वव्यापी महातेजा दण्डः श्रेयानिति प्रभो । ४४१०

इत्येवमुक्तं भवता दण्डे वै सचराचरं । पश्यतो लोकमासक्तं ससुरासुरमानुषं ।

एतदिच्छाम्यहं ज्ञातुं तत्त्वेन भरतर्षभ । को दण्डः कीदृशो दण्डः किंरूपः किम्परायणः ।

किमात्मकः कथम्भूतः कथम्मूर्त्तिः कथं प्रभो । जागर्त्ति च कथं दण्डः प्रजास्ववहितात्मकः ।

कश्च पूर्व्वापरमिदं जागर्त्ति प्रतिपालयन् । कश्च विज्ञायते पूर्व्वं को वरो दण्डसंज्ञितः ।

किं संस्थश्च भवेद्दण्डः का वाऽस्य गतिरुच्यते । ४४१५

॥ भीष्म उवाच ॥ शृणु कौरव्य यो दण्डो व्यवहारो यथा च सः । यस्मिन् हि सर्व्वमायत्तं स दण्ड इह केवलः ।

धर्म्मसंख्या महाराज व्यवहार इतीष्यते । तस्य लोपः कथं न स्याल्लोकेष्ववहितात्मनः ।

इत्येवं व्यवहारस्य व्यवहारत्वमिष्यते । अपि चैतत् पुरा राजन् मनुना प्रोक्तमादितः ।

सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना । प्रजा रक्षति यः सम्यक् धर्म्म एव स केवलः ।

यथोक्तमेतद्वचनं प्रागेव मनुना पुरा । यन्मयोक्तं मनुष्येन्द्र ब्रह्मणो वचनं महत् । ४४२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रागिदं वचनं प्रोक्तमतः प्रागवचनं विदुः । व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते ।
दण्डे त्रिवर्गः सततं सुप्रणीते प्रवर्त्तते । दैवं हि परमो दण्डो रूपतोऽग्निरिवोत्थितः ।
नीलोत्पलदलश्यामश्चतुर्द्दंष्ट्रश्चतुर्भुजः । अष्टपान्नैकनयनः शङ्कुकर्णोऽर्द्ध्वरोमवान् ।
जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः । एतद्रूपं विभर्त्युग्रं दण्डो नित्यं दुराधरः ।
असिर्द्धनुर्गदा शक्तिस्त्रिशूलं मुद्गरः शरः । मुषलं परशुश्चक्रं पाशो दण्डर्ष्टितोमराः ।
सर्व्वप्रहरणीयानि सन्ति यानि इह कानिचित् । दण्ड एव स सर्व्वात्मा लोके चरति मूर्त्तिमान् ।
भिन्दन् छिन्दन् रुजन् कृन्तन् दारयन् पाटयंस्तथा । घातयन्नभिधावंश्च दण्ड एव चरत्युत ।
असिर्व्विशसनो धर्म्मस्तीक्ष्णवर्म्मा दुराधरः । श्रीगर्भो विजयः शास्ता व्यवहारः सनातनः ।
शास्त्रं ब्राह्मणमन्त्राश्च शास्ता प्रागवदताम्वर । धर्म्मपालो ऽक्षरो देवः सत्यगो नित्यगोऽग्रजः ।
असङ्गो रुद्रतनयो मनुर्ज्येष्ठः शिवङ्करः । नामान्येतानि दण्डस्य कीर्त्तितानि युधिष्ठिर ।
दण्डो हि भगवान् विष्णुर्द्दण्डो नारायणः प्रभुः । शश्वद्रूपं महद्बिभ्रन्महापुरुष उच्यते ।
तथोक्ता ब्रह्मकन्येति लक्ष्मीर्वृत्तिः सरस्वती । दण्डनीतिर्ज्जगद्धात्री दण्डो हि बहुविग्रहः ।
अर्थानर्थौ सुखं दुःखं धर्म्माधर्म्मौ बलाबले । दौर्भाग्यं भागधेयञ्च पुण्यापुण्ये गुणागुणौ ।
कामाकामावृतुर्म्मासः शर्व्वरी दिवसः क्षणः । अप्रमादः प्रमादश्च हर्षक्रोधौ शमो दमः ।
दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये । हिंसाहिंसे तपो यज्ञः संयमोऽथविषाविषं ।
अन्तश्चादिश्च मध्यञ्च कृत्यानाञ्च प्रपञ्चनं । मदः प्रमादो दर्पश्च दम्भो धैर्य्यं नयानयौ ।
अशक्तिः शक्तिरित्येवं मानस्तम्भौ व्ययाव्ययौ । विनयश्च विसर्गश्च कालाकालौ च भारत ।
अनृतं ज्ञानिता सत्यं श्रद्धाश्रद्धे तथैव च । क्लीवता व्यवसायश्च लाभालाभौ जयाजयौ ।
तीक्ष्णता मृदुता मृत्युरागमानागमौ तथा । विरोधश्चाविरोधश्च कार्य्याकार्य्ये बलाबले ।
असूया चानसूया च धर्म्माधर्म्मौ तथैव च । अपत्रपानपत्रपे ह्रीश्च सम्पद्विपत्पदं ।
तेजः कर्म्माणि पाण्डित्यं वाक् शक्तिस्तत्त्वबुद्धिता । एवं दण्डस्य कौरव्य लोकेऽस्मिन् बहुरूपता ।
नस्याद्यदीह दण्डो वै प्रमथेयुः परस्परं । भयाद्दण्डस्य नान्योन्यं घ्नन्ति चैव युधिष्ठिर ।
दण्डेन रक्ष्यमाणा हि राजन्नहरहः प्रजाः । राजानं वर्द्धयन्तीह तस्माद्दण्डः परायणं ।
व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर । सत्ये व्यवस्थितो धर्म्मो ब्राह्मणेष्ववतिष्ठते ।
धर्म्मयुक्ता द्विजश्रेष्ठा देवयुक्ता भवन्ति च । बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः ।
प्रीताश्च देवता नित्यमिन्द्रे परिवदन्त्यपि । अन्नं ददाति शक्रश्चाप्यनुगृह्णन्निमाः प्रजाः ।
प्राणाश्च सर्व्वभूतानां नित्यमन्ने प्रतिष्ठिताः । तस्मात् प्रजाः प्रतिष्ठन्ते दण्डो जागर्त्ति तासु च ।
एवंप्रयोजनश्चैव दण्डः क्षत्रियतां गतः । रक्षन् प्रजाः स जागर्त्ति नित्यं सुवहितोऽक्षरः ।
ईश्वरः पुरुषः प्राणः सत्त्वं चित्तं प्रजापतिः । भूतात्मा जीव इत्येवं नामभिः प्रोच्यतेऽष्टभिः ।
अददद्दण्डमेवास्मै ध्रुवमैश्वर्य्यमेव च । बलेन यश्च संयुक्तः सदा पञ्चविधात्मकः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant. Equipment Heritage Foundation, Jalgaon

कुलं बह्वधनामात्याः प्राज्ञाः प्रोक्ता बलानि तु । आहार्य्यमष्टकैर्द्रव्यैर्बलमन्यद्युधिष्ठिर ।

हस्तिनोऽश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च । दैशिकाश्चाविकाश्चैव तदष्टाङ्गं बलं स्मृतं ।

अथवाऽङ्गस्य युक्तस्य रथिनो हस्तियायिनः । अश्वारोहाः पदाताश्च मन्त्रिणो रसदाश्च ये ।

भिक्षुकाः प्राड्विवाकाश्च मौहूर्त्ता दैवचिन्तकाः । कोषो मित्राणि धान्यञ्च सर्व्वोपकरणानि च ।

सप्तप्रकृति चाष्टाङ्गं शरीरमिह यद्विदुः । राज्यस्य दण्डमेवाङ्गं दण्डः प्रभव एव च । ४४५५

ईश्वरेण प्रयत्नेन कारणात् क्षत्त्रियस्य च । दण्डो दत्तः समानात्मा दण्डो हीदं सनातनं ।

राज्ञां पूज्यतमो नान्यो यथा धर्म्मः प्रदर्शितः । ब्रह्मणा लोकरक्षार्थं स्वधर्म्मस्थापनाय च ।

भर्तृप्रत्यय उत्पन्नो व्यवहारस्तथाऽपरः । तस्माद्यः सहितो दृष्टो भर्तृप्रत्ययलक्षणः ।

व्यवहारस्तु वेदात्मा वेदप्रत्यय उच्यते । मौलश्च नरशार्द्दूल शास्त्रोक्तश्च तथाऽपरः ।

उक्तो यश्चापि दण्डोऽसौ भर्तृप्रत्ययलक्षणः । ज्ञेयो नः स नरेन्द्रस्थो दण्डप्रत्ययलक्षणः । ४४६०

दण्डप्रत्ययदृष्टोऽपि व्यवहारात्मकः स्मृतः । व्यवहारः स्मृतो यश्च स वेदविषयात्मकः ।

यश्च वेदप्रसूतात्मा स धर्म्मो गुणदर्शनः । धर्म्मप्रत्यय उद्दिष्टो यथाधर्म्मं कृतात्मभिः ।

व्यवहारः प्रजागोप्ता ब्रह्मदिष्टो युधिष्ठिर । त्रीन् धारयति लोकान् वै सत्यात्मा भूतिवर्द्धनः ।

यश्च दण्डः स दृष्टो नो व्यवहारः सनातनः । व्यवहारश्च दृष्टो यः स वेद इति निश्चितं ।

यश्च वेदः स वै धर्म्मो यश्च धर्म्मः स सत्पथः । ब्रह्मा पितामहः पूर्व्वं बभूवाथ प्रजापतिः । ४४६५

लोकानां स हि सर्व्वेषां ससुरासुररक्षसां । समनुष्योरगवतां कर्त्ता चैव स भूतकृत् ।

ततोऽन्यव्यवहारोऽयं भर्तृप्रत्ययलक्षणः । तस्मादिदमथोवाच व्यवहारनिदर्शनं ।

माता पिता च भ्राता च भार्य्या चैव पुरोहितः । नादण्ड्यो विद्यते राज्ञो यः स धर्म्मेण तिष्ठति ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि दण्डकथने एकविंशत्यधिकशतोऽध्यायः ॥ १२१ ॥

॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । अङ्गेषु राजा द्युतिमान् वसुहोम इति श्रुतः ।

स राजा धर्म्मविन्नित्यं सह पत्न्या महातपाः । मुञ्जपृष्ठं जगामाथ पितृदेवर्षिपूजितं । ४४७०

तत्र शृङ्गे हिमवतो मेरौ कनकपर्व्वते । यत्र मुञ्जावटे रामो जटाहरणमादिशत् ।

तदा प्रभृति राजेन्द्र ऋषिभिः संशितव्रतैः । मुञ्जपृष्ठ इति प्रोक्तः स देशो रुद्रसेवितः ।

स तत्र बहुभिर्युक्तस्तदा श्रुतिमयैर्गुणैः । ब्राह्मणानामनुमतो देवर्षिसदृशोऽभवत् ।

तं कदाचिददीनात्मा सखा शक्रस्य मानिता । अभ्यगच्छन्महीपालो मान्धाता शत्रुकर्शनः ।

सोऽपसृत्य तु मान्धाता वसुहोमं नराधिपं । दृष्ट्वा प्रकृष्टतपसं विनतोऽग्रेऽभ्यतिष्ठत । ४४७५

वसुहोमोऽपि राज्ञो वै पाद्यमर्घ्यं न्यवेदयत् । सप्ताङ्गस्य तु राज्यस्य पप्रच्छ कुशलाव्यये ।

सद्भिराचरितं पूर्व्वं यथावदनुयायिनं । अपृच्छद्वसुहोमस्तं राजन् किं करवाणि ते ।

सोऽब्रवीत् परमप्रीतो मान्धाता राजसत्तमः । वसुहोमं महाप्राज्ञमासीनं कुरुनन्दन ।

॥ मान्धातोवाच ॥ बृहस्पतेर्मतं राजन्नधीतं सकलं त्वया । तथैवौशनसं शास्त्रं विज्ञातं ते नरोत्तम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदहं ज्ञातुमिच्छामि दण्ड उत्पद्यते कथं । किञ्चास्य पूर्व्वं जागर्त्ति किं वा परममुच्यते । ४४८०
कथं क्षत्रियसंस्थस्य दण्डः सम्प्रत्यवस्थितः । ब्रूहि मे सुमहाप्राज्ञ ददाम्याचार्य्य वेतनं ।
॥ वसुहोम उवाच ॥ शृणु राजन् यथा दण्डः सम्भूतो लोकसंग्रहः । प्रजाविनयरक्षार्थं धर्म्मस्यात्मा सनातनः ।
ब्रह्मा यियक्षुर्भगवान् सर्व्वलोकपितामहः । ऋत्विजं नात्मनस्तुल्यं ददर्शेति हि नः श्रुतं ।
स गर्भं शिरसा देवो बहुवर्षाण्यधारयत् । पूर्णे वर्षसहस्रे तु स गर्भः क्षुवतोऽपतत् ।
स क्षुपो नाम सम्भूतः प्रजापतिररिन्दम । ऋत्विगासीन्महाराज यज्ञे तस्य महात्मनः । ४४८५
तस्मिन् प्रवृत्ते सत्रे तु ब्रह्मणः पार्थिवर्षभ । दृष्टरूपप्रधानत्वाद्दण्डः सोऽन्तर्हितोऽभवत् ।
तस्मिन्नन्तर्हिते चापि प्रजानां सङ्करोऽभवत् । नैव कार्य्यं नवाऽकार्य्यं भोज्याभोज्यं न विद्यते ।
पेयापेये कुतः सिद्धिर्हिंसन्ति च परस्परं । गम्यागम्यं तदा नासीत् स्वं परस्वञ्च वै समं ।
परस्परं विलुम्पन्ति सारमेया यथामिषं । अबलान् बलिनो घ्नन्ति निर्म्मर्य्यादमवर्त्तत ।
ततः पितामहो विष्णुं भगवन्तं सनातनं । संपूज्य वरदं देवं महादेवमथाब्रवीत् । ४४९०
अत्र त्वमनुकम्पां वै कर्त्तुमर्हसि केशव । सङ्करो न भवेदत्र यथा तद्वै विधीयतां ।
ततः स भगवान् ध्यात्वा चिरं शूलवरायुधः । आत्मानमात्मना दण्डं ससृजे देवसत्तमः ।
तस्माच्च धर्म्मचरणान्नीतिर्देवी सरस्वती । ससृजे दण्डनीतिं सा त्रिषु लोकेषु विश्रुतां ।
भूयः स भगवान् ध्यात्वा चिरं शूलवरायुधः । तस्य तस्य निकायस्य चकारैकैकमीश्वरं ।
देवानामीश्वरञ्चक्रे देवं दशशतेक्षणं । यमं वैवस्वतञ्चापि पितॄणामकरोत् प्रभुं । ४४९५
धनानां राक्षसानाञ्च कुवेरमपि चेश्वरं । पर्व्वतानां पतिं मेरुं सरिताञ्च महोदधिं ।
अपां राज्ये ऽसुराणाञ्च विदधे वरुणं प्रभुं । मृत्युं प्राणेश्वरमथो तेजसाञ्च हुताशनं ।
रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुं । महात्मानं महादेवं विशालाक्षं सनातनं ।
वशिष्ठमीशं विप्राणां वसूनां जातवेदसं । तेजसां भास्करञ्चक्रे नक्षत्राणां निशाकरं ।
वीरुधामंशुमन्तञ्च भूतानाञ्च प्रभुं वरं । कुमारं द्वादशभुजं स्कन्दं राजानमादिशत् । ४५००
कालं सर्व्वेशमकरोत् संहारविनयात्मकं । मृत्योश्चतुर्व्विभागस्य दुःखस्य च सुखस्य च ।
ईश्वरः सर्व्वदेवस्तु राजराजो नराधिपः । सर्व्वेषामेव रुद्राणां शूलपाणिरिति श्रुतिः ।
तमेनं ब्रह्मणः पुत्त्रमनुजातं क्षुपं ददौ । प्रजानामधिपं श्रेष्ठं सर्व्वभूतभृतामपि ।
महादेवस्ततस्तस्मिन् वृत्ते यज्ञे यथाविधि । दण्डं धर्म्मस्य गोप्तारं विष्णवे सत्कृतं ददौ ।
विष्णुरङ्गिरसे प्रादादङ्गिरा मुनिसत्तमः । प्रादादिन्द्रमरीचिभ्यां मरीचिर्भृगवे ददौ । ४५०५
भृगुर्ददावृषिभ्यस्तु दण्डं धर्म्मसमाहितं । ऋषयो लोकपालेभ्यो लोकपालाः क्षुपाय च ।
क्षुपस्तु मनवे प्रादादादित्यतनयाय च । पुत्त्रेभ्यः श्राद्धदेवस्तु सूक्ष्मधर्म्मार्थकारणात् ।
विभज्य दण्डः कर्त्तव्यो धर्म्मेण न यदृच्छया । दुष्टानां निग्रहो दण्डो हिरण्यं वाह्यतः क्रिया ।
व्यङ्गत्वञ्च शरीरस्य वधो नाल्पस्य कारणात् । शरीरपीडास्तास्ताश्च देहत्यागो विवासनं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं ददौ सूर्य्यपुत्रस्तु मनुर्व्वै रक्षणार्थकं। आनुपूर्व्व्या च दण्डोऽयं प्रजा जागर्त्ति पालयन्। ४५१०
इन्द्रो जागर्त्ति भगवानिन्द्रादग्निर्विभावसुः। अग्नेर्जागर्त्ति वरुणो वरुणाच्च प्रजापतिः।
प्रजापतेस्ततो धर्म्मो जागर्त्ति विनयात्मकः। धर्म्माच्च ब्रह्मणः पुत्रो व्यवसायः सनातनः।
व्यवसायात्ततस्तेजो जागर्त्ति परिपालयन्। ओषध्यस्तेजसस्तस्मादोषधीभ्यश्च पर्व्वताः।
पर्व्वतेभ्यश्च जागर्त्ति रसो रसगुणास्तथा। जागर्त्ति निर्ऋतिर्देवी ज्योतींषि निर्ऋतेरपि।
वेदाः प्रतिष्ठा ज्योतिर्भ्यस्ततो हयशिराः प्रभुः। ब्रह्मा पितामहस्तस्माज्जागर्त्ति प्रभुरव्ययः। ४५१५
पितामहान्महादेवो जागर्त्ति भगवान् शिवः। विश्वेदेवाः शिवाच्चापि विश्वेभ्यश्च तथर्षयः।
ऋषिभ्यो भगवान् सोमः सोमाद्देवाः सनातनाः। देवेभ्यो ब्राह्मणा लोके जाग्रतीत्युपधारय।
ब्राह्मणेभ्यश्च राजन्या लोकान्रक्षन्ति धर्म्मतः। स्थावरं जङ्गमञ्चैव क्षत्रियेभ्यः सनातनं।
प्रजा जाग्रति लोकेऽस्मिन् दण्डो जागर्त्ति तासु च। सर्व्वं संक्षिपते दण्डः पितामहसमप्रभः।
जागर्त्ति कालः पूर्व्वञ्च मध्ये चान्ते च भारत। ईश्वरः सर्व्वलोकस्य महादेवः प्रजापतिः। ४५२०
देवदेवः शिवः शर्व्वो जागर्त्ति सततं प्रभुः। कपर्द्दी शङ्करो रुद्रः शिवः स्थाणुरुमापतिः।
इत्येष दण्डो विख्यात आदौ मध्ये तथा परे। भूमिपालो यथान्यायं वर्त्ततानेन धर्म्मवित्।
॥ भीष्म उवाच॥ इतीदं वसुहोमस्य शृणुयाद्यो मतं नरः। श्रुत्वा च सम्यग्वर्त्तेत सर्व्वान् कामानवाप्नुयात्।
इति ते सर्व्वमाख्यातं यो दण्डो मनुजर्षभ। नियन्ता सर्व्वलोकस्य धर्म्माक्रान्तस्य भारत।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि दण्डोत्पत्तिकथने द्वाविंशत्यधिकशततोऽध्यायः ॥१२२॥
॥ युधिष्ठिर उवाच ॥ तात सर्व्वार्थकामानां श्रोतुमिच्छामि निश्चयं। लोकयात्रा हि कार्त्स्न्येन तिष्ठेत् केषु प्रति-
ष्ठिता। ४५२५
धर्म्मार्थकामाः किंमूलास्त्रयाणां प्रभवश्च कः। अन्योन्यञ्चानुषज्जन्ते वर्त्तन्ते च पृथक् पृथक्।
॥ भीष्म उवाच ॥ यदा ते स्युः सुमनसो लोके धर्म्मार्थनिश्चये। कालप्रभवसंस्थासु सज्जन्ते च त्रयस्तदा।
धर्म्ममूलः सदैवार्थः कामोऽर्थफलमुच्यते। सङ्कल्पमूलास्ते सर्व्वे सङ्कल्पो विषयात्मकः।
विषयाश्चैव कार्त्स्न्येन सर्व्व आहारसिद्धये। मूलमेतत्त्रिवर्गस्य निवृत्तिर्म्मोक्ष उच्यते।
धर्म्माच्छरीरसंगुप्तिर्द्धर्म्मार्थञ्चार्थ उच्यते। कामो रतिफलश्चात्र सर्व्वे ते च रजस्वलाः। ४५३०
सन्निकृष्टांश्चरेदेतान्न चैतान्मनसा त्यजेत्। विमुक्तस्तपसा सर्व्वान् धर्म्मादीन् कामनैष्ठिकान्।
श्रेष्ठं बुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयान्नरः। बुद्ध्या बुद्धिरिहार्थेन तदज्ञाननिकृष्टया।
अपध्यानमलो धर्म्मो मलोऽर्थस्य निगूहनं। सम्प्रमोदमलः कामो भूयः स्वगुणवर्ज्जितः।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। कामन्दकस्य संवादमाङ्गरिष्ठस्य चोभयोः।
कामन्दमृषिमासीनमभिवाद्य नराधिपः। आङ्गरिष्ठोऽथ पप्रच्छ कृत्वा समयपर्य्ययं। ४५३५
यः पापं कुरुते राजा काममोहबलात्कृतः। प्रत्यासन्नस्य तस्यर्षे किं स्यात् पापप्रणाशनं।
अधर्म्मं धर्म्म इति च योऽज्ञानादाचरेन्नरः। तञ्चापि प्रथितं लोके कथं राजा निवर्त्तयेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ कामन्द उवाच ॥ यो धर्म्मार्थौ परित्यज्य काममेवानुवर्त्तते । स धर्म्मार्थपरित्यागात् प्रज्ञानाशमिहार्च्छति ।
प्रज्ञानाशात्मको मोहस्तथा धर्म्मार्थनाशकः । तस्मान्नास्तिकता चैव दुराचारस्य जायते ।
दुराचारान् यदा राजा प्रदुष्टान्न नियच्छति । तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव ।
तं प्रजा नानुवर्त्तन्ते ब्राह्मणा न च साधवः । ततः संशयमाप्नोति तथा बध्यत्वमेति च ।
अपध्वस्तस्त्ववमतो दुःखं जीवितमृच्छति । जीवेच्च यदपध्वस्तस्तच्छुद्धं मरणं भवेत् ।
अत्रैतदाहुराचार्य्याः पापस्य परिगर्हणं । सेवितव्या त्रयी विद्या सत्कारो ब्राह्मणेषु च ।
महामना भवेद्धर्म्मे विवहेच्च महाकुले । ब्राह्मणांश्चापि सेवेत क्षमायुक्तान्मनस्विनः ।
जपदुदकशीलः स्यात्सततं सुखमास्थितः । धर्म्मान्वितान् सम्प्रविशेद्बहिः कृत्वेह दुष्कृतान् ।
प्रसादयेन्मधुरया वाचा वाऽप्यथ कर्म्मणा । तवास्मीति वदेन्नित्यं परेषां कीर्त्तयन् गुणान् ।
अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवेत् । पापान्यपि हि कृच्छ्राणि शमयेन्नात्र संशयः ।
गुरवो हि परं धर्म्मं यं ब्रूयुस्तं तथा कुरु । गुरूणां हि प्रसादाद्वै श्रेयः परमवाप्स्यसि ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि कामन्दाङ्गरिष्ठसंवादे त्रयोविंशत्यधिकशततोऽध्यायः ॥ १२३ ॥

॥ युधिष्ठिर उवाच ॥ इमे जना नरश्रेष्ठ प्रशंसन्ति सदा भुवि । धर्म्मस्य शीलमेवादौ ततो मे संशयो महान् ।
यदि तच्छक्यमस्माभिर्ज्ञातुं धर्म्मभृताम्वर । श्रोतुमिच्छामि तत् सर्व्वं यथैतदुपलभ्यते ।
कथं तत् प्राप्यते शीलं श्रोतुमिच्छामि भारत । किंलक्षणञ्च तत् प्रोक्तं ब्रूहि मे वदताम्वर ।
॥ भीष्म उवाच ॥ पुरा दुर्य्योधनेनेह धृतराष्ट्राय मानद । आख्यातं तप्यमानेन श्रियं दृष्ट्वा तथागतां ।
इन्द्रप्रस्थे महाराज तव सभ्रातृकस्य ह । सभायाञ्चावहसनं तत् सर्व्वं शृणु भारत ।
भवतस्तां सभां दृष्ट्वा समृद्धिञ्चाप्यनुत्तमां । दुर्य्योधनस्तदासीनः सर्व्वं पित्रे न्यवेदयत् ।
श्रुत्वा हि धृतराष्ट्रस्य दुर्य्योधनवचस्तदा । अब्रवीत् कर्णसहितं दुर्य्योधनमिदं वचः ।
॥ धृतराष्ट्र उवाच ॥ किमर्थं तप्यसे पुत्र श्रोतुमिच्छामि तत्त्वतः । श्रुत्वा त्वामनुनेष्यामि यदि सम्यग्भविष्यति ।
त्वया च महदैश्वर्य्यं प्राप्तं परपुरञ्जय । किङ्करा भ्रातरः सर्व्वे मित्रसम्बन्धिनः सदा ।
आच्छादयसि प्रावारानश्नासि पिशितौदनं । आजानेया वहन्त्यश्वाः केनासि हरिणः कृशः ।
॥ दुर्य्योधन उवाच ॥ दश तानि सहस्राणि स्नातकानां महात्मनां । भुञ्जते रुक्मपात्रीभिर्य्युधिष्ठिरनिवेशने ।
दृष्ट्वा च तां सभां दिव्यां दिव्यपुष्पफलान्वितां । अश्वांस्तित्तिरिकल्माषान् वस्त्राणि विविधानि च ।
दृष्ट्वा तां पाण्डवेयानां ऋद्धिं वैश्रवणीं शुभां । अमित्राणां सुमहतीमनुशोचामि भारत ।
॥ धृतराष्ट्र उवाच ॥ यदीच्छसि श्रियं तात यादृशी सा युधिष्ठिरे । विशिष्टां वा नरव्याघ्र शीलवान् भव पुत्रक ।
शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः । न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत् ।
एकरात्रेण मान्धाता त्र्यहेण जनमेजयः । सप्तरात्रेण नाभागः पृथिवीं प्रतिपेदिरे ।
एते हि पार्थिवाः सर्व्वे शीलवन्तो दयान्विताः । अतस्तेषां गुणक्रीता वसुधा स्वयमागता ।
॥ दुर्य्योधन उवाच ॥ कथं तत् प्राप्यते शीलं श्रोतुमिच्छामि भारत । येन शीलेन तैः प्राप्ता क्षिप्रमेव वसुन्धरा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

॥ धृतराष्ट्र उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । नारदेन पुरा प्रोक्तं शीलमाश्रित्य भारत ।
प्रह्लादेन हृतं राज्यं महेन्द्रस्य महात्मनः । शीलमाश्रित्य दैत्येन त्रैलोक्यञ्च वशे कृतं ।
ततो बृहस्पतिं शक्रः प्राञ्जलिः समुपस्थितः । तमुवाच महाप्राज्ञः श्रेय इच्छामि वेदितुं ।
ततो बृहस्पतिस्तस्मै ज्ञानं नैःश्रेयसं परं । कथयामास भगवान् देवेन्द्राय कुरूद्वह । ४५७०
एतावच्छ्रेय इत्येव बृहस्पतिरभाषत । इन्द्रस्तु भूयः पप्रच्छ को विशेषो भवेदिति ।
॥ बृहस्पतिरुवाच ॥ विशेषोऽस्ति महांस्तात भार्गवस्य महात्मनः । अत्रागमय भद्रन्ते भूयएव सुरर्षभ ।
आत्मनस्तु ततः श्रेयो भार्गवात् सुमहातपाः । ज्ञानमागमयत् प्रीत्या पुनः स परमद्युतिः ।
तेनापि समनुज्ञातो भार्गवेण महात्मना । श्रेयोऽस्तीति पुनर्भूयः शुक्रमाह शतक्रतुः ।
भार्गवस्त्वाह सर्व्वज्ञः प्रह्लादस्य महात्मनः । ज्ञानमस्ति विशेषेणेत्युक्तो हृष्टश्च सोऽभवत् । ४५७५
स ततो ब्राह्मणो भूत्वा प्रह्लादं पाकशासनः । गत्वा प्रोवाच मेधावी श्रेय इच्छामि वेदितुं ।
प्रह्लादस्त्वब्रवीद्विप्रं क्षणो नास्ति द्विजर्षभ । त्रैलोक्यराज्यसक्तस्य ततो नोपदिशामि ते ।
ब्राह्मणस्त्वब्रवीद्राजन् यस्मिन् काले क्षणो भवेत् । तदोपादेष्टुमिच्छामि यदाचर्य्यमनुत्तमं ।
ततः प्रीतोऽभवद्राजा प्रह्लादो ब्रह्मवादिनः । तथेत्युक्त्वा शुभे काले ज्ञानतत्त्वं ददौ तदा ।
ब्राह्मणोऽपि यथान्यायं गुरुवृत्तिमनुत्तमां । चकार सर्व्वभावेन यदस्य मनसेप्सितं । ४५८०
पृष्टश्च तेन बहुशः प्राप्तं कथमरिन्दम । त्रैलोक्यराज्यं धर्म्मज्ञः कारणं तद्ब्रवीहि मे ।
प्रह्लादोऽपि महाराज ब्राह्मणं वाक्यमब्रवीत् ।
॥ प्रह्लाद उवाच ॥ नासूयामि द्विजान् विप्र राजाऽस्मीति कदाचन । काव्यानि वदतां तेषां संयच्छामि वहामि च ।
ते विस्रब्धाः प्रभाषन्ते संयच्छन्ति च मां सदा । ते मां काव्यपथे युक्तं शुश्रूषुमनसूयकं ।
धर्म्मात्मानं जितक्रोधं नियतं संयतेन्द्रियं । समासिञ्चन्ति शास्तारः क्षौद्रं मध्विव मक्षिकाः । ४५८५
सोऽहं वागग्रविद्यानां रसानामवलेहिता । स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ।
एतत् पृथिव्याममृतमेतच्चक्षुरनुत्तमं । यद्ब्राह्मणमुखे काव्यमेतच्छ्रुत्वा प्रवर्त्तते ।
एतावच्छ्रेय इत्याह प्रह्लादो ब्रह्मवादिनं । शुश्रूषितस्तेन तदा दैत्येन्द्रो वाक्यमब्रवीत् ।
यथावद्गुरुवृत्त्या ते प्रीतोऽस्मि द्विजसत्तम । वरं वृणीष्व भद्रन्ते प्रदाताऽस्मि न संशयः ।
कृतमित्येव दैत्येन्द्रमुवाच स च वै द्विजः । प्रह्लादस्त्वब्रवीत् प्रीतो गृह्यतां वर इत्युत । ४५९०
॥ ब्राह्मण उवाच ॥ यदि राजन् प्रसन्नस्त्वं मम चेदिच्छसि प्रियं । भवतः शीलमिच्छामि प्राप्तुमेष वरो मम ।
ततः प्रीतश्च दैत्येन्द्रो भयमस्याभवन्महत् । वरे प्रदिष्टे विप्रेण नाल्पतेजाऽयमित्युत ।
एवमस्त्विति स प्राह प्रह्लादो विस्मितस्तदा । उपाकृत्य तु विप्राय वरं दुःखान्वितोऽभवत् ।
दत्ते वरे गते विप्रे चिन्तासीन्महती तदा । प्रह्लादस्य महाराज निश्चयं न च जग्मिवान् ।
तस्य चिन्तयतस्तावच्छायाभूतं महाद्युति । तेजो विग्रहवत्तात शरीरमजहात्तदा । ४५९५
तमपृच्छन्महाकायं प्रह्लादः को भवानिति । प्रत्याह तन्तु शीलोऽस्मि त्यक्तो गच्छाम्यहं त्वया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मिन् द्विजोत्तमे राजन् वत्स्याम्यहमनिन्दिते। योऽसौ शिष्यत्वमागम्य त्वयि नित्यं समाहितः।
इत्युक्त्वाऽन्तर्हितं तद्वै शक्रञ्चान्वाविशत् प्रभो। तस्मिंस्तेजसि जाते तु तादृग्रूपस्ततोऽपरः।
शरीरान्निःसृतस्तस्य को भवानिति चाब्रवीत्। धर्म्मं प्रह्लाद मां विद्धि यत्रासौ द्विजसत्तम।
तत्र यास्यामि दैत्येन्द्र यतः शीलं ततो ह्यहं। ततोऽपरो महाराज प्रज्वलन्निव तेजसा। ४६००
शरीरान्निःसृतस्तस्य प्रह्लादस्य महात्मनः। को भवानिति पृष्टश्च तमाह स महाद्युतिः।
सत्यं विद्ध्यसुरेन्द्राद्य प्रयास्ये धर्म्ममन्वहं। तस्मिन्ननुगते धर्म्मे महान् वै पुरुषोऽपरः।
निश्चक्राम ततस्तस्मात् पृष्टश्चाह महाबलः। वृत्तं प्रह्लाद मां विद्धि यतः सत्यं ततो ह्यहं।
तस्मिन् गते महाशब्दः शरीरात्तस्य निर्ययौ। पृष्टश्चाह बलं विद्धि यतो वृत्तमहन्ततः।
इत्युक्त्वा प्रययौ तत्र यतो वृत्तं नराधिप। ततः प्रभामयी देवी शरीरात्तस्य निर्ययौ। ४६०५
तामपृच्छत् स दैत्येन्द्रः सा श्रीरित्येनमब्रवीत्। उषिताऽस्मि स्वयं वीर त्वयि सत्यपराक्रम।
त्वया त्यक्ता गमिष्यामि बलं ह्यनुगता ह्यहं। ततो भयं प्रादुरासीत् प्रह्लादस्य महात्मनः।
अपृच्छत् स ततो भूयः क्व यासि कमलालये। त्वं हि सत्यव्रता देवी लोकस्य परमेश्वरी।
कश्चासौ ब्राह्मणश्रेष्ठस्तत्त्वमिच्छामि वेदितुं।
॥ श्रीरुवाच ॥ स शक्रो ब्रह्मचारी यस्त्वत्तश्चैवोपशिक्षितः। त्रैलोक्ये ते यदैश्वर्य्यं तत्तेनापहृतं प्रभो। ४६१०
शीलेन हि त्रयो लोकास्त्वया धर्म्मज्ञ निर्ज्जिताः। तद्विज्ञाय सुरेन्द्रेण तव शीलं हृतं प्रभो।
धर्म्मः सत्यं तथा वृत्तं बलञ्चैव तथाऽप्यहं। शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः।
॥ भीष्म उवाच ॥ एवमुक्त्वा गता श्रीस्तु ते च सर्व्वे युधिष्ठिर। दुर्य्योधनस्तु पितरं भूय एवाब्रवीद्वचः।
शीलस्य तत्त्वमिच्छामि वेत्तुं कौरवनन्दन। प्राप्यते च यथा शीलं तच्चोपायं वदस्व मे।
॥ धृतराष्ट्र उवाच ॥ सोपायं पूर्व्वमुद्दिष्टं प्रह्लादेन महात्मना। सङ्क्षेपेण तु शीलस्य शृणु प्राप्तिं नरेश्वर। ४६१५
अद्रोहः सर्व्वभूतेषु कर्म्मणा मनसा गिरा। अनुग्रहश्च दानञ्च शीलमेतत् प्रशस्यते।
यदन्येषां हितं न स्यादात्मनः कर्म्म पौरुषं। अपत्रपेत वा येन न तत् कुर्य्यात् कथञ्चन।
तत्तु कर्म्म तथा कुर्य्याद्येन श्लाघ्येत संसदि। शीलं समासेनैतत्ते कथितं कुरुसत्तम।
यद्यप्यशीला नृपते प्राप्नुवन्ति श्रियं क्वचित्। न भुञ्जते चिरं तात समूलाश्च न सन्ति ते।
॥ धृतराष्ट्र उवाच ॥ एतद्विदित्वा तत्त्वेन शीलवान् भव पुत्रक। यदीच्छसि श्रियं तात सुविशिष्टां युधिष्ठिरात्। ४६२०
॥ भीष्म उवाच ॥ एतत् कथितवान् पुत्रे धृतराष्ट्रो नराधिपः। एतत् कुरुष्व कौन्तेय ततः प्राप्स्यसि तत्फलं।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि शीलवर्णने चतुर्विंशत्यधिकशततोऽध्यायः ॥ १२४ ॥
॥ युधिष्ठिर उवाच ॥ शीलं प्रधानं पुरुषे कथितं ते पितामह। कथं त्वाशा समुत्पन्ना या चाशा तद्वदस्व मे।
संशयो मे महानेष समुत्पन्नः पितामह। छेत्ता तस्य च नान्योऽस्ति त्वत्तः परपुरञ्जय।
पितामहाशा महती ममासीद्धि सुयोधने। प्राप्ते युद्धे तु यद्युक्तं तत् कर्त्ताऽयमिति प्रभो।
सर्व्वस्याशा सुमहती पुरुषस्योपजायते। तस्यां विहन्यमानायां दुःखो मृत्युर्न संशयः। ४६२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

सोऽहं हताशो दुर्ब्बुद्धिः हतस्तेन दुरात्मना । धार्त्तराष्ट्रेण राजेन्द्र पश्य मन्दात्मतां मम ।
आशां महत्तरां मन्ये पर्व्वतादिव सद्रुमात् । आकाशादपि वा राजन्नप्रमेयैव वा पुनः ।
एषा चैव कुरुश्रेष्ठ दुर्व्विचिन्त्या सुदुर्लभा । दुर्लभत्वाच्च पश्यामि किमन्यद्दुर्लभं ततः ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि युधिष्ठिर निबोध तत् । इतिहासं सुमित्रस्य निर्व्वृत्तमृषभस्य च ।
सुमित्रो नाम राजर्षिर्हैहयो मृगयां गतः । ससार स मृगं विद्धा वाणेनानतपर्व्वणा । ४६३०
स मृगो वाणमादाय ययावमितविक्रमः । स च राजा बलात्तूर्णं ससार मृगयूथपं ।
ततो निम्नं स्थलञ्चैव स मृगोऽद्रवदाशुगः । मुहूर्त्तमिव राजेन्द्र समेन स पथाऽगमत् ।
ततः स राजा तारुण्यादौरसेन बलेन च । ससार वाणासनभृत् सखड्गोऽसौ तनुत्रवान् ।
ततो नदान्नदीश्चैव पल्वलानि वनानि च । अतिक्रम्याभ्यतिक्रम्य ससारैको वनेचरः ।
स तु कामान्मृगो राजन्नासाद्यासाद्य तं नृपं । पुनरभ्येति जवनो जवेन महता ततः । ४६३५
स तस्य वाणैर्ब्बहुभिः समभ्यस्तो वनेचरः । प्रक्रीडन्निव राजेन्द्र पुनरभ्येति चान्तिकं ।
पुनश्च जवमास्थाय जवनो मृगयूथपः । अतीत्यातीत्य राजेन्द्र पुनरभ्येति चान्तिकं ।
तस्य मर्म्मच्छिदं घोरं तीक्ष्णञ्चामित्रकर्षनः । समादाय शरं श्रेष्ठं कार्म्मुके तु तथाऽसृजत् ।
ततो गव्यूतिमात्रेण मृगयूथपयूथपः । तस्य वाणपथं मुक्त्वा तस्थिवान् प्रहसन्निव ।
तस्मिन्निपतिते वाणे भूमौ ज्वलिततेजसि । प्रविवेश महारण्यं मृगो राजाऽप्यथाद्रवत् । ४६४०
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषभगीतासु पञ्चविंशत्यधिकशततोऽध्यायः ॥ १२५ ॥
॥ भीष्म उवाच ॥ प्रविश्य स महारण्यं तापसानामथाश्रमं । आससाद ततो राजा श्रान्तश्चोपाविशत्तदा ।
तं कार्म्मुकधरं दृष्ट्वा श्रमार्त्तं क्षुधितं तदा । समेत्य ऋषयस्तस्मिन् पूजाञ्चक्रुर्यथाविधि ।
स पूजामृषिभिर्द्दत्तां सम्प्रगृह्य नराधिपः । अपृच्छत्तापसान् सर्व्वांस्तपसो वृद्धिमुत्तमां ।
ते तस्य राज्ञो वचनं सम्प्रगृह्य तपोधनाः । ऋषयो राजशार्द्दूलं तमपृच्छन् प्रयोजनं ।
केन भद्र सुखार्थेन सम्प्राप्तोऽसि तपोवनं । पदातिर्ब्बद्धनिस्त्रिंशो धन्वी वाणी नरेश्वर । ४६४५
एतदिच्छामहे श्रोतुं कुतः प्राप्तोऽसि मानद । कस्मिन् कुले तु जातस्त्वं किन्नामा चासि ब्रूहि नः ।
ततः स राजा सर्व्वेभ्यो द्विजेभ्यः पुरुषर्षभ । आचचक्षे यथान्यायं परिचर्य्याञ्च भारत ।
हैहयानां कुले जातः सुमित्रो मित्रनन्दनः । चरामि मृगयूथानि निघ्नन् वाणैः सहस्रशः ।
बलेन महता गुप्तः सामात्यः सावरोधनः । मृगस्तु विद्धो वाणेन मया सरति शल्यवान् ।
तं द्रवन्तमनुप्राप्तो वनमेतद्यदृच्छया । भवत्सकाशं नष्टश्रीर्हताशः श्रमकर्षितः । ४६५०
किन्नु दुःखमतोऽन्यद्वै यदहं श्रमकर्शितः । भवतामाश्रमं प्राप्तो हताशो भ्रष्टलक्षणः ।
न राजलक्षणत्यागो न पुरस्य तपोधनाः । दुःखं करोति तत्तीव्रं यथाशा विहता मम ।
हिमवान् वा महाशैलः समुद्रो वा महोदधिः । महत्त्वान्नान्वपद्येतां नभसो वाऽन्तरं तथा ।
आशायास्तपसि श्रेष्ठास्तथा नान्तमहं गतः । भवतां विदितं सर्व्वं सर्व्वज्ञा हि तपोधनाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भवन्तः सुमहाभागास्तस्मात् पृच्छामि संशयं । आशावान् पुरुषो यः स्यादन्तरीक्षमथापि वा । ४६५५
किं नु ज्यायस्तरं लोके महत्त्वात् प्रतिभाति वः । एतदिच्छामि तत्त्वेन श्रोतुं किमिह दुर्लभं ।
यदि गुह्यं नरो नित्यं तदा प्रब्रूत मा चिरं । न गुह्यं श्रोतुमिच्छामि युष्मत्तो द्विजसत्तमाः ।
भवत्तपोविघातो वा यदि स्याद्विरमेत्ततः । यदि वास्ति कथायोगो योऽयं प्रश्नो मयेरितः ।
एतत् कारणसामर्थ्यं श्रोतुमिच्छामि तत्त्वतः । भवन्तोऽपि तपोनित्या ब्रूयुरेतत् समन्विताः ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्मानुशासनपर्व्वणि ऋषभगीतासु षड्विंशत्यधिकशततोऽध्यायः ॥ १२६ ॥
॥ भीष्म उवाच ॥ ततस्तेषां समस्तानामृषीणामृषिसत्तमः । ऋषभो नाम विप्रर्षिर्विस्मयन्निदमब्रवीत् । ४६६०
पुराऽहं राजशार्दूल तीर्थान्यनुचरन् प्रभो । समासादितवान् दिव्यं नरनारायणाश्रमं ।
यत्र सा बदरी रम्या ह्रदो वैहायसस्तथा । यत्र चाश्वशिरा राजन् वेदान् पठति शाश्वतान् ।
तस्मिन् सरसि कृत्वाऽहं विधिवत्तर्पणं पुरा । पितॄणां देवतानाञ्च ततोऽश्रममियां तदा ।
रेमाते यत्र तौ नित्यं नरनारायणावृषी । अदूरादाश्रमं कञ्चिद्वासार्थमगमं तदा ।
तत्र चीराजिनधरं कृशमुच्चमतीव च । अद्राक्षमृषिमायान्तं तनुं नाम तपोधनं । ४६६५
अन्यैर्नरैर्महाबाहो वपुषाऽष्टगुणान्वितं । कृशता चापि राजर्षे न दृष्टा तादृशी क्वचित् ।
शरीरमपि राजेन्द्र तस्य कानिष्ठिकासमं । ग्रीवाबाहू तथा पादौ केशाश्चाद्भुतदर्शनाः ।
शिरः कायानुरूपञ्च कर्णौ नेत्रे तथैव च । तस्य वाक्चैव चेष्टा च सामान्ये राजसत्तम ।
दृष्ट्वाऽहं तं कृशं विप्रं भीतः परमदुर्म्मनाः । पादौ तस्याभिवाद्याथ स्थितः प्राञ्जलिरग्रतः ।
निवेद्य नामगोत्रे च पितरञ्च नरर्षभ । प्रदिष्टे चासने तेन शनैरहमुपाविशं । ४६७०
ततः स कथयामास कथां धर्म्मार्थसंहितां । ऋषिमध्ये महाराज तनुर्द्धर्म्मभृतां वरः ।
तस्मिंस्तु कथयत्येव राजा राजीवलोचनः । उपायाज्जवनैरश्वैः सबलः सावरोधनः ।
स्मरन् पुत्त्रमरण्ये वै नष्टं परमदुर्म्मनाः । भूरिद्युम्नपिता श्रीमान् वीरद्युम्नो महायशाः ।
इह द्रक्ष्यामि तं पुत्त्रं द्रक्ष्यामीहेति पार्थिवः । एवमाशाहृतो राजा चरन् वनमिदं पुरा ।
दुर्लभः स मया द्रष्टुं नूनं परमधार्म्मिकः । एकः पुत्त्रो महारण्ये नष्ट इत्यसकृत्तदा । ४६७५
दुर्लभः स मया द्रष्टुमाशा च महती मम । तया परीतगात्रोऽहं मुमूर्षुर्नात्र संशयः ।
एतच्छ्रुत्वा स भगवांस्तनुर्म्मुनिवरोत्तमः । अवाक्शिरा ध्यानपरो मुहूर्त्तमिव तस्थिवान् ।
तमनुध्यातमालक्ष्य राजा परमदुर्म्मनाः । उवाच वाक्यं दीनात्मा मन्दंमन्दमिवासकृत् ।
दुर्लभं किं नु देवर्षे आशायाश्चैव किं महत् । ब्रवीतु भगवानेतद्यदि गुह्यं न ते मयि ।
॥ मुनिरुवाच ॥ महर्षिर्भगवांस्तेन पूर्व्वमासीद्विमानितः । बालिशां बुद्धिमास्थाय मन्दभाग्यतयात्मनः । ४६८०
अर्थयन् कलसं राजन् काञ्चनं वल्कलानि च । अवज्ञापूर्व्वकेनापि न सम्पादितवांस्ततः ।
निर्व्विणः स तु राजर्षिर्निराशः समपद्यत । एवमुक्तोऽभिवाद्याथ तमृषिं लोकपूजितं ।
श्रान्तोऽवसीदद्धर्म्मात्मा यथा त्वं नरसत्तम । अर्घं ततः समानीय पाद्यञ्चैव महानृषिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

आरण्येनैव विधिना राज्ञे सर्व्वं न्यवेदयत्। ततस्ते मुनयः सर्व्वे परिवार्य्य नरर्षभं।
उपाविशन्नरव्याघ्र सप्तर्षय इव ध्रुवं। अपृच्छंश्चैव ते तत्र राजानमपराजितं। ४६८५
प्रयोजनमिदं सर्व्वमाश्रमस्य निवेशने।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषभगीतासु सप्तविंशत्यधिकशततोऽध्यायः॥ १२७ ॥
॥ राजोवाच॥ वीरद्युम्न इति ख्यातो राजाऽहं दिक्षु विश्रुतः। भूरिद्युम्नं सुतं नष्टमन्वेष्टुं वनमागतः।
एकः पुत्त्रः स विप्राग्य् बाल एव च मेऽनघ। न दृश्यते वने चास्मिंस्तमन्वेष्टुं चराम्यहं।
॥ ऋषभ उवाच॥ इत्येवमुक्ते वचने राज्ञा मुनिरधोमुखः। तूष्णीमेवाभवत्तत्र न च प्रत्युक्तवान्नृपं।
स हि तेन पुरा विप्रो राज्ञा नात्यर्थमानितः। आशाकृतश्च राजेन्द्र तपो दीर्घं समास्थितः। ४६९०
प्रतिग्रहमहं राज्ञां न करिष्ये कथञ्चन। अन्येषाञ्चैव वर्णानामिति कृत्वा धियं तदा।
आशा हि पुरुषं बालं उत्थापयति तस्थुषी। तामहं व्यपनेष्यामि इति कृत्वा व्यवस्थितः।
वीरद्युम्नस्तु तं भूयः पप्रच्छ मुनिसत्तमं।
॥ राजोवाच ॥ आशायाः किं कृशत्वञ्च किञ्चेह भुवि दुर्लभं। ब्रवीतु भगवानेतत्त्वं हि धर्म्मार्थदर्शिवान्।
ततः संस्मृत्य तत् सर्व्वं स्मारयिष्यन्निवाब्रवीत्। राजानं भगवान् विप्रस्ततः कृशतनुस्तदा। ४६९५
॥ ऋषिरुवाच॥ कृशत्वेन समं राजन्नाशाया विद्यते नृप। तस्या वै दुर्लभत्वाच्च प्रार्थिताः पार्थिवा मया।
॥ राजोवाच ॥ कृशाकृशे मया ब्रह्मन् गृहीते वचनात्तव। दुर्लभत्वञ्च तस्यैव वेदवाक्यमिव द्विजः।
संशयस्तु महाप्राज्ञ सञ्जातो हृदये मम। तन्मुने मम तत्त्वेन वक्तुमर्हसि पृच्छतः।
त्वत्तः कृशतरं किं नु ब्रवीतु भगवानिदं। यदि गुह्यं न ते किञ्चिद्विद्यते मुनिसत्तम।
॥ कृश उवाच॥ दुर्लभोऽप्यथवा नास्ति योऽर्थी धृतिमवाप्नुयात्। सुदुर्लभतरस्तात योऽर्थिनं नावमन्यते। ४७००
सत्कृत्य नोपकुरुते परं शक्त्या यथार्हतः। या सक्ता सर्व्वभूतेषु साशा कृशतरी मया।
कृतघ्नेषु च या सक्ता नृशंसेष्वलसेषु च। अपकारिषु चासक्ता साशा कृशतरी मया।
एकपुत्त्रः पिता पुत्त्रे नष्टे वा प्रोषितेऽपि वा। प्रवृत्तिं यो न जानाति साशा कृशतरी मया।
प्रसवे चैव नारीणां वृद्धानां पुत्त्रकारिता। तथा नरेन्द्र धनिनां साशा कृशतरी मया।
प्रदानकाङ्क्षिणीनाञ्च कन्यानां वयसि स्थिते। श्रुत्वा कथास्तथा युक्ताः साशा कृशतरी मया। ४७०५
एतच्छ्रुत्वा ततो राजन् स राजा सावरोधनः। संस्पृश्य पादौ शिरसा निपपात द्विजर्षभं।
॥ राजोवाच॥ प्रसादये त्वां भगवन् पुत्त्रेणेच्छामि सङ्गमं। यदेतदुक्तं भवता सम्प्रति द्विजसत्तम।
सत्यमेतन्न सन्देहो यदेतद्व्याहृतं त्वया। ततः प्रहस्य भगवांस्तनुर्द्धर्म्मभृताम्वरः।
पुत्त्रमस्यानयत् क्षिप्रं तपसा च श्रुतेन च। स समानीय तत्पुत्त्रं तमुपालभ्य पार्थिवं।
आत्मानं दर्शयामास धर्म्मं धर्म्मभृताम्वरः। स दर्शयित्वा चात्मानं दिव्यमद्भुतदर्शनं। ४७१०
विपाप्मा विगतक्रोधश्चचार वनमन्तिकात्। एतद्दृष्टं मया राजंस्तथा च वचनं श्रुतं।
आशामपनयस्वाशु ततः कृशतरीमिमां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ स तथोक्तस्तदा राजन्नृषभेण महात्मना । सुमित्रोपनयत् चिप्रमाशां क्षशतरीं ततः ।
एवं त्वमपि कौन्तेय श्रुत्वा वाणीमिमां मम । स्थिरो भव महाराज हिमवानिव पर्व्वतः ।
त्वं हि प्रष्टा च श्रोता च कृच्छ्रेष्वनुगतेष्विह । श्रुत्वा मम महाराज न सन्तप्तुमिहार्हसि । ४७१५
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऋषभगीतासु अष्टाविंशत्यधिकशततोऽध्यायः ॥ १२८ ॥
॥ युधिष्ठिर उवाच ॥ नामृतस्येव पर्य्याप्तिर्म्ममास्ति ब्रुवति त्वयि । यथा हि स्वात्मवृत्तिस्थस्तथा तृप्तोऽस्मि भारत ।
तस्मात् कथय भूयस्त्वं धर्म्ममेव पितामह । न हि तृप्तिमहं यामि पिवन् धर्म्मामृतं हि ते ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । गौतमस्य च संवादं यमस्य च महात्मनः ।
पारिपात्रं गिरिं प्राप्य गौतमस्याश्रमो महान् । उवाच गौतमो यच्च कालं तमपि मे शृणु ।
षष्टिं वर्षसहस्राणि सोऽतप्यद्गौतमस्तपः । तमुग्रतपसा युक्तं भावितं सुमहामुनिं । ४७२०
उपायातो नरव्याघ्र लोकपालो यमस्तदा । तमपश्यत् सुतपसमृषिं वै गौतमं तदा ।
स तं विदित्वा ब्रह्मर्षिर्यममागतमोजसा । प्राञ्जलिः प्रयतो भूत्वा उपविष्टस्तपोधनः ।
तं धर्म्मराजो दृष्ट्वैव सत्कृत्यैव द्विजर्षभं । न्यमन्त्रयत धर्म्मेण क्रियतां किमिति ब्रुवन् ।
॥ गौतम उवाच ॥ मातापितृभ्यामानृण्यं किं कृत्वा समवाप्नुयात् । कथञ्च लोकानाप्नोति पुरुषो दुर्लभान् शुचीन् ।
॥ यम उवाच ॥ तपः शौचवता नित्यं सत्यधर्म्मरतेन च । मातापित्रोरहरहः पूजनं कार्य्यमञ्जसा । ४७२५
अश्वमेधैश्च यष्टव्यं बहुभिस्त्वाप्तदक्षिणैः । तेन लोकानवाप्नोति पुरुषोऽद्भुतदर्शनान् ।
इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि ऊनत्रिंशदधिकशततोऽध्यायः ॥ १२९ ॥
॥ युधिष्ठिर उवाच ॥ मित्रैः प्रहीयमाणस्य बहुमित्रस्य का गतिः । राज्ञः सङ्क्षीणकोषस्य बलहीनस्य भारत ।
दुष्टामात्यसहायस्य च्युतमन्त्रस्य सर्व्वतः । राज्यात् प्रच्यवमानस्य गतिमग्र्यामपश्यतः ।
परचक्राभियातस्य परराष्ट्राणि मृद्नतः । विग्रहे वर्त्तमानस्य दुर्व्बलस्य बलीयसा ।
असंविहितराष्ट्रस्य देशकालावजानतः । अप्राप्यञ्च भवेत् सान्त्वं भेदो वाऽप्यतिपीडनात् । ४७३०
जीवितन्त्वर्थहेतुर्व्वा तत्र किं सुकृतं भवेत् ।
॥ भीष्म उवाच ॥ गुह्यं धर्म्मञ्च मा प्राक्षीरतीव भरतर्षभ । अपृष्टो नोत्सहे वक्तुं धर्म्ममेतं युधिष्ठिर ।
धर्म्मो ह्यणीयान् वचनाद्बुद्धिश्च भरतर्षभ । श्रुत्वोपास्य सदाचारैः साधुर्भवति स क्वचित् ।
कर्म्मणा बुद्धिरूपेण भवत्याढ्यो न वा पुनः । तादृशोऽयमनुप्रश्नः संव्यवस्यः स्वया धिया ।
उपायं धर्म्मबहुलं यात्रार्थं शृणु भारत । नाहमेतादृशं धर्म्मं बुभूषे धर्म्मकारणात् । ४७३५
दुःखादान इह ह्येष स्यात्तु पश्चात् चयोपमः । अभिगम्य मतीनां हि सर्व्वासामेव निश्चयः
यथा यथा हि पुरुषो नित्यं शास्त्रमवेक्षते । तथा तथा विजानाति विज्ञानमथ रोचते ।
अविज्ञानादयोगो हि योगो भूतिकरः परः । अशङ्कमानो वचनमनसूयुरिदं शृणु ।
राज्ञः कोषक्षयादेव जायते बलसंक्षयः । कोषञ्च जनयेद्राजा निर्ज्जलेभ्यो यथा जलं ।
कालं प्राप्यानुगृह्णीयादेष धर्म्मः सनातनः । उपायधर्म्मं प्राप्येमं पूर्व्वैराचरितं जनैः । ४७४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

अन्यो धर्म्मः समर्थानामापत्स्वन्यश्च भारत। प्राक् कोषात् प्राप्यते धर्म्मो वृत्तिर्धर्म्माद्गरीयसी।
धर्म्मं प्राप्य न्यायवृत्तिं न बलीयान्न विन्दति। यस्माद्बलस्योपपत्तिरेकान्तेन न विद्यते।
तस्मादापद्यधर्म्मोऽपि श्रूयते धर्म्मलक्षणः। अधर्म्मो जायते तस्मिन्निति वै कवयो विदुः।
अनन्तरं क्षत्रियस्य तत्र किं विचिकित्स्यते। यथाऽस्य धर्म्मो न म्लायेन्नेयाच्छत्रुवशं यथा।
तत् कर्त्तव्यमिति प्राज्ञैर्नात्मानमवसादयेत्। सर्व्वात्मनैव धर्म्मस्य न परस्य न चात्मनः। ४७४५
सर्व्वोपायैरुज्जिहीर्षेदात्मानमिति निश्चयः। तत्र धर्म्मविदां तात निश्चयो धर्म्मनैपुणं।
उद्यमो नैपुणं क्षात्त्रे बाहुवीर्य्यादिति श्रुतिः। क्षत्त्रियो वृत्तिसंरोधे कस्य नादातुमर्हति।
अन्यत्र तापसस्वाच्च ब्राह्मणस्वाच्च भारत। यथा वै ब्राह्मणः सीदन्नयाज्यमपि याजयेत्।
अभोज्यान्नानि चाश्नीयात्तथेदं नात्र संशयः। पीडितस्य किमद्वारमुत्पथो विधृतस्य च।
अद्वारतः प्रद्रवति यदा भवति पीडितः। यस्य कोषबलग्लान्या सर्व्वलोकपराभवः। ४७५०
भैक्ष्यचर्य्या न विहिता न च विट्शूद्रजीविका। स्वधर्म्मानन्तरा वृत्तिर्जात्याननुपजीवतः।
वहतः प्रथमं कल्पमनुकल्पेन जीवनं। आपद्गतेन धर्म्माणामन्यायेनोपजीवनं।
अपि ह्येतत् ब्राह्मणेषु दृष्टं वृत्तिपरिक्षये। क्षत्त्रिये संशयः कस्मादित्येवं निश्चितं सदा।
आददीत विशिष्टेभ्यो नावसीदेत् कथञ्चन। हन्तारं रक्षितारञ्च प्रजानां क्षत्त्रियं विदुः।
तस्मात् संरक्षता कार्य्यमादानं क्षत्त्रबन्धुना। अन्यत्र राजन् हिंसाया वृत्तिर्नेहास्ति कस्यचित्। ४७५५
अप्यरण्यसमुत्थस्य एकस्य चरतो मुनेः। न शङ्खलिखितां वृत्तिं शक्यमास्थाय जीवितुं।
विशेषतः कुरुश्रेष्ठ प्रजापालनमीप्सया। परस्परं हि संरक्षा राज्ञा राष्ट्रेण चापदि।
नित्यमेव हि कर्त्तव्या एष धर्म्मः सनातनः। राजा राष्ट्रं यथापत्सु द्रव्यौघैरभिरक्षति।
राष्ट्रेण राजा व्यसने रक्षितव्यस्तथा भवेत्। कोषं दण्डं बलं मित्रं यदन्यदपि सञ्चितं।
न कुर्व्वीतान्तरं राष्ट्रे राजा परिगतः क्षुधा। वीजं भक्तेन सम्पाद्यमिति धर्म्मविदो विदुः। ४७६०
अत्रैतच्छम्बरस्याहुर्म्महामायस्य दर्शनं। धिक् तस्य जीवितं राज्ञो राष्ट्रं यस्यावसीदति।
अवृत्त्याऽल्पमनुष्योऽपि यो वैदेशिक इत्यपि। राज्ञः कोषबलं मूलं कोषमूलं पुनर्बलं।
तन्मूलं सर्व्वधर्म्माणां धर्म्ममूलाः पुनः प्रजाः। नान्यानपीडयित्वेह कोषः शक्यः कुतो बलं।
तदर्थं पीडयित्वा च दोषं प्राप्तुं न सोऽर्हति। अकार्य्यमपि यज्ञार्थं क्रियते यज्ञकर्म्मसु।
एतस्मात् कारणाद्राजा न दोषं प्राप्तुमर्हति। अर्थार्थमन्यद्भवति विपरीतमथापरं। ४७६५
अनर्थार्थमथाप्यन्यत्तत् सर्व्वं ह्यर्थकारणं। एवं बुद्ध्या संप्रपश्येन्मेधावी कर्म्मनिश्चयं।
यज्ञार्थमन्यद्भवति यज्ञोऽन्यार्थस्तथापरः। यज्ञस्यार्थार्थमेवान्यत्तत् सर्व्वं यज्ञसाधनं।
उपमामत्र वक्ष्यामि धर्म्मतत्त्वप्रकाशिनीं। यूपं छिन्दन्ति यज्ञार्थं तत्र ये परिपन्थिनः।
द्रुमाः केचन सामन्ता ध्रुवं छिन्दन्ति तानपि। ते चापि निपतन्तोऽन्यान्निघ्नन्त्येव वनस्पतीन्।
एवं कोषस्य महतो ये नराः परिपन्थिनः। तानहत्वा न पश्यामि सिद्धिमत्र परन्तप। ४७७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धनेन जायते लोकावुभौ परमिमं तथा । सत्यञ्च धर्म्मवचनं यथा नास्त्यधनस्तथा ।
सर्व्वोपायैराददीत धनं यज्ञप्रयोजनं । न तुल्यदोषः स्यादेवं कार्य्याकार्य्येषु भारत ।
नैतौ सम्भवतो राजन् कथञ्चिदपि पार्थिव । न ह्यरण्येषु पश्यामि धनवृद्धानहं क्वचित् ।
यदिदं दृश्यते वित्तं पृथिव्यामिह किञ्चन । ममेदं स्यान्ममेदं स्यादित्येवं काङ्क्षते जनः ।
न च राज्यसमो धर्म्मः कश्चिदस्ति परन्तप । धर्म्मः संशब्दितो राज्ञामापदर्थमतोऽन्यथा । ४७७५
दानेन कर्म्मणा चान्ये तपसाऽन्ये तपस्विनः । बुद्ध्या दाक्ष्येण चैवान्ये विन्दन्ति धनसञ्चयान् ।
अधनं दुर्ब्बलं प्राहुर्धनेन बलवान् भवेत् । सर्व्वं धनवता प्राप्यं सर्व्वं तरति कोषवान् ।
कोषेण धर्म्मः कामश्च परलोकस्तथा ह्ययं । तञ्च धर्म्मेण लिप्सेत नाधर्म्मेण कदाचन ।

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि त्रिंशदधिकशततोऽध्यायः ॥ १३० ॥ समाप्तञ्चेदं राजधर्म्मानुशासनपर्व्व ॥

॥ अथ आपद्धर्म्मपर्व्व ॥

॥ युधिष्ठिर उवाच ॥ क्षीणस्य दीर्घसूत्रस्य सानुक्रोशस्य बन्धुषु । परिशङ्कितवृत्तस्य श्रुतमन्त्रस्य भारत ।
विभक्तपुरराष्ट्रस्य निर्द्रव्यनिचयस्य च । असम्भावितमित्रस्य भिन्नामात्यस्य सर्व्वशः । ४७८०
परचक्राभियातस्य दुर्ब्बलस्य बलीयसा । आपन्नचेतसो ब्रूहि किं कार्य्यमवशिष्यते ।
॥ भीष्म उवाच ॥ वाह्यश्चेद्विजिगीषुः स्याद्धर्म्मार्थकुशलः शुचिः । जवेन सन्धिं कुर्व्वीत पूर्व्वपूर्व्वान् विमोचयन् ।
यो धर्म्मविजिगीषुः स्याद्बलवान् पापनिश्चयः । आत्मनः सन्निरोधेन सन्धिन्तेनापि रोचयेत् ।
अपास्य राजधानीं वा तरेद्द्रव्येण चापदं । तद्भावयुक्तो द्रव्याणि जीवन् पुनरुपार्ज्जयेत् ।
यास्तु कोषबलत्यागात् शक्यास्तरितुमापदः । कस्तत्राधिकमात्मानं सन्त्यजेदर्थधर्म्मवित् । ४७८५
अवरोधान् जुगुप्सेत का सपत्नधने दया । न त्वेवात्मा प्रदातव्यः शक्ये सति कथञ्चन ।
॥ युधिष्ठिर उवाच ॥ आभ्यन्तरे प्रकुपिते वाह्ये चोपनिपीडिते । क्षीणे कोषे श्रुते मन्त्रे किं कार्य्यमवशिष्यते ।
॥ भीष्म उवाच ॥ क्षिप्रं वा सन्धिकामः स्यात् क्षिप्रं वा तीक्ष्णविक्रमः । तदापनयनं क्षिप्रमेतावत् साम्परायिकं ।
अनुरक्तेन चेष्टेन हृष्टेन जगतीपतिः । अल्पेनापि हि सैन्येन महीं जयति भूमिपः ।
हतो वा दिवमारोहेद्धत्वा वा क्षितिमावसेत् । युद्धे हि सन्त्यजन् प्राणान् शक्रस्यैति सलोकतां । ४७९०
सर्व्वलोकागमं कृत्वा मृदुत्वं गन्तुमेव च । विश्वासाद्विनयं कुर्य्याद्विश्वसेच्चाप्युपायतः ।
अपचिक्रमिषुः क्षिप्रं साम्ना वा परिसान्त्वयन् । विलङ्घयित्वा मन्त्रेण ततः स्वयमुपक्रमेत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि एकत्रिंशदधिकशततोऽध्यायः ॥ १३१ ॥
॥ युधिष्ठिर उवाच ॥ हीने परमके धर्म्मे सर्व्वलोकाभिसंहिते । सर्व्वस्मिन् दस्युसाद्भूते पृथिव्यामुपजीवने ।
केनचिद्ब्राह्मणो जीवेज्जघन्ये काल आगते । असंत्यजन् पुत्त्रपौत्त्राननुक्रोशात् पितामह ।
॥ भीष्म उवाच ॥ विज्ञानबलमास्थाय जीवितव्यं तथागते । सर्व्वं साध्वर्थमेवेदमसाध्वर्थं न किञ्चन । ४७९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति। आत्मानं संक्रमं कृत्वा कृच्छ्रधर्म्मविदेव सः।
आकाङ्क्षन्नात्मनो राजन् राज्यस्थितिमकोपयन्। अदत्तमेवाददीत दातुर्वित्तं ममेति च।
विज्ञानबलपूतो यो वर्त्तते निन्दितेष्वपि। वृत्तिविज्ञानवान् धीरः कस्तं वा वक्तुमर्हति।
येषां बलकृता वृत्तिस्तेषामन्या न रोचते। तेजसाऽभिप्रवर्त्तन्ते बलवन्तो युधिष्ठिर।
यदेवं प्राकृतं शास्त्रमविशेषेण वर्त्तते। तदेवमभ्यसेदेवं मेधावी चाप्यथोत्तरं। ४८००
ऋत्विक् पुरोहिताचार्य्यान् सत्कृतानभिसत्कृतान्। न ब्राह्मणान् घातयीत दोषान् प्राप्नोति घातयन्।
एतत् प्रमाणं लोकस्य चक्षुरेतत् सनातनं। तत्प्रमाणेऽवगाहेत तेन तत् साध्वसाधु वा।
बहवो ग्रामवास्तव्या रोषाद्ब्रूयुः परस्परं। न तेषां वचनाद्राजा सत्कुर्य्याद्घातयीत वा।
न वाच्यः परिवादोऽयं न श्रोतव्यः कथञ्चन। कर्णावथ पिधातव्यौ प्रस्थेयं चान्यतो भवेत्।
असतां शीलमेतद्वै परिवादोऽथ पैशुनं। गुणानामेव वक्तारः सन्तः सत्सु नराधिप। ४८०५
यथा सुमधुरौ दम्यौ सुदान्तौ साधुवाहिनौ। धुरमुद्यम्य वहतस्तथा वर्त्तेत वै नृपः।
यथा यथाऽस्य बहवः सहायाः स्युस्तथाऽपरे। आचारमेव मन्यन्ते गरीयो धर्म्मलक्षणं।
अपरे नैवमिच्छन्ति ये शङ्खलिखितप्रियाः। मात्सर्य्यादथ वा लोभान्न ब्रूयुर्वाक्यमीदृशं।
आर्षमप्यत्र पश्यन्ति विकर्म्मस्थस्य पातनं। न तादृक् सदृशं किञ्चित् प्रमाणं दृश्यते क्वचित्।
देवताश्च विकर्म्मस्थं पातयन्ति नराधमं। व्याजेन विन्दन् वित्तं हि धर्म्मात् स परिहीयते। ४८१०
सर्व्वतः सत्कृतः सद्भिर्भूतिः प्रवरकारणैः। हृदयेनाभ्यनुज्ञातो यो धर्म्मस्तं व्यवस्यति।
यश्चतुर्गुणसम्पन्नं धर्म्मं ब्रूयात् स धर्म्मवित्। अहेरिव हि धर्म्मस्य पदं दुःखं गवेषितुं।
यथा मृगस्य विद्धस्य पदमेकं पदं नयेत्। लक्षयेद्रुधिरलेपेन तथा धर्म्मपदं नयेत्।
यथा सद्भिर्विनीतेन यथा गन्तव्यमित्युत। राजर्षीणां वृत्तमेतदेवं गच्छ युधिष्ठिर।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि राजर्षिवृत्तोनाम द्वात्रिंशदधिकशतोऽध्यायः॥ १३२ ॥
॥ भीष्म उवाच ॥ स्वराष्ट्रात् परराष्ट्राच्च कोषं सञ्जनयेन्नृपः। कोषाद्धि धर्म्मः कौन्तेय राज्यमूलश्च वर्द्धते। ४८१५
तस्मात् सञ्जनयेत् कोषं सत्कृत्य परिपालयेत्। परिपाल्यानुतनुयादेष धर्म्मः सनातनः।
न कोषः शुद्धशौचेन न नृशंसेन जातुचित्। मध्यमं पदमास्थाय कोषसंग्रहणं चरेत्।
अबलस्य कुतः कोषो ह्यकोषस्य कुतो बलं। अबलस्य कुतो राज्यमराज्ञः श्रीर्भवेत् कुतः।
उच्चैर्वृत्ते श्रियो हानिर्यथैव मरणन्तथा। तस्मात् कोषं बलं मित्रमथ राजा विवर्द्धयेत्।
हीनकोषं हि राजानमवजानन्ति मानवाः। न चास्याल्पेन तुष्यन्ति कार्य्यमप्युत्सहन्ति च। ४८२०
श्रियो हि कारणाद्राजा सत्क्रियां लभते परां। साऽस्य गूहति पापानि वासो गुह्यमिव स्त्रियाः।
ऋद्धिमस्यानुतप्यन्ते पुरा विप्रकृता नराः। शालावृका इवासस्तुर्जिघांसुमेव विन्दति।
ईदृशस्य कुतो राज्ञः सुखं भवति भारत। उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषं।
अप्यपर्व्वणि भज्येत न नमेतेह कस्यचित्। अप्यरण्यं समाश्रित्य चरेन्मृगगणैः सह।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नवैवोत्थितमर्य्यादैर्दस्युभिः सहितश्चरेत् । दस्यूनां सुलभा सेना रौद्रकर्म्मसु भारत । ४८२५
एकान्ततो ह्यमर्य्यादात् सर्व्वोऽप्युद्विजते जनः । दस्यवोऽप्यभिशङ्कन्ते निरनुक्रोशकारिणः ।
स्थापयेदेव मर्य्यादां जनचित्तप्रसादिनीं । अल्पेऽप्यर्थे तु मर्य्यादा लोके भवति पूजिता ।
नायं लोकोऽस्ति न पर इति व्यवसितो जनः । नालं गन्तुं हि विश्वासं नास्तिके भयशङ्किते ।
यथा सद्भिः परादानमहिंसा दस्युभिः कृता । अनुरज्यन्ति भूतानि समर्य्यादेषु दस्युषु ।
अयुध्यमानस्य वधो दारामर्षः कृतघ्नता । ब्रह्मवित्तस्य चादानं निःशेषकरणं तथा । ४८३०
स्त्रियामोषः पतिस्थानं दस्युष्वेतद्विगर्हितं । संश्लेषञ्च परस्त्रीभिर्दस्युरेतानि वर्ज्जयेत् ।
अभिसन्दधते ये च विश्वासायास्य मानवाः । अशेषमेवोपलभ्य कुर्व्वन्तीति विनिश्चयः ।
तस्मात् सशेषं कर्त्तव्यं स्वाधीनमपि दस्युभिः । न बलस्थोऽहमस्मीति नृशंसानि समाचरेत् ।
सशेषकारिणस्तत्र शेषं पश्यन्ति सर्व्वशः । निःशेषकारिणो नित्यं निःशेषकरणाद्भयं ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

॥ भीष्म उवाच ॥ अत्र धर्म्मानुवचनं कथयन्ति पुराविदः । प्रत्यक्षाविव धर्म्मार्थौ क्षत्रियस्य विजानतः । ४८३५
तत्र न व्यवधातव्यं परोक्षा धर्म्मयापना । अधर्म्मो धर्म्म इत्येतद्यथा वृकपदं तथा ।
धर्म्माधर्म्मफले जातु ददर्शेह न कश्चन । बुभूषेद्बलमेवैतत् सर्व्वं बलवतो वशे ।
श्रियो बलममात्यांश्च बलवानिह विन्दति । यो ह्यनाढ्यः स पतितस्तदुच्छिष्टं यदल्पकं ।
बहुपथ्यं बलवति न किञ्चित् क्रियते भयात् । उभौ सत्याधिकारस्थौ त्रायेते महतो भयात् ।
अतिधर्म्माद्बलं मन्ये बलाद्धर्म्मः प्रवर्त्तते । बले प्रतिष्ठितो धर्म्मो धरण्यामिव जङ्गमं । ४८४०
धूमो वायोरिव वशे बलं धर्म्मोऽनुवर्त्तते । अनीश्वरो बले धर्म्मो द्रुमं वल्लीव संश्रिता ।
वशे बलवतां धर्म्मः सुखं भोगवतामिव । नास्त्यसाध्यं बलवतां सर्व्वं बलवतां शुचि ।
दुराचारः क्षीणबलः परित्राणं न गच्छति । अथ तस्मादुद्विजते सर्व्वो लोको वृकादिव ।
अपध्वस्तो ह्यवमतो दुःखं जीवति जीवितं । जीवितं यदपक्रुष्टं यथैव मरणन्तथा ।
यदेवमाहुः पापेन चारित्रेण विवर्ज्जितः । सुभृशं तप्यते तेन वाक्शल्येन परिक्षतः । ४८४५
अत्रैतदाहुराचार्य्याः पापस्य परिमोचणे । त्रयीं विद्यामवेक्षेत तथोपासीत वै द्विजान् ।
प्रसादयेच्चक्षुषा च वाचा वापथ कर्म्मणा । महामनाश्चापि भवेद्विवहेच्च महाकुले ।
इत्यस्मीति वदेदेवं परेषां कीर्त्तयेद्गुणान् । जपेदुदकशीलः स्यात् पेशलो नातिजल्पकः ।
ब्रह्मक्षत्रं सम्प्रविशेद्बहु कृत्वा सुदुष्करं । उच्यमानो हि लोकेन बहुतत्तदचिन्तयन् ।
अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवेत् । सुखञ्च वित्तं भुञ्जीत वृत्तेनैकेन गोपयेत् । ४८५०
लोके च लभते पूजां परत्रेह महत् फलं ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । यथा दस्युः समर्य्यादः प्रेत्य भावेन नश्यति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रहर्त्ता मतिमान् शूरः श्रुतवान् सुनृशंसवान् । रचन्नाश्रमिणां धर्म्मं ब्रह्मण्यो गुरुपूजकः ।
निषाद्यां चत्त्रियाज्जातः चत्त्रधर्म्मानुपालकः । कायव्यो नाम नैषादिर्दस्युत्वात् सिद्धिमाप्तवान् ।
अरण्ये सायं पूर्व्वाह्णे मृगयूथप्रकोपिता । विधिज्ञो मृगजातीनां नैषादानाञ्च कोविदः । ४८५५
सर्व्वकालप्रदेशज्ञः पारियात्रचरः सदा । धर्म्मज्ञः सर्व्वभूतानाममोघेषुर्दृढायुधः ।
अप्यनेकशता सेना एक एव जिगाय सः । स वृद्धावन्धवधिरौ महारण्येऽभ्यपूजयत् ।
मधुमांसैर्म्मूलफलैरन्नैरुच्चावचैरपि । सत्कृत्य भोजयामास मान्यान् परिचचार च ।
आरण्यकान् प्रव्रजितान् ब्राह्मणान् परिपूजयन् । अपि तेभ्यो मृगान् हत्वा निनाय सततं वने ।
येऽस्मान्न प्रतिगृह्णन्ति दस्युतो जनशङ्कया । तेषामासज्य गेहेषु कल्य एव स गच्छति । ४८६०
बहूनि च सहस्राणि ग्रामणीत्वेऽभिवव्रिरे । निर्म्मर्य्यादानि दस्यूनां निरनुक्रोशवर्त्तिनां ।
॥ दस्यव ऊचुः ॥ मुहूर्त्तदेशकालज्ञः प्राज्ञः शूरो दृढव्रतः । ग्रामणीर्भव नो मुख्यः सर्व्वेषामेव सङ्गतः ।
यथा यथा वच्यसि नः करिष्यामस्तथा तथा । पालयास्मान् यथान्यायं यथा माता यथा पिता ।
॥ कायव्य उवाच ॥ मा वधीस्त्वं स्त्रियं भीरुं मा शिशुं मा तपस्विनं । नायुध्यमानो हन्तव्यो न च ग्राह्या बलात् स्त्रियः ।
सर्व्वथा स्त्री न हन्तव्या सर्व्वसत्त्वेषु केनचित् । नित्यन्तु ब्राह्मणे स्वस्ति योद्धव्यञ्च तदर्थतः । ४८६५
सत्यञ्च नाभिहन्तव्यं सारविघ्नञ्च मा कृथाः । पूज्यते यत्र देवाश्च पितरोऽतिथयस्तथा ।
सर्व्वभूतेष्वपि च वै ब्राह्मणो मोचमर्हति । कार्य्या चोपचितिस्तेषां सर्व्वस्वेनापि या भवेत् ।
यस्य ह्येते सम्प्ररुष्टा मन्त्रयन्ति पराभवं । न तस्य त्रिषु लोकेषु त्राता भवति कश्चन ।
यो ब्राह्मणान् परिवदेद्विनाशञ्चापि रोचयेत् । सूर्य्योदय इव ध्वान्ते ध्रुवं तस्य पराभवः ।
इहैव फलमासीनः प्रत्याकाङ्क्षेत सर्व्वशः । ये ये नो न प्रदास्यन्ति तांस्तांस्तेनाभियास्यति । ४८७०
शिष्ट्यर्थं विहितो दण्डो न वृद्ध्यर्थं विनिश्चयः । ये च शिष्टान् प्रबाधन्ते दण्डस्तेषां वधः स्मृतः ।
ये च राष्ट्रोपरोधेन वृद्धिं कुर्व्वन्ति केचन । तदैव तेऽनुमीयन्ते कुणपे क्रिमयो यथा ।
ये पुनर्द्धर्म्मशास्त्रेण वर्त्तेरन्निह दस्यवः । अपि ते दस्यवो भूत्वा चिप्रं सिद्धिमवाप्नुयुः ।
॥ भीष्म उवाच ॥ ते सर्व्वमेवानुचक्रुः कायव्यस्यानुशासनं । वृद्धिञ्च लेभिरे सर्व्वे पापेभ्यश्चाप्युपारमन् ।
कायव्यः कर्म्मणा तेन महतीं सिद्धिमाप्तवान् । साधूनामाचरन् चेमं दस्यून् पापान्निवर्त्तयन् । ४८७५
इदं कायव्यचरितं यो नित्यमनुचिन्तयेत् । नारण्येभ्यो हि भूतेभ्यो भयं प्राप्नोति किञ्चन ।
न भयं तस्य भूतेभ्यः सर्व्वेभ्यश्चैव भारत । नासतो विद्यते राजन् स ह्यरण्येषु गोपतिः ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि पञ्चत्रिंशदधिकशतोऽध्यायः ॥ १३५ ॥
॥ भीष्म उवाच ॥ अत्र गाथा ब्रह्मगीताः कीर्त्तयन्ति पुराविदः । येन मार्गेण राजा वै कोषं सञ्जनयत्युत ।
न धनं यज्ञशीलानां हार्य्यं देवस्वमेव च । दस्यूनां निष्क्रियाणाञ्च चत्त्रियो हर्त्तुमर्हति ।
इमाः प्रजाः चत्त्रियाणां राज्यभोगाश्च भारत । धनं हि चत्त्रियस्यैव द्वितीयस्य न विद्यते । ४८८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदस्य स्याद्बलार्थं वा धनं यज्ञार्थमेव च । अभोग्यास्त्वोषधीश्छित्त्वा भोग्या एव पचन्त्युत ।
यो नैव देवान्न पितॄन्न मर्त्यान् हविषाऽर्चति । अनर्थकं धनं तत्र प्राहुर्द्धर्म्मविदो जनाः ।
हरेत द्रविणं राजन् धार्म्मिकः पृथिवीपतिः । ततः प्रीणयते लोकं न शोकं तद्विधं नृपः ।
असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति । आत्मानं संक्रमं कृत्वा कृत्स्नधर्म्मविदेव सः ।
तथा तथा जयेल्लोकान् शक्त्या चैव यथा यथा । उद्भिज्जा जन्तवो यद्वत् शुक्लजीवा यथा यथा । ४८८५
अनिमित्तात् सम्भवति तथाऽयज्ञः प्रजायते । यथैव दंशमशकं यथा चाण्डपिपीलिकं ।
सैव वृत्तिरयज्ञेषु यथा धर्म्मो विधीयते । यथा ह्यकस्माद्भवति भूमौ पांशुर्व्विलोलितः ।
तथैवेह भवेद्धर्म्मः सूक्ष्मः सूक्ष्मतरस्तथा ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि षट्त्रिंशदधिकशतोऽध्यायः ॥ १३६ ॥
॥ भीष्म उवाच ॥ अनागतविधाता च प्रत्युत्पन्नमतिश्च यः । द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति ।
अत्रैव चेदमव्यग्रं शृणुष्वाख्यानमुत्तमं । दीर्घसूत्रमुपाश्रित्य कार्य्याकार्य्यविनिश्चये । ४८९०
नातिगाधे जलाधारे सुहृदः शकुलास्त्रयः । प्रभूतमत्स्ये कौन्तेय बभूवुः सहचारिणः ।
तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभोऽपरः । दीर्घसूत्रश्च तत्रैकस्त्रयाणां सहचारिणां ।
कदाचित् तं जलस्थायं मत्स्यबन्धाः समन्ततः । निस्रावयामासुरथो निम्नेषु विविधैर्म्मुखैः ।
प्रक्षीयमाणं तन्दृष्ट्वा जलस्थायं भयागमे । अब्रवीद्दीर्घदर्शी तु तावुभौ सुहृदौ तदा ।
इयमापत् समुत्पन्ना सर्व्वेषां सलिलौकसां । शीघ्रमन्यत्र गच्छामः पन्था यावन्न दुष्यति । ४८९५
अनागतमनर्थं हि सुनयैर्य्यः प्रबाधयेत् । स न संशयमाप्नोति रोचतां वो व्रजामहे ।
दीर्घसूत्रस्तु यस्तत्र सोऽब्रवीत् सम्यगुच्यते । न तु कार्य्या त्वरा तावदिति मे निश्चिता मतिः ।
अथ सम्प्रतिपत्तिज्ञः प्राब्रवीद्दीर्घदर्शिनं । प्राप्ते काले न मे किञ्चिन्न्यायतः परिहास्यते ।
एवं श्रुत्वा निराक्रामद्दीर्घदर्शी महामतिः । जगाम स्रोतसा तेन गम्भीरं सलिलाशयं ।
ततः प्रस्रुततोयन्तं प्रसमीक्ष्य जलाशयं । बबन्धुर्व्विविधैर्योगैर्म्मत्स्यान्मत्स्योपजीविनः । ४९००
विलोड्यमाने तस्मिंस्तु स्रुततोये जलाशये । आगच्छद्बन्धनं तत्र दीर्घसूत्रः सहापरैः ।
उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः । प्रविश्यान्तरमेतेषां स्थितः सम्प्रतिपत्तिमान् ।
गृह्णन्नेव तदुद्दानं गृहीत्वा तं तथैव सः । सर्व्वानेव च तांस्तत्र ते विदुर्ग्रथितानिति ।
ततः प्रक्षाल्यमानेषु मत्स्येषु विपुले जले । मुक्त्वा रज्जुं प्रमुक्तोऽसौ शीघ्रं सम्प्रतिपत्तिमान् ।
दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः । मरणं प्राप्तवान्मूढो यथैवोपहतेन्द्रियः । ४९०५
एवं प्राप्ततमं कालं यो मोहान्नावबुध्यते । स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः ।
आदौ न कुरुते श्रेयः कुशलोऽस्मीति यः पुमान् । स संशयमवाप्नोति यथा सम्प्रतिपत्तिमान् ।
अनागतविधाता च प्रत्युत्पन्नमतिश्च यः । द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति ।
काष्ठा कला मुहूर्त्ताश्च दिवा रात्रिस्तथा लवाः । मासाः पक्षाः षडृतवः कल्पः संवत्सरास्तथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पृथिवी देश इत्युक्तः कालः स च न दृश्यते। अभिप्रेतार्थसिद्ध्यर्थं ध्यायते यच्च तत्तथा। ४९१०
एतौ धर्म्मार्थशास्त्रेषु मोक्षशास्त्रेषु चर्षिभिः। प्रधानाविति निर्द्दिष्टौ कामे चाभिमतौ नृणां।
परीक्ष्यकारी युक्तश्च स सम्यक् समुपादयेत्। देशकालावभिप्रेतौ ताभ्यां फलमवाप्नुयात्।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि शाकुलोपाख्याने सप्तत्रिंशदधिकशततोऽध्यायः॥ १३७॥
॥ युधिष्ठिर उवाच॥ सर्व्वत्र बुद्धिः कथिता श्रेष्ठा ते भरतर्षभ। अनागता तथोत्पन्ना दीर्घसूत्रा विनाशिनी।
तदिच्छामि तदा श्रोतुं बुद्धिन्ते भरतर्षभ। यथा राजा न मुह्येत शत्रुभिः परिवारितः।
धर्म्मार्थकुशलो राजा धर्म्मशास्त्रविशारदः। पृच्छामि त्वां कुरुश्रेष्ठ तन्मे व्याख्यातुमर्हसि। ४९१५
शत्रुभिर्बहुभिर्ग्रस्तो यथा वर्त्तेत पार्थिवः। एतदिच्छाम्यहं श्रोतुं सर्व्वमेव यथाविधि।
विषमस्थं हि राजानं शत्रवः परिपन्थिनः। बहवोऽप्येकमुद्धर्त्तुं यतन्ते पूर्व्वतापिताः।
सर्व्वत्र प्रार्थ्यमानेन दुर्व्बलेन महाबलैः। एकेनैवासहायेन शक्यं स्थातुं भवेत् कथं।
कथं मित्रमरिञ्चापि विन्दते भरतर्षभ। चेष्टितव्यं कथञ्चात्र शत्रोर्म्मित्रस्य चान्तरे।
प्रज्ञातलक्षणे मित्रे तथैवामित्रताङ्गते। कथन्तु पुरुषः कुर्य्यात् कृत्वा किं वा सुखी भवेत्। ४९२०
विग्रहं केन वा कुर्य्यात् सन्धिं वा केन योजयेत्। कथं वा शत्रुमध्यस्थो वर्त्तेत बलवानपि।
एतद्वै सर्व्वकृत्यानां परं कृत्यं परन्तप। नैतस्य कश्चिद्वक्ताऽस्ति श्रोता वाऽपि सुदुर्लभः।
ऋते शान्तनवाद्भीष्मात् सत्यसन्धाज्जितेन्द्रियात्। तदन्विष्य महाभाग सर्व्वमेतद्ब्रवीहि मे।
॥ भीष्म उवाच॥ लघुक्तोऽयमनुप्रश्नो युधिष्ठिर सुखोदयः। शृणु मे पुत्र कार्त्स्न्येन गुह्यमापत्सु भारत।
अमित्रो मित्रतां याति मित्रञ्चापि प्रदुष्यति। सामर्थ्ययोगात्कार्य्याणामनित्या वै सदा गतिः। ४९२५
तस्माद्विश्वसितव्यञ्च विग्रहञ्च समाचरेत्। देशं कालञ्च विज्ञाय कार्य्याकार्य्यविनिश्चये।
सन्धातव्यं बुधैर्नित्यं व्यवस्य च हितार्थिभिः। अमित्रैरपि सन्धेयं प्राणा रक्ष्या हि भारत।
यो ह्यमित्रैर्नरो नित्यं न सन्दध्यादपण्डितः। न सोऽर्थं प्राप्नुयात् किञ्चित् फलान्यपि च भारत।
यस्त्वमित्रेण सन्दध्यान्मित्रेण च विरुध्यते। अर्थयुक्तिं समालोक्य स महद्विन्दते फलं।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। मार्ज्जारस्य च संवादं न्यग्रोधे मूषिकस्य च। ४९३०
वने महति कस्मिंश्चिन्न्यग्रोधः सुमहानभूत्। लताजालपरिच्छन्नो नानाद्विजगणान्वितः।
स्कन्धवान्मेघसङ्काशः शीतच्छायो मनोरमः। अरण्यमभितो जातस्तर्व्यालमृगाकुलः।
तस्य मूलं समाश्रित्य कृत्वा शतमुखं बिलं। वसति स्म महाप्राज्ञः पलितो नाम मूषिकः।
शाखां तस्य समाश्रित्य वसति स्म सुखं पुरा। लोमशो नाम मार्ज्जारः पक्षिसङ्घातखादकः।
तत्र चागत्य चाण्डालो ह्यरण्ये कृतकेतनः। प्रयोजयति चोन्माथं नित्यमस्तङ्गते रवौ। ४९३५
तत्र स्नायुमयान् पाशान् यथावत् संविधाय सः। गृहं गत्वा सुखं शेते प्रभातामेति शर्व्वरीं।
तत्र स्म नित्यं बध्यन्ते नक्तं बहुविधा मृगाः। कदाचिदत्र मार्ज्जारस्त्वप्रमत्तो व्यबध्यत।
तस्मिन् बद्धे महाप्राज्ञ शत्रौ नित्याततायिनि। तं कालं पलितो ज्ञात्वा प्रचचार सुनिर्भयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेनानुचरिता तस्मिन् वने विश्वस्तचारिणा । भक्ष्यं मृगयमाणेन चिराद्दृष्टं तदामिषं ।
स तमुन्मायमारुह्य तदामिषमभक्षयत् । तस्योपरि सपत्नस्य बद्धस्य मनसा हसन् । ४९४०
आमिषे तु प्रसक्तः स कदाचिदवलोकयन् । अपश्यदपरं घोरमात्मनः शत्रुमागतं ।
शरप्रसूनसङ्काशं महीविवरशायिनं । नकुलं हरितं नाम चपलं ताम्रलोचनं ।
तेन मूषिकगन्धेन त्वरमाणमुपागतं । भक्षार्थं संलिहानन्तं भूमावूर्द्ध्वमुखं स्थितं ।
शाखागतमरिञ्चान्यमपश्यत् कोटरालयं । उलूकं चन्द्रकं नाम तीक्ष्णतुण्डं क्षपाचरं ।
गतस्य विषयं तत्र नकुलोलूकयोस्तथा । अथास्यासीदियं चिन्ता तत्प्राप्य सुमहद्भयं । ४९४५
आपद्यस्यां सुकष्टायां मरणे प्रत्युपस्थिते । समन्ताद्भयउत्पन्ने कथं कार्य्यं हितैषिणा ।
स तथा सर्व्वतो रुद्धः सर्व्वत्र भयदर्शनः । अभवद्भयसन्तप्तश्चक्रे च परमां गतिं ।
आपद्विनाशभूयिष्ठं शतैः कार्य्यं हि जीवितं । समन्तात् संशयात् सैषा तस्मादापदुपस्थिता ।
गतं मां सहसा भूमिं नकुलो भक्षयिष्यति । उलूकश्चेह तिष्ठन्तं मार्ज्जारः पाशसंक्षयात् ।
न त्वेवास्मद्विधः प्राज्ञः सम्मोहं गन्तुमर्हति । करिष्ये जीविते यत्नं यावद्युक्त्या मतिग्रहात् । ४९५०
न हि बुद्ध्याऽन्वितः प्राज्ञो नीतिशास्त्रविशारदः । निमज्जत्यापदं प्राप्य महतीं दारुणामपि ।
न त्वन्यामिह मार्ज्जारात् गतिं पश्यामि साम्प्रतं । विषमस्थो ह्ययं शत्रुः कृत्यञ्चास्य महन्मया ।
जीवितार्थी कथन्त्वद्य शत्रुभिः प्रार्थितस्त्रिभिः । तस्मादेनमहं शत्रुं मार्ज्जारं संश्रयामि वै ।
नीतिशास्त्रं समाश्रित्य हितमस्योपवर्णये । येनेमं शत्रुसंघातं मतिपूर्व्वेण वञ्चये ।
अयमत्यन्तशत्रुर्म्मे वैषम्यं परमं गतः । मूढो ग्राहयितुं स्वार्थं सङ्गत्या यदि शक्यते । ४९५५
कदाचिद्व्यसनं प्राप्य सन्धिं कुर्य्यान्मया सह । बलिना सन्निकृष्टस्य शत्रोरपि परिग्रहः ।
कार्य्य इत्याङ्कराचार्य्या विषमे जीवितार्थिना । श्रेष्ठो हि पण्डितः शत्रुर्न च मित्रमपण्डितं ।
मम त्वमित्रे मार्ज्जारे जीवितं सम्प्रतिष्ठितं । हन्तास्मै संप्रवक्ष्यामि हेतुमात्माभिरक्षणं ।
अपीदानीमयं शत्रुः सङ्गत्या पण्डितो भवेत् । एवं विचिन्तयामास मूषिकः शत्रुचेष्टितं ।
ततोऽर्थगतितत्त्वज्ञः सन्धिविग्रहकालवित् । सान्त्वपूर्व्वमिदं वाक्यं मार्ज्जारं मूषिकोऽब्रवीत् । ४९६०
सौहृदेनाभिभाषे त्वां कच्चिन्मार्ज्जार जीवसि । जीवितं हि तवेच्छामि श्रेयः साधारणं हि नौ ।
न ते सौम्य भयं कार्य्यं जीविष्यसि यथासुखं । अहं त्वामुद्धरिष्यामि यदि मां न जिघांससि ।
अस्ति कश्चिदुपायोऽत्र दुष्करः प्रतिभाति मे । येन शक्यस्त्वया मोक्षः प्राप्तुं श्रेयस्तथा मया ।
मयाऽप्युपायो दृष्टोऽयं विचार्य्य मतिमात्मनः । आत्मार्थञ्च त्वदर्थञ्च श्रेयः साधारणं हि नौ ।
इदं हि नकुलोलूकं पापबुद्ध्याऽभिसंस्थितं । न धर्षयति मार्ज्जार तेन मे स्वस्ति साम्प्रतं । ४९६५
कूजंश्चपलनेत्रोऽयं कौशिको मां निरीक्षते । नगशाखाग्रगः पापस्तस्याहं भृशमुद्विजे ।
सतां साप्तपदं मैत्रं स सखा मेऽसि पण्डितः । सांवासिकं करिष्यामि नास्ति ते भयमद्य वै ।
न हि शक्तोऽसि मार्ज्जार पाशं छेत्तुं मया विना । अहञ्छेत्स्यामि पाशांस्ते यदि मां त्वं न हिंससि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वमाश्रितो द्रुमस्याग्रं मूलं त्वहमुपाश्रितः । चिरोषितावुभावावां वृक्षेऽस्मिन् विदितञ्च ते ।
यस्मिन्नाश्वासिते कश्चिद्यश्च नाश्वसिति क्वचित् । न तौ धीराः प्रशंसन्ति नित्यमुद्विग्नमानसौ । ४९७०
तस्माद्विवर्द्धतां प्रीतिर्नित्यं सङ्गतमस्तु नौ । कालातीतमिहार्थन्तु न प्रशंसन्ति पण्डिताः ।
अर्थयुक्तिमिमां तत्र यथाभूतां निशामय । तव जीवितमिच्छामि त्वं ममेच्छसि जीवितं ।
कश्चित्तरति काष्ठेन सुगम्भीरां महानदीं । स तारयति तत् काष्ठं स च काष्ठेन तार्य्यते ।
ईदृशो नौ समायोगो भविष्यति सुविस्तरः । अहं त्वां तारयिष्यामि माञ्च त्वं तारयिष्यसि ।
एवमुक्त्वा तु पलितस्तमर्थमुभयोर्हितं । हेतुमद्ग्रहणीयञ्च कालापेक्षी न्यवेक्ष्य च । ४९७५
अथ सुव्याहृतं श्रुत्वा तस्य शत्रोर्विचक्षणः । हेतुमद्ग्रहणीयार्थं मार्ज्जारो वाक्यमब्रवीत् ।
बुद्धिमान् वाक्यसम्पन्नस्तद्वाक्यमनुवर्णयन् । स्वामवस्थां समीक्ष्याथ साम्नैव प्रत्यपूजयत् ।
ततस्तीक्ष्णाग्रदशनो मणिवैदूर्य्यलोचनः । मूषिकं मन्दमुदीक्ष्य मार्ज्जारो लोमशोऽब्रवीत् ।
नन्दामि सौम्य भद्रन्ते यो मां जीवितुमिच्छसि । श्रेयश्च यदि जानीषे क्रियतां मा विचारय ।
अहं हि भृशमापन्नस्त्वमापन्नतरो मम । द्वयोरापन्नयोः सन्धिः क्रियतां मा चिराय च । ४९८०
विधास्ये प्राप्तकालं यत् कार्य्यसिद्धिकरं विभो । मयि कृच्छ्राद्विनिर्मुक्ते न विनंक्ष्यति ते कृतं ।
न्यस्तमानोऽस्मि भक्तोऽस्मि शिष्यस्त्वद्धितकृत्तथा । निदेशवशवर्त्ती च भवन्तं शरणं गतः ।
इत्येवमुक्तः पलितो मार्ज्जारं वशमागतं । वाक्यं हितमुवाचेदमभिनीतार्थमर्थवत् ।
उदारं यद्भवानाह नैतच्चित्रं भवद्विधे । विहितो यस्तु मार्गो मे हितार्थं शृणु तं मम ।
अहं त्वाऽनुप्रवेक्ष्यामि नकुलान्मे महद्भयं । त्रायस्व भो मावधीस्त्वं शक्तोऽस्मि तव रक्षणे । ४९८५
उलूकाच्चैव मां रक्ष क्षुद्रः प्रार्थयते हि मां । अहं छेत्स्यामि ते पाशान् सखे सत्येन ते शपे ।
तद्वचः सङ्गतं श्रुत्वा लोमशो युक्तमर्थवत् । हर्षादुदीक्ष्य पलितं स्वागतेनाभ्यपूजयत् ।
तं संपूज्याथ पलितं मार्ज्जारः सौहृदे स्थितः । स विचिन्त्याब्रवीद्धीरः प्रीतस्त्वरित एव च ।
शीघ्रमागच्छ भद्रन्ते त्वं मे प्राणसमः सखा । तव प्राज्ञ प्रसादाद्धि प्रायः प्राप्स्यामि जीवितं ।
यद्यदेवं गतेनाद्य शक्यं कर्त्तुं मया तव । तदाज्ञापय कर्त्ताऽस्मि सन्धिरेवास्तु नौ सखे । ४९९०
अस्मात्तु सङ्कटान्मुक्तः समित्रगणबान्धवः । सर्व्वकार्य्याणि कर्त्ताऽहं प्रियाणि च हितानि च ।
मुक्तश्च व्यसनादस्मात् सौम्याहमपि नाम ते । प्रीतिमुत्पादयेयञ्च प्रतिकर्त्तुश्च सत्क्रियां ।
प्रत्युपकुर्व्वन् बह्वपि न भाति पूर्व्वोपकारिणा तुल्यः । एकः करोति हि कृते निष्कारणमेव कुरुतेऽन्यः ।
॥ भीष्म उवाच ॥ ग्राहयित्वा तु तं स्वार्थं मार्ज्जारं मूषिकस्तथा । प्रविवेश तु विश्रभ्य क्रोडमस्य कृतागसः ।
एवमाश्वासितो विद्वान् मार्ज्जारेण स मूषिकः । मार्ज्जारोरसि विश्रब्धः सुष्वाप पितृमातृवत् । ४९९५
लीनन्तु तस्य गात्रेषु मार्ज्जारस्य च मूषिकं । दृष्ट्वा तौ नकुलोलूकौ निराशौ प्रत्यपद्यतां ।
तथैव तौ सुसन्त्रस्तौ दृढमागततन्द्रितौ । दृष्ट्वा तयोः परां प्रीतिं विस्मयं परमङ्गतौ ।
बलिनौ मतिमन्तौ च सुवृत्तौ चाप्युपासितौ । अशक्तौ तु नयात्तस्मात् संप्रधर्षयितुं बलात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

कार्य्यार्थकृतसन्धी तौ दृष्ट्वा मार्ज्जारमूषिकौ। उलूकनकुलौ तूर्णं जग्मतुस्तौ स्वमालयं।
लीनः स तस्य गात्रेषु पलितो देशकालवित्। चिच्छेद पाशान्नृपते कालापेक्षी शनैः शनैः। ५०००
अथ बन्धपरिक्लिष्टो मार्ज्जारो वीक्ष्य मूषिकं। छिन्दन्तं वै तदा पाशानत्वरन्तं त्वरान्वितः।
तमत्वरन्तं पलितं पाशानां छेदने तथा। सञ्चोदयितुमारेभे मार्ज्जारो मूषिकन्तदा।
किं सौम्य नातितरसे किं कृतार्थोऽवमन्यसे। छिन्धि पाशानमित्रघ्न पुरा श्वपच एति च।
इत्युक्तस्त्वरता तेन मतिमान्पलितोऽब्रवीत्। मार्ज्जारमकृतप्रज्ञं पथ्यमात्महितं वचः।
तूष्णीं भव न ते सौम्य त्वरा कार्य्या न सम्भ्रमः। वयमेवात्र कालज्ञा न कालः परिहास्यते। ५००५
अकाले कृत्यमारब्धं कर्त्तुं नार्थाय कल्पते। तदेव काल आरब्धं महतेऽर्थाय कल्पते।
अकाले विप्रमुक्तान्मे त्वत्त एव भयं भवेत्। तस्मात् कालं प्रतीक्षस्व किमिति त्वरसे सखे।
यदा पश्यामि चाण्डालमायान्तं शस्त्रपाणिनं। ततश्छेत्स्यामि ते पाशान् प्राप्ते साधारणे भये।
तस्मिन्काले प्रमुक्तस्त्वं तरुमेवाधिरोक्ष्यसे। न हि ते जीवितादन्यत् किञ्चित् कृत्यं भविष्यति।
ततो भवत्यपाक्रान्ते त्रस्ते भीते च लोमश। अहं विलं प्रवेक्ष्यामि भवान् शाखां भजिष्यति। ५०१०
एवमुक्तस्तु मार्ज्जारो मूषिकेणात्मनो हितं। वचनं वाक्यतत्त्वज्ञो जीवितार्थी महामतिः।
अथात्मकृत्यं त्वरितः सम्यक् प्रस्तुतमाचरन्। उवाच लोमशो वाक्यं मूषिकं चिरकारिणं।
न ह्येव मित्रकार्य्याणि प्रीत्या कुर्व्वन्ति साधवः। यथा त्वं मोक्षितः कृच्छ्रात्त्वरमाणेन वै मया।
तथा हि त्वरमाणेन त्वया कार्य्यं हितं मम। यत्नं कुरु महाप्राज्ञ यथा रक्षाऽवयोर्भवेत्।
अथ वा पूर्व्ववैरं त्वं स्मरन् कालं जिहीर्षसि। पश्य दुष्कृतकर्म्मंस्त्वं व्यक्तमायुःक्षयन्तव। ५०१५
यदि किञ्चिन्मयाऽज्ञानात् पुरस्ताद्दुष्कृतं कृतं। न तन्मनसि कर्त्तव्यं क्षामये त्वां प्रसीद मे।
तमेवंवादिनं प्राज्ञं शास्त्रबुद्धिसमन्वितः। उवाचेदं वचः श्रेष्ठं मार्ज्जारं मूषिकस्तदा।
श्रुतं मे तव मार्ज्जार स्वमर्थं परिगृह्णतः। ममापि त्वं विजानासि स्वमर्थं परिगृह्णतः।
यन्मित्रं भीतवत् साध्यं यन्मित्रं भयसंहितं। सुरक्षितव्यं तत् कार्य्यं पाणिः सर्पमुखादिव।
कृत्वा बलवता सन्धिमात्मानं यो न रक्षति। अपथ्यमिव तद्भुक्तं तस्य नार्थाय कल्पते। ५०२०
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचित् सुहृत्। अर्थतस्तु निबध्यन्ते मित्राणि रिपवस्तथा।
अर्थैरर्था निबध्यन्ते गजैर्वनगजा इव। न च कश्चित् कृते कार्य्ये कर्त्तारं समवेक्षते।
तस्मात् सर्व्वाणि कार्य्याणि सावशेषाणि कारयेत्। तस्मिन् कालेऽपि च भवान् दिवाकीर्त्तिभयार्द्दितः।
मम न ग्रहणे शक्तः पलायनपरायणः। छिन्नन्तु तन्तुबाहुल्यं तन्तुरेकोऽवशेषितः।
छेत्स्याम्यतस्तमप्याशु निर्वृतो भव लोमश। तयोः संवदतोरेवं तथैवापन्नयोर्द्वयोः। ५०२५
क्षयं जगाम सा रात्रिर्लोमशन्त्वविशद्भयं। ततः प्रभातसमये विकृतः कृष्णपिङ्गलः।
स्थूलस्फिग्विकृतो रूक्षः श्वयूथपरिवारितः। शङ्कुकर्णो महावक्त्रो मलिनो घोरदर्शनः।
परिघो नाम चाण्डालः शस्त्रपाणिरदृश्यत। तं दृष्ट्वा यमदूताभं मार्ज्जारस्त्रस्तचेतनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

उवाच वचनं भीतः किमिदानीं करिष्यसि। अथ तावपि सन्तप्तौ तं दृष्ट्वा घोरसंकुलं।
क्षणेन नकुलोलूकौ नैराश्यमुपजग्मतुः। बलिनौ मतिमन्तौ च सङ्घाते चाप्युपागतौ।
अशक्तौ सुनयात्तस्मात् सम्प्रधर्षयितुं बलात्। कार्य्यार्थं कृतसन्धानौ दृष्ट्वा मार्ज्जारमूषिकौ।
उलूकनकुलौ तत्र जग्मतुः स्वं स्वमालयं। ततश्चिच्छेद तं पाशं मार्ज्जारस्य च मूषिकः।
विप्रमुक्तोऽथ मार्ज्जारस्तमेवाभ्यपतद्द्रुमं। स तस्मात् सम्भ्रमावर्त्तान्मुक्तो घोरेण शत्रुणा।
बिलं विवेश पलितः शाखां लेभे च लोमशः। उन्मायमप्यथादाय चाण्डालो वीक्ष्य सर्व्वशः।
विहताशः क्षणेनास्ते तस्माद्देशादपाक्रमत्। जगाम स्वस्वभवनं चाण्डालो भरतर्षभ।
ततस्तस्माद्भयान्मुक्तो दुर्लभं प्राप्य जीवितं। बिलस्थं पादपाग्रस्थः पलितं लोमशोऽब्रवीत्।
अकृत्वा संविदं काञ्चित् सहसा समवप्लुतः। कृतज्ञं कृतकर्म्माणं कच्चिन्मां नाभिशङ्कते।
गत्वा च मम विश्वासं दत्वा च मम जीवितं। मित्रोपभोगसमये किं मां त्वं नोपसर्पसि।
कृत्वा हि पूर्व्वमित्राणि यः पश्चान्नानुतिष्ठति। न स मित्राणि लभते कृच्छ्रास्वापत्सु दुर्म्मतिः।
सत्कृतोऽहं त्वया मित्र सामर्थ्यादात्मनः सखे। स मां मित्रत्वमापन्नमुपभोक्तुं त्वमर्हसि।
यानि मे सन्ति मित्राणि ये च सम्बन्धिबान्धवाः। सर्व्वे त्वां पूजयिष्यन्ति शिष्या गुरुमिव प्रियं।
अहञ्च पूजयिष्ये त्वां समित्रगणबान्धवं। जीवितस्य प्रदातारं कृतज्ञः को न पूजयेत्।
ईश्वरो मे भवानस्तु स्वशरीरगृहस्य च। अर्थानाञ्चैव सर्व्वेषामनुशास्ता च मे भव।
अमात्यो हि भव प्राज्ञ पितेवेह प्रशाधि मां। न तेऽस्ति भयमस्मत्तो जीवितेनात्मनः शपे।
बुद्ध्या त्वमुशनाः साक्षाद्बलेनाधिकृता वयं। त्वं मन्त्रबलयुक्तो हि दत्त्वा जीवितमद्य मे।
एवमुक्तः परां शान्तिं मार्ज्जारेण स मूषिकः। उवाच परमन्त्रज्ञः श्लक्ष्णमात्महितं वचः।
यद्भवानाह तत् सत्यं मया ते लोमश श्रुतं। ममापि तावद्ब्रुवतः शृणु यत् प्रतिभाति मे।
वेदितव्यानि मित्राणि विज्ञेयाश्चापि शत्रवः। एतत् सुसूक्ष्मं लोकेऽस्मिन् दृश्यते प्राज्ञसम्मतं।
शत्रुरूपा हि सुहृदो मित्ररूपाश्च शत्रवः। सन्धितास्ते न बुध्यन्ते कामक्रोधवशङ्गताः।
नास्ति जातु रिपुर्नाम मित्रं नाम न विद्यते। सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा।
यो यस्मिन् जीवति स्वार्थं पश्येत् पीडां न जीवति। स तस्य मित्रं तावत् स्यात् यावन्न स्याद्विपर्य्ययः।
नास्ति मैत्री स्थिरा नाम न च ध्रुवमसौहृदं। अर्थयुक्त्याऽनुजायन्ते मित्राणि रिपवस्तथा।
मित्रञ्च शत्रुतामेति कस्मिंश्चित् कालपर्य्यये। शत्रुश्च मित्रतामेति स्वार्थो हि बलवत्तरः।
यो विश्वसिति मित्रेषु न विश्वसिति शत्रुषु। अर्थयुक्तिमविज्ञाय यः प्रीतौ कुरुते मनः।
मित्रे वा यदि वा शत्रौ तस्यापि चलिता मतिः। न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नमपि मूलानि कृन्तति। अर्थयुक्त्या हि जायन्ते पिता माता सुतस्तथा।
मातुला भागिनेयाश्च तथा सम्बन्धिबान्धवाः। पुत्रं हि मातापितरौ त्यजतः पतितं प्रियं।
लोको रक्षति चात्मानं पश्य स्वार्थस्य सारतां। सामान्या निष्कृतिः प्राज्ञ यो मोक्षात् प्रत्यनन्तरं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छतं मृगयते शत्रुं सुखोपायमसंशयं। अस्मिन्निलय एव त्वं न्यग्रोधादवतारितः।
पूर्ब्ब निविष्टमुन्माथं चपलत्वान्न बुद्धवान्। आत्मनश्चपलो नास्ति कुतोऽन्येषां भविष्यति। ५०६०
तस्मात् सर्व्वाणि कार्य्याणि चपलो हन्त्यसंशयं। ब्रवीषि मधुरं यच्च प्रिय मेऽद्य भवानिति।
तन्मित्रकरणं सर्व्वं विस्तरेणापि मे शृणु। कारणात् प्रियतामेति द्वेष्यो भवति कारणात्।
अर्थार्थी जीवलोकोऽयं न कश्चित् कस्यचित् प्रियः। सख्यं सोदर्य्ययोर्भ्रात्रोर्दम्पत्योर्व्वा परस्परं।
कस्यचिन्नाभिजानामि प्रीतिं निष्कारणामिह। यद्यपि भ्रातरः क्रुद्धा भार्य्या वा कारणान्तरे।
स्वभावतस्ते प्रीयन्ते नेतरः प्रीयते जनः। प्रियो भवति दानेन प्रियवादेन चापरः। ५०६५
मन्त्रहोमजपैरन्यः कार्य्यार्थं प्रीयते जनः। उत्पन्ना कारणे प्रीतिरासीन्नौ कारणान्तरे।
प्रध्वस्ते कारणस्थाने सा प्रीतिर्विनिवर्त्तते। किन्नु तत् कारणं मन्ये येनाहं भवतः प्रियः।
अन्यत्राभ्यवहारार्थं तत्रापि च बुधा वयं। कालो हेतुं विकुरुते स्वार्थस्तमनुवर्त्तते।
स्वार्थं प्राज्ञोऽभिजानाति प्राज्ञं लोकोऽनुवर्त्तते। न त्वीदृशं त्वया वाक्यं विदुषि स्वार्थपण्डिते।
अकाले हि समर्थस्य स्नेहहेतुरयं तव। तस्मादहञ्चले स्वार्थात् सुस्थिरः सन्धिविग्रहे। ५०७०
अभ्राणामिव रूपाणि विकुर्व्वन्ति क्षणे क्षणे। अद्यैव हि रिपुर्भूत्वा पुनरद्यैव मे सुहृत्।
पुनश्च रिपुरद्यैव युक्तीनां पश्य चापलं। आसीन्मैत्री तु तावन्नौ यावद्धेतुरभूत् पुरा।
सा गता सह तेनैव कालयुक्तेन हेतुना। त्वं हि मे जातितः शत्रुः सामर्थ्यान्मित्रतां गतः।
तत्कृत्यमभिनिर्वृत्तं प्रकृतिः शत्रुतां गता। सोऽहमेवं प्रणीतानि ज्ञात्वा शास्त्राणि तत्त्वतः।
प्रविशेयं कथं पाशं त्वत्कृते तद्वदस्व मे। त्वद्वीर्य्येण प्रमुक्तोऽहं मद्वीर्य्येण तथा भवान्। ५०७५
अन्योन्यानुग्रहे वृत्ते नास्ति भूयः समागमः। त्वं हि सौम्य कृतार्थोऽद्य निवृत्तार्थास्तथा वयं।
न ते स्यद्य मया कृत्यं किञ्चिदन्यत्र भक्षणात्। अहमन्नं भवान् भोक्ता दुर्ब्बलोऽहं भवान् बली।
नावयोर्विद्यते सन्धिर्व्वियुक्ते विषमे बले। स मन्येऽहं तव प्रज्ञां यन्मोक्षात् प्रत्यनन्तरं।
भक्ष्यं प्रशंससे नूनं सुखोपायेन कर्म्मणा। भक्षार्थं ह्यवबद्धस्त्वं स मुक्तः पीडितः क्षुधा।
शास्त्रजां मतिमास्थाय नूनं भक्षयिताऽद्य मां। जानामि क्षुधितन्तु त्वामाहारसमयश्च ते। ५०८०
स त्वं मामभिसन्धाय भक्ष्यं मृगयसे पुनः। त्वञ्चापि पुत्त्रदारस्थो यत् सन्धिं सृजसे मयि।
शुश्रूषां यतसे कर्त्तुं सखे मम न तत् क्षमं। त्वया मां सहितं दृष्ट्वा प्रिया भार्य्या सुताश्च ते।
कस्मात्ते मां न खादेयुर्हृष्टाः प्रणयिनस्त्वयि। नाहं त्वया सहेष्यामि वृत्तो हेतुः समागमे।
शिवं ध्यायस्व मे स्वस्थः सुकृतं स्मरसे यदि। शत्रोरनार्य्यभूतस्य क्लिष्टस्य क्षुधितस्य च।
भक्ष्यं मृगयमाणस्य कः प्राज्ञो विषयं व्रजेत्। स्वस्ति तेऽस्तु गमिष्यामि दूरादपि तवोद्विजे। ५०८५
नाहं त्वया समेष्यामि निवृत्तो भव लोमश। यदि त्वं सुकृतं वेत्सि तत्सख्यमनुसारय।
विश्वस्तं वा प्रमत्तं वा एतदेव कृतं भवेत्। बलवत्सन्निकर्षो हि न कदाचित् प्रशस्यते।
प्रशान्तादपि मे पापाद्भेतव्यं बलिनः सदा। यदि स्वार्थं न ते कार्य्यं ब्रूहि किं करवाणि ते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कामं सर्व्वं प्रदास्यामि न त्वात्मानं कदाचन। आत्मार्थे सन्ततिस्त्याज्या राज्यं रत्नं धनानि च।
अपि सर्व्वस्वमुत्सृज्य रक्षेदात्मानमात्मना। ऐश्वर्य्यधनरत्नानां प्राप्य मित्रे निवर्त्ततां। ५०८०
दृष्टा हि पुनरावृत्तिर्जीवतामिति नः श्रुतं। न त्वात्मनः सम्प्रदानं धनरत्नवदिष्यते।
आत्मा हि सर्व्वदा रक्ष्यो दारैरपि धनैरपि। आत्मरक्षणतन्त्राणां सुपरीक्षितकारिणां।
आपदो नोपपद्यन्ते पुरुषाणां स्वदोषजाः। शत्रुं सम्यग्विजानन्ति दुर्ब्बला ये बलीयसं।
न तेषां चाल्यते बुद्धिः शास्त्रार्थकृतनिश्चया। इत्यभिव्यक्तमेवं स पलितेनाभिभर्त्सितः।
मार्ज्जारो व्रीडितो भूत्वा मूषिकं वाक्यमब्रवीत्। ५०८५
॥ लोमश उवाच ॥ सत्यं शपे त्वयाऽहं वै मित्रद्रोहो विगर्हितः। तन्मन्येऽहं तव प्रज्ञां यस्त्वं मम हिते रतः।
उक्तवानर्थतत्त्वेन मया सम्भिन्नदर्शनं। न तु मामन्यथा साधो त्वं ग्रहीतुमिहार्हसि।
प्राणप्रदानजं त्वत्तो मयि सौहृदमागतं। धर्म्मज्ञोऽस्मि गुणज्ञोऽस्मि कृतज्ञोऽस्मि विशेषतः।
मित्रेषु वत्सलश्चास्मि त्वद्भक्तश्च विशेषतः। तस्मादेवं पुनः साधो मया चरितुमर्हसि।
त्वया हि वाच्यमानोऽहं जह्यां प्राणान् सबान्धवः। विश्रम्भो हि बुधैर्दृष्टो मद्विधेषु मनस्विषु। ५०९०
तदेतद्धर्म्मतत्त्वज्ञ न त्वं शङ्कितुमर्हसि। इति संस्तूयमानोऽपि मार्ज्जारेण स मूषिकः।
मनसा भावगम्भीरो मार्ज्जारं वाक्यमब्रवीत्। साधुर्भवान् श्रुतार्थोऽस्मि प्रिये च न च विश्वसे।
संस्तवैर्वा धनौघैर्वा नाहं शक्यः पुनस्त्वया। न ह्यमित्रे वशं यान्ति प्राज्ञा निष्कारणं सखे।
अस्मिन्नर्थे च गाथे द्वे निबोधोशनसा कृते। शत्रुसाधारणे कृत्ये कृत्वा सन्धिं बलीयसा।
समाहितश्चरेद्युक्त्या कृतार्थश्च न विश्वसेत्। न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। ५०९५
नित्यं विश्वासयेदन्यान् परेषान्तु न विश्वसेत्। तस्मात् सर्व्वास्ववस्थासु रक्षेज्जीवितमात्मनः।
द्रव्याणि सन्ततिश्चैव सर्व्वं भवति जीवतः। सङ्क्षेपो नीतिशास्त्राणामविश्वासः परो मतः।
नृषु तस्मादविश्वासः पुष्कलं हितमात्मनः। बध्यन्ते न ह्यविश्वस्ताः शत्रुभिर्दुर्ब्बला अपि।
विश्वस्तास्तेषु बध्यन्ते बलवन्तोऽपि दुर्ब्बलैः। त्वद्विधेभ्यो मया ह्यात्मा रक्ष्यो मार्ज्जार सर्व्वदा।
रक्ष त्वमपि चात्मानं चाण्डालाज्जातिकिल्बिषात्। स तस्य ब्रुवतस्त्वेवं सन्त्रासाज्जातसाध्वसः। ५१००
शाखां हित्वा जवेनाशु मार्ज्जारः प्रययौ ततः। ततः शास्त्रार्थतत्त्वज्ञो बुद्धिसामर्थ्यमात्मनः।
विश्राव्य पलितः प्राज्ञो विलमन्यज्जगाम ह। एवं प्रज्ञावता बुद्ध्या दुर्ब्बलेन महाबलाः।
एकेन बहवो मित्राः पलितेनाभिसन्धिताः। अरिणाऽपि समर्थेन सन्धिं कुर्व्वीत पण्डितः।
मूषिकश्च विडालश्च मुक्तावन्योन्यसंश्रयात्। इत्येष क्षत्त्रधर्म्मस्य मया मार्गेषु दर्शितः।
विस्तरेण महाराज संक्षेपमपि मे शृणु। अन्योन्यकृतवैरौ तु चक्रतुः प्रीतिमुत्तमां। ५१०५
अन्योन्यमभिसन्धातुं सम्बभूव तयोर्मतिः। तत्र प्राज्ञोऽभिसन्धत्ते सम्यग्बुद्धिसमाश्रयात्।
अभिसन्धीयते प्राज्ञः प्रमादादपि वा बुधैः। तस्मादभीतवद्भीतो विश्वस्तवदविश्वसन्।
न ह्यप्रमत्तश्चलति चलितो वा विनश्यति। कालेन रिपुणा सन्धिः काले मित्रेण विग्रहः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कार्य्यं इत्येव सन्धिज्ञाः प्राज्ञैर्नित्यं नराधिप । एतज्ज्ञात्वा महाराज शास्त्रार्थमभिगम्य च ।
अभियुक्तः प्रसन्नस्य प्राग्भयाद्भीतवच्चरेत् । भीतवत्सन्निधिः कार्य्यः प्रतिसन्धिस्तथैव च । ५११०
भयादुत्पद्यते बुद्धिरप्रमत्ताभियोगतः । न भयं विद्यते राजन् भीतस्यानागते भये ।
अभीतस्य च विश्रम्भात् सुमहज्जायते भयं । अभीस्सरति यो नित्यं मन्त्रो देयः कथञ्चन ।
अविज्ञानाद्धि विज्ञातो गच्छेदास्पददर्शिषु । तस्मादभीतवद्भीतो विश्वस्तं बहु विश्वसन् ।
कार्य्याणां गुरुतां प्राप्य नानृतं किञ्चिदाचरेत् । एवमेतन्मया प्रोक्तमितिहासं युधिष्ठिर ।
श्रुत्वा त्वं सुहृदां मध्ये यथावत् समुपाचर । उपलभ्य मतिञ्चाग्र्यामरिमित्रान्तरन्तथा । ५११५
सन्धिविग्रहकाले च मोक्षोपायस्तथैव च । शत्रुसाधारणे कृत्ये कृत्वा सन्धिं बलीयसा ।
समागमे चरेद्युक्त्या कृतार्थो न च विश्वसेत् । अविरुद्धां त्रिवर्गेण नीतिमितां महीपते ।
अभ्युत्तिष्ठ श्रुतादस्माद्भूयः संरक्षयन् प्रजाः । ब्राह्मणैश्चापि ते सार्द्धं यात्रा भवतु पाण्डव ।
ब्राह्मणा वै परं श्रेयो दिवि चेह च भारत । एते धर्म्मस्य वेत्तारः कृतज्ञाः सततं प्रभो ।
पूजिताः शुभकर्त्तारः पूजयेत्तान्नराधिप । राज्यं श्रेयः परं राजन् यशः कीर्त्तिञ्च लप्स्यसे । ५१२०
कुलस्य सन्ततिञ्चैव यथान्यायं यथाक्रमं ।

इयोरिमं भारत सन्धिविग्रहं सुभाषितं बुद्धिविशेषकारकं । यथा त्वमेत्य क्षितिपेन सर्व्वदा निषेवितव्यं नृप शत्रुमण्डले ।

इति श्रीमहाभारते शान्तिपर्व्वण्यापद्धर्म्मपर्व्वणि मार्ज्जारमूषिकसंवादे अष्टात्रिंशदधिकशततोऽध्यायः ॥ १३८ ॥

॥ युधिष्ठिर उवाच ॥ उक्तो मन्त्रो महाबाहो विश्वासो नास्ति शत्रुषु । कथं हि राजा वर्त्तेत यदि सर्व्वत्र नाश्वसेत् ।
विश्वासाद्धि परं राजन् राज्ञामुत्पद्यते भयं । कथं हि नाश्वसन्राजा शत्रून् जयति पार्थिव ।
एतन्मे संशयं छिन्धि मतिर्म्मे संप्रमुह्यति । अविश्वासकथामेतामुपश्रुत्य पितामह । ५१३५
॥ भीष्म उवाच ॥ शृणुष्व राजन् यद्वृत्तं ब्रह्मदत्तनिवेशने । पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः ।
काम्पिल्ये ब्रह्मदत्तस्य त्वन्तःपुरनिवासिनी । पूजनी नाम शकुनिर्दीर्घकालं सहोषिता ।
रुतज्ञा सर्व्वभूतानां यथा वै जीवजीवकः । सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गताऽपि सा ।
अभिप्रयाता सा तत्र पुत्त्रमेकं सुवर्च्चसं । समकालञ्च राज्ञोऽपि देव्यां पुत्त्रो व्यजायत ।
तयोरर्थे कृतज्ञा सा खेचरी पूजनी सदा । समुद्रतीरं सा गत्वा आजहार फलद्वयं । ५१४०
पुष्ट्यर्थञ्च स्वपुत्त्रस्य राजपुत्त्रस्य चैव ह । फलमेकं सुतायादाद्राजपुत्त्राय चापरं ।
अमृतास्वादसदृशं बलतेजोऽभिवर्द्धनं । आदायादाय सैवाशु तयोः प्रादात् पुनः पुनः ।
ततोऽगच्छत् परां वृद्धिं राजपुत्त्रः फलाशनात् । ततः स धात्र्या कक्षेण उह्यमानो नृपात्मजः ।
ददर्श तं पक्षिसुतं बाल्यादागत्य बालकः । ततो बाल्याच्च यत्नेन तेनाक्रीडत पक्षिणा ।
शून्ये च तमुपादाय पक्षिणं समजातकं । हत्वा ततः स राजेन्द्र धात्र्या हस्तमुपागतः । ५१४५
अथ सा पूजनी राजन्नागमत् फलहारिणी । अपश्यन्निहतं पुत्त्रं तेन बालेन भूतले ।
बाष्पपूर्णमुखी दीना दृष्ट्वा तं रुदती सुतं । पूजनी दुःखसन्तप्ता रुदती वाक्यमब्रवीत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्षत्त्रिये सङ्गतं नास्ति न प्रीतिर्न्न च सौहृदं। कारणात्सान्त्वयन्त्येते कृतार्थाः सन्त्यजन्ति च।
क्षत्त्रियेषु न विश्वासः कार्य्यः सर्व्वापकारिषु। अपकृत्यापि सततं सान्त्वयन्ति निरर्थकं।
अहमस्य करोम्यद्य सदृशीं वैरयातनां। कृतघ्नस्य नृशंसस्य भृशं विश्वासघातिनः। ५१५०
सहजं जातवृद्धस्य तथैव सहभोजिनः। शरणागतस्य च बधस्त्रिविधं ह्येव पातकं।
इत्युक्त्वा चरणाभ्यान्तु नेत्रे नृपसुतस्य सा। भित्त्वा खस्था तत इदं पूजनी वाक्यमब्रवीत्।
इच्छयेह कृतं पापं सद्यस्तच्चोपसर्पति। कृतं प्रतिकृतं येषां न नश्यति शुभाशुभं।
पापं कर्म्म कृतं किञ्चिद्यदि तस्मिन्न दृश्यते। नृपते तस्य पुत्त्रेषु पौत्त्रेष्वपि च नप्तृषु।
ब्रह्मदत्तः सुतं दृष्ट्वा पूजन्या हृतलोचनं। कृते प्रतिकृतं मत्वा पूजनीमिदमब्रवीत्। ५१५५
॥ ब्रह्मदत्त उवाच ॥ अस्ति वै कृतमस्माभिरस्ति प्रतिकृतं त्वया। उभयं तत्समीभूतं वस पूजनि मागमः।
॥ पूजन्युवाच ॥ सकृत्कृतापराधस्य तत्रैव परिलम्बतः। न तद्बुधाः प्रशंसन्ति श्रेयस्तत्रापसर्पणं।
सान्त्वे प्रयुक्ते सततं कृतवैरे न विश्वसेत्। क्षिप्रं स बध्यते मूढो न हि वैरं प्रशाम्यति।
अन्योन्यकृतवैराणां पुत्त्रपौत्त्रं नियच्छति। पुत्त्रपौत्त्रविनाशे च परलोकं नियच्छति।
सर्व्वेषां कृतवैराणामविश्वासः सुखोदयः। एकान्ततो न विश्वासः कार्य्यो विश्वासघातकैः। ५१६०
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद्भयमुत्पन्नमपि मूलं निकृन्तति।
कामं विश्वासयेदन्यान् परेषाञ्च न विश्वसेत्।
माता पिता बान्धवानां वरिष्ठौ भार्य्या जरा वीजमात्रन्तु पुत्त्रः। भ्राता शत्रुः क्लिन्नपाणिर्व्वयस्य आत्मा ह्येकः सुख दुःखस्य भोक्ता।
अन्योन्यकृतवैराणां न सन्धिरुपपद्यते। स च हेतुरतिक्रान्तो यदर्थमहमावसं।
पूजितस्यार्थमानाभ्यां जन्तोः पूर्व्वापकारिणः। मनो भवत्यविश्वस्तं कर्म्म त्रासयतेऽबलान्। ५१६५
पूर्व्वं सम्माननं यत्र पश्चाच्चैव विमानना। जह्यात्तत् सत्त्ववान् स्थानं शत्रोः सम्मानितोऽपि सन्।
उषिताऽस्मि तवागारे दीर्घकालं समर्च्चिता। तदिदं वैरमुत्पन्नं सुखमाशु व्रजाम्यहं।
॥ ब्रह्मदत्त उवाच ॥ यः कृते प्रतिकुर्य्याद्वै न स तत्रापराध्नुयात्। अनृणस्तेन भवति वस पूजनि मागमः।
पूजन्युवाच ॥ न कृतस्य च कर्त्तुश्च सख्यं सन्धीयते पुनः। हृदयं तत्र जानाति कर्त्तुश्चैव कृतस्य च।
॥ ब्रह्मदत्त उवाच ॥ कृतस्य चैव कर्त्तुश्च कार्य्यं सन्धीयते पुनः। वैरस्योपशमो दृष्टः पापं नोपाश्नुते पुनः। ५१७०
॥ पूजन्युवाच ॥ नास्ति वैरमतिक्रान्तं सान्त्वितोऽस्मीति नाश्वसेत्। विश्वासाद्बध्यते लोके तस्माच्छ्रेयोऽप्यदर्शनं।
तरसा ये न शक्यन्ते शस्त्रैः सुनिशितैरपि। साम्ना तेऽपि निगृह्यन्ते गजा इव करेणुभिः।
॥ ब्रह्मदत्त उवाच॥ संवासाज्जायते स्नेहो जीवितान्तकरेष्वपि। अन्योन्यस्य च विश्वासः श्वपचेन शुनो यथा।
अन्योन्यकृतवैराणां संवासान्मृदुतां गतं। नैव तिष्ठति तद्वैरं पुष्करस्थमिवोदकं।
॥ पूजन्युवाच ॥ वैरं पञ्चसमुत्थानं तच्च बुध्यन्ति पण्डिताः। स्त्रीकृतं वास्तुजं वाग्जं ससपत्नापराधजं। ५१७५
तत्र दाता न हन्तव्यः क्षत्त्रियेण विशेषतः। प्रकाशं वाऽप्रकाशञ्च बुद्ध्वा दोषबलाबलं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृतवैरे न विश्वासः कार्य्यस्त्विह सुहृद्यपि । छन्नं सन्तिष्ठते वैरं गूढोऽग्निरिव दारुषु ।
न वित्तेन न पारुष्यैर्न च सान्त्वेन वा श्रुतैः । कोपाग्निः शाम्यते राजंस्तोयाग्निरिव सागरे ।
न हि वैराग्निरुद्भूतः कर्म्म चाप्यपराधजं । शाम्यत्यदग्ध्वा नृपते विना ह्येकतरक्षयात् ।
सत्कृतस्यार्थमानाभ्यामनुपूर्व्वापकारिणः । नादेयो मित्रविश्वासः कर्म्म त्रासयते बलात् । ५१८०
नैवापकार्य्ये कस्मिंश्चिदहं त्वयि तथा भवान् । उषिताऽस्मि गृहेऽहन्ते नेदानीं विश्वसाम्यहं ।
॥ ब्रह्मदत्त उवाच ॥ कालेन क्रियते कार्य्यं तथैव विविधाः क्रियाः । कालेनैते प्रवर्त्तन्ते कः कस्येहापराध्यति ।
तुल्यञ्चोभे प्रवर्त्तेते मरणं जन्म चैव ह । कार्य्यते चैव कालेन तन्निमित्तं न जीवति ।
बध्यन्ते युगपत् केचिदेकैकस्य न चापरे । कालो दहति भूतानि सम्प्राप्याग्निरिवेन्धनं ।
नाहं प्रमाणं नैव त्वमन्योन्यं कारणं शुभे । कालो नित्यमुपादत्ते सुखं दुःखञ्च देहिनां । ५१८५
एवं वसेह सस्नेहा यथाकाममहिंसिता । यत् कृतं तत्तु मे चान्तं त्वञ्च वै चम पूजनि ।
॥ पूजन्युवाच ॥ यदि कालः प्रमाणं ते न वैरं कस्यचिद्भवेत् । कस्मात्त्वपचितिं यान्ति बान्धवा बान्धवैर्हतैः ।
कस्माद्देवासुराः पूर्व्वमन्योन्यमभिजघ्निरे । यदि कालेन निर्य्याणं सुखं दुःखं भवाभवौ ।
भिषजो भेषजं कर्त्तुं कस्मादिच्छन्ति रोगिणः । यदि कालेन पच्यन्ते भेषजैः किं प्रयोजनं ।
प्रलापः स महान् कस्मात् क्रियते शोकमूर्च्छितैः । यदि कालः प्रमाणन्ते कस्माद्धर्म्मोऽस्ति कर्त्तृषु । ५१९०
तव पुत्त्रो ममापत्यं हतवान् स हतो मया । अनन्तरं त्वयाऽहञ्च हन्तव्या हि नराधिप ।
अहं हि पुत्त्रशोकेन कृतपापा तवात्मजे । यथा त्वया प्रहर्त्तव्यं तथा तत्त्वञ्च मे शृणु ।
भक्षार्थं क्रीडनार्थञ्च नरा वाञ्छन्ति पक्षिणः । तृतीयो नास्ति संयोगो बधबन्धादृते क्षमः ।
बधबन्धभयादेते मोक्षतन्त्रमुपाश्रिताः । मरणोत्पातजं दुःखं प्राहुर्व्वेदविदो जनाः ।
सर्व्वस्य दयिताः प्राणाः सर्व्वस्य दयिताः सुताः । दुःखादुद्विजते सर्व्वः सर्व्वस्य सुखमीप्सितं । ५१९५
दुःखं जरा ब्रह्मदत्त दुःखमर्थविपर्य्ययः । दुःखञ्चानिष्टसंवासो दुःखमिष्टवियोजनं ।
बधबन्धकृतं दुःखं स्त्रीकृतं सहजं तथा । दुःखं सुतेन सततं जनान् विपरिवर्त्तते ।
न दुःखं परदुःखे वै केचिदाहुरबुद्धयः । यो दुःखं नाभिजानाति स जल्पति महाजने ।
यस्तु शोचति दुःखार्त्तः स कथं वक्तुमुत्सहेत् । रसज्ञः सर्व्वदुःखस्य यथात्मनि तथा परे ।
यत् कृतन्ते मया राजंस्त्वया च मम यत् कृतं । न तद्वर्षशतैः शक्यं व्यपोहितुमरिन्दम । ५२००
आवयोः कृतमन्योन्यं पुनः सन्धिर्न विद्यते । स्मृत्वा स्मृत्वा हि ते पुत्त्रं नवं वैरं भविष्यति ।
वैरमन्तिकमासाद्य यः प्रीतिं कर्त्तुमिच्छति । मृण्मयस्येव भग्नस्य यथा सन्धिर्न विद्यते ।
निश्चयः स्वार्थशास्त्रेषु विश्वासश्चासुखोदयः । उशनसैव गाथे द्वे प्रह्लादायाब्रवीत् पुरा ।
ये वैरिणः श्रद्दधते सत्ये सत्येतरेऽपि वा । बध्यन्ते श्रद्दधानास्तु मधु शुष्कतृणैर्यथा ।
न हि वैराणि शाम्यन्ति कुले दुःखगतानि च । आख्यातारश्च विद्यन्ते कुले वै म्रियते पुमान् । ५२०५
उपगृह्य तु वैराणि सान्त्वयन्ति नराधिप । अथैनं प्रतिपिंषन्ति पूर्णं घटमिवाश्मनि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

सदा न विश्वसेद्राजा पापं कृत्वेह कस्यचित्। अपकृत्य परेषां हि विश्वासाद्दुःखमश्नुते।
॥ ब्रह्मदत्त उवाच ॥ नाविश्वासाद्विन्दतेऽर्थानीहते चापि किञ्चन। भयात्त्वेकतरान्नित्यं मृतकल्पा भवन्ति च।
॥ पूजन्युवाच ॥ यस्येह व्रणितौ पादौ पद्भ्याञ्च परिसर्पति। खन्येते तस्य तौ पादौ सुगुप्तमिह धावतः।
नेत्राभ्यां सरुजाभ्यां यः प्रतिवातमुदीक्षते। तस्य वायुरुजाऽत्यर्थं नेत्रयोर्भवति ध्रुवं। ५२१०
दुष्टं पन्थानमासाद्य यो मोहादुपपद्यते। आत्मनो बलमज्ञाय तदन्तं तस्य जीवितं।
यस्तु वर्षमविज्ञाय क्षेत्रं कर्षति मानवः। हीनः पुरुषकारेण सस्यं नैवाश्नुते ततः।
यस्तु तिक्तं कषायं वा स्वादु वा मधुरं हितं। आहारं कुरुते नित्यं सोऽमृतत्वाय कल्पते।
पथ्यं मुक्त्वा तु यो मोहाद्दुष्टमश्नाति भोजनं। परिणाममविज्ञाय तदन्तं तस्य जीवितं।
दैवं पुरुषकारश्च स्थितावन्योन्यसंश्रयात्। उदाराणान्तु सत् कर्म्म दैवं क्लीवा उपासते। ५२१५
कर्म्म चात्महितं कार्य्यन्तीक्ष्णं वा यदि वा मृदु। ग्रस्यतेऽकर्म्मशीलस्तु सदाऽनर्थैरकिञ्चनः।
तस्मात् सर्व्वं व्यपोह्यार्थं कार्य्य एव पराक्रमः। सर्व्वस्वमपि सन्त्यज्य कार्य्यमात्महितं नरैः।
विद्या शौर्य्यञ्च दाक्ष्यञ्च बलं धैर्य्यञ्च पञ्चमं। मित्राणि सहजान्याहुर्वर्त्तयन्तीह तैर्बुधाः।
निवेशनञ्च कुप्यञ्च क्षेत्रं भार्य्या सुहृज्जनः। एतान्युपहितान्याहुः सर्व्वत्र लभते पुमान्।
सर्व्वत्र रमते प्राज्ञः सर्व्वत्र च विराजते। न विभीषयते कश्चिद्भीषितो न बिभेति च। ५२२०
नित्यं बुद्धिमतोऽप्यर्थः स्वल्पकोऽपि विवर्द्धते। दाक्ष्येणाकुर्व्वतः कर्म्म संयमात् प्रतितिष्ठति।
गृहस्नेहावबद्धानां नराणामल्पमेधसां। कुस्त्री खादति मांसानि माघमासे गवां इव।
गृहं क्षेत्राणि मित्राणि स्वदेश इति चापरे। इत्येवमवसीदन्ति नरा बुद्धिविपर्य्यये।
उत्पतेत् सहजाद्देशाद्व्याधिदुर्भिक्षपीडितात्। अन्यत्र वस्तुं गच्छेद्वा वसेद्वा नित्यमानितः।
तस्मादन्यत्र यास्यामि वस्तुं नाहमिहोत्सहे। कृतमेतदनार्य्यं मे तव पुत्रे च पार्थिव। ५२२५
कुभार्य्याञ्च कुपुत्त्रञ्च कुराजानं कुसौहृदं। कुसम्बन्धं कुदेशञ्च दूरतः परिवर्ज्जयेत्।
कुपुत्त्रे नास्ति विश्वासः कुभार्य्यायां कुतो रतिः। कुराज्ये निर्वृतिर्नास्ति कुदेशे नास्ति जीविका।
कुमित्रे सङ्गतिर्नास्ति नित्यमस्थिरसौहृदे। अवमानः कुसम्बन्धे भवत्यर्थविपर्य्यये।
सा भार्य्या या प्रियं ब्रूते स पुत्त्रो यत्र निर्वृतिः। तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते
यत्र नास्ति बलात्कारः स राजा तीव्रशासनः। भीरेव नास्ति सम्बन्धो दरिद्रं यो बुभूषते। ५२३०
भार्य्या देशोऽथ मित्राणि पुत्त्रसम्बन्धिबान्धवाः। एते सर्व्वे गुणवति धर्म्मनेत्रे महीपतौ।
अधर्म्मज्ञस्य विलयं प्रजा गच्छन्ति निग्रहात्। राजा मूलं त्रिवर्गस्य स्वप्रमत्तोऽनुपालयेत्।
बलिषड्भागमुद्धृत्य बलिं समुपयोजयेत्। न रक्षति प्रजाः सम्यक् यः स पार्थिवतस्करः।
दत्त्वाऽभयं यः स्वयमेव राजा न तत्प्रमाणं कुरुतेऽर्थलोभात्। स सर्व्वलोकादुपलभ्य पापं सोऽधर्म्मबुद्धिर्निरयं प्रयाति।
दत्त्वाऽभयं स्वयं राजा प्रमाणं कुरुते यदि। स सर्व्वसुखकृज्ज्ञेयः प्रजा धर्म्मेण पालयन्। ५२३५
माता पिता गुरुर्गोप्ता वह्निर्वैश्रवणो यमः। सप्त राज्ञो गुणानेतान्मनुराह प्रजापतिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पिता हि राजा राष्ट्रस्य प्रजानां योऽनुकम्पनः। तस्मिन्मिथ्याविनीतो हि तिर्य्यग्गच्छति मानवः।
सम्भावयति मातेव दीनमप्युपपद्यते। दहत्यग्निरिवानिष्टान् यमयन्नसतो यमः।
इष्टेषु विसृजन्नर्थान् कुवेर इव कामदः। गुरुर्द्धर्म्मोपदेशेन गोप्ता च परिपालयन्।
यस्तु रञ्जयते राजा पौरजानपदान् गुणैः। न तस्य भ्रमते राज्यं स्वयं धर्म्मानुपालनात।
स्वयं समुपजानन् हि पौरजानपदार्च्चनं। स सुखं प्रेक्षते राजा इह लोके परत्र च।
नित्योद्विग्नाः प्रजा यस्य करभारप्रपीडिताः। अनर्थैर्व्विप्रलुप्यन्ते स गच्छति पराभवं।
प्रजा यस्य विवर्द्धन्ते सरसीव महोत्पलं। स सर्व्वफलभाग्राजा स्वर्गलोके महीयते।
बलिना विग्रहो राजन् न कदाचित् प्रशस्यते। बलिना विग्रहो यस्य कुतो राज्यं कुतः सुखं।
॥ भीष्म उवाच ॥ सैवमुक्त्वा शकुनिका ब्रह्मदत्तं नराधिपं। राजानं समनुज्ञाप्य जगामाभीप्सितां दिशं।
एतत्ते ब्रह्मदत्तस्य पूजन्या सह भाषितं। मयोक्तं नृपतिश्रेष्ठ किमन्यत् श्रोतुमिच्छसि।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि ब्रह्मदत्तपूजनीसंवादे ऊनचत्वारिंशदधिकशतोऽध्यायः॥१३९॥
॥ युधिष्ठिर उवाच ॥ युगक्षयात् परिक्षीणे धर्म्मे लोके च भारत। दस्युभिः पीड्यमाने च कथं स्थेयं पितामह।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि नीतिमापत्सु भारत। उत्सृज्यापि घृणां काले यथा वर्त्तेत भूमिपः।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। भारद्वाजस्य संवादं राज्ञः शत्रुञ्जयस्य च।
राजा शत्रुञ्जयो नाम सौवीरेषु महारथः। भारद्वाजमुपागम्य पप्रच्छार्थविनिश्चयं।
अलब्धस्य कथं लिप्सा लब्धं केन विवर्द्धते। वर्द्धितं पाल्यते केन पालितं प्रणयेत् कथं।
तस्मै विनिश्चितार्थाय परिपृष्टोऽर्थनिश्चयं। उवाच ब्राह्मणो वाक्यमिदं हेतुमदुत्तमं।
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः। अच्छिद्रश्छिद्रदर्शी च परेषां विवरानुगः।
नित्यमुद्यतदण्डस्य भृशमुद्विजते नरः। तस्मात् सर्व्वाणि भूतानि दण्डेनैव प्रसाधयेत्।
एवं दण्डं प्रशंसन्ति पण्डितास्तत्त्वदर्शिनः। तस्माच्चतुष्टये तस्मिन् प्रधानो दण्ड उच्यते।
छिन्नमूले त्वधिष्ठाने सर्व्वेषां जीवनं हृतं। कथं हि शाखास्तिष्ठेयुश्छिन्नमूले वनस्पतौ।
मूलमेवादितश्छिन्द्यात् परपक्षस्य पण्डितः। ततः सहायान् पक्षञ्च मूलमेवानुसाधयेत्।
सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितं। आपदास्पदकालेन कुर्व्वीत न विचारयेत्।
वाङ्मात्रेण विनीतः स्याद्धृदयेन यथाक्षुरः। श्लक्ष्णपूर्व्वाभिभाषी च कामक्रोधौ च वर्ज्जयेत्।
सपत्नसंहिते कार्य्ये कृत्वा सन्धिं न विश्वसेत्। अपक्रामेत्ततः शीघ्रं कृतकार्य्यो विचक्षणः।
शत्रुञ्च मित्ररूपेण सान्त्वेनैवाभिसान्त्वयेत्। नित्यशश्चोद्विजेत्तस्मात् सर्पयुतादिव।
यथा बुद्धिं परिभवेत्तामतीतेन सान्त्वयेत्। अनागतेन दुष्प्रज्ञं प्रत्युत्पन्नेन पण्डितं।
अञ्जलिं शपथं सान्त्वं प्रणम्य शिरसा वदेत्। अश्रुप्रमार्ज्जनञ्चैव कर्त्तव्यं भूतिमिच्छता।
वहेदमित्रं स्कन्धेन यावत् कालस्य पर्य्ययः। प्राप्तकालन्तु विज्ञाय भिन्द्याद्घटमिवाश्मनि।
मुहूर्त्तमपि राजेन्द्र तिन्दुकालातवज्ज्वलेत्। न तुषाग्निरिवानर्च्चिर्धूमायेत चिरं नरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नाना र्थिकोऽर्थसम्बन्धं कृतघ्नेन समाचरेत् । अर्थी तु शक्यते भोक्तुं कृतकार्य्योऽवमन्यते ।
तस्मात् सर्व्वाणि कार्य्याणि सावशेषाणि कारयेत् । कोकिलस्य वराहस्य मेरोः शून्यस्य वेश्मनः
नटस्य भक्तिमित्रस्य यत् श्रेयस्तत् समाचरेत् । उत्थायोत्थाय गच्छेत नित्ययुक्तो रिपोर्गृहात् ।
कुशलञ्चास्य पृच्छेत यद्यप्यकुशलं भवेत् । नालसाः प्राप्नुवन्त्यर्थान्न क्लीवा नाभिमानिनः ।
न च लोकरवाद्भीता न वै शश्वत्प्रतीक्षिणः । नात्मच्छिद्रं रिपुर्विद्यात् विद्याच्छिद्रं परस्य तु । ५२७०
गूहेत् कूर्म्म इवाङ्गानि रक्षेद्विवरमात्मनः । वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शरवच्च विनिष्पतेत् । पानमक्षास्तथा नार्य्यो मृगया गीतवादितं ।
एतानि युक्त्या सेवेत प्रसङ्गो ह्यत्र दोषवान् । कुर्य्यात्तृणमयं चापं शयीत मृगशायिकां ।
अन्धः स्यादन्धवेलायां वाधिर्य्यमपि संश्रयेत् । देशकालौ समासाद्य विक्रमेत विचक्षणः ।
देशकालाभ्यतीतो हि विक्रमो निष्फलो भवेत् । कालाकालौ सम्प्रधार्य्य वलावलमथात्मनः । ५२७५
परस्परं वलं ज्ञात्वा तत्रात्मानं नियोजयेत् । दण्डेनोपनतं शत्रुं यो राजा न नियच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा । सुपुष्पितः स्यादफलः फलवान् स्याद्दुरारुहः ।
आमः स्यात् पक्वसंकाशो न च शीर्य्येत कस्यचित् । आशां कालवतीं कुर्य्यात्ताञ्च विघ्नेन योजयेत् ।
विघ्नं निमित्ततो ब्रूयान्निमित्तञ्चापि हेतुतः । भीतवत् संविधातव्यं यावद्भयमनागतं ।
आगतन्तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत् । न संशयमनारुह्य नरो भद्राणि पश्यति । ५२८०
संशयं पुनरारुह्य यदि जीवति पश्यति । अनागतं विजानीयाद्यच्छेद्भयमुपस्थितं ।
पुनर्वृद्धिभयात् किञ्चिदनिवृत्तं निशामयेत् । प्रत्युपस्थितकालस्य सुखस्य परिवर्ज्जनं ।
अनागतसुखाशा च नैव बुद्धिमतां नयः । योऽरिणा सह सन्धाय सुखं स्वपिति विश्वसन् ।
स वृक्षाग्रे प्रसुप्तो वा पतितः प्रतिबुध्यते । कर्म्मणा येन तेनैव मृदुना दारुणेन च ।
उद्धरेद्दीनमात्मानं समर्थो धर्म्ममाचरेत् । ये सपत्नाः सपत्नानां सर्व्वांस्तानुपसेवयेत् । ५२८५
आत्मनश्चापि वोद्धव्याश्चारा विनिहिताः परैः । चारस्त्वविदितः कार्य्य आत्मनोऽथ परस्य च ।
पाषण्डांस्तापसादींश्च परराष्ट्रे प्रवेशयेत् । उद्यानेषु, विहारेषु प्रपास्वावसथेषु च ।
पानागारे प्रवेशेषु तीर्थेषु च सभासु च । धर्म्माभिचारिणः पापाश्चौरा लोकस्य कण्टकाः ।
समागच्छन्ति तान् बुद्ध्वा नियच्छेच्छमयीत च । न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमभ्येति नापरीक्ष्य च विश्वसेत् । विश्वासयित्वा तु परं तत्त्वभूतेन हेतुना । ५२९०
अथास्य प्रहरेत् काले किञ्चिद्विचलिते पदे । अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितान् ।
भयं ह्यशङ्किताज्जातं समूलमपि कृन्तति । अवधानेन मौनेन काषायेण जटाजिनैः ।
विश्वासयित्वा द्वेष्टारमवलुम्पेद्यथा वृकः । पुत्त्रो वा यदि वा भ्राता पिता वा यदि वा सुहृत् ।
अर्थस्य विघ्नं कुर्व्वाणा हन्तव्या भूतिमिच्छता । गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य दण्डो भवति शाश्वतं । अभ्युत्थानाभिवादाभ्यां सम्प्रदानेन केनचित् । ५२९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रतिपुष्पफलाघाती तीक्ष्णतुण्ड इव द्विजः । नाच्छित्त्वा परमर्म्माणि नाकृत्वा कर्म्म दारुणं ।
नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियं । नास्ति जात्या रिपुर्नाम मित्रं वापि न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा । अमित्रं नैव मुञ्चेत वदन्तं कारुणान्यपि ।
दुःखं तत्र न कर्त्तव्यं हन्यात् पूर्व्वापकारिणं । संग्रहानुग्रहे यत्नः सदा कार्य्योऽनसूयता ।
निग्रहश्चापि यत्नेन कर्त्तव्यो भूतिमिच्छता । प्रहरिष्यन् प्रियं ब्रूयात् प्रहृत्यैव प्रियोत्तरं । ५२००
असिनाऽपि शिरश्छित्त्वा शोचेत च रुदेत च । निमन्त्रयीत सान्त्वेन सम्मानेन तितिक्षया ।
लोकाराधनमित्येतत् कर्त्तव्यं भूतिमिच्छता । न शुष्कवैरं कुर्व्वीत बाहुभ्यां न नदीं तरेत् ।
अनर्थकमनायुष्यं गोविषाणस्य भक्षणं । दन्ताश्च परिमृज्यन्ते रसश्चापि न लभ्यते ।
त्रिवर्गस्त्रिविधा पीडा अनुबन्धास्तथैव च । अनुबन्धं तथा ज्ञात्वा पीडाश्च परिवर्ज्जयेत् ।
ऋणशेषमग्निशेषं शत्रुशेषं तथैव च । पुनः पुनः प्रवर्द्धन्ते तस्मात् शेषं न धारयेत् । ५२०५
वर्द्धमानमृणं तिष्ठेत् परिभूताश्च शत्रवः । जनयन्ति भयं तीव्रं व्याधयश्चाप्युपेक्षिताः ।
नासम्यक्कृतकारी स्यादप्रमत्तः सदा भवेत् । कण्टकोऽपि हि दुश्छिन्नो विकारं कुरुते चिरं ।
बधेन च मनुष्याणां मार्गाणां दूषणेन च । आगाराणां विनाशैश्च परराष्ट्रं विनाशयेत् ।
गृध्रदृष्टिर्व्वकालीनः श्वचेष्टः सिंहविक्रमः । अनुद्विग्नः काकशङ्की भुजङ्गचरितं चरेत् ।
शूरमञ्जलिपातेन भीरुं भेदेन भेदयेत् । लुब्धमर्थप्रदानेन समं तुल्येन विग्रहः । ५२१०
श्रेणीमुख्योपजापेषु वल्लभानुनयेषु च । अमात्यान् परिरक्षेत भेदसंघातयोरपि ।
मृदुरित्यवजानन्ति तीक्ष्ण इत्युद्विजन्ति च । तीक्ष्णकाले भवेत्तीक्ष्णो मृदुकाले मृदुर्भवेत् ।
मृदुनैव मृदुं छिन्ति मृदुना हन्ति दारुणं । नासाध्यं मृदुना किञ्चित्तस्मात्तीक्ष्णतरो मृदुः ।
काले मृदुर्यो भवति काले भवति दारुणः । प्रसाधयति कृत्यानि शत्रुश्चाप्यधितिष्ठति ।
पण्डितेन विरुद्धः सन् दूरस्थोऽस्मीति नाश्वसेत् । दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः । ५२११
न तत्तरेद्यस्य न पारमुत्तरेन्न तद्धरेद्यः पुनराहरेत् परः । न तत् खनेद्यस्य न मूलमुद्धरेन्न तं हन्याद्यस्य शिरो न पातयेत् ।

इतीदमुक्तं वृजिनाभिसंहितं न चैतदेवं पुरुषः समाचरेत् । परप्रयुक्तेन कथं विभावयेदतो मयोक्तं भवतो हितार्थिना ।
यथावदुक्तं वचनं हितार्थिना निशम्य विप्रेण सुवीरराष्ट्रपः । तथाऽकरोद्वाक्यमदीनचेतनः श्रियञ्च दीप्तां बुभुजे सबान्धवः ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कणिकोपदेशे चत्वारिंशदधिकशततोऽध्यायः ॥ १४० ॥

॥ युधिष्ठिर उवाच ॥ हीने परमके धर्म्मे सर्व्वलोकाभिलङ्घिते । अधर्म्मे धर्म्मतां नीते धर्म्मे चाधर्म्मतां गते ।
मर्य्यादासु विनष्टासु क्षुभिते धर्म्मनिश्चये । राजभिः पीडिते लोके परैर्व्वाऽपि विशाम्पते । ५२२०
सर्व्वाश्रमेषु मूढेषु कर्म्मसूपहतेषु च । कामाल्लोभाच्च मोहाच्च भयं पश्यत्सु भारत ।
अविश्वस्तेषु सर्व्वेषु नित्यं भीतेषु पार्थिव । निकृत्या हन्यमानेषु वञ्चयत्सु परस्परं ।
सम्प्रदीप्तेषु देशेषु ब्राह्मणे चातिपीडिते । अवर्षति च पर्ज्जन्ये मिथोभेदे समुत्थिते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वस्मिन्दस्युसाद्भूते पृथिव्यामुपजीवने। केनस्विद्ब्राह्मणो जीवेज्जघन्ये काल आगते।
अतितिक्षुः पुत्त्रपौत्त्राननुक्रोशान्नराधिप। कथमापत्सु वर्त्तेत तन्मे ब्रूहि पितामह।
कथञ्च राजा वर्त्तेत लोके कलुषतां गते। कथमर्थाच्च धर्म्माच्च न हीयेत परन्तप।
॥ भीष्म उवाच॥ राजमूला महाबाहो योगक्षेमसुवृष्टयः। प्रजासु व्याधयश्चैव मरणञ्च भयानि च।
कृतं त्रेता द्वापरञ्च कलिश्च भरतर्षभ। राजमूला इति गतिर्मम नास्त्यत्र संशयः।
तस्मिंस्त्वभ्यागते काले प्रजानां दोषकारके। विज्ञानबलमास्थाय जीवितव्यं भवेत्तदा।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। विश्वामित्रस्य संवादं चाण्डालस्य च पक्कणे।
त्रेताद्वापरयोः सन्धौ तदा दैवविधिः क्रमात्। अनावृष्टिरभूद्घोरा लोके द्वादशवार्षिकी।
प्रजानामतिवृद्धानां युगान्ते समुपस्थिते। त्रेताविमोक्षसमये द्वापरप्रतिपादने।
नववर्ष सहस्राक्षः प्रतिलोमोऽभवद्गुरुः। जगाम दक्षिणं मार्गं सोमो व्यावृत्तलक्षणः।
नावश्यायोऽपि तत्राभूत् कुत एवाभ्रजातयः। नद्यः सङ्क्षिप्ततोयौघाः किञ्चिदन्तर्गतास्ततः।
सरांसि सरितश्चैव कूपाः प्रस्रवणानि च। हृतत्विषो न लक्ष्यन्ते निसर्गाद्दैवकारितात्।
उपशुष्कजलस्थाया विनिवृत्तसभा प्रपा। निवृत्तयज्ञस्वाध्याया निर्व्वषट्कारमङ्गला।
उच्छिन्नकृषिगोरक्षा निवृत्तविपणापणा। निवृत्तयूपसम्भारा विप्रनष्टमहोत्सवा।
अस्थिसञ्चयसङ्कीर्णा महाभूतरवाकुला। शून्यभूयिष्ठनगरा दग्धग्रामनिवेशना।
क्वचिच्चौरैः क्वचिच्छस्त्रैः क्वचिद्राजभिरातुरैः। परस्परभयाच्चैव शून्यभूयिष्ठनिर्ज्जना।
गतदैवतसंस्थाना वृद्धलोकनिराकृता। गोजाविमहिषीहीना परस्परपराहृता।
हतविप्रा हतारक्षा प्रनष्टौषधिसञ्चया। सर्व्वभूततरुप्राया बभूव वसुधा तदा।
तस्मिन् प्रतिभये काले क्षते धर्म्मे युधिष्ठिर। बभ्रमुः क्षुधिता मर्त्याः खादमानाः परस्परं।
ऋषयो नियमांस्त्यक्त्वा परित्यज्याग्निदैवताः। आश्रमान् सम्परित्यज्य पर्य्यधावन्नितस्ततः।
विश्वामित्रोऽथ भगवान्महर्षिरनिकेतनः। क्षुधा परिगतो धीमान् समन्तात् पर्य्यधावत।
त्यक्त्वा दारांश्च पुत्त्रांश्च कस्मिंश्चिज्जनसंसदि। भक्ष्याभक्ष्यसमो भूत्वा निरग्निरनिकेतनः।
स कदाचित् परिपतन् श्वपचानां निवेशनं। हिंस्राणां प्राणिघातानामाससाद वने क्वचित्।
विभिन्नकलसाकीर्णं श्वचर्म्मच्छेदनायुतं। वराहखरभग्नास्थिकपालघटसंकुलं।
मृतचेलपरिस्तीर्णं निर्म्माल्यकृतभूषणं। सर्पनिर्म्मोकमालाभिः कृतचिह्नकुटीमठं।
कुक्कुटारावबहुलं गर्द्दभध्वनिनादितं। उद्घोषद्भिः खरैर्व्वाक्यैः कलहद्भिः परस्परं।
उलूकपक्षिध्वजिभिर्द्दैवतायतनैर्व्वृतं। लोहघण्टापरिष्कारं श्वयूथपरिवारितं।
तत् प्रविश्य क्षुधाविष्टो विश्वामित्रो महानृषिः। आहारान्वेषणे युक्तः परं यत्नं समास्थितः।
न च क्वचिदविन्दत् स भिक्षमाणोऽपि कौशिकः। मांसमन्नं फलं मूलमन्यद्वा तत्र किञ्चन।
अहो कृच्छ्रं मया प्राप्तमिति निश्चित्य कौशिकः। पपात भूमौ दौर्ब्बल्यात्तस्मिंश्चाण्डालपक्कणे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स चिन्तयामास मुनिः किन्नु मे सुकृतं भवेत् । कथं वृथा न मृत्युः स्यादिति पार्थिवसत्तम ।
स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः । चाण्डालस्य गृहे राजन् सद्यः शस्त्रहतस्य वै । ५२५५
संचिन्तयामास तदा स्तैन्यं कार्य्यमितो मया । न हीदानीमुपायो मे विद्यते प्राणधारणे ।
आपत्सु विहितं स्तैन्यं विशिष्टस्य महीयसः । विप्रेण प्राणरक्षार्थं कर्त्तव्यमिति निश्चयः ।
हीनादादेयमादौ स्यात् समानात्तदनन्तरं । असम्भवे त्वाददीत विशिष्टादपि धार्म्मिकात् ।
सोऽहमन्त्यावसानाय हराम्येनां प्रतिग्रहात् । न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीं ।
एतां बुद्धिं समास्थाय विश्वामित्रो महामुनिः । तस्मिन् देशे स सुष्वाप श्वपचो यत्र भारत । ५२६०
स विगाढां निशां दृष्ट्वा सुप्ते चाण्डालपक्कणे । शनैरुत्थाय भगवान् प्रविवेश कुटीमतः ।
सुषुप्त इव चाण्डालः श्लेष्मापिहितलोचनः । परिभिन्नस्वरो रूक्षः प्रोवाचाप्रियदर्शनः ।
॥ श्वपच उवाच ॥ कः कुतन्त्रीं घटयति सुप्ते चाण्डालपक्कणे । जागर्म्मि नाव सुप्तोऽस्मि हतोऽसीति च दारुणः ।
विश्वामित्रस्ततो भीतः सहसा तमुवाच ह । तत्र व्रीडाकुलमुखः सोद्वेगस्तेन कर्म्मणा ।
विश्वामित्रोऽहमायुष्मन्नागतोऽहं बुभुक्षितः । मावधीर्म्मम सद्बुद्धे यदि सम्यक् प्रपश्यसि । ५२६५
चाण्डालस्तद्वचः श्रुत्वा महर्षेर्भावितात्मनः । शयनादुपसम्भ्रान्त उद्ययौ प्रति तं ततः ।
स विसृज्यास्रु नेत्राभ्यां बहुमानात् कृताञ्जलिः । उवाच कौशिकं रात्रौ ब्रह्मन् किन्ते चिकीर्षितं ।
विश्वामित्रस्तु मातङ्गमुवाच परिसान्त्वयन् । क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीं ।
क्षुधितः कलुषं यातो नास्ति ह्रीरशनार्थिनः । क्षुच्च मां दूषयत्यत्र हरिष्यामि श्वजाघनीं ।
अवसीदन्ति मे प्राणाः श्रुतिर्म्मे नश्यति क्षुधा । दुर्ब्बलो नष्टसंज्ञश्च भक्ष्याभक्ष्यविवर्ज्जितः । ५२७०
सोऽधर्म्मं बुध्यमानोऽपि हरिष्यामि श्वजाघनीं । अटन् भैक्षं न विन्दामि यदा युष्माकमालये ।
तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीं । अग्निर्मुखं पुरोधाश्च देवानां शुचिषाड्विभुः ।
यथावत् सर्व्वभुग्ब्रह्मा तथा मां विद्धि धर्म्मतः । तमुवाच स चाण्डालो महर्षे शृणु मे वचः ।
श्रुत्वा तत्त्वं तथा तिष्ठ यथा धर्म्मो न हीयते । धर्म्मं तवापि विप्रर्षे शृणु यत्ते ब्रवीम्यहं ।
शृगालादधमं श्वानं प्रवदन्ति मनीषिणः । तस्याप्यधम उद्देशः शरीरस्य श्वजाघनी । ५२७५
नेदं सम्यग्व्यवसितं महर्षे धर्म्मगर्हितं । चाण्डालस्वस्य हरणमभक्ष्यस्य विशेषतः ।
साध्वन्यमनुपश्य त्वमुपायं प्राणधारणे । न मांसलोभात्तपसो नाशस्ते स्यान्महामुने ।
जानता विहितं धर्म्मं न कार्य्यो धर्म्मसङ्करः । मास्म धर्म्मं परित्याक्षीस्त्वं हि धर्म्मभृतां वरः ।
विश्वामित्रस्ततो राजन्नित्युक्तो भरतर्षभ । क्षुधार्त्तः प्रत्युवाचेदं पुनरेव महामुनिः ।
निराहारस्य सुमहान्मम कालोऽभिधावतः । न विद्यतेऽप्युपायश्च कश्चिन्मे प्राणधारणे । ५२८०
येन येन विशेषेण कर्म्मणा येन केनचित् । अभ्युज्जीवेत् साद्यमानः समर्थो धर्म्ममाचरेत् ।
ऐन्द्रो धर्म्मः क्षत्त्रियाणां ब्राह्मणानामथाग्निकः । ब्रह्मवह्निर्म्मम बलं भक्षामि शमयन् क्षुधां ।
यथा यथैव जीवेद्धि तत् कर्त्तव्यमहेलया । जीवितं मरणात् श्रेयो जीवन् धर्म्ममवाप्नुयात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-3 Equipment Heritage Foundation, Jalgaon

सोऽहं जीवितमाकाङ्क्षन्नभक्ष्यस्यापि भक्षणं। व्यवस्ये बुद्धिपूर्व्वं वै तद्भवाननुमन्यतां।
जीवन्धर्म्मञ्चरिष्यामि प्रणोत्स्याम्यशुभानि तु। तपोभिर्व्विद्यया चैव ज्योतींषीव महत्तमः। ५३८५
॥ श्वपच उवाच॥ नैतत् खादन् प्राप्नुते दीर्घमायुर्नैव प्राणान्नामृतस्येव तृप्तिः। भिक्षामन्यां भिक्ष मा ते मनोऽस्तु श्वभक्षणे श्वा ह्यभक्ष्यो द्विजानां।
॥ विश्वामित्र उवाच॥ न दुर्भिक्षे सुलभं मांसमन्यत् श्वपाक नान्यन्मम चास्ति वित्तं। क्षुधार्त्तश्चाहमगतिर्निराशः श्वमांसे चास्मिन् षड्रसान् साधु मन्ये।
॥ श्वपच उवाच॥ पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्त्रस्य वै विशः। यथाशास्त्रं प्रमाणन्ते माऽभक्ष्ये मानसं कृथाः।
॥ विश्वामित्र उवाच॥ अगस्त्येनासुरो जग्धो वातापिः क्षुधितेन वै। अहमापद्गतः क्षुब्धो भक्षयिष्ये श्वजाघनीं।
॥ श्वपच उवाच॥ भिक्षामन्यामाहरेति न च कर्त्तुमिहार्हसि। न नूनं कार्य्यमेतद्वै हर कामं श्वजाघनीं। ५३९०
॥ विश्वामित्र उवाच॥ शिष्टा वै कारणं धर्म्मे तद्वृत्तमनुवर्त्तये। परां मेध्याशनादेनां भक्ष्यां मन्ये श्वजाघनीं।
॥ श्वपच उवाच॥ असता यत् समाचीर्णं न स धर्म्मः सनातनः। नाकार्य्यमिह कार्य्यं वै मा छलेनाशुभं कृथाः।
॥ विश्वामित्र उवाच॥ न पातकं नावमतमृषिः सन् कर्त्तुमर्हति। समौ च श्वमृगौ मन्ये तस्माद्भक्ष्ये श्वजाघनीं।
॥ श्वपच उवाच॥ यद्ब्राह्मणार्थे कृतमर्थितेन तेनर्षिणा तदवस्थाधिकारे। स वै धर्म्मो यत्र न पापमस्ति सर्व्वैरुपायैर्गुरवो हि रक्ष्याः।
॥ विश्वामित्र उवाच॥ मित्रञ्च मे ब्राह्मणस्यायमात्मा प्रियश्च मे पूज्यतमश्च लोके। तं भर्त्तुकामोऽहमिमां जिहीर्षे नृशंसानामीदृशानां न बिभ्ये। ५३९५
॥ श्वपच उवाच॥ कामं नरा जीवितं सन्त्यजन्ति न चाभक्ष्ये क्वचित् कुर्व्वन्ति बुद्धिं। सर्व्वान् कामान् प्राप्नुवन्तीह विद्वन् प्रियस्व कामं सहितः क्षुधैव।
॥ विश्वामित्र उवाच॥ स्थाने भवेत् संशयः प्रेत्यभावे निःसंशयः कर्म्मणां वै विनाशः। अहं पुनर्व्रतनित्यः शमात्मा मूलं रक्ष्यं भक्षयिष्याम्यभक्ष्यं।
बुद्ध्यात्मके व्यक्तमस्तीति पुण्यं मोहात्मके यत्र यथा श्वभक्षे। यद्यप्येतत् संशयात्मा चरामि नाहं भविष्यामि यथा त्वमेव।
॥ श्वपच उवाच॥ गोपनीयमिदं दुःखमिति मे निश्चिता मतिः। दुष्कृती ब्राह्मणः सन्नं यस्त्वामहमुपालभे।
॥ विश्वामित्र उवाच॥ पिबन्त्येवोदकं गावो मण्डूकेषु रुवत्स्वपि। न तेऽधिकारो धर्म्मेऽस्ति माभूरात्मप्रशंसकः। ५४००
॥ श्वपच उवाच॥ सुहृद्भूत्वा ऽनुशासे त्वां कृपा हि त्वयि मे द्विज। यदिदं श्रेय आधत्स्व मा लोभात् पापकं कृथा
॥ विश्वामित्र उवाच॥ सुहृन्मे त्वं सुखेप्सुश्चेदापदो मां समुद्धर। जानेऽहं धर्म्मतोत्मानं शौनीं मुत्सृज्य जाघनीं।
॥ श्वपच उवाच॥ नैवोत्सहे भवतो दातुमेतां नोपेक्षितुं ह्रियमाणं स्वमन्नं। उभौ स्याव: पापलोकावलिप्तौ दाता चाहं ब्राह्मणस्त्वं प्रतीच्छन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ विश्वामित्र उवाच ॥ अद्याहमेतद्वृजिनं कर्म्म कृत्वा जीवंश्चरिष्यामि महापवित्रं । स पूतात्मा धर्म्ममेवाभिपत्स्ये यदेतयोर्गुरु तद्वै ब्रवीहि ।

॥ श्वपच उवाच ॥ आत्मैव साक्षी कुलधर्म्मकृत्ये त्वमेव जानासि यदत्र दुष्कृतं । यो ह्याद्रियाद्भक्ष्यमिति श्वमांसं मन्ये न तस्यास्ति विवर्ज्जनीयं । ५४०५

॥ विश्वामित्र उवाच ॥ उपादाने खादने चास्ति दोषः कार्य्यात्यये नित्यमत्रापवादः । यस्मिन् हिंसा नानृतं वाच्यलेशोऽभक्ष्यक्रिया यत्र न तद्गरीयः ।

॥ श्वपच उवाच ॥ यद्येष हेतुस्तव खादनेऽस्य न ते वेदः कारणं नार्य्यधर्म्मः । तस्माद्भक्ष्येऽभक्षणे वा द्विजेन्द्र दोषं न पश्यामि यथेदमत्र ।

॥ विश्वामित्र उवाच ॥ नैवातिपापं भक्षमाणस्य दृष्टं सुरान्तु पीत्वा पततीति शब्दः । अन्योन्यकार्य्याणि यथा तथैव न पापमात्रेण कृतं हिनस्ति ।

॥ श्वपच उवाच ॥ अस्थानतो हीनतः कुत्सिताद्वा तद्विद्वांसं बाधते साधुवृत्तं । स्थानं पुनर्यो लभतेऽभिषङ्गात्तेनापि दण्डः सहितव्य एव ।

॥ भीष्म उवाच ॥ एवमुक्त्वा निववृते मातङ्गः कौशिकं तदा । विश्वामित्रो जहारैव कृतबुद्धिः श्वजाघनीं । ५४१०
ततो जग्राह स श्वाङ्गं जीवितार्थी महामुनिः । सदारस्तामुपाहृत्य वने भोक्तुमियेष सः ।
अथास्य बुद्धिरभवत् विधिनाऽहं श्वजाघनीं । भक्षयामि यथाकामं पूर्व्वं सन्तर्प्य देवताः ।
ततोऽग्निमुपसंहृत्य ब्राह्मेण विधिना मुनिः । ऐन्द्राग्नेयेन विधिना चरुं श्रपयत स्वयं ।
ततः समारभत् कर्म्म दैवं पित्र्यञ्च भारत । आहूय देवानिन्द्रादीन् भागं भागं विधिक्रमात् ।
एतस्मिन्नेव काले तु प्रववर्ष स वासवः । सञ्जीवयन् प्रजाः सर्व्वा जनयामास चौषधीः । ५४१५
विश्वामित्रोऽपि भगवंस्तपसा दग्धकिल्बिषः । कालेन महता सिद्धिमवाप परमाद्भुतां ।
स संहृत्य च तत् कर्म्म अनास्वाद्य च तद्धविः । तोषयामास देवांश्च पितॄंश्च द्विजसत्तमः ।
एवं विद्वानदीनात्मा व्यसनस्थो जिजीविषुः । सर्व्वोपायैरुपायज्ञो दीनमात्मानमुद्धरेत् ।
एतां बुद्धिं समास्थाय जीवितव्यं सदा भवेत् । जीवन् पुण्यमवाप्नोति पुरुषो भद्रमश्नुते ।
तस्मात् कौन्तेय विदुषा धर्म्माधर्म्मविनिश्चये । बुद्धिमास्थाय लोकेऽस्मिन् वर्त्तितव्यं कृतात्मनः । ५४२०

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि विश्वामित्रश्वपचसंवादे एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

॥ युधिष्ठिर उवाच ॥ यदि घोरं समुद्दिष्टमश्रद्धेयमिवानृतं । अस्ति स्विद्दस्युमर्य्यादा यामहं परिवर्ज्जये ।
संमुह्यामि विषीदामि धर्म्मे मे शिथिलीकृते । उद्यमं नाधिगच्छामि कदाचित् परिसान्त्वयन् ।
॥ भीष्म उवाच ॥ नैतत् श्रुत्वा गमादेव तव धर्म्मानुशासनं । प्रज्ञासमवहारोऽयं कविभिः संभृतं मधु ।
बह्व्यः प्रतिविधातव्याः प्रज्ञा राज्ञा ततस्ततः । नैकशाखेन धर्म्मेण यात्रैषा संप्रवर्त्तते ।
बुद्धिसंजननो धर्म्म आचारश्च सतां सदा । ज्ञेयो भवति कौरव्य सदा तद्विद्धि मे वचः । ५४२५
बुद्धिश्रेष्ठा हि राजानश्चरन्ति विजयैषिणः । धर्म्मः प्रतिविधातव्यो बुद्ध्या राज्ञा ततस्ततः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नैकशाखेन धर्म्मेण राज्ञो धर्म्मो विधीयते। दुर्ब्बलस्य कुतः प्रज्ञा पुरस्तादनुपाहृता।
अद्वैधज्ञः पथि द्वैधे संशयं प्राप्तुमर्हति। बुद्धिद्वैधं वेदितव्यं पुरस्तादेव भारत।
पार्श्वतः करणं प्राज्ञो विष्टम्भित्वा प्रकारयेत्। जनस्तच्चरितं धर्म्मं विजानात्यन्यथाऽन्यथा।
अमिथ्याज्ञानिनः केचिन्मिथ्याविज्ञानिनः परे। तद्वै यथायथं बुद्ध्वा ज्ञानमाददते सतां। ५४३०
परिमुष्णन्ति शास्त्राणि धर्म्मस्य परिपन्थिनः। वैषम्यमर्थविद्यानां निरर्थाः ख्यापयन्ति ते।
आजिजीविषवो विद्यां यशःकामाः समन्ततः। ते सर्व्वे नृप पापिष्ठा धर्म्मस्य परिपन्थिनः।
अपक्वमतयो मन्दा न जानन्ति यथायथं। यथा ह्यशास्त्रकुशलाः सर्व्वत्रायुक्तिनिष्ठिताः।
परिमुष्णन्ति शास्त्राणि शास्त्रदोषानुदर्शिनः। विज्ञातमर्थं विद्यानां न सम्यगिति वर्त्तते।
निन्दया परविद्यानां स्वविद्यां ख्यापयन्ति च। वागस्त्रा वाक्छुरीभूता दुग्धविद्याफला इव। ५४३५
तान् विद्यावणिजो विद्धि राक्षसानिव भारत। व्याजेन सद्भिर्व्विहितो धर्म्मस्ते परिहास्यति।
न धर्म्मवचनं वाचा नैव बुद्ध्येति नः श्रुतं। इति वार्हस्पतं ज्ञानं प्रोवाच मघवा स्वयं।
नत्वेव वचनं किञ्चिदनिमित्तादिहोच्यते। सुविनीतेन शास्त्रेण न व्यवस्यन्त्यथापरे।
लोकयात्रामिहैके तु धर्म्मं प्राहुर्म्मनीषिणः। समुद्दिष्टं सतां धर्म्मं स्वयमूहेत पण्डितः।
अमर्षाच्छास्त्रसम्मोहादविज्ञानाच्च भारत। शास्त्रं प्राज्ञस्य वदतः समूहे यात्यदर्शनं। ५४४०
आगतागमया बुद्ध्या वचनेन प्रशस्यते। अज्ञानाज्ज्ञानहेतुत्वाद्वचनं साधु मन्यते।
अनया हतमेवेदमिति शास्त्रमपार्थकं। दैतेयानुशना: प्राह संशयच्छेदनं पुरा।
ज्ञानमप्यपदेश्यं हि यथा नास्ति तथैव तत्। तं तथा छिन्नमूलेन सन्नोदयितुमर्हसि।
अनव्यवहितं यो वा नेदं वाक्यमुपाश्नुते। उग्रायैव हि सृष्टोऽसि कर्म्मणे न त्वमीक्षसे।
अङ्ग मामन्ववेक्षस्व राजन्याय बुभूषित। यथा प्रमुच्यते त्वन्या यदर्थं न प्रमोदते। ५४४५
अजोऽश्वः क्षत्रमित्येतत् सदृशं ब्रह्मणा कृतं। तस्मादभीक्ष्णं भूतानां यात्रा काचित् प्रसिध्यति।
यस्त्ववध्यवधे दोषः स वध्यस्यावधे स्मृतः। सा चैव खलु मर्य्यादा यामयं परिवर्ज्जयेत्।
तस्मात्तीक्ष्णः प्रजा राजा स्वधर्म्मे स्थापयेत्ततः। अन्योन्यं भक्षयन्तो हि प्रचरेयुर्वृका इव।
यस्य दस्युगणा राष्ट्रे ध्वाङ्क्षा मत्स्यान् जलादिव। विहरन्ति परस्वानि स वै क्षत्रियपांसनः।
कुलीनान् सचिवान् कृत्वा वेदविद्यासमन्वितान्। प्रशाधि पृथिवीं राजन् प्रजा धर्म्मेण पालयन्। ५४५०
विहीनं कर्म्मणाऽन्यायं यः प्रगृह्णाति भूमिपः। उपायस्याविशेषज्ञं तद्वै क्षत्रं नपुंसकं।
नैवोग्रं नैव चानुग्रं धर्म्मेणेह प्रशस्यते। उभयं न व्यतिक्रामेदुग्रो भूत्वा मृदुर्भव।
कष्टः क्षत्रियधर्म्मोऽयं सौहृदं त्वयि मे स्थितं। उग्रकर्म्मणि सृष्टोऽसि तस्माद्राज्यं प्रशाधि वै।
अशिष्टनिग्रहो नित्यं नित्यं शिष्टस्य पालनं। एवं शुक्रोऽब्रवीद्धीमानापत्सु भरतर्षभ।
॥ युधिष्ठिर उवाच ॥ अस्ति चेदिह मर्य्यादा यामन्यो नाभिलङ्घयेत्। पृच्छामि त्वां सतां श्रेष्ठ तन्मे ब्रूहि पिता
मह। ५४५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ ब्राह्मणानेव सेवेत विद्यावृद्धांस्तपस्विनः । श्रुतचारित्रवृत्ताढ्यान् पवित्रं ह्येतदुत्तमं ।
या देवतासु वृत्तिस्ते साऽस्तु विप्रेषु नित्यदा । क्रुद्धैर्हि विप्रैः कर्म्माणि कृतानि बहुधा नृप ।
प्रीत्या यशो भवेन्मुख्यमप्रीत्या परमं भयं । प्रीत्या ह्यमृतवद्विप्राः क्रुद्धाश्चैव विषं यथा ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि द्वाचत्वारिंशदधिकशततोऽध्यायः ॥ १४२ ॥
॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ सर्व्वशास्त्रविशारद । शरणं पाल्यमानस्य यो धर्म्मस्तं ब्रवीहि मे ।
॥ भीष्म उवाच ॥ महान् धर्म्मो महाराज शरणागतपालने । अर्हः प्रष्टुं भवांश्चैव प्रश्नं भरतसत्तम । ५४६०
शिविप्रभृतयो राजन्राजानः शरणागतान् । परिपाल्य महात्मानः संसिद्धिं परमाङ्गताः ।
श्रूयते च कपोतेन शत्रुः शरणमागतः । पूजितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ।
॥ युधिष्ठिर उवाच ॥ कथं कपोतेन पुरा शत्रुः शरणमागतः । स्वमांसं भोजितः काञ्च गतिं लेभे स भारत ।
॥ भीष्म उवाच ॥ शृणु राजन् कथां दिव्यां सर्व्वपापप्रणाशिनीं । नृपतेर्मुचुकुन्दस्य कथितां भार्गवेण वै ।
इममर्थं पुरा पार्थ मुचुकुन्दो नराधिपः । भार्गवं परिपप्रच्छ प्रणतः पुरुषर्षभ । ५४६५
तस्मै शुश्रूषमाणाय भार्गवोऽकथयत् कथां । इमां यथा कपोतेन सिद्धिः प्राप्ता नराधिप ।
॥ मुनिरुवाच ॥ धर्म्मनिश्चयसंयुक्तां कामार्थसहितां कथां । शृणुष्वावहितो राजन् गदतो मे महाभुज ।
कश्चित् क्षुद्रसमाचारः पृथिव्यां कालसम्मितः । विचचार महारण्ये घोरः शकुनिलुब्धकः ।
काकोल इव कृष्णाङ्गो रक्ताक्षः कालसम्मितः । दीर्घजङ्घो ह्रस्वपादो महावक्त्रो महाहनुः ।
नैव तस्य सुहृत् कश्चिन्न सम्बन्धी न बान्धवाः । स हि तैः सम्परित्यक्तस्तेन रौद्रेण कर्म्मणा । ५४७०
नरः पापसमाचारस्त्यक्तव्यो दूरतो बुधैः । आत्मानं योऽभिसन्धत्ते सोऽन्यस्य स्यात् कथं हितः ।
ये नृशंसा दुरात्मानः प्राणिप्राणहरा नराः । उद्वेजनीया भूतानां व्याला इव भवन्ति ते ।
स वै चारकमादाय द्विजान् हत्वा वने सदा । चकार विक्रयं तेषां पतङ्गानां जनाधिप ।
एवन्तु वर्त्तमानस्य तस्य वृत्तिं दुरात्मनः । अगमत् सुमहान् कालो न चाधर्म्ममबुध्यत ।
तस्य भार्य्यासहायस्य रममाणस्य शाश्वतं । दैवयोगविमूढस्य नान्या वृत्तिररोचयत् । ५४७५
ततः कदाचित्तस्याथ वनस्थस्य समन्ततः । पातयन्निव वृक्षांस्तान् सुमहान् वातसम्भ्रमः ।
मेघसङ्कुलमाकाशं विद्युन्मण्डलमण्डितं । सञ्छन्नस्तु मुहूर्त्तेन नौसार्थैरिव सागरः ।
वारिधारासमूहेन संप्रवृष्टः शतक्रतुः । क्षणेन पूरयामास सलिलेन वसुन्धरां ।
ततो धाराकुले काले संभ्रमन् नष्टचेतनः । शीतार्त्तस्तदनं सर्व्वमाकुलेनान्तरात्मना ।
नैव निम्नं स्थलं वाऽपि सोऽविन्दत विहङ्गहा । पूरितो हि जलौघेन तस्य मार्गो वनस्य तु । ५४८०
पक्षिणो वर्षवेगेन हता लीनास्तदाऽभवन् । मृगसिंहवराहाश्च स्थलमाश्रित्य शेरते ।
महता वातवर्षेण त्रासितास्ते वनौकसः । भयार्त्ताश्च क्षुधार्त्ताश्च बभ्रमुः सहिता वने ।
स तु शीतहतैर्गात्रैर्न जगाम न तस्थिवान् । ददर्श पतितां भूमौ कपोतीं शीतविक्लवां ।
दृष्ट्वार्त्तोऽपि हि पापात्मा स तां पञ्जरकेऽक्षिपत् । स्वयं दुःखाभिभूतोऽपि दुःखमेवाकरोत् परे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पापात्मा पापकारित्वात् पापमेव चकार सः। सोऽपश्यद्वनषण्डेषु मेघनीलं वनस्पतिं। ५४८५
सेव्यमानं विहङ्गौघैश्छायावासफलार्थिभिः। धात्रा परोपकाराय स साधुरिव निर्म्मितः।
अथाभवत् क्षणेनैव वियद्विमलतारकं। महत्सर इवोत्फुल्लं कुमुदच्छुरितोदकं।
ताराढ्यं कुमुदाकारमाकाशं निर्म्मलं बहु। घनैर्मुक्तं नभो दृष्ट्वा लुब्धकः शीतविक्लवः।
दिशो विलोकयामास विगाढां प्रेक्ष्य शर्व्वरीं। दूरतो मे निवेशश्च अस्माद्देशादिति प्रभो।
कृतबुद्धिर्द्रुमे तस्मिन् वस्तुं तां रजनीं ततः। साञ्जलिः प्रणतिं कृत्वा वाक्यमाह वनस्पतिं। ५४९०
शरणं यामि यान्यस्मिन् दैवतानि वनस्पतौ। स शिलायां शिरः कृत्वा पर्णान्यास्तीर्य्य भूतले।
दुःखेन महताविष्टस्ततः सुष्वाप पक्षिहा।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कपोतलुब्धकसंवादे त्रिचत्वारिंशदधिकशततोऽध्यायः ॥ १४३ ॥
॥ भीष्म उवाच ॥ अथ वृक्षस्य शाखायां विहङ्गः ससुहृज्जनः। दीर्घकालोषितो राजंस्तत्र चित्रतनूरुहः।
तस्य कल्यं गता भार्य्या चरितुं नाभ्यवर्त्तत। प्राप्तां च रजनीं दृष्ट्वा स पक्षी पर्य्यतप्यत।
वातवर्षं महच्चासीन्न चागच्छति मे प्रिया। किन्नु तत्कारणं येन साऽद्यापि न निवर्त्तते। ५४९५
अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने। तया विरहितं हीदं शून्यमद्य गृहं मम।
पुत्त्रपौत्त्रवधूभृत्यैराकीर्णमपि सर्व्वतः। भार्य्याहीनं गृहस्थस्य शून्यमेव गृहं भवेत्।
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। गृहन्तु गृहिणीहीनमरण्यसदृशं मतं।
यदि सा रक्तनेत्रान्ता चित्राङ्गी मधुरस्वरा। अद्य नायाति मे कान्ता न कार्य्यं जीवितेन मे।
न भुङ्क्ते मय्यभुक्ते या नास्नाते स्नाति सुव्रता। नातिष्ठत्युपतिष्ठेत शेते च शयिते मयि। ५५००
हृष्टे भवति सा हृष्टा दुःखिते मयि दुःखिता। प्रोषिते दीनवदना क्रुद्धे च प्रियवादिनी।
पतिव्रता पतिगतिः पतिप्रियहिते रता। यस्य स्यात्तादृशी भार्य्या धन्यः स पुरुषो भुवि।
सा हि श्रान्तं क्षुधार्त्तञ्च जानीते मां तपस्विनी। अनुरक्ता स्थिरा चैव भक्ता स्निग्धा यशस्विनी।
वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद्गृहं। प्रासादोऽपि तया हीनः कान्तार इति निश्चितं।
धर्म्मार्थकामकालेषु भार्य्या पुंसः सहायिनी। विदेशगमने चास्य सैव विश्वासकारिका। ५५०५
भार्य्या हि परमो ह्यर्थः पुरुषस्येह पठ्यते। असहायस्य लोकेऽस्मिन् लोकयात्रा सहायिनी।
तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च। नास्ति भार्य्यासमं किञ्चिन्नरस्यार्त्तस्य भेषजं।
नास्ति भार्य्यासमो बन्धुर्नास्ति भार्य्यासमा गतिः। नास्ति भार्य्यासमो लोके सहायो धर्म्मसंग्रहे।
यस्य भार्य्या गृहे नास्ति साध्वी च प्रियवादिनी। अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहं।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि भार्य्याप्रशंसायां चतुश्चत्वारिंशदधिकशततोऽध्यायः ॥ १४४ ॥
॥ भीष्म उवाच ॥ एवं विलपतस्तस्य श्रुत्वा तु करुणं वचः। गृहीता शकुनिघ्नेन कपोती वाक्यमब्रवीत्। ५५१०
॥ कपोत्युवाच ॥ अहोऽतीव सुभाग्याऽहं यस्या मे दयितः पतिः। असतो वा सतो वाऽपि गुणानेवं प्रभाषते।
न सा स्त्री ह्यभिमन्तव्या यस्यां भर्त्ता न तुष्यति। तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्व्वदेवताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jagadguru

अग्निसाचिकमित्येव भर्त्ता वै दैवतं परं । दावाग्निनेव निर्द्दग्धा सपुष्पस्तवका लता ।
भस्मीभवति सा नारी यस्या भर्त्ता न तुष्यति । इति सञ्चिन्त्य दुःखार्त्ता भर्त्तारं दुःखितं तदा ।
कपोती लुब्धकेनापि गृहीता वाक्यमब्रवीत् । हन्त वच्यामि ते श्रेयः श्रुत्वा तु कुरु तत्तथा ।
शरणागतसन्त्राता भव कान्त विशेषतः । एष शाकुनिकः शेते तव वासं समाश्रितः ।
शीतार्त्तश्च क्षुधार्त्तश्च पूजामस्मै समाचर । यो हि कश्चिद्द्विजं हन्याद्गाञ्च लोकस्य मातरं ।
शरणागतञ्च यो हन्यात्तुल्यं तेषाञ्च पातकं । अस्माकं विहिता वृत्तिः कापोती जातिधर्म्मतः ।
सा न्याय्यात्मवता नित्यं त्वद्विधेनानुवर्त्तितुं । यस्तु धर्म्मं यथाशक्ति गृहस्थो ह्यनुवर्त्तते ।
स प्रेत्य लभते लोकानक्षयानिति शुश्रुम । स त्वं सन्तानवानद्य पुत्त्रवानसि च द्विजः ।
तत्स्वदेहे दयां त्यक्त्वा धर्म्मार्थौ परिगृह्य च । पूजामस्मै प्रयुङ्क्ष्व त्वं प्रीयेतास्य मनो यथा ।
मत्कृते मा च सन्तापं कुर्व्वीथास्त्वं विहङ्गम । शरीरयात्राकृत्यार्थमन्यान्दारानुपैष्यसि ।
इति सा शकुनी वाक्यं पञ्जरस्था तपस्विनी । अतिदुःखान्विता प्राह भर्त्तारं समुदीक्ष्य च ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कपोतलुब्धकसंवादे पञ्चचत्वारिंशदधिकशततोऽध्यायः ॥ १४५ ॥

॥ भीष्म उवाच ॥ स पत्न्या वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितं । हर्षेण महता युक्तो वाक्यव्याकुललोचनः ।
तं वै शाकुनिकं दृष्ट्वा विधिदृष्टेन कर्म्मणा । स पक्षी पूजयामास यत्नात्तं पक्षिजीविनं ।
उवाच स्वागतं तेऽद्य ब्रूहि किं करवाणि ते । सन्तापश्च न कर्त्तव्यः स्वगृहे वर्त्तते भवान् ।
तद्ब्रवीतु भवान् क्षिप्रं किं करोमि किमिच्छसि । प्रणयेन ब्रवीमि त्वां त्वं हि नः शरणागतः ।
अरावप्युचितं कार्य्यमातिथ्यं गृहमागते । छेत्तुमप्यागते च्छायां नोपसंहरते द्रुमः ।
शरणागतस्य कर्त्तव्यमातिथ्यं हि प्रयत्नतः । पञ्चयज्ञप्रवृत्तेन गृहस्थेन विशेषतः ।
पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमे । तस्य नायं न च परो लोको भवति धर्म्मतः ।
तद्ब्रूहि मां सुविश्रब्धो यत्त्वं वाचा वदिष्यसि । तत् करिष्याम्यहं सर्व्वं मा त्वं शोके मनः कृथाः ।
तस्य तद्वचनं श्रुत्वा शकुनेर्लुब्धकोऽब्रवीत् । बाधते खलु मे शीतं सन्त्राणं हि विधीयतां ।
एवमुक्तस्ततः पक्षी पर्णान्यास्तीर्य्य भूतले । यथाशक्त्या हि पर्णेन ज्वलनार्थं द्रुतं ययौ ।
गत्वाऽङ्गारककर्म्मान्तं गृहीत्वाऽग्निमथागमत् । ततः शुष्केषु पर्णेषु पावकं सोऽप्यदीपयत् ।
स संदीप्तं महत्कृत्वा तमाह शरणागतं । प्रतापय सुविश्रब्धः स्वगात्राण्यकुतोभयः ।
स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत् । अग्निप्रत्यागतप्राणस्ततःप्राह विहङ्गमं ।
हर्षेण महताविष्टो वाक्यं व्याकुललोचनः । तथेमं शकुनिं दृष्ट्वा विधिदृष्टेन कर्म्मणा ।
दत्तमाहारमिच्छामि त्वया क्षुद्बाधते हि मां । स तद्वचः प्रतिश्रुत्य वाक्यमाह विहङ्गमः ।
न मेऽस्ति विभवो येन नाशयेयं क्षुधान्तव । उत्पन्नेन हि जीवामो वयं नित्यं वनौकसः ।
सञ्चयो नास्ति चास्माकं मुनीनामिव भोजने । इत्युक्त्वा तं तदा तत्र विवर्णवदनोऽभवत् ।
कथं नु खलु कर्त्तव्यमिति चिन्तापरस्तदा । बभूव भरतश्रेष्ठ गर्हयन् वृत्तिमात्मनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मुहूर्त्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातिनं । उवाच तर्पयिष्ये त्वां मुहूर्त्तं प्रतिपालय ।
इत्युक्त्वा शुष्कपर्णैस्तु समुज्ज्वाल्य हुताशनं । हर्षेण महताविष्टः स पक्षी वाक्यमब्रवीत् ।
ऋषीणां देवतानाञ्च पितॄणाञ्च महात्मनां । श्रुतः पूर्व्वं मया धर्म्मो महानतिथिपूजने ।
कुरुष्वानुग्रहं सौम्य सत्यमेतद्ब्रवीमि ते । निश्चिता खलु मे बुद्धिरतिथिप्रतिपूजने । ५५४५
ततः कृतप्रतिज्ञो वै स पक्षी प्रहसन्निव । तमग्निं त्रिः परिक्रम्य प्रविवेश महामतिः ।
अग्निमध्ये प्रविष्टन्तु लुब्धो दृष्ट्वा तु पक्षिणं । चिन्तयामास मनसा किमिदं वै कृतं मया ।
अहो मम नृशंसस्य गर्हितस्य स्वकर्म्मणा । अधर्म्मः सुमहान् घोरो भविष्यति न संशयः ।
एवं बहुविधं भूरि विललाप स लुब्धकः । गर्हयन् स्वानि कर्म्माणि द्विजं दृष्ट्वा तथागतं ।
इति श्रीमहाभारते शान्तिपर्व्वण्यापद्धर्म्मपर्व्वणि कपोतलुब्धकसंवादे षट्चत्वारिंशदधिकशततोऽध्यायः ॥ १४६ ॥
॥ भीष्म उवाच ॥ ततः स लुब्धकः पश्यन् क्षुधयाऽभिपरिप्लुतः । कपोतमग्निपतितं वाक्यं पुनरुवाच ह । ५५५०
किमीदृशं नृशंसेन मया कृतमबुद्धिना । भविष्यति हि मे नित्यं पातकं क्षुद्रजीविनः ।
स विनिन्दंस्तथात्मानं पुनः पुनरुवाच ह । अविश्वास्यः सुदुर्ब्बुद्धिः सदा निकृतिनिश्चयः ।
शुभं कर्म्म परित्यज्य सोऽहं शकुनिलुब्धकः । नृशंसस्य ममाद्यायं प्रत्यादेशो न संशयः ।
दत्तः स्वमांसं दहता कपोतेन महात्मना । सोऽहं त्यक्ष्ये प्रियान् प्राणान् पुत्त्रान्दारान् विसृज्य च ।
उपदिष्टो हि मे धर्म्मः कपोतेन महात्मना । अद्यप्रभृति देहं स्वं सर्व्वभोगैर्व्विवर्ज्जितं । ५५५५
यथा स्वल्पं सरो ग्रीष्मे शोषयिष्याम्यहं तथा । क्षुत्पिपासातपसहः कृशो धमनिसन्ततः ।
उपवासैर्ब्बहुविधैश्चरिष्ये पारलौकिकं । अहो देहप्रदानेन दर्शिताऽतिथिपूजना ।
तस्माद्धर्म्मञ्चरिष्यामि धर्म्मो हि परमा गतिः । दृष्टो धर्म्मो हि धर्म्मिष्ठे यादृशो विहगोत्तमे ।
एवमुक्त्वा विनिश्चित्य रौद्रकर्म्मा स लुब्धकः । महाप्रस्थानमाश्रित्य प्रययौ शंसितव्रतः ।
ततो यष्टिं शलाकाञ्च चारकं पञ्जरन्तथा । ताञ्च बद्धां कपोतीं स प्रमुच्य विससर्ज्ज ह । ५५६०
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कपोतलुब्धक संवादे सप्तचत्वारिंशदधिकशततोऽध्यायः ॥ १४७ ॥
॥ भीष्म उवाच ॥ ततो गते शाकुनिके कपोती प्राह दुःखिता । संस्मृत्य सा च भर्त्तारं रुदती शोककर्षिता ।
नाहन्ते विप्रियं कान्त कदाचिदपि संस्मरे । सर्व्वाऽपि विधवा नारी बहुपुत्त्राऽपि शोचते ।
शोच्या भवति बन्धूनां पतिहीना तपस्विनी । लालिताऽहं त्वया नित्यं बहुमानाच्च पूजिता ।
वचनैर्म्मधुरैः स्निग्धैरसंक्लिष्टमनोहरैः । कन्दरेषु च शैलानां नदीनां निर्झरेषु च ।
द्रुमाग्रेषु च रम्येषु रमिताऽहं त्वया सह । आकाशगमने चैव विहृताऽहं त्वया सुखं । ५५६५
रमामि स्म पुरा कान्त तन्मे नास्त्यद्य किञ्चन । मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य हि दातारं भर्त्तारं का न पूजयेत् । नास्ति भर्तृसमो नाथो नास्ति भर्तृसमं सुखं ।
विसृज्य धनसर्व्वस्वं भर्त्ता वै शरणं स्त्रियाः । न कार्य्यमिह मे नाथ जीवितेन त्वया विना ।
पतिहीना तु का नारी सती जीवितुमुत्सहेत् । एवं विलप्य बहुधा करुणं सा सुदुःखिता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पतिव्रता सम्प्रदीप्तं प्रविवेश हुताशनं। ततश्चित्राङ्गदधरं भर्त्तारं साऽन्वपश्यत। ५५७०
विमानस्थं सुकृतिभिः पूज्यमानं महात्मभिः। चित्रमाल्याम्बरधरं सर्व्वाभरणभूषितं।
विमानशतकोटीभिरावृतं पुण्यकर्म्मभिः। ततः स्वर्गं गतः पक्षी विमानवरमास्थितः।
कर्म्मणा पूजितस्तत्र रेमे स सह भार्य्यया।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कपोतलुब्धकसंवादे अष्टाचत्वारिंशदधिकशततोऽध्यायः॥ १४८ ॥

॥ भीष्म उवाच ॥ विमानस्थौ तु तौ राजन् लुब्धकः खे ददर्श ह। दृष्ट्वा तौ दम्पती दुःखादचिन्तयत तां गतिं।
ईदृशेनैव तपसा गच्छेयं परमाङ्गतिं। इति बुद्ध्या विनिश्चित्य गमनायोपचक्रमे। ५५७५
महाप्रस्थानमाश्रित्य लुब्धकः पक्षिजीवकः। निश्चेष्टो मरुदाहारो निर्म्ममः स्वर्गकाङ्क्षया।
ततोऽपश्यत् सुविस्तीर्णं हृद्यं पद्माभिभूषितं। नानापक्षिगणाकीर्णं सरः शीतलजं शिवं।
पिपासार्त्तोऽपि तद्दृष्ट्वा तृप्तः स्यान्नात्र संशयः। उपवासकृशोऽत्यर्थं स तु पार्थिव लुब्धकः।
अनवेक्ष्यैव संहृष्टः श्वापदाध्युषितं वनं। महान्तं निश्चयं कृत्वा लुब्धकः प्रविवेश ह।
प्रविशन्नेव स वनं निगृहीतः स कण्टकैः। स कण्टकैर्व्विभिन्नाङ्गो लोहितार्द्रीकृतच्छविः। ५५८०
बभ्राम तस्मिन् विजने नानामृगसमाकुले। ततो द्रुमाणां महतां पवनेन वने तदा।
उदतिष्ठत संघर्षात् सुमहान् हव्यवाहनः। तद्वनं वृक्षसम्पूर्णं लताविटपसंकुलं।
ददाह पावकः क्रुद्धो युगान्ताग्निसमप्रभः। सज्वालैः पवनोद्धूतैर्व्विस्फुलिङ्गैः समन्ततः।
ददाह तद्वनं घोरं मृगपक्षिसमाकुलं। ततः स देहमोक्षार्थं सम्प्रहृष्टेन चेतसा।
अभ्यधावत वर्द्धन्तं पावकं लुब्धकस्तदा। ततस्तेनाग्निना दग्धो लुब्धको नष्टकल्मषः। ५५८५
जगाम परमां सिद्धिं ततो भरतसत्तम। ततः स्वर्गस्थमात्मानमपश्यद्विगतज्वरः।
यक्षगन्धर्व्वसिद्धानां मध्ये भ्राजन्तमिन्द्रवत्। एवं खलु कपोतश्च कपोती च पतिव्रता।
लुब्धकेन सह स्वर्गं गताः पुण्येन कर्म्मणा। याऽपि चैवंविधा नारी भर्त्तारमनुवर्त्तते।
विराजते हि सा क्षिप्रं कपोतीव दिविस्थिता। एवमेतत् पुरावृत्तं लुब्धकस्य महात्मनः।
कपोतस्य च धर्म्मिष्ठा गतिः पुण्येन कर्म्मणा। यश्चेदं शृणुयान्नित्यं यश्चेदं परिकीर्त्तयेत्। ५५९०
नाशुभं विद्यते तस्य मनसाऽपि प्रमादतः। युधिष्ठिर महानेष धर्म्मो धर्म्मभृताम्बर।
गोघ्नेष्वपि भवेदस्मिन्निष्कृतिः पापकर्म्मणः। न निष्कृतिर्भवेत्तस्य यो हन्याच्छरणागतं।
इतिहासमिमं श्रुत्वा पुण्यं पापप्रणाशनं। न दुर्गतिमवाप्नोति स्वर्गलोकञ्च गच्छति।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कपोतलुब्धकसंवादे ऊनपञ्चाशदधिकशततोऽध्यायः॥ १४९ ॥

॥ युधिष्ठिर उवाच॥ अबुद्धिपूर्व्वं यत्पापं कुर्य्याद्भरतसत्तम। मुच्यते स कथं तस्मादेतत् सर्व्वं ब्रवीहि मे।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि पुराणमृषिसंस्तुतं। इन्द्रोतः शौनको विप्रो यदाह जनमेजयं। ५५९५
आसीद्राजा महावीर्य्यः पारीक्षिज्जनमेजयः। अबुद्धिपूर्व्वमागच्छत् ब्रह्महत्यां महीपतिः।
ब्राह्मणाः सर्व्व एवैते तत्यजुः सपुरोहिताः। स जगाम वनं राजा दह्यमानो दिवानिशं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रजाभिः स परित्यक्तश्चकार कुशलं महत्। अतिवेलं तपस्तेपे दह्यमानः स मन्युना।
ब्रह्महत्यापनोदार्थमपृच्छद्ब्राह्मणान् बहून्। पर्य्यटन् पृथिवीं कृत्स्नां देशे देशे नराधिपः।
तत्रेतिहासं वक्ष्यामि धर्म्मस्यास्योपबृंहणं। दह्यमानः पापकृत्या जगाम जनमेजयः। ५६००
चरिष्यमाण इन्द्रोतं शौनकं संशितव्रतं। समासाद्योपजग्राह पादयोः परिपीडयन्।
ऋषिर्दृष्ट्वा नृपं तत्र जगर्हे सुभृशं तदा। कर्त्ता पापस्य महतो भ्रूणहा किमिहागतः।
किन्त्वयाऽस्मासु कर्त्तव्यं मा मा्म्प्राक्षीः कथञ्चन। गच्छ गच्छ न ते स्थानं प्रीणात्यस्मानिति ब्रुवन्।
रुधिरस्येव ते गन्धः शवस्येव च दर्शनं। अशिवः शिवसङ्काशो मृतो जीवन्निवाटसि।
ब्रह्ममृत्युरशुद्धात्मा पापमेवानुचिन्तयन्। प्रबुध्यसे प्रस्वपिषि वर्त्तसे परमेऽसुखे। ५६०५
मोघन्ते जीवितं राजन् परिक्लिष्टश्च जीवसि। पापायैव हि सृष्टोऽसि कर्म्मणेह यवीयसे।
बहुकल्याणमिच्छन्त ईहन्ते पितरः सुतान्। तपसा दैवतेज्याभिर्व्वन्दनेन तितिक्षया।
पितृवंशमिमं पश्य त्वत्कृते नरकं गतं। निरर्थाः सर्व्व एवैषामाशाबन्धास्त्वदाश्रयाः।
यान् पूजयन्तो विन्दन्ति स्वर्गमायुर्यशः प्रजाः। तेषु त्वं सततं द्वेष्टा ब्राह्मणेषु निरर्थकः।
इमं लोकं विमुच्य त्वमवाङ्मूर्द्धा पतिष्यसि। अशाश्वतीः शाश्वतीश्च समाः पापेन कर्म्मणा। ५६१०
अर्द्यमानो यत्र गृध्रैः शितिकण्ठैरयोमुखैः। ततश्च पुनरावृत्तः पापयोनिं गमिष्यसि।
यदिदं मन्यसे राजन्नायमस्ति कुतः परः। प्रतिस्मारयितारस्त्वां यमदूता यमक्षये।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि इन्द्रोतपारीक्षितीये पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥
॥ भीष्म उवाच ॥ एवमुक्तः प्रत्युवाच तं मुनिं जनमेजयः। गर्ह्यं भवान् गर्हयते निन्द्यं निन्दति मां पुनः।
किं कार्य्यं मां धिक् कुरुते तस्मात्त्वाऽहं प्रसादये। सर्व्वं ह्योदं दुष्कृतं मे ज्वलाम्यग्नाविवाहितः।
स्वकर्म्माण्यभिसन्धाय नाभिनन्दति मे मनः। प्राप्य घोरं भयं नूनं मया वैवस्वतादपि। ५६१५
तत्तु शल्यमनिर्हृत्य कथं शक्ष्यामि जीवितुं। सर्व्वं मन्युं विनीय त्वमभिमां वद शौनक।
महानासं ब्राह्मणानां भूयो वक्ष्यामि साम्प्रतं। अस्तु शेषं कुलस्यास्य मा पराऽभूदिदं कुलं।
न हि नो ब्रह्मशप्तानां शेषं भवितुमर्हति। स्तुतीरलभमानानां संविदं वेदनिश्चितान्।
निर्व्विद्यमानस्त्वात्मानं भूयो वक्ष्यामि शाश्वतं। भूयश्चैवाभिरक्षन्तु निर्द्धनान् निर्ज्जना इव।
न ह्ययज्ञा अमुं लोकं प्राप्नुवन्ति कथञ्चन। आयातान् प्रतितिष्ठन्ति पुलिन्दशबरा इव। ५६२०
अविज्ञायैव मे प्रज्ञां बालस्येव स पण्डितः। ब्रह्मन् पितेव पुत्रस्य प्रीतिमान् भव शौनक।
॥ शौनक उवाच ॥ किमाश्चर्य्यं यदप्राज्ञो बहु कुर्य्यादसाम्प्रतं। इति वै पण्डितो भूत्वा भूतानां नानुकुप्यते।
प्रज्ञाप्रासादमारुह्य अशोच्यः शोचते जनान्। जगतीस्थानिवाद्रिस्थः प्रज्ञया प्रतिपत्स्यति।
न चोपलभ्यते तेन न चाश्चर्य्याणि कुर्व्वते। निर्व्विण्णात्मा परोक्षो वा धिक्कृतः सर्व्वसाधुषु।
विदितं भवतो वीर्य्यं माहात्म्यं वेद आगमे। कुरुष्वेह यथाशान्ति ब्रह्मा शरणमस्तु ते। ५६२५
तद्वै पारत्रिकं तात ब्राह्मणानामकुप्यतां। अथवा तप्यसे पापे धर्म्ममेवानुपश्य वै।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ जनमेजय उवाच ॥ अनुतप्ये च पापेन न च धर्म्मं विलोपये । बुभूषुं भजमानञ्च प्रीतिमान् भव शौनक ।
॥ शौनक उवाच ॥ छित्त्वा दम्भञ्च मानञ्च प्रीतिमिच्छामि ते नृप । सर्व्वभूतहिते तिष्ठ धर्म्मञ्चैव प्रतिस्मरन् ।
न भयान्न च कार्पण्यान्न लोभात्त्वामुपाह्वये । तां मे दैवीं गिरं सत्यां शृणु त्वं ब्राह्मणैः सह ।
सोऽहं न केनचिच्चार्थी त्वाञ्च धर्म्मादुपाह्वये । क्रोशतां सर्व्वभूतानां हाहाधिगिति जल्पतां । ५६२०
वक्ष्यन्ति मामधर्म्मज्ञं त्यक्ष्यन्ति सुहृदो जनाः । ता वाचः सुहृदः श्रुत्वा संज्वरिष्यन्ति मे भृशं ।
केचिदेव महाप्रज्ञाः प्रतिज्ञास्यन्ति तत्त्वतः । जानीहि मे कृतं तात ब्राह्मणान् प्रति भारत ।
यथा ते मत्कृते क्षेमं लभन्ते ते तथा कुरु । प्रतिजानीहि चाद्रोहं ब्राह्मणानां नराधिप ।
॥ जनमेजय उवाच ॥ नैव वाचा न मनसा पुनर्ज्जातु न कर्म्मणा । द्रोग्धाऽस्मि ब्राह्मणान् विप्र चरणावपि ते स्पृशे ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि इन्द्रोतपारीक्षितीये एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

॥ शौनक उवाच ॥ तस्मात्तेऽहं प्रवक्ष्यामि धर्म्ममावृत्तचेतसे । श्रीमान्महाबलस्तुष्टः स्वयं धर्म्ममवेक्षसे । ५६२५
पुरस्ताद्दारुणो भूत्वा सुचित्रतरमेव तत् । अनुगृह्णाति भूतानि स्वेन वृत्तेन पार्थिवः ।
कृत्स्नं नूनं स दहति इति लोको व्यवस्यति । यत्र त्वं तादृशो भूत्वा धर्म्ममेवानुपश्यसि ।
हित्वा तु सुचिरं भक्ष्यं भोज्यांश्च तप आस्थितः । इत्येतदभिभूतानामद्भुतं जनमेजय ।
योऽदुर्लभो भवेद्दाता कृपणो वा तपोधनः । अनाश्चर्य्यं तदित्याहुर्नातिदूरेण वर्त्तते ।
एतदेव हि कार्पण्यं समग्रमसमीक्षितं । यच्चेत् समीक्ष्यैव स्यात् भवेत्तस्मिंस्ततो गुणः । ५६३०
यज्ञो दानं दया वेदाः सत्यञ्च पृथिवीपते । पञ्चैतानि पवित्राणि षष्ठं सुचरितं तपः ।
तदेव राज्ञां परमं पवित्रं जनमेजय । तेन सम्यग्गृहीतेन श्रेयांसं धर्म्ममाप्स्यसि ।
पुण्यदेशाभिगमनं पवित्रं परमं स्मृतं । अत्राप्युदाहरन्तीमां गाथां गीतां ययातिना ।
यो मर्त्यः प्रतिपद्येत आयुर्जीवितमात्मनः । यज्ञमेकान्ततः कृत्वा तत् संन्यस्य तपश्चरेत् ।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वतीं । सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकं । ५६३५
यत्रावगाह्य पीत्वा च नैनं श्वोमरणं तपेत् । महासरः पुष्कराणि प्रभासोत्तरमानसे ।
कालोदकञ्च गन्ताऽसि लब्धायुर्ज्जीविते पुनः । सरस्वतीदृषद्वत्योः सङ्गमो मानसः सरः ।
स्वाध्यायशीलस्थानेषु सर्व्वेष्वेवमुपस्पृशेत् । त्यागधर्म्मः पवित्राणां संन्यासं मनुरब्रवीत् ।
अत्राप्युदाहरन्तीमा गाथाः सत्यवता कृताः । यथा कुमारः सत्यो वै नैव पुण्यो न पापकृत् ।
न ह्यस्ति सर्व्वभूतेषु दुःखमस्मिन् कुतः सुखं । एवं प्रकृतिभूतानां सर्व्वसंसर्गयायिनां । ५६४०
त्यजतां जीवितं श्रेयो निवृत्ते पुण्यपातके । यत्त्वेव राज्ञो ज्यायिष्ठं कार्य्याणां तद्ब्रवीमि ते ।
बलेन संविभागैश्च जय स्वर्गं जनेश्वर । यस्यैव बलमोजश्च स धर्म्मस्य प्रभुर्नरः ।
ब्राह्मणार्थं सुखार्थं हि त्वं पाहि वसुधां नृप । यथैवैतान् पुराऽक्षेप्सीस्तथैवैतान् प्रसादय ।
अपि धिक्क्रियमाणोऽपि त्यज्यमानोऽप्यनेकधा । आत्मनो दर्शनाद्विप्रान्न हन्ताऽस्मीति मार्गय ।
घटमानः स्वकार्य्येषु कुरु निःश्रेयसं परं । हिमाग्निघोरसदृशो राजा भवति कश्चन । ५६४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्याङ्कलाग्निकल्पो वा भवेदन्यः परन्तप । न विशेषेण गन्तव्यमविच्छिन्नेन वा पुनः ।
न जातु नाहमस्मीति सुप्रसक्तमसाधुषु । विकर्म्मणा तप्यमानः पापाद्विपरिमुच्यते ।
नैतत् कार्य्यं पुनरिति द्वितीयात् परिमुच्यते । चरिष्ये धर्म्ममेवेति तृतीयात् परिमुच्यते ।
शुचिस्तीर्थान्यनुचरन् बहुलात् परिमुच्यते । कल्याणमनुकर्त्तव्यं पुरुषेण बुभूषता ।
ये सुगन्धीनि सेवन्ते तथागन्धा भवन्ति ते । ये दुर्गन्धीनि सेवन्ते तथागन्धा भवन्ति ते । ५६६५
तपश्चर्य्यापरः सद्यः पापाद्विपरिमुच्यते । संवत्सरमुपास्याग्निमभिशस्तः प्रमुच्यते ।
त्रीणि वर्षाण्युपास्याग्निं भ्रूणहा विप्रमुच्यते । महासरः पुष्कराणि प्रभासोत्तरमानसे ।
अभ्येत्य योजनशतं भ्रूणहा विप्रमुच्यते । यावतः प्राणिनो हन्यात्तज्जातीयांस्तु तावतः ।
प्रमीयमानानुन्मोच्य प्राणिहा विप्रमुच्यते । अपि चाप्सु निमज्जेत जपंस्त्रिरघमर्षणं ।
यथाऽश्वमेधावभृथस्तथा तन्मनुरब्रवीत् । तत् क्षिप्रं नुदते पापं सत्कारं लभते तथा । ५६६५
अपि चैनं प्रसीदन्ति भूतानि जडमूकवत् ।

बृहस्पतिं देवगुरुं सुरासुराः सर्व्वे समेत्याभ्यनुयुज्य राजन् । धर्म्मं फलं वेत्थ फलं महर्षे तथैव तस्मिन्नरके पारलोक्ये ।

उभे तु यस्य सदृशे भवेतां किंस्वित्तयोस्तत्र जयोऽथ न स्यात् । आचक्ष्व नः पुण्यफलं महर्षे कथं पापं नुदते धर्म्मशीलः ।

॥ बृहस्पतिरुवाच ॥ कृत्वा पापं पूर्व्वमबुद्धिपूर्व्वं पुण्यानि चेत् कुरुते बुद्धिपूर्व्वं । स तत् पापं कुरुते कर्म्मशीलो वासो यथा मलिनं क्षारयुक्तं ।

पापं कृत्वाऽभिमन्येत नाहमस्मीति पूरुषः । तच्चिकीर्षति कल्याणं श्रद्दधानोऽनसूयकः । ५६७०
छिद्राणि विवृतान्येव साधूनां चावृणोति यः । यः पापं पुरुषः कृत्वा कल्याणमभिपद्यते ।
यथादित्यः प्रातरुद्यंस्तमः सर्व्वं व्यपोहति । कल्याणमाचरन्नेवं सर्व्वपापं व्यपोहति ।
॥ भीष्म उवाच ॥ एवमुक्त्वा तु राजानमिन्द्रोतो जनमेजयं । याजयामास विधिवद्वाजिमेधेन शौनकः ।

ततः स राजा व्यपनीतकल्मषः श्रियोवृतः प्रज्वलिताग्निरूपवान् । विवेश राज्यं स्वममित्रकर्षणो यथा दिवं पूर्णवपुर्निशाकरः ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि इन्द्रोतपारिक्षितीये द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ युधिष्ठिर उवाच ॥ कच्चित् पितामहेनासीच्छ्रुतं वा दृष्टमेव च । कच्चिन्मर्त्त्यो मृतो राजन् पुनरुज्जीवितोऽभवत् । ५६७५
॥ भीष्म उवाच ॥ शृणु राजन् यथावृत्तमितिहासं पुरातनं । गृध्रजम्बुकसंवादं यो वृत्तो नैमिषे पुरा ।
कस्यचिद्ब्राह्मणस्यासीद्दुःखलब्धः सुतो मृतः । बाल एव विशालाक्षो बालग्रहनिपीडितः ।
दुःखिताः केचिदादाय बालमप्राप्तयौवनं । कुलसर्व्वस्वभूतं वै रुदन्तः शोकविह्वलाः ।
बालं मृतं गृहीत्वाऽथ श्मशानाभिमुखाः स्थिताः । अङ्केनैव च संक्राम्य रुरुदुर्भृशदुःखिताः ।
शोचन्तस्तस्य पूर्व्वोक्तान् भाषितांश्चासकृत् पुनः । तं बालं भूतले क्षिप्य प्रतिगन्तुं न शक्नुयुः । ५६८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust-Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

तेषां रुदितशब्देन गृध्रोऽभ्येत्य वचोऽब्रवीत् । एकात्मजमिमं लोके त्यक्त्वा गच्छत मा चिरं ।
इह पुंसां सहस्राणि स्त्रीसहस्राणि चैव ह । समानीतानि कालेन हित्वा वै यान्ति बान्धवाः ।
सम्पश्यत जगत् सर्व्वं सुखदुःखैरधिष्ठितं । संयोगो विप्रयोगश्च पर्य्यायेणोपलभ्यते ।
गृहीत्वा ये च गच्छन्ति ये तु यान्ति च तान्मृतान् । तेऽप्यायुषः प्रमाणेन स्वेन गच्छन्ति जन्तवः ।
अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले । कङ्कालबहुले रौद्रे सर्व्वप्राणिभयङ्करे । ५६८५
न पुनर्ज्जीवितः कश्चित् कालधर्म्ममुपागतः । प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ।
सर्व्वेण खलु मर्त्तव्यं मर्त्यलोके प्रसूयता । कृतान्तविहिते मार्गे मृतं को जीवयिष्यति ।
कर्म्मान्तविरते लोके अस्तं गच्छति भास्करः । गम्यतां स्वमधिष्ठानं सुतस्नेहं विसृज्य वै ।
ततो गृध्रवचः श्रुत्वा प्राक्रोशन्तस्तदा नृप । बान्धवास्तेऽभ्यगच्छन्त पुत्त्रमुत्सृज्य भूतले ।
विनिश्चित्याथ च तदा विक्रोशन्तस्ततस्ततः । मृतमित्येव गच्छन्तो निराशास्तस्य दर्शने । ५६९०
निश्चितार्थाश्च ते सर्व्वे सन्त्यजन्तः स्वमात्मजं । निराशा जीविते तस्य मार्गमावृत्य धिष्ठिताः ।
ध्वाङ्क्षपक्षसवर्णस्तु विलान्निःसृत्य जम्बुकः । गच्छमानान् स्म तानाह निर्घृणाः खलु मानुषाः ।
आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत मा भयं । बहुरूपो मुहूर्त्तश्च जीवत्यपि कदाचन ।
यूयं भूमौ विनिक्षिप्य पुत्त्रस्नेहविनाकृताः । श्मशाने सुतमुत्सृज्य कस्माद्गच्छत निर्घृणाः ।
न वोऽस्त्यस्मिन् सुते स्नेहो बाले मधुरभाषिणि । यस्य भाषितमात्रेण प्रसादमधिगच्छत । ५६९५
ते पश्यत सुतस्नेहो यादृशः पशुपक्षिणां । न तेषां धारयित्वा तान् कश्चिदस्ति फलागमः ।
चतुष्पात्पक्षिकीटानां प्राणिनां स्नेहसङ्गिनां । परलोकगतिस्थानां मुनियज्ञक्रिया इव ।
तेषां पुत्त्राभिरामाणामिह लोके परत्र च । न गुणो दृश्यते कश्चित् प्रजाः सन्धारयन्ति च ।
अपश्यतां प्रियान् पुत्त्रांस्तेषां शोको न तिष्ठति । न च पुष्णन्ति संवृद्धास्ते मातापितरौ क्वचित् ।
मानुषाणां कुतः स्नेहो येषां शोको भविष्यति । इमं कुलकरं पुत्त्रं त्यक्त्वा क्व नु गमिष्यथ । ५७००
चिरं मुञ्चत वाष्पञ्च चिरं स्नेहेन पश्यत । एवंविधानि हीष्टानि दुस्त्यजानि विशेषतः ।
क्षीणस्याथाभियुक्तस्य श्मशानाभिमुखस्य च । बान्धवा यत्र तिष्ठन्ति तत्रान्यो नाधिगच्छति ।
सर्व्वस्य दयिताः प्राणाः सर्व्वः स्नेहञ्च विन्दति । तिर्य्यग्योनिष्वपि सतां स्नेहं पश्यत यादृशं ।
त्यक्त्वा कथं गच्छथेमं पद्मलोलायताक्षिकं । यथा नवोद्वाहकृतं स्नानमाल्यविभूषितं ।
जम्बुकस्य वचः श्रुत्वा कृपणं परिदेवतः । न्यवर्त्तन्त तदा सर्व्वे शवार्थं ते स्म मानुषाः । ५७०५
॥ गृध्र उवाच ॥ अहो वत नृशंसेन जम्बुकेनाल्पमेधसा । क्षुद्रेणोक्ता हीनसत्त्वा मानुषाः किं निवर्त्तथ ।
पञ्चभूतपरित्यक्तं शून्यं काष्ठत्वमागतं । कस्मात् शोचत तिष्ठन्तमात्मानं किन्न शोचथ ।
तपः कुरुत वै तीव्रं मुच्यध्वं येन किल्बिषात् । तपसा लभ्यते सर्व्वं विलापः किं करिष्यति ।
अनिष्टानि च भाग्यानि जातानि सह मूर्त्तिना । येन गच्छति बालोऽयं दत्त्वा शोकमनन्तकं ।
धनं गावः सुवर्णञ्च मणिरत्नमथापि च । अपत्यञ्च तपोमूलं तपोयोगाच्च लभ्यते । ५७१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant02 Equipment Heritage Foundation, Jalgaon

यथा कृता च भूतेषु प्राप्यते सुखदुःखिता । गृहीत्वा जायते जन्तुर्दुःखानि च सुखानि च ।
न कर्म्मणा पितुः पुत्त्रः पिता वा पुत्त्रकर्म्मणा । मार्गेणान्येन गच्छन्ति बद्धाः सुकृतदुष्कृतैः ।
धर्म्मञ्चरत यत्नेन यथाऽधर्म्मान्निवर्त्तत । वर्त्तध्वञ्च यथाकालं दैवतेषु द्विजेषु च ।
शोकं त्यजत दैन्यञ्च सुतस्नेहान्निवर्त्तत । त्यज्यतामयमाकाशे ततः शीघ्रं निवर्त्तत ।
यत् करोति शुभं कर्म्म तथा कर्म्म सुदारुणं । तत् कर्त्तैव समश्नाति बान्धवानां किमत्र ह । ५७१५
इह त्यक्त्वा न तिष्ठन्ति बान्धवा बान्धवं प्रियं । स्नेहमुत्सृज्य गच्छन्ति वाष्पपूर्णविलोचनाः ।
प्राज्ञो वा यदि वा मूर्खः सधनो निर्द्धनोऽपि वा । सर्व्वः कालवशं याति शुभाशुभसमन्वितः ।
किं करिष्यथ शोचित्वा मृतं किमनुशोचय । सर्व्वस्य हि प्रभुः कालो धर्म्मतः समदर्शनः ।
यौवनस्थांश्च बालांश्च वृद्धान् गर्भगतानपि । सर्व्वानाविशते मृत्युरेवम्भूतमिदं जगत् ।
॥ जम्बुक उवाच ॥ अहो मन्दीकृतः स्नेहो गृध्रेणेहाल्पबुद्धिना । पुत्त्रस्नेहाभिभूतानां युष्माकं शोचतां भृशं । ५७२०
समैः सम्यक्प्रयुक्तैश्च वचनैः प्रत्ययोत्तरैः । यद्गच्छति जनश्चायं स्नेहमुत्सृज्य दुस्त्यजं ।
अहो पुत्त्रवियोगेन मृतशून्योपसेवनात् । क्रोशतां सुभृशं दुःखं विवत्सानां गवामिव ।
अद्य शोकं विजानामि मानुषाणां महीतले । स्नेहं हि कारणं कृत्वा ममाप्यश्रूण्यथापतन् ।
यत्नो हि सततं कार्य्यस्ततो दैवेन सिध्यति । दैवं पुरुषकारश्च कृतान्तेनोपपद्यते ।
अनिर्व्वेदः सदा कार्य्यो निर्व्वेदाद्धि कुतः सुखं । प्रयत्नात् प्राप्यते ह्यर्थः कस्माद्गच्छत निर्द्दयाः । ५७२५
आत्ममांसोपवृत्तञ्च शरीरार्द्धमयीं तनुं । पितॄणां वंशकर्त्तारं वने त्यक्त्वा क यास्यथ ।
अथवाऽस्तं गते सूर्य्ये सन्ध्याकाल उपस्थिते । ततो नेष्यथ वा पुत्त्रमिहस्था वा भविष्यथ ।
॥ गृध्र उवाच ॥ अद्य वर्षसहस्रं मे साग्रं जातस्य मानुषाः । न च पश्यामि जीवन्तं मृतं स्त्रीपुंनपुंसकं ।
मृता गर्भेषु जायन्ते जातमात्रा म्रियन्ति च । चंक्रमन्तो म्रियन्ते च यौवनस्थास्तथाऽपरे ।
अनित्यानीह भाग्यानि चतुष्पात्पक्षिणामपि । जङ्गमानां नगानां वाऽप्यायुरग्रेऽवतिष्ठते । ५७३०
इष्टदारवियुक्ताश्च पुत्त्रशोकान्वितास्तथा । दह्यमानाः स्म शोकेन गृहं गच्छन्ति नित्यशः ।
अनिष्टानां सहस्राणि तथेष्टानां शतानि च । उत्सृज्येह प्रयाता वै बान्धवा भृशदुःखिताः ।
त्यज्यतामेष निस्तेजाः शून्यः काष्ठत्वमागतः । अन्यदेहविषक्तं हि शावं काष्ठत्वमागतं ।
त्यक्तजीवस्य चैवास्य कस्माद्धित्वा न गच्छत । निरर्थको ह्ययं स्नेहो निष्फलश्च परिश्रमः ।
चक्षुर्भ्यां न च कर्णाभ्यां संशृणोति समीक्षते । कस्मादेनं समुत्सृज्य न गृहान् गच्छताशु वै । ५७३५
मोक्षधर्म्माश्रितैर्व्वाक्यैर्हेतुमद्भिः सुनिष्ठुरैः । मयोक्ता गच्छत क्षिप्रं स्वं स्वमेव निवेशनं ।
प्रज्ञाविज्ञानयुक्तेन बुद्धिसंज्ञाप्रदायिना । वचनं श्राविता नूनं मानुषाः संन्यवर्त्तत ।
शोको द्विगुणतां याति दृष्ट्वा स्मृत्वा च चेष्टितं । इत्येतद्वचनं श्रुत्वा सन्निवृत्तास्तु मानुषाः ।
अपश्यत्तं तदा सुप्तं द्रुममागत्य जम्बुकः ।
॥ जम्बुक उवाच ॥ इमं कनकवर्णाभं भूषणैः समलङ्कृतं । गृध्रवाक्यात् कथं पुत्त्रं त्यजध्वं पितृपिण्डदं । ५७४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न स्नेहस्य च विच्छेदो विलापरुदितस्य च । मृतस्यास्य परित्यागात्तापो वै भविता ध्रुवं ।
श्रूयते शम्बुके शूद्रे हते ब्राह्मणदारकः । जीवितो धर्म्ममासाद्य रामात् सत्यपराक्रमात् ।
तथा श्वेतस्य राजर्षेर्बालो दिष्टान्तमागतः । श्वेतेन धर्म्मनिष्ठेन मृतः संजीवितः पुनः ।
तथा कश्चिद्भवेत् सिद्धो मुनिर्वा देवताऽपि वा । कृपणानामनुक्रोशं कुर्य्याद्वो रुदतामिह ।
इत्युक्तास्ते न्यवर्त्तन्त शोकार्त्ताः पुत्त्रवत्सलाः । अङ्के शिरः समाधाय रुरुदुर्बहु विस्तरं । ५७५५
तेषां रुदितशब्देन गृध्रोऽभ्येत्य वचोऽब्रवीत् ।
॥ गृध्र उवाच ॥ अश्रुपातपरिक्लिन्नः पाणिस्पर्शप्रपीडितः । धर्म्मराजप्रयोगाच्च दीर्घनिद्रां प्रवेशितः ।
तपसाऽपि हि संयुक्ता धनवन्तो महाधियः । सर्व्वे मृत्युवशं यान्ति तदिदं प्रेतपत्तनं ।
बालवृद्धसहस्राणि सदा संत्यज्य बान्धवाः । दिनानि चैव रात्रीश्च दुःखं तिष्ठन्ति भूतले ।
अलं निर्ब्बन्धमागत्य शोकस्य परिधारणे । अप्रत्ययं कुतो ह्यस्य पुनरद्येह जीवितं । ७५०
मृतस्योत्सृष्टदेहस्य पुनर्द्देहो न विद्यते । नैव मूर्त्तिप्रदानेन जम्बुकस्य शतैरपि ।
शक्यं जीवयितुं ह्येष बालो वर्षशतैरपि । अथ रुद्रः कुमारो वा ब्रह्मा वा विष्णुरेव च ।
वरमस्मै प्रयच्छेयुस्ततो जीवेदयं शिशुः । नैव वाष्पविमोक्षेण न वा श्वासकृतेन च ।
न दीर्घरुदितेनायं पुनर्जीवं गमिष्यति । अहञ्च क्रोष्टुकश्चैव यूयं ये चास्य बान्धवाः ।
धर्म्माधर्म्मौ गृहीत्वेह सर्व्वे वर्त्तामहेऽध्वनि । अप्रियं परुषञ्चापि परद्रोहं परस्त्रियं । ५७५५
अधर्म्ममनृतञ्चैव दूरात् प्राज्ञो विवर्ज्जयेत् । धर्म्मं सत्यं श्रुतं न्याय्यं महतीं प्राणिनां दयां ।
अजिह्मत्वमशाठ्यञ्च यत्नतः परिमार्गत । मातरं पितरं वाऽपि बान्धवान् सुहृदस्तथा ।
जीवतो ये न पश्यन्ति तेषां धर्म्मविपर्य्ययः । यो न पश्यति चक्षुर्भ्यां नेङ्गते च कथञ्चन ।
तस्य निष्ठावसानान्ते रुदन्तः किं करिष्यथ । इत्युक्तास्ते सुतं त्यक्त्वा भूमौ शोकपरिप्लुताः ।
दह्यमानाः सुतस्नेहात् प्रययुर्बान्धवा गृहं । ५७६०
॥ जम्बुक उवाच ॥ दारुणो मर्त्यलोकोऽयं सर्व्वप्राणिविनाशनः । इष्टबन्धुवियोगश्च तथेहाल्पञ्च जीवितं ।
बह्वलीकमसत्यञ्चार्य्यतिवादाप्रियंवदं । इमं प्रेक्ष्य पुनर्भावं दुःखशोकविवर्द्धनं ।
न मे मानुषलोकोऽयं मुहूर्त्तमपि रोचते । अहो धिग्गृध्रवाक्येन यथैवाबुद्धयस्तथा ।
कथं गच्छत निःस्नेहाः सुतस्नेहं विसृज्य च । प्रदीप्ताः पुत्त्रशोकेन सन्निवर्त्तत मानुषाः ।
श्रुत्वा गृध्रस्य वचनं पापस्येहाकृतात्मनः । सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखं । ५७६५
सुखदुःखावृते लोके नेहास्त्येकमनन्तरं । इमं क्षितितले त्यक्त्वा बालं रूपसमन्वितं ।
कुलशोभाकरं मूढाः पुत्त्रं त्यक्त्वा क यास्यथ । रूपयौवनसम्पन्नं द्योतमानमिव श्रिया ।
जीवन्तमेव पश्यामि मनसा नात्र संशयः । विनाशो नास्य न हि वै सुखं प्राप्स्यथ मानुषाः ।
पुत्त्रशोकाभितप्तानां मृतानामद्य वः क्षमं । सुखसम्भावनं कृत्वा धारयित्वा सुखं स्वयं ।
त्यक्त्वा गमिष्यथ क्वाद्य समुत्सृज्याल्पबुद्धिवत् । ५७७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ तथा धर्म्माविरोधेन प्रियमिथ्याभिधायिना । श्मशानवासिना नित्यं रात्रिं मृगयता नृप ।
ततो मध्यस्थतां नीता वचनैरमृतोपमैः । जम्बुकेन स्वकार्य्यार्थं बान्धवास्तस्य धिष्ठिताः ।
॥ गृध्र उवाच ॥ अयं प्रेतसमाकीर्णो यक्षराक्षससेवितः । दारुणः काननोद्देशः कौशिकैरभिनादितः ।
भीमः सुघोरश्च तथा नीलमेघसमप्रभः । अस्मिञ्छवं परित्यज्य प्रेतकार्य्याण्युपासत ।
भानुर्य्यावन्नयात्यस्तं यावच्च विमला दिशः । तावदेनं परित्यज्य प्रेतकार्य्याण्युपासत । ५०७५
नदन्ति परुषं श्येनाः शिवाः क्रोशन्ति दारुणं । मृगेन्द्राः प्रतिनन्दन्ति रविरस्तञ्च गच्छति ।
चिताधूमेन नीलेन संरज्यन्ते च पादपाः । श्मशाने च निराहाराः प्रतिनर्द्दन्ति देवताः ।
सर्व्वे विकृतदेहाश्चाप्यस्मिन्देशे सुदारुणे । युष्मान् प्रधर्षयिष्यन्ति विकृता मांसभोजिनः ।
क्रूरश्चायं वनोद्देशो भयमद्य भविष्यति । त्यज्यतां काष्ठभूतोऽयं मृष्यतां जाम्बुकं वचः ।
यदि जम्बुकवाक्यानि निष्फलान्यनृतानि च । श्रोष्यथ भ्रष्टविज्ञानास्ततः सर्व्वे विनंक्ष्यथ । ५०८०
॥ जम्बुक उवाच ॥ स्थीयतां नेह भेतव्यं यावत्तपति भास्करः । तावदस्मिन् सुते स्नेहादनिर्व्वेदेन वर्त्तत ।
स्वैरं रुदन्तो विस्रब्धाश्चिरं स्नेहेन पश्यत । स्थीयतां यावदादित्यः किञ्च क्रव्यादभाषितैः ।
यदि गृध्रस्य वाक्यानि तीव्राणि रभसानि च । गृह्णीत मोहितात्मानः सुतो वो न भविष्यति ।
॥ भीष्म उवाच ॥ गृध्रोऽस्तमित्याह गतो गतो नेति च जम्बुकः । मृतस्य तं परिजनमूचतुस्तौ क्षुधान्वितौ
स्वकार्य्यबद्धकक्षौ तौ राजन् गृध्रोऽथ जम्बुकः । क्षुत्पिपासापरिश्रान्तौ शास्त्रमालम्ब्य जल्पतः । ५०८५
तयोर्व्विज्ञानविदुषोर्द्वयोर्म्मृगपतत्रिणोः । वाक्यैरमृतकल्पैस्तैः प्रतिष्ठन्ति व्रजन्ति च ।
शोकदैन्यसमाविष्टा रुदन्तस्तस्थिरे तदा । स्वकार्य्यकुशलाभ्यान्ते संभ्राम्यन्तेह नैपुणात् ।
तथा तयोर्व्विवदतोर्व्विज्ञानविदुषोर्द्वयोः । बान्धवानां स्थितानाञ्चाप्युपातिष्ठत शङ्करः ।
देव्या प्रणोदितो देवः कारुण्यार्द्रीकृतेक्षणः । ततस्तानाह मनुजान् वरदोऽस्मीति शङ्करः ।
ते प्रत्यूचुरिदं वाक्यं दुःखिताः प्रणताः स्थिताः । एकपुत्त्रविहीनानां सर्व्वेषां जीवितार्थिनां । ५०९०
पुत्त्रस्य नो जीवदानाज्जीवितं दातुमर्हसि । एवमुक्तः स भगवान् वारिपूर्णेन चक्षुषा ।
जीवितं स्म कुमाराय प्रादाद्वर्षशतानि वै । तथा गोमायुगृध्राभ्यां प्राददत् क्षुद्विनाशनं ।
वरं पिनाकी भगवान् सर्व्वभूतहिते रतः । ततः प्रणम्य ते देवं प्रायो हर्षसमन्विताः ।
कृतकृत्याः सुखं हृष्टाः प्रातिष्ठन्त तदा विभो । अनिर्व्वेदेन दीर्घेण निश्चयेन ध्रुवेण च ।
देवदेवप्रसादाच्च क्षिप्रं फलमवाप्यते । पश्य दैवस्य संयोगं बान्धवानाञ्च निश्चयं । ५०९५
कृपणानान्तु रुदतां कृतमश्रुप्रमार्ज्जनं । पश्य चाल्पेन कालेन निश्चयान्वेषणेन च ।
प्रसादं शङ्करात् प्राप्य दुःखिताः सुखमाप्नुवन् । ते विस्मिताः प्रहृष्टाश्च पुत्त्रसञ्जीवनात् पुनः ।
बभूवुर्भरतश्रेष्ठ प्रसादाच्छङ्करस्य वै । ततस्ते त्वरिता राजंस्त्यक्त्वा शोकं शिशूद्भवं
विविशुः पुत्त्रमादाय नगरं हृष्टमानसाः । एषां बुद्धिः समस्तानाञ्चातुर्व्वर्ण्येन दर्शिता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मार्थमोक्षसंयुक्तमितिहासमिमं शृणु । श्रुत्वा मनुष्यः सततमिह प्रेत्य च मोदते । ५८००

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि गृध्रगोमायुसंवादे त्रिपञ्चाशदधिकशततोऽध्यायः ॥ १५३ ॥

॥ युधिष्ठिर उवाच ॥ बलिनः प्रत्यमित्रस्य नित्यमासन्नवर्त्तिनः । उपकारापकाराभ्यां समर्थस्योद्यतस्य च ।
मोहाद्विकत्थनामात्रैरसारोऽल्पबलो लघुः । वाग्भिरप्रतिरूपाभिरभिद्रुह्य पितामह ।
आत्मनो बलमास्थाय कथं वर्त्तेत मानवः । आगच्छतोऽतिक्रुद्धस्य तस्योद्धरणकाम्यया ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । संवादं भरतश्रेष्ठ शाल्मलेः पवनस्य च ।
हिमवन्तं समासाद्य महानासीद्वनस्पतिः । वर्षपूगाभिसंवृद्धः शाखी स्कन्धी पलाशवान् । ५८०५
तत्र स्म मत्तमातङ्गा घर्म्मार्त्ताः श्रमकर्षिताः । विश्राम्यन्ति महाबाहो तथाऽन्या मृगजातयः ।
नल्वमात्रपरीणाहो घनच्छायो वनस्पतिः । सारिकाशुकसंजुष्टः पुष्पवान् फलवानपि ।
सार्थिका वणिजश्चापि तापसाश्च वनौकसः । वसन्ति तत्र मार्गस्थाः सुरम्ये नगसत्तमे ।
तस्य ता विपुलाः शाखा दृष्ट्वा स्कन्धश्च सर्व्वशः । अभिगम्याब्रवीदेनं नारदो भरतर्षभ ।
अहो नु रमणीयस्त्वं अहो चासि मनोहरः । प्रीयामहे त्वया नित्यं तरुप्रवर शाल्मले । ५८१०
सदैव शकुनास्तात मृगाश्चाथ तथा गजाः । वसन्ति तव संहृष्टा मनोहरमनोहराः ।
तव शाखा महाशाख स्कन्धाश्च विपुलास्तथा । न वै प्रभग्नान् पश्यामि मारुतेन कथञ्चन ।
किन्नु ते पवनस्तात प्रीतिमानथ वा सुहृत् । त्वां रक्षति सदा येन वनेऽत्र पवनो ध्रुवं ।
भगवान् पवनः स्थानाद्वृक्षानुच्चावचानपि । पर्व्वतानाञ्च शिखराण्याचालयति वेगवान् ।
शोषयत्येव पातालं वहन्गन्धवहः शुचिः । सरांसि सरितश्चैव सागरांश्च तथैव च । ५८१५
संरक्षति त्वां पवनः सखित्वेन न संशयः । तस्मात्त्वं बहुशाखोऽपि पर्णवान् पुष्पवानपि ।
इदञ्च रमणीयन्ते प्रतिभाति वनस्पते । यदिमे विहगास्तात रमन्ते मुदितास्त्वयि ।
एषां पृथक्समस्तानां श्रूयते मधुरस्वरः । पुष्पसम्मोदने काले वाशतां सुमनोहरं ।
तथेमे गर्ज्जिता नागाः स्वयूथकुलशोभिताः । घर्म्मार्त्तास्त्वां समासाद्य सुखं विन्दन्ति शाल्मले ।
तथैव मृगजातीभिरन्याभिरभिशोभसे । तथा सर्व्वाधिवासैश्च शोभसे मेरुवद्द्रुम । ५८२०
ब्राह्मणैश्च तपःसिद्धैस्तापसैः श्रमणैस्तथा । त्रिविष्टपसमं मन्ये तवायतनमेव ह ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि पवनशाल्मलिसंवादे चतुःपञ्चाशदधिकशततोऽध्यायः ॥ १५४ ॥

॥ नारद उवाच ॥ बन्धुत्वादथ वा सख्याच्छाल्मले नात्र संशयः । पालयत्येव सततं भीमः सर्व्वत्रगोऽनिलः ।
न्यग्भावं परमं वायोः शाल्मले त्वमुपागतः । तवाहमस्मीति सदा येन रक्षति मारुतः ।
न तं पश्याम्यहं वृक्षं पर्व्वतं वेश्म चेदृशं । यन्न वायुबलाद्भग्नं पृथिव्यामिति मे मतिः ।
त्वं पुनः कारणैर्नूनं रक्ष्यसे शाल्मले यथा । वायुना सपरीवारस्तेन तिष्ठत्यसंशयं । ५८२५
॥ शाल्मलिरुवाच ॥ न मे वायुः सखा ब्रह्मन्न बन्धुर्न च मे सुहृत् । परमेष्ठी तथा नैव येन रक्षति चानिलः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding by IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मम तेजो बलं भीमं वायोरपि हि नारद । कलामष्टादशीं प्राणैर्न मे प्राप्नोति मारुतः ।
आगच्छन् परुषो वायुर्म्मया विष्टम्भितो बलात् । भञ्जन् द्रुमान् पर्व्वतांश्च यच्चान्यदपि किञ्चन ।
स मया बहुशो भग्नः प्रभञ्जन् वै प्रभञ्जनः । तस्मान्न बिभ्ये देवर्षे क्रुद्धादपि समीरणात् ।
॥ नारद उवाच ॥ शाल्मले विपरीतं ते दर्शनं नात्र संशयः । न हि वायोर्बलेनास्ति भूतं तुल्यबलं क्वचित् । ५८६०
इन्द्रो यमो वैश्रवणो वरुणश्च जलेश्वरः । नैतेऽपि तुल्या मरुतः किं पुनस्त्वं वनस्पते ।
यच्च किञ्चिदिह प्राणी चेष्टते शाल्मले भुवि । सर्व्वत्र भगवान् वायुश्चेष्टाप्राणकरः प्रभुः ।
एष चेष्टयते सम्यक् प्राणिनः सम्यगायतः । असम्यगायतो भूयश्चेष्टते विकृतं नृषु ।
स त्वमेवंविधं वायुं सर्व्वसत्त्वभृतांवरं । न पूजयसि पूज्यं त्वं किमन्यद्बुद्धिलाघवात् ।
असारश्चापि दुर्म्मेधाः केवलं बहु भाषसे । क्रोधादिभिरवच्छन्नो मिथ्या वदसि शाल्मले । ५८६५
मम रोषः समुत्पन्नस्त्वय्येवं संप्रभाषति । ब्रवीम्येष स्वयं वायोस्तव दुर्भाषितं बहु ।
चन्दनैः स्यन्दनैः शालैः सरलैर्द्देवदारुभिः । वेतसैर्धन्वनैश्चापि ये चान्ये बलवत्तराः ।
तैश्चापि नैवं दुर्ब्बुद्धे क्षिप्तो वायुः कृतात्मभिः । तेऽपि जानन्ति वायोश्च बलमात्मन एव च ।
तस्मात्त्वं वै नमस्यन्ति श्वसनं तरुसत्तमाः । त्वन्तु मोहान्न जानीषे वायोर्ब्बलमनन्तकं ।
एवं तस्माद्गमिष्यामि सकाशं मातरिश्वनः । ५८७०
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि पवनशाल्मलिसंवादे पञ्चपञ्चाशदधिकशततोऽध्यायः ॥ १५५ ॥
॥ भीष्म उवाच ॥ एवमुक्त्वा तु राजेन्द्र शाल्मलिं ब्रह्मवित्तमः । नारदः पवने सर्व्वं शाल्मलेर्वाक्यमब्रवीत् ।
॥ नारद उवाच ॥ हिमवत्पृष्ठजः कश्चिच्छाल्मलिः परिवारवान् । बृहन्मूलो बृहच्छायः स त्वां वायोऽवमन्यते ।
बह्व्याक्षेपयुक्तानि त्वामाह वचनानि सः । न युक्तानि मया वायो तानि वक्तुं तवाग्रतः ।
जानामि त्वामहं वायो सर्व्वप्राणभृतांवरं । वरिष्ठञ्च गरिष्ठञ्च क्रोधे वैवस्वतं यथा ।
॥ भीष्म उवाच ॥ एतत्तु वचनं श्रुत्वा नारदस्य समीरणः । शाल्मलिं तमुपागम्य क्रुद्धो वचनमब्रवीत् । ५८७५
॥ वायुरुवाच ॥ शाल्मले नारदोगच्छंस्त्वयोक्तो मद्विगर्हणं । अहं वायुः प्रभावन्ते दर्शयाम्यात्मनो बल ।
अहं त्वामभिजानामि विदितश्चासि मे द्रुम । पितामहः प्रजासर्गे त्वयि विश्रान्तवान् प्रभुः ।
तस्य विश्रमणादेष प्रसादो मत्कृतस्तव । रक्ष्यसे तेन दुर्ब्बुद्धे नात्मवीर्य्याद्द्रुमाधम ।
यन्मां त्वमवजानीषे यथाऽन्यं प्राकृतं तथा । दर्शयाम्येष चात्मानं यथा मां नावमन्यसे ।
॥ भीष्म उवाच ॥ एवमुक्तस्ततः प्राह शाल्मलिः प्रहसन्निव । पवन त्वञ्च मे क्रुद्धो दर्शयात्मानमात्मना । ५८८०
मयि वै त्यज्यतां क्रोधः किं मे क्रुद्धः करिष्यसि । न ते बिभेमि पवन यद्यपि त्वं स्वयं प्रभुः ।
बलाधिकोऽहं त्वत्तश्च न भीः कार्य्या मया तव । ये तु बुद्ध्या तु बलिनस्ते भवन्ति बलीयसः ।
प्राणमात्रबला ये वै नैव ते बलिनो मताः । इत्येवमुक्तः पवनः श्व इत्येवाब्रवीद्वचः ।
दर्शयिष्यामि ते तेजस्ततो रात्रिरुपागमत् । अथ निश्चित्य मनसा शाल्मलिर्व्वातकारितं ।
पश्यमानस्तदात्मानमसमं मातरिश्वना । नारदे यन्मया प्रोक्तं वचनं प्रति तन्मृषा । ५८८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

असमर्थो ह्यहं वायोर्बलेन बलवान् हि सः । मारुतो बलवान्नित्यं यथा वै नारदोऽब्रवीत् ।
अहन्तु दुर्ब्बलोऽन्येभ्यो वृक्षेभ्यो नात्र संशयः । किन्तु बुद्ध्या समो नास्ति मया कश्चिद्वनस्पतिः ।
तदहं बुद्धिमास्थाय भयं मोक्ष्ये समीरणात् । यदि तां बुद्धिमास्थाय तिष्ठेयुः पर्णिनो वने ।
अरिष्टाः स्युः सदा क्रुद्धात् पवनान्नात्र संशयः । ते तु बाला न जानन्ति यथा वै तान् समीरणः ।
समीरयति संक्रुद्धो यथा जानाम्यहं तथा । ५८६०
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि पवनशाल्मलिसंवादे षट्पञ्चाशदधिकशतोऽध्यायः ॥ १५६ ॥
॥ भीष्म उवाच ॥ ततो निश्चित्य मनसा शाल्मलिः क्षुभितस्तदा । शाखास्कन्धान् प्रशाखाश्च स्वयमेव व्यशातयत् ।
स परित्यज्य शाखाश्च पत्राणि कुसुमानि च । प्रभाते वायुमायान्तं प्रत्यैक्षत वनस्पतिः ।
ततः क्रुद्धः श्वसन् वायुः पातयन्वै महाद्रुमान् । आजगामाथ तं देशमास्ते यत्र स शाल्मलिः ।
त हीनपर्णं पतिताग्रशाखं विशीर्णपुष्पं प्रसमीक्ष्य वायुः । उवाच वाक्यं स्मयमान एवं मुदा युतः शाल्मलिमुग्रशाखं ।
॥ वायुरुवाच ॥ अहमप्येवमेवं त्वां कुर्व्वाणः शाल्मले रुषा । आत्मना यत् कृतं कृच्छ्रं शाखानामपकर्षणं । ५८६५
हीनपुष्पाग्रशाखस्त्वं शीर्णाङ्कुरपलाशकः । आत्मदुर्म्मन्त्रितेनेह मद्वीर्य्यवशगः कृतः ।
॥ भीष्म उवाच ॥ एतच्छ्रुत्वा वचो वायोः शाल्मलिर्व्रीडितस्तदा । अतप्यत वचः श्रुत्वा नारदो यत्तदाऽब्रवीत् ।
एवं हि राजशार्द्दूल दुर्ब्बलः सन् बलीयसा । वैरमारभते बालस्तप्यते शाल्मलिर्यथा ।
तस्माद्वैरं न कुर्व्वीत दुर्ब्बलो बलवत्तरैः । शोचेद्धि वैरं कुर्व्वाणो यथा वै शाल्मलिस्तथा ।
न हि वैरं महात्मानो विवृण्वन्त्यपकारिषु । शनैःशनैर्म्महाराज दर्शयन्ति स्म ते बलं । ५८७०
वैरं न कुर्व्वीत नरो दुर्ब्बुद्धिर्बुद्धिजीविना । बुद्धिर्बुद्धिमतो याति तृणेष्विव हुताशनः ।
नहि बुद्ध्या समं किञ्चिद्विद्यते पुरुषे नृप । तथा बलेन राजेन्द्र न समोऽस्तीह कश्चन ।
तस्मात् क्षमेत बालाय जडान्धबधिराय च । बलाधिकाय राजेन्द्र तद्दृष्टं त्वयि शत्रुहन् ।
अक्षौहिण्यो दशैका च सप्त चैव समुद्यते । बलेन न समा राजन्नर्ज्जुनस्य महात्मनः ।
निहताश्चैव भग्नाश्च पाण्डवेन यशस्विना । चरता बलमास्थाय पाकशासनिना मृधे । ५८७५
उक्तास्ते राजधर्म्मा आपद्धर्म्माश्च भारत । विस्तरेण महाराज किं भूयः श्रोतुमिच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वण्यापद्धर्म्मपर्व्वणि पवनशाल्मलिसंवादे सप्तपञ्चाशदधिकशतोऽध्यायः ॥ १५७ ॥
॥ युधिष्ठिर उवाच ॥ पापस्य यदधिष्ठानं यतः पापं प्रवर्त्तते । एतदिच्छाम्यहं श्रोतुं तत्त्वेन भरतर्षभ ।
॥ भीष्म उवाच ॥ पापस्य यदधिष्ठानं तच्छृणुष्व नराधिप । एको लोभो महाग्राहो लोभात् पापं प्रवर्त्तते ।
अतः पापमधर्म्मश्च तथा दुःखमनुत्तमं । निकृत्या मूलमेतद्धि येन पापकृतो जनाः ।
लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्त्तते । लोभान्मोहश्च माया च मानः स्तम्भः परासुता । ५८८०
अक्षमा ह्रीपरित्यागः श्रीनाशो धर्म्मसंक्षयः । अभिध्याऽप्रख्यता चैव सर्व्वं लोभात् प्रवर्त्तते ।
अत्यागश्चातितर्षश्च विकर्म्मसु च या क्रिया । कुलविद्यामदश्चैव रूपैश्वर्य्यमदस्तथा ।
सर्व्वभूतेष्वभिद्रोहः सर्व्वभूतेष्वसत्कृतिः । सर्व्वभूतेष्वविश्वासः सर्व्वभूतेष्वनार्ज्जवं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हरणं परवित्तानां परदाराभिमर्षणं । वाग्वेगो मनसो वेगो निन्दावेगस्तथैव च ।
उपस्थोदरयोर्वेगो मृत्युवेगश्च दारुणः । ईर्ष्यावेगश्च बलवान् मिथ्यावेगश्च दुर्ज्जयः । ५८८५
रसवेगश्च दुर्व्वार्य्यः श्रोत्रवेगश्च दुःसहः । कुत्सा विकत्था मात्सर्य्यं पापं दुष्करकारिता ।
साहसानाञ्च सर्व्वेषामकार्य्याणां क्रियास्तथा । जातौ बाल्ये च कौमारे यौवने चापि मानवाः ।
न सन्त्यजन्त्यात्मकर्म्म यो न जीर्य्यति जीर्य्यतः । यो न पूरयितुं शक्यो लोभः प्राप्त्या कुरूद्वह ।
नित्यं गम्भीरतोयाभिरापगाभिरिवोदधिः । न प्रहृष्यति यो लाभैः कामैर्यश्च न तृप्यति ।
यो न देवैर्न गन्धर्व्वैर्नासुरैर्न महोरगैः । ज्ञायते नृप तत्त्वेन सर्व्वैर्भूतगणैस्तथा । ५८९०
स लोभः सह मोहेन विजितव्यो जितात्मना । दम्भो द्रोहश्च निन्दा च पैशुन्यं मत्सरस्तथा ।
भवन्त्येतानि कौरव्य लुब्धानामकृतात्मनां । सुमहान्त्यपि शास्त्राणि धारयन्ति बहुश्रुताः ।
छेत्तारः संशयानाञ्च क्लिश्यन्तीहाल्पबुद्धयः । द्वेषक्रोधप्रसक्ताश्च शिष्टाचारबहिष्कृताः ।
अन्तःक्रूरा वाङ्मधुराः कूपाश्छन्नास्तृणैरिव । धर्म्मवैतंसिकाः क्षुद्रा मुष्णन्ति ध्वजिनो जगत् ।
कुर्व्वते च बहून् मार्गांस्तान् हेतुबलमाश्रिताः । सतां मार्गान् विलुम्पन्ति लोभज्ञानेष्ववस्थिताः । ५८९५
धर्म्मस्य ह्रियमाणस्य लोभग्रस्तैर्दुरात्मभिः । या या विक्रियते संस्था ततः साऽपि प्रपद्यते ।
दर्पः क्रोधो मदः स्वप्नो हर्षः शोकोऽतिमानिता । एत एव हि कौरव्य दृश्यन्ते लुब्धबुद्धिषु ।
एतानशिष्टान् बुध्यस्व नित्यं लोभसमन्वितान् । शिष्टांस्तु परिपृच्छेथा यान् वक्ष्यामि शुचिव्रतान् ।
येष्वावृत्तिभयं नास्ति परलोकभयं न च । नामिषेषु प्रसङ्गोऽस्ति न प्रियेष्वप्रियेषु च ।
शिष्टाचारः प्रियो येषु दमो येषु प्रतिष्ठितः । सुखं दुःखं समं येषां सत्यं येषां परायणं । ५९००
दातारो न गृहीतारो दयावन्तस्तथैव च । पितृदेवातिथेयाश्च नित्योद्युक्तास्तथैव च ।
सर्व्वोपकारिणो वीराः सर्व्वधर्म्मानुपालकाः । सर्व्वभूतहिताश्चैव सर्व्वदेयाश्च भारत ।
न ते चालयितुं शक्या धर्म्मव्यापारकारिणः । न तेषां भिद्यते वृत्तं यत् पुरा साधुभिः कृतं ।
न त्रासिनो न चपला न रौद्राः सत्पथे स्थिताः । ते सेव्याः साधुभिर्नित्यं येष्वहिंसा प्रतिष्ठिता ।
कामक्रोधव्यपेता ये निर्म्ममा निरहङ्कृताः । सुव्रताः स्थिरमर्य्यादास्तानुपास्स्व च पृच्छ च । ५९०५
न धनार्थं यशोऽर्थं वा धर्म्मस्तेषां युधिष्ठिर । अवश्यं कार्य्य इत्येव शरीरस्य क्रियास्तथा ।
न भयं क्रोधचापल्ये न शोकस्तेषु विद्यते । न धर्म्मध्वजिनश्चैव न गुह्यं कञ्चिदास्थिताः ।
येष्वलोभस्तथाऽमोहो ये च सत्यार्ज्जवे स्थिताः । तेषु कौन्तेय रज्येथा येषां न भ्रश्यते पुनः ।
ये न हृष्यन्ति लाभेषु नालाभेषु व्यथन्ति च । निर्म्मला निरहङ्काराः सत्त्वस्थाः समदर्शिनः ।
लाभालाभौ सुखदुःखे च तात प्रियाप्रियं मरणं जीवितञ्च । समानि येषां स्थिरविक्रमाणां बुभुत्सतां सत्त्वपथे स्थितानां । ५९१०
धर्म्मप्रियांस्तान् सुमहानुभावान् दान्तोऽप्रमत्तश्च समर्च्चयेथाः । दैवात् सर्व्वे गुणवन्तो भवन्ति शुभाशुभे वाक्प्रलापास्तथान्ये ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

॥ युधिष्ठिर उवाच ॥ अनर्थानामधिष्ठानमुक्तो लोभः पितामह । अज्ञानमपि वै तात श्रोतुमिच्छामि तत्त्वतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ करोति पापं योऽज्ञानान्नात्मनो वेत्ति च क्षयं । प्रद्वेष्टि साधुवृत्तांश्च स लोकस्यैति वाच्यतां ।
अज्ञानान्निरयं याति तथाऽज्ञानेन दुर्गतिं । अज्ञानात् क्लेशमाप्नोति तथापत्सु निमज्जति ।
॥ युधिष्ठिर उवाच ॥ अज्ञानस्य प्रवृत्तिञ्च स्थानं वृद्धिक्षयोदयौ । मूलं योगं गतिं कालं कारणं हेतुमेव च । ५९१५
श्रोतुमिच्छामि तत्त्वेन यथावदिह पार्थिव । अज्ञानप्रसवं हीदं यद्दुःखमुपलभ्यते ।
॥ भीष्म उवाच ॥ रागो द्वेषस्तथा मोहो हर्षः शोकोऽभिमानिता । कामः क्रोधश्च दर्पश्च तन्द्रा चालस्यमेव च ।
इच्छा द्वेषस्तथा तापः परवृद्ध्युपतापिता । अज्ञानमेतन्निर्द्दिष्टं पापानाञ्चैव याः क्रियाः ।
एतस्य वा प्रवृत्तेश्च वृद्ध्यादीन् यांश्च पृच्छसि । विस्तरेण महाराज शृणु तच्च विशेषतः ।
उभावेतौ समफलौ समदोषौ च भारत । अज्ञानञ्चातिलोभश्चाप्येकं जानीहि पार्थिव । ५९२०
लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्द्धते । स्थाने स्थानं क्षये क्षीणं उपैति विविधां गतिं ।
मूलं लोभस्य मोहो वै कालात्मगतिरेव च । छिन्ने भिन्ने तथा लोभे कारणं काल एव च ।
तस्याज्ञानाद्धि लोभो हि लोभादज्ञानमेव च । सर्व्वदोषास्तथा लोभात्तस्माल्लोभं विवर्ज्जयेत् ।
जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् । लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये जनाधिपाः ।
प्रत्यक्षन्तु कुरुश्रेष्ठ त्यज लोभमिहात्मना । त्यक्त्वा लोभं सुखं लोके प्रेत्य चानुचरिष्यसि । ५९२५
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि आत्मज्ञाने ऊनषष्ट्यधिकशतोऽध्यायः ॥ १५९ ॥
॥ युधिष्ठिर उवाच ॥ स्वाध्याये कृतयत्नस्य नरस्य च पितामह । धर्म्मकामस्य धर्म्मात्मन् किं नु श्रेय इहोच्यते ।
बहुधा दर्शने लोके श्रेयो यदिह मन्यसे । अस्मिंल्लोके परे चैव तन्मे ब्रूहि पितामह ।
महानयं धर्म्मपथो बहुशाखश्च भारत । किंस्विदेवेह धर्म्माणामनुष्ठेयतमं मतं ।
धर्म्मस्य महतो राजन् बहुशाखस्य तत्त्वतः । यन्मूलं परमं तात तत्सर्व्वं ब्रूहि तत्त्वतः ।
॥ भीष्म उवाच ॥ हन्त ते कथयिष्यामि येन श्रेयो ह्यवाप्स्यसि । पीत्वाऽमृतमिव प्राज्ञो ज्ञानतृप्तो भविष्यसि । ५९३०
धर्म्मस्य विधयो नैके ये वै प्रोक्ता महर्षिभिः । स्वं स्वं विज्ञानमाश्रित्य दमस्तेषां परायणं ।
दमं निःश्रेयसं प्राहुर्वृद्धा निश्चयदर्शिनः । ब्राह्मणस्य विशेषेण दमो धर्म्मः सनातनः ।
दमात्तस्य क्रियासिद्धिर्यथावदुपलभ्यते । दमो दानं तथा यज्ञानधीतञ्चातिवर्त्तते ।
दमस्तेजो वर्द्धयति पवित्रञ्च दमः परं । विपाप्मा तेजसा युक्तः पुरुषो विन्दते महत् ।
दमेन सदृशं धर्म्मं नान्यं लोकेषु शुश्रुम । दमो हि परमो लोके प्रशस्तः सर्व्वधर्म्मिणां । ५९३५
प्रेत्य चात्र मनुष्येन्द्र परमं विन्दते सुखं । दमेन हि समायुक्तो महान्तं धर्म्ममश्नुते ।
सुखं दान्तः प्रस्वपिति सुखञ्च प्रतिबुध्यते । सुखं पर्य्येति लोकांश्च मनश्चास्य प्रसीदति ।
अदान्तः पुरुषः क्लेशमभीक्ष्णं प्रतिपद्यते । अनर्थांश्च बहूनन्यान् प्रसृजत्यात्मदोषजान् ।
आश्रमेषु चतुर्ष्वाहुर्द्दममेवोत्तमं व्रतं । तस्य लिङ्गानि वक्ष्यामि येषां समुदयो दमः ।
क्षमा धृतिरहिंसा च समता सत्यमार्ज्जवं । इन्द्रियाभिजयो दाक्ष्यं मार्द्दवं ह्रीरचापलं । ५९४०
अकार्पण्यमसंरम्भः सन्तोषः प्रियवादिता । अविहिंसानसूया चाप्येषां समुदयो दमः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गुरुपूजा च कौरव्य दया भूतेषु पैशुनं। जनवादं मृषावादं स्तुतिनिन्दाविवर्ज्जनं।
कामं क्रोधञ्च लोभञ्च दर्पं स्तम्भं विकत्थनं। रोषमीर्ष्यावमानञ्च नैव दान्तो निषेवते।
अनिन्दितो ह्यकामात्मा नाल्पेष्वर्थ्यनसूयकः। समुद्रकल्पः स नरो न कथञ्चन पूर्य्यते।
अहं त्वयि ममत्वञ्च मयि तेषु तथाऽप्यहं। पूर्व्वसम्बन्धिसंयोगं नैतद्दान्तो निषेवते। ६९४५
सर्व्वा ग्राम्यास्तथाऽरण्या याश्च लोके प्रवृत्तयः। निन्दाञ्चैव प्रशंसाञ्च यो नाश्रयति मुच्यते।
मैत्रोऽथ शीलसम्पन्नः प्रसन्नात्मात्मविच्च यः। मुक्तस्य विविधैः सङ्गैस्तस्य प्रेत्य फलं महत्।
सुवृत्तः शीलसम्पन्नः प्रसन्नात्मात्मविद्बुधः। प्राप्येह लोके सत्कारं सुगतिं प्रतिपद्यते।
कर्म्म यत् शुभमेवेह सद्भिराचरितञ्च यत्। तदेव ज्ञानयुक्तस्य मुनेर्वर्त्म न हीयते।
निष्क्रम्य वनमास्थाय ज्ञानयुक्तो जितेन्द्रियः। कालाकाङ्क्षी चरत्येवं ब्रह्मभूयाय कल्पते। ६९५०
अभयं यस्य भूतेभ्यो भूतानामभयं यतः। तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन।
अवाचिनोति कर्म्माणि नच सम्प्रचिनोति ह। समः सर्व्वेषु भूतेषु मैत्रायणगतिश्चरेत्।
शकुनीनामिवाकाशे जले वारिचरस्य च। यथा गतिर्न दृश्येत तथा तस्य न संशयः।
गृहानुत्सृज्य यो राजन्मोक्षमेवाऽभिपद्यते। लोकास्तेजोमयास्तस्य कल्पन्ते शाश्वतीः समाः।
संन्यस्य सर्व्वकर्म्माणि संन्यस्य विधिवत्तपः। संन्यस्य विविधा विद्याः सर्व्वं संन्यस्य चैव ह। ६९५५
कामे शुचिरनावृत्तः प्रसन्नात्मात्मविच्छुचिः। प्राप्येह लोके सत्कारं स्वर्गं समभिपद्यते।
यच्च पैतामहं स्थानं ब्रह्मराशिसमुद्भवं। गुहायां पिहितं नित्यं तद्दमेनाभिगम्यते।
ज्ञानारामस्य बुद्धस्य सर्व्वभूताविरोधिनः। नावृत्तिभयमस्तीह परलोकभयं कुतः।
एक एव दमे दोषो द्वितीयो नोपपद्यते। यदेनं क्षमया युक्तमशक्तं मन्यते जनः।
एकोऽस्य सुमहाप्राज्ञ दोषः स्यात् सुमहान् गुणः। क्षमया विपुला लोकाः सुलभा हि सहिष्णुता। ६९६०
दान्तस्य किमरण्येन तथाऽदान्तस्य भारत। यत्रैव निवसेद्दान्तस्तदरण्यं स चाश्रमः।
॥ वैशम्पायन उवाच ॥ एतद्भीष्मस्य वचनं श्रुत्वा राजा युधिष्ठिरः। अमृतेनेव सन्तृप्तः प्रहृष्टः समपद्यत।
पुनश्च परिपप्रच्छ भीष्मं धर्म्मभृताम्वरं। ततः प्रीतः स चोवाच तस्मै सर्व्वं कुरूद्वहः।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि दमकथने षष्ठ्यधिकशततोऽध्यायः ॥ १९० ॥
॥ भीष्म उवाच ॥ सर्व्वमेतत्तपोमूलं कवयः परिचक्षते। न ह्यतप्ततपा मूढः क्रियाफलमवाप्नुते।
प्रजापतिरिदं सर्व्वं तपसैवासृजत्प्रभुः। तथैव वेदानृषयस्तपसा प्रतिपेदिरे। ६९६५
तपसैव ससर्ज्जान्नं फलमूलानि यानि च। त्रीन् लोकांस्तपसा सिद्धाः पश्यन्ति सुसमाहिताः।
औषधान्यगदादीनि क्रियाश्च विविधास्तथा। तपसैव हि सिध्यन्ति तपोमूलं हि साधनं।
यद्दुरापं भवेत् किञ्चित्तत् सर्व्वं तपसो भवेत्। ऐश्वर्य्यमृषयः प्राप्तास्तपसैव न संशयः।
सुरापोऽसम्मतादायी भ्रूणहा गुरुतल्पगः। तपसैव सुतप्तेन नरः पापाद्विमुच्यते।
तपसो बहुरूपस्य तैस्तैर्द्वारैः प्रवर्त्ततः। निवृत्त्या वर्त्तमानस्य तपो नानशनात् परं। ६९७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अहिंसा सत्यवचनं दानमिन्द्रियनिग्रहः । एतेभ्यो हि महाराज तपो नानशनात् परं ।
न दुष्करतरं दानान्नातिमातरमाश्रमः । त्रैविद्येभ्यः परं नास्ति संन्यासः परमन्तपः ।
इन्द्रियाणीह रक्षन्ति स्वर्गधर्म्माभिगुप्तये । तस्मादर्थे च धर्म्मे च तपो नानशनात् परं ।
ऋषयः पितरो देवा मनुष्या मृगपक्षिणः । यानि चान्यानि भूतानि स्थावराणि चराणि च ।
तपः परायणाः सर्व्वे सिध्यन्ति तपसा च ते । इत्येवं तपसा देवा महत्त्वं प्रतिपेदिरे । ५९७५
इमानीष्टविभागानि फलानि तपसः सदा । तपसा शक्यते प्राप्तुं देवत्वमपि निश्चयात् ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि तपःकथने एकषष्ट्यधिकशतोऽध्यायः ॥ १६१ ॥
॥ युधिष्ठिर उवाच ॥ सत्यं धर्म्मं प्रशंसन्ति विप्रर्षिपितृदेवताः । सत्यमिच्छाम्यहं श्रोतुं तन्मे ब्रूहि पितामह ।
सत्यं किंलक्षणं राजन् कथं वा तदवाप्यते । सत्यं प्राप्य भवेत् किञ्च कथञ्चैव तदुच्यतां ।
॥ भीष्म उवाच ॥ चातुर्व्वर्ण्यस्य धर्म्माणां सङ्करो न प्रशस्यते । अविकारितमं सत्यं सर्व्ववर्णेषु भारत ।
सत्यं सत्सु सदा धर्म्मः सत्यं धर्म्मः सनातनः । सत्यमेव नमस्येत सत्यं हि परमा गतिः । ५९८०
सत्यं धर्म्मस्तपोयोगः सत्यं ब्रह्म सनातनं । सत्यं यज्ञः परः प्रोक्तः सर्व्वं सत्ये प्रतिष्ठितं ।
आचारानिह सत्यस्य यथावदनुपूर्व्वशः । लक्षणञ्च प्रवक्ष्यामि सत्यस्येह यथाक्रमं ।
प्राप्यते च यथा सत्यं तच्च श्रोतुमिहार्हसि । सत्यं त्रयोदशविधं सर्व्वलोकेषु भारत ।
सत्यञ्च समता चैव दमश्चैव न संशयः । अमात्सर्य्यं क्षमा चैव ह्रीस्तितिक्षाऽनसूयता ।
त्यागो ध्यानमथार्य्यत्वं धृतिश्च सततं दया । अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश । ५९८५
सत्यं नामाव्ययं नित्यमविकारि तथैव च । सर्व्वधर्म्माविरुद्धेन योगेनैतदवाप्यते ।
आत्मनीष्टे तथाऽनिष्टे रिपौ च समता तथा । इच्छाद्वेषक्षयं प्राप्य कामक्रोधक्षयं तथा ।
दमो नान्यस्पृहा नित्यं गाम्भीर्य्यं धैर्य्यमेव च । अभयं रोगशमनं ज्ञानेनैतदवाप्यते ।
अमात्सर्य्यं बुधाः प्राहुर्दाने धर्म्मे च संयमः । अवस्थिते च नित्यञ्च सत्येनामत्सरी भवेत् ।
अक्षमायाः क्षमायाश्च प्रियाणीहाप्रियाणि च । क्षमते सम्मतः साधु साध्वाप्नोति च सत्यवाक् । ५९९०
कल्याणं कुरुते वाढं धीमान्न ग्लायते क्वचित् । प्रशान्तवाङ्मना नित्यं ह्रीस्तु धर्म्मादवाप्यते ।
धर्म्मार्थहेतोः क्षमते तितिक्षा क्षान्तिरुच्यते । लोकसंग्रहणार्थं वै सा तु धैर्य्येण लभ्यते ।
त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च । रागद्वेषप्रहीनस्य त्यागो भवति नान्यथा ।
आर्य्यता नाम भूतानां यः करोति प्रयत्नतः । शुभं कर्म्म निराकारो वीतरागस्तथैव च ।
धृतिर्नाम सुखे दुःखे यया नाप्नोति विक्रियां । तां भजेत सदा प्राज्ञो य इच्छेद्भूतिमात्मनः । ५९९५
सर्व्वथा क्षमिणा भाव्यं तथा सत्यपरेण च । वीतहर्षभयक्रोधो धृतिमाप्नोति पण्डितः ।
अद्रोहः सर्व्वभूतेषु कर्म्मणा मनसा गिरा । अनुग्रहश्च दानञ्च सतां धर्म्मः सनातनः ।
एते त्रयोदशाकाराः पृथक् सत्यैकलक्षणाः । भजन्ते सत्यमेवेह वृंहयन्ते च भारत ।
नान्तः शक्यो गुणानाञ्च वक्तुं सत्यस्य पार्थिव । अतः सत्यं प्रशंसन्ति विप्राः सपितृदेवताः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नास्ति सत्यात् परो धर्म्मो नानृतात् पातकं परं। श्रुतिर्हि सत्यं धर्म्मस्य तस्मात् सत्यं न लोपयेत्। ६०००
उपैति सत्याद्दानं हि तथा यज्ञाः सदक्षिणाः। त्रेताग्निहोत्रं वेदाश्च ये चान्ये धर्म्मनिश्चयाः।
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतं। अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि सत्यकथने द्विषष्ट्यधिकशततमोऽध्यायः॥ १६२॥
॥ युधिष्ठिर उवाच॥ यतः प्रभवति क्रोधः कामो वा भरतर्षभ। शोकमोहौ विधित्सा च परासुत्वञ्च तद्वद।
लोभो मात्सर्य्यमीर्षा च कुत्साऽसूया कृपा भयं। एतत् सर्व्वं महाप्राज्ञ याथातथ्येन मे वद।
॥ भीष्म उवाच॥ त्रयोदशैतेऽतिबलाः शत्रवः प्राणिनां स्मृताः। उपासन्ते महाराज समन्तात् पुरुषानिह। ६००५
एते प्रमत्तं पुरुषमप्रमत्तास्तुदन्ति च। वृका इव विलुम्पन्ति दृष्ट्वैव पुरुषं बलात्।
एभ्यः प्रवर्त्तते दुःखमेभ्यः पापं प्रवर्त्तते। इति मर्त्यो विजानीयात् सततं पुरुषर्षभ।
एतेषामुदयं स्थानं क्षयञ्च पृथिवीपते। हन्त ते कीर्त्तयिष्यामि क्रोधस्योत्पत्तिमादितः।
यथातत्त्वं क्षितिपते तदिहैकमनाः शृणु। लोभात् क्रोधः प्रभवति परदोषैरुदीर्य्यते।
क्षमया तिष्ठते राजन् क्षमया विनिवर्त्तते। सङ्कल्पाज्जायते कामः सेव्यमानो विवर्द्धते। ६०१०
यदा प्राज्ञो विरमते तदा सद्यः प्रणश्यति। परासूया क्रोधलोभावन्तरा प्रतिमुच्यते।
दयया सर्व्वभूतानां निर्व्वेदाद्विनिवर्त्तते। अवद्यदर्शनाद्वेति तत्त्वज्ञानाच्च धीमतां।
अज्ञानप्रभवो मोहः पापाभ्यासात् प्रवर्त्तते। यदा प्राज्ञेषु रमते तदा सद्यः प्रणश्यति।
विरुद्धानीह शास्त्राणि पश्यन्तीह कुरूद्वह। विधित्सा जायते तत्र तत्त्वज्ञानान्निवर्त्तते।
प्रीत्या शोकः प्रभवति वियोगात्तस्य देहिनः। यदा निरर्थकं वेत्ति तदा सद्यः प्रणश्यति। ६०१५
परासुता क्रोधलोभादभ्यासाच्च प्रवर्त्तते। दयायाः सर्व्वभूतानां निर्व्वेदात् सा निवर्त्तते।
सत्यत्यागात्तु मात्सर्य्यमहितानाञ्च सेवया। एतत्तु क्षीयते तात साधूनामुपसेवनात्।
कुलाज्ज्ञानात्तथैश्वर्य्यान्मदो भवति देहिनां। एभिरेव तु विज्ञातैः स च सद्यः प्रणश्यति।
ईर्ष्या कामात् प्रभवति संहर्षाच्चैव जायते। इतरेषान्तु सत्त्वानां प्रज्ञया सा प्रणश्यति।
विभ्रमाल्लोकबाह्यानां द्वेष्यैर्व्वाक्यैरसम्मतैः। कुत्सा सञ्जायते राजन् लोकान् प्रेक्ष्याभिशाम्यति। ६०२०
इति कर्त्तुं न शक्ता ये बलस्यापकारिणे। असूया जायते तीव्रा कारुण्याद्विनिवर्त्तते।
कृपणान् सततं दृष्ट्वा ततः सञ्जायते कृपा। धर्म्मनिष्ठां यदा वेत्ति तदा शाम्यति सा कृपा।
अज्ञानप्रभवो लोभो भूतानां दृश्यते यदा। अस्थिरत्वञ्च भोगानां दृष्ट्वा ज्ञात्वा निवर्त्तते।
एतान्येव जितान्याहुः प्रशमाच्च त्रयोदश। एते हि धार्त्तराष्ट्राणां सर्व्वे दोषास्त्रयोदश।
त्वया सत्यार्थिना नित्यं विजिता ज्येष्ठसेवनात्। ६०२५
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि लोभोपाख्याने त्रिषष्ट्यधिकशततमोऽध्यायः॥ १६३॥
॥ युधिष्ठिर उवाच॥ आनृशंस्यं विजानामि दर्शनेन सतां सदा। नृशंसान्न विजानामि तेषां कर्म्म च भारत।
कण्टकान् कूपमग्निञ्च वर्ज्जयन्ति यथा नराः। तथा नृशंसकर्म्माणं वर्ज्जयन्ति नरा नरं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नृशंसो हि दहेद्युक्तं प्रेत्य चेह च भारत । तस्मात्त्वं ब्रूहि कौरव्य तस्य धर्म्मविनिश्चयं ।
॥ भीष्म उवाच ॥ स्पृहा स्याद्गर्हिता चैव विधित्सा चैव कर्म्मणां । आक्रोष्टा क्रुश्यते चैव वञ्चितो बुध्यते स च ।
दत्तानुकीर्त्तिर्विषमः क्षुद्रो नैकृतिकः शठः । असंविभागी मानी च तथा सङ्गी विकत्थनः । ६०३०
सर्व्वातिशङ्की पुरुषो बलीशः कृपणोऽथ वा । वर्गप्रशंसी सततमाश्रमद्वेषसङ्करी ।
हिंसाविहारः सततमविशेषगुणागुणः । बह्वलीको मनस्वी च लुब्धोऽत्यर्थं नृशंसकृत् ।
धर्म्मशीलं गुणोपेतं पापमित्यवगच्छति । आत्मशीलप्रमाणेन न विश्वसति कस्यचित् ।
परेषां यत्र दोषः स्यात् तद्गुह्यं सम्प्रकाशयेत् । समानेष्वेव दोषेषु वृत्त्यर्थमुपघातयेत् ।
तथोपकारिणञ्चैव मन्यते वञ्चितं परं । दत्त्वाऽपि च धनं काले सन्तपत्युपकारिणे । ६०३५
भक्ष्यं पेयमथालेह्यं यच्चान्यत् साधुभोजनं । प्रेक्ष्यमाणेषु योऽश्नीयान्नृशंसमिति तं वदेत् ।
ब्राह्मणेभ्यः प्रदायाग्रं यः सुहृद्भिः सहाश्नुते । स प्रेत्य लभते स्वर्गमिह चानन्त्यमश्नुते ।
एष ते भरतश्रेष्ठ नृशंसः परिकीर्त्तितः । सदा विवर्ज्जनीयो हि पुरुषेण विजानता ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि नृशंसकथने चतुःषष्ट्यधिकशततोऽध्यायः ॥ १६४ ॥
॥ भीष्म उवाच ॥ कृतार्थो यक्ष्यमाणश्च सर्व्ववेदान्तगश्च यः । आचार्य्यपितृकार्य्यार्थं स्वाध्यायार्थमथापि च ।
एते वै साधवो दृष्टा ब्राह्मणा धर्म्मभिक्षवः । निःस्वेभ्यो देयमेतेभ्यो दानं विद्या च भारत । ६०४०
अन्यत्र दक्षिणादानं देयं भरतसत्तम । अन्येभ्योऽपि बहिर्व्वेदि नाकृतान्नं विधीयते ।
सर्व्वरत्नानि राजा हि यथार्हं प्रतिपादयेत् । ब्राह्मणा एव वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
अन्योन्यं विभवाचारा यजन्ते गुणतः सदा । यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति । यज्ञश्चेत् प्रतिरुद्धः स्यादंशेनैकेन यज्वनः ।
ब्राह्मणस्य विशेषेण धार्म्मिके सति राजनि । यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः । ६०४५
कुटुम्बात्तस्य तद्वित्तं यज्ञार्थं पार्थिवो हरेत् । आहरेदथ नो किञ्चित् कामं शूद्रस्य वेश्मनः ।
न हि यज्ञेषु शूद्रस्य किञ्चिदस्ति परिग्रहः । यो नाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् । अदातृभ्यो हरेद्वित्तं विख्याप्य नृपतिः सदा ।
तथैवाचरतो धर्म्मो नृपतेः स्यादथाखिलः । तथैव शृणु मे भक्तं भक्तानि षडनश्नतः ।
अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः । खलात् क्षेत्रात्तथारामात् यतो वाऽप्युपपद्यते । ६०५०
आख्यातव्यं नृपस्यैतत् पृच्छतेऽपृच्छतेऽपि वा । न तस्मै धारयेद्दण्डं राजा धर्म्मेण धर्म्मवित् ।
क्षत्रियस्य तु बालिश्याद्ब्राह्मणः क्लिश्यते क्षुधा । श्रुतशीले समाज्ञाय वृत्तिमस्य प्रकल्पयेत् ।
अथैनं परिरक्षेत पिता पुत्त्रमिवौरसं । इष्टिं वैश्वानरीं नित्यं निर्व्वपेदब्दपर्य्यये ।
अनुकल्पः परो धर्म्मो धर्म्मवादैस्तु केवलं । विश्वैर्देवैश्च साध्यैश्च ब्राह्मणैश्च महर्षिभिः ।
आपत्सु मरणाद्भीतैर्व्विधिप्रतिनिधीकृतः । प्रभुः प्रथमकल्पस्य यो ऽनुकल्पेन वर्त्तते । ६०५५
न साम्परायिकं तस्य दुर्म्मतेर्व्विद्यते फलं । न ब्राह्मणो निवेदेत किञ्चिद्राजनि वेदवित् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्ववीर्य्याद्राजवीर्य्याच्च स्ववीर्य्यं बलवत्तरं। तस्माद्राज्ञः सदा तेजो दुःसहं ब्रह्मवादिनां।
कर्त्ता शास्ता विधाता च ब्राह्मणो देव उच्यते। तस्मिन्नाकुशलं ब्रूयान्न शुष्कामीरयेद्गिरं।
क्षत्त्रियो बाहुवीर्य्येण तरेदापदमात्मनः। धनैर्व्वैश्यश्च शूद्रश्च मन्त्रहोमैश्च वै द्विजः।
नैव कन्या न युवतिर्नामन्त्रज्ञो न बालिशः। परिवेष्टाऽग्निहोत्रस्य भवेन्नासंस्कृतस्तथा। ६०६०
नरकं निपतन्त्येते जुह्वानाः स च यस्य तत्। तस्माद्वैतानकुशलो होता स्याद्वेदपारगः।
प्राजापत्यमदत्त्वाऽश्वमग्न्याधेयस्य दक्षिणां। अनाहिताग्निरिति स प्रोच्यते धर्म्मदर्शिभिः।
पुण्यानि यानि कुर्व्वीत श्रद्दधानो जितेन्द्रियः। अनाप्तदक्षिणैर्यज्ञैर्न यजेत कथञ्चन।
प्रजाः पशूंश्च स्वर्गञ्च हन्ति यज्ञो ह्यदक्षिणः। इन्द्रियाणि यशः कीर्त्तिमायुश्चाप्यवकृन्तति।
उदक्यामासते ये च द्विजाः केचिदनग्नयः। होमं वा श्रोत्रिया येषां ते सर्व्वे पापकारिणः। ६०६५
उदपानोदकग्रामे ब्राह्मणो वृषलीपतिः। उषित्वा द्वादशसमाः शूद्रकर्म्मैव गच्छति।
अभार्य्यां शयने बिभ्रत् शूद्रं वृद्धञ्च वै द्विजः। अब्राह्मणं मन्यमानस्तृणेष्वासीत पृष्ठतः।
तथा संशुद्ध्यति राजन् शृणु चात्र वचो मम।
यदेकरात्रेण करोति पापं निकृष्टवर्णं ब्राह्मणः सेवमानः। स्थानासनाभ्यां विहरन् व्रती स त्रिभिर्व्वर्षैः शमयेदात्मपापं।
न नर्म्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले। न गुर्व्वर्थे नात्मनो जीवितार्थे पञ्चानृतान्याहुरपातकानि। ६०७०
श्रद्दधानः शुभां विद्यां हीनादपि समाप्नुयात्। सुवर्णमपि चामेध्यादाददीताविचारयन्।
स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत्। अदूष्या हि स्त्रियो रत्नमाप इत्येव धर्म्मतः।
गोब्राह्मणहितार्थञ्च वर्णानां सङ्करेषु च। वैश्यो गृह्णीत शस्त्राणि परित्राणार्थमात्मनः।
सुरापानं ब्रह्महत्या गुरुतल्पमथापि वा। अनिर्द्देश्यानि मन्यन्ते प्राणान्तमिति धारणा।
सुवर्णहरणं स्तैन्यं विप्रस्वञ्चेति पातकं। विहरन्मद्यपानाच्च अगम्यगमनादपि। ६०७५
पतितैः सम्प्रयोगाच्च ब्राह्मणीयोनितस्तथा। अचिरेण महाराज पतितो वै भवत्युत।
संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनान्न तु यानासनाशनात्।
एतानि हित्वा ऽतोऽन्यानि निर्द्देश्यानीति भारत। निर्द्देश्यानेन विधिना कालेनाव्यसनी भवेत्।
अन्नं त्रीण्यं ग्रहीतव्यं प्रेतकर्म्मण्यपातिते। त्रिषु त्वेतेषु पूर्व्वेषु न कुर्व्वीत विचारणं।
अमात्यान् वा गुरून् वाऽपि जह्याद्धर्म्मेण धार्म्मिकः। प्रायश्चित्तानि कर्म्माणि न तैरर्हन्ति संविदं। ६०८०
अधर्म्मकारी धर्म्मेण तपसा हन्ति किल्बिषं। ब्रुवंस्तेन इति स्तेनं तावत् प्राप्नोति किल्बिषं।
अस्तेनं स्तेन इत्युक्त्वा द्विगुणं पापमाप्नुयात्। त्रिभागं ब्रह्महत्यायाः कन्या प्राप्नोति दुष्यती।
यस्तु दूषयिता तस्याः शेषं प्राप्नोति पाप्मनः। ब्राह्मणायावगूर्य्येह स्पृष्ट्वा गुरुतरं भवेत्।
वर्षाणां हि शतं तावत् प्रतिष्ठां नाधिगच्छति। सहस्रञ्चैव वर्षाणां निपात्य नरकं वसेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तस्मान्नैवावगर्ह्येत नैव जातु निपातयेत्। शोणितं यावतः पांशून् संगृह्णीयाद्विजक्षतात्। ६०८५
तावतीः स समा राजन् नरके प्रतिपद्यते। भ्रूणहाहवमध्ये तु शुद्ध्येत शस्त्रपाततः।
आत्मानं जुहुयादग्नौ समिद्धे तेन शुद्ध्यते। सुरापो वारुणीमुष्णां पीत्वा पापात् प्रमुच्यते।
तया स काये निर्द्दग्धे मृत्युं वा प्राप्य शुध्यति। लोकांश्च लभते विप्रो नान्यथा लभते हि सः।
गुरुतल्पमधिष्ठाय दुरात्मा पापचेतनः। स्त्र्याकारप्रतिमां लिङ्ग्य मृत्युना सोऽभिशुद्ध्यति।
अथ वा शिश्नवृषणावादायाञ्जलिना स्वयं। नैर्ऋतीं दिशमास्थाय निपतेत् स त्वजिह्मगः। ६०९०
ब्राह्मणार्थेऽपि वा प्राणान् सन्त्यजेत्तेन शुध्यति। अश्वमेधेन वाऽपीष्ट्वा अथ वा गोसवेन वा।
अग्निष्टोमेन वा सम्यगिह प्रेत्य च पूज्यते। तथैव द्वादशसमाः कपाली ब्रह्महा भवेत्।
ब्रह्मचारी भवेन्नित्यं स्वकर्म्म ख्यापयन्मुनिः। एवं वा तपसा युक्तो ब्रह्महा स मुनिर्भवेत्।
एवन्तु समभिज्ञातामात्रेयीं वा निपातयेत्। द्विगुणा ब्रह्महत्या वै आत्रेयी निधने भवेत्।
सुरापो नियताहारो ब्रह्मचारी क्षितीशयः। ऊर्द्ध्वं त्रिभ्योऽपि वर्षेभ्यो यजेताग्निष्टुतापरं। ६०९५
ऋषभैकसहस्रं वा गा दत्त्वा शौचमाप्नुयात्। वैश्यं हत्वा तु वर्षे द्वे ऋषभैकशतञ्च गाः।
शूद्रं हत्वाब्दमेवैकमृषभञ्च शतञ्च गाः। श्ववराहखरान् हत्वा शौद्रमेव व्रतञ्चरेत्।
मार्ज्जारचाषमण्डूकान् काकं व्यालञ्च मूषिकं। उक्तः पशुसमो दोषो राजन् प्राणिनिपातनात्।
प्रायश्चित्तान्यथान्यानि प्रवक्ष्याम्यनुपूर्व्वशः। अल्पे वाऽप्यथ शोचेत पृथक् संवत्सरञ्चरेत्।
त्रीणि श्रोत्रियभार्य्यायां परदारे च द्वे स्मृते। काले चतुर्थे भुञ्जानो ब्रह्मचारी व्रती भवेत्। ६१००
स्थानासनाभ्यां विहरेत् त्रिरह्नोऽभ्युपयन्नपः। एवमेव निराकर्त्ता यश्चाग्नीनपविध्यति।
त्यजत्यकारणे यश्च पितरं मातरं गुरुं। पतितः स्यात् स कौरव्य यथा धर्म्मेषु निश्चयः।
ग्रासाच्छादनमात्रन्तु दद्यादिति निदर्शनं। भार्य्यायां व्यभिचारिण्यां निरुद्धायां विशेषतः।
यत् पुंसः परदारेषु तदेनां चारयेद्व्रतं। श्रेयांसं शयनं हित्वा याऽन्यत् पापं नियच्छति।
श्वभिस्तामर्द्दयेद्राजा संस्थाने बहुविस्तरे। पुमांसमुन्नयेत् प्राज्ञः शयने तप्त आयसे। ६१०५
अप्यादधीत दारूणि तत्र दह्येत पापकृत्। एष दण्डो महाराज स्त्रीणां भर्तृव्यतिक्रमात्।
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो भवेत्। द्वे तस्य त्रीणि वर्षाणि चत्वारि सह सेविनि।
कुचरः पञ्च वर्षाणि चरेद्भैक्ष्यं मुनिव्रतः। परिवित्तिः परिवेत्ता या चैव परिविद्यते।
पाणिग्राहस्त्वधर्म्मेण सर्व्वे ते पतिताः स्मृताः। चरेयुः सर्व्व एवैते वीरहा यद्व्रतञ्चरेत्।
चान्द्रायणञ्चरेन्मासं कृच्छ्रं वा पापशुद्धये। परिवेत्ता प्रयच्छेत परिविन्नाय तां स्नुषां। ६११०
ज्येष्ठेन त्वभ्यनुज्ञातो यवीयानप्यनन्तरं। एवञ्च मोक्षमाप्नोति तौ च सा चैव धर्म्मतः।
अमानुषीषु गोवर्ज्जं अनावृष्टिर्न दुष्यति। अधिष्ठातारमन्तारं पशूनां पुरुषं विदुः।
परिधायोर्द्ध्ववालन्तु पात्रमादाय मृण्मयं। चरेत् सप्त गृहान्नित्यं स्वकर्म्म परिकीर्त्तयन्।
तत्रैव लब्धभोजी स्यात् द्वादशाहात् स शुद्ध्यति। चरेत् संवत्सरञ्चापि तद्व्रतं येन क्षन्तति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भवेत्तु मानसेष्वेवं प्रायश्चित्तमनुत्तमं । दानं वा दानशक्तेषु सर्व्वमेतत् प्रकल्पयेत् । ६११५
अनास्तिकेषु गोमात्रं दानमेकं प्रचचते । श्ववराहमनुष्याणां कुक्कुटस्य खरस्य च ।
मांसं मूत्रं पुरीषं वा प्राश्य संस्कारमर्हति । ब्राह्मणस्तु सुरापस्य गन्धमादाय सोमपः ।
अपस्त्र्यहं पिबेदुष्णं त्र्यहमुष्णं पयः पिबेत् । त्र्यहमुष्णं पयः पीत्वा वायुभक्षो भवेत्त्र्यहं ।
एवमेतत् समुद्दिष्टं प्रायश्चित्तं सनातनं । ब्राह्मणस्य विशेषेण यदज्ञानेन सम्भवेत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि प्रायश्चित्तीये पञ्चषष्ट्यधिकशतोऽध्यायः ॥ १६५ ॥
॥ वैशम्पायन उवाच ॥ कथान्तरमथासाद्य खड्गयुद्धविशारदः । नकुलः शरतल्पस्थमिदमाह पितामहं । ६१२०
॥ नकुल उवाच ॥ धनुः प्रहरणं श्रेष्ठमतीवात्र पितामह । यतस्तु मम धर्म्मज्ञ खड्ग एव सुसंशितः ।
विशीर्णे कार्म्मुके राजन् प्रक्षीणेषु च वाजिषु । खड्गेन शक्यते युद्धे साध्वात्मा परिरक्षितुं ।
शरासनधरांश्चैव गदाशक्तिधरांस्तथा । एकः खड्गधरो वीरः समर्थः प्रतिबाधितुं ।
एतन्मे संशयश्चैव कौतूहलमतीव च । किंस्वित् प्रहरणं श्रेष्ठं सर्व्वयुद्धेषु पार्थिव ।
कथञ्चोत्पादितः खड्गः कस्मै चार्थाय केन च । पूर्व्वाचार्य्यञ्च खड्गस्य प्रब्रूहि प्रपितामह । ६१२५
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं श्रुत्वा माद्रीपुत्त्रस्य धीमतः । स तु कौशलसंयुक्तं सूक्ष्मचित्रार्थसम्मतं ।
ततस्तस्योत्तरं वाक्यं स्वरवर्णोपपादितं । शिक्षया चोपपन्नाय द्रोणशिष्याय भारत ।
उवाच स तु धर्म्मज्ञो धनुर्व्वेदस्य पारगः । शरतल्पगतो भीष्मो नकुलाय महात्मने ।
॥ भीष्म उवाच ॥ तत्त्वं शृणुष्व माद्रेय यदेतत् परिपृच्छसि । प्रबोधितोऽस्मि भवता धातुमानिव पर्व्वतः ।
सलिलैकार्णवं तात पुरा सर्व्वमभूदिदं । निष्प्रकम्पमनाकाशमनिर्द्देश्यमहीतलं । ६१३०
तमसा वृतमस्पर्शमपि गम्भीरदर्शनं । निःशब्दं वाप्रमेयञ्च तत्र जज्ञे पितामहः ।
सोऽसृजद्वातमग्निञ्च भास्करञ्चापि वीर्य्यवान् । आकाशमसृजच्चोर्द्ध्वमधो भूमिञ्च नैर्ऋतीं ।
नभः सचन्द्रतारञ्च नक्षत्राणि ग्रहांस्तथा । संवत्सरानृतून्मासान् पक्षानथ लवान् क्षणान् ।
ततः शरीरं लोकस्थं स्थापयित्वा पितामहः । जनयामास भगवान् पुत्त्रानुत्तमतेजसः ।
मरीचिमृषिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं । वशिष्ठाङ्गिरसौ चोभौ रुद्रञ्च प्रभुमीश्वरं । ६१३५
प्राचेतसस्तथा दक्षः कन्याः षष्टिमजीजनत् । ता वै ब्रह्मर्षयः सर्व्वाः प्रजार्थं प्रतिपेदिरे ।
ताभ्यो विश्वानि भूतानि देवाः पितृगणास्तथा । गन्धर्व्वाप्सरसश्चैव रक्षांसि विविधानि च ।
पतत्रिमृगमीनाश्च प्लवङ्गाश्च महोरगाः । तथा पक्षिगणाः सर्व्वे जलस्थितिविचारिणः ।
उद्भिदः स्वेदजाश्चैव साण्डजाश्च जरायुजाः । जज्ञे तात जगत्सर्व्वं तथा स्थावरजङ्गमं ।
भूतसर्गमिमं कृत्वा सर्व्वलोकपितामहः । शाश्वतं वेदपठितं धर्म्मं प्रयुयुजे ततः । ६१४०
तस्मिन् धर्म्मे स्थिता देवाः सहाचार्य्यपुरोहिताः । आदित्या वसवो रुद्राः ससाध्या मरुदश्विनः ।
भृग्वत्र्यङ्गिरसः सिद्धाः काश्यपाश्च तपोधनाः । वशिष्ठगौतमागस्त्यास्तथा नारदपर्व्वतौ ।
ऋषयो बालखिल्याश्च प्रभासाः सिकतास्तथा । घृतपाः सोमपा यज्वा वैश्वानरमरीचिपाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आकृष्टाश्चैव हंसाश्च ऋषयो वाऽग्नियोनयः । वानप्रस्थाः प्रश्नयश्च स्थिता ब्रह्मानुशासने ।
दानवेन्द्रास्त्वतिक्रम्य तत्पितामहशासनं । धर्म्मस्यापचयं चक्रुः क्रोधलोभसमन्विताः । ६१४५
हिरण्यकशिपुश्चैव हिरण्याक्षो विरोचनः । शम्बरो विप्रचित्तिश्च प्रह्लादो नमुचिर्ब्बलिः ।
एते चान्ये च बहवः सगणा दैत्यदानवाः । धर्म्मसेतुमतिक्रम्य रेमिरे धर्म्मनिश्चयाः ।
सर्व्वे तुल्याभिजातीया यथा देवास्तथा वयं । इत्येवं धर्म्ममास्थाय स्पर्द्धमानाः सुरर्षिभिः ।
न प्रियं नाप्यनुक्रोशं चक्रुर्भूतेषु भारत । त्रीनुपायानुपाक्रम्य दण्डेन रुरुधुः प्रजाः ।
न जग्मुः संविदं तैश्च दर्पादसुरसत्तमाः । अथ वै भगवान् ब्रह्मा ब्रह्मर्षिभिरुपस्थितः । ६१५०
तथा हिमवतः शृङ्गे सुरम्ये पद्मतारके । शतयोजनविस्तारे मणिरत्नचयाचिते ।
तस्मिन् गिरिवरे पुत्त्र पुष्पितद्रुमकानने । तस्थौ स विबुधश्रेष्ठो ब्रह्मा लोकार्थसिद्धये ।
ततो वर्षसहस्रान्ते वितानमकरोत्प्रभुः । विधिना कल्पदृष्टेन यथावच्चोपपादितं ।
ऋषिभिर्यज्ञपटुभिर्यथावत्कर्म्मकर्तृभिः । समिद्भिः परिसङ्कीर्णैर्दीप्यमानैश्च पावकैः ।
काञ्चनैर्यज्ञभाण्डैश्च भ्राजिष्णुभिरलंकृतं । वृतं देवगणैश्चैव प्रवरैर्यज्ञमण्डलं । ६१५५
तथा ब्रह्मर्षिभिश्चैव सदस्यैरुपशोभितं । यत्र घोरतमं वृत्तमृषीणां मे परिश्रुतं ।
चन्द्रमा विमलं व्योम यथाऽभ्युदिततारकं । विकीर्य्याग्निं तथाभूतमुत्थितं श्रूयते तदा ।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं कृशोदरं । प्रांशुं सुदुर्द्धर्षतरं तथैव ह्यमितौजसं ।
तस्मिन्नुत्पतमाने च प्रचचाल वसुन्धरा । महोर्म्मिकलितावर्त्तश्चुक्षुभे स महोदधिः ।
पेतुरुल्का महोत्पाताः शाखाश्च मुमुचुर्द्रुमाः । अप्रशान्ता दिशः सर्व्वाः पवनश्चाशिवो ववौ । ६१६०
मुहुर्म्मुहुश्च भूतानि चाव्यथन्त भयात्तथा । ततः स तुमुलं दृष्ट्वा तच्च भूतमुपस्थितं ।
महर्षिसुरगन्धर्व्वानुवाचेदं पितामहः । मयैवं चिन्तितं भूतमसिर्नामैष वीर्य्यवान् ।
रक्षणार्थाय लोकस्य बधाय च सुरद्विषां । ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ।
विमलस्तीक्ष्णधारश्च कालोऽन्तक इवोद्यतः । ततः स शितिकण्ठाय रुद्रायर्षभकेतवे ।
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणं । ततः स भगवान् रुद्रो महर्षिजनसंस्तुतः । ६१६५
प्रगृह्यासिममेयात्मा रूपमन्यच्चकार ह । चतुर्ब्बाहुःस्पृशन्मूर्द्ध्ना भूस्थितोऽपि दिवाकरं ।
ऊर्द्ध्वदृष्टिर्म्महालिङ्गो मुखाज्ज्वालाः समुत्सृजन् । विकुर्व्वन् बहुधा वर्णान्नीलपाण्डुरलोहितान् ।
बिभ्रत् कृष्णाजिनं वासो हेमप्रवरतारकं । नेत्रञ्चैकं ललाटेन भास्करप्रतिमं वहन् ।
शुभ्रभातेऽतिविमले द्वे नेत्रे कृष्णपिङ्गले । ततो देवो महादेवः शूलपाणिर्भगाक्षिहा ।
संप्रगृह्य तु निस्त्रिंशं कालाग्निसमवर्च्चसं । त्रिकूटं चर्म्म चोद्यम्य सविद्युतमिवाम्बुदं । ६१७०
चचार विविधान्मार्गान् महाबलपराक्रमः । विधुन्वन्नसिमाकाशे तथा युद्धचिकीर्षया ।
तस्य नादं विनदतो महाहासञ्च मुञ्चतः । बभौ प्रतिभयं रूपं तदा रुद्रस्य भारत ।
तद्रूपधारिणं रुद्रं रौद्रकर्म्मचिकीर्षया । निशम्य दानवाः सर्व्वे हृष्टाः समभिदुद्रुवुः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अस्त्रभिश्चाभ्यवर्षन्त प्रदीप्तैश्च तथोल्मुकैः । घोरैः प्रहरणैश्चान्यैः क्षुरधारैरयोमयैः
ततस्तु दानवानीकं संप्रणेतारमच्युतं । रुद्रं दृष्ट्वा बलोद्भूतं प्रमुमोह चचाल च । ६१७५
चित्रं शीघ्रपदत्वाच्च चरन्तमसिपाणिनं । तमेकमसुराः सर्व्वे सहस्रमिति मेनिरे ।
छिन्दन् भिन्दन् रुजन् कृन्तन् दारयन् पोथयन्नपि । आचरद्वैरिसङ्घेषु दावाग्निरिव कक्षगः ।
असिवेगप्रभग्नास्ते छिन्नबाहूरुवक्षसः । संप्रकीर्णान्त्रगात्राश्च पेतुरुर्व्यां महाबलाः ।
अपरे दानवा भग्नाः खड्गपातावपीडिताः । अन्योन्यमभिनर्द्दन्तो दिशः संप्रतिपेदिरे ।
भूमिं केचित् प्रविविशुः पर्व्वतानपरे तथा । अपरे जग्मुराकाशमपरेऽम्भः समाविशन् । ६१८०
तस्मिन्महति संवृत्ते समरे भृशदारुणे । बभूव भूः प्रतिभया मांसशोणितकर्द्दमा ।
दानवानां शरीरैश्च पतितैः शोणितोक्षितैः । समाकीर्णा महाबाहो सशैलैरिव किंशुकैः ।
स रुद्रो दानवान् हत्वा कृत्वा धर्म्मोत्तरं जगत् । रौद्रं रूपमथोत्क्षिप्य चक्रे रूपं शिवं शिवः ।
ततो महर्षयः सर्व्वे सर्व्वे देवगणास्तथा । जयेनाद्भुतकल्पेन देवदेवं तथाऽर्च्चयन् ।
ततः स भगवान् रुद्रो दानवक्षतजोक्षितं । असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे । ६१८५
विष्णुर्म्मरीचये प्रादान्मरीचिर्भगवानपि । महर्षिभ्यो ददौ खड्गमृषयो वासवाय च ।
महेन्द्रो लोकपालेभ्यो लोकपालास्तु पुत्त्रक । मनवे सूर्य्यपुत्त्राय ददुः खड्गं सुविस्तरं ।
ऊचुश्चैनं तथा वाक्यं मानुषाणां त्वमीश्वरः । असिना धर्म्मगर्भेण पालयस्व प्रजा इति ।
धर्म्मसेतुमतिक्रान्ताः स्थूलसूक्ष्मात्मकारणात् । विभज्य दण्डं रक्ष्यास्तु धर्म्मतो न यदृच्छया ।
दुर्व्वाचा निग्रहो दण्डो हिरण्यबहुलस्तथा । व्यङ्गता च शरीरस्य बधो वाऽनल्पकारणात् । ६१९०
असेरेतानि रूपाणि दुर्व्वारादीनि निर्द्दिशेत् । असेरेवं प्रमाणानि परिपाल्य व्यतिक्रमात् ।
स विसृज्याथ पुत्त्रं स्वं प्रजानामधिपं ततः । मनुः प्रजानां रक्षार्थं क्षुपाय प्रददावसिं ।
क्षुपाज्जग्राह चेक्ष्वाकुरिक्ष्वाकोश्च पुरूरवाः । आयुश्च तस्माल्लेभे तं नहुषश्च ततो भुवि ।
ययातिर्नहुषाच्चापि पूरुस्तस्माच्च लब्धवान् । अमूर्त्तरयसस्तस्मात्ततो भूमिशयो नृपः ।
भरतश्चापि दौष्मन्तिर्लेभे भूमिशयादसिं । तस्माल्लेभे च धर्म्मज्ञो राजन्नैलविलस्तथा । ६१९५
ततस्त्वैलविलाल्लेभे धुन्धुमारो नरेश्वरः । धुन्धुमाराच्च काम्बोजो मुचुकुन्दस्ततोऽलभत् ।
मुचुकुन्दान्मरुत्तश्च मरुत्तादपि रैवतः । रैवताद्युवनाश्वश्च युवनाश्वात्ततो रघुः ।
इक्ष्वाकुवंशजस्तस्माद्धरिणाश्वः प्रतापवान् । हरिणाश्वादसिं लेभे शुनकः शुनकादपि ।
उशीनरो वै धर्म्मात्मा तस्माद्भोजः सयादवः । यदुभ्यश्च शिविर्लेभे शिवेश्चापि प्रतर्द्दनः ।
प्रतर्द्दनादष्टकश्च पृषदश्वोऽष्टकादपि । पृषदश्वाद्भरद्वाजो द्रोणस्तस्मात् कृपस्ततः । ६२००
ततस्तु भ्रातृभिः सार्द्धं परमासिमवाप्तवान् । कृत्तिकास्तस्य नक्षत्रमसेरग्निश्च दैवतं ।
रोहिणी गोत्रमास्थाय रुद्रश्च गुरुरुत्तमः । असेरष्टौ हि नामानि रहस्यानि निबोध मे ।
पाण्डवेय सदा यानि कीर्त्तयन् लभते जयं । असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-Grant-2 Equipment Heritage Foundation, Jagadhri

श्रीगर्भो विजयश्चैव धर्म्मपालस्तथैव च । अग्र्यः प्रहरणानाञ्च खड्गो माद्रवतीसुत ।
महेश्वरप्रणीतश्च पुराणे निश्चयं गतः । पृथुस्तूत्पादयामास धनुराद्यमरिन्दम । ६२०५
तेनेयं पृथिवी दुग्धा शस्यानि सुबहून्यपि । धर्म्मेण च यथा पूर्व्वं वैन्येन परिरक्षिता ।
तदेतदार्षं माद्रेय पुराणं कर्त्तुमर्हसि । अस्य च पूजा कर्त्तव्या सदा युद्धविशारदैः ।
इत्येष प्रथमः कल्पो व्याख्यातस्ते सुविस्तरात् । अस्योत्पत्तिसंसर्गो यथावद्भरतर्षभ ।
सर्व्वथैतदिदं श्रुत्वा खड्गसाधनमुत्तमम् । लभते पुरुषः कीर्त्तिं प्रेत्य चानन्त्यमश्नुते ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि खड्गोत्पत्तिकथने षट्षष्ट्यधिकशततोऽध्यायः ॥ १६६ ॥

॥ वैशम्पायन उवाच ॥ इत्युक्तवति भीष्मे तु तूष्णीम्भूते युधिष्ठिरः । पप्रच्छावसथं गत्वा भ्रातॄन् विदुरपञ्चमान् । ६२१०
धर्म्मे चार्थे च कामे च लोकवृत्तिः समाहिता । तेषां गरीयान् कतमो मध्यमः को लघुश्च कः ।
तस्मिंश्चात्मा निधातव्यस्त्रिवर्गविजयाय वै । संहृष्टा नैष्ठिकं वाक्यं यथावद्वक्तुमर्हथ ।
ततोऽर्थगतितत्त्वज्ञः प्रथमं प्रतिभानवान् । जगाद विदुरो वाक्यं धर्म्मशास्त्रमनुस्मरन् ।
॥ विदुर उवाच ॥ बाहुश्रुत्यं तपस्त्यागः श्रद्धा यज्ञक्रिया क्षमा । भावशुद्धिर्दया सत्यं संयमश्चात्मसम्पदः ।
एतदेवाभिपद्यस्व मा ते भूच्चलितं मनः । एतन्मूलौ हि धर्म्मार्थावेतदेकपदं हि मे । ६२१५
धर्म्मेणैवर्षयस्तीर्णा धर्म्मे लोकाः प्रतिष्ठिताः । धर्म्मेण देवा ववृधुर्धर्म्मे चार्थः समाहितः ।
धर्म्मो राजन् गुणश्रेष्ठो मध्यमो ह्यर्थ उच्यते । कामो यवीयानिति च प्रवदन्ति मनीषिणः ।
तस्माद्धर्म्मप्रधानेन भवितव्यं यतात्मना । तथा च सर्व्वभूतेषु वर्त्तितव्यं यतात्मनि ।
॥ वैशम्पायन उवाच ॥ समाप्तवचने तस्मिन्नर्थशास्त्रविशारदः । पार्थो धर्म्मार्थतत्त्वज्ञो जगौ वाक्यं प्रचोदितः ।
॥ अर्ज्जुन उवाच ॥ कर्म्मभूमिरियं राजन्निह वार्त्ता प्रशस्यते । कृषिर्व्वाणिज्यगोरक्ष्यं शिल्पानि विविधानि च । ६२२०
अर्थ इत्येव सर्व्वेषां कर्म्मणामव्यतिक्रमः । न ऋतेऽर्थेन वर्त्तेते धर्म्मकामाविति श्रुतिः ।
विषयैरर्थवान् धर्म्ममाराधयितुमुत्तमम् । कामञ्च चरितुं शक्तो दुष्प्रापमकृतात्मभिः ।
अर्थस्यावयवावेतौ धर्म्मकामाविति श्रुतिः । अर्थसिद्ध्या विनिर्वृत्तावुभावेतौ भविष्यतः ।
तद्गतार्थं हि पुरुषं विशिष्टतरयोनयः । ब्रह्माणमिव भूतानि सततं पर्य्युपासते ।
जटाजिनधरा दान्ताः पङ्कदिग्धा जितेन्द्रियाः । मुण्डा निस्तन्तवश्चापि वसन्त्यर्थार्थिनः पृथक् । ६२२५
काषायवसनाश्चान्ये श्मश्रुला ह्रीनिषेविणः । विद्वांसश्चैव शान्ताश्च मुक्ताः सर्व्वपरिग्रहैः ।
अर्थार्थिनः सन्ति केचिदपरे स्वर्गकाङ्क्षिणः । कुलप्रत्यागमाश्चैके स्वं स्वं धर्म्ममनुष्ठिताः ।
आस्तिका नास्तिकाश्चैव नियताः संयमे परे । अप्रज्ञानं तमोभूतं प्रज्ञानन्तु प्रकाशिता ।
भृत्यान् भोगैर्द्विषो दण्डैर्यो जयति सोऽर्थवान् । एतन्मतिमतां श्रेष्ठ मतं मम यथायथं ।
अनयोस्तु निबोध त्वं वचनं वाक्यकण्ठयोः । ६२३०
॥ वैशम्पायन उवाच ॥ ततो धर्म्मार्थकुशलौ माद्रीपुत्रावनन्तरं । नकुलः सहदेवश्च वाक्यं जगदतुः परं ।
॥ नकुलसहदेवावूचतुः ॥ आसीनश्च शयानश्च विचरन्नपि वा स्थितः । अर्थयोगं दृढं कुर्य्याद्योगैरुच्चावचैरपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अस्मिंस्तु वै विनिर्वृत्ते दुर्लभे परमप्रिये। इह कामानवाप्नोति प्रत्यक्षं नात्र संशयः।
योऽर्थो धर्म्मेण संयुक्तो धर्म्मो यश्चार्थसंयुतः। तद्धिलाऽमृतसंवादं तस्मादेतौ मताविह।
अनर्थस्य न कामोऽस्ति तथाऽर्थो धर्म्मिणः कुतः। तस्मादुद्विजते लोको धर्म्मार्थाद्यो वहिष्कृतः। ६२२५
तस्माद्धर्म्मप्रधानेन साध्योऽर्थः संयतात्मना। विश्वस्तेषु हि भूतेषु कल्पते सर्व्वमेव हि।
धर्म्मं समाचरेत् पूर्व्वं ततोऽर्थं धर्म्मसंयुतं। ततः कामञ्चरेत् पश्चात् सिद्धार्थः स हि तत्परं।
॥ वैशम्पायन उवाच ॥ विरेमतुस्तु तद्वाक्यमुक्ता तावश्विनीसुतौ। भीमसेनस्तदा वाक्यमिदं वक्तुं प्रचक्रमे।
॥ भीमसेन उवाच ॥ नाकामः कामयत्यर्थं नाकामो धर्म्ममिच्छति। नाकामः कामयानोऽस्ति तस्मात् कामो विशिष्यते।
पलाशफलमूलादा वायुभक्षाः सुसंयताः। वेदोपवेदेष्वपरे युक्ताः स्वाध्यायपारगाः। ६२३०
कामेन युक्ता ऋषयस्तपसि च समाहिताः। श्राद्धयज्ञक्रियायाञ्च तथा दानप्रतिग्रहे।
वणिजः कर्षका गोपाः कारवः शिल्पिनस्तथा। देवकर्म्मकृतश्चैव युक्ताः कामेन कर्म्मसु।
समुद्रं वा विशन्त्यन्ये नराः कामेन संयुताः। कामो हि विविधाकारः सर्व्वं कामेन सन्ततं।
नास्ति नासीन्नाभविष्यद्भूतं कामात्मकात् परं। एतत् सारं महाराज धर्म्मार्थावत्र संस्थितौ।
नवनीतं यथा दध्नस्तथा कामोऽर्थधर्म्मतः। श्रेयस्तैलं हि पिण्याकात् घृतं श्रेय उदश्वितः। ६२३५
श्रेयः पुष्पफलं काष्ठात् कामो धर्म्मार्थयोर्व्वरः। पुष्पतो मध्विव रसः काम आभ्यां तथा स्मृतः।
कामो धर्म्मार्थयोर्योनिः कामश्चाथ तदात्मकः।
नाकामतो ब्राह्मणाः स्वन्नमर्थान्नाकामतो ददति ब्राह्मणेभ्यः। नाकामतो विविधा लोकचेष्टा तस्मात् कामः प्राक् त्रिवर्गस्य दृष्टः।
सुचारुवेशाभिरलङ्कृताभिर्म्मदोत्कटाभिः प्रियदर्शनाभिः। रमस्व योषाभिरुपेत्य कामं कामो हि राजन् परं भजस्व [illegible]
बुद्धिर्म्ममैषा परिखास्थितस्य मा भूद्विचारस्तव धर्म्मपुत्त्र। स्यात् संहितं सद्भिरफल्गु[illegible] मनीषि वाक्यं परमानयेथं। [illegible]
धर्म्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो जघन्यः। तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो योऽभिरतस्त्रिवर्गे।
प्राज्ञः सुहृच्चन्दनसारलिप्तो विचित्रमाल्याभरणैरुपेतः। ततो वचः संग्रहविस्तरेण प्रोक्ताऽथ वीरान् विरराम भीमः।
ततो मुहूर्त्तादथ धर्म्मराजो वाक्यानि तेषामनुचिन्त्य सम्यक्। उवाच वाचा वितथं स्मरन् वै लब्धश्रुतो धर्म्मभृतां वरिष्ठः।
॥ युधिष्ठिर उवाच ॥ निःसंशयं निश्चितधर्म्मशास्त्राः सर्व्वे भवन्तो विदितप्रमाणाः। विज्ञातुकामस्य ममेह वाक्यमुक्तं यदै नैष्ठिकं तत् श्रुतं मे।
इदं त्ववश्यं गदतो ममापि वाक्यं निबोधध्वमनन्यभावाः। यो वै न पापे निरतो न पुण्ये नार्थे न धर्म्मे मनुजो न कामे। ६२४५
विमुक्तदोषः समलोष्टकाञ्चनो विमुच्यते दुःखसुखार्थसिद्धेः। भूतानि जातिस्मरणात्मकानि जराविकारैश्च समन्वितानि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भूयश्च तैस्तैः प्रतिबोधितानि मोक्षं प्रशंसन्ति न तच्च विद्मः। स्नेहेन युक्तस्य न चास्ति मुक्तिरिति स्वयम्भूर्भगवानुवाच।

बुधाश्च निर्व्वाणपरा भवन्ति तस्मान्न कुर्य्यात् प्रियमप्रियञ्च। एतत् प्रधानञ्च न कामकारो यथा नियुक्तोऽस्मि तथा करोमि।

भूतानि सर्व्वाणि विधिर्नियुङ्क्ते विधिर्ब्बलीयानिति वित्त सर्व्वे। न कर्म्मणाप्नोत्यनवाप्यमर्थं यद्भावि तद्वै भवतीति वित्त।

त्रिवर्गहीनोऽपि हि विन्दतेऽर्थं तस्मादहो लोकहिताय गुह्यं। ६२६०

॥ वैशम्पायन उवाच ॥ ततस्तदग्र्यं वचनं मनोगतं समस्तमाज्ञाय ततो हि हेतुमत्। तदा प्रणेमुश्च जहर्षिरे च ते कुरुप्रवीराय च चक्रिरेऽञ्जलिं।

सुचारुवर्णाक्षरचारुभूषितां मनोनुगां निर्द्धुतवाक्यकण्टकां। निशम्य तां पार्थिवपार्थभाषितां गिरं नरेन्द्राः प्रशशंसुरेव ते।

स चापि तान् धर्म्मसुतो महामनास्तदा प्रतीतान् प्रशशंस वीर्य्यवान्। पुनश्च पप्रच्छ सरिद्वरासुतं ततः परं धर्म्ममहीनचेतसं।

इति श्रीमहाभारते शान्तिपर्व्वण्यापद्धर्म्मपर्व्वणि षडजगीतायां सप्तषष्ट्यधिकशतोऽध्यायः॥ १६७ ॥

॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ कुरूणां प्रीतिवर्द्धन। प्रश्नं कञ्चित् प्रवक्ष्यामि तन्मे व्याख्यातुमर्हसि।

कीदृशा मानवाः सौम्याः कैः प्रीतिः परमा भवेत्। आयत्याञ्च तदात्वे च के क्षमास्तान् वदस्व मे। ६२६५

न हि तत्र धनं स्फीतं न च सम्बन्धिबान्धवाः। तिष्ठन्ति यत्र सुहृदस्तिष्ठन्तीति मतिर्म्मम।

दुर्लभो हि सुहृत् श्रोता दुर्लभश्च हितः सुहृत्। एतद्धर्म्मभृतां श्रेष्ठ सर्व्वं व्याख्यातुमर्हसि।

॥ भीष्म उवाच ॥ सन्धेयान् पुरुषान्राजन्नसन्धेयांश्च तत्त्वतः। वदतो मे निबोध त्वं निखिलेन युधिष्ठिर।

लुब्धः क्रूरस्त्यक्तधर्म्मा निकृतिः शठ एव च। क्षुद्रः पापसमाचारः सर्व्वशङ्की तथाऽलसः।

दीर्घसूत्रोऽनृजुः क्रुष्टो गुरुदारप्रधर्षकः। व्यसनेयः परित्यागी दुरात्मा निरपत्रपः। ६२७०

सर्व्वतः पापदर्शी च नास्तिको वेदनिन्दकः। संप्रकीर्णेन्द्रियो लोके यः कामं निरतश्चरेत्।

असत्यो लोकविद्विष्टः समये चानवस्थितः। पिशुनोऽथाकृतप्रज्ञो मत्सरी पापनिश्चयः।

दुःशीलोऽथाकृतात्मा च नृशंसः कितवस्तथा। मित्रैरपकृतिर्नित्यमिच्छतेऽर्थं परस्य यः।

ददतश्च यथाशक्ति यो न तुष्यति मन्दधीः। अधैर्य्यमपि यो युङ्क्ते सदा मित्रं नरर्षभ।

अस्थाने क्रोधनोऽयुक्तो यश्चाकस्माद्विरुध्यते। सुहृदश्चैव कल्याणानाशु त्यजति किल्बिषी। ६२७५

अल्पेऽप्यपकृते मूढस्तथाज्ञानात्कृतेऽपि च। कार्य्यसेवी च मित्रेषु मित्रद्वेषी नराधिप।

शत्रुर्म्मित्रमुखो यश्च जिह्मप्रेक्षी विलोचनः। न विरज्यति कल्याणे यः कुर्य्यात्तादृशं नरं।

पानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा। परोपतापी मित्रध्रुक् तथा प्राणिवधे रतः।

कृतघ्नश्चाधमो लोके न सन्धेयः कदाचन। छिद्रान्वेषी ह्यसन्धेयः सन्धेयानपि मे शृणु।

कुलीना वाक्यसम्पन्ना ज्ञानविज्ञानकोविदाः। रूपवन्तो गुणोपेतास्तथाऽलुब्धा जितश्रमाः। ६२८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सन्निनाश्च कृतज्ञाश्च सर्व्वज्ञा लोभवर्ज्जिताः । माधुर्य्यगुणसम्पन्नाः सत्यसन्धा जितेन्द्रियाः ।
व्यायामशीलाः सततं कुलपुत्राः कुलोद्वहाः । दोषैर्विमुक्ताः प्रथितास्ते ग्राह्याः पार्थिवैर्नराः ।
यथाशक्तिसमाचाराः संप्रतुष्यन्ति हि प्रभो । नास्थाने क्रोधवन्तश्च न चाकस्माद्विरागिणः ।
विरक्ताश्च न दुष्यन्ति मनसाऽप्यर्थकोविदाः । आत्मानं पीडयित्वाऽपि सुहृत्कार्य्यपरायणाः ।
विरज्यन्ति न मित्रेभ्यो वासो रक्तमिवाविकं । क्रोधाच्च लोभमोहाभ्यां नानर्थे युवतीषु च । ६२८५
न दर्शयन्ति सुहृदो विश्वस्ता धर्म्मवत्सलाः । लोष्टकाञ्चनतुल्यार्थाः सुहृत्सु दृढबुद्धयः ।
ये चरन्त्यभिमानानि निसृष्टात्मविभूषणाः । संगृह्णन्तः परिजनं स्वाम्यर्थपरमाः सदा ।
ईदृशैः पुरुषश्रेष्ठैर्यः सन्धिं कुरुते नृपः । तस्य विस्तीर्य्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ।
शस्त्रनित्या जितक्रोधा बलवन्तो रणे सदा । जन्मशीलगुणोपेताः सन्धेयाः पुरुषोत्तमाः ।
ये च दोषसमायुक्ता नराः प्रोक्ता मयाऽनघ । तेषामप्यधमा राजन् कृतघ्ना मित्रघातकाः । ६२९०
त्यक्तव्यास्तु दुराचाराः सर्व्वेषामिति निश्चयः ।
॥ युधिष्ठिर उवाच ॥ विस्तरेणाथ सम्बन्धं श्रोतुमिच्छामि तत्त्वतः । मित्रद्रोही कृतघ्नश्च यः प्रोक्तस्तद्वदस्व मे ।
॥ भीष्म उवाच ॥ हन्त ते वर्त्तयिष्येऽहमितिहासं पुरातनं । उदीच्यां दिशि यद्वृत्तं म्लेच्छेषु मनुजाधिप ।
ब्राह्मणो मध्यदेशीयः कश्चिद्वै ब्रह्मवर्ज्जितं । ग्रामं वृद्धियुतं वीक्ष्य प्राविशद्भैक्षकाङ्क्षया ।
तत्र दस्युर्धनयुतः सर्व्ववर्णविशेषवित् । ब्रह्मण्यः सत्यसन्धश्च दाने च निरतोऽभवत् । ६२९५
तस्य क्षयमुपागम्य ततो भिक्षामयाचत । प्रतिश्रयञ्च वासार्थं भिक्षाञ्चैवाथ वार्षिकीं ।
प्रादात्तस्मै च विप्राय वस्त्रञ्च सदशं नवं । नारीञ्चापि वयोपेतां भर्त्रा विरहितां तथा ।
एतत् संप्राप्य हृष्टात्मा दस्योः सर्व्वं द्विजस्तथा । तस्मिन् गृहवरे राजंस्तया रेमे स गौतमः ।
कुटुम्बार्थञ्च दास्याश्च साहाय्यञ्चाप्यथाकरोत् । तत्रावसत् स वर्षांश्च समृद्धे शवरालये ।
वाणवेधे परं यत्नमकरोच्चैव गौतमः । चक्राङ्गान् स च नित्यं वै सर्व्वतो वनगोचरान् । ६३००
जघान गौतमो राजन् यथा दस्युगणास्तथा । हिंसापटुर्घृणाहीनः सदा प्राणिवधे रतः ।
गौतमः सन्निकर्षेण दस्युभिः समतामियात् । तथा तु वसतस्तस्य दस्युग्रामे सुखं तदा ।
अगमन् बहवो मासा निघ्नतः पक्षिणो बहून् । ततः कदाचिदपरो द्विजस्तं देशमागतः ।
जटाचीराजिनधरः स्वाध्यायपरमः शुचिः । विनीतो नियताहारो ब्राह्मणो वेदपारगः ।
स ब्रह्मचारी तद्देश्यः सखा तस्यैव सुप्रियः । तं दस्युग्राममगमद्यत्रासौ गौतमोऽवसत् । ६३०५
स तु विप्रगृहान्वेषी शूद्रान्नपरिवर्ज्जकः । ग्रामे दस्युसमाकीर्णे व्यचरत् सर्व्वतो दिशं ।
ततः स गौतमगृहं प्रविवेश द्विजोत्तमः । गौतमश्चापि संप्राप्तस्तावन्योन्येन सङ्गतौ ।
चक्राङ्गभारस्कन्धन्तं धनुष्पाणिं धृतायुधं । रुधिरेणावसिक्ताङ्गं गृहद्वारमुपागतं ।
तं दृष्ट्वा पुरुषादाभमपध्वस्तं क्षयागतं । अभिज्ञाय द्विजो व्रीडन्निदं वाक्यमथाब्रवीत् ।
किमिदं कुरुषे मोहाद्विप्रस्त्वं हि कुलोद्वहः । मध्यदेशपरिज्ञातो दस्युभावं गतः कथं । ६३१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पूर्व्वान् स्मर द्विज ज्ञातीन् प्रख्यातान् वेदपारगान्। तेषां वंशेऽभिजातस्त्वमीदृशः कुलपांसनः ।
अवबुध्यात्मनात्मानं सत्त्वं शीलं श्रुतं दमं । अनुक्रोशञ्च संस्मृत्य त्यज वासमिदं द्विज ।
एवमुक्तः स सुहृदा तेन तत्र हितैषिणा । प्रत्युवाच ततो राजन् विनिश्चित्य तदार्त्तवत् ।
निर्द्धनोऽस्मि द्विजश्रेष्ठ नापि वेदविदप्यहं । वित्तार्थमिह संप्राप्तं विद्धि मां द्विजसत्तम ।
त्वद्दर्शनात्तु विप्रेन्द्र कृतार्थोऽस्म्यद्य वै द्विज । आवां हि सह यास्यावः श्वो वसस्वाद्य शर्व्वरीं । ६११५
स तत्र न्यवसद्विप्रो घृणी किञ्चिदसंस्पृशन् । क्षुधितश्छन्द्यमानोऽपि भोजनं नाभ्यनन्दत ।
इति श्रीमहाभारते शान्तिपर्व्वण्यापद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने अष्टषष्ट्यधिकशततोऽध्यायः ॥ १६८ ॥
॥ भीष्म उवाच ॥ तस्यां निशायां व्युष्टायां गते तस्मिन् द्विजोत्तमे । निष्क्रम्य गौतमोऽगच्छत् समुद्रं प्रति भारत ।
सामुद्रिकान् स वणिजस्ततोऽपश्यत् स्थितान् पथि । स तेन सह सार्थेन प्रययौ सागरं प्रति ।
स तु सार्थो महाराजन् कस्मिंश्चिद्गिरिगह्वरे । मत्तेन द्विरदेनाथ निहतः प्रायशोऽभवत् ।
स कथञ्चिद्भयात्तस्माद्विमुक्तो ब्राह्मणस्तदा । कान्दिग्भूतो जीवितार्थी प्रदुद्रावोत्तरां दिशं । ६१२०
स तु सार्थपरिभ्रष्टस्तस्माद्देशात्तथा च्युतः । एकाकी व्यचरत्तत्र वने किम्पुरुषो यथा ।
स पन्थानमथासाद्य समुद्राभिसरं तदा । आससाद वनं रम्यं दिव्यं पुष्पितपादपं ।
सर्व्वर्त्तुकैराम्रवनैः पुष्पितैरुपशोभितं । नन्दनोद्देशसदृशं यक्षकिन्नरसेवितं ।
शालैस्तालैस्तमालैश्च कालागुरुवनैस्तथा । चन्दनस्य च मुख्यस्य पादपैरुपशोभितं ।
गिरिप्रस्थेषु रम्येषु तेषु तेषु सुगन्धिषु । समन्ततो द्विजश्रेष्ठास्तत्राकूजन्त वै तदा । ६१२५
मनुष्यवदनास्त्वन्ये भारुण्डा इति विश्रुताः । भूलिङ्गशकुनास्त्वन्ये सामुद्राः पर्व्वतोद्भवाः ।
स तान्यतिमनोज्ञानि विहङ्गानां रुतानि वै । शृण्वन् सुरमणीयानि विप्रोऽगच्छत गौतमः ।
ततोऽपश्यत् सुरम्येषु सुवर्णसिकताचिते । देशे समे सुखे चित्रे स्वर्गोद्देशसमे नृप ।
श्रिया जुष्टं महावृक्षं न्यग्रोधञ्च सुमण्डलं । शाखाभिरनुरूपाभिर्भूषितं छत्रसन्निभं ।
तस्य मूलञ्च संसिक्तं वरचन्दनवारिणा । दिव्यपुष्पान्वितं श्रीमत् पितामहसभोपमं । ६१३०
तं दृष्ट्वा गौतमः प्रीतो मनःकान्तमनुत्तमं । मेध्यं सुरगृहप्रख्यं पुष्पितैः पादपैर्वृतं ।
तमासाद्य मुदा युक्तस्तस्याधस्तादुपाविशत् । तत्रासीनस्य कौन्तेय गौतमस्य सुखः शिवः ।
पुष्पाणि समुपस्पृश्य प्रववावनिलः शुभः । ह्लादयन् सर्व्वगात्राणि गौतमस्य तदा नृप ।
स तु विप्रः प्रशान्तश्च स्पृष्टः पुण्येन वायुना । सुखमासाद्य सुष्वाप भास्करश्चास्तमभ्ययात् ।
ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते । आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः । ६१३५
नाडीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा । बकराजो महाप्राज्ञः काश्यपस्यात्मसम्भवः ।
राजधर्म्मेति विख्यातो बभूवाप्रतिमो भुवि । देवकन्यासुतः श्रीमान् विद्वान् देवसमप्रभः ।
मृष्टाभरणसम्पन्नो भूषणैरर्कसन्निभैः । भूषितः सर्व्वगात्रेषु देवगर्भः श्रिया ज्वलन् ।
तमागतं खगं दृष्ट्वा गौतमो विस्मितोऽभवत् । क्षुत्पिपासापरिश्रान्तो हिंसार्थी चाभ्यवैक्षत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ राजधर्म्मोवाच ॥ स्वागतं भवतो विप्र दिष्ट्या प्राप्तोऽसि मे गृहं । अस्तञ्च सविता यातः सन्ध्येयं समुपस्थिता । ६३४०
मम त्वं निलयं प्राप्तः प्रियातिथिरनिन्दितः । पूजितो यास्यसि प्रातर्व्विधिदृष्टेन कर्म्मणा ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने ऊनसप्तत्यधिकशततोऽध्यायः ॥ १६९ ॥
॥ भीष्म उवाच ॥ गिरं तां मधुरां श्रुत्वा गौतमो विस्मितस्तदा । कौतूहलान्वितो राजन्राजधर्म्माणमैक्षत ।
॥ राजधर्म्मोवाच ॥ भोः कश्यपस्य पुत्त्रोऽहं माता दाक्षायणी च मे । अतिथिस्त्वं गुणोपेतः स्वागतं ते द्विजोत्तम ।
॥ भीष्म उवाच ॥ तस्मै दत्त्वा स सत्कारं विधिदृष्टेन कर्म्मणा । शालपुष्पमयीं दिव्यां वृषीं वै समकल्पयत् ।
भगीरथरथाक्रान्तदेशान् गङ्गानिषेवितान् । ये चरन्ति महामीनास्तांश्च तस्यान्वकल्पयत् । ६३४५
वह्निञ्चापि सुसन्दीप्तं मीनांश्चापि सुपीवरान् । स गौतमायातिथये न्यवेदयत काश्यपिः ।
भुक्तवन्तञ्च तं विप्रं प्रीतात्मानं महातपाः । क्लमापनयनार्थं स पक्षाभ्यामभ्यवीजयत् ।
ततो विश्रान्तमासीनं गोत्रप्रश्नमपृच्छत । सोऽब्रवीद्गौतमोऽस्मीति ब्रह्म नान्यमुदाहरत् ।
तस्मै पर्णमयं दिव्यं दिव्यपुष्पाधिवासितं । गन्धाढ्यं शयनं प्रादात् स शिश्ये तत्र वै सुखं ।
अथोपविष्टं शयने गौतमं धर्म्मराट् तदा । पप्रच्छ काश्यपो वाग्मी किमागमनकारणं । ६३५०
ततोऽब्रवीद्गौतमस्तं दरिद्रोऽहं महामते । समुद्रगमनाकाङ्क्षी द्रव्यार्थमिति भारत ।
तं काश्यपोऽब्रवीत् प्रीतो नोत्कण्ठां कर्त्तुमर्हसि । कृतकार्य्यो द्विजश्रेष्ठ सद्रव्यो यास्यसे गृहान् ।
चतुर्व्विधा ह्यर्थसिद्धिर्व्वृहस्पतिमतं यथा । पारम्पर्य्यं तथा दैवं काम्यं मैत्रमिति प्रभो ।
प्रादुर्भूतोऽस्मि ते मित्रं सुहृत्त्वञ्च मम त्वयि । सोऽहं तथा यतिष्यामि भविष्यसि यथाऽर्थवान् ।
ततः प्रभातसमये सुखं दृष्ट्वाऽब्रवीदिदं । गच्छ सौम्य पथाऽनेन कृतकृत्यो भविष्यसि । ६३५५
इतस्त्रियोजनं गत्वा राक्षसाधिपतिर्म्महान् । विरूपाक्ष इति ख्यातः सखा मम महाबलः ।
तं गच्छ द्विजमुख्य त्वं स मद्वाक्यप्रचोदितः । कामानभीप्सितांस्तुभ्यं दाता नास्त्यत्र संशयः ।
इत्युक्तः स ययौ राजन् गौतमो विगतक्लमः । फलान्यमृतकल्पानि भक्षयन् स यथेष्टतः ।
चन्दनागुरुमुख्यानि त्वक्पत्राणां वनानि च । तस्मिन् पथि महाराज सेवमानो द्रुतं ययौ ।
ततो मेरुव्रजं नाम नगरं शैलतोरणं । शैलप्राकारवप्रञ्च शैलयन्त्राकुलं तथा । ६३६०
विदितश्चाभवत्तस्य राक्षसेन्द्रस्य धीमतः । प्रहितः सुहृदा राजन् प्रीयमाणः प्रियातिथिः ।
ततः स राक्षसेन्द्रः स्वान् प्रेष्यानाह युधिष्ठिर । गौतमो नगरद्वाराच्छीघ्रमानीयतामिति ।
ततः पुरवरात्तस्मात् पुरुषाः श्येनचेष्टनाः । गौतमेत्यभिभाषन्तः पुरद्वारमुपागमन् ।
ते तमूचुर्म्महाराज राजप्रेष्यास्तदा द्विजं । तरस्व तूर्णमागच्छ राजा त्वां द्रष्टुमिच्छति ।
राक्षसाधिपतिर्व्वीरो विरूपाक्ष इति श्रुतः । स त्वां त्वरति वै द्रष्टुं तत् क्षिप्रं संविधीयतां । ६३६५
ततः स प्राद्रवद्विप्रो विस्मयाद्विगतक्लमः । गौतमः परमर्द्धिं तां पश्यन् परमविस्मितः ।
तैरेव सहितो राज्ञो वेश्म तूर्णमुपाद्रवत् । दर्शनं राक्षसेन्द्रस्य काङ्क्षमाणो द्विजस्तदा ।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने सप्तत्यधिकशततोऽध्यायः ॥ १७० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ ततः स विदितो राज्ञः प्रविश्य गृहमुत्तमं। पूजितो राक्षसेन्द्रेण निषसादासनोत्तमे।
पृष्टश्च गोत्रचरणं स्वाध्यायब्रह्मचारिकं। न तत्र व्याजहारान्यद्गोत्रमात्रादृते द्विजः।
ब्रह्मवर्चसहीनस्य स्वाध्यायोपरतस्य च। गोत्रमात्रविदो राजा निवासं समपृच्छत। ६३७०
॥ राक्षस उवाच ॥ क्व ते निवासः कल्याण किंगोत्रा ब्राह्मणी च ते। तत्त्वं ब्रूहि न भीः कार्य्या विश्वसस्व यथासुखं।
॥ गौतम उवाच ॥ मध्यदेशप्रसूतोऽहं वासो मे शवरालये। शूद्रा पुनर्भूर्भार्य्या मे सत्यमेतद्ब्रवीमि ते।
॥ भीष्म उवाच ॥ ततो राजा विममृशे कथं कार्य्यमिदं भवेत्। कथं वा सुकृतं मे स्यादिति बुद्ध्याऽन्वचिन्तयत्।
अयं वै जन्मना विप्रः सुहृत्तस्य महात्मनः। सम्प्रेषितश्च तेनायं काश्यपेन ममान्तिकं।
तस्य प्रियं करिष्यामि स हि मामाश्रितः सदा। भ्राता मे बान्धवश्चासौ सखा च हृदयङ्गमः। ६३७५
कार्त्तिक्यामद्य भोक्तारः सहस्रं मे द्विजोत्तमाः। तत्रायमपि भोक्ता च देयमस्मै च मे धनं।
स चाद्य दिवसः पुण्यो अतिथिश्चायमागतः। सङ्कल्पितञ्चैव धनं किं विचार्य्यमतः परं।
ततः सहस्रं विप्राणां विदुषां समलङ्कृतं। स्नातानामनुसंप्राप्तं सुमहत्क्षौमवाससां।
तानागतान् द्विजश्रेष्ठान् विरूपाक्षो विशाम्पते। यथार्हं प्रतिजग्राह विधिदृष्टेन कर्म्मणा।
वृष्यस्तेषान्तु संन्यस्ता राक्षसेन्द्रस्य शासनात्। भूमौ वरकुशास्तीर्णाः प्रेष्यैर्भरतसत्तम। ६३८०
तासु ते पूजिता राज्ञा निषण्णा द्विजसत्तमाः। तिलदर्भोदकेनाथ अर्च्चिता विधिवद्द्विजाः।
विश्वेदेवाः सपितरः साग्नयश्चोपकल्पिताः। विलिप्ताः पुष्पवन्तश्च सुप्रचाराः सुपूजिताः।
व्यराजन्त महाराज नक्षत्रपतयो यथा। ततो जाम्बूनदीः पात्रीर्वज्राङ्का विमलाः शुभाः।
वरान्नपूर्णा विप्रेभ्यः प्रादान्मधुघृतप्लुताः। तस्य नित्यं सदाषाढ्यां माघ्याञ्च बहवो द्विजाः।
ईप्सितं भोजनवरं लभन्ते सत्कृतं सदा। विशेषतस्तु कार्त्तिक्यां द्विजेभ्यः संप्रयच्छति। ६३८५
शरद्व्यपाये रत्नानि पौर्णमास्यामिति श्रुतिः। सुवर्णं रजतञ्चैव मणीनथ च मौक्तिकान्।
वज्रान् महाधनांश्चैव वैदूर्य्याजिनराङ्कवान्। रत्नराशीन् विनिक्षिप्य दक्षिणार्थे स भारत।
ततः प्राह द्विजश्रेष्ठान् विरूपाक्षो महाबलः। गृह्णीत रत्नान्येतानि यथोत्साहं यथेष्टतः।
येषु येषु च भाण्डेषु भुक्तं वो द्विजसत्तमाः। तान्येवादाय गच्छध्वं स्ववेश्मानीति भारत।
इत्युक्तवचने तस्मिन् राक्षसेन्द्रे महात्मनि। यथेष्टं तानि रत्नानि जगृहुर्ब्राह्मणर्षभाः। ६३९०
ततो महार्हास्ते सर्व्वे रत्नैरभ्यर्च्चिताः शुभैः। ब्राह्मणा मृष्टवसनाः सुप्रीताः स्म ततोऽभवन्।
ततस्तान् राक्षसेन्द्रश्च द्विजानाह पुनर्व्वचः। नानादेशगतान्राजन् राक्षसान् प्रतिसिध्य वै।
अद्यैकं दिवसं विप्रा न वोऽस्तीह भयं क्वचित्। राक्षसेभ्यः प्रमोदध्वमिष्टतो यात मा चिरं।
ततः प्रदुद्रुवुः सर्व्वे विप्रसंघाः समन्ततः। गौतमोऽपि सुवर्णस्य भारमादाय सत्वरः।
कृच्छ्रात् समुद्वहन् भारं न्यग्रोधं समुपागमत्। न्यषीदच्च परिश्रान्तः क्लान्तश्च क्षुधितश्च सः। ६३९५
ततस्तमभ्यगाद्राजन् राजधर्म्मा खगोत्तमः। स्वागतेनाभिनन्दंश्च गौतमं मित्रवत्सलः।
तस्य पक्षाग्रविक्षेपैः क्लमं व्यपनयत् खगः। पूजाञ्चाप्यकरोद्धीमान् भोजनञ्चाप्यकल्पयत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स भुक्तवान् सुविश्रान्तो गौतमोऽचिन्तयत्तदा । हाटकस्याभिरूपस्य भारोऽयं सुमहान्मया ।
गृहीतो लोभमोहाभ्यां दूरञ्च गमनं मम । न चास्ति पथि भोक्तव्यं प्राणसन्धारणं मम ।
किं कृत्वा धारयेयं वै प्राणानित्यभ्यचिन्तयत् । ततः स पथि भोक्तव्यं प्रेक्षमाणो न किञ्चन । ६४००
कृतघ्नः पुरुषव्याघ्र मनसेदमचिन्तयत् । अयं बकपतिः पार्श्वे मांसराशिः स्थितो महान् ।
इमं हत्वा गृहीत्वा च यास्येऽहं समभिद्रुतं ।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने एकसप्तत्यधिकशतोऽध्यायः ॥ १७१ ॥

॥ भीष्म उवाच ॥ अथ तत्र महार्च्चिष्माननलो वातसारथिः । तस्याविदूरे रक्षार्थं खगेन्द्रेण कृतोऽभवत् ।
स चापि पार्श्वे सुष्वाप विश्वस्तो बकराट् तदा । कृतघ्नस्तु स दुष्टात्मा तं जिघांसुरथाग्रतः ।
ततो ऽलातेन दीप्तेन विश्वस्तं विजघान तं । निहत्य च मुदा युक्तः सोऽनुबन्धं न दृष्टवान् । ६४०५
स तं विपक्षरोमाणं कृत्वाऽग्नावपचत्तदा । तं गृहीत्वा सुवर्णञ्च ययौ द्रुततरं द्विजः ।
ततो ऽन्यस्मिन् गते चाह्नि विरूपाक्षोऽब्रवीत् सुतं । न प्रेक्षे राजधर्म्माणमद्य पुत्र खगोत्तमं ।
स पूर्व्वसन्ध्यां ब्रह्माणं वन्दितुं याति सर्व्वदा । मां वा दृष्ट्वा कदाचित् स न गच्छति गृहं खगः ।
उभे द्विरात्रं सन्ध्ये वै नाभ्यगात् स ममालयं । तस्मान्न शुद्ध्यते भावो मम स ज्ञायतां सुहृत् ।
स्वाध्यायेन वियुक्तो हि ब्रह्मवर्च्चसवर्ज्जितः । तद्गतस्तत्र मे शङ्का हन्यात्तं स द्विजाधमः । ६४१०
दुराचारस्तु दुर्ब्बुद्धिरिङ्गितैर्लक्षितो मया । निष्कृपो दारुणाकारो दुष्टो दस्युरिवाधमः ।
गौतमः स गतस्तत्र तेनोद्विग्नं मनो मम । पुत्र शीघ्रमितो गत्वा राजधर्म्मनिवेशनं ।
ज्ञायतां स विशुद्धात्मा यदि जीवति मा चिरं । स एवमुक्तस्त्वरितो रक्षोभिः सहितो ययौ ।
न्यग्रोधं तत्र चापश्यत् कङ्कालं राजधर्म्मणः । स रुदन्नगमत् पुत्रो राक्षसेन्द्रस्य धीमतः ।
त्वरमाणः परं शक्त्या गौतमग्रहणाय वै । ततो विदूरे जगृहुर्गौतमं राक्षसास्तदा । ६४१५
राजधर्म्मशरीरञ्च पक्षास्थिचरणोज्झितं । तमादायाथ रक्षांसि द्रुतं मेरुव्रजं ययुः ।
राज्ञश्च दर्शयामासुः शरीरं राजधर्म्मणः । कृतघ्नं पुरुषं तञ्च गौतमं पापकारिणं ।
रुरोद राजा तं दृष्ट्वा सामात्यः सपुरोहितः । आर्त्तनादश्च सुमहानभूत्तस्य निवेशने ।
सस्त्रीकुमारञ्च पुरं बभूवास्वस्थमानसं । अथाब्रवीन्नृपः पुत्रं पापोऽयं बध्यतामिति ।
अस्य मांसैरिमे सर्व्वे विहरन्तु यथेष्टतः । पापाचारः पापकर्म्मा पापात्मा पापसाधनः । ६४२०
हन्तव्योऽयं मम मतिर्भवद्भिरिति राक्षसाः । इत्युक्ता राक्षसेन्द्रेण राक्षसा घोरविक्रमाः ।
नैच्छन्त तं भक्षयितुं पापकर्म्माणमित्युत । दस्यूनां दीयतामेष साध्वद्य पुरुषाधमः ।
इत्यूचुस्ते महाराज राक्षसेन्द्रं निशाचराः । शिरोभिः प्रणताः सर्व्वे व्याहरन्राक्षसाधिपं ।
न दातुमर्हसि त्वं नो भक्षणायास्य किल्विषं । एवमस्त्विति तानाह राक्षसेन्द्रो निशाचरान् ।
दस्यूनां दीयतामेष कृतघ्नो ऽद्यैव राक्षसाः । इत्युक्ता राक्षसास्तेन शूलपट्टिशपाणयः । ६४२५
कृत्वा तं खण्डशः पापं दस्युभ्यः प्रददुस्तदा । दस्यवश्चापि नैच्छन्त तमत्तुं पापकारिणं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रव्यादा अपि राजेन्द्र कृतघ्नं नोपभुञ्जते। ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा।
निष्कृतिर्व्विहिता राजन् कृतघ्ने नास्ति निष्कृतिः। मित्रद्रोही कृतघ्नश्च नृशंसश्च नराधमः।
क्रव्यादैः कृमिभिश्चान्यैर्न भुज्यन्ते हि तादृशाः।

इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने द्वासप्तत्यधिकशततोऽध्यायः॥ १७२॥

॥ भीष्म उवाच॥ ततश्चितां बकपतेः कारयामास राक्षसः। रत्नैर्गन्धैश्च बहुभिर्व्वस्त्रैश्च समलंकृतां। ६४३०
ततः प्रज्वाल्य नृपतिर्ब्बकराजं प्रतापवान्। प्रेतकार्य्यञ्च विधिवद्राक्षसेन्द्रश्चकार ह।
तस्मिन् कालेऽपि सुरभिर्देवी दाक्षायणी शुभा। उपरिष्टात्ततस्तस्य सा बभूव पयस्विनी।
तस्या वक्त्राच्च्युतः फेणः क्षीरमिश्रस्तदाऽनघ। सोऽपतद्वै ततस्तस्यां चितायां राजधर्म्मणः।
ततः सञ्जीवितस्तेन बकराजस्तदाऽनघ। उत्पत्य च समीयाय विरूपाक्षं बकाधिपः।
ततोऽभ्ययाद्देवराजो विरूपाक्षपुरं तदा। प्राह चेदं विरूपाक्षं दिष्ट्या सञ्जीवितस्त्वया। ६४३५
श्रावयामास चेन्द्रस्तं विरूपाक्षं पुरातनं। यथा शापः पुरा दत्तो ब्रह्मणा राजधर्म्मणः।
यदा बकपतीराजन् ब्रह्माणं नोपसर्पति। ततो रोषादिदं प्राह खगेन्द्राय पितामहः।
यस्मान्मूढो मम सभां नागतोऽसौ बकाधमः। तस्माद्वधं स दुष्टात्मा न चिरात् समवाप्स्यति।
तदयं तस्य वचनान्निहतो गौतमेन वै। तेनैवामृतसिक्तश्च पुनः सञ्जीवितो बकः।
राजधर्म्मा बकः प्राह प्रणिपत्य पुरन्दरं। यदि तेऽनुग्रहकृता मयि बुद्धिः सुरेश्वर। ६४४०
सखायं मे सुदयितं गौतमं जीवयेत्पुनः। तस्य वाक्यं समादाय वासवः पुरुषर्षभ।
सिक्त्वाऽमृतेन तं विप्रं गौतमं जीवयत्तदा। स भाण्डोपस्करं राजंस्तमासाद्य बकाधिपः।
सम्परिष्वज्य सुहृदं प्रीत्या परमया युतः। अथ तं पापकर्म्माणं राजधर्म्मा बकाधिपः।
विसर्ज्जयित्वा सधनं प्रविवेश स्वमालयं। यथोचितञ्च स बको ययौ ब्रह्मसदस्तथा।
ब्रह्मा चैनं महात्मानमातिथ्येनाभ्यपूजयत्। गौतमश्चापि सम्प्राप्य पुनस्तं शवरालयं। ६४४५
शूद्रायां जनयामास पुत्त्रान्दुष्कृतकारिणः। शापश्च सुमहांस्तस्य दत्तः सुरगणैस्तदा।
कुक्षौ पुनर्भ्वाः पापोऽयं जनयित्वा चिरात् सुतान्। निरयं प्राप्स्यति महत् कृतघ्नोऽयमिति प्रभो।
एतत् प्राह पुरा सर्व्वं नारदो मम भारत। संस्मृत्य चापि सुमहदाख्यानं भरतर्षभ।
मयाऽपि भवते सर्व्वं यथावदनुवर्णितं। कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखं।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः। मित्रद्रोहो न कर्त्तव्यः पुरुषेण विशेषतः। ६४५०
मित्रध्रुक् नरकं घोरमनन्तं प्रतिपद्यते। कृतज्ञेन सदा भाव्यं मित्रकामेन चैव ह।
मित्राच्च लभते सर्व्वं मित्रात् पूजां लभेत च। मित्राद्भोगांश्च भुञ्जीत मित्रेणापत्सु मुच्यते।
सत्कारैरुत्तमैर्मित्रं पूजयेत विचक्षणः। परित्याज्यो बुधैः पापः कृतघ्नो निरपत्रपः।
मित्रद्रोही कुलाङ्गारः पापकर्म्मा नराधमः। एष धर्मभृतां श्रेष्ठ प्रोक्तः पापो मया तव।
मित्रद्रोही कृतघ्नो वै किं भूयः श्रोतुमिच्छसि। ६४५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तदा वाक्यं भीष्मेणोक्तं महात्मना। युधिष्ठिरः प्रीतमना बभूव जनमेजय।
इति श्रीमहाभारते शान्तिपर्व्वणि आपद्धर्म्मपर्व्वणि कृतघ्नोपाख्याने त्रिसप्तत्यधिकशततोऽध्यायः॥ १७३॥ समाप्तञ्चेदं आपद्धर्म्मपर्व्व॥

॥ अथ मोक्षधर्म्मपर्व्व॥

॥ युधिष्ठिर उवाच॥ धर्म्माः पितामहेनोक्ता राजधर्म्माश्रिताः शुभाः। धर्म्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि पार्थिव।
॥ भीष्म उवाच॥ सर्व्वत्र विहितो धर्म्मः सत्यप्रेत्य तपःफलं। बहुद्वारस्य धर्म्मस्य नेहास्ति विफला क्रिया।
यस्मिन् यस्मिंस्तु विषये यो यो याति विनिश्चयं। स तमेवाभिजानाति नान्यं भरतसत्तम।
यथा यथा च पर्य्येति लोकतन्त्रमसारवत्। तथा तथा विरागोऽत्र जायते नात्र संशयः। ६४६०
एवं व्यवसिते लोके बहुदोषे युधिष्ठिर। आत्ममोक्षनिमित्तं वै यतेत मतिमान्नरः।
॥ युधिष्ठिर उवाच॥ नष्टे धने वा दारे वा पुत्रे पितरि वा मृते। यया बुद्ध्या नुदेच्छोकं तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ नष्टे धने वा दारे वा पुत्रे पितरि वा मृते। अहो दुःखमिति ध्यायन् शोकस्यापचितिं चरेत्।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। यथा सेनजितं विप्रः कश्चिदेत्याब्रवीत् सुहृत्।
पुत्रशोकाभिसन्तप्तं राजानं शोकविक्लवं। विषसमनसं दृष्ट्वा विप्रो वचनमब्रवीत्। ६४६५
किन्नु खल्वसि मूढस्त्वं शोच्यः किमनुशोचसि। यदा त्वामपि शोचन्तः शोच्या यास्यन्ति तां गतिं।
त्वञ्चैवाहञ्च ये चान्ये त्वामुपासन्ति पार्थिव। सर्व्वे तत्र गमिष्यामो यत एवागता वयं।
॥ सेनजिदुवाच॥ का बुद्धिः किं तपो विप्र कः समाधिस्तपोधन। किं ज्ञानं किं श्रुतञ्चैव यत् प्राप्य न विषीदसि।
॥ ब्राह्मण उवाच॥ पश्य भूतानि दुःखेन व्यतिषक्तानि सर्व्वशः। उत्तमाधममध्यानि तेषु तेष्विह कर्म्मसु।
आत्माऽपि चायं न मम सर्व्वा वा पृथिवी मम। यथा मम तथाऽन्येषामिति चिन्त्य न मे व्यथा। ६४७०
एतां बुद्धिमहं प्राप्य न प्रहृष्ये न च व्यथे। यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः। एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा।
तेषां स्नेहो न कर्त्तव्यो विप्रयोगो ध्रुवो हि तैः। अदर्शनादापतितः पुनश्चादर्शनं गतः।
न त्वाऽसौ वेद न त्वं तं कः सन् किमनुशोचसि। तृष्णार्त्तिप्रभवं दुःखं दुःखार्त्तिप्रभवं सुखं।
सुखात् सञ्जायते दुःखं दुःखमेवं पुनः पुनः। सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखं। ६४७५
सुखदुःखे मनुष्याणां चक्रवत् परिवर्त्ततः। सुखात्त्वं दुःखमापन्नः पुनरापत्स्यसे सुखं।
न नित्यं लभते दुःखं न नित्यं लभते सुखं। शरीरमेवायतनं दुःखस्य च सुखस्य च।
शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरं। यद्यच्छरीरेण करोति कर्म्म तेनैव देही समुपाश्नुते तत्।
जीवितञ्च शरीरेण जात्यैव सह जायते। उभे सह विवर्त्तेते उभे सह विनश्यतः।
स्नेहपाशैर्ब्बहुविधैराविष्टविषया जनाः। अकृतार्थाश्च सीदन्ते जले सैकतसेतवः। ६४८०
स्नेहेन तिलवत् सर्व्वं सर्गचक्रे निपीड्यते। तिलपीडैरिवाक्रम्य क्लेशैरज्ञानसम्भवैः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation Gurgaon

सञ्चिनोत्यशुभं कर्म्म कलत्रापेक्षया नरः । एकः क्लेशानवाप्नोति परत्रेह च मानवः ।
पुत्त्रदारकुटुम्बेषु प्रसक्ताः सर्व्वमानवाः । शोकपङ्कार्णवे मग्ना जीर्णा वनगजा इव ।
पुत्त्रनाशे वित्तनाशे ज्ञातिसम्बन्धिनामपि । प्राप्यते सुमहद्दुःखं दावाग्निप्रतिमं विभो ।
दैवायत्तमिदं सर्व्वं सुखदुःखे भवाभवौ । असुहृत् ससुहृच्चापि सशत्रुर्म्मित्रवानपि । ६४८८
सप्रज्ञः प्रज्ञया हीनो दैवेन लभते सुखं । नालं सुखाय सुहृदो नालं दुःखाय शत्रवः ।
न च प्रज्ञाऽलमर्थानां न सुखानामलं धनं । न बुद्धिर्द्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्य्यायवृत्तान्तं प्राज्ञो जानाति नेतरः । बुद्धिमन्तञ्च शूरञ्च मूढं भीरुं जडं कविं ।
दुर्ब्बलं बलवन्तञ्च भागिनं भजते सुखं । धेनुर्व्वत्सस्य गोपस्य स्वामिनस्तस्करस्य च ।
पयः पिबति यस्तस्य धेनुस्तस्येति निश्चयः । ये च मूढतमा लोके ये च बुद्धेः परं गताः । ६४९०
ते नराः सुखमेधन्ते क्लिश्यत्यन्तरितो जनः । अन्त्येषु रेमिरे धीरा न ते मध्येषु रेमिरे ।
अन्त्यप्राप्तिं सुखम्प्राहुर्द्दुःखमन्तरमन्त्ययोः । ये च बुद्धिसुखं प्राप्ता द्वन्द्वातीता विमत्सराः ।
तान्नैवार्था न चानर्था व्यथयन्ति कदाचन । अथ ये बुद्धिमप्राप्ता व्यतिक्रान्ताश्च मूढतां ।
तेऽतिवेलं प्रहृष्यन्ति सन्तापमुपयान्ति च । नित्यं प्रमुदिता मूढा दिवि देवगणा इव ।
अवलेपन महता परिभूत्या विचेतसः । सुखं दुःखान्तमालस्यं दुःखं दाक्ष्यं सुखोदयं । ६४९५
भूतिस्त्वेवं श्रिया सार्द्धं दक्षे वसति नालसे । सुखं वा यदि वा दुःखं प्रियं वा यदि वाऽप्रियं ।
प्राप्तं प्राप्तमुपासीत हृदयेनापराजितः । शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितं । बुद्धिमन्तं कृतप्रज्ञं शुश्रूषुमनसूयकं ।
दान्तं जितेन्द्रियं चापि शोको न स्पृशते नरं । एतां बुद्धिं समास्थाय गुप्तचित्तश्चरेद्बुधः ।
उदयास्तमयज्ञं हि न शोकः स्प्रष्टुमर्हति । यन्निमित्तं भवेच्छोकस्तापो वा दुःखमेव च । ६५००
आयासो वा यतो मूलमेकाङ्गमपि तत्त्यजेत् । किञ्चिदेव ममत्वेन यदा भवति कल्पितं ।
तदेव परितापार्थं सर्व्वं सम्पद्यते तदा । यद्यत्त्यजति कामानान्तत् सुखस्याभिपूर्य्यते ।
कामानुसारी पुरुषः कामाननु विनश्यति । यच्च कामसुखं लोके यच्च दिव्यं महत् सुखं ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां । पूर्व्वदेहकृतं कर्म्म शुभं वा यदि वाऽशुभं ।
प्राज्ञं मूढं तथा शूरं भजते यादृशं कृतं । एवमेव किलैतानि प्रियाण्येवाप्रियाणि च । ६५०५
जीवेषु परिवर्त्तन्ते दुःखानि च सुखानि च । एतां बुद्धिं समास्थाय सुखमास्ते गुणान्वितः ।
सर्व्वान् कामान् जुगुप्सेत क्रोधं कुर्व्वीत पृष्ठतः । वृत्त एष हृदि प्रौढो मृत्युरेष मनोभवः ।
क्रोधो नाम शरीरस्थो देहिनां प्रोच्यते बुधैः । यदा संहरते कामान् कूर्म्मोऽङ्गानीव सर्व्वशः ।
तदात्मज्योतिरात्माऽयमात्मन्येव प्रपश्यति । न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा । उभे सत्यानृते त्यक्त्वा शोकानन्दौ भयाभये । ६५१०
प्रियाप्रिये परित्यज्य प्रशान्तात्मा भविष्यति । यदा न कुरुते भावं सर्व्वभूतेषु पापकं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा। या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतः।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखं। अत्र पिङ्गलया गीता गाथाः श्रूयन्ति पार्थिव।
यथा सा कृच्छ्रकालेऽपि लेभे धर्म्मं सनातनं। संकेते पिङ्गला वेश्या कान्तेनासीद्विनाकृता।
अथ कृच्छ्रगता शान्तां बुद्धिमास्थापयत्तदा। ६५१५
॥ पिङ्गलोवाच॥ उन्मत्ताहमनुन्मत्तं कान्तमन्ववसं चिरं। अन्तिके रमणं सन्तं नैनमध्यगमं पुरा।
एकस्थूणं नवद्वारमपि धास्याम्यगारकं। का हि कान्तमिहायान्तमयं कान्तेति मंस्यते।
अकामां कामरूपेण धूर्त्ता नरकरूपिणः। न पुनर्वञ्चयिष्यन्ति प्रतिबुद्धाऽस्मि जागृमि।
अनर्थो हि भवेदर्थो दैवात् पूर्व्वकृतेन वा। संबुद्धाऽहं निराकारा नाहमद्याजितेन्द्रिया।
सुखं निराशः स्वपिति नैराश्यं परमं सुखं। आशामनाशां कृत्वा हि सुखं स्वपिति पिङ्गला। ६५२०
॥ भीष्म उवाच॥ एतैश्चान्यैश्च विप्रस्य हेतुमद्भिः प्रभाषितैः। पर्य्यवस्थापितो राजा सेनजिन्मुमुदे सुखी।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पिङ्गलागीतायां चतुःसप्तत्यधिकशतोऽध्यायः॥ १७४ ॥
॥ युधिष्ठिर उवाच॥ अतिक्रामति कालेऽस्मिन् सर्व्वभूतक्षयावहे। किं श्रेयः प्रतिपद्येत तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। पितुः पुत्त्रेण संवादं तन्निबोध युधिष्ठिर।
द्विजातेः कस्यचित् पार्थ स्वाध्यायनिरतस्य वै। बभूव पुत्त्रो मेधावी मेधावी नाम नामतः।
सोऽब्रवीत् पितरं पुत्त्रः स्वाध्यायकरणे रतं। मोक्षधर्म्मार्थकुशलो लोकतत्त्वविचक्षणः। ६५२५
॥ पुत्त्र उवाच॥ धीरः किंस्वित्तात कुर्य्यात् प्रजानन् क्षिप्रं ह्यायुर्भ्रश्यते मानवानां। पितस्तदाचक्ष्व यथार्थयोगं ममानुपूर्व्व्या येन धर्म्मं चरेयं।
॥ पितोवाच॥ वेदानधीत्य ब्रह्मचर्य्येण पुत्त्र पुत्त्रानिच्छेत् पावनार्थं पितॄणां। अग्नीनाधाय विधिवच्चेष्टयज्ञो वनं प्रविश्याथ मुनिर्बुभूषेत्।
॥ पुत्त्र उवाच॥ एवमभ्याहते लोके समन्तात् परिवारिते। अमोघासु पतन्तीषु किं धीर इव भाषसे।
॥ पितोवाच॥ कथमभ्याहतो लोकः केन वा परिवारितः। अमोघाः काः पतन्तीह किं नु भीषयसीव मां।
॥ पुत्त्र उवाच॥ मृत्युनाऽभ्याहतो लोको जरया परिवारितः। अहोरात्राः पतन्त्येते ननु कस्मान्न बुध्यसे। ६५३०
अमोघा रात्रयश्चापि नित्यमायान्ति यान्ति च। यदाऽहमेतज्जानामि न मृत्युस्तिष्ठतीति ह।
सोऽहं कथं प्रतीक्षिष्ये ज्ञानेनापिहितश्चरन्। रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा।
तदैव वन्ध्यं दिवसमिति विद्याद्विचक्षणः। गाधोदके मत्स्य इव सुखं विन्देत कस्तदा।
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवं। पुष्पाणीव विचिन्वन्तमन्यत्र गतमानसं।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति। अद्यैव कुरु यच्छ्रेयो मा त्वां कालोऽत्यगादयं। ६५३५
अकृतेष्वेव कार्य्येषु मृत्युर्वै संप्रकर्षति। श्वः कार्य्यमद्य कुर्व्वीत पूर्व्वाह्णे चापराह्णिकं।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतं। को हि जानाति कस्याद्य मृत्युकालो भविष्यति।
युवैव धर्म्मशीलः स्यादनित्यं खलु जीवितं। कृते धर्म्मे भवेत् कीर्त्तिरिह प्रेत्य च वै सुखं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

मोहेन हि समाविष्टः पुत्त्रदारार्थमुद्यतः। कृत्वा कार्य्यमकार्य्यं वा पुष्टमेषां प्रयच्छति।
तं पुत्त्रपशुसम्पन्नं व्यासक्तमनसं नरं। सुप्तं व्याघ्रो मृगमिव मृत्युरादाय गच्छति।
सञ्चिन्वानकमेवैकं कामानामवितृप्तकं। व्याघ्रः पशुमिवादाय मृत्युरादाय गच्छति।
इदं कृतमिदं कार्य्यमिदमन्यत्कृताकृतं। एवमीहासुखासक्तं कृतान्तः कुरुते वशे।
कृतानां फलमप्राप्तं कर्म्मणां कर्म्मसंज्ञितं। क्षेत्रापणगृहासक्तं मृत्युरादाय गच्छति।
दुर्ब्बलं बलवन्तञ्च शूरं भीरुं जडं कविं। अप्राप्तं सर्व्वकामार्थान्मृत्युरादाय गच्छति।
मृत्युर्जरा च व्याधिश्च दुःखञ्चानेककारणं। अनुषक्तं यदा देहे किं स्वस्थ इव तिष्ठसि।
जातमेवान्तकोऽन्ताय जरा चान्वेति देहिनं। अनुषक्ता द्वयेनैते भावाः स्थावरजङ्गमाः।
मृत्योर्व्वा मुखमेतद्वै या ग्रामे वसतो रतिः। देवानामेष वै गोष्ठो यदरण्यमिति श्रुतिः।
निबन्धिनी रज्जुरेषा या ग्रामे वसतो रतिः। छित्त्वैतां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः।
न हिंसयति यः प्राणान्मनोवाक्कायहेतुभिः। जीवितार्थापनयनैः कर्म्मभिर्न स बध्यते।
न मृत्युसेनामायान्तीं जातु कश्चित्प्रबाधते। ऋते सत्यमसत्याद्धं सत्ये ह्यमृतमाश्रितं।
तस्मात्सत्यव्रताचारः सत्ययोगपरायणः। सत्यागमः सदा दान्तः सत्येनैवान्तकं जयेत्।
अमृतञ्चैव मृत्युश्च द्वयं देहे प्रतिष्ठितं। मृत्युरापद्यते मोहात्सत्येनापद्यतेऽमृतं।
सोऽहं ह्यहिंस्रः सत्यार्थी कामक्रोधवहिष्कृतः। समदुःखसुखः क्षेमी मृत्युं हास्याम्यमर्त्त्यवत्।
शान्तियज्ञरतो दान्तो ब्रह्मयज्ञे स्थितो मुनिः। वाङ्मनःकर्म्मयज्ञश्च भविष्याम्युदगायने।
पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति। अन्तवद्भिरिव प्राज्ञः क्षेत्रयज्ञैः पिशाचवत्।
यस्य वाङ्मनसी स्यातां सम्यक् प्रणिहिते सदा। तपस्त्यागश्च सत्यञ्च स वै परमवाप्नुयात्।
नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः। नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं।
आत्मन्येवात्मना जात आत्मनिष्ठोऽप्रजोऽपि वा। आत्मन्येव भविष्यामि न मां तारयति प्रजा।
नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। शीलं स्थितिर्दण्डनिधानमार्ज्जवं ततस्ततश्चोपरमः क्रियाभ्यः।
किन्ते धनैर्ब्बान्धवैर्व्वाऽपि किन्ते किन्ते दारैर्ब्राह्मण यो मरिष्यसि। आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च।
॥ भीष्म उवाच ॥ पुत्त्रस्यैतद्वचः श्रुत्वा यथाऽकार्षीत् पिता नृप। तथा त्वमपि वर्त्तस्व सत्यधर्म्मपरायणः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पितापुत्त्रसंवादे पञ्चसप्तत्यधिकशतोऽध्यायः ॥ १७५ ॥
॥ युधिष्ठिर उवाच ॥ धनिनोऽथाधना ये च वर्त्तयन्ते स्वतन्त्रिणः। सुखदुःखागमस्तेषां कः कथं वा पितामह।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। शम्पाकेनेह मुक्तेन गीतं शान्तिगतेन च।
अब्रवीन्मां पुरा कश्चिद्ब्राह्मणस्त्यागमाश्रितः। क्लिश्यमानः कुदारेण कुचैलेन बुभुक्षया।
उत्पन्नमिह लोके वै जन्मप्रभृति मानवं। विविधान्युपवर्त्तन्ते दुःखानि च सुखानि च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तयोरेकतरे मार्गे यद्येनमभिसंनयेत् । न सुखं प्राप्य संहृष्येन्नासुखं प्राप्य संज्वरेत् ।
न वै चरसि यच्छ्रेय आत्मनो वा यदीशिषे । अकामात्माऽपि हि सदा धुरमुद्यम्य चैव ह ।
अकिञ्चनः परिपतन् सुखमास्वादयिष्यसि । अकिञ्चनः सुखं शेते समुत्तिष्ठति चैव ह ।
आकिञ्चन्यं सुखं लोके पथ्यं शिवमनामयं । अनमित्रपथो ह्येष दुर्लभः सुलभो मतः ।
अकिञ्चनस्य शुद्धस्य उपपन्नस्य सर्व्वतः । अवेक्षमाणस्त्रीँल्लोकान्न तुल्यमिह लक्षये ।
आकिञ्चन्यञ्च राज्यञ्च तुलया समतोलयं । अत्यरिच्यत दारिद्र्यं राज्यादपि गुणाधिकं ।
आकिञ्चन्ये च राज्ये च विशेषः सुमहानयं । नित्योद्विग्नो हि धनवान्मृत्योरास्यगतो यथा ।
नैवास्याग्निर्न चारिष्टो न मृत्युर्न च दस्यवः । प्रभवन्ति धनत्यागाद्विमुक्तस्य निराशिषः ।
तं वै सदा कामचरमनुपस्तीर्णशायिनं । बाहूपधानं शाम्यन्तं प्रशंसन्ति दिवौकसः ।
धनवान् क्रोधलोभाभ्यामाविष्टो नष्टचेतनः । तिर्य्यगीक्षः शुष्कमुखः पापको भ्रुकुटीमुखः ।
निर्दशन्नधरोष्ठञ्च क्रुद्धो दारुणभाषिता । कस्तमिच्छेत् परिद्रष्टुं दातुमिच्छति चेन्महीं ।
श्रिया ह्यभीक्ष्णं संवासो मोहयत्यविचक्षणं । स तस्य चित्तं हरति शारदाभ्रमिवानिलः ।
अथैनं रूपमानश्च धनमानश्च विन्दति । अभिजातोऽस्मि शुद्धोऽस्मि नास्मि केवलमानुषः ।
इत्येभिः कारणैस्तस्य त्रिभिश्चित्तं प्रमाद्यति । संप्रसक्तमना भोगान् विसृज्य पितृसञ्चितान् ।
परिक्षीणः परस्वानामादानं साधु मन्यते । तमतिक्रान्तमर्य्यादमाददानं ततस्ततः ।
प्रतिषेधन्ति राजानो लुब्धा मृगमिवेषुभिः । एवमेतानि दुःखानि तानि तानीह मानवं ।
विविधान्युपपद्यन्ते गात्रसंस्पर्शजान्यपि । तेषां परमदुःखानां बुद्ध्या भैषज्यमाचरेत् ।
लोकधर्म्ममवज्ञाय ध्रुवाणामध्रुवैः सह । नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परं ।
नात्यक्त्वा चाभयः शेते त्यक्त्वा सर्व्वं सुखी भव । इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितं ।
शम्पाकेन पुरा मह्यं तस्मात्त्यागः परो मतः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शम्पाकगीतायां षट्सप्तत्यधिकशतोऽध्यायः ॥ १७६ ॥
॥ युधिष्ठिर उवाच ॥ ईहमानः समारम्भान् यदि नासादयेद्धनं । धनतृष्णाभिभूतस्य किं कुर्व्वन् सुखमाप्नुयात् ।
॥ भीष्म उवाच ॥ सर्व्वसाम्यमनायासः सत्यवाक्यञ्च भारत । निर्व्वेदश्च विधित्सा च यस्य स्यात् स सुखी नरः ।
एतान्येव पदान्याहुः पञ्च वृद्धाः प्रशान्तये । एष स्वर्गश्च धर्म्मश्च सुखञ्चानुत्तमं मतं ।
अत्राप्युदाहरन्तीममितिहासं पुरातनं । निर्व्वेदान्मङ्किना गीतं तन्निबोध युधिष्ठिर ।
ईहमानो धनं मङ्किर्भग्नेहश्च पुनः पुनः । केनचिद्धनशेषेण क्रीतवान्दम्यगोयुगं ।
सुसम्बद्धौ तु तौ दम्यौ दमनायाभिनिःसृतौ । आसीनमुष्ट्रं मध्येन सहसैवाभ्यधावतां ।
तयोः संप्राप्तयोरुष्ट्रः स्कन्धदेशममर्षणः । उत्थायोत्क्षिप्य तौ दम्यौ प्रससार महाजवः ।
ह्रियमाणौ तु तौ दम्यौ तेनोष्ट्रेण प्रमाथिना । म्रियमाणौ च संप्रेक्ष्य मङ्किस्तत्राब्रवीदिदं ।
न चैवाविहितं शक्यं दक्षेणापीहितं धनं । युक्तेन श्रद्धया सम्यगीहां समनुतिष्ठता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ईहतस्य पूर्व्वं नानार्थैर्युक्तस्याप्यनुतिष्ठतः । इमं पश्यत सङ्गत्या मम दैवमुपप्लवं ।
उद्दम्योद्दम्य मे दम्यौ विषमेणैव गच्छतः । उत्क्षिप्य काकतालीयमुत्पथेनैव धावतः ।
मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम । शुद्धं हि दैवमेवेदं हठेनैवास्ति पौरुषं ।
यदि वाप्युपपद्येत पौरुषं नाम कर्हिचित् । अन्वेष्यमाणं तदपि दैवमेवावतिष्ठते ।
तस्मान्निर्व्वेद एवेह गन्तव्यः सुखमिच्छता । सुखं स्वपिति निर्व्विणो निराशश्चार्थसाधने ।
अहो सम्यक् शुकेनोक्तं सर्व्वतः परिमुच्यता । प्रतिष्ठता महारण्यं जनकस्य निवेशनात् ।
यः कामानाप्नुयात् सर्व्वान् यश्चैतान् केवलांस्त्यजेत् । प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते ।
नान्तं सर्व्वविधित्सानां गतपूर्व्वोऽस्ति कश्चन । शरीरे जीविते चैव तृष्णा मन्दस्य वर्द्धते ।
निवर्त्तस्व विधित्साभ्यः शाम्य निर्व्विद्य कामुक । असकृच्चासि निकृतो न च निर्व्विद्यसे ततः ।
यदि नाहं विनाश्यस्ते यद्येवं रमसे मया । मा मां योजय लोभेन वृथा त्वं वित्तकामुक ।
सञ्चितं सञ्चितं द्रव्यं नष्टं तव पुनः पुनः । कदाचिन्मोक्ष्यसे मूढ धनेहां धनकामुक ।
अहो नु मम बालिश्यं योऽहं क्रीडनकस्तव । किं नैव जातु पुरुषः परेषां प्रेष्यतामियात् ।
न पूर्व्वे नापरे जातु कामानामन्तमाप्नुवन् । त्यक्त्वा सर्व्वसमारम्भान् प्रतिबुद्धोऽस्मि जागर्मि ।
नूनं ते हृदयं काम वज्रसारमयं दृढं । यदनर्थशताविष्टं शतधा न विदीर्य्यते ।
जानामि काम त्वां चैव यच्च किञ्चित् प्रियं तव । तवाहं प्रियमन्विच्छन्नात्मन्युपलभे सुखं ।
काम जानामि ते मूलं सङ्कल्पात् किल जायसे । न त्वां सङ्कल्पयिष्यामि समूलो न भविष्यसि ।
ईहा धनस्य न सुखा लब्धे चिन्ता च भूयसी । लब्धनाशो यथा मृत्युर्लब्धं भवति वा न वा ।
परेभ्यो यो न लभते ततो दुःखतरं नु किं । न च तुष्यति लब्धेन भूय एव च मार्गति ।
अनुतर्षुल एवार्थः स्वादु गाङ्गमिवोदकं । मद्विलापनमेतत्तु प्रतिबुद्धोऽस्मि सन्त्यज ।
य इमं मामकं देहं भूतग्रामं समाश्रितः । स यात्वितो यथाकामं वसतां वा यथासुखं ।
न युष्मास्विह मे प्रीतिः कामलोभानुसारिषु । तस्मादुत्सृज्य कामान् वै सत्यमेवाश्रयाम्यहं ।
सर्व्वभूतान्यहं देहे पश्यन् मनसि चात्मनः । योगे बुद्धिं श्रुते सत्यं मनो ब्रह्मणि धारयन् ।
विहरिष्याम्यनासक्तः सुखी लोकान्निरामयः । यथा मां त्वं पुनर्नैवं दुःखेषु प्रणिधास्यसि ।
त्वया हि मे प्रणुन्नस्य गतिरन्या न विद्यते । तृष्णाशोकश्रमाणां हि त्वं कामप्रभवः सदा ।
धननाशेऽधिकं दुःखं मन्ये सर्व्वमहत्तरं । ज्ञातयो ह्यवमन्यन्ते मित्राणि च धनाच्च्युतं ।
अवज्ञानसहस्रैस्तु दोषाः कष्टतरा धने । धने सुखकला या तु साऽपि दुःखे विधीयते ।
धनमस्येति पुरुषं पुरो निघ्नन्ति दस्यवः । क्लिश्यन्ति विविधैर्द्दण्डैर्नित्यमुद्वेजयन्ति च ।
अर्थलोलुपता दुःखमिति बुद्धं चिरान्मया । यद्यदालम्बसे कामं तत्तदेवानुरुध्यसे ।
अतत्त्वज्ञोऽसि बालश्च दुस्तोषोऽपूरणोऽनलः । नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभं ।
पाताल इव दुष्पूरो मां दुःखैर्य्योक्तुमिच्छसि । नाहमद्य समाविष्टुं शक्यः काम पुनस्त्वया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निर्व्वेदमहमासाद्य द्रव्यनाशाद्यदृच्छया। निवृत्तिं परमां प्राप्य नाद्य कामान् विचिन्तये। ६६२५
अतिक्लेशान् सहामीह नाहं बुध्याम्यबुद्धिमान्। निकृतो धननाशेन शये सर्व्वाङ्गविज्वरः।
परित्यजामि काम त्वां हित्वा सर्व्वमनोगतीः। न त्वं मया पुनः काम वत्स्यसे न च रंस्यसे।
क्षमिष्ये क्षिपमाणानां न हिंसिष्ये विहिंसितः। द्वेष्ययुक्तः प्रियं वक्ष्याम्यनादृत्य तदप्रियं।
तृप्तः स्वस्थेन्द्रियो नित्यं यथालब्धेन वर्त्तयन्। न ते कामं करिष्यामि त्वामहं शत्रुमात्मनः।
निर्व्वेदं निर्वृतिं तृप्तिं शान्तिं सत्यं दमं क्षमां। सर्व्वभूतदयाञ्चैव विद्धि मां समुपागतं। ६६३०
तस्मात् कामश्च लोभश्च तृष्णा कार्पण्यमेव च। त्यजन्तु मां प्रतिष्ठन्तं सत्त्वस्थो ह्यस्मि साम्प्रतं।
प्रहाय काम लोभञ्च सुखं प्राप्तोऽस्मि साम्प्रतं। नाद्य लोभवशं प्राप्तो दुःखं प्राप्स्याम्यनात्मवान्।
यद्यत्त्यजति कामानां तत् सुखस्याभिपूर्य्यते। कामस्य वशगो नित्यं दुःखमेव प्रपद्यते।
कामानुबन्धं नुदते यत्किञ्चित् पुरुषो रजः। कामक्रोधोद्भवं दुःखमह्रीररतिरेव च।
एष ब्रह्मप्रतिष्ठोऽहं ग्रीष्मे शीतमिव ह्रदं। शाम्यामि परिनिर्व्वामि सुखं मामेति केवलं। ६६३५
यच्च कामसुखं लोके यच्च दिव्यं महत् सुखं। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां।
आत्मना सप्तमं कामं हत्वा शत्रुमिवोत्तमं। प्राप्यावध्यं ब्रह्मपुरं राजेव स्यामहं सुखी।
एतां बुद्धिं समास्थाय मङ्किर्निर्व्वेदमागतः। सर्व्वान् कामान् परित्यज्य प्राप्य ब्रह्म महत्सुखं।
इत्यनाशकृते मङ्किरमृतत्वं किलाभवत्। अच्छिनत् काममूलं स तेन प्राप महत्सुखं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मङ्किगीतायां सप्तसप्तत्यधिकशततोऽध्यायः॥ १७७ ॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। गीतं विदेहराजेन जनकेन प्रशाम्यता। ६६४०
अनन्तं वत मे वित्तं यस्य मे नास्ति किञ्चन। मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन।
अत्रैवोदाहरन्तीमं बोध्यस्य पदसञ्चयं। निर्व्वेदं प्रतिविन्यस्तं तं निबोध युधिष्ठिर।
बोध्यं शान्तमृषिं राजा नाहुषः पर्य्यपृच्छत। निर्व्वेदाच्छान्तिमापन्नं शास्त्रप्रज्ञानतर्पितं।
उपदेशं महाप्राज्ञ शमस्योपदिशस्व मे। कां बुद्धिं समनुध्याय शान्तश्चरसि निर्व्वृतः।
॥ बोध्य उवाच ॥ उपदेशेन वर्त्तामि नानुशास्मीह कञ्चन। लक्षणं तस्य वक्ष्येऽहं तत्स्वयं परिमृश्यतां। ६६४५
पिङ्गला कुररः सर्पः सारङ्गान्वेषणं वने। इषुकारः कुमारी च षडेते गुरवो मम।
॥ भीष्म उवाच॥ आशा बलवती राजन्नैराश्यं परमं सुखं। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला।
सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः सुखमेधते।
गृहारम्भो हि दुःखाय न सुखाय कदाचन। सर्पः परकृतं वेश्म प्रविश्य सुखमेधते।
सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिं समाश्रिताः। अद्रोहेणैव भूतानां सारङ्गा इव पक्षिणः। ६६५०
इषुकारो नरः कश्चिदिषावासक्तमानसः। समीपेनापि गच्छन्तं राजानं नावबुद्धवान्।
बहूनां कलहो नित्यं द्वयोः सङ्कथनं ध्रुवं। एकाकी विचरिष्यामि कुमारीशङ्खको यथा।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि बोध्यगीतायां अष्टसप्तत्यधिकशततोऽध्यायः॥ १७८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच॥ केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीं । किञ्च कुर्व्वन्नरो लोके प्राप्नोति गतिमुत्तमां ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । प्रह्लादस्य च सम्वादं मुनेराजगरस्य च ।
चरन्तं ब्राह्मणं कञ्चित् कल्यचित्तमनामयं । पप्रच्छ राजा प्रह्लादो बुद्धिमान् बुद्धिसम्मतं । ६६८५
॥ प्रह्लाद उवाच ॥ स्वस्थः शक्तो मृदुर्दान्तो निर्व्विधित्सोऽनसूयकः । सुवाक् प्रगल्भो मेधावी प्राज्ञश्चरसि बालवत् ।
नैव प्रार्थयसे लाभं नालाभेष्वनुशोचसि । नित्यतृप्त इव ब्रह्मन किञ्चिदवमन्यसे ।
स्रोतसा ह्रियमाणासु प्रजासु विमना इव । धर्म्मकामार्थकार्य्येषु कूटस्थ इव लक्ष्यसे ।
नानुतिष्ठसि धर्म्मार्थौ न कामे चापि वर्त्तसे । इन्द्रियार्थाननादृत्य मुक्तश्चरसि साक्षिवत् ।
का नु प्रज्ञा श्रुतं वा किं वृत्तिर्व्वा का नु ते मुने । क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्यसे । ६६९०
॥ भीष्म उवाच ॥ अनुयुक्तः स मेधावी लोकधर्म्मविधानवित् । उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया ।
पश्य प्रह्लाद भूतानामुत्पत्तिमनिमित्ततः । ह्रासं वृद्धिं विनाशञ्च न प्रहृष्ये न च व्यथे ।
स्वभावादेव संदृश्य वर्त्तमानाः प्रवृत्तयः । स्वभावनिरताः सर्व्वाः परितुष्ये न केनचित् ।
पश्य प्रह्लाद संयोगान् विप्रयोगपरायणान् । सञ्चयांश्च विनाशान्तान्न क्वचिद्विदधे मनः
अन्तवन्ति च भूतानि गुणयुक्तानि पश्यतः । उत्पत्तिनिधनज्ञस्य किं कार्य्यमवशिष्यते । ६६९५
जलजानामपि ह्यन्तं पर्य्यायेणोपलक्षये । महतामपि कायानां सूक्ष्माणाञ्च महोदधौ ।
जङ्गमस्थावराणाञ्च भूतानामसुराधिप । पार्थिवानामपि व्यक्तं मृत्युं पश्यामि सर्व्वशः ।
अन्तरिक्षचराणाञ्च दानवोत्तमपक्षिणां । उत्तिष्ठते यथाकालं मृत्युर्बलवतामपि ।
दिविसञ्चरमाणानि ह्रस्वानि च महान्ति च । ज्योतींष्यपि यथाकालं पतमानानि लक्षये ।
इति भूतानि सम्पश्यन्ननुषक्तानि मन्युना । सर्व्वसामान्यगो विद्वान् कृतकृत्यः सुखं स्वपे । ६७००
सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया । शये पुनरभुञ्जानो दिवसानि बहून्यपि ।
आशयन्त्यपि मामन्नं पुनर्ब्बहुगुणं बहु । पुनरल्पं पुनस्तोकं पुनर्नैवोपपद्यते ।
कणं कदाचित्खादामि पिण्याकमपि च ग्रसे । भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् पुनः ।
शये कदाचित् पर्य्यङ्के भूमावपि पुनः शये । प्रासादे वाऽपि मे शय्या कदाचिदुपपद्यते ।
धारयामि च चीराणि शाणक्षौमाजिनानि च । महार्हाणि च वासांसि धारयाम्यहमेकदा । ६७०५
न सन्निपतितं धर्म्यमुपभोगं यदृच्छया । प्रत्याचक्षे न चाप्येनमनुरुन्ध्ये सुदुर्लभं ।
अचलमनिधनं शिवं विशोकं शुचिमतुलं विदुषां मते प्रविष्टं । अनभिमतमसेवितं विमूढैर्व्रतमिदमाजगरं शुचि
श्चरामि ।
अचलितमतिरच्युतः स्वधर्मात् परिमितसंसरणः परावरज्ञः । विगतभयकषायलोभमोहो व्रतमिदमाजगरं शुचिश्चरामि ।
अनियतफलभक्ष्यभोज्यपेयं विधिपरिणामविभक्तदेशकालं । हृदयसुखमसेवितं कदर्य्यैर्व्रतमिदमाजगरं शुचिश्चरामि ।
इदमिदमिति तृष्णयाऽभिभूतं जनमनवाप्तधनं विषीदमानं । निपुणमनुनिशम्य तत्त्वबुद्ध्या व्रतमिदमाजगरं शुचि
श्चरामि । ६७१०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बहुविधमनुदृश्य चार्थहेतोः कृपणमिहार्य्यमनार्य्यमाश्रयन्तं । उपशमरुचिरात्मवान् प्रशान्तो व्रतमिदमाजगरं शुचिश्चरामि ।

सुखमसुखमलाभमर्थलाभं रतिमरतिं मरणञ्च जीवितञ्च । विधिनियतमवेक्ष्य तत्त्वतोऽहं व्रतमिदमाजगरं शुचिश्च
रामि ।

अपगतभयरागमोहदर्पो धृतिमतिबुद्धिसमन्वितः प्रशान्तः । उपगतफलभोगिनो निशम्य व्रतमिदमाजगरं शुचिश्चरामि ।

अनियतशयनाशनः प्रकृत्या दमनियमव्रतशौचसत्ययुक्तः । अपगतफलसञ्चयः प्रहृष्टो व्रतमिदमाजगरं शुचिश्च
रामि ।

अपगतमसुखार्थमीहनार्थैरुपगतबुद्धिरवेक्ष्य चात्मसंस्थं । तृषितमनियतं मनो नियन्तुं व्रतमिदमाजगरं शुचिश्चरामि । ६६८५

न हृदयमनुरुध्य वाङ्मनो वा प्रियसुखदुर्लभतामनित्यताञ्च । तदुभयमुपलक्षयन्निवाहं व्रतमिदमाजगरं शुचिश्च
रामि ।

बहुकथितमिदं हि बुद्धिमद्भिः कविभिरभिप्रथयद्भिरात्मकीर्त्तिं । इदमिदमिति तत्र तत्र तत्तत्स्वपरमतैर्गहनं प्रत
र्कयद्भिः ।

तदहमनुनिशम्य विप्रपातं पृथगभिपन्नमिहाबुधैर्मनुष्यैः । अनवसितमनन्तदोषपारं नृषु विचरामि विनीतदोषतृष्णः ।

॥ भीष्म उवाच ॥ अजगरचरितव्रतं महात्मा य इह नरोऽनुचरेद्विनीतरागः । अपगतभयलोभमोहमन्युः स खलु सुखी
विचरेदिमं विहारं ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि प्रह्लादाजगरसंवादे ऊनाशीत्यधिकशततोऽध्यायः ॥ १७९ ॥

॥ युधिष्ठिर उवाच ॥ बान्धवाः कर्म्म वित्तं वा प्रज्ञा चेह पितामह । नरस्य का प्रतिष्ठा स्यादेतत् पृष्टो वदस्व मे । ६६९०

॥ भीष्म उवाच ॥ प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञा लाभः परो मतः । प्रज्ञा निःश्रेयसी लोके प्रज्ञा स्वर्गो मतः सतां ।

प्रज्ञया प्रापितार्थो हि बलिरैश्वर्य्यसङ्क्षये । प्रह्लादो नमुचिर्मङ्किस्तस्याः किं विद्यते परं ।

अत्राप्युदाहरन्तीममितिहासं पुरातनं । इन्द्रकाश्यपसंवादं तन्निबोध युधिष्ठिर ॥

वैश्यः कश्चिदृषिसुतं काश्यपं संशितव्रतं । रथेन पातयामास श्रीमान् दृप्तस्तपस्विनं ।

आर्त्तः स पतितः क्रुद्धस्त्यक्त्वात्मानमथाब्रवीत् । मरिष्याम्यधनस्येह जीवितार्थो न विद्यते । ६६९५

तथा मुमूर्षुमासीनमकूजन्तमचेतसं । इन्द्रः शृगालरूपेण बभाषे क्षुब्धमानसं ।

मनुष्ययोनिमिच्छन्ति सर्व्वभूतानि सर्व्वशः । मनुष्यत्वे च विप्रत्वं सर्व्व एवाभिनन्दति ।

मनुष्यो ब्राह्मणश्चासि श्रोत्रियश्चासि काश्यप । सुदुर्लभमवाप्यैतन्न दोषान्मर्त्तुमर्हसि ।

सर्व्वे लाभाः साभिमाना इति सत्या च ते श्रुतिः । सन्तोषणीयरूपोऽसि लोभाद्यदभिमन्यसे ।

अहो सिद्धार्थता तेषां येषां सन्तीह पाणयः । अतीव स्पृहये तेषां येषां सन्तीह पाणयः । ६७००

पाणिमद्भ्यः स्पृहाऽस्माकं यथा तव धनस्य वै । न पाणिलाभादधिको लाभः कश्चन विद्यते ।

अपाणित्वादयं ब्रह्मन् कण्टकं नोद्धरामहे । जन्तूनुच्चावचानङ्गे दशतो न कषाम वा ।

अथ येषां पुनः पाणी देवदत्तौ दशाङ्गुली । उद्धरन्ति कृमीनङ्गाद्दशतो निकषन्ति च ।

वर्षाहिमातपानाञ्च परित्राणानि कुर्व्वते । चैलमन्नं सुखं शय्यां निवातञ्चोपभुञ्जते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अधिष्ठाय च गां लोके भुञ्जते वाहयन्ति च । उपायैर्बहुभिश्चैव वश्यानात्मनि कुर्व्वते । ६७०५
ये खल्वजिह्वाः कृपणा अल्पप्राणा अपाणयः । सहन्ते तानि दुःखानि दिष्ट्या त्वं न तथा मुने ।
दिष्ट्या त्वं न शृगालो वै न कृमिर्न च मूषिकः । न सर्पो न च मण्डूको न चान्यः पापयोनिजः ।
एतावताऽपि लाभेन तोष्टुमर्हसि काश्यप । किं पुनर्योऽसि सत्त्वानां सर्व्वेषां ब्राह्मणोत्तमः ।
इमे मां कृमयोऽदन्ति येषामुद्धरणाय वै । नास्ति शक्तिरपाणित्वात् पश्यावस्थामिमां मम ।
अकार्य्यमिति चैवेमं नात्मानं सन्त्यजाम्यहं । नातः पापीयसीं योनिं पतेयमपरामिति । ६७१०
मध्ये वै पापयोनीनां शार्गालीयामहं गतः । पापीयस्यो बहुतरा इतोऽन्याः पापयोनयः ।
जात्यैवैके सुखितराः सन्त्यन्ये भृशदुःखिताः । नैकान्तं सुखमेवेह क्वचित् पश्यामि कस्यचित् ।
मनुष्या ह्याढ्यतां प्राप्य राज्यमिच्छन्त्यनन्तरं । राज्याद्देवत्वमिच्छन्ति देवत्वादिन्द्रतामपि ।
भवेस्त्वं यद्यपि त्वाढ्यो न राजा न च दैवतं । देवत्वं प्राप्य चेन्द्रत्वं नैव तुष्येस्तथा सति ।
न तृप्तिः प्रियलाभेऽस्ति तृष्णा नाद्भिः प्रशाम्यति । संप्रज्वलति सा भूयः समिद्भिरिव पावकः । ६७१५
अस्त्येव त्वयि शोकोऽपि हर्षश्चापि तथा त्वयि । सुखदुःखे तथा चोभे तत्र का परिदेवना ।
परिच्छिद्यैव कामानां सर्व्वेषाञ्चैव कर्म्मणां । मूलं बुद्धीन्द्रियग्रामं शकुन्तानिव पञ्जरे ।
न द्वितीयस्य शिरसश्छेदनं विद्यते क्वचित् । न च पाणेस्तृतीयस्य यन्नास्ति न ततो भयं ।
न खल्वप्यरसज्ञस्य कामः क्वचन जायते । संस्पर्शाद्दर्शनाद्वापि श्रवणाद्वाऽपि जायते ।
न त्वं स्मरसि वारुण्या लट्वाकानाञ्च पक्षिणां । ताभ्याञ्चाभ्यधिको भक्ष्यो न कश्चिद्विद्यते क्वचित् । ६७२०
यानि चान्यानि भूतेषु भक्ष्यजातानि काश्यप । येषामभुक्तपूर्व्वन्ते तेषामस्मृतिरेव च ।
अप्राशनमसंस्पर्शमसन्दर्शनमेव च । पुरुषस्यैव नियमो मन्ये श्रेयो न संशयः ।
पाणिमन्तो बलवन्तो धनवन्तो न संशयः । मनुष्या मानुषैरेव दासत्वमुपपादिताः ।
वधबन्धपरिक्लेशैः क्लिश्यन्ते च पुनः पुनः । ते खल्वपि रमन्ते च मोदन्ते च हसन्ति च ।
अपरे बाहुबलिनः कृतविद्या मनस्विनः । जुगुप्सितां सुकृपणां पापवृत्तिमुपासते । ६७२५
उत्सहन्ते च ते वृत्तिमन्यामप्युपसेवितुं । स्वकर्म्मणा तु नियतं भवितव्यन्तु तत्तथा ।
न पुक्कशो न चाण्डाल आत्मानं त्यक्तुमिच्छति । तया तुष्टः स्वया योन्या मायां पश्यस्व यादृशीं ।
दृष्ट्वा कुणीन् पक्षहतान् मनुष्यानामयाविनः । सुसंपूर्णः स्वया योन्या लब्धलाभोऽसि काश्यप ।
यदि ब्राह्मण देहस्ते निरातङ्को निरामयः । अङ्गानि च समग्राणि न च लोकेषु धिक्कृतः ।
न केनचित् प्रवादेन सत्येनैवापहारिणा । धर्म्मायोत्तिष्ठ विप्रर्षे नात्मानं त्यक्तुमर्हसि । ६७३०
यदि ब्रह्मन् शृणोष्येतच्छ्रद्दधासि च मे वचः । वेदोक्तस्यैव धर्म्मस्य फलं मुख्यमवाप्स्यसि ।
स्वाध्यायमग्निसंस्कारमप्रमत्तोऽनुपालय । सत्यं दमञ्च दानञ्च स्पर्द्धिष्ठा मा च केनचित् ।
ये केचन स्वाध्ययनाः प्राप्ता यजनयाजनं । कथन्ते वाऽनुशोचेयुर्ध्यायेयुर्वाऽप्यशोभनं ।
इच्छन्तस्ते विहाराय सुखं महदवाप्नुयुः । उत जाताः सुनक्षत्रे सुतिथौ सुमुहूर्त्तजाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यज्ञदानप्रजेहायां यतन्ते शक्तिपूर्व्वकं। नचत्रेष्वासुरेष्वन्ये दुस्तिथौ दुर्म्मुहूर्त्तजाः। ६०३५
सम्पतन्त्यासुरीं योनिं यज्ञप्रसववर्ज्जिताः। अहमासं पण्डितको हैतुको वेदनिन्दकः।
आन्वीक्षिकीन्तर्कविद्यामनुरक्तो निरर्थिकां। हेतुवादान् प्रवदिता वक्ता संसत्सु हेतुमत्।
आक्रोष्टा चातिवक्ता च ब्रह्मवाक्येषु वै द्विजान्। नास्तिकः सर्व्वशङ्की च मूर्खः पण्डितमानिकः।
तस्येयं फलनिर्वृत्तिः शृगालत्वं मम द्विज। अपि जातु तया तस्मादहोरात्रशतैरपि।
यदहं मानुषीं योनिं शृगालः प्राप्नुयां पुनः। सन्तुष्टश्चाप्रमत्तश्च यज्ञदानतपोरतः। ६०४०
ज्ञेयज्ञाता भवेयं वै वर्ज्यवर्ज्जयिता तथा। ततः स मुनिरुत्थाय काश्यपस्तमुवाच ह।
अहो वतासि कुशलो बुद्धिमांश्चेति विस्मितः। समवैक्षत तं विप्रो ज्ञानदीर्घेण चक्षुषा।
ददर्श चैनं देवानान्देवमिन्द्रं शचीपतिं। ततः संपूजयामास काश्यपो हरिवाहनं।
अनुज्ञातस्तु तेनाथ प्रविवेश स्वमालयं।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शृगालकाश्यपसंवादे अशीत्यधिकशतोऽध्यायः॥ १८० ॥

॥ युधिष्ठिर उवाच ॥ यद्यस्ति दत्तमिष्टं वा तपस्तप्तं तथैव च। गुरूणां वाऽपि शुश्रूषा तन्मे ब्रूहि पितामह। ६०४५
॥ भीष्म उवाच ॥ आत्मनाऽनर्थयुक्तेन पापे निविशते मनः। स्वकर्म्मकलुषं कृत्वा कृच्छ्रे लोके विधीयते।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयं। मृतेभ्यः प्रमृतं यान्ति दरिद्राः पापकारिणः।
उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात्सुखं। श्रद्दधानाश्च दान्ताश्च धनाढ्याः शुभकारिणः।
व्यालकुञ्जरदुर्गेषु सर्पचौरभयेषु च। हस्तावापेन गच्छन्ति नास्तिकाः किमतः परं।
प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः। क्षेम्यमात्मवतां मार्गमास्थिता हस्तदक्षिणं। ६०५०
पुलाका इव धान्येषु पुत्तिका इव पक्षिषु। तद्विधास्ते मनुष्याणां येषां धर्म्मो न कारणं।
सुशीघ्रमभिधावन्तं विधानमनुधावति। शेते सह शयानेन येन येन यथा कृतं।
उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति। करोति कुर्व्वतः कर्म्म छायेवानुविधीयते।
येन येन यथा यद्यत्पुरा कर्म्म समीहितं। तत्तदेव नरो भुङ्क्ते नित्यं विहितमात्मना।
स्वकर्म्मफलनिक्षेपं विधानपरिरक्षितं। भूतग्राममिमं कालः समन्तात्परिकर्षति। ६०५५
अचोद्यमानानि यथा पुष्पाणि च फलानि च। स्वं कालं नातिवर्त्तन्ते तथा कर्म्म पुराकृतं।
संमानश्चावमानश्च लाभालाभौ क्षयोदयौ। प्रवृत्तानि निवर्त्तन्ते विधानान्ते पुनः पुनः।
आत्मना विहितं दुःखमात्मना विहितं सुखं। गर्भशय्यामुपादाय भुज्यते पौर्व्वदेहिकं।
बालो युवा च वृद्धश्च यत्करोति शुभाशुभं। तस्यां तस्यामवस्थायां तत्फलं प्रतिपद्यते।
यथा धेनुसहस्रेषु वत्सो विन्दति मातरं। तथा पूर्व्वकृतं कर्म्म कर्त्तारमनुगच्छति। ६०६०
समुन्नमग्रतो वस्त्रं पश्चाच्छुध्यति कर्म्मणा। उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकं।
दीर्घकालेन तपसा सेवितेन तपोवने। धर्म्मनिर्द्धूतपापानां संपद्यन्ते मनोरथाः।
शकुनानामिवाकाशे मत्स्यानामिव चोदके। पदं यथा न दृश्येत तथा ज्ञानविदां गतिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jatgaon

अलमन्यैरुपालम्भैः कीर्त्तितैश्च व्यतिक्रमैः। पेशलं चानुरूपञ्च कर्त्तव्यं हितमात्मनः।

॥ इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

॥ युधिष्ठिर उवाच ॥ कुतः सृष्टमिदं विश्वं जगत् स्थावरजङ्गमं। प्रलये च कमभ्येति तन्मे ब्रूहि पितामह।

ससागरः सगगनः सशैलः सबलाहकः। सभूमिः साग्निपवनो लोकोऽयं केन निर्म्मितः।

कथं सृष्टानि भूतानि कथं वर्णविभक्तयः। शौचाशौचं कथं तेषां धर्म्माधर्म्मविधिः कथं।

कीदृशो जीवतां जीवः क्व वा गच्छन्ति ये मृताः। अस्माल्लोकादमुं लोकं सर्व्वं शंसतु नो भवान्।

॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। भृगुणाऽभिहितं शास्त्रं भरद्वाजाय पृच्छते।

कैलासशिखरे दृष्ट्वा दीप्यमानं महौजसं। भृगुं महर्षिमासीनं भरद्वाजोऽन्वपृच्छत।

ससागरः सगगनः सशैलः सबलाहकः। सभूमिः साग्निपवनो लोकोऽयं केन निर्म्मितः।

कथं सृष्टानि भूतानि कथं वर्णविभक्तयः। शौचाशौचं कथं तेषां धर्म्माधर्म्मविधिः कथं।

कीदृशो जीवतां जीवः क्व वा गच्छन्ति ये मृताः। परलोकमिमञ्चापि सर्व्वं शंसितुमर्हसि।

एवं स भगवान् पृष्टो भरद्वाजेन संशयं। ब्रह्मर्षिर्ब्रह्मसङ्काशः सर्व्वं तस्मै ततोऽब्रवीत्।

॥ भृगुरुवाच ॥ मानसो नाम यः पूर्व्वो विश्रुतो वै महर्षिभिः। अनादिनिधनो देवस्तथाऽभेद्योऽजरामरः।

अव्यक्त इति विख्यातः शाश्वतोऽथाक्षयोऽव्ययः। यतः सृष्टानि भूतानि जायन्ते च म्रियन्ति च।

सोऽसृजत् प्रथमं देवो महान्तं नाम नामतः। महान् ससर्ज्जाहङ्कारं स चापि भगवानथ।

आकाशमिति विख्यातं सर्व्वभूतधरः प्रभुः। आकाशादभवद्वारि सलिलादग्निमारुतौ।

अग्निमारुतसंयोगात्ततः समभवन्मही। ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयम्भुवा।

तस्मात् पद्मात्समभवद्ब्रह्मा वेदमयो निधिः। अहङ्कार इति ख्यातः सर्व्वभूतात्मभूतकृत्।

ब्रह्मा वै स महातेजा य एते पञ्चधातवः। शैलास्तस्यास्थिसंज्ञास्तु मेदोमांसञ्च मेदिनी।

समुद्रास्तस्य रुधिरमाकाशमुदरं तथा। पवनश्चैव निश्वासस्तेजोऽग्निर्निम्नगाः शिराः।

अग्नीषोमौ तु चन्द्रार्कौ नयने तस्य विश्रुते। नभश्चोर्द्ध्वं शिरस्तस्य क्षितिः पादौ भुजा दिशः।

दुर्व्विज्ञेयो ह्यचिन्त्यात्मा सिद्धैरपि न संशयः। स एष भगवान् विष्णुरनन्त इति विश्रुतः।

सर्व्वभूतात्मभूतस्थो दुर्व्विज्ञेयोऽकृतात्मभिः। अहङ्कारस्य यः स्रष्टा सर्व्वभूतभवाय वै।

यतः समभवद्विश्वं पृष्टोऽहं यदिह त्वया।

॥ भरद्वाज उवाच ॥ गगनस्य दिशाञ्चैव भूतलस्यानिलस्य वा। कान्यत्र परिमाणानि संशयं छिन्धि तत्त्वतः।

॥ भृगुरुवाच ॥ अनन्तमेतदाकाशं सिद्धदैवतसेवितं। रम्यं नानाश्रयाकीर्णं यस्यान्तो नाधिगम्यते।

ऊर्द्ध्वं गतेरधस्तात्तु चन्द्रादित्यौ न दृश्यतः। तत्र देवाः स्वयं दीप्ता भास्कराभाऽग्निवर्चसः।

तेऽचाप्यन्तं न पश्यन्ति नभसः प्रथितौजसः। दुर्गमत्वादनन्तत्वादिति मे विद्धि मानद।

उपरिष्टोपरिष्टात्तु प्रज्वलद्भिः स्वयम्प्रभैः। निरुद्धमेतदाकाशमप्रमेयं सुरैरपि।

पृथिव्यन्ते समुद्रास्तु समुद्रान्ते तमः स्मृतं। तमसोऽन्ते जलं प्राहुर्ज्जलस्यान्तेऽग्निरेव च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रसातलान्ते सलिलं जलान्ते पन्नगाधिपाः। तदन्ते पुनराकाशमाकाशान्ते पुनर्ज्जलं।
एवमन्तं भगवतः प्रमाणं सलिलस्य च। अग्निमारुततोयेभ्यो दुर्ज्ञेयं दैवतैरपि।
अग्निमारुततोयानां वर्णाः क्षितितलस्य च। आकाशादपि गृह्यन्ते भिद्यन्ते तत्त्वदर्शनात्। ६७९५
पठन्ति चैव मुनयः शास्त्रेषु विविधेषु च। त्रैलोक्यसागरे चैव प्रमाणं विहितं यथा।
अदृश्याय त्वगम्याय कः प्रमाणमुदाहरेत्। सिद्धानां देवतानाञ्च यदा परिमिता गतिः।
तदा गौणमनन्तस्य नामानन्तेति विश्रुतं। नामधेयानुरूपस्य मानसस्य महात्मनः।
यदा तु दिव्यं यद्रूपं ह्रसते वर्द्धते पुनः। कोऽन्यस्तद्वेदितुं शक्तो योऽपि स्यात्तद्विधोऽपरः।
ततः पुष्करतः सृष्टः सर्व्वज्ञो मूर्त्तिमान् प्रभुः। ब्रह्मा धर्म्ममयः पूर्व्वः प्रजापतिरनुत्तमः। ६८००
॥ भरद्वाज उवाच ॥ पुष्कराद्यदि संभूतो ज्येष्ठं भवति पुष्करं। ब्रह्माणं पूर्व्वजञ्चाह भवान् सन्देह एव मे।
॥ भृगुरुवाच ॥ मानसस्येह या मूर्त्तिर्ब्रह्मत्वं समुपागता। तस्यासनविधानार्थं पृथिवी पद्ममुच्यते।
कर्णिकां तस्य पद्मस्य मेरुर्गगनमुच्छ्रितः। तस्य मध्ये स्थितो लोकान् सृजते जगतः प्रभुः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे द्व्यशीत्यधिकशतोऽध्यायः॥ १८२ ॥
॥ भरद्वाज उवाच ॥ प्रजाविसर्गं विविधं कथं विसृजे प्रभुः। मेरुमध्ये स्थितो ब्रह्मा तद्ब्रूहि द्विजसत्तम।
॥ भृगुरुवाच ॥ प्रजाविसर्गं विविधं मानसो मनसाऽसृजत्। संरक्षणार्थं भूतानां सृष्टं प्रथमतो जलं। ६८०५
यः प्राणः सर्व्वभूतानां वर्द्धन्ते येन च प्रजाः। परित्यक्ताश्च नश्यन्ति तेनेदं सर्व्वमावृतं।
पृथिवी पर्व्वता मेघा मूर्त्तिमन्तश्च येऽपरे। सर्व्वन्तद्वारुणं ज्ञेयमापस्तस्तम्भिरे यतः।
॥ भरद्वाज उवाच ॥ कथं सलिलमुत्पन्नं कथञ्चैवाग्निमारुतौ। कथं वा मेदिनी सृष्टेत्यत्र मे संशयो महान्।
॥ भृगुरुवाच ॥ ब्रह्मकल्पे पुरा ब्रह्मन् ब्रह्मर्षीणां समागमे। लोकसम्भवसन्देहः समुत्पन्नो महात्मनां।
तेऽतिष्ठन् ध्यानमालम्ब्य मौनमास्थाय निश्चलाः। त्यक्ताहाराः पवनपा दिव्यं वर्षशतं द्विजाः। ६८१०
तेषां ब्रह्ममयी वाणी सर्व्वेषां श्रोत्रमागमत्। दिव्या सरस्वती तत्र सम्बभूव नभस्तलात्।
पुरा स्तिमितमाकाशमनन्तमचलोपमं। नष्टचन्द्रार्कपवनं प्रसुप्तमिव सम्बभौ।
ततः सलिलमुत्पन्नं तमसीवापरं तमः। तस्माच्च सलिलोत्पीडादुदतिष्ठत मारुतः।
यथा भाजनमच्छिद्रं निःशब्दमिव लक्ष्यते। तच्चाम्भसा पूर्य्यमाणं स शब्दं कुरुतेऽनिलः।
यथा सलिलसंरुद्धे नभसोऽन्ते निरन्तरे। भित्त्वाऽर्णवतलं वायुः समुत्पतति घोषवान्। ६८१५
स एष चरते वायुरर्णवोत्पीडसम्भवः। आकाशस्थानमासाद्य प्रशान्तिं नाधिगच्छति।
तस्मिन् वाय्वम्बुसङ्घर्षे दीप्ततेजा महाबलः। प्रादुरभूदूर्द्ध्वशिखः कृत्वा निस्तिमिरं नभः।
अग्निः पवनसंयुक्तः खं समाक्षिपते जलं। सोऽग्निर्म्मारुतसंयोगाद्घनत्वमुपपद्यते।
तस्याकाशं निपततः स्नेहस्तिष्ठति योऽपरः। स सङ्घातत्वमापन्नो भूमित्वमनुगच्छति।
रसानां सर्व्वगन्धानां स्नेहानां प्राणिनां तथा। भूमिर्योनिरिह ज्ञेया यस्यां सर्व्वं प्रसूयते। ६८२०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे त्र्यशीत्यधिकशतोऽध्यायः॥ १८३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भरद्वाज उवाच ॥ य एते धातवः पञ्च ब्रह्मा यानसृजत् पुरा । आवृता यैरिमे लोका महाभूताभिसंज्ञिताः ।
यदाऽसृजत् सहस्राणि भूतानां स महामतिः । पञ्चानामेव भूतत्वं कथं समुपपद्यते ।
॥ भृगुरुवाच ॥ अमितानां महाशब्दो यान्ति भूतानि सम्भवं । ततस्तेषां महाभूतशब्दोऽयमुपपद्यते ।
चेष्टा वायुः खमाकाशमूष्माऽग्निः सलिलं द्रवः । पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकं ।
इत्येतैः पञ्चभिर्भूतैर्युक्तं स्थावरजङ्गमं । श्रोत्रं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंज्ञिकाः । ६८२५
॥ भरद्वाज उवाच ॥ पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः । स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ।
अनुष्मणामचेष्टानां घनानाञ्चैव तत्त्वतः । वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ।
न शृण्वन्ति न पश्यन्ति न गन्धरसवेदिनः । न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः ।
अद्रवत्वादनग्नित्वादभूमित्वादवायुतः । आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकं ।
॥ भृगुरुवाच ॥ घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः । तेषां पुष्पफलव्यक्तिर्नित्यं समुपपद्यते । ६८३०
ऊष्मतो म्लायते पर्णं त्वक् फलं पुष्पमेव च । म्लायते शीर्य्यते चापि स्पर्शस्तेनात्र विद्यते ।
वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्य्यते । श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ।
वल्ली वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति । न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः ।
पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि । अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ।
पादैः सलिलपानाच्च व्याधीनाञ्चापि दर्शनात् । व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे । ६८३५
वक्त्रेणोत्पलनालेन यथोर्द्ध्वं जलमाददेत् । तथा पवनसंयुक्तः पादैः पिबति पादपः ।
सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात् । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ।
तेन तज्जलमादत्तं जरयत्यग्निमारुतौ । आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ।
जङ्गमानाञ्च सर्व्वेषां शरीरे पञ्च धातवः । प्रत्येकशः प्रभिद्यन्ते यैः शरीरं विचेष्टते ।
त्वक् च मांसं तथाऽस्थीनि मज्जा स्नायुश्च पञ्चमं । इत्येतदिह संघातं शरीरे पृथिवीमयं । ६८४०
तेजो ह्यग्निस्तथा क्रोधश्चक्षुरूष्मा तथैव च । अग्निर्जरयते यच्च पञ्चाग्नेयाः शरीरिणः ।
श्रोत्रं घ्राणं तथास्यञ्च हृदयं कोष्ठमेव च । आकाशात् प्राणिनामेते शरीरे पञ्च धातवः ।
श्लेष्मा पित्तमथ स्वेदो वसा शोणितमेव च । इत्यापः पञ्चधा देहे भवन्ति प्राणिनां सदा ।
प्राणात् प्रणीयते प्राणी व्यानाद्व्यायच्छते तथा । गच्छत्यपानोऽधश्चैव समानो हृदयस्थितः ।
उदानादुच्छ्वसिति च प्रतिभेदाच्च भाषते । इत्येते वायवः पञ्च चेष्टयन्तीह देहिनं । ६८४५
भूमेर्गन्धगुणान्वेत्ति रसञ्चाद्भ्यः शरीरवान् । ज्योतिषा चक्षुषा रूपं स्पर्शं वेत्ति च वायुना ।
गन्धः स्पर्शो रसो रूपं शब्दश्चात्र गुणाः स्मृताः । तस्य गन्धस्य वक्ष्यामि विस्तराभिहितान् गुणान् ।
इष्टश्चानिष्टगन्धश्च मधुरः कटुरेव च । निर्हारी संहतः स्निग्धो रूक्षो विशद एव वा ।
एवं नवविधो ज्ञेयः पार्थिवो गन्धविस्तरः । ज्योतिः पश्यति चक्षुर्भ्यां स्पर्शं वेत्ति च वायुना ।
शब्दः स्पर्शश्च रूपञ्च रसश्चापि गुणाः स्मृताः । रसज्ञानन्तु वक्ष्यामि तन्मे निगदतः शृणु । ६८५०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रसो बहुविधः प्रोक्त ऋषिभिः प्रथितात्मभिः। मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा।
एष षड्विधविस्तारो रसो वारिमयः स्मृतः। शब्दः स्पर्शश्च रूपञ्च त्रिगुणं ज्योतिरुच्यते।
ज्योतिः पश्यति रूपाणि रूपञ्च बहुधा स्मृतं। ह्रस्वो दीर्घस्तथा स्थूलश्चतुरस्रोऽनुवृत्तवान्।
शुक्लः कृष्णस्तथा रक्तो नीलः पीतोऽरुणस्तथा। कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदुदारुणः।
एवं षोडशविस्तारो ज्योतीरूपगुणः स्मृतः। वायव्यस्तु गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः। ६८५५
उष्णः शीतः सुखो दुःखः स्निग्धो विशद एव च। तथा खरो मृदुः रूक्षो लघुर्गुरुतरोऽपि च।
शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरित्युत। एवमेकादशविधो वायव्यो गुण उच्यते।
तत्रैकगुणमाकाशं शब्द इत्येव तत् स्मृतं। तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकं।
षड्ज ऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्।
एष सप्तविधः प्रोक्तो गुण आकाशसम्भवः। ऐश्वर्य्येण तु सर्व्वत्र स्थितोऽपि पटहादिषु। ६८६०
मृदङ्गभेरीशङ्खानां स्तनयित्नोरथस्य च। यः कश्चिच्छ्रूयते शब्दः प्राणिनोऽप्राणिनोऽपि वा।
एतेषामेव सर्व्वेषां विषये संप्रकीर्त्तितः। एवं बहुविधाकारः शब्द आकाशसम्भवः।
आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह। अव्याहतैश्चेतयते न वेत्ति विषमस्थितैः।
आप्याय्यन्ते च ते नित्यं धातवस्तैस्तु धातुभिः। आपोऽग्निर्मारुतश्चैव नित्यं जाग्रति देहिषु।
मूलमेते शरीरस्य व्याप्य प्राणानिह स्थिताः। ६८६३
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥
॥ भरद्वाज उवाच ॥ पार्थिवं धातुमासाद्य शारीरोऽग्निः कथं प्रभो। अवकाशविशेषेण कथं वर्त्तयतेऽनिलः।
॥ भृगुरुवाच ॥ वायोर्गतिमहं ब्रह्मन् कथयिष्यामि तेऽनघ। प्राणिनामनिलो देहान् यथा चेष्टयते बली।
श्रितो मूर्द्धानमग्निस्तु शरीरं परिपालयन्। प्राणो मूर्द्धनि चाग्नौ च वर्त्तमानो विचेष्टते।
स जन्तुः सर्व्वभूतात्मा पुरुषः स सनातनः। मनोबुद्धिरहङ्कारो भूतानि विषयश्च सः।
एवं त्विह स सर्व्वत्र प्राणेन परिचाल्यते। पृष्ठतस्तु समानेन स्वां स्वां गतिमुपाश्रितः। ६८७०
वस्तिमूलं गुदञ्चैव पावकं समुपाश्रितः। वहन्मूत्रं पुरीषञ्चाप्यपानः परिवर्त्तते।
प्रयत्ने कर्म्मणि बले य एकस्त्रिषु वर्त्तते। उदान इति तं प्राहुरध्यात्मविदुषो जनाः।
सन्धिष्वपि च सर्व्वेषु सन्निविष्टस्तथाऽनिलः। शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते।
धातुष्वग्निस्तु विततः समानेन समीरितः। रसान् धातूंश्च दोषांश्च वर्त्तयन्नवतिष्ठते।
अपानप्राणयोर्मध्ये प्राणापानसमाहितः। समन्वितस्त्वधिष्ठानं सम्यक् पचति पावकः। ६८७५
आस्यं हि पायुपर्य्यन्तमन्ते स्याद्गुदसंज्ञितं। स्रोतांस्तस्मात् प्रजायन्ते सर्व्वस्रोतांसि देहिनां।
प्राणानां सन्निपाताच्च सन्निपातः प्रजायते। उष्मा चाग्निरिति ज्ञेयो योऽन्नं पचति देहिनां।
अग्निवेगवहः प्राणो गुदान्ते प्रतिहन्यते। स ऊर्द्ध्वमागम्य पुनः समुत्क्षिपति पावकं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पक्वाशयस्त्वधो नाभ्यामूर्द्ध्वमामाशयः स्थितः । नाभिमध्ये शरीरस्य सर्व्वे प्राणाश्च संस्थिताः ।
प्रस्थिता हृदयात्सर्व्वे तिर्य्यगूर्द्ध्वमधस्तथा । वहन्त्यन्नरसान्नाड्यो दश प्राणप्रचोदिताः । ६८८०
एष मार्गोऽथ योगानां येन गच्छन्ति तत्पदं । जितक्लमा समा धीरा मूर्द्धन्यात्मानमादधन् ।
एवं सर्व्वेषु विहितः प्राणापानेषु देहिनां । तस्मिन् समिध्यते नित्यमग्निः स्थाल्यामिवाहितः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे पञ्चाशीत्यधिकशतोऽध्यायः ॥ १८५ ॥
॥ भरद्वाज उवाच ॥ यदि प्राणयते वायुर्वायुरेव विचेष्टते । श्वसित्याभाषते चैव तस्माज्जीवो निरर्थकः ।
यदुष्मभाव आग्नेयो वह्निना पच्यते यदि । अग्निर्जरयते चैतत्तस्माज्जीवो निरर्थकः ।
जन्तोः प्रमीयमाणस्य जीवो नैवोपलभ्यते । वायुरेव जहात्येनमुष्मभावश्च नश्यति । ६८८५
यदि वायुमयो जीवः संश्लेषो यदि वा पुनः । वायुमण्डलवद्दृश्यो गच्छेत् सह मरुद्गणैः ।
संश्लेषो यदि वातेन यदि तस्मात् प्रणश्यति । महार्णवविमुक्तत्वादन्यत् सलिलभाजनं ।
कूपे वा सलिलं दद्यात् प्रदीपं वा हुताशने । क्षिप्रं प्रविश्य नश्येत यथा नश्यत्यसौ तथा ।
पञ्चधारणके ह्यस्मिन् शरीरे जीवितं कुतः । तेषामन्यतराभावाच्चतुर्णां नास्ति संशयः ।
नश्यन्त्यापो ह्यनाहाराद्वायुरुच्छ्वासनिग्रहात् । नश्यते कोष्ठभेदात् खमग्निर्नश्यत्यभोजनात् । ६८९०
व्याधिवर्णपरिक्लेशैर्म्मेदिनी चैव शीर्य्यते । पीडिते ऽन्यतरे ह्येषां सङ्घातो याति पञ्चधा ।
तस्मिन् पञ्चत्वमापन्ने जीवः किमनुधावति । किं वेदयति वा जीवः किं शृणोति ब्रवीति च ।
एषा गौः परलोकस्थं तारयिष्यति मामिति । यो दत्त्वा म्रियते जन्तुः सा गौः कं तारयिष्यति ।
गौश्च प्रतिगृहीता च दाता चैव समं यदा । इहैव विलयं यान्ति कुतस्तेषां समागमः ।
विहगैरुपयुक्तस्य शैलाग्रात् पतितस्य वा । अग्निना चोपयुक्तस्य कुतः सञ्जीवनं पुनः । ६८९५
छिन्नस्य यदि वृक्षस्य न मूलं प्रतिरोहति । वीजान्यस्य प्ररोहन्ते मृतः क्व पुनरेष्यति ।
वीजमात्रं पुरा सृष्टं यदेतत्परिवर्त्तते । मृता मृताः प्रणश्यन्ति वीजाद्वीजं प्रवर्त्तते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे षडशीत्यधिकशतोऽध्यायः ॥ १८६ ॥
॥ भृगुरुवाच ॥ न प्रणाशोऽस्ति जीवस्य दत्तस्य च कृतस्य च । याति देहान्तरं प्राणी शरीरन्तु विशीर्य्यते ।
न शरीराश्रितो जीवस्तस्मिन्नष्टे प्रणश्यति । समिधामिव दग्धानां यथाग्निर्दृश्यते तथा ।
॥ भरद्वाज उवाच ॥ अग्नेर्य्यथा तथा तस्य यदि नाशो न विद्यते । इन्धनस्योपयोगान्ते स चाग्निर्नोपलभ्यते । ६९००
नश्यतीत्येव जानामि शान्तमग्निमनिन्धनं । गतिर्यस्य प्रमाणं वा संस्थानं वा न विद्यते ।
॥ भृगुरुवाच ॥ समिधामुपयोगान्ते यथाऽग्निर्नोपलभ्यते । आकाशानुगतत्वाद्धि दुर्ग्राह्यो हि निराश्रयः ।
तथा शरीरसन्त्यागे जीवो ह्याकाशवत् स्थितः । न गृह्यते सुसूक्ष्मत्वाद्यथा ज्योतिर्न संशयः ।
प्राणान् धारयते ह्यग्निः स जीव उपधार्य्यतां । वायुसन्धारणो ह्यग्निर्नश्यत्युच्छ्वासनिग्रहात् ।
तस्मिन्नष्टे शरीराग्नौ ततो देहमचेतनं । पतितं याति भूमित्वमयनं तस्य हि क्षितिः । ६९०५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जङ्गमानां हि सर्व्वेषां स्थावराणां तथैव च। आकाशं पवनोऽन्वेति ज्योतिस्तमनुगच्छति।
तेषां त्रयाणामेकत्वात् द्वयं भूमौ प्रतिष्ठितं। यत्र खं तत्र पवनस्तत्राग्निर्यत्र मारुतः।
अमूर्त्तयस्ते विज्ञेया मूर्त्तिमन्तः शरीरिणां।
॥ भरद्वाज उवाच ॥ यद्यग्निमारुतौ भूमिः खमापश्च शरीरिषु। जीवः किंलक्षणस्तत्रेत्येतदाचक्ष्व मेऽनघ।
पञ्चात्मके पञ्चरतौ पञ्चविज्ञानचेतने। शरीरे प्राणिनां जीवं वेत्तुमिच्छामि यादृशं। ६९१०
मांसशोणितसङ्घाते मेदःस्नाय्वस्थिसञ्चये। भिद्यमाने शरीरे तु जीवो नैवोपलभ्यते।
यद्यजीवं शरीरन्तु पञ्चभूतसमन्वितं। शारीरे मानसे दुःखे कस्तां वेदयते रुजं।
शृणोति कथितं जीवः कर्णाभ्यां न शृणोति तत्। महर्षे मनसि व्यग्रे तस्माज्जीवो निरर्थकः।
सर्व्वं पश्यति यद्दृश्यं मनोयुक्तेन चक्षुषा। मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति।
न पश्यति न चाघ्राति न शृणोति न भाषते। न च स्पर्शरसौ वेत्ति निद्रावशगतः पुनः। ६९१५
हृष्यति क्रुध्यते कोऽत्र शोचत्युद्विजते च कः। इच्छति ध्यायति द्वेष्टि वाचमीरयते च कः।
॥ भृगुरुवाच ॥ न पञ्चसाधारणमत्र किञ्चिच्छरीरमेको वहतेऽन्तरात्मा। स वेत्ति गन्धांश्च रसान् श्रुतीश्च स्पर्शञ्च रूपञ्च गुणाश्च येऽन्ये।
पञ्चात्मके पञ्चगुणप्रदर्शी स सर्व्वगात्रानुगतोऽन्तरात्मा। स वेत्ति दुःखानि सुखानि चात्र तद्विप्रयोगात्तु न वेत्ति देहः।
यदा न रूपं न स्पर्शो नोष्मभावश्च पावके। तदा शान्ते शरीराग्नौ देहत्यागेन नश्यति।
आपोमयमिदं सर्व्वमापो मूर्त्तिः शरीरिणां। तत्रात्मा मानसो ब्रह्मा सर्व्वभूतेषु लोककृत्। ६९२०
आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः। तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः।
आत्मानं तं विजानीहि सर्व्वलोकहितात्मकं। तस्मिन् यः संश्रितो देहे ह्यब्बिन्दुरिव पुष्करे।
क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकं। तमो रजश्च सत्त्वञ्च विद्धि जीवगुणानिमान्।
सचेतनं जीवगुणं वदन्ति स चेष्टते चेष्टयते च सर्व्वं। अतः परं क्षेत्रविदो वदन्ति प्रावर्त्तयद्यो भुवनानि सप्त।
न जीवनाशोऽस्ति हि देहभेदे मिथ्यैतदाहुर्म्मृत इत्यबुद्धाः। जीवस्तु देहान्तरितः प्रयाति दशार्द्धता तस्य शरीरभेदः। ६९२५
एवं सर्व्वेषु भूतेषु गूढश्चरति संवृतः। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया तत्त्वदर्शिभिः।
तं पूर्व्वापररात्रेषु युञ्जानः सततं बुधः। लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मनि।
चित्तस्य हि प्रसादेन हित्वा कर्म्म शुभाशुभं। प्रसन्नात्मात्मनि स्थित्वा सुखमानन्त्यमश्नुते।
मानसोऽग्निः शरीरेषु जीव इत्यभिधीयते। सृष्टिः प्रजापतेरेषा भूताध्यात्मविनिश्चये।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे सप्ताशीत्यधिकशततोऽध्यायः॥ १८७॥
॥ भृगुरुवाच ॥ असृजद्ब्राह्मणानेवं पूर्व्वं ब्रह्मा प्रजापतीन्। आत्मतेजोऽभिनिर्वृत्तान् भास्कराग्निसमप्रभान्। ६९३०
ततः सत्यञ्च धर्म्मञ्च तपो ब्रह्म च शाश्वतं। आचारञ्चैव शौचञ्च स्वर्गाय विदधे प्रभुः।
देवदानवगन्धर्व्वा दैत्यासुरमहोरगाः। यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम। ये चान्ये भूतसंघानां वर्णांस्तांश्चापि निर्ममे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jangaon

ब्राह्मणानां सितो वर्णः क्षत्रियाणाञ्च लोहितः । वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ।
॥ भरद्वाज उवाच ॥ चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभिद्यते । सर्व्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः । ६९३५
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः । सर्व्वेषां न प्रभवति कस्माद्वर्णो विभज्यते ।
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितं । तनुः क्षरति सर्व्वेषां कस्माद्वर्णो विभज्यते ।
जङ्गमानामसंख्येयाः स्थावराणाञ्च जातयः । तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ।
॥ भृगुरुवाच ॥ न विशेषोऽस्ति वर्णानां सर्व्वं ब्राह्ममिदं जगत् । ब्रह्मणा पूर्व्वसृष्टं हि कर्म्मभिर्वर्णतां गतं ।
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः । त्यक्तस्वधर्म्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः । ६९४०
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः । स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ।
हिंसाऽनृतप्रिया लुब्धाः सर्व्वकर्म्मोपजीविनः । कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ।
इत्येतैः कर्म्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः । धर्म्मो यज्ञक्रिया तेषां नित्यं न प्रतिषिध्यते ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती । विहिता ब्रह्मणा पूर्व्वं लोभात्त्वज्ञानतां गताः ।
ब्राह्मणा ब्रह्मतन्त्रस्थास्तपस्तेषां न नश्यति । ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा । ६९४५
ब्रह्म चैव परं सृष्टं ये न जानन्ति तेऽद्विजाः । तेषां बहुविधास्त्वन्यास्तत्र तत्र हि जातयः ।
पिशाचा राक्षसाः प्रेता विविधा म्लेच्छजातयः । प्रनष्टज्ञानविज्ञानाः स्वच्छन्दाचारचेष्टिताः ।
प्रजाब्राह्मणसंस्काराः स्वकर्म्मकृतनिश्चयाः । ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्ममूलाऽक्षयाऽव्यया । सा सृष्टिर्म्मानसी नाम धर्म्मतन्त्रपरायणा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे अष्टाशीत्यधिकशतोऽध्यायः ॥ १८८ ॥
॥ भरद्वाज उवाच ॥ ब्राह्मणः केन भवति क्षत्त्रियो वा द्विजोत्तम । वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदताम्वर । ६९५०
॥ भृगुरुवाच ॥ जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः । वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः ।
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः । नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ।
सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा । तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ।
क्षत्रजं सेवते कर्म्म वेदाध्ययनसङ्गतः । दानादानरतिर्यस्तु स वै क्षत्त्रिय उच्यते ।
विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः । वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः । ६९५५
सर्व्वभक्ष्यरतिर्नित्यं सर्व्वकर्म्मकरोऽशुचिः । त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ।
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते । स वै शूद्रो भवेच्छूद्रो ब्राह्मणो ब्राह्मणो न च ।
सर्व्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः । एतत् पवित्रं ज्ञानानां तथा चैवात्मसंयमः ।
वार्य्यौ सर्व्वात्मना तौ हि श्रेयोघातार्थमुत्थितौ । नित्यं क्रोधात् श्रियं रक्षेत् तपो रक्षेच्च मत्सरात् ।
विद्यां मानापमानाभ्यामात्मानन्तु प्रमादतः । यस्य सर्व्वे समारम्भा निराशीर्व्बन्धना द्विजः । ६९६०
त्यागे यस्य हुतं सर्व्वं स त्यागी स च बुद्धिमान् । अहिंस्रः सर्व्वभूतानां मैत्रायणगतश्चरेत् ।
परिग्रहान्परित्यज्य भवेद्बुद्ध्या जितेन्द्रियः । अशोकं स्थानमातिष्ठेदिह चामुत्र चाभयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तपोनित्येन दान्तेन मुनिना संयतात्मना। अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना।
इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः। अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियं।
अविस्रम्भेण गन्तव्यं विस्रम्भे धारयेन्मनः। मनः प्राणे निगृह्णीयात् प्राणं ब्रह्मणि धारयेत्। ६९६५
निर्व्वेदादेव निर्व्वाणं न च किञ्चिद्विचिन्तयेत्। सुखं वै ब्राह्मणो ब्रह्म निर्व्वेदेनाधिगच्छति।
शौचेन सततं युक्तः सदाचारसमन्वितः। सानुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे ऊननवत्यधिकशततमोऽध्यायः॥ १८९॥
॥ भृगुरुवाच॥ सत्यं ब्रह्म तपः सत्यं सत्यं विसृजते प्रजाः। सत्येन धार्य्यते लोकः स्वर्गं सत्येन गच्छति।
अनृतं तमसो रूपं तमसा नीयते ह्यधः। तमोग्रस्ता न पश्यन्ति प्रकाशं तमसा वृताः।
स्वर्गः प्रकाश इत्याहुर्नरकं तम एव च। सत्यानृतं तदुभयं प्राप्यते जगतीचरैः। ६९७०
तत्राप्येवंविधा लोके वृत्तिः सत्यानृते भवेत्। धर्म्माधर्म्मौ प्रकाशश्च तमो दुःखं सुखन्तथा।
तत्र यत् सत्यं स धर्म्मो यो धर्म्मः स प्रकाशो यः प्रकाशस्तत्सुखमिति। तत्र यदनृतं सोऽधर्म्मो योऽधर्म्मस्तत्तमो यत्तमस्तद्दुःखमिति।
अत्रोच्यते। शारीरैर्मानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः। लोकसृष्टिं प्रपश्यन्तो न मुह्यन्ति विचक्षणाः।
तत्र दुःखविमोक्षार्थं प्रयतेत विचक्षणः। सुखं ह्यनित्यं भूतानामिह लोके परत्र च।
राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते। तथा तमोऽभिभूतानां भूतानां नश्यते सुखं। ६९७५
तत् खलु द्विविधं सुखमुच्यते शारीरं मानसञ्च। इह खल्वमुष्मिंश्च लोके वस्तुप्रवृत्तयः सुखार्थमभिधीयन्ते न ह्यतः परं त्रिवर्गफलं विशिष्टतरमस्ति स एव काम्यो गुणविशेषो धर्म्मार्थगुणारम्भस्तद्धेतुरस्योत्पत्तिः सुखप्रयोजनार्थ आरम्भः।

॥ भरद्वाज उवाच॥ यदेतद्भवताऽभिहितं सुखानां परमा स्थितिरिति न तदुपगृह्णीमो न ह्येषामृषीणां महति स्थितानामप्राप्य एष काम्यो गुणविशेषो न चैनमभिलषन्ति च तपसि श्रूयते त्रिलोककृद्ब्रह्मा प्रभुरेकाकी तिष्ठति ब्रह्मचारी न कामसुखेष्वात्मानमवदधाति अपि च भगवान् विश्वेश्वर उमापतिः काममभिवर्त्तमानमनङ्गत्वेन शममनयत् तस्माद्ब्रूमो न तु महात्मभिरयं प्रतिगृहीतो न त्वेष तावद्विशिष्टो गुणविशेष इति नैतद्भगवता प्रत्येमि भगवता तूक्तं सुखान्न परमस्तीति लोकप्रवादो हि द्विविधः फलोदयः सुकृतात् सुखमवाप्यते दुष्कृताद्दुःखमिति।

॥ भृगुरुवाच॥ अत्रोच्यते। अनृतात्खलु तमः प्रादुर्भूतं ततस्तमोग्रस्ता अधर्म्ममेवानुवर्त्तन्ते न धर्म्मं क्रोधलोभहिंसाऽनृतादिभिरवच्छन्नाः न खल्वस्मिन् लोके नामुत्र सुखमाप्नुवन्ति। विविधव्याधिरुजोपतापैरवकीर्य्यन्ते। बधबन्धनपरिक्लेशादिभिश्च क्षुत्पिपासाश्रमकृतैरुपतापैरुपतप्यन्ते। वर्षवात्युष्णातिशीतकृतैश्च प्रतिभयैः शारीरैर्दुःखैरुपतप्यन्ते। बन्धुधनविनाशविप्रयोगकृतैश्च मानसैः शोकैरभिभूयन्ते जरामृत्युकृतैश्चान्यैरिति।

यस्त्वेतैः शारीरैर्मानसैर्दुःखैर्न संस्पृश्यते स सुखं वेद। न चैते दोषाः स्वर्गे प्रादुर्भवन्ति तत्र खलु भवति॥
सुसुखः पवनः स्वर्गे गन्धश्च सुरभिस्तथा। क्षुत्पिपासा श्रमो नास्ति न जरा न च पापकं। ६९८०
नित्यमेव सुखं स्वर्गे सुखं दुःखमिहोभयं। नरके दुःखमेवाहुः सुखं तत्परमं पदं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding KS MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पृथिवी सर्व्वभूतानां जनित्री तद्विधाः स्त्रियः। पुमान् प्रजापतिस्तत्र शुक्रं तेजोमयं विदुः।
इत्येतल्लोकनिर्म्माणं ब्रह्मणा विहितं पुरा। प्रजाः समनुवर्त्तन्ते स्वैः स्वैः कर्म्मभिरावृताः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे नवत्यधिकशततोऽध्यायः॥ १९० ॥
॥ भरद्वाज उवाच॥ दानस्य किं फलं प्राहुर्द्धर्म्मस्य चरितस्य च। तपसश्च सुतप्तस्य स्वाध्यायस्य हुतस्य वा।
॥ भृगुरुवाच॥ हुतेन शाम्यते पापं स्वाध्यायैः शान्तिरुत्तमा। दानेन भोगानित्याहुस्तपसा स्वर्गमाप्नुयात्। ६९८५
दानन्तु द्विविधं प्राहुः परत्रार्थमिहैव च। सद्भ्यो यद्दीयते किञ्चित्तत् परत्रोपतिष्ठते।
असद्भ्यो दीयते यत्तु तद्दानमिह भुज्यते। यादृशं दीयते दानं तादृशं फलमश्नुते।
॥ भरद्वाज उवाच॥ किं कस्य धर्म्माचरणं किं वाऽधर्म्मस्य लक्षणं। धर्म्मः कतिविधो वाऽपि तद्भवान् वक्तुमर्हति।
॥ भृगुरुवाच॥ स्वधर्म्माचरणे युक्ता ये भवन्ति मनीषिणः। तेषां स्वर्गफलावाप्तिर्योऽन्यथा स विमुह्यते।
॥ भरद्वाज उवाच॥ यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा। तेषां स्वे स्वे समाचारास्तान्मे वक्तुमिहार्हसि। ६९९०
॥ भृगुरुवाच॥ पूर्व्वमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता धर्म्मसंरक्षणार्थमाश्रमाश्चत्वारोऽभिनिर्द्दिष्टाः। तत्र गुरुकुलवासमेव प्रथममाश्रममुदाहरन्ति। सम्यगत्र शौचसंस्कारनियमव्रतविनियतात्मा उभे सन्ध्ये भास्कराग्निदैवतान्युपस्थाय विहाय तन्द्रालस्ये गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतान्तरात्मा त्रिषवणमुपस्पृश्य ब्रह्मचर्य्याग्निपरिचरणगुरुशुश्रूषानित्यभिक्षाभैक्षादिसर्व्वनिवेदितान्तरात्मा गुरुवचननिर्द्देशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात्।
॥ भवति चात्र श्लोकः॥ गुरुं यस्तु समाराध्य द्विजो वेदमवाप्नुयात्। तस्य स्वर्गफलावाप्तिः सिध्यते चास्य मानसमिति।

गार्हस्थ्यं खलु द्वितीयमाश्रमं वदन्ति तस्य समुदाचारलक्षणं सर्व्वमनु व्याख्यास्यामः। समावृत्तानां सदाचाराणां सह धर्म्मचर्य्याफलार्थिनां गृहाश्रमो विधीयते। धर्म्मार्थकामावाप्तिर्ह्यत्र त्रिवर्गसाधनमपेक्षागर्हितेन कर्म्मणा धनान्यादाय स्वाध्यायोपलब्धप्रकर्षेण वा ब्रह्मर्षिनिर्म्मितेन वा अद्रिसारगतेन वा हव्यकव्यनियमाभ्यासदैवतप्रसादोपलब्धेन वा धनेन गृहस्थो गार्हस्थ्यं वर्त्तयेत्। तद्धि सर्व्वाश्रमाणां मूलमुदाहरन्ति। गुरुकुलनिवासिनः परिव्राजका ये चान्ये सङ्कल्पितव्रतनियमधर्म्मानुष्ठायिनस्तेषामप्यत एव भिक्षाबलिसंविभागाः प्रवर्त्तन्ते।

वानप्रस्थानाञ्च द्रव्योपस्कार इति प्रायशः खल्वेते साधवः साधुपथ्यादनाः स्वाध्यायप्रसङ्गिनस्तीर्थाभिगमनदेशदर्शनार्थं पृथिवीं पर्य्यटन्ति तेषां प्रत्युत्थानाभिगमनमनसूयावाक्प्रदानसुखशक्त्यासनसुखशयनाभ्यवहारसत्क्रिया चेति।
॥ भवति चात्र श्लोकः॥ अतिथिर्य्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते। स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति। ६९९५
अपि चात्र यज्ञक्रियाभिर्द्देवताः प्रीयन्ते निवापेन पितरो विद्याभ्यासश्रवणधारणेन ऋषयः अपत्योत्पादनेन प्रजापतिरिति।

॥ श्लोकौ चात्र भवतः॥ वात्सल्यात् सर्व्वभूतेभ्यो वाच्याः श्रोत्रसुखा गिरः। परितापोपघातश्च पारुष्यञ्चात्र गर्हितं।
अवज्ञानमहङ्कारो दम्भश्चैव विगर्हितः। अहिंसा सत्यमक्रोधः सर्व्वाश्रमगतं तपः।

अपि चात्र माल्याभरणवस्त्राभ्यङ्गनित्योपभोगनृत्यगीतवादित्रश्रुतिसुखनयनाभिरामदर्शनानां प्राप्तिर्भक्ष्यभोज्यलेह्यपेयचूष्याणामभ्यवहार्य्याणां विविधानामुपभोगः स्वविहारसन्तोषः कामसुखावाप्तिरिति।
त्रिवर्गगुणनिर्वृत्तिर्य्यस्य नित्यं गृहाश्रमे। स सुखान्यनुभूयेह शिष्टानां गतिमाप्नुयात्। ७०००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उञ्छवृत्तिर्गृहस्थो यः स्वधर्म्मचरणे रतः। त्यक्तकामसुखारम्भः स्वर्गस्तस्य न दुर्लभः।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे एकनवत्यधिकशततोऽध्यायः॥ १९१ ॥

॥ भृगुरुवाच ॥ वानप्रस्थाः खल्वपि धर्म्ममनुसरन्तः पुण्यानि तीर्थानि नदीप्रस्रवणानि सुविविक्तेष्वरण्येषु मृगमहिषवराहशार्दूलवनगजाकीर्णेषु तपस्यन्तो ऽनुसञ्चरन्ति त्यक्तग्राम्यवस्त्राभ्यवहारोपभोगा वन्यौषधिफलमूलपर्णपरिमितविचित्रनियताहाराः स्थानासनिनो भूमिपाषाणसिकताशर्क्करावालुकाभस्मशायिनः काशकुशचर्म्मवल्कलसम्वृताङ्गाः केशश्मश्रुनखलोमधारिणो नियतकालोपस्पर्शनाः अस्कन्दितकालबलिहोमानुष्ठायिनः समित्कुशकुसुमोपहारसंमार्ज्जनलब्धविश्रामाः शीतोष्णवर्षपवनविष्टम्भविभिन्नसर्व्वत्वचो विविधनियमोपयोगचर्य्यानुष्ठानविहितपरिशुष्कमांसशोणितत्वगस्थिभूता धृतिपराः सत्त्वयोगाच्छरीराण्युद्वहन्ते।

यस्त्वेतां नियतश्चर्य्यां ब्रह्मर्षिविहितां चरेत्। स दहेदग्निवद्दोषान् जयेल्लोकांश्च दुर्ज्जयान्।

परिव्राजकानां पुनराचारः। तद्यथा। विमुच्याग्निधनकलत्रपरिवर्हणसङ्गेष्वात्मानं स्नेहपाशानवधूय परिव्रजन्ति। समलोष्टाश्मकाञ्चनास्त्रिवर्गप्रवृत्तेष्वसक्तबुद्धयः अरिमित्रोदासीनानां तुल्यदर्शनाः स्थावरजरायुजाण्डजस्वेदजोद्भिज्जानां भूतानां वाङ्मनःकर्म्मभिरनभिद्रोहिणो ऽनिकेताः पर्व्वतपुलिनवृक्षमूलदेवतायतनान्यनुचरन्तो वासार्थमुपेयुर्नगरं ग्रामं वा नगरे पञ्चरात्रिका ग्रामे चैकरात्रिकाः। प्रविश्य च प्राणधारणार्थं द्विजातीनां भवनान्यसङ्कीर्णकर्म्मणामुपतिष्ठेयुः। पात्रपतितायाचितभैक्ष्याः कामक्रोधदर्पलोभमोहकार्पण्यदम्भपरिवादाभिमानहिंसानिवृत्ता इति। ७००५

॥ भवन्ति चात्र श्लोकाः॥

अभयं सर्व्वभूतेभ्यो दत्त्वा यश्चरते मुनिः। न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित्।

कृत्वाऽग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति। विप्रस्तु भैक्षोपगतैर्हविर्भिश्चिताग्निना स व्रजते हि लोकान्।

मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसंकल्पितयुक्तबुद्धिः। अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मलोकं श्रयते द्विजातिः।

॥ भरद्वाज उवाच॥ अस्माल्लोकात् परो लोकः श्रूयते नोपलभ्यते। तमहं ज्ञातुमिच्छामि तद्भवान् वक्तुमर्हति।

॥ भृगुरुवाच॥ उत्तरे हिमवत्पार्श्वे पुण्ये सर्व्वगुणान्विते। पुण्यः क्षेम्यश्च काम्यश्च स परो लोक उच्यते। ७०१०

तत्र ह्यपापकर्म्माणः शुचयोऽत्यन्तनिर्म्मलाः। लोभमोहपरित्यक्ता मानवा निरुपद्रवाः।

स स्वर्गसदृशो देशस्तत्र युक्ताः शुभा गुणाः। काले मृत्युः प्रभवति स्पृशन्ति व्याधयो न च।

न लोभः परदारेषु स्वदारनिरतो जनः। नान्योन्यं वध्यते तत्र द्रव्येषु च न विस्मयः।

परो ह्यधर्म्मो नैवास्ति सन्देहो नापि जायते। कृतस्य तु फलं तत्र प्रत्यक्षमुपलभ्यते।

पानाशनासनोपेताः प्रासादभवनाश्रयाः। सर्व्वकामैर्वृताः केचिद्धेमाभरणभूषिताः। ७०१५

प्राणधारणमात्रन्तु केषाञ्चिदुपपद्यते। श्रमेण महता केचित् कुर्व्वन्ति प्राणधारणं।

इह धर्म्मपराः केचित् केचिन्नैकृतिका नराः। सुखिता दुःखिताः केचिन्निर्द्धना धनिनोऽपरे।

इह श्रमो भयं मोहः क्षुधा तीव्रा च जायते। लोभश्चार्थकृतो नृणां येन मुह्यन्त्यपण्डिताः।

इह वार्त्ता बहुविधा धर्म्माधर्म्मस्य कारिणः। यस्तद्वेदोभयं प्राज्ञः पाप्मना न स लिप्यते।

सोपधं निकृतिस्तेयं परिवादो ह्यसूयिता। परोपघातो हिंसा च पैशुन्यमनृतं तथा। ७०२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतानासेवते यस्तु तपस्तस्य प्रहीयते । यस्त्वेतान्नाचरेद्विद्वांस्तपस्तस्य विवर्द्धते ।
इह चिन्ता बहुविधा धर्म्माधर्म्मस्य कर्म्मणः । कर्म्मभूमिरियं लोके इह कृत्वा शुभाशुभं ।
शुभैः शुभमवाप्नोति तथाशुभमथान्यथा । इह प्रजापतिः पूर्व्वं देवाः सर्षिगणास्तथा ।
इष्टेष्टतपसः पूता ब्रह्मलोकमुपाश्रिताः । उत्तरः पृथिवीभागः सर्व्वपुण्यतमः शुभः ।
इहस्थास्तत्र जायन्ते ये वै पुण्यकृतो जनाः । यदि सत्कारमृच्छन्ति तिर्य्यग्योनिषु चापरे । ७०२५
क्षीणायुषस्तथा चान्ये नश्यन्ति पृथिवीतले । अन्योन्यभक्षणासक्ता लोभमोहसमन्विताः ।
इहैव परिवर्त्तन्ते न ते यान्त्युत्तरां दिशं । ये गुरून् पर्य्युपासन्ते नियता ब्रह्मचारिणः ।
पन्थानं सर्व्वलोकानां विजानन्ति मनीषिणः । इत्युक्तोऽयं मया धर्म्मः संक्षिप्तो ब्रह्मनिर्म्मितः ।
धर्म्माधर्म्मौ हि लोकस्य यो वै वेत्ति स बुद्धिमान् ।
॥ भीष्म उवाच ॥ इत्युक्तो भृगुणा राजन् भरद्वाजः प्रतापवान् । भृगुं परमधर्म्मात्मा विस्मितः प्रत्यपूजयत् । ७०३०
एष ते प्रसवो राजन् जगतः संप्रकीर्त्तितः । निखिलेन महाप्राज्ञ किम्भूयः श्रोतुमिच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भृगुभरद्वाजसंवादे द्विनवत्यधिकशततोऽध्यायः ॥ १९२ ॥
॥ युधिष्ठिर उवाच ॥ आचारस्य विधिं तात प्रोच्यमानं त्वयाऽनघ । श्रोतुमिच्छामि धर्म्मज्ञ सर्व्वज्ञो ह्यसि मे मतः ।
॥ भीष्म उवाच ॥ दुराचारा दुर्विचेष्टा दुष्प्रज्ञाः प्रियसाहसाः । असन्तस्त्विति विख्याताः सन्तश्चाचारलक्षणाः ।
पुरीषं यदि वा मूत्रं ये न कुर्व्वन्ति मानवाः । राजमार्गे गवां मध्ये धान्यमध्ये च ते शुभाः ।
शौचमावश्यकं कृत्वा देवतानाञ्च तर्पणं । धर्म्ममाहुर्म्मनुष्याणामुपस्पृश्य नदीं तरेत् । ७०३५
सूर्य्यं सदोपतिष्ठेत न च सूर्य्योदये स्वपेत् । सायं प्रातर्ज्जपेत् सन्ध्यां तिष्ठन् पूर्व्वां तथेतरां ।
पञ्चार्द्रो भोजनं भुञ्ज्यात् प्राङ्मुखो मौनमास्थितः । न निन्द्यादन्नभक्ष्यांश्च स्वादु स्वादु च भक्षयेत् ।
आर्द्रपाणिः समुत्तिष्ठेन्नार्द्रपादः स्वपेन्निशि । देवर्षिर्नारदः प्राह एतदाचारलक्षणं ।
शुचिं देशमनड्वाहं देवं गोष्ठं चतुष्पथं । ब्राह्मणं धार्म्मिकं चैत्यं नित्यं कुर्य्यात् प्रदक्षिणं ।
अतिथीनाञ्च सर्व्वेषां प्रेष्याणां स्वजनस्य च । सामान्यं भोजनं भृत्यैः पुरुषस्य प्रशस्यते । ७०४०
सायम्प्रातर्म्मनुष्याणामशनं देवनिर्म्मितं । नान्तरा भोजनं दृष्टमुपवासी तथा भवेत् ।
होमकाले तथा जुह्वदृतुकाले तथा व्रजन् । अनन्यस्त्रीजनः प्राज्ञो ब्रह्मचारी तथा भवेत् ।
अमृतं ब्राह्मणोच्छिष्टं जनन्या हृदयं कृतं । तज्जनाः पर्य्युपासन्ते सत्यं सन्तः समासते ।
लोष्टमर्द्दी तृणच्छेदी नखखादी च यो नरः । नित्योच्छिष्टः शङ्कुशुको नेहायुर्विन्दते महत् ।
यजुषा संस्कृतं मांसं निवृत्तो मांसभक्षणात् । न भक्षयेद्वृथा मांसं पृष्ठमांसञ्च वर्ज्जयेत् । ७०४५
स्वदेशे परदेशे वा अतिथिं नोपवासयेत् । काम्यकर्म्मफलं लब्ध्वा गुरूणामुपपादयेत् ।
गुरुभ्य आसनं देयं कर्त्तव्यञ्चाभिवादनं । गुरूनभ्यर्च्य युज्यन्ते आयुषा यशसा श्रिया ।
नेक्षेतादित्यमुद्यन्तं न च नग्नां परस्त्रियं । मैथुनं सततं धर्म्यं गुह्ये चैव समाचरेत् ।
तीर्थानां हृदयं तीर्थं शुचीनां हृदयं शुचिः । सर्व्वमार्य्यकृतं चौक्ष्यं वालसंस्पर्शनानि च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दर्शने दर्शने नित्यं सुखप्रश्नमुदाहरेत् । सायम्प्रातश्च विप्राणां प्रदिष्टमभिवादनं । ७०५०
देवागारे गवां मध्ये ब्राह्मणानां क्रियापथे । स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ।
सायम्प्रातश्च विप्राणां पूजनञ्च यथाविधि । पण्यानां शोभते पण्यं कृषीणां वाद्यते कृषिः ।
बहुकारश्च शस्यानां वाह्ये वाहो गवां तथा । सम्पन्नं भोजने नित्यं पानीये तर्पणं तथा ।
सुशृतं पायसे ब्रूयाद्यवाग्वां कृशरे तथा । श्मश्रुकर्म्मणि संप्राप्ते क्षुते स्नानेऽथ भोजने ।
व्याधितानाञ्च सर्व्वेषामायुष्यमभिनन्दनं । प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् । ७०५५
सह स्त्रियाऽथ शयनं सह भोज्यञ्च वर्ज्जयेत् । त्वंकारं नामधेयञ्च ज्येष्ठानां परिवर्ज्जयेत् ।
अवराणां समानानामुभयेषां न दुष्यति । हृदयं पापवृत्तानां पापमाख्याति वैकृतं ।
ज्ञानपूर्व्वं विनश्यन्ति गूहमाना महाजने । ज्ञानपूर्व्वं कृतं पापं छादयन्त्यबहुश्रुताः ।
नैनं मनुष्याः पश्यन्ति पश्यन्त्येव दिवौकसः । पापेनापिहितं पापं पापमेवानुवर्त्तते ।
धर्म्मेणापिहितो धर्म्मो धर्म्ममेवानुवर्त्तते । धार्म्मिकेण कृतो धर्म्मो धर्म्ममेवानुवर्त्तते । ७०६०
पापं कृतं न स्मरतीह मूढो विवर्त्तमानस्य तदेति कर्त्तुः । राहुर्यथा चन्द्रमुपैति चापि तथाऽबुधं पापमुपैति कर्म्म ।
आशया सञ्चितं द्रव्यं दुःखैनैवोपभुज्यते । तद्बुधा न प्रशंसन्ति मरणं न प्रतीक्षते ।
मानसं सर्व्वभूतानां धर्म्ममाहुर्म्मनीषिणः । तस्मात् सर्व्वेषु भूतेषु मनसा शिवमाचरेत् ।
एक एव चरेद्धर्म्मं नास्ति धर्म्मे सहायता । केवलं विधिमासाद्य सहायः किं करिष्यति ।
धर्म्मो योनिर्म्मनुष्याणां देवानाममृतं दिवि । प्रेत्यभावे सुखं धर्म्माच्छश्वत्तैरुपभुज्यते । ७०६५

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि आचारविधौ त्रिनवत्यधिकशतोऽध्यायः ॥ १९३ ॥

॥ युधिष्ठिर उवाच ॥ अध्यात्मं नाम यदिदं पुरुषस्येह चिन्त्यते । यदध्यात्मं यथा चैतत्तन्मे ब्रूहि पितामह ।
कुतः सृष्टमिदं विश्वं ब्रह्मन् स्थावरजङ्गमं । प्रलये च कमभ्येति तन्मे वक्तुमिहार्हसि ।
॥ भीष्म उवाच ॥ अध्यात्ममिति मां पार्थ यदेतदनुपृच्छसि । तद्व्याख्यास्यामि ते तात श्रेयस्करतमं सुखं ।
सृष्टिप्रलयसंयुक्तमाचारैः परिदर्शितं । यज्ज्ञात्वा पुरुषो लोके प्रीतिं सौख्यञ्च विन्दति ।
फललाभश्च तस्य स्यात् सर्व्वभूतहितञ्च तत् । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं । ७०७०
महाभूतानि भूतानां सर्व्वेषां प्रभवाप्ययौ । यतः सृष्टानि तत्रैव तानि यान्ति पुनः पुनः ।
महाभूतानि भूतेभ्यः सागरस्योर्म्मयो यथा । प्रसार्य्य च यथाऽङ्गानि कूर्म्मः संहरते पुनः ।
तद्वद्भूतानि भूतात्मा सृष्टानि हरते पुनः । महाभूतानि पञ्चैव सर्व्वभूतेषु भूतकृत् ।
अकरोत्तेषु वैषम्यं तत्तु जीवो न पश्यति । शब्दः श्रोत्रं तथा खानि त्रयमाकाशयोनिजं ।
वायोः स्पर्शस्तथा चेष्टा त्वक् चैव त्रितयं स्मृतं । रूपं चक्षुस्तथा पाकस्त्रिविधं तेज उच्यते । ७०७५
रसः क्लेदश्च जिह्वा च त्रयो जलगुणाः स्मृताः । घ्रेयं घ्राणं शरीरञ्च एते भूमिगुणास्त्रयः ।
महाभूतानि पञ्चैव षष्ठञ्च मन उच्यते । इन्द्रियाणि मनश्चैव विज्ञानान्यस्य भारत ।
सप्तमी बुद्धिरित्याहुः क्षेत्रज्ञः पुनरष्टमः । चक्षुरालोचनायैव संशयं कुरुते मनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बुद्धिरध्यवसानाय क्षेत्रज्ञः साक्षिवत् स्थितः । ऊर्द्धं पादतलाभ्यां यदर्व्वाक् चोर्द्धञ्च पश्यति ।
एतेन सर्व्वमेवेदं विद्ध्यभिव्याप्तमन्तरं । पुरुषैरिन्द्रियाणीह वेदितव्यानि कृत्स्नशः ।
तमो रजश्च सत्त्वञ्च तेऽपि भावास्तदाश्रिताः । एतां बुद्ध्वा नरो बुद्ध्या भूतानामागतिं गतिं ।
समवेक्ष्य शनैश्चैव लभते शममुत्तमं । गुणैर्न्नेनीयते बुद्धिर्बुद्धिरेवेन्द्रियाण्यपि ।
मनःषष्ठानि भूतानि बुद्ध्यभावे कुतो गुणाः । इति तन्मयमेवैतत् सर्व्वं स्थावरजङ्गमं ।
प्रलीयते चोद्भवति तस्मान्निर्द्दिश्यते तथा । येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ।
जिघ्रति घ्राणमित्याहूरसं जानाति जिह्वया । त्वचा स्पर्शयते स्पर्शं बुद्धिर्व्विक्रियते सकृत् ।
येन प्रार्थयते किञ्चित्तदा भवति तन्मनः । अधिष्ठानानि बुद्धेर्हि पृथगर्थानि पञ्चधा ।
इन्द्रियाणीति यान्याहुस्तान्यदृश्योऽधितिष्ठति । पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्त्तते ।
कदाचिल्लभते प्रीतिं कदाचिदनुशोचति । न सुखेन न दुःखेन कदाचिदपि वर्त्तते ।
एवं नराणां मनसि त्रिषु भावेष्ववस्थिता । सेयं भावात्मिका भावांस्त्रीनेतानतिवर्त्तते ।
सरितां सागरो भर्त्ता महावेलामिवोर्म्मिमान् । अतिभावगता बुद्धिर्भावे मनसि वर्त्तते ।
प्रवर्त्तमानन्तु रजस्तद्भावमनुवर्त्तते । इन्द्रियाणि हि सर्व्वाणि प्रवर्त्तयति सा तदा ।
प्रीतिः सत्वं रजः शोकस्तमो मोहस्तु ते त्रयः । ये ये च भावा लोकेऽस्मिन् सर्व्वेष्वेतेषु वै त्रिषु ।
इति बुद्धिगतिः सर्व्वा व्याख्याता तव भारत । इन्द्रियाणि च सर्व्वाणि विजेतव्यानि धीमता ।
सत्त्वं रजस्तमश्चैव प्राणिनां संश्रिताः सदा । त्रिविधा वेदना चैव सर्व्वसत्त्वेषु दृश्यते ।
सात्विकी राजसी चैव तामसी चेति भारत । सुखस्पर्शः सत्त्वगुणो दुःखस्पर्शो रजोगुणः ।
तमोगुणेन संयुक्तौ भवतो व्यावहारिकौ । तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्त्तते सात्त्विको भाव इत्याचक्षीत तत्तथा । अथ यद्दुःखसंयुक्तमप्रीतिकरमात्मनः ।
प्रवृत्तं रज इत्येव तन्न संरभ्य चिन्तयेत् । अथ यन्मोहसंयुक्तमव्यक्तविषयं भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् । प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता ।
कथञ्चिदभिवर्त्तन्त इत्येते सात्त्विका गुणाः । अतुष्टिः परितापश्च शोको लोभस्तथा क्षमा ।
लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुभिः । अवमानस्तथा मोहः प्रमादः स्वप्नतन्द्रिता ।
कथञ्चिदभिवर्त्तन्ते विविधास्तामसा गुणाः । दूरगं बहुधागामि प्रार्थनासंशयात्मकं ।
मनः सुनियतं यस्य स सुखी प्रेत्य चेह च । सत्त्वक्षेत्रज्ञयोरेतदन्तरं पश्य सूक्ष्मयोः ।
सृजते तु गुणानेक एको न सृजते गुणान् । मशकोडुम्बरौ वाऽपि संप्रयुक्तौ यथा सदा ।
अन्योन्यमेतौ स्यातान्च सम्प्रयोगस्तथा तयोः । पृथग्भूतौ प्रकृत्या तौ सम्प्रयुक्तौ च सर्व्वदा ।
यथा मत्स्यो जलञ्चैव सम्प्रयुक्तौ तथैव तौ । न गुणा विदुरात्मानं स गुणान् वेत्ति सर्व्वशः ।
परिद्रष्टा गुणानान्तु संस्रष्टा मन्यते तथा । इन्द्रियैस्तु प्रदीपार्थं कुरुते बुद्धिसप्तमैः ।
निर्व्विचेष्टैरजानद्भिः परमात्मा प्रदीपवत् । सृजते हि गुणान् सत्त्वं क्षेत्रज्ञः परिपश्यति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सम्प्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवः। आश्रयो नास्ति सत्त्वस्य क्षेत्रज्ञस्य च कश्चन।
सत्त्वं मनः संसृजते न गुणान् वै कदाचन। रश्मींस्तेषां समनसा यदा सम्यङ्नियच्छति। ७११०
तदा प्रकाशतेऽस्यात्मा घटे दीपो ज्वलन्निव। त्यक्त्वा यः प्राकृतं कर्म्म नित्यमात्मरतिर्मुनिः।
सर्व्वभूतात्मभूतस्मात् स गच्छेदुत्तमां गतिं। यथा वारिचरः पक्षी सलिलेन न लिप्यते।
एवमेव कृतप्रज्ञो भूतेषु परिवर्त्तते। एवं स्वभावमेवैतत् स्वबुद्ध्या विहरेन्नरः।
अशोचन्नप्रहृष्यंश्च समो विगतमत्सरः। स्वभावयुक्त्या युक्तस्तु स नित्यं सृजते गुणान्।
ऊर्णनाभिर्यथा सूत्रं विज्ञेयास्तन्तुवद्गुणाः। प्रध्वस्ता न निवर्त्तन्ते निवृत्तिर्नोपलभ्यते। ७११५
प्रत्यक्षेण परोक्षन्तदनुमानेन सिध्यति। एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे।
उभयं सम्प्रधार्य्यैतद्व्यवस्येत यथामति। इतीमं हृदयग्रन्थिं बुद्धिभेदमयं दृढं।
विमुच्य सुखमासीत न शोचेच्छिन्नसंशयः। मलिनाः प्राप्नुयुः शुद्धिं यथा पूर्णां नदीं नराः।
अवगाह्य सुविद्वांसो विद्धि ज्ञानमिदं तथा। महानद्या हि पारज्ञस्तप्यते न तदन्यथा।
न तु तप्यति तत्त्वज्ञः फले ज्ञाते तरत्युत। एवं ये विदुरध्यात्मं कैवल्यं ज्ञानमुत्तमं। ७१२०
एतां बुद्ध्वा नरः सर्व्वां भूतानामागतिं गतिं। अवेक्ष्य च शनैर्ब्बुद्ध्या लभते शमनन्ततः।
त्रिवर्गो यस्य विदितः प्रेक्ष्य यश्च विमुञ्चति। अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः।
न चात्मा शक्यते द्रष्टुमिन्द्रियैश्च विभागशः। तत्र तत्र विसृष्टैश्च दुर्व्वार्य्यैश्चाकृतात्मभिः।
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणं। विज्ञाय तद्धि मन्यन्ते कृतकृत्या मनीषिणः।
न भवति विदुषां ततो भयं यदविदुषां सुमहद्भयं भवेत्। नहि गतिरधिकाऽस्ति कस्यचित् सति हि गुणे प्रवदन्त्य
तुल्यतां। ७१२५
यः करोत्यनभिसन्धिपूर्व्वकं तच्च निर्णुदति यत् पुरा कृतं। नाप्रियं तदुभयं कुतः प्रियं तस्य तज्जनयतीह कुर्व्वतः।
लोकमातुरमसूयते जनस्तस्य तज्जनयतीह सर्व्वतः। लोक आतुरजनान्विरावितंस्तत्तदेव बहु पश्य शोचतः।
तत्र पश्य कुशलानशोचतो ये विदुस्तदुभयं पदं सतां।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि चतुर्न्नवत्यधिकशततोऽध्यायः॥ १९४ ॥
॥ भीष्म उवाच ॥ हन्त वक्ष्यामि ते पार्थ ध्यानयोगञ्चतुर्व्विधं। यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छन्तीह महर्षयः।
यथा स्वनुष्ठितं ध्यानं तथा कुर्व्वन्ति योगिनः। महर्षयो ज्ञानतृप्ता निर्व्वाणगतमानसाः। ७१३०
नावर्त्तन्ते पुनः पार्थ मुक्ताः संसारदोषतः। जन्मदोषपरिक्षीणाः स्वभावे पर्य्यवस्थिताः।
निर्द्वन्द्वा नित्यसत्त्वस्था विमुक्ता निष्परिग्रहाः। असङ्गान्यविवादीनि मनःशान्तिकराणि च।
तत्र ध्यानेन संश्लिष्टमेकाग्रं धारयेन्मनः। पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः।
शब्दं न विन्देच्छ्रोत्रेण स्पर्शं त्वचा न वेदयेत्। रूपं न चक्षुषा विन्द्याज्जिह्वया न रसांस्तथा।
घ्रेयाण्यपि च सर्व्वाणि जह्याद्ध्यानेन योगवित्। पञ्चवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्य्यवान्। ७१३५
ततो मनसि संगृह्य पञ्चवर्गं विचक्षणः। समादध्यान्मनो भ्रान्तमिन्द्रियैः सह पञ्चभिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation; Jalgaon

विसञ्चारि निरालम्बं पञ्चद्वारं चलाचलं । पूर्व्वं ध्यानपथे धीरः समादध्यान्मनोऽन्तरा ।
इन्द्रियाणि मनश्चैव यदा पिण्डीकरोत्ययं । एष ध्यानपथः पूर्व्वो मया समनुवर्णितः ।
तस्य तत् पूर्व्वसंरुद्धमात्मनः षष्ठमान्तरं । स्फुरिष्यति समुद्भ्रान्ता विद्युदम्बुधरे यथा ।
जलबिन्दुर्यथा लोलः पर्णस्थः सर्व्वतश्चलः । एवमेवास्य चित्तञ्च भवति ध्यानवर्त्मनि । ७१४०
समाहितं क्षणं किञ्चिद्ध्यानवर्त्मनि तिष्ठति । पुनर्वायुपथं भ्रान्तं मनो भवति वायुवत् ।
अनिर्वेदो गतक्लेशो गततन्द्रीरमत्सरी । समादध्यात् पुनश्चेतो ध्यानेन ध्यानयोगवित् ।
विचारश्च विवेकश्च वितर्कश्चोपजायते । मुनेः समादधानस्य प्रथमं ध्यानमादितः ।
मनसा क्लिश्यमानस्तु समाधानञ्च कारयेत् । न निर्व्वेदं मुनिर्गच्छेत् कुर्य्यादेवात्मनो हितं ।
पांशुभस्मकरीषाणां यथा वै राशयश्चिताः । सहसा वारिणा सिक्ता न यान्ति परिभावनं । ७१४५
किञ्चित् स्निग्धं यथा च स्याच्छुष्कचूर्णमभावितं । क्रमशस्तु शनैर्गच्छेत् सर्व्वन्तत् परिभावनं ।
एवमेवेन्द्रियग्रामं शनैः संपरिभावयेत् । संहरेत् क्रमशश्चैव स सम्यक् प्रशमिष्यति ।
स्वयमेवं मनश्चैवं पञ्चवर्गञ्च भारत । पूर्व्वं ध्यानपथे स्थाप्य नित्ययोगेन शाम्यति ।
न तत् पुरुषकारेण न च दैवेन केनचित् । सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ।
सुखेन तेन संयुक्तो रंस्यते ध्यानकर्म्मणि । गच्छन्ति योगिनो ह्येवं निर्व्वाणं तन्निरामयं । ७१५०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि अध्यात्मे पञ्चनवत्यधिकशतोऽध्यायः ॥ १९५ ॥
॥ युधिष्ठिर उवाच ॥ चातुराश्रम्यमुक्तन्ते राजधर्म्मास्तथैव च । नानाश्रयाश्च बहव इतिहासाः पृथग्विधाः ।
श्रुतास्त्वत्तः कथाश्चैव धर्म्मयुक्ता महामते । सन्देहोऽस्ति तु कश्चिन्मे तद्भवान् वक्तुमर्हति ।
जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत । किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ।
जप्यस्य च विधिं कृत्स्नं वक्तुमर्हसि मेऽनघ । जापका इति किञ्चैतत् सांख्ययोगक्रियाविधिः ।
किं यज्ञविधिरेवैष किमेतज्जप्यमुच्यते । एतन्मे सर्व्वमाचक्ष्व सर्व्वज्ञो ह्यसि मे मतः । ७१५५
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । यमस्य यत् पुरा वृत्तं कालस्य ब्राह्मणस्य च ।
सांख्ययोगौ तु यावुक्तौ मुनिभिर्म्मोक्षदर्शिभिः । संन्यास एव वेदान्ते वर्त्तते जपनं प्रति ।
वेदवादाश्च निर्वृत्ताः शान्ता ब्रह्मण्यवस्थिताः । सांख्ययोगौ तु यावुक्तौ मुनिभिः शुभदर्शिभिः ।
मार्गौ तावप्युभावेतौ संश्रितौ न च संश्रितौ । यथा संश्रूयते राजन् कारणं चात्र वक्ष्यते ।
मनः समाधिरत्रापि तथेन्द्रियजयः स्मृतः । सत्यमग्निपरीचारो विविक्तानाञ्च सेवनं । ७१६०
ध्यानं तपो दमः क्षान्तिरनसूया मिताशनं । विषयप्रतिसंहारो मितजल्पस्तथा शमः ।
एष प्रवर्त्तको यज्ञो निवर्त्तकमथो शृणु । यथा निवर्त्तते कर्म्म जपतो ब्रह्मचारिणः ।
एतत् सर्व्वमशेषेण यथोक्तं परिवर्त्तयेत् । त्रिविधं मार्गमासाद्य व्यक्ताव्यक्तमनाश्रयं ।
कुशोच्चयनिषण्णः सन् कुशहस्तः कुशैः शिखी । कुशैः परिवृतस्तस्मिन् मध्ये छन्नः कुशैस्तथा ।
विषयेभ्यो नमस्कुर्य्याद्विषयान्न च भावयेत् । साम्यमुत्पाद्य मनसा मनस्येव मनो दधत् । ७१६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तद्बुद्ध्या ध्यायति ब्रह्म जपन् वै संहितां हितां। संन्यस्यत्यथ वा तां वै समाधौ पर्य्यवस्थितः।
ध्यानमुत्पादयत्यत्र संहिता बलसंश्रयात्। शुद्धात्मा तपसा दान्तो निवृत्तद्वेषकामवान्।
अरागमोहो निर्द्वन्द्वो न शोचति न सज्जते। न कर्त्ता कारणानाञ्च न कार्य्याणामिति स्थितिः।
न चाहङ्कारयोगेन मनः प्रस्थापयेत् क्वचित्। न चार्थग्रहणे युक्तो नावमानी न चाक्रियः।
ध्यानक्रियापरो युक्तो ध्यानवान् ध्याननिश्चयः। ध्याने समाधिमुत्पाद्य तदपि त्यजति क्रमात्। ७१७०
स वै तस्यामवस्थायां सर्व्वत्यागकृतः सुखं। निरिच्छस्त्यजति प्राणान् ब्राह्मीं संविशते तनुं।
अथवा नेच्छते तत्र ब्रह्मकायनिषेवणं। उत्क्रामति च मार्गस्थो नैव क्वचन जायते।
आत्मबुद्ध्या समास्थाय शान्तीभूतो निरामयः। अमृतं विरजः शुद्धमात्मानं प्रतिपद्यते।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जापकोपाख्याने षण्णवत्यधिकशततोऽध्यायः॥ १९६॥
॥ युधिष्ठिर उवाच॥ गतीनामुत्तमा प्राप्तिः कथिता जापकेष्विह। एकैवैषा गतिस्तेषामुत यान्त्यपरामपि।
॥ भीष्म उवाच॥ शृणुष्वावहितो राजन् जापकानां गतिं विभो। यथा गच्छन्ति निरयाननेकान् पुरुषर्षभ। ७१७५
यथोक्तपूर्व्वं पूर्व्वं यो नानुतिष्ठति जापकः। एकदेशक्रियश्चात्र निरयं स च गच्छति।
अवमानेन कुरुते न प्रीयति न हृष्यति। ईदृशो जापको याति निरये नात्र संशयः।
अहङ्कारकृतश्चैव सर्व्वे निरयगामिनः। पराऽवमानी पुरुषो भविता निरयोपगः।
अभिध्यापूर्व्वकं जप्यं कुरुते यश्च मोहितः। यत्रास्य रागः पतति तत्र तत्रोपपद्यते।
अथैश्वर्य्यप्रवृत्तेषु जापकस्तत्र रज्यते। स एव निरयस्तस्य नासौ तस्मात् प्रमुच्यते। ७१८०
रागेण जापको जप्यं कुरुते तत्र मोहितः। यत्रास्य रागः पतति तत्र तत्रोपपद्यते।
दुर्ब्बुद्धिरकृतप्रज्ञश्चले मनसि तिष्ठति। चलामेव गतिं याति निरयं वा नियच्छति।
अकृतप्रज्ञको बालो मोहं गच्छति जापकः। स मोहान्निरयं याति तत्र गत्वाऽनुशोचति।
दृढग्राही करोमीति जप्यं जपति जापकः। न सम्पूर्णो न संयुक्तो निरयं सोऽनुगच्छति।
॥ युधिष्ठिर उवाच॥ अनिवृत्तं परं यत्तदव्यक्तं ब्रह्मणि स्थितं। तद्भूतो जापकः कस्मात् स शरीरमिहाविशेत्। ७१८५
॥ भीष्म उवाच॥ दुष्प्रज्ञानेन निरया बहवः समुदाहृताः। प्रशस्तं जापकत्वञ्च दोषाश्चैते तदात्मकाः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जापकोपाख्याने सप्तनवत्यधिकशततोऽध्यायः॥ १९७॥
॥ युधिष्ठिर उवाच॥ कीदृशं निरयं याति जापको वर्णयस्व मे। कौतूहलं हि राजन्मे तद्भवान् वक्तुमर्हति।
॥ भीष्म उवाच॥ धर्म्मस्यांशप्रसूतोऽसि धर्म्मिष्ठोऽसि स्वभावतः। धर्म्ममूलाश्रयं वाक्यं शृणुष्वावहितोऽनघ।
अमूनि यानि स्थानानि देवानां परमात्मनां। नानासंस्थानवर्णानि नानारूपफलानि च।
दिव्यानि कामचारीणि विमानानि सभास्तथा। आक्रीडा विविधा राजन् पद्मिन्यश्चैव काञ्चनाः। ७१९०
चतुर्णां लोकपालानां शुक्रस्याथ बृहस्पतेः। मरुतां विश्वदेवानां साध्यानामश्विनोरपि।
रुद्रादित्यवसूनाञ्च तथाऽन्येषां दिवौकसां। एते वै निरयास्तात स्थानस्य परमात्मनः।
अभयञ्चानिमित्तञ्च न तत् क्लेशसमावृतं। द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चतुर्लक्षणवर्ज्जन्तु चतुष्कारणवर्ज्जितं । अप्रहर्षमनानन्दमशोकं विगतक्लमं ।
कालः सम्पद्यते तत्र कालस्तत्र न वै प्रभुः । स कालस्य प्रभूराजन् स्वर्गस्यापि तथेश्वरः । ७१९५
आत्मकेवलतां प्राप्तस्तत्र गत्वा न शोचति । ईदृशं परमं स्थानं निरयास्ते च तादृशाः ।
एते ते निरयाः प्रोक्ताः सर्व्वे एव यथायथं । तस्य स्थानवरस्येह सर्व्वे निरयसंज्ञिताः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जापकोपाख्याने अष्टनवत्यधिकशततोऽध्यायः ॥ १९८ ॥
॥ युधिष्ठिर उवाच ॥ कालमृत्युयमानान्ते इक्ष्वाकोर्ब्राह्मणस्य च । विवादो व्याहृतः पूर्व्वं तद्भवान् वक्तुमर्हति ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । इक्ष्वाकोः सूर्य्यपुत्त्रस्य यद्वृत्तं ब्राह्मणस्य च ।
कालस्य मृत्योश्च तथा यद्वृत्तं तन्निबोध मे । यथा स तेषां संवादो यस्मिन् स्थानेऽपि चाभवत् । ७२००
ब्राह्मणो जापकः कश्चिद्धर्म्मवृत्तो महायशाः । षडङ्गविन्महाप्राज्ञः पैप्पलादिः सकौशिकः ।
तस्यापरोक्षं विज्ञानं षडङ्गेषु बभूव ह । वेदेषु चैव निष्णातो हिमवत्पादसंश्रयः ।
सोऽन्त्यं ब्राह्मं तपस्तेपे संहितां संयतो जपन् । तस्य वर्षसहस्रन्तु नियमेन तथा गतं ।
स देव्या दर्शितः साक्षात् प्रीताऽस्मीति तदा किल । जप्यमावर्त्तयंस्तूष्णीं न स तां किञ्चिदब्रवीत् ।
तस्यानुकम्पया देवी प्रीता समभवत्तदा । वेदमाता ततस्तस्य तज्जप्यं समपूजयत् । ७२०५
समाप्तजप्यस्तूत्थाय शिरसा पादयोस्तदा । पपात देव्या धर्म्मात्मा वचनञ्चेदमब्रवीत् ।
दिष्ट्या देवि प्रसन्ना त्वं दर्शनञ्च गता मम । यदि चापि प्रसन्नाऽसि जप्ये मे रमतां मनः ।
॥ सावित्र्युवाच ॥ किं प्रार्थयसि विप्रर्षे किञ्चेष्टं करवाणि ते । प्रब्रूहि जपतां श्रेष्ठ सर्व्वं तत्ते भविष्यति ।
इत्युक्तः स तदा देव्या विप्रः प्रोवाच धर्म्मवित् । जप्यं प्रति ममेच्छेयं वर्द्धत्विति पुनः पुनः ।
मनसश्च समाधिर्मे वर्द्धेताहरहः शुभे । तत्तथेति ततो देवी मधुरं प्रत्यभाषत । ७२१०
इदञ्चैवापरं प्राह देवी तत्प्रियकाम्यया । निरयं नैव याता त्वं यत्र याता द्विजर्षभाः ।
यास्यसि ब्रह्मणः स्थानमनिमित्तमनिन्दितं । साधये भविता चैतद्यत्त्वयाऽहमिहार्थिता ।
नियतो जप चैकाग्रो धर्म्मस्त्वां समुपैष्यति । कालो मृत्युर्यमश्चैव समायास्यन्ति तेऽन्तिकं ।
भविता च विवादोऽत्र तव तेषाञ्च धर्म्मतः ।
॥ भीष्म उवाच ॥ एवमुक्त्वा भगवती जगाम भवनं स्वकं । ब्राह्मणोऽपि जपन्नास्ते दिव्यं वर्षशतं तथा । ७२१५
सदा दान्तो जितक्रोधः सत्यसन्धोऽनसूयकः । समेप्ते नियमे तस्मिन्नथ विप्रस्य धीमतः ।
साक्षात् प्रीतस्तदा धर्म्मो दर्शयामास तं द्विजं ।
॥ धर्म्म उवाच ॥ द्विजाते पश्य मां धर्म्ममहं त्वां द्रष्टुमागतः । जपस्यास्य फलं यत्तत् संप्राप्तं तच्च मे शृणु ।
जिता लोकास्त्वया सर्व्वे ये दिव्या ये च मानुषाः । देवानां निलयान् साधो सर्व्वानुत्क्रम्य यास्यसि ।
प्राणत्यागं कुरु मुने गच्छ लोकान् यथेप्सितान् । त्यक्त्वात्मनः शरीरञ्च ततो लोकानवाप्स्यसि । ७२२०
॥ ब्राह्मण उवाच ॥ किन्नु लोकैर्हि मे धर्म्म गच्छ त्वञ्च यथासुखं । बहुदुःखसुखं देहं नोत्सृजेयमहं विभो ।
॥ धर्म्म उवाच ॥ अवश्यं भोः शरीरन्ते त्यक्तव्यं मुनिपुङ्गव । स्वर्गमारोह भो विप्र किं वा वै रोचतेऽनघ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ ब्राह्मण उवाच ॥ न रोचये स्वर्गवासं विना देहमहं विभो। गच्छ धर्म्म न मे श्रद्धा स्वर्गं गन्तुं विनात्मना।
॥ धर्म्म उवाच ॥ अलं देहे मनः कृत्वा त्यक्त्वा देहं सुखी भव। गच्छ लोकानरजसो यत्र गत्वा न शोचसि।
॥ ब्राह्मण उवाच ॥ रमे जपन्महाभाग किन्तु लोकैः सनातनैः। सशरीरेण गन्तव्यं मया स्वर्गं न वा विभो। ७२२५
॥ धर्म्म उवाच ॥ यदि त्वं नेच्छसे त्यक्तुं शरीरं पश्य वै द्विज। एष कालस्तथा मृत्युर्यमश्च त्वामुपागताः।
॥ भीष्म उवाच ॥ अथ वैवस्वतः कालो मृत्युश्च त्रितयं विभो। ब्राह्मणं तं महाभागमुपगम्येदमब्रुवन्।
॥ यम उवाच ॥ तपसोऽस्य सुतप्तस्य तथा सुचरितस्य च। फलप्राप्तिस्तव श्रेष्ठा यमोऽहं त्वामुपब्रुवे।
॥ काल उवाच ॥ यथावदस्य जप्यस्य फलं प्राप्तमनुत्तमं। कालस्ते स्वर्गमारोढुं कालोऽहं त्वामुपागतः।
॥ मृत्युरुवाच ॥ मृत्युं मां विद्धि धर्म्मज्ञ रूपिणं स्वयमागतं। कालेन चोदितो विप्र त्वामितो नेतुमद्य वै। ७२३०
॥ ब्राह्मण उवाच ॥ स्वागतं सूर्य्यपुत्त्राय कालाय च महात्मने। मृत्यवे चाथ धर्म्माय किं कार्य्यं करवाणि वः।
॥ भीष्म उवाच ॥ अर्घ्यं पाद्यञ्च दत्त्वा स तेभ्यस्तत्र समागमे। अब्रवीत् परमप्रीतः स्वशक्त्या किं करोमि वः।
तस्मिन्नेवाथ काले तु तीर्थयात्रामुपागतः। इक्ष्वाकुरगमत्तत्र समेता यत्र ते विभो।
सर्व्वानेव तु राजर्षिः संपूज्याथ प्रणम्य च। कुशलप्रश्नमकरोत् सर्व्वेषां राजसत्तमः।
तस्मै सोऽथासनं दत्त्वा पाद्यमर्घ्यं तथैव च। अब्रवीद्ब्राह्मणो वाक्यं कृत्वा कुशलसंविदं। ७२३५
स्वागतं ते महाराज ब्रूहि यद्यदिहेच्छसि। स्वशक्त्या किं करोमीह तद्भवान् प्रब्रवीतु मां।
॥ राजोवाच ॥ राजाऽहं ब्राह्मणश्च त्वं यदा षट्कर्म्मसंस्थितः। ददानि वसु किञ्चित्ते प्रथितं तद्वदस्व मे।
॥ ब्राह्मण उवाच ॥ द्विविधा ब्राह्मणा राजन् धर्म्मश्च द्विविधः स्मृतः। प्रवृत्ताश्च निवृत्ताश्च निवृत्तोऽहं प्रतिग्रहात्।
तेभ्यः प्रयच्छ दानानि ये प्रवृत्ता नराधिप। अहं न प्रतिगृह्णामि किमिष्टं किं ददामि ते।
ब्रूहि त्वं नृपतिश्रेष्ठ तपसा साधयामि किं। ७२४०
॥ राजोवाच ॥ क्षत्त्रियोऽहं न जानामि देहीति वचनं क्वचित्। प्रयच्छ युद्धमित्येवंवादिनः स्मो द्विजोत्तम।
॥ ब्राह्मण उवाच ॥ तुष्यसि त्वं स्वधर्म्मेण तथा तुष्टा वयं नृप। अन्योन्यस्यान्तरं नास्ति यदिष्टं तत्समाचर।
॥ राजोवाच ॥ स्वशक्त्याऽहं ददानीति त्वया पूर्व्वमुदाहृतं। याचे त्वां दीयतां मह्यं जप्यस्यास्य फलं द्विज।
॥ ब्राह्मण उवाच ॥ युद्धं मम सदा वाणी याचतीति विकत्थसे। न च युद्धं मया सार्द्धं किमर्थं याचसे पुनः।
॥ राजोवाच ॥ वाग्वज्रा ब्राह्मणाः प्रोक्ताः क्षत्त्रिया बाहुजीविनः। वाग्युद्धं तदिदं तीव्रं मम विप्र त्वया सह। ७२४५
॥ ब्राह्मण उवाच ॥ सैवाद्यापि प्रतिज्ञा मे स्वशक्त्या किं प्रदीयतां। ब्रूहि दास्यामि राजेन्द्र विभवे सति मा चिरं।
॥ राजोवाच ॥ यत्तद्वर्षशतं पूर्णं जप्यं वै जपता त्वया। फलं प्राप्तं तत् प्रयच्छ मम दित्सुर्भवान् यदि।
॥ ब्राह्मण उवाच ॥ परमं गृह्यतां तस्य फलं यज्जपितं मया। अर्द्धन्त्वमविचारेण फलं तस्य समाप्नुहि।
अथवा सर्व्वमेवेह मामकं जापकं फलं। राजन् प्राप्नुहि कामं त्वं यदि सर्व्वमिहेच्छसि।
॥ राजोवाच ॥ कृतं सर्व्वेण भद्रन्ते जप्यं यद्याचितं मया। स्वस्ति तेऽस्तु गमिष्यामि किञ्च तस्य फलं वद। ७२५०
॥ ब्राह्मण उवाच ॥ फलप्राप्तिं न जानामि दत्तं यज्जपितं मया। अयं धर्म्मश्च कालश्च यमो मृत्युश्च साक्षिणः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ राजोवाच ॥ अज्ञातमस्य धर्म्मस्य फलं किं मे करिष्यति । फलं ब्रवीषि धर्म्मस्य न चेज्जप्यकृतस्य मां ।
प्राप्नोतु तत्फलं विप्रो नाहमिच्छे ससंशयं ।
॥ ब्राह्मण उवाच ॥ नाददेऽपरवक्तव्यं दत्तञ्चास्य फलं मया । वाक्यं प्रमाणं राजर्षे ममाद्य तव चैव हि ।
नाभिसन्धिर्म्मया जप्ये कृतपूर्व्वः कदाचन । जप्यस्य राजशार्दूल कथं वेत्स्याम्यहं फलं । ७२५५
ददस्वेति त्वया चोक्तं ददानीति मया तथा । न वाचं दूषयिष्यामि सत्यं रक्ष स्थिरो भव ।
अथैवं वदतो मेऽद्य वचनं न करिष्यसि । महानधर्म्मो भविता तव राजन्मृषाकृतः ।
न युक्तन्तु मृषावाणीं त्वया वक्तुमरिन्दम । तथा मयाऽप्यभिहितं मिथ्या कर्त्तुं न शक्यते ।
संश्रुतञ्च मया पूर्व्वं ददानीत्यविचारितं । तद्गृहीष्वाविचारेण यदि सत्ये स्थितो भवान् ।
इहागम्य हि मां राजन् जाप्यं फलमयाचिथाः । तन्मे निसृष्टं गृह्णीष्व भव सत्ये स्थिरोऽपि च । ७२६०
नायं लोकोऽस्ति न परो न च पूर्व्वान् स तारयेत् । कुत एव जनिष्यांस्तु मृषावादपरायणः ।
न यज्ञफलदानानि नियमास्तारयन्ति हि । यथा सत्यं परे लोके तथेह पुरुषर्षभ ।
तपांसि यानि चीर्णानि चरिष्यन्ति च यत्तपः । शतैः शतसहस्रैश्च तैः सत्यान्न विशिष्यते ।
सत्यमेकाक्षरं ब्रह्म सत्यमेकाक्षरं तपः । सत्यमेकाक्षरो यज्ञः सत्यमेकाक्षरं श्रुतं ।
सत्यं वेदेषु जागर्त्ति फलं सत्ये परं स्मृतं । सत्याद्धर्म्मो दमश्चैव सर्व्वं सत्ये प्रतिष्ठितं । ७२६५
सत्यं वेदास्तथाऽङ्गानि सत्यं विद्यास्तथा विधिः । व्रतचर्य्या तथा सत्यमोङ्कारः सत्यमेव च ।
प्राणिनां जननं सत्यं सत्यं सन्ततिरेव च । सत्येन वायुरभ्येति सत्येन तपते रविः ।
सत्येन चाग्निर्द्दहति स्वर्गः सत्ये प्रतिष्ठितः । सत्यं यज्ञस्तपो वेदास्तोभा मन्त्राः सरस्वती ।
तुलामारोपितो धर्म्मः सत्यञ्चैवेति नः श्रुतं । समकक्षां तुलयतो यतः सत्यं ततोऽधिकं ।
यतो धर्म्मस्ततः सत्यं सर्व्वं सत्येन वर्द्धते । किमर्थमनृतं कर्म्म कर्त्तुं राजंस्त्वमिच्छसि । ७२७०
सत्ये कुरु स्थिरं भावं मा राजन्ननृतं कृथाः । कस्मात्त्वमनृतं वाक्यं देहीति कुरुषेऽशुभं ।
यदि जप्यफलं दत्तं मया नेषिष्यसे नृप । धर्म्मेभ्यः संपरिभ्रष्टो लोकाननुचरिष्यसि ।
संश्रुत्य यो न दित्सेत याचित्वा यश्च नेच्छति । उभावानृतिकावेतौ न मृषा कर्त्तुमर्हसि ।
॥ राजोवाच ॥ योद्धव्यं रक्षितव्यञ्च क्षत्त्रधर्म्मः किल द्विज । दातारः क्षत्त्रियाः प्रोक्ता गृह्णीयां भवतः कथं ।
॥ ब्राह्मण उवाच ॥ न च्छन्दयामि ते राजन्नापि ते गृहमाव्रजं । इहागम्य तु याचित्वा न गृह्णीषे पुनः कथं । ७२७५
॥ धर्म्म उवाच ॥ अविवादोऽस्तु युवयोर्वित्तं मां धर्म्ममागतं । द्विजो दानफलैर्युक्तो राजा सत्यफलेन च ।
॥ स्वर्ग उवाच ॥ स्वर्गं मां विद्धि राजेन्द्र रूपिणं स्वयमागतं । अविवादोऽस्तु युवयोरुभौ तुल्यफलौ युवां ।
॥ राजोवाच ॥ कृतं स्वर्गेण मे कार्य्यं गच्छ स्वर्ग यथागतं । विप्रो यदीच्छते गन्तुं चीर्णं गृह्णातु मे फलं ।
॥ ब्राह्मण उवाच ॥ बाल्ये यदि स्यादज्ञानान्मया हस्तः प्रसारितः । निवृत्तलक्षणं धर्म्ममुपासे संहितां जपन् ।
निवृत्तं मां चिराद्राजन् विप्रलोभयसे कथं । स्वेन कार्य्यं करिष्यामि त्वत्तो नेच्छे फलं नृप । ७२८०
तपः स्वाध्यायशीलोऽहं निवृत्तश्च प्रतिग्रहात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

॥ राजोवाच ॥ यदि विप्र विसृष्टन्ते जप्यस्य फलमुत्तमं। आवयोर्यत् फलं किञ्चित् सहितं नौ तदस्त्विह।
द्विजाः प्रतिग्रहे युक्ता दातारो राजवंशजाः। यदि धर्म्मः श्रुतो विप्र सहैव फलमस्तु नौ।
मा वाभूत् सह भोज्यन्नौ मदीयं फलमाप्नुहि। प्रतीच्छ मत्कृतं धर्म्मं यदि ते मय्यनुग्रहः।
॥ भीष्म उवाच ॥ ततो विकृतवेशौ द्वौ पुरुषौ समुपस्थितौ। गृहीत्वाऽन्योन्यमावेश्य कुचैलावूचतुर्व्वचः। ७२८५
न मे धारयसीत्येको धारयामीति चापरः। इहास्ति नौ विवादोऽयमयं राजाऽनुशासकः।
सत्यं ब्रवीम्यहमिदं न मे धारयते भवान्। अनृतं वदसीह त्वमृणन्ते धारयाम्यहं।
तावुभौ सुभृशं तप्तौ राजानमिदमूचतुः। परीक्ष त्वं यथा स्याव नावामिह विगर्हितौ।
॥ विरूप उवाच ॥ धारयामि नरव्याघ्र विकृतस्येह गोः फलं। ददतश्च न गृह्णाति विकृतो मे महीपते।
॥ विकृत उवाच ॥ न मे धारयते किञ्चिद्विरूपोऽयं नराधिप। मिथ्या ब्रवीत्ययं हि त्वां सत्याभासं नराधिप। ७२९०
॥ राजोवाच ॥ विरूप किं धारयते भवानस्य ब्रवीतु मे। श्रुत्वा तथा करिष्येऽहमिति मे धीयते मनः।
॥ विरूप उवाच ॥ शृणुष्वावहितो राजन् यथैतद्धारयाम्यहं। विकृतस्यास्य राजर्षे निखिलेन नराधिप।
अनेन धर्म्मप्राप्त्यर्थं शुभा दत्ता पुराऽनघ। धेनुर्व्विप्राय राजर्षे तपःस्वाध्यायशीलिने।
तस्यास्तस्यायं मया राजन् फलमभ्येत्य याचितः। विकृतेन च मे दत्तं विशुद्धेनान्तरात्मना।
ततो मे सुकृतं कर्म्म कृतमात्मविशुद्धये। गावौ च कपिले क्रीत्वा वत्सले बहुदोहने। ७२९५
ते चोञ्छवृत्तये राजन् मया समपवर्ज्जिते। यथाविधि यथाश्रद्धं तदस्याहं पुनः प्रभो।
इहाद्यैव गृहीत्वा तु प्रयच्छे द्विगुणं फलं। एवं स्यात् पुरुषव्याघ्र कः शुद्धः कोऽत्र दोषवान्।
एवं विवदमानौ स्वस्त्वामिहाभ्यागतौ नृप। कुरु धर्म्ममधर्म्मं वा विनये नौ समादध।
यदि नेच्छति मे दानं यथा दत्तमनेन वै। भवानत्र स्थिरो भूत्वा मार्गे स्थापयिताऽद्य नौ।
॥ राजोवाच ॥ दीयमानं न गृह्णासि ऋणं कस्मात्त्वमद्य वै। यथैव तेऽभ्यनुज्ञातं तथा गृह्णीष्व मा चिरं। ७३००
॥ विकृत उवाच ॥ धारयामीत्यनेनोक्तं ददानीति तथा मया। नायं मे धारयत्यद्य गच्छतां यत्र वाञ्छति।
॥ राजोवाच ॥ ददतोऽस्य न गृह्णासि विषमं प्रतिभाति मे। दण्ड्यो हि त्वं मम मतो नास्त्यत्र खलु संशयः।
॥ विकृत उवाच ॥ मयाऽस्य दत्तं राजर्षे गृह्णीयां तत् कथं पुनः। काममत्रापराधो मे दण्डमाज्ञापय प्रभो।
॥ विरूप उवाच ॥ दीयमानं यदि मया नैषिष्यसि कथञ्चन। नियंस्यति त्वां नृपतिरयं धर्म्मानुशासकः।
॥ विकृत उवाच ॥ स्वं मया याचितेनेह दत्तं कथमिहाद्य तत्। गृह्णीयां गच्छतु भवानभ्यनुज्ञां ददानि ते। ७३०५
॥ ब्राह्मण उवाच ॥ श्रुतमेतत्त्वया राजन्ननयोः कथितं द्वयोः। प्रतिज्ञातं मया यत्ते तद्गृहाणाविचारितं।
॥ राजोवाच ॥ प्रस्तुतं सुमहत् कार्य्यमनयोर्गह्वरं यथा। जापकस्य दृढीकारः कथमेतद्भविष्यति।
यदि तावन्न गृह्णामि ब्राह्मणेनापवर्ज्जितं। कथं न लिप्येयमहं पापेन महताऽद्य वै।
तौ चोवाच स राजर्षिः कृतकार्य्यौ गमिष्यथः। नेदानीं मामिहासाद्य राजधर्म्मो भवेन्मृषा।
स्वधर्म्मः परिपाल्यस्तु राज्ञामिति विनिश्चयः। विप्रधर्म्मश्च गहनो मामनात्मानमाविशत्। ७३१०
॥ ब्राह्मण उवाच ॥ गृहाण धारयेऽहञ्च याचितं संश्रुतं मया। न चेद्गृहीष्यसे राजन् शपिष्ये त्वां न संशयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ राजोवाच ॥ धिग्राजधर्म्मं यस्यायं कार्य्यस्येह विनिश्चयः । इत्यर्थं मे ग्रहीतव्यं कथं तुल्यं भवेदिति ।
एष पाणिरपूर्व्वं मे निक्षेपार्थं प्रसारितः । यन्मे धारयसे विप्र तदिदानीं प्रदीयतां ।
॥ ब्राह्मण उवाच ॥ संहितां जपता यावान् गुणः कश्चित् कृतो मया । तत्सर्व्वं प्रतिगृह्णीष्व यदि किञ्चिदिहास्ति मे ।
॥ राजोवाच ॥ जलमेतन्निपतितं मम पाणौ द्विजोत्तम । सममस्तु सहैवास्तु प्रतिगृह्णातु वै भवान् । ७११५
॥ विरूप उवाच ॥ कामक्रोधौ विद्धि नौ त्वमावाभ्यां कारितो भवान् । सहेति च यदुक्तन्ते समा लोकास्तवास्य च ।
नायं धारयते किञ्चिज्जिज्ञासा त्वत्कृते कृता । कालो धर्म्मस्तथा मृत्युः कामक्रोधौ तथा युवां ।
सर्व्वमन्योन्यनिष्कर्षे निघृष्टं पश्यतस्तव । गच्छ लोकान् जितान् स्वेन कर्म्मणा यत्र वाञ्छसि ।
॥ भीष्म उवाच ॥ जापकानां फलावाप्तिर्म्मया ते सम्प्रदर्शिता । गतिः स्थानञ्च लोकाश्च जापकेन यथा जिताः ।
प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनं । अथवाऽग्निं समायाति सूर्य्यमाविशतेऽपि वा । ७१२०
स तैजसेन भावेन यदि तत्र रमत्युत । गुणांस्तेषां समाधत्ते रागेण प्रतिमोहितः ।
एवं सोमे तथा वायौ भूम्याकाशशरीरगः । स रागस्तत्र वसति गुणांस्तेषां समाचरन् ।
अथ तत्र विरागी स गच्छति त्वथ संशयं । परमव्ययमिच्छन् स तमेवाविशते पुनः ।
अमृताच्चामृतं प्राप्तः शान्तीभूतो निरात्मवान् । ब्रह्मभूतः स निर्द्वन्द्वः सुखी शान्तो निरामयः ।
ब्रह्मस्थानमनावर्त्तमेकमक्षरसञ्ज्ञकं । अदुःखमजरं शान्तं स्थानं तत्प्रतिपद्यते । ७१२५
चतुर्भिर्लक्षणैर्हीनं तथा षड्भिः सषोडशैः । पुरुषं तमतिक्रम्य आकाशं प्रतिपद्यते ।
अथ नेच्छति रागात्मा सर्व्वं तदधितिष्ठति । यच्च प्रार्थयते तच्च मनसा प्रतिपद्यते ।
अथवा वीक्षते लोकान् सर्व्वान्निरयसंज्ञितान् । निस्पृहः सर्व्वतो मुक्तस्तत्र वै रमते सुखं ।
एवमेषा महाराज जापकस्य गतिर्यथा । एतत्ते सर्व्वमाख्यातं किम्भूयः श्रोतुमर्हसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जापकोपाख्याने नवनवत्यधिकशततोऽध्यायः ॥ १९९ ॥
॥ युधिष्ठिर उवाच ॥ किमुत्तरं तदा तौ स्म चक्रतुस्तस्य भाषिते । ब्राह्मणो वाऽथवा राजा तन्मे ब्रूहि पितामह । ७१३०
अथवा तौ गतौ तत्र यदेतत्कीर्त्तितं त्वया । संवादो वा तयोः कोऽभूत्किंवा तौ तत्र चक्रतुः ।
॥ भीष्म उवाच ॥ तथेत्येवं प्रतिश्रुत्य धर्म्मं संपूज्य च प्रभो । यमं कालञ्च मृत्युञ्च स्वर्गं संपूज्य चार्हतः ।
पूर्व्वं ये चापरे तत्र समेता ब्राह्मणर्षभाः । सर्व्वान् सम्पूज्य शिरसा राजानं सोऽब्रवीद्द्विजः ।
फलेनानेन संयुक्तो राजर्षे गच्छ मुख्यतां । भवता चाभ्यनुज्ञातो जपेयं भूय एव हि ।
वरश्च मम पूर्व्वं हि दत्तो देव्या महाबल । श्रद्धा ते जपतो नित्यं भवत्विति विशाम्पते । ७१३५
॥ राजोवाच ॥ यद्येवमफला सिद्धिः श्रद्धा च जपितुं तव । गच्छ विप्र मया सार्द्धं जापकं फलमाप्नुहि ।
॥ ब्राह्मण उवाच ॥ कृतः प्रयत्नः सुमहान् सर्व्वेषां सन्निधाविह । सह तुल्यफलावावां गच्छावो यत्र नौ गतिः ।
व्यवसायं तयोस्तत्र विदित्वा त्रिदशेश्वरः । सह देवैरुपययौ लोकपालैस्तथैव च ।
साध्याश्च विश्वे मरुतो वाद्यानि सुमहान्ति च । नद्यः शैलाः समुद्राश्च तीर्थानि विविधानि च ।
तपांसि संयोगविधिर्व्वेदाः स्तोभाः सरस्वती । नारदः पर्व्वतश्चैव विश्वावसुर्हाहाहूहूः । ७१४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गन्धर्व्वश्चित्रसेनश्च परिवारगणैर्युतः। नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः।
विष्णुः सहस्रशीर्षश्च देवोऽचिन्त्यः समागमत्। अवाद्यन्तान्तरीचे च भेर्य्यस्तूर्य्याणि वा विभो।
पुष्पवर्षाणि दिव्यानि तत्र तेषां महात्मनां। ननृतुश्चाप्सरःसंघास्तत्र तत्र समन्ततः।
अथ स्वर्गस्तथारूपी ब्राह्मणं वाक्यमब्रवीत्। संसिद्धस्त्वं महाभागस्त्वञ्च सिद्धस्तथा नृप।
अथ तौ सहितौ राजन्नन्योन्यविधिना ततः। विषयप्रतिसंहारमुभावेव प्रचक्रतुः। ७२५५
प्राणापानावथोदानं समानं व्यानमेव च। एवं तौ मनसि स्थाप्य दधतुः प्राणयोर्म्मनः।
उपस्थाप्योदरे तौ च नासिकाग्रमधो भ्रुवोः। भ्रूकुट्याञ्चैव मनसा शनैर्द्धारयतस्तदा।
निश्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी समाहितौ। जितात्मानौ तथाधाय मूर्द्धन्यात्मानमेव च।
तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः। ज्योतिर्ज्वाला सुमहती जगाम त्रिदिवं तदा।
हाहाकारस्तदा दिक्षु सर्व्वेषां सुमहानभूत्। तज्ज्योतिस्तूयमानं स्म ब्रह्माणं प्राविशत्तदा। ७२६०
ततः स्वागतमित्याह तत्तेजः प्रपितामहः। प्रादेशमात्रं पुरुषं प्रत्युद्गम्य विशाम्पते।
भूयश्चैवापरं प्राह वचनं मधुरं तदा। जापकैस्तुल्यफलता योगानां नात्र संशयः।
योगस्य तावदेतेभ्यः प्रत्यक्षं फलदर्शनं। जापकानां विशिष्टन्तु प्रत्युत्थानं समाहितं।
उष्यतां मयि चेत्युक्त्वाऽचेतयत्सततं पुनः। अथास्यं प्रविवेशास्य ब्राह्मणो विगतज्वरः।
राजाऽप्येतेन विधिना भगवन्तं पितामहं। यथैव द्विजशार्दूलस्तथैव प्राविशत्तदा। ७२६५
स्वयम्भुवमथो देवा अभिवाद्य ततोऽब्रुवन्। जापकानां विशिष्टन्तु प्रत्युत्थानं समाहितं।
जापकार्थमयं यत्नो यदर्थं वयमागताः। कृतपूजाविमौ तुल्यौ त्वया तुल्यफलाविमौ।
योगजापकयोर्दृष्टं फलं सुमहदद्य वै। सर्व्वान् लोकानतिक्रम्य गच्छेतां यत्र वाञ्छितं।
॥ ब्रह्मोवाच ॥ महास्मृतिं पठेद्यस्तु तथैवानुस्मृतिं शुभां। तावप्येतेन विधिना गच्छेतां मत्सलोकतां।
यश्च योगे भवेद्भक्तः सोऽपि नास्त्यत्र संशयः। विधिनाऽनेन देहान्ते मम लोकानवाप्नुयात्। ७२७०
साधये गम्यताञ्चैव यथास्थानानि सिद्धये।
॥ भीष्म उवाच ॥ इत्युक्त्वा स तदा देवस्तत्रैवान्तरधीयत। आमन्त्र्य च ततो देवा ययुः स्वं स्वं निवेशनं।
ते च सर्व्वे महात्मानो धर्म्मं सत्कृत्य तत्र वै। पृष्ठतोऽनुययू राजन् सर्व्वे सुप्रीतचेतसः।
एतत् फलं जापकानां गतिश्चैषा प्रकीर्त्तिता। यथाश्रुतं महाराज किम्भूयः श्रोतुमिच्छसि।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जापकोपाख्याने द्विशतोऽध्यायः॥ २००॥
॥ युधिष्ठिर उवाच ॥ किं फलं ज्ञानयोगस्य वेदानां नियमस्य च। भूतात्मा च कथं ज्ञेयस्तन्मे ब्रूहि पितामह। ७२७५
॥ भीष्म उवाच ॥ तत्राप्युदाहरन्तीममितिहासं पुरातनं। मनोः प्रजापतेर्व्वादं महर्षेश्च बृहस्पतेः।
प्रजापतिं श्रेष्ठतमं प्रजानां देवर्षिसंघप्रवरो महर्षिः। बृहस्पतिः प्रश्नमिमं पुराणं पप्रच्छ शिष्योऽथ गुरुं प्रणम्य।
यत्कारणं यत्र विधिः प्रवृत्तो ज्ञाने फलं यत्प्रवदन्ति विप्राः। यन्मन्त्रशब्दैरकृतप्रकाशं तदुच्यतां मे भगवन् यथावत्।
यदार्थशास्त्रागममन्त्रविद्भिर्यज्ञैरनेकैरथ गोप्रदानैः। फलं महद्भिर्यदुपास्यते च किन्तत् कथं वा भविता क्व वा तत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महो महौजाः पवनोऽन्तरीक्षं जलौकसश्चैव जलं दिवञ्च । दिवौकसश्चापि यतः प्रसूतास्तदुच्यतां मे भगवन् पुराणं । ७२७०
ज्ञानं यतः प्रार्थयते नरो वै ततस्तदर्थो भवति प्रवृत्तिः । न चाप्यहं वेद परं पुराणं मिथ्याप्रवृत्तिञ्च कथं नु कुर्य्यां ।
ऋक्सामसंघांश्च यजूंषि चापि छन्दांसि नक्षत्रगतिं निरुक्तं । अधीत्य च व्याकरणं सकल्पं शिक्षाञ्च भूतप्रकृतिं न वेद्मि ।
स मे भवान् शंसतु सर्व्वमेतत् सामान्यशब्दैश्च विशेषणैश्च । स मे भवान् शंसतु तावदेतज्ज्ञाने फलं कर्म्मणि वा यदस्ति ।
यथा च देहाच्च्यवते शरीरी पुनः शरीरञ्च यथाऽभ्युपैति ।
॥ मनुरुवाच ॥ यद्यत् प्रियं यस्य सुखं तदाहुस्तदेव दुःखं प्रवदन्त्यनिष्टं । इष्टञ्च मे स्यादितरच्च न स्यादेतत्कृते कर्म्मविधिः प्रवृत्तः । ७२७५
इष्टन्त्वनिष्टञ्च न मां भजेतेत्येतत् कृते ज्ञानविधिः प्रवृत्तः । कामात्मकाश्छन्दसि कर्म्मयोगा एभिर्विमुक्तः परमश्नुवीत ।
नानाविधे कर्म्मपथे सुखार्थी नरः प्रवृत्तो निरयं प्रयाति ।
॥ बृहस्पतिरुवाच ॥ इष्टन्त्वनिष्टञ्च सुखासुखे च साशीस्त्वचच्छन्दति कर्म्मभिश्च ।
॥ मनुरुवाच ॥ एभिर्विमुक्तः परमाविवेश एतत्कृते कर्म्मविधिः प्रवृत्तः । कामात्मकांश्छन्दति कर्म्मयोग एभिर्विमुक्तः परमाददीत ।
आत्मादिभिः कर्म्मभिरिध्यमानो धर्म्मे प्रवृत्तो द्युतिमान् सुखार्थी । परं हि तत् कर्म्मपथादपेतं निराशिषं ब्रह्म परं ह्युपैति । ७२८०
प्रजाः सृष्टा मनसा कर्म्मणा च द्वावेवैतौ सत्पथौ लोकजुष्टौ । दृष्टं कर्म्म शाश्वतञ्चान्तवच्च मनस्त्यागः कारणं नान्यदस्ति ।
स्वेनात्मना चक्षुरिव प्रणेता निशात्यये तपसा संवृतात्मा । ज्ञानन्तु विज्ञानगुणेन युक्तं कर्म्माशुभं पश्यति वर्ज्जनीयं ।
सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्ज्जयन्ति । अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टं ।
कृत्स्नस्तु मन्त्रो विधिवत्प्रयुक्तो यज्ञा यथोक्तास्त्विह दक्षिणाश्च । अन्नप्रदानं मनसः समाधिः पञ्चात्मकं कर्म्मफलं वदन्ति ।
गुणात्मकं कर्म्म वदन्ति वेदास्तस्मान्मन्त्रो मन्त्रपूर्व्वं हि कर्म्म । विधिर्व्विधेयं मनसोपपत्तिः फलस्य भोक्ता तु तथा शरीरी । ७२८५
शब्दाश्च रूपाणि रसाश्च पुण्याः स्पर्शाश्च गन्धाश्च शुभास्तथैव । नरो न संस्थानगतःप्रभुः स्यादेतत् फलं सिध्यति कर्म्म लोके ।
यद्यच्छरीरेण करोति कर्म्म शरीरयुक्तः समुपाश्नुते तत् । शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरं ।
वाचा तु यत्कर्म्म करोति किञ्चिद्वाचैव सर्व्वं समुपाश्नुते तत् । मनस्तु यत्कर्म्म करोति किञ्चिन्मनस्थ एवायमुपाश्नुते तत् ।
यथा यथा कर्म्मगुणं फलार्थी करोत्ययं कर्म्मफले निविष्टः । तथा तथाऽयं गुणसंप्रयुक्तः शुभाशुभं कर्म्मफलं भुनक्ति ।
मत्स्यो यथा स्रोत इवाभिपाती तथा कृतं पूर्व्वमुपैति कर्म्म । शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यते वै परमः शरीरी । ७२९०
यतो जगत् सर्व्वमिदं प्रसूतं ज्ञात्वात्मवन्तो व्यतियान्ति यत्तत् । यन्मन्त्रशब्दैरकृतप्रकाशं तदुच्यमानं शृणु मे परं यत् ।
रसैर्विमुक्तं विविधैश्च गन्धैरशब्दमस्पर्शमरूपवच्च । अग्राह्यमव्यक्तमवर्णमेकं पञ्चप्रकारान् ससृजे प्रजानां ।
न स्त्री पुमान्नापि नपुंसकञ्च न सन्न चासत् सदसच्च तन्न । पश्यन्ति यद्ब्रह्मविदो मनुष्यास्तदक्षरं न क्षरतीति विद्धि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुबृहस्पतिसंवादे एकाधिकद्विशतोऽध्यायः ॥ २०१ ॥
॥ मनुरुवाच ॥ अक्षरात् खं ततो वायुस्ततो ज्योतिस्ततो जलं । जलात् प्रसूता जगती जगत्यां जायते जगत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतैः शरीरैर्जलमेव गत्वा जलाच्च तेजः पवनोऽन्तरीक्षं । खाद्वै निवर्त्तन्ति न भाविनस्ते मोक्षञ्च ते वै परमाप्नुवन्ति । ७३९५
नोष्णं न शीतं मृदु नापि तीक्ष्णं नाम्लं कषायं मधुरं न तिक्तं । न शब्दवन्नापि च गन्धवत्तन्न रूपवत्तत् परमस्वभावं ।
स्पर्शन्तनुर्वेद रसञ्च जिह्वा घ्राणञ्च गन्धान् श्रवणौ च शब्दान् । रूपाणि चक्षुर्न च तत्परं यत् गृह्णन्त्यनध्यात्मविदो मनुष्याः ।
निवर्त्तयित्वा रसनां रसेभ्यो घ्राणञ्च गन्धाच्छ्रवणौ च शब्दात् । स्पर्शात्त्वचं रूपगुणात्तु चक्षुस्ततः परं पश्यति स्वं स्वभावं ।
यतो गृहीत्वा हि करोति यच्च यस्मिंश्च तामारभते प्रवृत्तिं । यस्मिंश्च यद्येन च यश्च कर्त्ता यत्कारणन्ते समुदायमाहुः ।
यद्वाऽप्यभूद्व्यापकं साधकञ्च यन्मन्त्रवत् स्थास्यति चापि लोके । यः सर्व्वहेतुः परमात्मकारी तत् कारणं कार्य्यमतो यदन्यत् । ७४००
यथा हि कश्चित् सुकृतैर्मनुष्यः शुभाशुभं प्राप्नुतेऽथाविरोधात् । एवं शरीरेषु शुभाशुभेषु स्वकर्म्मजैर्ज्ञानमिदं निबद्धं ।
यथा प्रदीप्तः पुरतः प्रदीपः प्रकाशमन्यस्य करोति दीप्यन् । तथेह पञ्चेन्द्रियदीपवृक्षा ज्ञानप्रदीप्ताः परवन्त एव ।
यथा च राज्ञो बहवो ह्यमात्याः पृथक् प्रमाणं प्रवदन्ति युक्ताः । तद्वच्छरीरेषु भवन्ति पञ्च ज्ञानैकदेशाः परमः स तेभ्यः ।
यथाऽर्च्चिषोऽग्नेः पवनस्य वेगो मरीचयोऽर्कस्य नदीषु चापः । गच्छन्ति चायान्ति च सञ्चरन्त्यस्तद्वच्छरीराणि शरीरिणान्तु ।
यथा च कश्चित् परशुं गृहीत्वा धूमं न पश्येज्ज्वलनञ्च काष्ठे । तद्वच्छरीरोदरपाणिपादं छित्त्वा न पश्यन्ति ततो यदन्यत् । ७४०५
तान्येव काष्ठानि यथा विमथ्य धूमञ्च पश्येत् ज्वलनञ्च योगात् । तद्वत् सबुद्धिः सममिन्द्रियात्मा बुधः परं पश्यति तं स्वभावं ।
यथात्मनोऽङ्गं पतितं पृथिव्यां स्वप्नान्तरे पश्यति चात्मनोऽन्यत् । श्रोत्रादियुक्तः सुमहान् सबुद्धिर्लिङ्गात्तथा गच्छति लिङ्गमन्यत् ।
उत्पत्तिवृद्धिव्ययसन्निपातैर्न युज्यतेऽसौ परमः शरीरी । अनेन लिङ्गेन तु लिङ्गमन्यद्गच्छत्यदृष्टः फलसन्नियोगात् ।
न चक्षुषा पश्यति रूपमात्मनो न चापि संस्पर्शमुपैति किञ्चित् । न चापि तैः साधयते तु कार्य्यं ते तं न पश्यन्ति स पश्यते तान् ।
यथा समीपे ज्वलतोऽनलस्य सन्तापजं रूपमुपैति कश्चित् । न चापरं रूपगुणं बिभर्त्ति तथैव तद्दृश्यति रूपमस्य । ७४१०
तथा मनुष्यः परिमुच्य कायमदृश्यमन्यद्विशते शरीरं । विसृज्य भूतेषु महत्सु देहं तदाश्रयञ्चैव बिभर्त्ति रूपं ।
खं वायुमग्निं सलिलं तथोर्व्वीं समं ततोऽभ्याविशते शरीरी । नानाश्रयाः कर्म्मसु वर्त्तमानाः श्रोत्रादयः पञ्चगुणान् श्रयन्ते ।
श्रोत्रं खतो घ्राणमथो पृथिव्यास्तेजोमयं रूपमथो विपाकः । जलाश्रयं तेज उक्तं रसश्च वाय्वात्मकः स्पर्शकृतो गुणश्च ।
महत्सु भूतेषु वसन्ति पञ्च पञ्चेन्द्रियार्थाश्च तथेन्द्रियेषु । सर्व्वाणि चैतानि मनोनुगानि बुद्धिं मनोऽन्वेति मनः स्वभावं ।
शुभाशुभं कर्म्म कृतं यदन्यत्तदेव प्रत्याददते स्वदेहे । मनोऽनुवर्त्तन्ति परावराणि जलौकसः स्रोत इवानुकूलं । ७४१५
चलं यथा दृष्टिपथं परैति सूक्ष्मं महद्रूपमिवाभिभाति । स्वरूपमालोचयते च रूपं परं तथा बुद्धिपथं परैति ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुबृहस्पतिसंवादे द्व्यधिकद्विशततोऽध्यायः ॥ २०२ ॥

॥ मनुरुवाच ॥ यदिन्द्रियैस्तूपहितं पुरस्तात् प्राप्तान् गुणान् संस्मरते चिराय । तेष्विन्द्रियेषूपहतेषु पश्चात् स बुद्धिरूपः परमस्वभावः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2,Equipment Heritage Foundation, Jalgaon

यथेन्द्रियार्थान् युगपत् समन्तान्नोपेक्षते कृत्स्नमतुल्यकालं । तथा चलं सञ्चरते स विद्वांस्तस्मात् स एकः परमः शरीरी ।
रजस्तमः सत्त्वमथो तृतीयं गच्छत्यसौ स्थानगुणान् विरूपान् । तथेन्द्रियाण्याविशते शरीरी हुताशनं वायुरिवेन्धनस्थं ।
न चक्षुषा पश्यति रूपमात्मनो न पश्यति स्पर्शनमिन्द्रियाणां । न श्रोत्रलिङ्गं श्रवणेन दर्शनं तथा कृतं पश्यति तद्विन श्यति ।
श्रोत्रादीनि न पश्यन्ति स्वं स्वमात्मानमात्मना । सर्व्वज्ञः सर्व्वदर्शी च सर्व्वज्ञस्तानि पश्यति
यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा । न दृष्टपूर्व्वं मनुजैर्न च तन्नास्ति तावता ।
तद्वद्भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवानसौ । अदृष्टपूर्व्वश्चक्षुर्भ्यां न चासौ नास्ति तावता ।
पश्यन्नपि यथा लक्ष्म जगत् सोमेन विन्दति । एवमस्ति न चोत्पन्नं न च तन्न परायणं ।
रूपवन्तमरूपत्वादुदयास्तमने बुधाः । धिया समनुपश्यन्ति तद्गताः सवितुर्गतिं ।
तथा बुद्धिप्रदीपेन दूरस्थं सुविपश्चितः । प्रत्यासन्नं निनीषन्ते ज्ञेयं ज्ञानाभिसंहितं ।
न हि खल्वनुपायेन कश्चिदर्थोऽभिसिध्यति । सूत्रजालैर्यथा मत्स्यान् बध्नन्ति जलजीविनः ।
मृगैर्म्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा । गजानाञ्च गजैरेवं ज्ञेयं ज्ञानेन गृह्यते ।
अहिरेव ह्यहेः पादान् पश्यतीति हि नः श्रुतं । तद्वन्मूर्त्तिषु मूर्त्तिस्थं ज्ञेयं ज्ञानेन पश्यति
नोत्सहन्ते यथा वेत्तुमिन्द्रियैरिन्द्रियाण्यपि । तथैवेह परा बुद्धिः परं बोध्यं न पश्यति ।
यथा चन्द्रो ह्यमावास्यामलिङ्गत्वान्न दृश्यते । न च नाशोऽस्य भवति तथा विद्धि शरीरिणं ।
क्षीणकोषो ह्यमावास्यां चन्द्रमा न प्रकाशते । तद्वन्मूर्त्तिविमुक्तोऽसौ शरीरी नोपलभ्यते ।
यथाकाशान्तरं प्राप्य चन्द्रमा भ्राजते पुनः । तद्वल्लिङ्गान्तरं प्राप्य शरीरी भ्राजते पुनः ।
जन्म वृद्धिः क्षयश्चास्य प्रत्यक्षेणोपलभ्यते । सा तु चान्द्रमसी वृत्तिर्न तु तस्य शरीरिणः ।
उत्पत्तिवृद्धिव्ययतो यथा स इति गृह्यते । चन्द्र एव त्वमावास्यां तथा भवति मूर्त्तिमान् ।
नोपसर्पद्विमुञ्चद्वा शशिनं दृश्यते तमः । विसृजंश्चोपसर्पंश्च तद्वत् पश्य शरीरिणं ।
यथा चन्द्रार्कसंयुक्तं तमस्तदुपलभ्यते । तद्वच्छरीरसंयुक्तः शरीरीत्युपलभ्यते ।
यथा चन्द्रार्कनिर्म्मुक्तः स राहुर्नोपलभ्यते । तद्वच्छरीरनिर्म्मुक्तः शरीरी नोपलभ्यते ।
यथा चन्द्रो ह्यमावास्यां नक्षत्रैर्युज्यते गतः । तद्वच्छरीरनिर्म्मुक्तः फलैर्युज्यति कर्म्मणः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुवृहस्पतिसंवादे त्र्यधिकद्विशतोऽध्यायः ॥ २०३
॥ मनुरुवाच ॥ यथा व्यक्तमिदं शेते स्वप्ने चरति चेतनं । ज्ञानमिन्द्रियसंयुक्तं तद्वत् प्रेत्य भवाभवौ ।
यथाऽम्भसि प्रसन्ने तु रूपं पश्यति चक्षुषा । तद्वत् प्रसन्नेन्द्रियत्वाज्ज्ञेयं ज्ञानेन पश्यति ।
स एव लुलिते तस्मिन् यथा रूपं न पश्यति । तथेन्द्रियाकुलीभावे ज्ञेयं ज्ञानेन पश्यति ।
अबुद्धिरज्ञानकृता अबुद्ध्या दुष्यते मनः । दुष्टस्य मनसः पञ्च सम्प्रदुष्यन्ति मानसाः ।
अज्ञानतृप्तो विषयेष्ववगाढो न तृप्यते । अदृष्टवच्च भूतात्मा विषयेभ्यो निवर्त्तते ।
तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् । निवर्त्तते तदा तर्षः पापमन्तगतं यदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

विषयेषु तु संसर्गाच्छाश्वतस्य तु संश्रयात् । मनसा चान्यथा काङ्क्षन् परं न प्रतिपद्यते ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः । यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ।
प्रसृतैरिन्द्रियैर्दुःखी तैरेव नियतैः सुखी । तस्मादिन्द्रियरूपेभ्यो यच्छेदात्मानमात्मना ।
इन्द्रियेभ्यो मनः पूर्व्वं बुद्धिः परतरा ततः । बुद्धेः परतरं ज्ञानं ज्ञानात् परतरं महत् ।
अव्यक्तात् प्रसृतं ज्ञानं ततो बुद्धिस्ततो मनः । मनः श्रोत्रादिभिर्युक्तं शब्दादीन् साधु पश्यति । १४५०
यस्तांस्त्यजति शब्दादीन् सर्व्वांश्च व्यक्तयस्तथा । विमुञ्चेत् प्राकृतान् ग्रामांस्तान्मुक्त्वाऽमृतमश्नुते ।
उद्यन् हि सविता यद्वत् सृजते रश्मिमण्डलं । स एवास्तमुपागच्छंस्तदेवात्मनि यच्छति ।
अन्तरात्मा तथा देहमाविश्येन्द्रियरश्मिभिः । प्राप्येन्द्रियगुणान् पञ्च सोऽस्तमावृत्य गच्छति ।
प्रणीतं कर्म्मणा मार्गं नीयमानः पुनः पुनः । प्राप्नोत्ययं कर्म्मफलं प्रवृत्तं धर्म्ममात्मवित् ।
विषया विनिवर्त्तन्ते निराहारस्य देहिनः । रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते । १४५५
बुद्धिः कर्म्मगुणैर्हीना यदा मनसि वर्त्तते । तदा सम्पद्यते ब्रह्म तत्रैव प्रलयं गतं ।
अस्पर्शनमशृण्वानमनास्वादमदर्शनं । अघ्राणमवितर्कञ्च सत्त्वं प्रविशते परं ।
मनस्याकृतयो मग्ना मनस्त्वभिगतं मतिं । मतिस्त्वभिगता ज्ञानं ज्ञानञ्चाभिगतं परं ।
इन्द्रियैर्म्मनसः सिद्धिर्न बुद्धिं बुध्यते मनः । न बुद्धिर्बुध्यतेऽव्यक्तं सूक्ष्मं त्वेतानि पश्यति ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुबृहस्पतिसंवादे चतुरधिकद्विशततोऽध्यायः ॥ २०४ ॥
॥ मनुरुवाच ॥ दुःखोपघाते शारीरे मानसे चाप्युपस्थिते । यस्मिन्न शक्यते कर्त्तुं यत्नस्तं नानुचिन्तयेत् । १४६०
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् । चिन्त्यमानं हि चाभ्येति भूयश्चापि प्रवर्त्तते ।
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः । एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ।
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः । आरोग्यं प्रियसंवासो गृध्येत्तत्र न पण्डितः ।
न जानपदिकं दुःखमेकः शोचितुमर्हति । अशोचन् प्रतिकुर्व्वीत यदि पश्येदुपक्रमं ।
सुखाद्बहुतरं दुःखं जीविते नास्ति संशयः । स्निग्धस्य चेन्द्रियार्थेषु मोहान्मरणमप्रियं । १४६५
परित्यजति यो दुःखं सुखं वाऽप्युभयं नरः । अभ्येति ब्रह्म सोऽत्यन्तं न ते शोचन्ति पण्डिताः ।
दुःखमर्था हि युज्यन्ते पालने न च ते सुखं । दुःखेन चाधिगम्यन्ते नाशमेषां न चिन्तयेत् ।
ज्ञानं ज्ञेयाभिनिर्वृत्तं विद्धि ज्ञानगुणं मनः । प्रज्ञाकरणसंयुक्तं ततो बुद्धिः प्रवर्त्तते
यदा कर्म्मगुणापेता बुद्धिर्म्मनसि वर्त्तते । तदा प्रज्ञायते ब्रह्म ध्यानयोगसमाधिना ।
सेयं गुणवती बुद्धिर्गुणेष्वेवाभिवर्त्तते । अपरादभिनिःसृत्य गिरेः शृङ्गादिवोदकं । १४७०
यदा निर्गुणमाप्नोति ध्यानं मनसि पूर्व्वजं । तदा प्रज्ञायते ब्रह्म निकषं निकषे यथा ।
मनस्त्वपहृतं पूर्व्वमिन्द्रियार्थनिदर्शकं । न समक्षगुणापेक्षि निर्गुणस्य निदर्शकं ।
सर्व्वाण्येतानि संवार्य्य द्वाराणि मनसि स्थितः । मनस्येकाग्रतां कृत्वा तत्परं प्रतिपद्यते ।
यथा महान्ति भूतानि निवर्त्तन्ते गुणक्षये । तथेन्द्रियाण्युपादाय बुद्धिर्म्मनसि वर्त्तते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदा मनसि सा बुद्धिर्व्वर्त्ततेऽन्तरचारिणी। व्यवसायगुणोपेता तदा सम्पद्यते मनः। ७४७५
गुणवद्भिर्गुणोपेतं यदा ध्यानगुणं मनः। तदा सर्व्वान् गुणान् हित्वा निर्गुणं प्रतिपद्यते।
अव्यक्तस्येह विज्ञाने नास्ति तुल्यं निदर्शनं। यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात्
तपसा चानुमानेन गुणैर्जात्या श्रुतेन च। निनीषेत् परमं ब्रह्म विशुद्धेनान्तरात्मना।
गुणहीनो हि तं मार्गं बहिः समनुवर्त्तते। गुणाभावात् प्रकृत्या वा निस्तर्क्यं ज्ञेयसम्मितं।
नैर्गुण्याद्ब्रह्म चाप्नोति सगुणत्वान्निवर्त्तते। गुणप्रचारिणी बुद्धिर्हुताशन इवेन्धने। ७४८०
यथा पञ्च विमुक्तानि इन्द्रियाणि स्वकर्म्मभिः। तथा हि परमं ब्रह्म विमुक्तं प्रकृतेः परं।
एवं प्रकृतितः सर्व्वे प्रवर्त्तन्ते शरीरिणः। निवर्त्तन्ते निवृत्तौ च स्वर्गञ्चैवोपयान्ति च।
पुरुषः प्रकृतिर्बुद्धिर्व्विषयाश्चेन्द्रियाणि च। अहङ्कारोऽभिमानश्च समूहो भूतसंज्ञकः।
एतस्याद्या प्रवृत्तिस्तु प्रधानात् सम्प्रवर्त्तते। द्वितीया मिथुनव्यक्तिमविशेषान्नियच्छति।
धर्म्मादुत्कृष्यते श्रेयस्तथा श्रेयोऽप्यधर्म्मतः। रागवान् प्रकृतिं ह्येति विरक्तो ज्ञानवान् भवेत्। ७४८५

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुवृहस्पतिसंवादे पञ्चाधिकद्विशतोऽध्यायः॥ २०५॥

॥ मनुरुवाच ॥ यदा तैः पञ्चभिः पञ्च युक्तानि मनसा सह। अथ तद्द्रक्ष्यते ब्रह्म मणौ सूत्रमिवार्पितं।
तदेव च यथा सूत्रं सुवर्णे वर्त्तते पुनः। मुक्तास्वथ प्रवालेषु मृण्मये रजते तथा।
तद्वद्गोऽश्वमनुष्येषु तद्वद्धस्तिमृगादिषु। तद्वत्कीटपतङ्गेषु प्रसक्तात्मा स्वकर्म्मभिः।
येन येन शरीरेण यद्यत् कर्म्म करोत्ययं। तेन तेन शरीरेण तत्तत्फलमुपाश्नुते।
यथा ह्येकरसा भूमिरोषध्यर्थानुसारिणी। तथा कर्म्मानुगा बुद्धिरन्तरात्मानुदर्शिनी। ७४९०
ज्ञानपूर्व्वा भवेल्लिप्सा लिप्सापूर्व्वाऽभिसन्धिता। अभिसन्धिपूर्व्वकं कर्म्म कर्म्ममूलं ततः फलं।
फलं कर्म्मात्मकं विद्यात् कर्म्म ज्ञेयात्मकं तथा। ज्ञेयं ज्ञानात्मकं विद्याज्ज्ञानं सदसदात्मकं।
ज्ञानानाञ्च फलानाञ्च ज्ञेयानां कर्म्मणां तथा। क्षयान्ते यत्फलं दिव्यं ज्ञानं ज्ञेयप्रतिष्ठितं।
महद्धि परमं भूतं यत् प्रपश्यन्ति योगिनः। अबुधास्तन्न पश्यन्ति ह्यात्मस्थं गुणबुद्धयः।
पृथिवीरूपतो रूपमपामिह महत्तरं। अद्भ्यो महत्तरं तेजस्तेजसः पवनो महान्। ७४९५
पवनाच्च महद्व्योम तस्मात् परतरं मनः। मनसो महती बुद्धिर्बुद्धेः कालो महान् स्मृतः।
कालात् स भगवान् विष्णुर्यस्य सर्व्वमिदं जगत्। नादिर्न मध्यं नैवान्तस्तस्य देवस्य विद्यते।
अनादित्वादमध्यत्वादनन्तत्वाच्च सोऽव्ययः। अत्येति सर्व्वदुःखानि दुःखं ह्यन्तवदुच्यते।
तद्ब्रह्म परमं प्रोक्तं तद्धाम परमं पदं। तद्गत्वा कालविषयाद्विमुक्ता मोक्षमाश्रिताः।
गुणेष्वेते प्रकाशन्ते निर्गुणत्वात्ततः परं। निवृत्तिलक्षणो धर्म्मस्तथाऽनन्त्याय कल्पते। ७५००
ऋचो यजूंषि सामानि शरीराणि व्यपाश्रिताः। जिह्वाग्रेषु प्रवर्त्तन्ते यत्नसाध्या विनाशिनः।
न चैवमिष्यते ब्रह्म शरीराश्रयसम्भवं। न यत्नसाध्यं तद्ब्रह्म नादिमध्यं न चान्तवत्।
ऋचामादिस्तथा साम्नां यजुषामादिरुच्यते। अन्तश्चादिमतां दृष्टो न त्वादिर्ब्रह्मणः स्मृतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनादित्वादनन्तत्वात्तदनन्तमथाव्ययं । अव्ययत्वाच निर्द्दुःखं द्वन्द्वाभावस्ततः परं ।
अदृष्टतोऽनुपायाच प्रतिसन्धेश्च कर्म्मणः । न तेन मर्त्याः पश्यन्ति येन गच्छन्ति तत्परं । ७५०५
विषयेषु च संसर्गाच्छाश्वतस्य च दर्शनात् । मनसा चान्यदाकाङ्क्षन् परं न प्रतिपद्यते ।
गुणान् यदिह पश्यन्ति तदिच्छन्त्यपरे जनाः । परं नैवाभिकाङ्क्षन्ति निर्गुणत्वाद्गुणार्थिनः ।
गुणैर्यस्त्ववरैर्युक्तः कथं विद्यात् परान् गुणान् । अनुमानाद्धि गन्तव्यं गुणैरवयवैः परं ।
सूक्ष्मेण मनसा विद्मो वाचा वक्तुं न शक्नुमः । मनो हि मनसा ग्राह्यं दर्शनेन च दर्शनं ।
ज्ञानेन निर्म्मलीकृत्य बुद्धिं बुद्ध्या मनस्तथा । मनसा चेन्द्रियग्राममक्षरं प्रतिपद्यते । ७५१०

बुद्धिप्रहीणो मनसा समृद्धो निराशिषं निर्गुणमभ्युपैति । परन्त्यजन्तीह विलोड्यमाना हुताशनं वायुरिवेन्धनस्थं ।
गुणादाने विप्रयोगे च तेषां मनः सदा बुद्धिपरावराभ्यां । अनेनैव विधिना सम्प्रवृत्तो गुणादाने ब्रह्मशरीरमेति ।
अव्यक्तात्मा पुरुषो व्यक्तकर्म्मा सोऽव्यक्तत्वं गच्छति ह्यन्तकाले । तैरेवायं चेन्द्रियैर्वर्द्धमानैर्ग्लायद्भिर्व्वा वर्त्तते कामरूपः ।
सर्व्वैरयञ्चेन्द्रियैः सम्प्रयुक्तो देहं प्राप्तः पञ्चभूताश्रयः स्यात् । नासामर्थ्याद्गच्छति कर्म्मणेह हीनस्तेन परमेणाव्ययेन ।
पृथ्व्या नरः पश्यति नान्तमस्या ह्यन्तस्त्वस्या भविता चेति विद्धि । परं नयन्तीह विलोड्यमानं यथा प्लवं वायुरिवार्णवस्थं । ७५१५

दिवाकरो गुणमुपलभ्य निर्गुणो यथा भवेदपगतरश्मिमण्डलः । तथा ह्यसौ मुनिरिह निर्व्विशेषवान् स निर्गुणं प्रविशति ब्रह्म चाव्ययं ।

अनागतं सुकृतवतां परां गतिं स्वयम्भुवं प्रभवनिधानमव्ययं । सनातनं यदमृतमव्ययं ध्रुवं विचार्य्य तत् परममृतत्वमश्नुते ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मनुबृहस्पतिसंवादे षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ पुण्डरीकाक्षमच्युतं । कर्त्तारमकृतं विष्णुं भूतानां प्रभवाप्ययं ।
नारायणं हृषीकेशं गोविन्दमपराजितं । तत्त्वेन भरतश्रेष्ठ श्रोतुमिच्छामि केशवं ।
॥ भीष्म उवाच ॥ श्रुतोऽयमर्थो रामस्य जामदग्न्यस्य जल्पतः । नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च । ७५२०
असितो देवलस्तात वाल्मीकिश्च महातपाः । मार्कण्डेयश्च गोविन्दे कथयत्यद्भुतं महत् ।
केशवो भरतश्रेष्ठ भगवानीश्वरः प्रभुः । पुरुषः सर्व्वमित्येव श्रूयते बहुधा विभुः ।
किन्तु यानि विदुर्ल्लोके ब्राह्मणाः शार्ङ्गधन्वनि । महात्मनि महाबाहो शृणु तानि युधिष्ठिर ।
यानि चाहुर्म्मनुष्येन्द्र ये पुराणविदो जनाः । कर्म्माणि त्विह गोविन्दे कीर्त्तयिष्यामि तान्यहं ।
महाभूतानि भूतात्मा महात्मा पुरुषोत्तमः । वायुर्ज्योतिस्तथा चापः खञ्च गाञ्चानुकल्पयत् । ७५२५
स दृष्ट्वा पृथिवीञ्चैव सर्व्वभूतेश्वरः प्रभुः । अप्स्वेव शयनञ्चक्रे महात्मा पुरुषोत्तमः ।
सर्व्वतेजोमयस्तस्मिञ्छयानः पुरुषोत्तमः । सोऽग्रजं सर्व्वभूतानां सङ्कर्षणमकल्पयत् ।
आश्रयं सर्व्वभूतानां मनसेतीह शुश्रुम । स धारयति भूतानि उभे भूतभविष्यती ।
ततस्तस्मिन् महाबाहो प्रादुर्भूते महात्मनि । भास्करप्रतिमं दिव्यं नाभ्यां पद्ममजायत ।
स तत्र भगवान्देवः पुष्करे भ्राजयन्दिशः । ब्रह्मा समभवत्तात सर्व्वभूतपितामहः । ७५३०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मिन्नपि महाबाहो प्रादुर्भूते महात्मनि । तमसा पूर्व्वजो जज्ञे मधुर्नाम महासुरः ।
तमुग्रमुग्रकर्म्माणमुग्रं कर्म्म समास्थित । ब्रह्मणोऽपचितिं कुर्व्वन् जघान पुरुषोत्तमः ।
तस्य तात बधात् सर्व्वे देवदानवमानवाः । मधुसूदनमित्याहुर्ऋषभं सर्व्वसात्वतां ।
ब्रह्माऽनुससृजे पुत्रान्मानसान्दक्षसप्तमान् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुं ।
मरीचिः काश्यपं तात पुत्रमग्रजमग्रजः । मानसं जनयामास तजसं ब्रह्मवित्तमं ।
अङ्गुष्ठात् ससृजे ब्रह्मा मरीचेरपि पूर्व्वजं । सोऽभवद्भरतश्रेष्ठ दक्षो नाम प्रजापतिः ।
तस्य पूर्व्वमजायन्त दश तिस्रश्च भारत । प्रजापतेर्दुहितरस्तासां ज्येष्ठाभवद्दितिः ।
सर्व्वधर्म्मविशेषज्ञः पुण्यकीर्त्तिर्म्महायशाः । मारीचः काश्यपस्तात सर्व्वासामभवत् पतिः ।
उत्पाद्य तु महाभागस्तासामवरजा दश । ददौ धर्म्माय धर्म्मज्ञो दक्ष एव प्रजापतिः ।
धर्म्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः । विश्वेदेवाश्च साध्याश्च मरुत्वन्तश्च भारत ।
अपराश्च यवीयस्यस्ताभ्योऽन्याः सप्तविंशतिः । सोमस्तासां महाभागः सर्व्वासामभवत् पतिः ।
इतरास्तु व्यजायन्त गन्धर्व्वांस्तुरगान् द्विजान् । गाश्च किम्पुरुषान्मत्स्यानुद्भिज्जांश्च वनस्पतीन् ।
आदित्यानदितिर्ज्जज्ञे देवश्रेष्ठान्महाबलान् । तेषां विष्णुर्वामनोऽभूद्गोविन्दश्चाभवत् प्रभुः ।
तस्य विक्रमणाच्चापि देवानां श्रीर्व्यवर्द्धत । दानवाश्च पराभूता दैतेयी चासुरी प्रजा ।
विप्रचित्तिप्रधानांश्च दानवानसृजद्दनुः । दितिस्तु सर्व्वानसुरान्महासत्त्वानजीजनत् ।
अहोरात्रञ्च कालञ्च यथर्त्तुं मधुसूदनः । पूर्व्वाह्णञ्चापराह्णञ्च सर्व्वमेवानुकल्पयत् ।
अध्याय सोऽसृजन्मेघांस्तथा स्थावरजङ्गमान् । पृथिवीं सोऽसृजद्विश्वां सहितां भूरितेजसा ।
ततः कृष्णो महाभागः पुनरेव युधिष्ठिर । ब्राह्मणानां शतं श्रेष्ठं मुखादेवासृजत् प्रभुः ।
बाहुभ्यां क्षत्त्रियशतं वैश्यानामूरुतः शतं । पद्भ्यां शूद्रशतञ्चैव केशवो भरतर्षभ ।
स एवञ्चतुरो वर्णान् समुत्पाद्य महातपाः । अध्यक्षं सर्व्वभूतानां धातारमकरोत् स्वयं ।
वेदविद्याविधातारं ब्रह्माणममितद्युतिं । भूतमातृगणाध्यक्षं विरूपाक्षञ्च सोऽसृजत् ।
शासितारञ्च पापानां पितॄणां समवर्त्तिनं । असृजत् सर्व्वभूतात्मा निधिपञ्च धनेश्वरं ।
यादसामसृजन्नाथं वरुणञ्च जलेश्वरं । वासवं सर्व्वदेवानामध्यक्षमकरोत् प्रभुः ।
यावद्यावदभूच्छ्रद्धा देहं धारयितुं नृणां । तावत्तावदजीवंस्ते नासीद्यमकृतं भयं ।
न चैषां मैथुनो धर्म्मो बभूव भरतर्षभ । सङ्कल्पादेव चैतेषामपत्यमुपपद्यते ।
ततस्त्रेतायुगे काले संस्पर्शाज्जायते प्रजा । न ह्यभून्मैथुनो धर्म्मस्तेषामपि जनाधिप ।
द्वापरे मैथुनो धर्म्मः प्रजानामभवन्नृप । तथा कलियुगे राजन् द्वन्द्वमापेदिरे जनाः ।
एष भूतपतिस्तात स्वध्यक्षश्च तथोच्यते । निरपेक्षांश्च कौन्तेय कीर्त्तयिष्यामि तच्छृणु ।
दक्षिणापथगामिन्यः सर्व्वे नरवरान्ध्रकाः । गुहाः पुलिन्दाः शवराश्चुचुका मद्रकैः सह ।
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि । यौनकाम्बोजगान्धाराः किराता बर्व्वरैः सह ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एते पापकृतस्तात चरन्ति पृथिवीमिमां। श्वपाकबलगृध्राणां स्वधर्म्माणो नराधिप।
नैते कृतयुगे तात चरन्ति पृथिवीमिमां। त्रेताप्रभृति वर्द्धन्ते ते जना भरतर्षभ।
ततस्तस्मिन् महाघोरे सन्ध्याकाल उपस्थिते। राजानः समसज्जन्त समासाद्येतरेतरं।
एवमेष कुरुश्रेष्ठ प्रादुर्भूतो महात्मना। देवं देवर्षिराचष्ट नारदः सर्व्वलोकदृक्।
नारदोऽप्यथ कृष्णस्य परं मेने नराधिप। शाश्वतत्वं महाबाहो यथावद्भरतर्षभ। ७५६५
एवमेष महाबाहुः केशवः सत्यविक्रमः। अचिन्त्यः पुण्डरीकाक्षो नैष केवलमानुषः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि सर्व्वभूतोत्पत्तिर्नाम सप्ताधिकद्विशततोऽध्यायः॥ २०७॥
॥ युधिष्ठिर उवाच॥ के पूर्व्वमासन् पतयः प्रजानां भरतर्षभ। के चर्षयो महाभागा दिक्षु प्रत्येकशः स्मृताः।
॥ भीष्म उवाच॥ श्रूयतां भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि। प्रजानां पतयो येऽस्मिन् दिक्षु ये चर्षयः स्मृताः।
एकः स्वयम्भुर्भगवानाद्यो ब्रह्मा सनातनः। ब्रह्मणः सप्त वै पुत्रा महात्मानः स्वयम्भुवः।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। वशिष्ठस्र्व महाभागः सदृशो वै स्वयम्भुवा। ७५७०
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः। अत ऊर्द्ध्वं प्रवक्ष्यामि सर्व्वानेव प्रजापतीन्।
अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः। प्राचीनवर्हिर्भगवांस्तस्मात् प्राचेतसो दश।
दशानां तनयस्त्वेको दक्षो नाम प्रजापतिः। तस्य द्वे नामनी लोके दक्षः क इति चोच्यते।
मरीचेः कश्यपः पुत्त्रस्तस्य द्वे नामनी स्मृते। अरिष्टनेमिरित्येके कश्यपेत्यपरे विदुः।
अत्रेश्चैवौरसः श्रीमान्राजा सोमस्य वीर्य्यवान्। सहस्रं यस्य दिव्यानां युगानां पर्य्युपासिता। ७५७५
अर्य्यमा चैव भगवान् ये चास्य तनया विभो। एते प्रदेशाः कथिता भुवनानां प्रभावनाः।
शशविन्दोश्च भार्य्याणां सहस्राणि दशाच्युत। एकैकस्यां सहस्रन्तु तनयानामभूत्तदा।
एवं शतसहस्राणि दश तस्य महात्मनः। पुत्त्राणाञ्च न ते कञ्चिदिच्छन्त्यन्यं प्रजापतिं।
प्रजामाचक्षते विप्राः पुराणाः शाशविन्दवीं। स वृष्णिवंशप्रभवो महावंशः प्रजापतेः।
एते प्रजानां पतयः समुद्दिष्टा यशस्विनः। अतः परं प्रवक्ष्यामि देवांस्त्रिभुवनेश्वरान्। ७५८०
भगोऽंशश्चार्य्यमा चैव मित्रोऽथ वरुणस्तथा। सविता चैव धाता च विवस्वांश्च महाबलः।
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते। इत्येते द्वादशादित्याः कश्यपस्यात्मसम्भवाः।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावपि। मार्त्तण्डस्यात्मजावेतावष्टमस्य महात्मनः।
ते च पूर्व्वं सुराश्चेति विविधाः पितरः स्मृताः। त्वष्टुश्चैवात्मजः श्रीमान् विश्वरूपो महायशाः।
अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। ७५८५
सावित्रश्च जयन्तश्च पिनाकी चापराजितः। पूर्व्वमेव महाभागा वसवोऽष्टौ प्रकीर्त्तिताः।
एत एवंविधा देवा मनोरेव प्रजापतेः। ते च पूर्व्वं सुराश्चेति द्विविधाः पितरः स्मृताः।
शीलयौवनतस्त्वन्यस्तथाऽन्यः सिद्धसाध्ययोः। ऋभवो मरुतश्चैव देवानाञ्चोदिता गणाः।
एवमेते समाम्नाता विश्वेदेवास्तथाऽश्विनौ। आदित्याः क्षत्त्रियास्तेषां विशश्च मरुतस्तथा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अश्विनौ तु स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ । स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चयः । ७५९०
इत्येतत् सर्व्वदेवानां चातुर्व्वर्ण्यं प्रकीर्त्तितं । एतान् वै प्रातरुत्थाय देवान् यस्तु प्रकीर्त्तयेत् ।
स्वजादन्यकृताच्चैव सर्व्वपापात्प्रमुच्यते । यवक्रीतोऽथ रैभ्यश्च अर्व्वावसुपरावसू ।
औषिजश्चैव काक्षीवान् बलश्चाङ्गिरसः स्मृतः । ऋषिर्म्मेधातिथेः पुत्त्रः कण्वो वर्हिषदस्तथा
त्रैलोक्यभावनास्तात प्राच्यां सप्तर्षयस्तथा । उन्मुचो विमुचश्चैव स्वस्त्यात्रेयश्च वीर्य्यवान् ।
प्रमुचश्चेध्मवाहश्च भगवांश्च दृढव्रतः । मित्रावरुणयोः पुत्त्रस्तथागस्त्यः प्रतापवान् । ७५९५
एते ब्रह्मर्षयो नित्यमास्थिता दक्षिणां दिशं । उषङ्गुः कवषो धौम्यः परिव्याधश्च वीर्य्यवान् ।
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः । अत्रेः पुत्त्रश्च भगवांस्तथा सारस्वतः प्रभुः ।
एते चैव महात्मानः पश्चिमामाश्रिता दिशं । आत्रेयश्च वशिष्ठश्च काश्यपश्च महानृषिः ।
गौतमोऽथ भरद्वाजो विश्वामित्रोऽथ कौशिकः । तत्रैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते उदीचीमाश्रिता दिशं । एते प्रतिदिशं सर्व्वे कीर्त्तितास्तिग्मतेजसः । ७६००
साक्षिभूता महात्मानो भुवनानां प्रभावनाः । एवमेते महात्मानः स्थिताः प्रत्येकशो दिशं ।
एतेषां कीर्त्तनं कृत्वा सर्व्वपापात् प्रमुच्यते । यस्यां यस्यां दिशि ह्येते तां दिशं शरणं गतः ।
मुच्यते सर्व्वपापेभ्यः स्वस्तिमांश्च गृहं व्रजेत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि दिशां स्वस्तिके अष्टाधिकद्विशतोऽध्यायः ॥ २०८॥
॥ युधिष्ठिर उवाच ॥ पितामह महाप्राज्ञ युधि सत्यपराक्रम । श्रोतुमिच्छामि कार्त्स्न्येन कृष्णमव्ययमीश्वरं ।
यच्चास्य तेजः सुमहद्यच्च कर्म्म पुराकृतं । तन्मे सर्व्वं यथातत्त्वं ब्रूहि त्वं पुरुषर्षभ । ७६०५
तिर्य्यग्योनिगतो रूपं कथं धारितवान् प्रभुः । केन कार्य्यनिसर्गेण तमाख्याहि महाबल ।
॥ भीष्म उवाच ॥ पुराऽहं मृगयां यातो मार्कण्डेयाश्रमे स्थितः । तत्रापश्यन्मुनिगणान् समासीनान् सहस्रशः ।
ततस्ते मधुपर्केण पूजाञ्चक्रुरथो मयि । प्रतिगृह्य च तां पूजां प्रत्यनन्दमृषीनहं ।
कथैषा कथिता तत्र कश्यपेन महर्षिणा । मनःप्रह्लादिनी दिव्या तामिहैकमनाः शृणु ।
पुरा दानवमुख्या हि क्रोधलोभसमन्विताः । बलेन मत्ताः शतशो नरकाद्या महासुराः । ७६१०
तथैव चान्ये बहवो दानवा युद्धदुर्म्मदाः । न सहन्ते स्म देवानां समृद्धिं तामनुत्तमां ।
दानवैरर्द्यमानास्तु देवा देवर्षयस्तथा । न शर्म्म लेभिरे राजन् विशमानास्ततस्ततः ।
पृथिवीमार्त्तरूपान्ते समपश्यन्दिवौकसः । दानवैरभिसंस्तीर्णां घोररूपैर्म्महाबलैः ।
भारार्त्तामप्रहृष्टाञ्च दुःखितां सन्निमज्जतीं । अथादितेयाः सन्त्रस्ता ब्रह्माणमिदमब्रुवन् ।
कथं शक्ष्यामहे ब्रह्मन् दानवैरभिमर्द्दनं । स्वयम्भुस्तानुवाचेदं निसृष्टोऽत्र विधिर्म्मया । ७६१५
ते वरेणाभिसम्पन्ना बलेन च मदेन च । नावबुध्यन्ति संमूढा विष्णुमव्यक्तदर्शनं ।
वराहरूपिणं देवमधृष्यममरैरपि । एष वेगेन गत्वा हि यत्र ते दानवाधमाः ।
अन्तर्भूमिगता घोरा निवसन्ति सहस्रशः । शमयिष्यति तच्छ्रुत्वा जहृषुः सुरसत्तमाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो विष्णुर्महातेजा वाराहं रूपमास्थितः । अन्तर्भूमिं सम्प्रविश्य जगाम दितिजान् प्रति ।
दृष्ट्वा च सहिताः सर्व्वे दैत्याः सत्त्वममानुषं । प्रसह्य तरसा सर्व्वे सन्तस्थुः कालमोहिताः । ७६१०
ततस्ते समभिद्रुत्य वराहं जगृहुः समं । संक्रुद्धाश्च वराहं तं व्यकर्षन्त समन्ततः ।
दानवेन्द्रा महाकाया महावीर्य्यबलोच्छ्रिताः । नाशक्नुवंश्च किञ्चित्ते तस्य कर्त्तुं तदा विभो ।
ततोऽगच्छन् विस्मयन्ते दानवेन्द्रा भयं तथा । संशयं गतमात्मानं मेनिरे च सहस्रशः ।
ततो देवाधिदेवः स योगात्मा योगसारथिः । योगमास्थाय भगवांस्तदा भरतसत्तम ।
विनमाद महानादं क्षोभयन् दैत्यदानवान् । सन्नादिता येन लोकाः सर्व्वास्चैव दिशो दश । ७६१५
तेन सन्नादशब्देन लोकानां क्षोभ आगमत् । सन्त्रस्ताश्च भृशं लोके देवाः शक्रपुरोगमाः ।
निर्व्विचेष्टं जगच्चापि बभूवातिभृशं तदा । स्थावरं जङ्गमञ्चैव तेन नादेन मोहितं ।
ततस्ते दानवाः सर्व्वे तेन नादेन भीषिताः । पेतुर्गतासवश्चैव विष्णुतेजःप्रमोहिताः ।
रसातलगतश्चापि वराहस्त्रिदशद्विषः । खुरैर्व्विदारयामास मांसमेदोऽस्थिसञ्चयान् ।
नादेन तेन महता सनातन इति स्मृतः । पद्मनाभो महायोगी भूताचार्य्यः स भूतराट् । ७६२०
ततो देवगणाः सर्व्वे पितामहमुपाद्रवन् । तत्र गत्वा महात्मान ऊचुश्चैव जगत्पतिं ।
नादोऽयं कीदृशो देव नैनं विद्म वयं प्रभो । कोऽसौ हि कस्य वा नादो येन विह्वलितं जगत् ।
देवाश्च दानवाश्चैव मोहितास्तस्य तेजसा । एतस्मिन्नन्तरे विष्णुर्व्वाराहं रूपमास्थितः ।
उदतिष्ठन्महाबाहो स्तूयमानो महर्षिभिः ।
॥ पितामह उवाच ॥ निहत्य दानवपतीन् महावर्ष्मा महाबलः । एष देवो महायोगी भूतात्मा भूतभावनः । ७६२५
सर्व्वभूतेश्वरो योगी मुनिरात्मा तथात्मनः । स्थिरीभवत कृष्णोऽयं सर्व्वविघ्नविनाशनः ।
कृत्वा कर्म्मातिसाध्वेतदशक्यममितप्रभः । समायातः स्वमात्मानं महाभागो महाद्युतिः ।
पद्मनाभो महायोगी महात्मा भूतभावनः । न सन्तापो न भीः कार्य्या शोको वा सुरसत्तमाः ।
विधिरेष प्रभावश्च कालः संक्षयकारकः । लोकान् धारयता तेन नादो मुक्तो महात्मना ।
स एष हि महाबाहुः सर्व्वलोकनमस्कृतः । अच्युतः पुण्डरीकाक्षः सर्व्वभूतादिरीश्वरः । ७६३०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि अन्तर्भूमिविक्रीडिते नवाधिकद्विशतोऽध्यायः ॥ २०९ ॥
॥ युधिष्ठिर उवाच ॥ योगं मे परमं तात मोक्षस्य वद भारत । तमहं तत्त्वतो ज्ञातुमिच्छामि वदताम्वर ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ।
कश्चिद्ब्राह्मणमासीनमाचार्य्यमृषिसत्तमं । तेजोराशिं महात्मानं सत्यसन्धं जितेन्द्रियं ।
शिष्यः परममेधावी श्रेयोऽर्थी सुसमाहितः । चरणावुपसंगृह्य स्थितः प्राञ्जलिरब्रवीत् ।
उपासनात् प्रसन्नोऽसि यदि वै भगवन्मम । संशयो मे महान् कश्चित्तन्मे व्याख्यातुमर्हसि । ७६३५
कुतश्चाहं कुतश्च त्वं तत् सम्यग्ब्रूहि तत्परं । कथञ्च सर्व्वभूतेषु समेषु द्विजसत्तम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सम्यग्वृत्ता निवर्त्तन्ते विपरीताः क्षयोदयाः । वेदेषु चापि यद्वाक्यं लौकिकं व्यापकञ्च यत् ।
एतद्विद्वन् यथातत्त्वं सर्व्वं व्याख्यातुमर्हसि ।
॥ गुरुरुवाच ॥ शृणु शिष्य महाप्राज्ञ ब्रह्म गूह्यमिदं परं । अध्यात्मं सर्व्वविद्यानामागमानाञ्च यद्वसु ।
वासुदेवः परमिदं विश्वस्य ब्रह्मणो मुखं । सत्यं ज्ञानमथो यज्ञस्तितिक्षा दम आर्ज्जवं । ७९५०
पुरुषं सनातनं विष्णुं यत्तं वेदविदो विदुः । सर्गप्रलयकर्त्तारमव्यक्तं ब्रह्म शाश्वतं ।
तदिदं ब्रह्म वार्ष्णेयमितिहासं शृणुष्व मे । ब्राह्मणो ब्राह्मणैः श्राव्यो राजन्यः क्षत्रियैस्तथा ।
वैश्यो वैश्यैस्तथा श्राव्यः शूद्रः शूद्रैर्महामनाः । माहात्म्यं देवदेवस्य विष्णोरमिततेजसः ।
अर्हस्त्वमसि कल्याणं वार्ष्णेयं शृणु यत्परं । कालचक्रमनाद्यन्तं भावाभावस्वलक्षणं ।
त्रैलोक्यं सर्व्वभूतेशे चक्रवत् परिवर्त्तते । यत्तदक्षरमव्यक्तममृतं ब्रह्म शाश्वतं । ७९५५
वदन्ति पुरुषव्याघ्र केशवं पुरुषर्षभं । पितॄन्देवानृषींश्चैव तथा वै यक्षराक्षसान् ।
नागासुरमनुष्यांश्च सृजते परमोऽव्ययः । तथैव वेदशास्त्राणि लोकधर्म्मांश्च शाश्वतान् ।
प्रलयं प्रकृतिं प्राप्य युगादौ सृजते पुनः । यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु । अथ यद्यद्यदाभाति कालयोगाद्युगादिषु ।
तत्तदुत्पद्यते ज्ञानं लोकयात्राविधानजं । युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः । ७९६०
लेभिरे तपसा पूर्व्वमनुज्ञाताः स्वयम्भुवा । वेद विदेद भगवान् वेदाङ्गानि बृहस्पतिः ।
भार्गवो नीतिशास्त्रन्तु जगाद जगतो हितं । गान्धर्व्वं नारदो वेद भरद्वाजो धनुर्ग्रहं ।
देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितं । न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ।
हेत्वागमसमाचारैर्यदुक्तं तदुपास्यतां । अनाद्यं तत्परं ब्रह्म न देवा नर्षयो विदुः ।
एकस्तद्वेद भगवान् धाता नारायणः प्रभुः । नारायणादृषिगणास्तथा मुख्याः सुरासुराः । ७९६५
राजर्षयः पुराणाश्च परमं दुःखभेषजं । पुरुषाधिष्ठितान् भावान् प्रकृतिः सूयते यदा ।
हेतुयुक्तमतः पूर्व्वं जगत् संपरिवर्त्तते । दीपादन्ये यथा दीपाः प्रवर्त्तन्ते सहस्रशः ।
प्रकृतिः सूयते तद्वदानन्त्यान्नापचीयते । अव्यक्तात् कर्म्मजा बुद्धिरहङ्कारं प्रसूयते ।
आकाशञ्चाप्यहङ्काराद्वायुराकाशसम्भवः । वायोस्तेजस्तथा चाप अद्भ्योऽथ वसुधाकृता ।
मूलप्रकृतयोऽष्टौ ता जगदेतास्ववस्थितं । ज्ञानेन्द्रियाण्यतः पञ्च पञ्च कर्म्मेन्द्रियाण्यपि । ७९७०
विषयाः पञ्च चैकञ्च विकारे षोडशं मनः । श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञानेन्द्रियाण्यथ ।
पादौ पायुरुपस्थश्च हस्तौ वाक्कर्म्मणी अपि । शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
विज्ञेयं व्यापकञ्चित्तं तेषु सर्व्वगतं मनः । रसज्ञाने तु जिह्वेयं व्याहृते वाक् तथोच्यते ।
इन्द्रियैर्विविधैर्युक्तं सर्व्वं व्यक्तं मनस्तथा । विद्यात्तु षोडशैतानि दैवतानि विभागशः ।
देहेषु ज्ञानकर्त्तारमुपासीनमुपासते । तद्वत् सोमगुणा जिह्वा गन्धस्तु पृथिवीगुणः । ७९७५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

श्रोत्रं नभोगुणश्चैव चक्षुरग्नेर्गुणस्तथा । स्पर्शं वायुगुणं विद्यात्-सर्व्वभूतेषु सर्व्वदा ।
मनः सत्त्वगुणं प्राहुः सत्त्वमव्यक्तजं तथा । सर्व्वभूतात्मभूतस्थं तस्माद्बुध्येत बुद्धिमान् ।
एते भावा जगत् सर्व्वं वहन्ति सचराचरं । श्रिता विरजसं देवं यमाहुः प्रकृतेः परं ।
नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितं । व्याप्य शेते महानात्मा तस्मात् पुरुष उच्यते ।
अजरः सोऽमरश्चैव व्यक्ता व्यक्तोपदेशवान् । व्यापकः सगुणः सूक्ष्मः सर्व्वभूतगुणाश्रयः । ७६७०
यथा दीपः प्रकाशात्मा ह्रस्वो वा यदि वा महान् । ज्ञानात्मानं तथा विद्यात् पुरुषं सर्व्वजन्तुषु ।
श्रोत्रं वेदयते वेद्यं स शृणोति स पश्यति । कारणं तस्य देहोऽयं स कर्त्ता सर्व्वकर्म्मणां ।
अग्निर्द्दारुगतो यद्वच्छिन्ने दारौ न दृश्यते । तथैवात्मा शरीरस्थो योगेनैवानुदृश्यते ।
अग्निर्यथा ह्युपायेन मथित्वा दारु दृश्यते । तथैवात्मा शरीरस्थो योगेनैवात्र दृश्यते ।
नदीष्वापो यथा युक्ता यथा सूर्य्ये मरीचयः । सन्ततत्वाद्यथा यान्ति तथा देहाः शरीरिणां । ७६७५
स्वप्नयोगे यथैवात्मा पञ्चेन्द्रियसमायुतः । देहमुत्सृज्य वै याति तथैवाचोपलभ्यते ।
कर्म्मणा बाध्यते पूर्व्वं कर्म्मणा चोपलभ्यते । कर्म्मणा नीयतेऽन्यत्र स्वकृतेन बलीयसा ।
स तु देहाद्यथा देहं त्यक्त्वाऽन्यं प्रतिपद्यते । तथाऽन्यं सम्प्रवक्ष्यामि भूतग्रामं स्वकर्म्मजं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे दशाधिकद्विशततोऽध्यायः ॥ २१० ॥
॥ भीष्म उवाच ॥ चतुर्विधानि भूतानि स्थावराणि चराणि च । अव्यक्तप्रभवान्याहुरव्यक्तनिधनानि च ।
अव्यक्तलक्षणं विद्यादव्यक्तात्मात्मकं मनः । यथाऽश्वत्थकणीकायामन्तर्भूतो महाद्रुमः । ७६८०
निष्पन्नो दृश्यते व्यक्तमव्यक्तात् सम्भवस्तथा । अभिद्रवत्ययस्कान्तमयो निश्चेतनं यथा ।
स्वभावहेतुजा भावा यद्वदन्यदपीदृशं । तद्वद्व्यक्तजा भावाः कर्त्तुः कारणलक्षणाः ।
अचेतनाश्चेतयितुः कारणादभिसंहताः । न भूर्न खं द्यौर्भूतानि नर्षयो न सुरासुराः ।
नान्यदासीदृते जीवमासेदुर्न तु संहतं । पूर्व्वं नित्यं सर्व्वगतं मनो हेतुमलक्षणं ।
अज्ञानकर्म्मनिर्द्दिष्टमेतत् कारणलक्षणं । तत्कारणैर्हि संयुक्तं कार्य्यसंग्रहकारकं । ७६८५
येनैतद्वर्त्तते चक्रमनादिनिधनं महत् । अव्यक्तनाभं व्यक्तारं विकारपरिमण्डलं ।
क्षेत्रज्ञाधिष्ठितं चक्रं स्निग्धाक्षं वर्त्तते ध्रुवं । स्निग्धत्वात्तिलवत् सर्व्वं चक्रेऽस्मिन् पीड्यते जगत् ।
तिलपीडैरिवाक्रम्य भोगैरज्ञानसम्भवैः । कर्म्म तत् कुरुते तर्षादहङ्कारपरिग्रहः ।
कार्य्यकारणसंयोगे स हेतुरुपपादितः । नाभ्येति कारणं कार्य्यं न कार्य्यं कारणं तथा ।
कार्य्याणान्तूपकरणे कालो भवति हेतुमान् । हेतुयुक्ताः प्रकृतयो विकाराश्च परस्परं । ७७००
अन्योन्यमभिवर्त्तन्ते पुरुषाधिष्ठिताः सदा । राजसैस्तामसैर्भावैश्च्युतो हेतुबलान्वितः ।
क्षेत्रज्ञमेवानुयाति पांशुर्व्वातेरितो यथा । न च तैः स्पृश्यते भावैर्न ते तेन महात्मना ।
सरजस्कोऽरजस्कश्च नैव वायुर्भवेत्तथा । तथैतदन्तरं विद्यात् सत्त्वक्षेत्रज्ञयोर्बुधः ।
अभ्यासात् स तथा युक्तो न गच्छेत् प्रकृतिं पुनः । सन्देहमेतमुत्पन्नमच्छिनद्भगवानृषिः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

तथा वार्त्तां समीचेत कृतलक्षणसम्मितां। वीजान्यग्न्युपदग्धानि नरो हन्ति यथा पुनः। ७००५
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे एकादशाधिकद्विशतोऽध्यायः॥ २११॥
॥ भीष्म उवाच॥ प्रवृत्तिलक्षणो धर्म्मो यथा समुपपद्यते। तेषां विज्ञाननिष्ठानामन्यत्तत्त्वं न रोचते।
दुर्लभा वेदविद्वांसो वेदोक्तेषु व्यवस्थिताः। प्रयोजनमहत्त्वात्तु मार्गमिच्छन्ति संस्तुतं।
सद्भिराचरितत्वात्तु वृत्तमेतदगर्हितं। इयं सा बुद्धिरभ्येत्य यया याति परां गतिं।
शरीरवानुपादत्ते मोहात् सर्व्वान् परिग्रहान्। क्रोधलोभादिभिर्भावैर्युक्तो राजसतामसैः। ७०१०
नाशुद्धमाचरेत्तस्मादभीप्सन् देहयापनं। कर्म्मणा विवरं कुर्व्वन्न लोकानाप्नुयाच्छुभान्।
लोहयुक्तं यथा हेम विपक्वं न विराजते। तथा पक्वकषायाख्यं विज्ञानं न प्रकाशते।
यश्चाधर्म्मं चरेल्लोभात् कामक्रोधावनुप्लवन्। धर्म्म्यं पन्थानमाक्रम्य सानुबन्धो विनश्यति।
शब्दादीन् विषयांस्तस्मान्न संरागादयं व्रजेत्। क्रोधो हर्षो विषादश्च जायते ह परस्परात्।
पञ्चभूतात्मके देहे सत्त्वे राजसतामसे। कमभीष्टुवते चायं कं वा क्रोशति किं वदन्। ७०१५
स्पर्शरूपरसाद्येषु सङ्गं गच्छन्ति वालिशाः। नावगच्छन्ति विज्ञानादात्मानं पार्थिवं गुणं।
मृण्मयं शरणं यद्वन्मृदैव परिलिप्यते। पार्थिवोऽयं तथा देहो मृद्विकारान्न नश्यति।
मधु तैलं पयः सर्पिर्मांसानि लवणं गुडः। धान्यानि फलमूलानि मृद्विकाराः सहाम्भसा।
यद्वत् कान्तारमातिष्ठन्नौत्सुक्यं समनुव्रजेत्। ग्राम्यमाहारमादद्यादस्वाद्वपि हि यापनं।
तद्वत् संसारकान्तारमातिष्ठन् श्रमतत्परः। यात्रार्थमद्यादाहारं व्याधितो भेषजं यथा। ७०२०
सत्यशौचार्ज्जवत्यागैर्वर्च्चसा विक्रमेण च। क्षान्त्या धृत्या च बुद्ध्या च मनसा तपसैव च।
भावान् सर्व्वानुपावृत्तान् समीक्ष्य विषयात्मकान्। शान्तिमिच्छन्नदीनात्मा संयच्छेदिन्द्रियाणि च।
सत्त्वेन रजसा चैव तमसा चैव मोहिताः। चक्रवत् परिवर्त्तन्ते ह्यज्ञानाज्जन्तवो भृशं।
तस्मात् सम्यक् परीक्षेत्तु दोषानज्ञानसम्भवान्। अज्ञानप्रभवं दुःखमहङ्कारं परित्यजेत्।
महाभूतानीन्द्रियाणि गुणाः सत्त्वं रजस्तमः। त्रैलोक्यं सेश्वरं कर्म्म अहङ्कारे प्रतिष्ठितं। ७०२५
यथेह नियतः कालो दर्शयत्यार्त्तवान् गुणान्। तद्वद्भूतेष्वहङ्कारं विद्यात् कर्म्मप्रवर्त्तकं।
संमोहकं तमो विद्यात् कृष्णमज्ञानसम्भवं। प्रीतिदुःखनिबद्धांश्च समस्तांस्त्रीनथो गुणान्।
सत्त्वस्य रजसश्चैव तमसश्च निबोध तान्। प्रसादो हर्षजा प्रीतिरसन्देहो धृतिः स्मृतिः।
एतान् सत्त्वगुणान् विद्यादिमान्राजसतामसान्। कामक्रोधौ प्रमादश्च लोभमोहौ भयं क्लमः।
विषादशोकावरतिर्मानदर्पावनार्य्यता। दोषाणामेवमादीनां परीक्ष्य गुरुलाघवं। ७०३०
विमृशेदात्मसंस्थानमेकैकमनुसन्ततं।
॥ युधिष्ठिर उवाच॥ के दोषा मनसा त्यक्ताः के बुद्ध्या शिथिलीकृताः। के पुनः पुनरायान्ति के मोहादफला इव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

केषां बलाबलं बुद्ध्या हेतुभिर्विमृषेद्बुधः । एष मे संशयस्तात तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ दोषैर्मूलादवच्छिन्नैर्विशुद्धात्मा विमुच्यते । विनाशयति सम्भूतमयस्मयमयो यथा ।
तथा ह्यकृतात्मा सहजैर्दोषैर्नश्यति तामसैः । राजसं तामसञ्चैव शुद्धात्मकमकल्मषं । ७७३५
तत् सर्व्वं देहिनां बीजं सत्त्वमात्मवतः समं । तस्मादात्मवता वर्ज्यं रजश्च तम एव च ।
रजस्तमोभ्यां निर्म्मुक्तं सत्त्वं निर्म्मलतामियात् । अथवा मन्त्रवद्ब्रूयुरात्मादानाय दुष्कृतं ।
स वै हेतुरनादाने शुद्धधर्म्मानुपालने । रजसाऽधर्म्मयुक्तानि कार्य्याण्यपि समाप्नुते ।
अर्थयुक्तानि चात्यर्थं कामान् सर्व्वांश्च सेवते । तमसा लोभयुक्तानि क्रोधजानि च सेवते ।
हिंसाविहाराभिरतस्तन्द्री निद्रासमन्वितः । सत्त्वस्थः सात्त्विकान् भावान् शुद्धान् पश्यति संश्रितः । ७७४०
स देही विमलः श्रीमान् श्रद्धाविद्यासमन्वितः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे द्वादशाधिकद्विशततोऽध्यायः ॥ २१२ ॥
॥ भीष्म उवाच ॥ रजसा साध्यते मोहस्तमसा भरतर्षभ । क्रोधलोभौ भयं दर्प एतेषां सादनाच्छुचिः ।
परमं परमात्मानं देवमक्षयमव्ययं । विष्णुमव्यक्तसंस्थानं विभुं तं देवसत्तमं ।
तस्य मायापिनद्धाङ्गा ज्ञानभ्रष्टा विचेतसः । मानवा ज्ञानसंमोहात्ततः क्रोधं प्रयान्ति वै ।
क्रोधात् काममवाप्याथ लोभमोहौ च मानवाः । मानदर्पमहङ्कारमहङ्कारात्ततः क्रियाः । ७७४५
क्रियाभिः स्नेहसम्बन्धान् स्नेहाच्छोकमनन्तरं । सुखदुःखक्रियारम्भाज्जन्माजन्मकृतक्षणाः ।
जन्मतो गर्भवासन्तु शुक्रशोणितसम्भवं । पुरीषमूत्रविक्लेदं शोणितप्रभवाविलं ।
तृष्णाभिभूतस्तैर्बद्धस्तानेवाभिपरिस्रवन् । संसारतन्त्रवाहिन्यस्तत्र बुद्ध्येत योषितः ।
प्रकृत्या क्षेत्रभूतास्ता नराः क्षेत्रज्ञलक्षणाः । तस्मादेता विशेषेण न चाभीयुर्व्विपश्चितः ।
कृत्या ह्येता घोररूपा मोहयन्त्यविचक्षणान् । रजस्यन्तर्हिता मूर्त्तिरिन्द्रियाणां सनातनी । ७७५०
तस्मात्तदात्मकाद्रागाद्बीजाज्जायन्ति जन्तवः । स्वदेहजानस्वसंज्ञान् यद्वदङ्गात् कृमींस्त्यजेत् ।
स्वसंज्ञानस्वकांस्तद्वत् सुतसंज्ञान् कृमींस्त्यजेत् । शुक्रतो रसतश्चैव देहाज्जायन्ति जन्तवः ।
स्वभावात् कर्म्मयोगाद्वा तानुपेक्षेत बुद्धिमान् । रजस्तमसि पर्य्यस्तं सत्त्वञ्च रजसि स्थितं ।
ज्ञानाधिष्ठितमव्यक्तं बुद्ध्यहङ्कारलक्षणं । तद्बीजं देहिनामाहुस्तद्बीजं जीवसंज्ञितं ।
कर्म्मणा कालयुक्तेन संसारपरिवर्त्तनं । रमत्ययं यथा स्वप्ने मनसा देहवानिव । ७७५५
कर्म्मगर्भैर्गुणैर्देही गर्भे तदुपलभ्यते । कर्म्मणा बीजभूतेन चोद्यते यद्यदिन्द्रियं ।
जायते तदहङ्काराद्रागयुक्तेन चेतसा । शब्दरागाच्छ्रोत्रमस्य जायते भावितात्मनः ।
रूपरागात्तथा चक्षुर्घ्राणं गन्धचिकीर्षया । स्पर्शने त्वक् तथा वायुः प्राणापानव्यपाश्रयः ।
व्यानोदानौ समानश्च पञ्चधा देहयापनं । सञ्जातैर्ज्जायते गात्रैः कर्म्मजैर्ब्रह्मणा वृतः ।
दुःखाद्यन्तैर्दुःखमध्यैर्नरः शारीरमानसैः । दुःखं विद्यादुपादानादभिमानाच्च वर्द्धते । ७७६०
त्यागात्तेभ्यो निरोधः स्यान्निरोधज्ञो विमुच्यते । इन्द्रियाणां रजस्येव प्रलयप्रभवावुभौ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

परीक्ष्य सञ्चरेद्विद्वान् यथावच्छास्त्रचक्षुषा । ज्ञानेन्द्रियाणीन्द्रियार्थान्नोपसर्पन्त्यतर्षुलं ।
हीनैश्च करणैर्द्देही न देहं पुनरर्हति ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे त्रयोदशाधिकद्विशततोऽध्यायः ॥ २१३ ॥
॥ भीष्म उवाच ॥ अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा । तद्विज्ञानाच्चरन् राजन् प्राप्नुयात् परमां गतिं ।
सर्व्वेषामेव भूतानां पुरुषः श्रेष्ठ उच्यते । पुरुषेभ्यो द्विजानाहुर्द्विजेभ्यो मन्त्रदर्शिनः । ७६९५
सर्व्वभूतात्मभूतास्ते सर्व्वज्ञाः सर्व्वदर्शिनः । ब्राह्मणा वेदशास्त्रज्ञास्तत्त्वार्थगतनिश्चयाः ।
नेत्रहीनो यथा ह्येकः कृच्छ्राणि लभतेऽध्वनि । ज्ञानहीनस्तथा लोके तस्माज्ज्ञानविदोऽधिकाः ।
तांस्तानुपासते धर्म्मान् धर्म्मकामा यथागमं । न तेषामर्थसामान्यमन्तरेण गुणानिमान् ।
वाग्देहमनसां शौचं क्षमा सत्यं धृतिः स्मृतिः । सर्व्वधर्म्मेषु धर्म्मज्ञा ज्ञापयन्ति गुणान् शुभान् ।
यदिदं ब्रह्मणो रूपं ब्रह्मचर्य्यमिति स्मृतं । परन्तत्सर्व्वधर्म्मेभ्यस्तेन यान्ति परां गतिं । ७७००
लिङ्गसंयोगहीनं यच्छब्दस्पर्शविवर्ज्जितं । श्रोत्रेण श्रवणञ्चैतच्चक्षुषा चैव दर्शनं ।
वाक्सम्भाषाप्रवृत्तं यत्तन्मनः परिवर्ज्जितं । बुद्ध्या चाध्यवसायीत ब्रह्मचर्य्यमकल्मषं ।
सम्यग्वृत्तिर्ब्रह्मलोकं प्राप्नुयान्मध्यमः सुरान् । द्विजाग्र्यो जायते विद्वान् कन्यसीं वृत्तिमास्थितः ।
सुदुष्करं ब्रह्मचर्य्यमुपायन्तत्र मे शृणु । सम्प्रवृत्तमुदीर्णञ्च निगृह्णीयाद्द्विजो रजः ।
योषितां न कथा श्राव्या न निरीक्ष्या निरम्बराः । कथञ्चिद्दर्शनादासां दुर्ब्बलानाविशेद्रजः । ७७०५
रागोत्पन्नश्चरेत्कृच्छ्रमह्नस्तिःप्रविशेदपः । मग्नः स्वप्ने च मनसा त्रिर्जपेदघमर्षणं ।
पाप्मानं निर्द्दहेदेवमन्तर्भूतरजोमयं । ज्ञानयुक्तेन मनसा सन्ततेन विचक्षणः ।
कुणपामेध्यसंयुक्तं यद्वदच्छिद्रबन्धनं । तद्वद्देहगतं विद्यादात्मानं देहबन्धनं ।
वातपित्तकफान्रक्तं त्वङ्मांसं स्नायुमस्थि च । मज्जां देहं शिराजालैस्तर्पयन्ति रसा नृणां ।
दश विद्याद्धमन्योऽत्र पञ्चेन्द्रियगुणावहाः । याभिः सूक्ष्माः प्रजायन्ते धमन्योऽन्याः सहस्रशः । ७७१०
एवमेताः शिरानद्यो रजोदा देहसागरं । तर्पयन्ति यथाकालमापगा इव सागरं ।
मध्ये च हृदयस्यैका शिरा तत्र मनोवहा । शुक्रं सङ्कल्पजं नृणां सर्व्वगात्रैर्व्विमुञ्चति ।
सर्व्वगात्रप्रतापिन्यस्तस्या ह्यनुगताः शिराः । नेत्रयोः प्रतिपद्यन्ते वहन्त्यस्तैजसं गुणं ।
पयस्यन्तर्हितं सर्पिर्य्यद्वन्निर्म्मथ्यते खजैः । शुक्रं निर्म्मथ्यते तद्वद्देहसङ्कल्पजैः खजैः ।
स्वप्नेऽप्येवं यथाऽभ्येति मनः सङ्कल्पजं रजः । शुक्रं सङ्कल्पजं देहात् सृजत्यस्य मनोवहा । ७७१५
महर्षिर्भगवानत्रिर्व्वेद तच्छुक्रसम्भवं । त्रिबीजमिन्द्रदैवत्यं तस्मादिन्द्रियमुच्यते ।
ये वै शुक्रगतिं विद्युर्भूतसङ्करकारिकां । विरागा दग्धदोषास्ते नाप्नुयुर्द्देहसम्भवं ।
गुणानां साम्यमागत्य मनसैव मनोवहं । देहकर्म्मानुदन् प्राणानन्तकाले विमुच्यते ।
भविता मनसो ज्ञानं मन एव प्रजायते । ज्योतिष्मद्विरजो नित्यं मन्त्रसिद्धं महात्मनां ।
तस्मात्तदभिघाताय कर्म्म कुर्य्यादकल्मषं । रजस्तमश्च हित्वेह यथेष्टां गतिमाप्नुयात् । ७७२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तरुणाधिगतं ज्ञानं जरादुर्ब्बलतां गतं । विपक्वबुद्धिः कालेन आदत्ते मानसं बलं ।
सुदुर्गमिव पन्थानमतीत्य गुणबन्धनं । यथा पश्येत्तथा दोषानतीत्यामृतमश्नुते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे चतुर्द्दशाधिकद्विशतोऽध्यायः ॥ ॥ २१४ ॥
॥ भीष्म उवाच ॥ दुरन्तेष्विन्द्रियार्थेषु सक्ताः सीदन्ति जन्तवः । ये त्वसक्ता महात्मानस्ते यान्ति परमां गतिं ।
जन्ममृत्युजरादुःखैर्व्याधिभिर्मानसक्लमैः । दृष्ट्वैव सन्ततं लोकं घटेन्मोक्षाय बुद्धिमान् ।
वाङ्मनोभ्यां शरीरेण शुचिः स्यादनहङ्कृतः । प्रशान्तो ज्ञानवान् भिक्षुर्निरपेक्षश्चरेत् सुखं । ७७९५
अथवा मनसः सङ्गं पश्यन् भूतानुकम्पया । तत्राप्युपेक्षां कुर्व्वीत ज्ञात्वा कर्म्मफलं जगत् ।
यत् कृतं स्याच्छुभं कर्म्म पापं वा यदि वाश्नुते । तस्माच्छुभानि कर्म्माणि कुर्य्याद्वाग्बुद्धिकर्म्मभिः ।
अहिंसा सत्यवचनं सर्व्वभूतेषु चार्ज्जवं । क्षमा चैवाप्रमादश्च यस्यैते स सुखी भवेत् ।
तस्मात् समाहितं बुद्ध्या मनो भूतेषु धारयेत् । यश्चैनं परमं धर्म्मं सर्व्वभूतसुखावहं ।
दुःखनिःसरणं वेद सर्व्वज्ञः स सुखी भवेत् । तस्मात् समाहितं बुद्ध्या मनो भूतेषु धारयेत् । ७८००
नापध्यायेन्न स्पृहयेन्नाबद्धं चिन्तयेदसत् । अथामोघप्रयत्नेन मनो ज्ञाने निवेशयेत् ।
वाचामोघप्रयोगेण मनोज्ञं तत् प्रवर्त्तते । विवक्षता च सद्वाक्यं धर्म्मसूक्ष्ममवेक्षता ।
सत्यां वाचमहिंस्राञ्च वदेदनपवादिनीं । कल्कापेतामपरुषामनृशंसामपैशुनां ।
ईदृगल्पञ्च वक्तव्यमविक्षिप्तेन चेतसा । वाक्प्रबद्धो हि संसारो विरागाद्व्याहरेद्यदि ।
बुद्ध्याऽप्यनुगृहीतेन मनसा कर्म्म तामसं । रजोभूतैर्हि करणैः कर्म्मणि प्रतिपद्यते । ७८०५
स दुःखं प्राप्य लोकेऽस्मिन्नरकायोपपद्यते । तस्मान्मनोवाक्शरीरैराचरेद्धैर्य्यमात्मनः ।
प्रकीर्णमेष भारं हि यद्वद्धार्य्येत दस्युभिः । प्रतिलोमां दिशं बुद्ध्वा संसारमबुधास्तथा ।
तानेव च यथा दस्युः क्षिप्त्वा गच्छेच्छिवां दिशं । तथा रजस्तमःकर्म्माण्युत्सृज्य प्राप्नुयात् सुखं
निःसन्दिग्धमनीहो वै मुक्तः सर्व्वपरिग्रहैः । विविक्तचारी लघ्वाशी तपस्वी नियतेन्द्रियः ।
ज्ञानदग्धपरिक्लेशः प्रयोगरतिरात्मवान् । निष्प्रचारेण मनसा परं तदधिगच्छति । ७८१०
धृतिमानात्मवान् बुद्धिं निगृह्णीयादसंशयं । मनो बुद्ध्या निगृह्णीयाद्विषयान्मनसात्मनः ।
निगृहीतेन्द्रियस्यास्य कुर्व्वाणस्य मनो वशे । देवतास्तत् प्रकाशन्ते हृष्टा यान्ति तमीश्वरं ।
ताभिः संसक्तमनसो ब्रह्म तत् सम्प्रकाशते । एतैश्चापगतैः सत्त्वे ब्रह्मभूयाय कल्पते ।
अथवा न प्रकाशेत योगतन्त्रैरुपक्रमेत् । येन तन्त्रयतस्तन्त्रं वृत्तिः स्यात्तत्तदाचरेत् ।
कणकुल्माषपिण्याकशाकयावकशक्तवः । तथा मूलफलं भैक्ष्यं पर्य्यायेणोपयोजयेत् । ७८१५
आहारं नियमञ्चैव देशे काले च सात्त्विकं । तत् परीक्ष्यानुवर्त्तेत तत् प्रवृत्त्यनुपूर्व्वकं ।
प्रवृत्तं नोपरुन्धेत शनैरग्निमिवेन्धयेत् । ज्ञानान्वितं तथा ज्ञानमर्कवत् सम्प्रकाशते ।
ज्ञानाधिष्ठानमज्ञानं त्रीँल्लोकानधितिष्ठति । विज्ञानानुगतं ज्ञानमज्ञानेनापकृष्यते ।
पृथक्त्वात् सम्प्रयोगाच्च नासूयुर्व्वेद शाश्वतं । स तयोरपवर्गज्ञो वीतरागो विमुच्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वयोऽतीतो जरामृत्यू जित्वा ब्रह्म सनातनं । अमृतं तदवाप्नोति यत्तदक्षरमव्ययं । ७८२०
॥ इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे पञ्चदशाधिकद्विशतोऽध्यायः ॥ २१५ ॥
॥ भीष्म उवाच ॥ निष्कल्मषं ब्रह्मचर्य्यमिच्छता चरितुं सदा । निद्रा सर्व्वात्मना त्याज्या स्वप्नदोषानवेक्षता ।
स्वप्ने हि रजसा देही तमसा चाभिभूयते । देहान्तरमिवापन्नश्चरत्यपगतस्पृहः ।
ज्ञानाभ्यासाज्जागरणं जिज्ञासार्थमनन्तरं । विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा ।
अत्राह को न्वयं भावः स्वप्ने विषयवानिव । प्रलीनैरिन्द्रियैर्द्देही वर्त्तते देहवानिव ।
अत्रोच्यते यथा ह्येतद्वेद योगेश्वरो हरिः । तथैतदुपपन्नार्थं वर्णयन्ति महर्षयः । ७८२५
इन्द्रियाणां श्रमात् स्वप्नमाहुः स्वप्नगतं बुधाः । मनसस्त्वप्रलीनत्वात्तत्तदाहुर्निदर्शनं ।
कार्य्यव्यासक्तमनसः सङ्कल्पो जाग्रतो ह्यपि । यद्वन्मनोरथैश्वर्य्यं स्वप्ने तद्वन्मनोगतं ।
संसाराणामसंख्यानां कामात्मा तदवाप्नुयात् । मनस्यन्तर्हितं सर्व्वं वेद सोत्तमपूरुषः ।
गुणानामपि यद्यतत् कर्म्मणा चाप्युपस्थितं । तत्तत् शंसन्ति भूतानि मनो यद्भावितं यथा ।
ततस्तमुपवर्त्तन्ते गुणा राजसतामसाः । सात्त्विका वा यथायोगमानन्तर्य्यफलोदयं । ७८३०
ततः पश्यन्त्यसंबुद्ध्या वातपित्तकफोत्तरान् । रजस्तमोगतैर्भावैस्तदप्याहुर्दुरत्ययं ।
प्रसन्नैरिन्द्रियैर्यद्यत् सङ्कल्पयति मानसं । तत्तत् स्वप्नेऽप्युपगते मनोदृष्टिर्निरीक्षते ।
व्यापकं सर्व्वभूतेषु वर्त्ततेऽप्रतिघं मनः । आत्मप्रभावात्तं विद्यात् सर्व्वा ह्यात्मनि देवताः ।
मनस्यन्तर्हितं द्वारं देहमास्थाय मानुषं । यद्यत्सदसदव्यक्तं स्वपित्यस्मिन्निदर्शनं ।
सर्व्वभूतात्मभूतस्थं तमध्यात्मगुणं विदुः । लिप्सेत मनसा यश्च सङ्कल्पादैश्वरं गुणं । ७८३५
आत्मप्रसादं तं विद्यात् सर्व्वा ह्यात्मनि देवताः । एवं हि तपसा युक्तमर्कवत्तमसः परं ।
त्रैलोक्यप्रकृतिर्द्देही तमसोऽन्ते महेश्वरः । तपो ह्यधिष्ठितं देवैस्तपोघ्नमसुरैस्तमः ।
एतद्देवासुरैर्गुप्तं तदाहुर्ज्ञानलक्षणं । सत्त्वं रजस्तमश्चेति देवासुरगुणान् विदुः ।
सत्त्वं देवगुणान् विद्यादितरावासुरौ गुणौ । ब्रह्म तत् परमं ज्ञानममृतं ज्योतिरक्षरं ।
ये विदुर्भावितात्मानस्ते यान्ति परमां गतिं । हेतुमच्छक्यमाख्यातुमेतावज्ज्ञानचक्षुषा । ७८४०
प्रत्याहारेण वा शक्यमक्षरं ब्रह्म वेदितुं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे षोडशाधिकद्विशतोऽध्यायः ॥ २१६ ॥
॥ भीष्म उवाच ॥ न स वेद परं ब्रह्म यो न वेद चतुष्टयं । व्यक्ताव्यक्ते च यत्तत्त्वं सम्प्रोक्तं परमर्षिणा ।
व्यक्तं मृत्युमुखं विद्यादव्यक्तममृतं पदं । प्रवृत्तिलक्षणं धर्म्ममृषिर्नारायणोऽब्रवीत् ।
तत्रैवावस्थितं सर्व्वं त्रैलोक्यं सचराचरं । निवृत्तिलक्षणं धर्म्ममव्यक्तं ब्रह्म शाश्वतं ।
प्रवृत्तिलक्षणं धर्म्मं प्रजापतिरथाब्रवीत् । प्रवृत्तिः पुनरावृत्तिर्निवृत्तिः परमा गतिः । ७८४५
तां गतिं परमामेति निवृत्तिपरमो मुनिः । ज्ञानतत्त्वपरो नित्यं शुभाशुभनिदर्शकः ।
तदेवमेतौ विज्ञेयावव्यक्तपुरुषावुभौ । अव्यक्तपुरुषाभ्यान्तु यत् स्यादन्यन्महत्तरं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं विशेषमवेक्षेत विशेषेण विचक्षणः। अनाद्यन्तावुभावेतावलिङ्गौ चाप्युभावपि।
उभौ नित्यावविचलौ महद्भ्यश्च महत्तरौ । सामान्यमेतदुभयोरेवं ह्यन्यद्विशेषणं ।
प्रकृत्या सर्गधर्म्मिण्या तथा त्रिगुणधर्म्मया । विपरीतमतो विद्यात् क्षेत्रज्ञस्य स्वलक्षणं।
प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितं । अग्राह्यौ पुरुषावेतावलिङ्गत्वादसंहितौ ।
संयोगलक्षणोत्पत्तिः कर्म्मणा गृह्यते यथा । करणैः कर्म्मनिर्वृत्तिः कर्त्ता यद्यद्विचेष्टते ।
कीर्त्यते शब्दसंज्ञाभिः कोऽहमेषोऽप्यसाविति । उष्णीषवान् यथा वस्त्रैस्त्रिभिर्भवति संवृतः ।
संवृतोऽयं तथा देही सत्त्वराजसतामसैः । तस्माच्चतुष्टयं वेद्यमेतैर्हेतुभिरावृतं ।
यथा संज्ञो ह्ययं सम्यगन्तकाले न मुह्यति । श्रियं दिव्यामभिप्रेप्सुर्व्वर्ष्मवान् मनसा शुचिः ।
शारीरैरिन्द्रियैरुग्रैस्तैर्निष्कल्मषं तपः । त्रैलोक्यं तपसा व्याप्तमन्तर्भूतेन भास्वता ।
सूर्य्यश्च चन्द्रमाश्चैव भासतस्तपसा दिवि । प्रकाशस्तपसो ज्ञानं लोके संशब्दितं तपः ।
रजस्तमोघ्नं यत्कर्म्म तपसस्तत् स्वलक्षणं । ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ।
वाङ्मनोनियमः सम्यङ्मानसं तप उच्यते । विधिज्ञेभ्यो द्विजातिभ्यो ग्राह्यमन्नं विशिष्यते ।
आहारनियमेनास्य पाप्मा शाम्यति राजसः । वैमनस्यञ्च विषये यान्त्यस्य करणानि च ।
तस्मात्तन्मात्रमादद्याद्यावदत्र प्रयोजनं । अन्तकाले बलोत्कार्षाच्छनैः कुर्य्यादनातुरं ।
एवं युक्तेन मनसा ज्ञानं यदुपपद्यते । रजोवर्ज्योऽप्ययं देही देहवाञ्छब्दवच्चरेत् ।
कार्य्यैरव्याहतमतिर्वैराग्यात् प्रकृतिस्थिरः । आदेहादप्रमादाच्च देहान्ताद्विप्रमुच्यते ।
हेतुयुक्तः सदा सर्गो भूतानां प्रलयस्तथा । परप्रत्ययसर्गे तु नियतिर्नानुवर्त्तते ।
भावान्तप्रभवप्रज्ञा आसते ये विपर्य्ययं । धृत्या देहान् धारयन्तो बुद्धिसंक्षिप्तचेतसः ।
स्थानेभ्यो ध्वंसमानाश्च सूक्ष्मत्वात्तानुपासते । यथागमञ्च गत्वा वै बुद्ध्या तत्रैव बुध्यते ।
देहान्तं कश्चिदन्वास्ते भावितात्मा निराश्रयं । युक्तं धारणया सम्यक् सतः केचिदुपासते ।
अभ्यस्यन्ति परं देवं विद्युत्संशब्दिताक्षरं । अन्तकाले ह्युपासन्ते तपसा दग्धकिल्बिषाः ।
सर्व्व एते महात्मानो गच्छन्ति परमां गतिं । सूक्ष्मं विशेषणं तेषामवेक्षेच्छास्त्रचक्षुषा ।
देहन्तु परमं विद्याद्विमुक्तमपरिग्रहं । अन्तरीक्षादन्यतरं धारणासक्तमानसं ।
मर्त्यलोकाद्विमुच्यन्ते विद्यासंसक्तचेतसः । ब्रह्मभूता विरजसस्ततो यान्ति पराङ्गतिं।
एवमेकायनं धर्म्ममाहुर्व्वेदविदो जनाः । यथाज्ञानमुपासन्तः सर्व्वे यान्ति परां गतिं ।
कषायवर्ज्जितं ज्ञानं येषामुत्पद्यतेऽचलं । यान्ति तेऽपि परान् लोकान् विमुच्यन्ते यथाबलं ।
भगवन्तमजं दिव्यं विष्णुमव्यक्तसंज्ञितं । भावेन यान्ति शुद्धा ये ज्ञानतृप्ता निराशिषः ।
ज्ञात्वात्मस्थं हरिञ्चैव न निवर्त्तन्ति तेऽव्ययाः । प्राप्य तत् परमं स्थानं मोदन्तेऽक्षरमव्ययं ।
एतावदेतद्विज्ञानमेतदस्ति न चास्ति च । तृष्णाबद्धं जगत् सर्व्वं चक्रवत् परिवर्त्तते ।
बिसतन्तुर्यथैवायमन्तस्थः सर्व्वतो बिसे । तृष्णातन्तुरनाद्यन्तस्तथा देहगतः सदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूच्या सूत्रं यथा वस्त्रे संसारयति वायकः । तद्वत् संसारसूत्रं हि तृष्णासूच्या निबध्यते ।
विकारं प्रकृतिञ्चैव पुरुषञ्च सनातनं । यो यथावद्विजानाति स वितृष्णो विमुच्यते ।
प्रकाशं भगवानेतदृषिर्नारायणोऽमृतं । भूतानामनुकम्पार्थं जगाद जगतो गतिः । १८८०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वार्ष्णेयाध्यात्मे सप्तदशाधिकद्विशततोऽध्यायः ॥ २१७ ॥
॥ युधिष्ठिर उवाच ॥ केन वृत्तेन वृत्तज्ञ जनको मिथिलाधिपः । जगाम मोक्षं मोक्षज्ञो भोगानुत्सृज्य मानुषान् ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । येन वृत्तेन वृत्तज्ञो जगाम सुमहत्सुखं ।
जनको जनदेवस्तु मिथिलायां जनाधिपः । और्द्ध्वदेहिकधर्म्माणामासीद्युक्तो विचिन्तने ।
तस्य स्म शतमाचार्य्या वसन्ति सततं गृहे । दर्शयन्तः पृथग्धर्म्मान्नानाश्रमनिवासिनः ।
स तेषां प्रेत्यभावे च प्रेत्यजातौ विनिश्चये । आगमस्थः स भूयिष्ठमात्मतत्त्वेन तुष्यति । १८८५
तत्र पञ्चशिखो नाम कापिलेयो महामुनिः । परिधावन्महीं कृत्स्नां जगाम मिथिलामथ ।
सर्व्वसंन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये । सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः ।
ऋषीणामाहुरेकं यं कामादवसितं नृषु । शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभं ।
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिं । स मन्ये तेन रूपेण विस्मापयति हि स्वयं ।
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनं । पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकं । १८९०
यत्र चासीनमागम्य कापिलं मण्डलं महत् । पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत्पञ्च गुणः पञ्चशिखः स्मृतः । पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ।
दृष्टसत्रेण सम्पृष्टो भूयश्च तपसासुरिः । क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ।
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते । आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययं ।
तस्य पञ्चशिखः शिष्यो मानुष्या वयसा भृतः । ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी । १८९५
तस्याः पुत्त्रत्वमागम्य स्त्रियाः स पिबति स्तनौ । ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीं ।
एतन्मे भगवानाह कापिलेयस्य सम्भवं । तस्य तत् कापिलेयत्वं सर्व्ववित्त्वमनुत्तमं ।
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमं । उपेत्य शतमाचार्य्यान्मोहयामास हेतुभिः ।
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् । उत्सृज्य शतमाचार्य्यान् पृष्ठतोऽनुजगाम तं ।
तस्मै परमकल्याय प्रणताय च धर्म्मतः । अब्रवीत् परमं मोक्षं यत्तत् सांख्येऽभिधीयते । १९००
जातिनिर्व्वेदमुक्त्वा स कर्म्मनिर्व्वेदमब्रवीत् । कर्म्मनिर्व्वेदमुक्त्वा च धर्म्मनिर्व्वेदमब्रवीत् ।
यदर्थं धर्म्मसंसर्गः कर्म्मणाञ्च फलोदयः । तमनाश्वासिकं मोहं विनाशि चलमध्रुवं ।
दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके । आगमात् परमस्तीति ब्रुवन्नपि पराजितः ।
अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युर्ज्जरामयः । आत्मानं मन्यते मोहात्तदसम्यक् परं मतं ।
अथ चेदेवमप्यस्ति यल्लोके नोपपद्यते । अजरोऽयममृत्युश्च राजाऽसौ मन्यते यथा । १९०५
अस्ति नास्तीति चाप्येतत्तस्मिन्नसति लक्षणे । किमधिष्ठाय तद्ब्रूयाल्लोकयात्राविनिश्चयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रत्यक्षं ह्येतयोर्मूलं कृतान्तैतिह्ययोरपि। प्रत्यक्षेणागमो भिन्नः कृतान्तो वा न किञ्चन।
यत्र यत्रानुमानेऽस्मिन् कृतं भावयतोऽपि च। नान्यो जीवः शरीरस्य नास्तिकानां मते स्थितः।
रेता वटकणीकायां घृतपाकाधिवासनं। जातिः स्मृतिरयस्कान्तः सूर्य्यकान्तोऽम्बुभक्षणं।
प्रेत्यभूतात्ययश्चैव देवताद्युपयाचनं। मृते कर्म्मनिवृत्तिश्च प्रमाणमिति निश्चयः। ७९१०
न त्वेते हेतवः सन्ति ये केचिन्मूर्त्तिसंस्थिताः। अमर्त्यस्य हि मर्त्येन सामान्यं नोपलभ्यते।
अविद्या कर्म्मतृष्णा च केचिदाहुः पुनर्भवे। कारणं लोभमोहौ तु दोषाणाञ्च निषेवणं।
अविद्यां क्षेत्रमाहुर्हि कर्म्म वीजं तथा कृतं। तृष्णा संजननं स्नेह एष तेषां पुनर्भवः।
तस्मिन् गूढे च दग्धे च भिन्ने मरणधर्म्मिणि। अन्योऽस्माज्जायते देहस्तमाहुः सत्त्वसङ्क्षयं।
यदा स्वरूपतश्चान्यो जातितः शुभतोऽर्थतः। कथमस्मिन् स इत्येव सम्बन्धः स्यादसंहितं। ७९१५
एवं सति च का प्रीतिर्द्दानविद्यातपोबलैः। यदस्याचरितं कर्म्म सर्व्वमन्यत् प्रपद्यते।
अपि ह्ययमिहैवान्यैः प्राकृतैर्दुःखितो भवेत्। सुखितो दुःखितो वाऽपि दृश्यादृश्यविनिर्णयः।
तथा हि मुषलैर्हन्युः शरीरं तत् पुनर्भवेत्। पृथग्ज्ञानं यदन्यच्च येनैतन्नोपपद्यते।
ऋतुसंवत्सरौ तिथ्यः शीतोष्णेऽथ प्रियाप्रिये। यथाऽतीतानि पश्यन्ति तादृशः सत्त्वसङ्क्षयः।
जरयाऽभिपरीतस्य मृत्युना च विनाशिना। दुर्व्बलं दुर्व्बलं पूर्व्वं गृहस्येव विनश्यति। ७९२०
इन्द्रियाणि मनो वायुः शोणितं मांसमस्थि च। आनुपूर्व्व्या विनश्यन्ति स्वन्धातुमुपयान्ति च।
लोकयात्राविघातश्च दानधर्म्मफलागमे। तदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः।
इति सम्यङ्मनस्येते बहवः सन्ति हेतवः। एतदस्तीदमस्तीति न किञ्चित् प्रतिदृश्यते।
तेषां विमृशतामेवं तत्तत्समभिधावतां। क्वचिन्निविशते बुद्धिस्तत्र जीर्य्यति वृक्षवत्।
एवमर्थैरनर्थैश्च दुःखिताः सर्व्वजन्तवः। आगमैरपकृष्यन्ते हस्तिपैर्हस्तिनो यथा। ७९२५

अर्थांस्तथैत्यन्तसुखावहांश्च लिप्सन्त एते बहवो विशुष्काः। महत्तरं दुःखमनुप्रपन्ना हित्वामिषं मृत्युवशं प्रयान्ति। विनाशिनो ह्यध्रुवजीवितस्य किं बन्धुभिर्म्मिन्नपरिग्रहैश्च। विहाय यो गच्छति सर्व्वमेव क्षणेन गत्वा न निवर्त्तते च। भूव्योमतोयानलवायवोऽपि सदा शरीरं प्रतिपालयन्ति। इतीदमालक्ष्य रतिः कुतो भवेद्विनाशिनोऽप्यस्य न कर्म्म विद्यते। इदमनुपधिवाक्यमच्छलं परमनिरामयमात्मसाक्षिकं। नरपतिरभिवीक्ष्य विस्मितः पुनरनुयोक्तुमिदं प्रचक्रमे।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पञ्चशिखवाक्ये अष्टादशाधिकद्विशतोऽध्यायः॥ २१८॥

॥ भीष्म उवाच॥ जनको जनदेवस्तु ज्ञापितः परमर्षिणा। पुनरेवानुपप्रच्छ साम्पराये भवाभवौ। ७९३०
॥ जनक उवाच॥ भगवन् यदि न प्रेत्यसंज्ञा भवति कस्यचित्। एवं सति किमज्ञानं ज्ञानं किं वा करिष्यति।
सर्व्वमुच्छेदनिष्ठं स्यात् पश्य चैतद्द्विजोत्तम। अप्रमत्तः प्रमत्तो वा किं विशेषं करिष्यति।
असंसर्गो हि भूतेषु संसर्गो वा विनाशिषु। कस्मै क्रियेत कल्पेत निश्चयः कोऽत्र तत्त्वतः।
॥ भीष्म उवाच॥ तमसा हि प्रतिच्छन्नं विभ्रान्तमिव चातुरं। पुनः प्रशमयन् वाक्यैः कविः पञ्चशिखोऽब्रवीत्।
उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते। अयं ह्यपि समाहारः शरीरेन्द्रियचेतसां। ७९३५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्त्तते पृथगन्योन्यमप्यपाश्रित्य कर्म्मसु । धातवः पञ्चधा तोयं खं वायुर्ज्योतिषो धरा ।
ते स्वभावेन तिष्ठन्ति वियुज्यन्ते स्वभावतः । आकाशं वायुरूष्मा च स्नेहो यश्चापि पार्थिवः ।
एष पञ्चसमाहारः शरीरमपि नैकधा । ज्ञानमुष्मा च वायुश्च त्रिविधः कार्य्यसंग्रहः ।
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः । प्राणापानौ विकारश्च धातवश्चात्र निःसृताः
श्रवणं स्पर्शनं जिह्वा दृष्टिर्नासा तथैव च । इन्द्रियाणीति पञ्चैते चित्तपूर्व्वं गता गुणाः । ७९४०
तत्र विज्ञानसंयुक्ता त्रिविधा चेतना ध्रुवा । सुखदुःखेति यामाहुरदुःखासुखेति च ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च मूर्त्तयः । एते ह्यामरणात् पञ्च षड्गुणा ज्ञानसिद्धये ।
तेषु कर्म्मनिसर्गश्च सर्व्वतत्त्वार्थनिश्चयः । तमाहुः परमं शुक्रं बुद्धिरित्यव्ययं महत् ।
इमं गुणसमाहारमात्मभावेन पश्यतः । असम्यग्दर्शनैर्दुःखमनन्तं नोपशाम्यति ।
अनात्मेति च यद्दृष्टं तेनाहं न ममेत्यपि । वर्त्तते किमधिष्ठाना प्रसक्ता दुःखसन्ततिः । ७९४५
अत्र सम्यग्वधो नाम त्यागशास्त्रमनुत्तमं । शृणु यत्तव मोक्षाय भाष्यमाणं भविष्यति ।
त्याग एव हि सर्व्वेषां युक्तानामपि कर्म्मणां । नित्यं मिथ्याविनीतानां क्लेशो दुःखवहो मतः ।
द्रव्यत्यागे तु कर्म्माणि भोगत्यागे व्रतान्यपि । सुखत्यागे तपोयोगं सर्व्वत्यागे समापना ।
तस्य मार्गोऽयमद्वैधः सर्व्वत्यागस्य दर्शितः । विप्रहाणाय दुःखस्य दुर्गतिस्त्वन्यथा भवेत् ।
पञ्च ज्ञानेन्द्रियाण्युक्त्वा मनःषष्ठानि चेतसि । बलषष्ठानि वक्ष्यामि पञ्चकर्म्मेन्द्रियाणि तु । ७९५०
हस्तौ कर्म्मेन्द्रियं ज्ञेयमथ पादौ गतीन्द्रियं । प्रजनानन्दयोः शेफो निसर्गे पायुरिन्द्रियं ।
वाक् च शब्दविशेषार्थामिति पञ्चान्वितं विदुः । एवमेकादशैतानि बुद्ध्याशु विसृजेन्मनः ।
कर्णौ शब्दश्च चित्तञ्च त्रयः श्रवणसंग्रहे । तथा स्पर्शे तथा रूपे तथैव रसगन्धयोः ।
एवं पञ्चत्रिका ह्येते गुणास्तदुपलब्धये । येनायं त्रिविधो भावः पर्य्यायात् समुपस्थितः ।
सात्त्विको राजसश्चापि तामसश्चापि ते त्रयः । त्रिविधा वेदना येषु प्रसृताः सर्व्वसाधनाः । ७९५५
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता । अकुतश्चित् कुतश्चिद्वा चित्ततः सात्त्विको गुणः ।
अतुष्टिः परितापश्च शोको लोभस्तथाऽक्षमा । लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुतः ।
अविवेकस्तथा मोहः प्रमादः स्वप्नतन्द्रिताः । कथञ्चिदपि वर्त्तन्ते विविधास्तामसा गुणाः ।
अत्र यत् प्रीतिसंयुक्तं काये मनसि वा भवेत् । वर्त्तते सात्त्विको भाव इत्यपेक्षेत तत्तया ।
यत्त्वसन्तोषसंयुक्तमप्रीतिकरमात्मनः । प्रवृत्तं रज इत्येवं ततस्तदपि चिन्तयेत् । ७९६०
अथ यन्मोहसंयुक्तं काये मनसि वा भवेत् । अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत्
श्रोत्रं व्योमाश्रितं भूतं शब्दः श्रोत्रं समाश्रितः । नोभयं शब्दविज्ञाने विज्ञानस्येतरस्य वा ।
एवं त्वक्चक्षुषी जिह्वा नासिका चेति पञ्चमी । स्पर्शे रूपे रसे गन्धे तानि चेतो मनश्च तत् ।
स्वकर्म्मयुगपद्भावो दशस्वेतेषु तिष्ठति । चित्तमेकादशं विद्धि बुद्धिर्द्वादशमी भवेत् ।
तेषामयुगपद्भावे उच्छेदो नास्ति तामसः । आस्थितो युगपद्भावो व्यवहारः स लौकिकः । ७९६५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इन्द्रियाण्यपि सूक्ष्माणि दृष्ट्वा पूर्व्वश्रुतागमात् । चिन्तयन्नानुपर्य्येति त्रिभिरेवान्वितो गुणैः ।
यत्तमोपहतं चित्तमाशुसंहारमध्रुवं । करोत्युपरमं काये तदाहुस्तामसं बुधाः ।
यद्यदागमसंयुक्तं न कृच्छ्रमनुपश्यति । अथ तत्राप्युपादत्ते तमोव्यक्तमिहानृतं ।
एवमेष प्रसंख्यातः स्वकर्म्मप्रत्ययो गुणः । कथञ्चिद्वर्त्तते सम्यक् केषाञ्चिद्वा निवर्त्तत ।
एतदाहुः समाहारं क्षेत्रमध्यात्मचिन्तकाः । स्थितो मनसि यो भावः स वै क्षेत्रज्ञ उच्यते । ७९७०
एवं सति क उच्छेदः शाश्वतो वा कथं भवेत् । स्वभावाद्वर्त्तमानेषु सर्व्वभूतेषु हेतुतः ।
यथार्णवगता नद्यो व्यक्तीर्जहति नाम च । नदाश्च तानि यच्छन्ति तादृशः सत्त्वसङ्क्षयः ।
एवं सति कुतः संज्ञा प्रेत्यभावे पुनर्भवेत् । प्रतिसंमिश्रिते जीवे गृह्यमाणे च सर्व्वतः ।
इमाञ्च यो वेद विमोक्षबुद्धिमात्मानमन्विच्छति चाप्रमत्तः । न लिप्यते कर्म्मफलैरनिष्टैः पत्रं बिसस्येव जलेन सिक्तं ।
दृढैर्हि पाशैर्ब्बहुभिर्व्विमुक्तः प्रजानिमित्तैरपि दैवतैश्च । यदा ह्यसौ सुखदुःखे जहाति मुक्तस्तदाऽग्र्यां गतिमेत्य लिङ्गः । ७९७५
श्रुतिप्रमाणागममङ्गलैश्च शेते जरामृत्युभयादभीतः । क्षीणे च पुण्ये विगते च पापे ततो निमित्ते च फले विनष्टे ।
अलेपमाकाशमलिङ्गमेवमास्थाय पश्यन्ति महत्यसक्ताः । यथोर्णनाभिः परिवर्त्तमानस्तन्तुक्षये तिष्ठति पात्यमानः ।
तथा विमुक्तः प्रजहाति दुःखं विध्वंसते लोष्ट इवाद्रिमिच्छन् । यथा रुरुः शृङ्गमयो पुराणं हित्वा त्वचं वाऽप्युरगो यथा च ।
विहाय गच्छत्यनवेक्षमाणस्तथा विमुक्तो विजहाति दुःखं । द्रुमं यथा वाऽप्युदके पतन्तमुत्सृज्य पक्षी निपतत्यसक्तः ।
तथा ह्यसौ सुखदुःखे विहाय मुक्तः परार्द्ध्यां गतिमेत्य लिङ्गः । ७९८०
अपि च भवति मैथिलेन गीतं नगरमुपाहितमग्निनाऽभिवीक्ष्य । न खलु मम हि दह्यतेऽत्र किञ्चित् स्वयमिदमाह किल स्म भूमिपालः ।
इदममृतपदं निशम्य राजा स्वयमिह पञ्चशिखेन भाष्यमाणं । निखिलमभिसमीक्ष्य निश्चितार्थः परमसुखी विजहार वीतशोकः ।
इमं यः पठति विमोक्षनिश्चयं महीपते सततमवेक्षते तथा । उपद्रवान्नानुभवत्यदुःखितः प्रमुच्यते कपिलमिवेत्य मैथिलः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पञ्चशिखवाक्ये ऊनविंशत्यधिकद्विशतोऽध्यायः ॥ २१९ ॥

॥ युधिष्ठिर उवाच ॥ किं कुर्व्वन् सुखमाप्नोति किं कुर्व्वन्दुःखमाप्नुयात् । किं कुर्व्वन्निर्भयो लोके सिद्धश्चरति भारत ।
॥ भीष्म उवाच ॥ दममेव प्रशंसन्ति वृद्धाः श्रुतिसमाधयः । सर्व्वेषामेव वर्णानां ब्राह्मणस्य विशेषतः । ७९८५
नादान्तस्य क्रियासिद्धिर्यथावदुपपद्यते । क्रिया तपश्च सत्यञ्च दमे सर्व्वं प्रतिष्ठितं ।
दमस्तेजो वर्द्धयति पवित्रं दम उच्यते । विपाप्मा निर्भयो दान्तः पुरुषो विन्दते महत् ।
सुखं दान्तः प्रस्वपिति सुखञ्च प्रतिबुध्यते । सुखं लोके विपर्य्येति मनश्चास्य प्रसीदति ।
तेजो दमेन ध्रियते तन्न तीक्ष्णोऽधिगच्छति । अमित्रांश्च बहून्नित्यं पृथगात्मनि पश्यति ।
क्रव्याद्भ्य इव भूतानामदान्तेभ्यः सदा भयं । तेषां विप्रतिषेधार्थं राजा सृष्टः स्वयम्भुवा । ७९९०
आश्रमेषु च सर्व्वेषु दम एव विशिष्यते । यच्च तेषु फलं धर्म्मे भूयो दान्ते तदुच्यते ।
तेषां लिङ्गानि वक्ष्यामि येषां समुदयो दमः । अकार्पण्यमसंरम्भः सन्तोषः श्रद्दधानता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

अक्रोध आर्ज्जवं नित्यं नातिवादोऽभिमानिता । गुरुपूजाऽनसूया च दया भूतेष्वपैशुनं ।
जनवादमृषावादस्तुतिनिन्दाविवर्ज्जनं । साधुकामस्य स्पृहयेन्नायतिं प्रत्ययेषु च ।
अवैरकृत्सूपचारः समो निन्दाप्रशंसयोः । सुवृत्तः शीलसम्पन्नः प्रसन्नात्मात्मवान् प्रभुः । ७९९५
प्राप्य लोके च सत्कारं स्वर्गं वै प्रेत्य गच्छति । दुर्गमं सर्व्वभूतानां प्रापयन्मोदते सुखी ।
सर्व्वभूतहिते युक्तो न स्म यो द्विषते जनं । महाह्रद इवाक्षोभ्यः प्रज्ञातृप्तः प्रसीदति ।
अभयं यस्य भूतेभ्यः सर्व्वेषामभयं यतः । नमस्यः सर्व्वभूतानां दान्तो भवति बुद्धिमान् ।
न हृष्यति महत्यर्थे व्यसने च न शोचति । स वै परिमितप्रज्ञः स दान्तो द्विज उच्यते ।
कर्म्मभिः श्रुतसम्पन्नः सद्भिराचरितः शुचिः । सदैव दमसंयुक्तस्तस्य भुङ्क्ते महाफलं । ८०००
अनसूया क्षमा शान्तिः सन्तोषः प्रियवादिता । सत्यं दानमनायासो नैष मार्गो दुरात्मनां ।
कामक्रोधौ च लोभश्च परस्येर्ष्या विकत्थना । कामक्रोधौ वशे कृत्वा ब्रह्मचारी जितेन्द्रियः ।
विक्रम्य घोरे तमसि ब्राह्मणः शंसितव्रतः । कालाकाङ्क्षी चरेल्लोकान्निरपाय इवात्मवान् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि दमप्रशंसायां विंशत्यधिकद्विशततोऽध्यायः ॥ २२० ॥
॥ युधिष्ठिर उवाच ॥ द्विजातयो व्रतोपेता यदिदं भुञ्जते हविः । अन्नं ब्राह्मणकामाय कथमेतत् पितामह ।
॥ भीष्म उवाच ॥ अवेदोक्तव्रतोपेता भुञ्जानाः कार्य्यकारिणः । वेदोक्तेषु च भुञ्जाना व्रतलुप्ता युधिष्ठिर । ८००५
॥ युधिष्ठिर उवाच ॥ यदिदं तप इत्याहुरुपवासं पृथग्जनाः । एतत्तपो महाराज उताहो किं तपो भवेत् ।
॥ भीष्म उवाच ॥ मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः । आत्मतन्त्रोपघातस्तु न तपस्तत् सतां मतं ।
त्यागश्च सन्नतिश्चैव शिष्यते तप उत्तमं । सदोपवासी स भवेद्ब्रह्मचारी सदा भवेत् ।
मुनिश्च स्यात् सदा विप्रो दैवतञ्च सदा भवेत् । कुटुम्बिको धर्म्मकामः सदाऽस्वप्नश्च भारत ।
अमांसादी सदा च स्यात् पवित्रश्च सदा भवेत् । अमृताशी सदा च स्याद्देवतातिथिपूजकः । ८०१०
विघसाशी सदा च स्यात् सदा चैवातिथिव्रतः । श्रद्दधानः सदा च स्याद्दैवतद्विजपूजकः ।
॥ युधिष्ठिर उवाच ॥ कथं सदोपवासी स्याद्ब्रह्मचारी कथं भवेत् । विघसाशी कथञ्च स्यात् सदा चैवातिथिव्रतः ।
॥ भीष्म उवाच ॥ अन्तरा प्रातराशञ्च सायमाशन्तथैव च । सदोपवासी स भवेद्यो न भुङ्क्तेऽन्तरा पुनः ।
भार्य्यां गच्छन् ब्रह्मचारी ऋतौ भवति वै द्विजः । ऋतवादी भवेन्नित्यं ज्ञाननित्यश्च यो नरः ।
न भक्षयेद्वृथामांसममांसाशी भवत्यपि । दाननित्यः पवित्रश्च अस्वप्नश्च दिवाऽस्वपन् । ८०१५
भृत्यातिथिषु यो भुङ्क्ते भुक्तवत्सु सदा नरः । अमृतं केवलं भुङ्क्ते इति विद्धि युधिष्ठिर ।
अभुक्तवत्सु नाश्नानः सततं यस्तु वै द्विजः । अभोजनेन तेनास्य जितः स्वर्गो भवत्युत ।
देवताभ्यः पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह । अवशिष्टन्तु योऽश्नाति तमाहुर्विघसाशिनं ।
तेषां लोका ह्यपर्य्यन्ताः सदने ब्रह्मणा सह । उपस्थिताश्चाप्सरोभिः परियान्ति दिवौकसः ।
देवताभिश्च ये सार्द्धं पितृभिश्चोपभुञ्जते । रमन्ते पुत्त्रपौत्त्रैश्च तेषां गतिरनुत्तमा । ८०२०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि अमृतप्राश्निके एकविंशत्यधिकद्विशततोऽध्यायः ॥ २२१ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ यदिदं कर्म्म लोकेऽस्मिन् शुभं वा यदि वाऽशुभं । पुरुषं योजयत्येव फलयोगेन भारत ।
कर्त्ताऽस्ति तस्य पुरुष उताहो नेति संशयः । एतदिच्छामि तत्त्वेन त्वत्तः श्रोतुं पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । प्रह्लादस्य च संवादमिन्द्रस्य च युधिष्ठिर ।
असक्तं धुतपाप्मानं कुले जातं बहुश्रुतं । अस्तम्भमनहङ्कारं सत्त्वस्थं समये रतं ।
तुल्यनिन्दास्तुतिं दान्तं शून्यागारनिवासिनं । चराचराणां भूतानां विदितप्रभवाव्ययं ।
अक्रुध्यन्तमहृष्यन्तमप्रियेषु प्रियेषु च । काञ्चने वाऽथ लोष्टे वा उभयोः समदर्शनं ।
आत्मनि श्रेयसि ज्ञाने धीरं निश्चितनिश्चयं । परावरज्ञं भूतानां सर्व्वज्ञं समदर्शनं ।
शक्रः प्रह्लादमासीनमेकान्ते संयतेन्द्रियं । बुभुत्समानस्तत्प्रज्ञामभिगम्येदमब्रवीत् ।
यैः कश्चित् सम्मतो लोके गुणैः स्यात् पुरुषो नृप । भवत्यनपगान् सर्व्वांस्तान् गुणान् लक्षयामहे ।
अथ ते लक्ष्यते बुद्धिः समा बालजनैरिह । आत्मानं मन्यमानः सन् श्रेयः किमिह मन्यसे ।
बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः । श्रिया विहीनः प्रह्लाद शोचितव्ये न शोचसि ।
प्रज्ञालाभात्तु दैतेय उताहो धृतिमत्तया । प्रह्लाद सुस्थरूपोऽसि पश्यन् व्यसनमात्मनः ।
इति सञ्चोदितस्तेन धीरो निश्चितनिश्चयः । उवाच श्लक्ष्णया वाचा स्वां प्रज्ञामनुवर्णयन् ।
॥ प्रह्लाद उवाच ॥ प्रवृत्तिञ्च निवृत्तिञ्च भूतानां यो न बुध्यते । तस्य स्तम्भो भवेद्बाल्यान्नास्ति स्तम्भोऽनुपश्यतः ।
स्वभावात् सम्प्रवर्त्तन्ते निवर्त्तन्ते तथैव च । सर्व्वे भावास्तथाऽभावाः पुरुषार्थो न विद्यते ।
पुरुषार्थस्य चाभावे नास्ति कश्चिच्च कारकः । स्वयं न कुर्व्वतस्तस्य जातु मानो भवेदिह ।
यस्तु कर्त्तारमात्मानं मन्यते साध्वसाधु वा । तस्य दोषवती प्रज्ञा अतत्त्वज्ञेति मे मतिः ।
यदि स्यात् पुरुषः कर्त्ता शक्रात्मश्रेयसे ध्रुवं । आरम्भास्तस्य सिद्ध्येयुर्न तु जातु पराभवेत् ।
अनिष्टस्य हि निर्वृत्तिरनिर्वृत्तिः प्रियस्य च । लक्ष्यते यतमानानां पुरुषार्थस्ततः कुतः ।
अनिष्टस्याभिनिर्वृत्तिमिष्टसंवृत्तिमेव च । अप्रयत्नेन पश्यामः केषाञ्चित्तत् स्वभावतः ।
प्रतिरूपतराः केचिद्दृश्यन्ते बुद्धिमत्तराः । विरूपेभ्योऽल्पबुद्धिभ्यो लिप्समाना धनागमं ।
स्वभावप्रेरिताः सर्व्वे निविशन्ते गुणा यदा । शुभाशुभास्तदा तत्र कस्य किं मानकारणं ।
स्वभावादेव तत् सर्व्वमिति मे निश्चिता मतिः । आत्मप्रतिष्ठा प्रज्ञा वा मम नास्ति ततोऽन्यथा ।
कर्म्मजन्त्विह मन्यन्ते फलयोगं शुभाशुभं । कर्म्मजं विषयं कृत्स्नमहं वक्ष्यामि तच्छृणु ।
यथा वेदयते कश्चिदोदनं वायसोऽभ्यदन् । एवं सर्व्वाणि कर्म्माणि स्वभावस्यैव लक्षणं ।
विकारानेव यो वेद न वेद प्रकृतिं परां । तस्य स्तम्भो भवेद्बाल्यान्नास्ति स्तम्भोऽनुपश्यतः ।
स्वभावभाविनो भावान् सर्व्वानेवेह निश्चयात् । बुध्यमानस्य दर्पो वा मानो वा किं करिष्यति ।
वेद धर्म्मविधिं कृत्स्नं भूतानाञ्चाप्यनित्यतां । तस्माच्छक्र न शोचामि सर्व्वं ह्येवेदमन्तवत् ।
निर्म्ममो निरहङ्कारो निराशीर्मुक्तबन्धनः । स्वस्थो व्यपेतः पश्यामि भूतानां प्रभवाप्ययौ ।
कृतप्रज्ञस्य दान्तस्य वितृष्णस्य निराशिषः । नायासो विद्यते शक्र पश्यतो लोकमव्ययं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

प्रकृतौ च विकारे च न मे प्रीतिर्न च द्विषे । द्वेष्टारञ्च न पश्यामि यो माममद्य ममायते ।
नोर्द्ध्वं नावाङ् न तिर्य्यक् न क्वचिच्छक्र कामये । न हि ज्ञेये न विज्ञाने न ज्ञाने शर्म्म विद्यते ।
॥ शक्र उवाच ॥ येनैषा लभ्यते प्रज्ञा येन शान्तिरवाप्यते । प्रब्रूहि तमुपायं मे सम्यक् प्रह्लाद पृच्छतः ।
॥ प्रह्लाद उवाच । आर्ज्जवेनाप्रमादेन प्रसादेनात्मवत्तया । वृद्धशुश्रुषया शक्र पुरुषो लभ्यते महत् ।
स्वभावाल्लभते प्रज्ञां शान्तिमेति स्वभावतः । स्वभावादेव तत् सर्व्वं यत्किञ्चिदनुपश्यसि । ८०५५
इत्युक्तो दैत्यपतिना शक्रो विस्मयमागमत् । प्रीतिमांश्च तदा राजंस्तद्वाक्यं प्रत्यपूजयत् ।
स तदाऽभ्यर्च्च्य दैत्येन्द्रं त्रैलोक्यपतिरीश्वरः । असुरेन्द्रमुपामन्त्र्य जगाम स्वं निवेशनं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शक्रप्रह्लादसंवादे द्वाविंशत्यधिकद्विशततोऽध्यायः ॥ २२२ ॥
॥ युधिष्ठिर उवाच ॥ यया बुद्ध्या महीपालो भ्रष्टश्रीर्व्विचरेन्महीं । कालदण्डविनिष्पिष्टस्तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । वासवस्य च संवादं बलेर्व्वैरोचनस्य च ।
पितामहमुपागम्य प्रणिपत्य कृताञ्जलिः । सर्व्वानेवासुरान् जित्वा बलिं पप्रच्छ वासवः । ८०६०
यस्य स्म ददतो वित्तं न कदाचन हीयते । तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिं ।
स वायुर्व्वरुणश्चैव स रविः स च चन्द्रमाः । सोऽग्निस्तपति भूतानि जलञ्च स भवत्युत ।
तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिं । स एव ह्यस्तमयते स स्म विद्योतते दिशः ।
स वर्षति स्म वर्षाणि यथाकालमतन्द्रितः । तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिं ।
॥ ब्रह्मोवाच ॥ नैतत्ते साधु मघवन् यदेनमनुपृच्छसि । पृष्टस्तु नानृतं ब्रूयात्तस्माद्वक्ष्यामि ते बलिं । ८०६५
उष्ट्रेषु यदि वा गोषु खरेष्वश्वेषु वा पुनः । वरिष्ठो भविता जन्तुः शून्यागारे शचीपते ।
॥ शक्र उवाच ॥ यदि स्म बलिना ब्रह्मन् शून्यागारे समेयिवान् । हन्यामेनं न वा हन्यां तद्ब्रह्मन्ननुशाधि मां ।
॥ ब्रह्मोवाच ॥ मा स्म शक्र बलिं हिंसीर्न बलिर्व्वधमर्हति । न्यायस्तु शक्र प्रष्टव्यस्त्वया वासव काम्यया ।
॥ भीष्म उवाच ॥ एवमुक्तो भगवता महेन्द्रः पृथिवीं तदा । चचारैरावतस्कन्धमधिरुह्य श्रिया वृतः ।
ततो ददर्श स बलिं खरवेशेन संवृतं । यथाख्यातं भगवता शून्यागारकृतालयं । ८०७०
॥ शक्र उवाच ॥ खरयोनिमनुप्राप्तस्तुषभक्ष्योऽसि दानव । इयन्ते योनिरधमा शोचस्याहो न शोचसि ।
अदृष्टं वत पश्यामि द्विषतां वशमागतं । श्रिया विहीनं मित्रैश्च भ्रष्टवीर्य्यपराक्रमं ।
यत्तद्यानसहस्रैस्त्वं ज्ञातिभिः परिवारितः । लोकान् प्रतापयन् सर्व्वान् यास्यस्मानवितर्कयन् ।
त्वन्मुखाश्चैव दैतेया व्यतिष्ठंस्तव शासने । अकृष्टपच्या च मही तवैश्वर्य्ये बभूव ह ।
इदञ्च तेऽद्य व्यसनं शोचस्याहो न शोचसि । यदाऽतिष्ठः समुद्रस्य पूर्व्वकूले विलेलिहन् । ८०७५
ज्ञातीन् विभजतो वित्तं तदासीत्ते मनः कथं । यत्ते सहस्रसमिता ननृतुर्द्देवयोषितः ।
बहूनि वर्षपूगानि विहारे दीप्यतः श्रिया । सर्व्वाः पुष्करमालिन्यः सर्व्वाः काञ्चनसप्रभाः ।
कथमद्य तदा चैव मनस्ते दानवेश्वर । छत्रं तवासीत् सुमहत् सौवर्णं रत्नभूषितं ।
ननृतुस्तत्र गन्धर्व्वाः षट्सहस्राणि सप्तधा । यूपस्तवासीत् सुमहान् यजतः सर्व्वकाञ्चनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS MoE Grant 2 Equipment Heritage Foundation, Jalgaon

यदाददः सहस्राणि अयुतानां गवां दश । अनन्तरं सहस्रेण तदासीद्दैत्य का मतिः । ८०८०
यदा च पृथिवीं सर्व्वां यजमानोऽनुपर्य्यगाः साम्याक्षेपेण विधिना तदासीत् किन्नु ते हृदि ।
न ते पश्यामि भृङ्गारं न छत्रं व्यजने न च । ब्रह्मदत्ताञ्च ते मालां न पश्याम्यसुराधिप ।
॥ बलिरुवाच ॥ न त्वं पश्यसि भृङ्गारं न च्छत्रं व्यजने न च । ब्रह्मदत्ताञ्च मे मालां न त्वं द्रक्ष्यसि वासव ।
गुहायां निहितानि त्वं मम रत्नानि पृच्छसि । यदा मे भविता कालस्तदा त्वं तानि द्रक्ष्यसि ।
न त्वेतदनुरूपन्ते यशसो वा कुलस्य वा । समृद्धार्थोऽसमृद्धार्थं यन्मां कत्थितुमिच्छसि । ८०८५
न हि दुःखेषु शोचन्ते न प्रहृष्यन्ति चर्द्धिषु । कृतप्रज्ञा ज्ञानतृप्ताः चान्ताः सन्तो मनीषिणः ।
त्वन्तु प्राकृतया बुद्ध्या पुरन्दर विकत्थसे । यदाऽहमिव भावी स्यास्तदा नैवं वदिष्यसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि बलिवासवसंवादे त्रयोविंशत्यधिकद्विशततोऽध्यायः ॥ २२३ ॥
॥ भीष्म उवाच ॥ पुनरेव तु तं शक्रः प्रहसन्निदमब्रवीत् । निःश्वसन्तं यथा नागं प्रव्याहाराय भारत ।
॥ शक्र उवाच ॥ यत्तद्यानसहस्रेण ज्ञातिभिः परिवारितः । लोकान् प्रतापयन् सर्व्वान् यास्यस्मांकं वितर्कयन् ।
दृष्ट्वा सुकृपणाञ्चेमामवस्थामात्मनो बले । ज्ञातिमित्रपरित्यक्तः शोचस्याहो न शोचसि । ८०९०
प्रीतिं प्राप्यातुलां पूर्व्वं लोकांश्चात्मवशे स्थितान् । विनिपातमिमं वाद्य शोचस्याहो न शोचसि ।
॥ बलिरुवाच ॥ अनित्यमुपलच्येह कालपर्य्यायधर्म्मतः । तस्माच्छक्र न शोचामि सर्व्वं ह्येवेदमन्तवत् ।
अन्तवन्त इमे देहा भूतानाञ्च सुराधिप । तेन शक्र न शोचामि नापराधादिदं मम ।
जीवितञ्च शरीरञ्च जात्यैव सह जायते । उभे सह विवर्द्धेते उभे सह विनश्यतः ।
न हीदृशमहं भावमवशः प्राप्य केवलं । यदेवमभिजानामि का व्यथा मे विजानतः । ८०९५
भूतानां निधनं निष्ठा स्रोतसामिव सागरः । नैतत्सम्यग्विजानन्तो नरा मुह्यन्ति वज्रधृक् ।
ये त्वेवं नाभिजानन्ति रजोमोहपरायणाः । ते कृच्छ्रं प्राप्य सीदन्ति बुद्धिर्य्येषां प्रणश्यति ।
बुद्धिलाभात्तु पुरुषः सर्व्वं तुदति किल्बिषं । विपाप्मा लभते सत्त्वं सत्त्वस्थः सम्प्रसीदति ।
ततस्तु ये निवर्त्तन्ते जायन्ते वा पुनः पुनः । कृपणाः परितप्यन्ते तैरर्थैरभिचोदिताः ।
अर्थसिद्धिमनर्थञ्च जीवितं मरणं तथा । सुखदुःखफलञ्चैव न द्वेष्मि न च कामये । ८१००
हतं हन्ति हतो ह्येव यो नरो हन्ति कञ्चन । उभौ तौ न विजानीतो यस्य हन्ति हतस्य यः ।
हत्वा जित्वा च मघवन् यः कश्चित् पुरुषायते । अकर्त्ता ह्येव भवति कर्त्ता ह्येव करोति तत् ।
को हि लोकस्य कुरुते विनाशप्रभवावुभौ । कृतं हि तत् कृतेनैव कर्त्ता तस्यापि चापरः ।
पृथिवी ज्योतिराकाशमापो वायुश्च पञ्चमः । एतद्योनीनि भूतानि तत्र का परिदेवना ।
महाविद्योऽल्पविद्यश्च बलवान् दुर्ब्बलश्च यः । दर्शनीयो विरूपश्च सुभगो दुर्भगश्च यः । ८१०५
सर्व्वं कालः समादत्ते गम्भीरः स्वेन तेजसा । तस्मिन् कालवशं प्राप्ते का व्यथा मे विजानतः ।
दग्धमेवानुदहति हतमेवानुहन्यते । नश्यते नष्टमेवाग्रे लब्धव्यं लभते नरः ।
नास्य द्वीपः कुतः पारो नावारः सम्प्रदृश्यते । नान्तमस्य प्रपश्यामि विधेर्दिव्यस्य चिन्तयन् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

यदि मे पश्यतः कालो भूतानि न विनाशयेत्। स्यान्मे हर्षश्च दर्पश्च क्रोधश्चैव शचीपते।
तुषभक्षन्तु मां ज्ञात्वा प्रविविक्तजने गृहे। बिभ्रतं गार्द्दभं रूपमागत्य परिगर्हसे। ८११०
इच्छन्नहं विकुर्य्यां हि रूपाणि बहुधात्मनः। विभीषणानि यानीक्ष्य पलायेथास्त्वमेव मे।
कालः सर्व्वं समादत्ते कालः सर्व्वं प्रयच्छति। कालेन विहितं सर्व्वं मा कृथाः शक्र पौरुषं।
पुरा सर्व्वं प्रव्यथितं मयि क्रुद्धे पुरन्दर। अवैमि त्वस्य लोकस्य सर्व्वं शक्र सनातनं।
त्वमप्येवमवेक्षस्व मात्मना विस्मयं गमः। प्रभवश्च प्रभावश्च नात्मसंस्थः कदाचन।
कौमारमेव ते चित्तं तथैवाद्य यथा पुरा। समवेक्षस्व मघवन् बुद्धिं विन्दस्व नैष्ठिकीं। ८११५
देवा मनुष्याः पितरो गन्धर्व्वोरगराक्षसाः। आसन् सर्व्वे मम वशे तत्सर्व्वं वेत्थ वासव।
नमस्तस्यै दिशेऽप्यस्तु यस्यां वैरोचनो बलिः। इति मामभ्यपद्यन्त बुद्धिमात्सर्य्यमोहिताः।
नाहं तदनुशोचामि नात्मभ्रंशं शचीपते। एवं मे निश्चिता बुद्धिः शास्तु तिष्ठाम्यहं वशे।
दृश्यते हि कुले जातो दर्शनीयः प्रतापवान्। दुःखं जीवन् सहामात्यो भवितव्यं हि तत्तथा।
दौष्कुलेयस्तथा मूढो दुर्ज्जातः शक्र दृश्यते। सुखं जीवन् सहामात्यो भवितव्यं हि तत्तथा। ८१२०
कल्याणी रूपसम्पन्ना दुर्भगा शक्र दृश्यते। अलक्षणा विरूपा च सुभगा दृश्यतेऽपरा।
नैतदस्मत्कृतं शक्र नैतच्छक्र त्वया कृतं। यत्त्वमेवं गतो वज्रिन् यच्चाप्येवं गता वयं।
न कर्म्म भवताऽप्येतत् कृतं मम शतक्रतो। ऋद्धिर्व्वाऽप्यथ वा नर्द्धिः पर्य्यायकृतमेव तत्।
पश्यामि त्वां विराजन्तं देवराजमवस्थितं। श्रीमन्तं द्युतिमन्तञ्च गर्ज्जमानं ममोपरि।
एवं नैव न चेत् कालो मामाक्रम्य स्थितो भवेत्। पातयेयमहं त्वाऽद्य सवज्रमपि मुष्टिना। ८१२५
न तु विक्रमकालोऽयं शान्तिकालोऽयमागतः। कालः स्थापयते सर्व्वं कालः पचति वै तथा।
माञ्चेदभ्यागतः कालो दानवेश्वरपूजितं। गर्ज्जन्तं प्रतपन्तञ्च कमन्यं नागमिष्यति।
द्वादशानान्तु भवतामादित्यानां महात्मनां। तेजांस्येकेन सर्व्वेषां देवराज धृतानि मे।
अहमेवोद्वहाम्यापो विसृजामि च वासव। तपामि चैव त्रैलोक्यं विद्योताम्यहमेव च।
संरक्षामि विलुम्पामि ददाम्यहमथाददे। संयच्छामि नियच्छामि लोकेषु प्रभुरीश्वरः। ८१३०
तदद्य विनिवृत्तं मे प्रभुत्वममराधिप। कालसैन्यावगाढस्य सर्व्वं न प्रतिभाति मे।
नाहं कर्त्ता न चैव त्वं नान्यः कर्त्ता शचीपते। पर्य्यायेण हि भुज्यन्ते लोकाः शक्र यदृच्छया।
मासमासार्द्धवेश्मानमहोरात्राभिसंवृतं। ऋतुद्वारं वर्षमुखमायुर्व्वेदविदो जनाः।
आहुः सर्व्वमिदं चिन्त्यं जनाः केचिन्मनीषया। अस्याः पञ्चैव चिन्तायाः पर्य्येष्यामि च पञ्चधा।
गम्भीरं गहनं ब्रह्म महत्तोयार्णवं यथा। अनादिनिधनञ्चाक्षरक्षरं क्षरमेव च। ८१३५
सत्त्वेषु लिङ्गमाविश्य निर्लिङ्गमपि तत् स्वयं। मन्यन्ते ध्रुवमेवैनं ये जनास्तत्त्वदर्शिनः।
भूतानान्तु विपर्य्यासं कुरुते भगवानिति। न ह्येतावद्भवेद्गम्यं न यस्मात् प्रभवेत् पुनः।
गतिं हि सर्व्वभूतानामगत्वा क्व गमिष्यसि। यो धावता न हातव्यस्तिष्ठन्नपि न हीयते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तमिन्द्रियाणि सर्व्वाणि नानुपश्यन्ति पञ्चधा। आहुरेनं केचिदग्निं केचिदाहुः प्रजापतिं।
ऋतून्मासार्द्धमासांश्च दिवसांश्च क्षणांस्तथा। पूर्व्वाह्णमपराह्णञ्च मध्याह्नमपि चापरे। ८१४०
मुहूर्त्तमपि चैवाहुरेकं सन्तमनेकधा। तं कालमिति जानीहि यस्य सर्व्वमिदं वशे।
बहूनीन्द्रसहस्राणि समतीतानि वासव। बलवीर्य्योपपन्नानि यथैव त्वं शचीपते।
त्वामप्यतिबलं शक्र देवराजं बलोत्कटं। प्राप्ते काले महावीर्य्यः कालः संशमयिष्यति।
य इदं सर्व्वमादत्ते तस्माच्छक्र स्थिरो भव। मया त्वया च पूर्व्वैश्च न स शक्यो निवर्त्तितुं।
यामेतां प्राप्य जानीषे राजश्रियमनुत्तमां। स्थिता मयीति तन्मिथ्या नैषा ह्येकत्र तिष्ठति। ८१४५
स्थिता हीन्द्रसहस्रेषु त्वद्विशिष्टतमेष्वियं। माञ्च लोला परित्यज्य त्वामगाद्विबुधाधिप।
मैवं शक्र पुनः कार्षीः शान्तो भवितुमर्हसि। त्वामप्येवंविधं ज्ञात्वा क्षिप्रमन्यं गमिष्यति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि बलिवासवसंवादे चतुर्विंशत्यधिकद्विशतोऽध्यायः॥ २२४॥
॥ भीष्म उवाच॥ शतक्रतुरथापश्यद्बलेर्दीप्तां महात्मनः। स्वरूपिणीं शरीराद्धि निष्क्रामन्तीं तदा श्रियं।
तां दृष्ट्वा प्रभयोद्दीप्तां भगवान् पाकशासनः। विस्मयोत्फुल्लनयनो बलिं पप्रच्छ वासवः।
॥ शक्र उवाच॥ बले केयमपक्रान्ता रोचमाना शिखण्डिनी। त्वत्तः स्थिता सकेयूरा दीप्यमाना स्वतेजसा। ८१५०
॥ बलिरुवाच॥ न हीमामासुरीं वेद्मि न दैवीं न च मानुषीं। त्वमेनां पृच्छ वा मा वा यथेष्टं कुरु वासव।
॥ शक्र उवाच॥ का त्वं बलेरपक्रान्ता रोचमाना शिखण्डिनी। अजानतो ममाचक्ष्व नामधेयं शुचिस्मिते।
का त्वं तिष्ठसि मामेव दीप्यमाना स्वतेजसा। हित्वा दैत्येश्वरं सुभ्रु तन्ममाचक्ष्व पृच्छतः।
॥ श्रीरुवाच॥ न मां विरोचनो वेद नायं वैरोचनो बलिः। आहुर्मां दुःसहेत्येवं विधित्सेति च मां विदुः।
भूतिर्लक्ष्मीति मामाहुः श्रीरित्येवञ्च वासव। त्वं मां शक्र न जानीषे सर्व्वे देवा न मां विदुः। ८१५५
॥ शक्र उवाच॥ किमिदं त्वं मम कृते उताहो बलिनः कृते। दुःसहे विजहास्येनं चिरसंवासिनी सती।
॥ श्रीरुवाच॥ न धाता न विधाता मां विदधाति कथञ्चन। कालस्तु शक्र पर्य्यागान्मैनं शक्रावमन्यथाः।
॥ शक्र उवाच॥ कथं त्वया बलिस्त्यक्तः किमर्थं वा शिखण्डिनी। कथञ्च मां न जह्यास्त्वं तन्मे ब्रूहि शुचिस्मिते।
॥ श्रीरुवाच॥ सत्ये स्थितास्मि दाने च व्रते तपसि चैव हि। पराक्रमे च धर्म्मे च पराचीनस्ततो बलिः।
ब्रह्मण्योऽयं पुरा भूत्वा सत्यवादी जितेन्द्रियः। अभ्यसूयद्ब्राह्मणानामुच्छिष्टश्चास्पृशद्घृतं। ८१६०
यज्ञशीलः सदा भूत्वा मामेव यजतेत्ययं। प्रोवाच लोकान् मूढात्मा कालेनोपनिपीडितः।
अपाकृता ततः शक्र त्वयि वत्स्यामि वासव। अप्रमत्तेन धार्य्यास्मि तपसा विक्रमेण च।
॥ शक्र उवाच॥ नास्ति देवमनुष्येषु सर्व्वभूतेषु वा पुमान्। यस्त्वामेको विषहितुं शक्नुयात् कमलालये।
॥ श्रीरुवाच॥ नैव देवो न गन्धर्व्वो नासुरो न च राक्षसः। यो मामेको विषहितुं शक्तः कश्चित् पुरन्दर।
॥ शक्र उवाच॥ तिष्ठेथा मयि नित्यं त्वं यथा तद्ब्रूहि मे शुभे। तत्करिष्यामि ते वाक्यमृतं तद्वक्तुमर्हसि। ८१६५
॥ श्रीरुवाच॥ स्थास्यामि नित्यं देवेन्द्र यथा त्वयि निबोध तत्। विधिना वेददृष्टेन चतुर्द्धा विभजस्व मां।
॥ शक्र उवाच॥ अहं वै त्वां निधास्यामि यथाशक्ति यथाबलं। न तु मेऽतिक्रमः स्याद्वै सदा लक्ष्मि तवान्तिके।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

भूमिरेव मनुष्येषु धारिणी भूतभाविनी । सा ते पादं तितिक्षेत समर्था हीति मे मतिः ।
॥ श्रीरुवाच ॥ एष मे निहितः पादो योऽयं भूमौ प्रतिष्ठितः । द्वितीयं शक्र पादं मे तस्मात् सुनिहितं कुरु ।
॥ शक्र उवाच ॥ आप एव मनुष्येषु द्रवन्त्यः परिचारिणीः । तास्ते पादं तितिक्षन्तामलमापस्तितिक्षितुं । ८१७०
॥ श्रीरुवाच ॥ एष मे निहितः पादो योऽयमप्सु प्रतिष्ठितः । तृतीयं शक्र पादं मे तस्मात् सुनिहितं कुरु ।
॥ शक्र उवाच ॥ यस्मिन् वेदाश्च यज्ञाश्च यस्मिन् देवाः प्रतिष्ठिताः । तृतीयं पादमग्निस्ते सुधृतं धारयिष्यति ।
॥ श्रीरुवाच ॥ एष मे निहितः पादो योऽयमग्नौ प्रतिष्ठितः । चतुर्थं शक्र पादं मे तस्मात् सुनिहितं कुरु ।
॥ शक्र उवाच ॥ ये वै सन्तो मनुष्येषु ब्रह्मण्याः सत्यवादिनः । ते ते पादं तितिक्षन्तामलं सन्तस्तितिक्षितुं ।
॥ श्रीरुवाच ॥ एष मे निहितः पादो योऽयं सत्सु प्रतिष्ठितः । एवं हि निहिताः शक्र भूतेषु परिधत्स्व मां । ८१७५
॥ शक्र उवाच ॥ भूतानामिह यो वै त्वां मया विनिहितां सतीं । उपहन्यात् स मे द्विष्यस्तथा शृण्वन्तु मे वचः ।
ततस्त्यक्तः श्रिया राजा दैत्यानां बलिरब्रवीत् ।
॥ बलिरुवाच ॥ यावत् पुरस्तात् प्रतपेत्तावद्वै दक्षिणां दिशं । पश्चिमां तावदेवापि तथोदीचीं दिवाकरः ।
तथा मध्यन्दिने सूर्य्यो नास्तमेति यदा तदा । पुनर्द्दैवासुरं युद्धं भावि जेताऽस्मि वस्तदा ।
सर्व्वलोकान् यदादित्य एकस्थस्तापयिष्यति । तदा देवासुरे युद्धे जेताऽहं त्वां शतक्रतो । ८१८०
॥ शक्र उवाच ॥ ब्रह्मणाऽस्मि समादिष्टो न हन्तव्यो भवानिति । तेन तेऽहं बले वज्रं न विमुञ्चामि मूर्द्धनि ।
यथेष्टं गच्छ दैत्येन्द्र स्वस्ति तेऽस्तु महासुर । आदित्यो नाऽवतपिता कदाचिन्मध्यतः स्थितः ।
स्थापितो ह्यस्य समयः पूर्व्वमेव स्वयम्भुवा । अजस्रं परियात्येष सत्येनावतपन् प्रजाः ।
अयनं तस्य षण्मासानुत्तरं दक्षिणं तथा । येन संयाति लोकेषु शीतोष्णे विसृजन्रविः ।
॥ भीष्म उवाच ॥ एवमुक्तस्तु दैत्येन्द्रो बलिरिन्द्रेण भारत । जगाम दक्षिणामाशामुदीचीन्तु पुरन्दरः । ८१८५
इत्येतद्बलिना गीतमनहङ्कारसंज्ञितं । वाक्यं श्रुत्वा सहस्राक्षः खमेवारुरुहे तदा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि श्रीसन्निधाने पञ्चविंशत्यधिकद्विशततोऽध्यायः ॥ २२५ ॥
॥ भीष्म उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं । शतक्रतोश्च संवादं नमुचेश्च युधिष्ठिर ।
श्रिया विहीनमासीनमक्षोभ्यमिव सागरं । भवाभवज्ञं भूतानामित्युवाच पुरन्दरः ।
बद्धः पाशैश्च्युतः स्थानात् द्विषतां वशमागतः । श्रिया विहीनो नमुचे शोचस्याहो न शोचसि ।
॥ नमुचिरुवाच ॥ अनिवार्य्येण शोकेन शरीरञ्चोपतप्यते । अमित्राश्च प्रहृष्यन्ति शोके नास्ति सहायता । ८१९०
तस्माच्छक्र न शोचामि सर्व्वं ह्येवेदमन्तवत् । सन्तापाद्भ्रश्यते रूपं सन्तापाद्भ्रश्यते श्रियः ।
सन्तापाद्भ्रश्यते चायुर्द्धर्म्मश्चैव सुरेश्वर । विनीय खलु तद्दुःखमागतं वै मनस्यजं ।
ध्यातव्यं मनसा हृद्यं कल्याणं संविजानता । यदा यदा हि पुरुषः कल्याणे कुरुते मनः ।
तदा तस्य प्रसिध्यन्ति सर्व्वार्था नात्र संशयः ।
एकः शास्ता न द्वितीयोऽस्ति शास्ता गर्भे शयानं पुरुषं शास्ति शास्ता । तेनानुयुक्तः प्रवणादिवोदकं यथा नियुक्तो
ऽस्मि तथा वहामि । ८१९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भवाभवौ त्वभिजानन् गरीयो ज्ञानाच्छ्रेयो न तु तद्वै करोमि। आशासु धर्म्यासु परासु कुर्व्वन् यथा नियुक्तो ऽस्मि तथा वहाऽस्मि।

यथा यथाऽस्य प्राप्तव्यं प्राप्नोत्येव तथा तथा। भवितव्यं यथा यच्च भवत्येव तथा तथा।

यत्र यत्रैव संयुक्तो धात्रा गर्भे पुनः पुनः। तत्र तत्रैव वसति न यत्र स्वयमिच्छति।

भावो योऽयमनुप्राप्तो भवितव्यमिदं मम। इति यस्य सदा भावो न स मुह्येत् कदाचन।

पर्य्यायैर्हन्यमानानामभियोक्ता न विद्यते। दुःखमेतत्तु यद्द्वेष्टा कर्त्ताऽहमिति मन्यते। ८२००

ऋषींश्च देवांश्च महासुरांश्च त्रैविद्यवृद्धांश्च वने मुनींश्च। कान् वापदो नोपनमन्ति लोके परावरज्ञास्तु न सम्भ्रमन्ति।

न पण्डितः क्रुध्यति नाभिपद्यते न चापि संसीदति न प्रहृष्यति। न चातिकृच्छ्रव्यसनेषु शोचते स्थितः प्रकृत्या हिमवानिवाचलः।

यमर्थसिद्धिः परमा न हर्षयेत्तथैव काले व्यसनं न मोहयेत्। सुखञ्च दुःखञ्च तथैव मध्यमं निषेवते यः स धुरन्धरो नरः।

यां यामवस्थां पुरुषोऽधिगच्छेत् तस्यां रमेतापरितप्यमानः। एवं प्रवृद्धं प्रणुदन्मनोजं सन्तापयामास करं शरीरात्।

न तत् सदः सत्परिषत् सभा च सा प्राप्य यां न कुरुते सदा भयं। धर्म्मतत्त्वमवगाह्य बुद्धिमान् योऽभ्युपैति स धुरन्धरो नरः। ८२०५

प्राज्ञस्य कर्म्माणि दुरन्वयानि न वै प्राज्ञो मुह्यति मोहकाले। स्थानाच्च्युतश्चेन्न मुमोह गौतमस्तावत्कृच्छ्रामापदं प्राप्यवृद्धः।

न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च। न शीलेन न वृत्तेन तथा नैवार्थसम्पदा।

अलभ्यं लभते मर्त्यस्तत्र का परिदेवना। यदेवमनुजातस्य धातारो विदधुः पुरा।

तदेवानुचरिष्यामि किं मे मृत्युः करिष्यति। लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति।

प्राप्तव्यान्येव चाप्नोति दुःखानि च सुखानि च। एतद्विदित्वा कार्त्स्न्येन यो न मुह्यति मानवः। ८२१०

कुशली सर्व्वदुःखेषु स वै सर्व्वधनो नरः।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शक्रनमुचिसंवादे षड्विंशत्यधिकद्विशततोऽध्यायः॥ २२६॥

॥ युधिष्ठिर उवाच ॥ मग्नस्य व्यसने कृच्छ्रे किं श्रेयः पुरुषस्य हि। बन्धुनाशे महीपाल राज्यनाशेऽथ वा पुनः।

त्वं हि नः परमो वक्ता लोकेऽस्मिन् भरतर्षभ। एतद्भवन्तं पृच्छामि तन्मे त्वं वक्तुमर्हसि।

॥ भीष्म उवाच ॥ पुत्त्रदारैः सुखैश्चैव वियुक्तस्य धनेन वा। मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप।

धैर्य्येण युक्तं सततं शरीरं न विशीर्य्यते। विशोकता सुखं धत्ते धत्ते चारोग्यमुत्तमं। ८२१५

आरोग्याच्च शरीरस्य स पुनर्व्विन्दते श्रियं। यस्तु प्राज्ञो नरस्तात सात्त्विकीं वृत्तिमास्थितः।

तस्यैश्वर्य्यञ्च धैर्य्यञ्च व्यवसायश्च कर्म्मसु। अत्रैवोदाहरन्तीममितिहासं पुरातनं।

बलिवासवसंवादं पुनरेव युधिष्ठिर। वृत्ते देवासुरे युद्धे दैत्यदानवसंचये।

विष्णुक्रान्तेषु लोकेषु देवराजे शतक्रतौ। इज्यमानेषु देवेषु चातुर्व्वर्ण्ये व्यवस्थिते।

समृद्ध्यमाने त्रैलोक्ये प्रीतियुक्ते स्वयम्भुवि। रुद्रैर्व्वसुभिरादित्यैरश्विभ्यामपि चर्षिभिः। ८२२०

गन्धर्व्वैर्भुजगेन्द्रैश्च सिद्धैश्चान्यैर्वृतः प्रभुः। चतुर्द्दन्तं सुदान्तञ्च वारणेन्द्रं श्रिया वृतं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आरुह्यैरावणं शक्रस्त्रैलोक्यमनुसंययौ। स कदाचित् समुद्रान्ते कस्मिंश्चिद्गिरिगह्वरे।
बलिं वैरोचनिं वज्री ददर्शोपससर्प च। तमैरावतमूर्द्धस्थं प्रेक्ष्य देवगणैर्वृतं।
सुरेन्द्रमिन्द्रं दैत्येन्द्रो न शुशोच न विव्यथे। दृष्ट्वा तमविकारस्थं तिष्ठन्तं निर्भयं बलिं॥
अधिरूढो द्विपश्रेष्ठमित्युवाच शतक्रतुः। दैत्य न व्यथसे शौर्य्यादथ वा वृद्धसेवया। ८२२५
तपसा भावितत्वाद्वा सर्व्वथैतत् सुदुष्करं। शत्रुभिर्वशमानीतो हीनः स्थानादनुत्तमात्।
वैरोचने किमाश्रित्य शोचितव्ये न शोचसि। श्रैष्ठ्यं प्राप्य स्वजातीनां महाभोगाननुत्तमान्॥
हृतस्वरत्नराज्यस्त्वं ब्रूहि कस्मान्न शोचसि। ईश्वरो हि पुरा भूत्वा पितृपैतामहे पदे।
तत्त्वमद्य हृतं दृष्ट्वा सपत्नैः किं न शोचसि। बद्धश्च वारुणैः पाशैर्व्वज्रेण च समाहतः।
हृतदारो हृतधनो ब्रूहि कस्मान्न शोचसि। नष्टश्रीर्विभवभ्रष्टो यन्न शोचसि दुष्करं। ८२३०
त्रैलोक्यराज्यनाशे हि कोऽन्यो जीवितुमुत्सहेत्। एतच्चान्यच्च परुषं ब्रुवन्तं परिभूय तं।
श्रुत्वा सुखमसम्भ्रान्तो बलिर्वैरोचनोऽब्रवीत्।
॥ बलिरुवाच ॥ निगृहीते मयि भृशं शक्र किं कत्थितेन ते। वज्रमुद्यम्य तिष्ठन्तं पश्यामि त्वां पुरन्दर॥
अशक्तः पूर्व्वमासीस्त्वं कथञ्चिच्छक्ततां गतः। कस्त्वदन्य इमां वाचं सुक्रूरां वक्तुमर्हति।
यस्तु शत्रोर्वशस्थस्य शक्तोऽपि कुरुते दयां। हस्तप्राप्तस्य वीरस्य तञ्चैव पुरुषं विदुः। ८२३५
अनिश्चयो हि युद्धेषु द्वयोर्विवदमानयोः। एकः प्राप्नोति विजयमेकश्चैव पराजयं।
मा च ते भूत् स्वभावोऽयमिति दैवतपुङ्गव। ईश्वरः सर्व्वभूतानां विक्रमेण जितो बलात्॥
नैतदस्मत्कृतं शक्र नैतच्छक्र कृतं त्वया। यत्त्वमेवङ्गतो वज्रिन् यद्वाऽप्येवङ्गता वयं।
अहमासं यथाऽद्य त्वं भविता त्वं यथा वयं। माऽवमंस्था मया कर्म्म दुष्कृतं कृतमित्युत॥
सुखदुःखे हि पुरुषः पर्य्यायेणाधिगच्छति। पर्य्यायेणासि शक्रत्वं प्राप्तः शक्र न कर्म्मणा। ८२४०
कालः काले नयति मां त्वाञ्च कालो नयत्ययं। तेनाहं त्वं यथा नाद्य त्वञ्चापि न यथा वयं॥
न मातृपितृशुश्रूषा न च दैवतपूजनं। नान्यो गुणसमाचारः पुरुषस्य सुखावहः॥
न विद्या न तपो दानं न मित्राणि न बान्धवाः। शक्नुवन्ति परित्रातुं नरं कालेन पीडितं॥
नागामिनमनर्थं हि प्रतिघातशतैरपि। शक्नुवन्ति प्रतिव्योढुमृते बुद्धिबलान्नराः।
पर्य्यायैर्हन्यमानानां परित्राता न विद्यते। इदन्तु दुःखं यच्छक्र कर्त्ताऽहमिति मन्यसे। ८२४५
यदि कर्त्ता भवेत् कर्त्ता न क्रियेत कदाचन। यस्मात्तु क्रियते कर्त्ता तस्मात् कर्त्ताऽप्यनीश्वरः॥
कालेन त्वाऽहमजयं कालेनाहं जितस्त्वया। गन्ता गतिमतां कालः कालः कलयति प्रजाः॥
इन्द्र प्राकृतया बुद्ध्या प्रलयं नावबुध्यसे। केचित्त्वां बहुमन्यन्ते श्रैष्ठ्यं प्राप्तं स्वकर्म्मणा।
कथमस्मद्विधो नाम जानन् लोकप्रवृत्तयः। कालेनाभ्याहतः शोचेन्मुह्येद्वाऽप्यथ विभ्रमेत।
नित्यं कालपरीतस्य मम वा मद्विधस्य वा। बुद्धिर्व्यसनमासाद्य भिन्ना नौरिव सीदति। ८२५०
अहञ्च त्वञ्च ये चान्ये भविष्यन्ति सुराधिपाः। ते सर्व्वे शक्र यास्यन्ति मार्गमिन्द्रशतैर्गतं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वामप्येवं सुदुर्द्धर्षं ज्वलन्तं परया श्रिया । काले परिणते कालः कालयिष्यति मामिव ।
बहूनीन्द्रसहस्राणि दैवतानां युगे युगे । अभ्यतीतानि कालेन कालो हि दुरतिक्रमः ।
इदन्तु लब्ध्वा संस्थानमात्मानं बहु मन्यसे । सर्व्वभूतभवं देवं ब्रह्माणमिव शाश्वतं ।
न चेदमचलं स्थानमनन्तं वाऽपि कस्यचित् । त्वन्तु बालिशया बुद्ध्या ममेदमिति मन्यसे ।
अविश्वस्ते विश्वसिषि मन्यसे चाध्रुवे ध्रुवं । नित्यं कालपरीतात्मा भवत्येवं सुरेश्वर ।
ममेयमिति मोहात्त्वं राजश्रियमभीप्ससि । नेयं तव न चास्माकं न चान्येषां स्थिरा सदा ।
अतिक्रम्य बहूनन्यांस्त्वयि तावदियं गता । किञ्चित्कालमियं स्थित्वा त्वयि वासव चञ्चला ।
गौर्निवासमिवोत्सृज्य पुनरन्यं गमिष्यति । राजलोका ह्यतिक्रान्ता यान्न संख्यातुमुत्सहे ।
त्वत्तो बहुतराश्चान्ये भविष्यन्ति पुरन्दर । सवृक्षौषधिरत्नेयं सह सत्त्ववनाकरा ।
तानिदानीं न पश्यामि यैर्भुक्तेयं पुरा मही । पृथुरैलो मयो भौमो नरकः शम्बरस्तथा ।
अश्वग्रीवः पुलोमा च स्वर्भानुरमितध्वजः । प्रह्लादो नमुचिर्दक्षो विप्रचित्तिर्विरोचनः ।
ह्रीनिषेवः सुहोत्रश्च भूरिहा पुष्पवान् वृषः । सत्येषुर्ऋषभो बाहुः कपिलाश्वो विरूपकः ।
बाणः कार्त्तस्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतिः । सङ्कोचोऽथ वरीताक्षो वराहोऽश्वो रुचिप्रभः ।
विश्वजित् प्रतिरूपश्च वृषाण्डो विष्करो मधुः । हिरण्यकशिपुश्चैव कैटभश्चैव दानवः ।
दैतेया दानवाश्चैव सर्व्वे ते नैर्ऋतैः सह । एते चान्ये च बहवः पूर्व्वे पूर्व्वतराश्च ये ।
दैत्येन्द्रा दानवेन्द्राश्च यांश्चान्याननुशुश्रुम । बहवः पूर्व्वदैत्येन्द्राः सन्त्यज्य पृथिवीं गताः ।
कालेनाभ्याहताः सर्व्वे कालो हि बलवत्तरः । सर्व्वैः क्रतुशतैरिष्टं न त्वमेकः शतक्रतुः ।
सर्व्वे धर्म्मपराश्चासन् सर्व्वे सततसत्त्रिणः । अन्तरीक्षचराः सर्व्वे सर्व्वेऽभिमुखयोधिनः ।
सर्व्वे संहननोपेताः सर्व्वे परिघबाहवः । सर्व्वे मायाशतधराः सर्व्वे ते कामरूपिणः ।
सर्व्वे समरमासाद्य न श्रूयन्ते पराजिताः । सर्व्वे सत्यव्रतपराः सर्व्वे कामविहारिणः ।
सर्व्वे वेदव्रतपराः सर्व्वे चैव बहुश्रुताः । सर्व्वे सम्मतमैश्वर्य्यमीश्वराः प्रतिपेदिरे ।
न चैश्वर्य्यमदस्तेषां भूतपूर्व्वो महात्मनां । सर्व्वे यथार्हदातारः सर्व्वे विगतमत्सराः ।
सर्व्वे सर्व्वेषु भूतेषु यथावत् प्रतिपेदिरे । सर्व्वे दाक्षायणीपुत्त्राः प्राजापत्या महाबलाः ।
ज्वलन्तः प्रतपन्तश्च कालेन प्रतिसंहृताः । त्वञ्चैवेमां यदा भुक्त्वा पृथिवीं त्यक्ष्यसे पुनः ।
न शक्ष्यसि तदा शक्र नियन्तुं शोकमात्मनः । मुञ्चेच्छां कामभोगेषु मुञ्चेमं श्रीभवं मदं ।
एवं स्वराज्यनाशे त्वं शोकं सम्प्रसहिष्यसि । शोककाले शुचो मा त्वं हर्षकाले च मा हृषः ।
अतीतानागतं हित्वा प्रत्युत्पन्नेन वर्त्तय । माञ्चेदभ्यागतः कालः सदा युक्तमतन्द्रितः ।
क्षमस्व न चिरादिन्द्र त्वामप्युपगमिष्यति । त्रासयन्निव देवेन्द्र वाग्भिस्तक्षसि मामिह ।
संयते मयि नूनं त्वमात्मानं बहु मन्यसे । कालः प्रथममायान्मां पश्चात्त्वामनुधावति ।
तेन गर्ज्जसि देवेन्द्र पूर्व्वं कालहते मयि । को हि स्थातुमलं लोके मम क्रुद्धस्य संयुगे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कालस्तु बलवान् प्राप्तस्तेन तिष्ठसि वासव । यत्त्वद्वर्षसहस्रान्तं पूर्णं भवितुमर्हति ।
यथा मे सर्व्वगात्राणि न सुस्थानि महौजसः । अहमैन्द्राच्च्युतः स्थानात्त्वमिन्द्रः प्रकृतो दिवि ।
सुचित्रे जीवलोकेऽस्मिन्नुपास्यः कालपर्य्ययात् । किं हि कृत्वा त्वमिन्द्रोऽद्य किं वा कृत्वा वयं च्युताः ।
कालः कर्त्ता विकर्त्ता च सर्व्वमन्यदकारणं । नाशं विनाशमैश्वर्य्यं सुखं दुःखं भवाभवौ । ८२८५
विद्वान् प्राप्यैवमत्यर्थं न प्रहृष्येन्न च व्यथेत् । त्वमेव हीन्द्र वेत्थास्मान् वेदाहं त्वाञ्च वासव ।
किं कत्थसे मां किञ्च त्वं कालेन निरपत्रप । त्वमेव हि पुरा वेत्थ यत्तदा पौरुषं मम ।
समरेषु च विक्रान्तं पर्य्याप्तं तन्निदर्शनं । आदित्याश्चैव रुद्राश्च साध्याश्च वसुभिः सह ।
मया विनिर्ज्जिताः पूर्व्वं मरुतश्च शचीपते । त्वमेव शक्र जानासि देवासुरसमागमे ।
समेता विबुधा भग्नाः स्तरसा समरे मया । पर्व्वताश्चासकृत् क्षिप्ताः सवनाः सवनौकसः । ८२९०
सटङ्कशिखरा भग्नाःसमरे मूर्द्ध्नि ते मया । किन्नु शक्यं मया कर्त्तुं कालो हि दुरतिक्रमः ।
न हि त्वां नोत्सहे हन्तुं स वज्रमपि मुष्टिना । न तु विक्रमकालोऽयं क्षमाकालोऽयमागतः ।
तेन त्वां मर्षये शक्र दुर्म्मर्षणतरस्त्वया । तं मां परिणते काले परीतं कालवह्निना ।
नियतं कालपाशेन वद्धं शक्र विकत्थसे । अयं स पुरुषः श्यामो लोकस्य दुरतिक्रमः ।
बद्धा तिष्ठति मां रौद्रः पशुं रशनया यथा । लाभालाभौ सुखं दुःखं कामक्रोधौ भवाभवौ । ८२९५
वधबन्धप्रमोक्षञ्च सर्व्वं कालेन लभ्यते । नाहं कर्त्ता न कर्त्ता त्वं कर्त्ता यस्तु सदा प्रभुः ।
सोऽयं पचति कालो मां वृक्षे फलमिवागतं । यान्येव पुरुषः कुर्व्वन् सुखैः कालेन युज्यते ।
पुनस्तान्येव कुर्व्वाणो दुःखैः कालेन युज्यते । न च कालेन कालज्ञः स्पृष्टः शोचितुमर्हति ।
तेन शक्र न शोचामि नास्ति शोके सहायता । यदा हि शोचतः शोको व्यसनं नापकर्षति ।
सामर्थ्यं शोचतो नास्तीत्यतोऽहं नाद्य शोचिमि । एवमुक्तः सहस्राक्षो भगवान् पाकशासनः । ८३००
प्रतिसंहृत्य संरम्भमित्युवाच शतक्रतुः । सवज्रमुद्यतं बाहुं दृष्ट्वा पाशांश्च वारुणान् ।
कस्येह न व्यथेद्बुद्धिर्म्मृत्योरपि जिघांसतः । सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी ।
ध्रुवं न व्यथसेऽद्य त्वं धैर्य्यात् सत्यपराक्रमः । को हि विश्वासमर्थेषु शरीरे वा शरीरभृत् ।
कर्त्तुमुत्सहते लोके दृष्ट्वा सम्प्रस्थितं जगत् । अहमप्येवमेवैनं लोकं जानाम्यशाश्वतं ।
कालाग्नावाहितं घोरे गुह्ये सततगेऽक्षरे । न चात्र परिहारोऽस्ति कालस्पृष्टस्य कस्यचित् । ८३०५
सूक्ष्माणां महताञ्चैव भूतानां परिपच्यतां । अनीशस्याप्रमत्तस्य भूतानि पचतः सदा ।
अनिवृत्तस्य कालस्य क्षयं प्राप्तो न मुच्यते । अप्रमत्तः प्रमत्तेषु कालो जागर्त्ति देहिषु ।
प्रयत्नेनाप्यपक्रान्तो दृष्टपूर्व्वो न केनचित् । पुराणः शाश्वतो धर्म्मः सर्व्वप्राणभृतां समः ।
कालो न परिहार्य्यश्च न चास्यास्ति व्यतिक्रमः । अहोरात्रांश्च मासांश्च क्षणान् काष्ठा लवान् कलाः ।
सम्पिण्डयति यः कालो वृद्धिं वार्द्धुषिको यथा । इदमद्य करिष्यामि श्वः कर्त्तास्मीति वादिनं । ८३१०
कालो हरति सम्प्राप्तो नदीवेग इव द्रुमं । इदानीं तावदेवासौ मया दृष्टः कथं मृतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति कालेन ह्रियतां प्रलापः श्रूयते नृणां। नश्यन्त्यर्थास्तथा भोगाः स्थानमैश्वर्य्यमेव वा।
जीवितं जीवलोकस्य कालेनागम्य नीयते। उच्छ्रया विनिपातान्ता भावोऽभावः स एव च।
अनित्यमध्रुवं सर्व्वं व्यवसायो हि दुष्करः। सा ते न व्यथते बुद्धिरचला तत्त्वदर्शिनी।
अहमासं पुरा चेति मनसाऽपि न बुध्यसे। कालेनाक्रम्य लोकेऽस्मिन् पच्यमाने बलीयसा। ८२१५
अज्येष्ठमकनिष्ठञ्च क्षियमाणो न बुध्यते। ईर्ष्याभिमानलोभेषु कामक्रोधभयेषु च।
स्पृहा मोहाभिमानेषु लोकः सक्तो विमुह्यति। भवांस्तु भावतत्त्वज्ञो विद्वान् ज्ञानतपोऽन्वितः।
कालं पश्यति सुव्यक्तं पाणावामलकं यथा। कालचारित्रतत्त्वज्ञः सर्व्वशास्त्रविशारदः।
वैरोचने कृतात्माऽसि स्पृहणीयो विजानतां। सर्व्वलोको ह्ययं मन्ये बुद्ध्या परिगतस्त्वया।
विहरन् सर्व्वतो मुक्तो न क्वचित् परिसज्जसे। रजश्च हि तमश्च त्वां स्पृशतो न जितेन्द्रियं। ८२२०
निष्प्रीतिं नष्टसन्तापमात्मानं समुपाससे। सुहृदं सर्व्वभूतानां निर्व्वैरं शान्तमानसं।
दृष्ट्वा त्वां मम सञ्जाता त्वय्यनुक्रोशिनी मतिः। नाहमेतादृशं बुद्धं हन्तुमिच्छामि बन्धने।
आनृशंस्यं परो धर्म्मो ह्यनुक्रोशश्च मे त्वयि। मोक्ष्यन्ति वारुणाः पाशास्तवेमे कालपर्य्ययात्।
प्रजानामपचारेण स्वस्ति तेऽस्तु महासुर। यदा श्वश्रूं स्नुषा वृद्धां परिचारेण योक्ष्यते।
पुत्त्रश्च पितरं मोहात् प्रेषयिष्यति कर्म्मसु। ब्राह्मणैः कारयिष्यन्ति वृषलाः पादधावनं। ८२२५
शूद्राश्च ब्राह्मणीं भार्य्यामुपयास्यन्ति निर्भयाः। वियोनिषु विमोक्ष्यन्ति बीजानि पुरुषा यदा।
सङ्करं कांस्यभाण्डैश्च बलिञ्चैव कुपात्रिकैः। चातुर्व्वर्ण्यं यदा कृत्स्नममर्य्यादं भविष्यति।
एकैकस्ते तदा पाशः क्रमशः परिमोक्ष्यते। अस्मत्तस्ते भयं नास्ति समयं प्रतिपालय।
सुखी भव निराबाधः स्वस्थचेता निरामयः।
तमेवमुक्त्वा भगवाञ्छतक्रतुः प्रतिप्रयातो गजराजवाहनः। विजित्य सर्व्वानसुरान् सुराधिपो ननन्द हर्षेण बभूव चैकराट्। ८२३०
महर्षयस्तुष्टुवुरञ्जसा च तं वृषाकपिं सर्व्वचराचरेश्वरं। हिमापहो हव्यमुवाह चाध्वरे तथाऽमृतं चार्पितमीश्वरोऽपि हि।
द्विजोत्तमैः सर्व्वगतैरभिष्टुतो विदीप्ततेजा गतमन्युरीश्वरः। प्रशान्तचेता मुदितः स्वमालयं त्रिपिष्टपं प्राप्य मुमोद वासवः।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि बलिवासवसंवादे सप्तविंशत्यधिकद्विशततोऽध्यायः॥ २२७॥

॥ युधिष्ठिर उवाच ॥ पूर्व्वरूपाणि मे राजन् पुरुषस्य भविष्यतः। पराभविष्यतश्चैव तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच ॥ मन एव मनुष्यस्य पूर्व्वरूपाणि शंसति। भविष्यतश्च भद्रन्ते तथैव न भविष्यतः।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। श्रिया शक्रस्य संवादं तन्निबोध युधिष्ठिर। ८२३५
महतस्तपसो व्युष्ट्या पश्यन् लोकौ परावरौ। सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः।
ब्रह्मेवामितदीप्तौजाः शान्तपाप्मा महातपाः। विचचार यथाकामं त्रिषु लोकेषु नारदः।
कदाचित् प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचि। ध्रुवद्वारभवां गङ्गां जगामावततार च।
सहस्रनयनश्चापि वज्री शम्बरपाकहा। तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तावाप्लुत्य यतात्मानौ कृतजप्यौ समासतः । नद्याः पुलिनमासाद्य सूक्ष्मकाञ्चनवालुकं । ८२४०
पुण्यकर्म्मभिराख्यातो देवर्षिकथिताः कथाः । चक्रतुस्तौ तथासीनौ महर्षिकथितास्तथा ।
पूर्व्ववृत्तव्यपेतानि कथयन्तौ समाहितौ । अथ भास्करमुद्यन्तं रश्मिजालपुरस्कृतं ।
पूर्णमण्डलमालोक्य तावुत्थायोपतस्थतुः । अभितस्तूदयन्तन्तमर्कमर्कमिवापरं ।
आकाशे ददृशे ज्योतिरुद्यतार्च्चिःसमप्रभं । तयोः समीपं सम्प्राप्तं प्रत्यदृश्यत भारत ।
तत्सुपर्णार्करचितमास्थितं वैष्णवं पदं । भाभिरप्रतिमं भाति त्रैलोक्यमवभासयत् । ८२४५
तत्राभिरूपशोभाभिरप्सरोभिः पुरस्कृतं । बृहतीमंशुमत्प्रख्यां बृहद्भानोरिवार्च्चिषं ।
नक्षत्रकल्पाभरणां तां मौक्तिकसमस्रजं । श्रियं ददृशतुः पद्मां साक्षात् पद्मदलस्थितां ।
साऽवरुह्य विमानाग्रादङ्गनानामनुत्तमा । अभ्यागच्छत्त्रिलोकेशं देवर्षिञ्चापि नारदं ।
नारदानुगतः साक्षान्मघवांस्तामुपागमत् । कृताञ्जलिपुटो देवीं निवेद्यात्मानमात्मना ।
चक्रे चानुपमां पूजां तस्याश्चापि स सर्व्ववित् । देवराजश्रियं राजन् वाक्यञ्चेदमुवाच ह । ८२५०
॥ शक्र उवाच ॥ का त्वं केन च कार्य्येण सम्प्राप्ता चारुहासिनी । कुतश्चागम्यते सुभ्रु गन्तव्यं क्व च ते शुभे ।
॥ श्रीरुवाच ॥ पुण्येषु त्रिषु लोकेषु सर्व्वे स्थावरजङ्गमाः । ममात्मभावमिच्छन्तो यतन्ते परमात्मना ।
साऽहं वै पङ्कजे जाता सूर्य्यरश्मिविबोधिते । भूत्यर्थं सर्व्वभूतानां पद्मा श्रीः पद्ममालिनी ।
अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन । अहं श्रद्धा च मेधा च सन्नतिर्विजितिः स्थितिः ।
अहं धृतिरहं सिद्धिरहं त्वद्भूतिरेव च । अहं स्वाहा स्वधा चैव सन्नतिर्नियतिः स्मृतिः । ८२५५
राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च । निवासे धर्म्मशीलानां विषयेषु पुरेषु च ।
जितकाशिनि शूरे च संग्रामेष्वनिवर्त्तिनि । निवसामि मनुष्येन्द्रे सदैव बलसूदन ।
धर्म्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि । प्रश्रिते दानशीले च सदैव निवसाम्यहं ।
असुरेष्ववसं पूर्व्वं सत्यधर्म्मनिबन्धना । विपरीतांस्तु तान् बुद्ध्वा त्वयि वासमरोचयं ।
॥ शक्र उवाच ॥ कथं वृत्तेषु दैत्येषु त्वमवात्सीर्व्वरानने । दृष्ट्वा च किमिहागास्त्वं हित्वा दैतेयदानवान् । ८२६०
॥ श्रीरुवाच ॥ स्वधर्म्ममनुतिष्ठत्सु धैर्य्यादचलितेषु च । स्वर्गमार्गाभिरामेषु सत्त्वेषु निरता ह्यहं ।
दानाध्ययनयज्ञेज्या पितृदैवतपूजनं । गुरूणामतिथीनाञ्च तेषां सत्यमवर्त्तत ।
सुसंमृष्टगृहाश्चासन् जितस्त्रीका हुताग्नयः । गुरुशुश्रूषका दान्ता ब्रह्मण्याः सत्यवादिनः ।
श्रद्दधाना जितक्रोधा दानशीलाऽनसूयवः । भृतपुत्त्रा भृतामात्या भृतदारा ह्यनीर्ष्यवः ।
अमर्षेण न चान्योन्यं स्पृहयन्ते कदाचन । न च जातूपतप्यन्ते धीराः परसमृद्धिभिः । ८२६५
दातारः संगृहीतार आर्य्याः करुणवेदिनः । महाप्रसादा ऋजवो दृढभक्ता जितेन्द्रियाः ।
सन्तुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः । यथार्हमानार्थकरा ह्रीनिषेवा यतव्रताः ।
नित्यं पर्व्वसु सुस्नाता स्वनुलिप्ताः स्वलङ्कृताः । उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ।
नैतानभ्युदियात्सूर्य्यो न चाप्यासन् प्रगेशयाः । रात्रौ दधि च शक्तूंश्च नित्यमेव व्यवर्ज्जयन् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS MoE Grant & Equipment Heritage Foundation, Jalgaon

कल्यं घृतञ्चान्ववेक्षन् प्रयता ब्रह्मवादिनः । मङ्गल्यान्यपि चापश्यन् ब्राह्मणांश्चाप्यपूजयन् । ८२७०
सदा हि वदतां धर्म्मं सदा चाप्रतिगृह्णता । अर्द्धञ्च रात्र्याः स्वपतां दिवा चास्वपतां तथा ।
कृपणानाथवृद्धानां दुर्ब्बलातुरयोषितां । दयाञ्च संविभागञ्च नित्यमेवानुमोदतां ।
त्रस्तं विषण्णमुद्विग्नं भयार्त्तं व्याधितं कृशं । हृतस्वं व्यसनार्त्तञ्च नित्यमाश्वासयन्ति ते ।
धर्म्ममेवान्ववर्त्तन्त न हिंसन्ति परस्परं । अनुकूलाश्च कार्य्येषु गुरुवृद्धोपसेविनः ।
पितॄन् देवातिथींश्चैव यथावत्तेऽभ्यपूजयन् । अवशेषाणि चाश्नन्ति नित्यं सत्यतपोधृताः । ८२७५
नैकेऽश्नन्ति सुसम्पन्नं न गच्छन्ति परस्त्रियं । सर्व्वभूतेष्ववर्त्तन्त यथात्मनि दयां प्रति ।
नैवाकाशे न पशुषु वियोनौ न च पर्व्वसु । इन्द्रियस्य विसर्गन्ते रोचयन्ति कदाचन ।
नित्यं दानं तथा दाक्ष्यमार्ज्जवञ्चैव नित्यदा । उत्साहोऽथानहङ्कारः परमं सौहृदं क्षमा ।
सत्यं दानं तपः शौचं कारुण्यं वागनिष्ठुरा । मित्रेषु चानभिद्रोहः सर्व्वन्तेष्वभवत्प्रभो ।
निद्रा तन्द्रीरसम्प्रीतिरसूयाऽथानवेक्षिता । अरतिश्च विषादश्च स्पृहा चाप्यविशन्न तान् । ८२८०
साऽहमेवं गुणेष्वेव दानवेष्ववसं पुरा । प्रजासर्गमुपादाय नैकं युगविपर्य्ययं ।
ततः कालविपर्य्यासे तेषां गुणविपर्य्ययात् । अपश्यं निर्गतं धर्म्मं कामक्रोधवशात्मनां ।
सभासदाञ्च वृद्धानां सतां कथयतां कथाः । प्राहसन्नभ्यसूयंश्च सर्व्ववृद्धान् गुणावराः ।
युवानश्च समासीना वृद्धानभिगतान् सतः । नाभ्युत्थानाभिवादाभ्यां यथापूर्व्वमपूजयन् ।
वर्त्तयत्येव पितरि पुत्त्रः प्रभवते तथा । अभृत्या भृत्यतां प्राप्य ख्यापयन्त्यनपत्रपाः । ८२८५
तथा धर्म्मादपेतेन कर्म्मणा गर्हितेन ये । महतः प्राप्नुवन्त्यर्थांस्तेषां तत्राभवत् स्पृहा ।
उच्चैश्चाभ्यवदन्रात्रौ नीचैस्तत्राग्निरज्वलत् । पुत्त्राः पितॄनत्यचरन्नार्य्यश्चात्यचरन् पतीन् ।
मातरं पितरं वृद्धमाचार्य्यमतिथिं गुरुं । गुरुत्वान्नाभ्यनन्दन्त कुमारान्नान्वपालयन् ।
भिक्षां बलिमदत्त्वा च स्वयमन्नानि भुञ्जते । अनिष्ट्वा संविभज्याथ पितृदेवातिथीन् गुरून् ।
न शौचमन्वरुध्यन्त तेषां सूदजनास्तथा । मनसा कर्म्मणा वाचा भक्ष्यमासीदनावृतं । ८२९०
विप्रकीर्णानि धान्यानि काकमूषिकभोजनं । अपावृतं पयोऽतिष्ठदुच्छिष्टाश्चास्पृशन् घृतं ।
कुद्दालं दात्रपिटकं प्रकीर्णं कांस्यभाजनं । द्रव्योपकरणं सर्व्वं नान्ववैक्षत् कुटुम्बिनी ।
प्राकारागारविध्वंसान्न स्म ते प्रतिकुर्व्वते । नाद्रियन्ते पशून् बद्ध्वा यवसेनोदकेन च ।
बालानां प्रेक्षमाणानां स्वयं भक्ष्यमभक्षयन् । तथा भृत्यजनं सर्व्वमसन्तर्प्य च दानवाः ।
पायसं कृशरं मांसमपूपानथ शष्कुलीः । अपाचयन्नात्मनोऽर्थे वृथामांसान्यभक्षयन् । ८२९५
उत्सूर्य्यशायिनश्चासन् सर्व्वे चासन् प्रगेनिशाः । अवर्त्तन् कलहाश्चात्र दिवारात्रं गृहे गृहे ।
अनार्य्याश्चार्य्यमासीनं पर्य्युपासन्न तत्र ह । आश्रमस्थान् विधर्म्मस्थाः प्राद्विषन्त परस्परं ।
सङ्कराश्चाभ्यवर्त्तन्त न च शौचमवर्त्तत । ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ।
निरन्तरविशेषास्ते बहुमानावमानयोः । हारमाभरणं वेशं गतं स्थितमवेक्षितं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

असेवन्त भुजिष्या वै दुर्ज्जनाचरितं विधिं । स्त्रियः पुरुषवेशेन पुंसः स्त्रीवेशधारिणः । ८४००
क्रीडारतिविहारेषु परां मुदमवाप्नुवन् । प्रभवद्भिः पुरा दायानर्हेभ्यः प्रतिपादितान् ।
नाभ्यवर्त्तन्त नास्तिक्याद्वर्त्तन्तः सम्भवेष्वपि । मित्रेणाभ्यर्थितं मित्रमर्थसंशयिते क्वचित् ।
बालकोट्यग्रमात्रेण स्वार्थेनाघ्नत तद्वसु । परस्वादानरुचयो विपण्यव्यवहारिणः ।
अदृश्यन्तार्य्यवर्णेषु शूद्राश्चापि तपोधनाः । अधीयन्तेऽव्रताः केचिद्वृथाव्रतमथापरे ।
अशुश्रूषुर्गुरोः शिष्यः कश्चिच्छिष्यसखो गुरुः । पिता चैव जनित्री च श्रान्तौ वृत्तोत्सवाविव । ८४०५
अप्रभुत्वे स्थितौ वृद्धावन्नं प्रार्थयतः सुतान् । तत्र वेदविदः प्राज्ञा गाम्भीर्य्ये सागरोपमाः ।
कृष्यादिष्वभवन् सक्ता मूर्खाः श्राद्धान्यभुञ्जत । प्रातः प्रातश्च सुप्रश्नं कल्पनं प्रेषणक्रिया ।
शिष्यानप्रहितास्तेषामकुर्व्वन् गुरवः स्वयं । श्वश्रूश्वशुरयोरग्रे वधूः प्रेष्यानशासत ।
अन्वशासच्च भर्त्तारं समाहूयाऽभिजल्पती । प्रयत्नेन चापि चारक्षच्चित्तं पुत्त्रस्य वै पिता ।
व्यभजच्चापि संरम्भाद्दुःखवासं तथाऽवसत् । अग्निदाहेन चौरैर्व्वा राजभिर्व्वा हृतं धनं । ८४१०
दृष्ट्वा द्वेषात् प्राहसन्त सुहृत्सम्भाविता ह्यपि । कृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्षिणः ।
अभक्ष्यभक्षणरता निम्मर्य्यादा हतत्विषः । तेष्वेवमादीनाचारानाचरत्सु विपर्य्यये ।
नाहं देवेन्द्र वत्स्यामि दानवेष्विति मे मतिः । तन्मां स्वयमनुप्राप्तामभिनन्द शचीपते ।
त्वयाऽर्च्चितां मां देवेश पुरो धास्यन्ति देवताः । यत्राहं तत्र मत्कान्ता मद्विशिष्टा मदर्पणाः ।
सप्त देव्यो जयाऽष्टम्यो वासमेर्य्यन्ति तेऽष्टधा । आशा श्रद्धा धृतिः क्षान्तिर्व्विजितिः संनतिः क्षमा । ८४१५
अष्टमी वृत्तिरेतासां पुरोगा पाकशासन । ताश्चाहं चासुरांस्त्यक्त्वा युष्मद्विषयमागताः ।
त्रिदशेषु निवत्स्यामो धर्म्मनिष्ठान्तरात्मसु । इत्युक्तवचनां देवीं प्रीत्यर्थञ्च ननन्दतुः ।
नारदश्चात्र देवर्षिर्व्वृत्रहन्ता च वासवः । ततोऽनलसखो वायुः प्रववौ देववेश्मसु ।
इष्टगन्धः सुखस्पर्शः सर्व्वेन्द्रियसुखावहः । शुचौ चाभ्यर्थिते देशे त्रिदशाः प्रायशः स्थिताः ।
लक्ष्मीसहितमासीनं मघवन्तं दिदृक्षवः । ८४२०
ततो दिवं प्राप्य सहस्रलोचनः श्रियोपपन्नः सुहृदा महर्षिणा । रथेन हर्य्यश्वयुजा सुरर्षभः सदः सुराणामभिसत्कृतो ययौ।
अथेङ्गितं वज्रधरस्य नारदः श्रियश्च देव्या मनसा विचारयन् । श्रियै शशंसामरदृष्टपौरुषः शिवेन तत्रागमनं महर्षिभिः ।
ततोऽमृतं द्यौःप्रववर्ष भास्वती पितामहस्यायतने स्वयम्भुवः । अनाहता दुन्दुभयोऽथ नेदिरे तथाप्रसन्नाश्च दिशश्चकाशिरे।
यथर्त्तुशस्येषु ववर्ष वासवो न धर्म्ममार्गाद्विचचाल कश्चन । अनेकरत्नाकरभूषणा च भूः सुघोषघोषा भुवनौकसां जये ।
क्रियाभिरामा मनुजा मनस्विनो बभुः शुभे पुण्यकृतां पथि स्थिताः । नरामराः किन्नरयक्षराक्षसाः समृद्धिमन्तः सुमन
स्विनोऽभवन् । ८४२५
न जात्वकाले कुसुमं कुतः फलं पपात वृक्षात् पवनेरितादपि । रसप्रदाः कामदुघाश्च धेनवो न दारुणा वाग्विचचार कस्य
चित् ।
इमां सपर्य्यां सह सर्व्वकामदैःश्रियाश्च शक्रप्रमुखैश्च दैवतैः । पठन्ति ये विप्रसदःसमागताः समृद्धकामाः श्रियमाप्नुवन्तिते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

लया कुरूणां वर यत् प्रचोदितं भवाभवश्चेह परं निदर्शनं । तदद्य सर्व्वं परिकीर्त्तितं मया परीक्ष्य तत्त्वं परिगन्तुमर्हसि ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि श्रीवासवसंवादे अष्टाविंशत्यधिकद्विशतोऽध्यायः ॥ २२८ ॥

॥ युधिष्ठिर उवाच ॥ किंशीलः किंसमाचारः किंविद्यः किंपराक्रमः । प्राप्नोति ब्रह्मणः स्थानं यत् परं प्रकृतेर्ध्रुवं ।

॥ भीष्म उवाच ॥ मोक्षधर्म्मेषु नियतो लघ्वाहारो जितेन्द्रियः । प्राप्नोति ब्रह्मणः स्थानं तत् परं प्रकृतेर्ध्रुवं ।

अत्राप्युदाहरन्तीममितिहासं पुरातनं । जैगीषव्यस्य संवादमसितस्य च भारत ।

जैगीषव्यं महाप्रज्ञं धर्म्माणामागतागमं । अक्रुध्यन्तमहृष्यन्तमसितो देवलोऽब्रवीत् ।

॥ देवल उवाच ॥ न प्रीयसे वन्द्यमानो निन्द्यमानो न कुप्यसे । का ते प्रज्ञा कुतश्चैषा किन्नु तस्याः परायणं ।

॥ भीष्म उवाच ॥ इति तेनानुयुक्तः स तमुवाच महातपाः । महद्वाक्यमसन्दिग्धं पुष्कलार्थपदं शुचि ।

॥ जैगीषव्य उवाच ॥ या गतिर्या परा काष्ठा या शान्तिः पुण्यकर्म्मणां । तान्तेऽहं सम्प्रवक्ष्यामि महतीमृषिसत्तम ।

निन्दत्सु च समा नित्यं प्रशंसत्सु च देवल । निह्नुवन्ति च ये तेषां समयं सुकृतञ्च यत् ।

उक्ताश्च न वदिष्यन्ति वक्तारमहिते हितं । प्रतिहन्तुं न चेच्छन्ति हन्तारं वै मनीषिणः ।

नाप्राप्तमनुशोचन्ति प्राप्तकालानि कुर्व्वते । न चातीतानि शोचन्ति न चैव प्रतिजानते ।

सम्प्राप्तायाञ्च पूजायां कामादर्थेषु देवल । यथोपपत्तिं कुर्व्वन्ति शक्तिमन्तः कृतव्रताः ।

पक्वविद्या महाप्राज्ञा जितक्रोधा जितेन्द्रियाः । मनसा कर्म्मणा वाचा नापराध्यन्ति कर्हिचित् ।

अनीर्ष्यवो न चान्योन्यं विहिंसन्ति कदाचन । न च जातूपतप्यन्ते धीराः परसमृद्धिभिः ।

निन्दाप्रशंसे चात्यर्थं न वदन्ति परस्य ये । न च निन्दाप्रशंसाभ्यां विक्रियन्ते कदाचन ।

सर्व्वतश्च प्रशान्ता ये सर्व्वभूतहिते रताः । न क्रुध्यन्ति न हृष्यन्ति नापराध्यन्ति कस्यचित् ।

विमुच्य हृदयग्रन्थिं चंक्रमन्ति यथासुखं । न येषां बान्धवाः सन्ति ये चान्येषां न बान्धवाः ।

अमित्राश्च न सन्त्येषां ये चामित्रा न कस्यचित् । य एवं कुर्व्वते मर्त्याः सुखं जीवन्ति सर्व्वदा ।

ये धर्म्मञ्चानुरुध्यन्ते सर्व्वज्ञा द्विजसत्तम । ये ह्यतो विच्युता मार्गात्ते हृष्यन्त्युद्विजन्ति च ।

आस्थितस्तमहं मार्गमसूयिष्यामि कं कथं । निन्द्यमानः प्रशस्तो वा हृष्येऽहं केन हेतुना ।

यद्यदिच्छन्ति तत्तस्मादभिगच्छन्तु मानवाः । न मे निन्दाप्रशंसाभ्यां ह्रासवृद्धी भविष्यतः ।

अमृतस्येव किं तृप्येदवमानस्य तत्त्ववित् । विषस्येवोद्विजेन्नित्यं सम्मानस्य विचक्षणः ।

अवज्ञातः सुखं शेते इह चामुत्र चाभयं । विमुक्तः सर्व्वदोषेभ्यो योऽवमन्ता स बुध्यते ।

पराङ्गतिञ्च ये केचित् प्रार्थयन्ति मनीषिणः । एतद्व्रतं समाहृत्य सुखमेधन्ति ते जनाः ।

सर्व्वतश्च समाहृत्य क्रतून् सर्व्वान् जितेन्द्रियः । प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवं ।

नास्य देवा न गन्धर्व्वा न पिशाचा न राक्षसाः । पदमन्ववरोहन्ति प्राप्तस्य परमां गतिं ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जैगीषव्यासितसंवादे ऊनत्रिंशदधिकद्विशतोऽध्यायः ॥ २२९ ॥

॥ युधिष्ठिर उवाच ॥ प्रियः सर्व्वस्य लोकस्य सर्व्वसत्त्वाभिनन्दिता । गुणैः सर्व्वैरुपेतश्च को न्वस्ति भुवि मानवः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि पृच्छतो भरतर्षभ । उग्रसेनस्य संवादं नारदे केशवस्य च । ८४५५
॥ उग्रसेन उवाच । यस्य संकल्पते लोको नारदस्य प्रकीर्त्तने । मन्ये स गुणसम्पन्नो ब्रूहि तन्मम पृच्छतः ।
॥ वासुदेव उवाच । कुकुराधिप यान्मन्ये शृणु तान्मे विवक्षतः । नारदस्य गुणान् साधून् संक्षेपेण नराधिप ।
न चारित्रनिमित्तोऽस्याहङ्कारो देहतापनः । अभिन्नश्रुतचारित्रस्तस्मात् सर्व्वत्र पूजितः ।
अरतिः क्रोधचापल्ये भयं नैतानि नारदे । अदीर्घसूत्रः शूरश्च तस्मात् सर्व्वत्र पूजितः ।
उपास्यो नारदो वाढं वाचि नास्य व्यतिक्रमः । कामतो यदि वा लोभात्तस्मात् सर्व्वत्र पूजितः । ८४६०
अध्यात्मविधितत्त्वज्ञः क्षान्तः शक्तो जितेन्द्रियः । ऋजुश्च सत्यवादी च तस्मात् सर्व्वत्र पूजितः ।
तेजसा यशसा बुद्ध्या ज्ञानेन विनयेन च । जन्मना तपसा वृद्धस्तस्मात् सर्व्वत्र पूजितः ।
सुशीलः सुखसंवेशः सुभोजः स्वादरः शुचिः । सुवाक्यश्चाप्यनीर्षश्च तस्मात् सर्व्वत्र पूजितः ।
कल्याणं कुरुते वाढं पापमस्मिन्न विद्यते । न प्रीयते परानर्थैस्तस्मात् सर्व्वत्र पूजितः ।
वेदश्रुतिभिराख्यानैरर्थानभिजिगीषति । तितिक्षुरनवज्ञातस्तस्मात् सर्व्वत्र पूजितः । ८४६५
समत्वाच्च प्रियो नास्ति नाप्रियश्च कथञ्चन । मनोऽनुकूलवादी च तस्मात् सर्व्वत्र पूजितः ।
बहुश्रुतश्चित्रकथः पण्डितोऽलालसोऽशठः । अदीनोऽक्रोधनोऽलुब्धस्तस्मात् सर्व्वत्र पूजितः ।
नार्थे धने वा कामे वा भूतपूर्व्वोऽस्य विग्रहः । दोषाश्चास्य समुच्छिन्नास्तस्मात् सर्व्वत्र पूजितः ।
दृढभक्तिरनिन्द्यात्मा श्रुतवाननृशंसवान् । वीतसम्मोहदोषश्च तस्मात् सर्व्वत्र पूजितः ।
असक्तः सर्व्वसङ्गेषु सक्तात्मेव न लक्ष्यते । अदीर्घसंशयो वाग्मी तस्मात् सर्व्वत्र पूजितः । ८४७०
समाधिर्नास्य कामार्थे नात्मानं स्तौति कर्हिचित् । अनीर्ष्युर्मृदुसंवादस्तस्मात् सर्व्वत्र पूजितः ।
लोकस्य विविधं चित्तं प्रेक्षते चाप्यकुत्सयन् । संवर्गविद्याकुशलस्तस्मात् सर्व्वत्र पूजितः ।
नासूयत्यागमं कञ्चित् स्वनयेनोपजीवति । अवन्ध्यकालो वश्यात्मा तस्मात् सर्व्वत्र पूजितः ।
कृतश्रमः कृतप्रज्ञो न च तृप्तः समाधितः । नित्ययुक्तोऽप्रमत्तश्च तस्मात् सर्व्वत्र पूजितः ।
नापत्रपश्च युक्तश्च नियुक्तः श्रेयसे परैः । अभेत्ता परगुह्यानां तस्मात् सर्व्वत्र पूजितः । ८४७५
न हृष्यत्यर्थलाभेषु नालाभेषु व्यथत्यपि । स्थिरबुद्धिरसक्तात्मा तस्मात् सर्व्वत्र पूजितः ।
तं सर्व्वगुणसम्पन्नं दक्षं शुचिमनामयं । कालज्ञञ्च प्रियज्ञञ्च कः प्रियं न करिष्यति ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वासुदेवोग्रसेनसंवादे त्रिंशदधिकद्विशतोऽध्यायः ॥ २३० ॥

॥ युधिष्ठिर उवाच ॥ आद्यन्तं सर्व्वभूतानां ज्ञातुमिच्छामि कौरव । ध्यानं कर्म्म च कालञ्च तथैवायुर्युगे युगे ।
लोकतत्त्वञ्च कार्त्स्न्येन भूतानामागतिं गतिं । सर्गञ्च निधनञ्चैव कुत एतत् प्रवर्त्तते ।
यदि तेऽनुग्रहे बुद्धिरस्मास्विह सताम्वर । एतद्भवन्तं पृच्छामि तद्भवान् प्रब्रवीतु मे । ८४८०
पूर्व्वं हि कथितं श्रुत्वा भृगुभाषितमुत्तमं । भरद्वाजस्य विप्रर्षेस्ततो मे बुद्धिरुत्तमा ।
जाता परमधर्म्मिष्ठा दिव्यसंस्थानसंस्थिता । ततो भूयस्तु पृच्छामि तद्भवान् वक्तुमर्हति ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्येऽहमितिहासं पुरातनं । जगौ यद्भगवान् व्यासः पुत्राय परिपृच्छते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

अधीत्य वेदानखिलान् साङ्गोपनिषदस्तथा । अन्विच्छन्नैष्ठिकं कर्म्म धर्म्मनैपुणदर्शनात् ।
कृष्णद्वैपायनं व्यासं पुत्त्रो वैयासकिः शुकः । पप्रच्छ सन्देहमिमं छिन्नधर्म्मार्थसंशयं । ८४८५
॥ शुक उवाच ॥ भूतग्रामस्य कर्त्तारं कालज्ञानेन निश्चितं । ब्राह्मणस्य च यत् कृत्यं तद्भवान् वक्तुमर्हति ।
॥ भीष्म उवाच ॥ तस्मै प्रोवाच तत् सर्व्वं पिता पुत्त्राय पृच्छते । अतीतानागते विद्वान् सर्व्वज्ञः सर्व्वधर्म्मवित् ।
॥ व्यास उवाच ॥ अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययं । अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे संप्रवर्त्तते ।
काष्ठा निमेषा दश पञ्च चैव त्रिंशत्तु काष्ठा गणयेत्कलां तां । त्रिंशत्कलश्चापि भवेन्मुहूर्त्तो भागः कलाया दशमश्च यः स्यात् ।
त्रिंशन्मुहूर्त्तन्तु भवेदहश्च रात्रिश्च संख्या मुनिभिः प्रणीता । मासः स्मृतो रात्र्यहनी च त्रिंशत्संवत्सरो द्वादशमास उक्तः । ८४९०
संवत्सरं द्वे त्वयने वदन्ति संख्याविदो दक्षिणमुत्तरञ्च ।
अहोरात्रे विभजते सूर्य्यो मानुषलौकिके । रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः ।
पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः । शुक्लोऽहः कर्म्मचेष्टायां कृष्णः स्वप्नाय शर्व्वरी ।
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः । अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायणं ।
ये ते रात्र्यहनी पूर्व्वं कीर्त्तिते जीवलौकिके । तयोः संख्याय वर्षाग्रं ब्राह्मे वक्ष्याम्यहःक्षपे । ८४९५
पृथक् संवत्सराग्राणि प्रवक्ष्याम्यनुपूर्व्वशः । कृते त्रेतायुगे चैव द्वापरे च कलौ तथा ।
चत्वार्य्याहुः सहस्राणि वर्षाणां तत् कृतं युगं । तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ।
इतरेषु ससन्ध्येषु सन्ध्यांशेषु ततस्त्रिषु । एकपादेन हीयन्ते सहस्राणि शतानि च ।
एतानि शाश्वतान् लोकान् धारयन्ति सनातनान् । एतद्ब्रह्मविदां तात विदितं ब्रह्म शाश्वतं ।
चतुष्पात्सकलो धर्म्मः सत्यञ्चैव कृते युगे । नाधर्म्मेणागमः कश्चित्परस्तस्य प्रवर्त्तते । ८५००
इतरेष्वागमाद्धर्म्मः पादशस्त्ववरोप्यते । चौर्य्यकानृतमायाभिरधर्म्मश्चोपचीयते ।
अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः । कृते त्रेतायुगे त्वेषां पादशो ह्रसते वयः ।
वेदवादाश्चानुयुगं ह्रसन्तीति ह नः श्रुतं । आयूंषि चाशिषश्चैव वेदस्यैव च यत्फलं ।
अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरेऽपरे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः ।
तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमं । द्वापरे यज्ञमेवाहुर्द्दानमेकं कलौ युगे । ८५०५
एतां द्वादशसाहस्रीं युगाख्यां कवयो विदुः । सहस्रपरिवर्त्तन्तद्ब्राह्मं दिवसमुच्यते ।
रात्रिमेतावतीञ्चैव तदादौ विश्वमीश्वरः । प्रलये ध्यानमाविश्य सुप्त्वा सोऽन्ते विबुध्यते ।
सहस्रयुगपर्य्यन्तमहर्यद्ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ।
प्रतिबुद्धो विकुरुते ब्रह्माक्षय्यं क्षपाक्षये । सृजते च महद्भूतं तस्माद्व्यक्तात्मकं मनः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने एकत्रिंशदधिकद्विशतोऽध्यायः ॥ २३१ ॥
॥ व्यास उवाच ॥ ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं जगत् । एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमं । ८५१०
अहर्म्मुखे विबुद्धः सन् सृजतेऽविद्यया जगत् । अग्र एव महद्भूतमाशु व्यक्तात्मकं मनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अभिभूयेह चार्च्चिष्मान् व्यसृजत्सप्त मानसान्। दूरगं बहुधागामि प्रार्थनासंशयात्मकं।
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया। आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः।
आकाशात्तु विकुर्व्वाणात्सर्व्वगन्धवहः शुचिः। बलवान् जायते वायुस्तस्य स्पर्शो गुणो मतः।
वायोरपि विकुर्व्वाणाज्ज्योतिर्भवति भास्वरं। रोचिष्णु जायते शुक्रं तद्रूपगुणमुच्यते। ८५१५
ज्योतिषोऽपि विकुर्व्वाणाद्भवन्त्यापो रसात्मिकाः। अद्भ्यो गन्धस्तथा भूमिः पूर्व्वेषां सृष्टिरुच्यते।
गुणाः पूर्व्वस्य पूर्व्वस्य प्राप्नुवन्त्युत्तरोत्तरं। तेषां यावद्यथा यच्च तत्तत्तावद्गुणं स्मृतं।
उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणात्। पृथिव्यामेव तं विद्यादपां वायोश्च संश्रितं।
एते सप्तविधात्मानो नानावीर्य्याः पृथक् पृथक्। नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः।
ते समेत्य महात्मानो ह्यन्योन्यमभिसंश्रिताः। शरीराश्रयणं प्राप्तास्ततः पुरुष उच्यते। ८५२०
शरीरं श्रयणाद्भवति मूर्त्तिमत् षोडशात्मकं। तमाविशन्ति भूतानि महान्ति सह कर्म्मणा।
सर्व्वभूतानि चादाय तपसश्चरणाय ह। आदिकर्त्ता स भूतानां तमेवाहुः प्रजापतिं।
स वै सृजति भूतानि स्थावराणि चराणि च। ततः स सृजति ब्रह्मा देवर्षिपितृमानवान्।
लोकान्नदीः समुद्रांश्च दिशः शैलान् वनस्पतीन्। नरकिन्नररक्षांसि वयःपशुमृगोरगान्।
अव्ययञ्च व्ययञ्चैव द्वयं स्थावरजङ्गमं। तेषां ये यानि कर्म्माणि प्राक् सृष्ट्यां प्रतिपेदिरे। ८५२५
तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः। हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते। महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्त्तिषु।
विनियोगञ्च भूतानां धातैव विदधात्युत। केचित् पुरुषकारन्तु प्राहुः कर्म्मसु मानवाः।
दैवमित्यपरे विप्राः स्वभावं भूतचिन्तकाः। पौरुषं कर्म्म दैवञ्च फलवृत्तिस्वभावतः।
त्रय एते पृथग्भूता न विवेकन्तु केचन। एवमेवञ्च नैवञ्च न चोभे नानुभे न च। ८५३०
कर्म्मस्था विषयं ब्रूयुः सत्त्वस्थाः समदर्शिनः। तपो निःश्रेयसं जन्तोस्तस्य मूलं शमो दमः।
तेन सर्व्वानवाप्नोति यान् कामान् मनसेच्छति। तपसा तदवाप्नोति यद्भूतं सृजते जगत्।
स तद्भूतश्च सर्व्वेषां भूतानां भवति प्रभुः। ऋषयस्तपसा वेदानध्यैषन्त दिवानिशं।
अनादिनिधना विद्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्व्वाः प्रवृत्तयः।
ऋषीणां नामधेयानि याश्च वेदेषु सृष्टयः। नानारूपञ्च भूतानां कर्म्मणाञ्च प्रवर्त्तयन्। ८५३५
वेदशब्देभ्य एवादौ निर्म्मिमीते स ईश्वरः। नामधेयानि चर्षीणां याश्च वेदेषु सृष्टयः।
शर्व्वर्य्यन्ते सुजातानामन्येभ्यो विदधात्यजः। नामभेदतपः कर्म्मयज्ञाख्या लोकसिद्धयः।
आत्मसिद्धिस्तु वेदेषु प्रोच्यते दशभिः क्रमैः। यदुक्तं वेदवादेषु गहनं वेददर्शिभिः।
तदन्तेषु यथायुक्तं क्रमयोगेन लक्ष्यते। कर्म्मजोऽयं पृथग्भावो द्वन्द्वयुक्तोऽपि देहिनः।
आत्मसिद्धिस्तु विज्ञानाज्जहाति पुरुषो बलात्। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। ८५४०
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। आलम्भयज्ञाः क्षत्त्राश्च हविर्यज्ञा विशः स्मृताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः । त्रेतायुगे विधिस्त्वेष यज्ञानां न कृते युगे ।
द्वापरे विप्लवं यान्ति यज्ञाः कलियुगे तथा । अपृथग्धर्म्मिणो मर्त्या ऋक्सामानि यजूंषि च ।
काम्या इष्टीः पृथग्दृष्ट्वा तपोभिस्तप एव च । त्रेतायान्तु समस्ता ये प्रादुरासन्महाबलाः ।
संयन्तारः स्थावराणां जङ्गमानाञ्च सर्व्वशः । त्रेतायां संहता वेदा यज्ञा वर्णाश्रमास्तथा । ८५४५
संरोधादायुषस्त्वेते भ्रश्यन्ते द्वापरे युगे । दृश्यन्ते न च दृश्यन्ते वेदाः कलियुगेऽखिलाः ।
उत्सीदन्ते सयज्ञाश्च केवला धर्म्मपीडिताः । कृते युगे यस्तु धर्म्मो ब्राह्मणेषु प्रदृश्यते ।
आत्मवत्सु तपोवत्सु श्रुतवत्सु प्रतिष्ठितः । स धर्म्मव्रतसंयोगं यथा धर्म्मं युगे युगे ।
विक्रीयन्ते स्वधर्म्मस्था वेदवादा यथागमं । यथा विश्वानि भूतानि वृष्ट्या भूयांसि प्रावृषि ।
सृज्यन्ते जङ्गमस्थानि तथा धर्म्मा युगे युगे । यथर्त्तुष्वृतुलिङ्गानि नानारूपाणि पर्य्यये । ८५५०
दृश्यन्ते तानि तान्येव तथा ब्रह्महरादिषु । विहितं कालनानात्वमनादिनिधनं तथा ।
कीर्त्तितं तत्पुरस्तात्ते तत् सूते चात्ति च प्रजाः । दधाति भवति स्थानं भूतानां संयमो मतं ।
स्वभावेनैव वर्त्तन्ते द्वन्द्वयुक्तानि भूरिशः । सर्गकालक्रिया वेदाः कर्त्ता कार्य्यक्रियाफलं ।
प्रोक्तन्ते पुत्त्र सर्व्वं वै यन्मां त्वं परिपृच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने द्वात्रिंशदधिकद्विशततोऽध्यायः ॥ २३२ ॥
॥ व्यास उवाच ॥ प्रत्याहारन्तु वक्ष्यामि शर्व्वर्य्यादौ गतेऽहनि । यथेदं कुरुते ऽध्यात्मं सुसूक्ष्मं विश्वमीश्वरः । ८५५५
दिवि सूर्य्यस्तथा सप्त दहन्ति शिखिनोऽर्च्चिषः । सर्व्वमेतत्तदर्च्चिर्भिः पूर्णं जाज्वल्यते जगत् ।
पृथिव्यां यानि भूतानि जङ्गमानि ध्रुवाणि च । तान्यवाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च ।
ततः प्रलीने सर्व्वस्मिन् स्थावरे जङ्गमे तथा । निर्वृक्षा निस्तृणा भूमिर्दृश्यते कूर्म्मपृष्ठवत् ।
भूमेरपि गुणं गन्धमाप आददते यदा । आत्तगन्धा तदा भूमिः प्रलयत्वाय कल्पते ।
आपस्तत्र प्रतिष्ठन्ति ऊर्म्मिमत्यो महास्वनाः । सर्व्वमेवेदमापूर्य्य तिष्ठन्ति च चरन्ति च । ८५६०
अपामपि गुणं तात ज्योतिराददते यदा । आपस्तदा त्वात्तगुणा ज्योतिःषूपरमन्ति वै ।
यदादित्यं स्थितं मध्ये गूहन्ति शिखिनोऽर्च्चिषः । सर्व्वमेवेदमर्च्चिर्भिः पूर्णं जाज्वल्यते नभः ।
ज्योतिषोऽपि गुणं रूपं वायुराददते यदा । प्रशाम्यति ततो ज्योतिर्व्वायुर्दोधूयते महान् ।
ततस्तु स्वनमासाद्य वायुः सम्भवमात्मनः । अधश्चोर्द्ध्वञ्च तिर्य्यक्च दोधवीति दिशो दश ।
वायोरपि गुणं स्पर्शमाकाशं ग्रसते यदा । प्रशाम्यति तदा वायुः खन्तु तिष्ठति नादवत् । ८५६५
अरूपमरसस्पर्शमगन्धं न च मूर्त्तिमत् । सर्व्वलोकप्रणदितं खन्तु तिष्ठति नादवत् ।
आकाशस्य गुणं शब्दमभिव्यक्तात्मकं मनः । मनसो व्यक्तमव्यक्तं ब्राह्मः सम्प्रति सञ्चरः ।
तदात्मगुणमाविश्य मनो ग्रसति चन्द्रमाः । मनस्युपरते चापि चन्द्रमस्युपतिष्ठते ।
तन्तु कालेन महता सङ्कल्पं कुरुते वशे । चित्तं ग्रसति सङ्कल्पस्तच्च ज्ञानमनुत्तमं ।
कालो गिरति विज्ञानं कालं बलमिति श्रुतिः । बलं कालो ग्रसति तु तं विद्या कुरुते वशे । ८५७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आकाशस्य तदा घोषं तं विद्वान् कुरुतेत्मनि । तदव्यक्तं परं ब्रह्म तच्छाश्वतमनुत्तमं ।
एवं सर्व्वाणि भूतानि ब्रह्मैव प्रतिसञ्चरः । यथावत् कीर्त्तितं सम्यगेवमेतदसंशयं ।
बोध्यं विद्यामयं दृष्ट्वा योगिभिः परमात्मभिः । एवं विस्तारसङ्क्षेपौ ब्रह्माव्यक्ते पुनः पुनः ।
युगसाहस्रयोरादावहोरात्रस्तथैव च ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने त्रयस्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३३ ॥
॥ व्यास उवाच ॥ भूतग्रामे नियुक्तं यत्तदेतत् कीर्त्तितं मया । ब्राह्मणस्य तु यत् कृत्यं तत्ते वक्ष्यामि तच्छृणु । ८५७५
जातकर्म्मप्रभृत्यस्य कर्म्मणां दक्षिणावतां । क्रिया स्यादासमावृत्तेराचार्य्ये वेदपारगे ।
अधीत्य वेदानखिलान् गुरुशुश्रूषणे रतः । गुरूणामनृणो भूत्वा समावर्त्तेत यज्ञवित् ।
आचार्य्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमं । आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथा विधि ।
प्रजासर्गेण दारैश्च ब्रह्मचर्य्येण वा पुनः । वने गुरुसकाशे वा यतिधर्म्मेण वा पुनः ।
गृहस्थस्त्वेव धर्म्माणां सर्व्वेषां मूलमुच्यते । यत्र पक्वकषायो हि दान्तः सर्व्वत्र सिध्यति । ८५८०
प्रजावान् श्रोत्रियो यज्वा मुक्त एव ऋणैस्त्रिभिः । अथान्यानाश्रमान् पश्चात्पूतो गच्छेत कर्म्मभिः ।
यत्पृथिव्यां पुण्यतमं विद्यात्स्थानं तदावसेत् । यतेत तस्मिन् प्रामाण्यं गन्तुं यशसि चोत्तमे ।
तपसा वा सुमहता विद्यानां पारणेन वा । इज्यया वा प्रदानैर्व्वा विप्राणां वर्द्धते यशः ।
यावदस्य भवत्यस्मिन् कीर्त्तिर्लोके यशस्करी । तावत् पुण्यकृतां लोकाननन्तान् पुरुषोऽश्नुते ।
अध्यापयेदधीयीत याजयेत यजेत वा । न वृथा प्रतिगृह्णीयान्न च दद्यात् कथञ्चन । ८५८५
याज्यतः शिष्यतो वाऽपि कन्याया वा धनं महत् । यदागच्छेद्यजेद्दद्यान्नैकोऽश्नीयात् कथञ्चन ।
गृहमावसतो ह्यस्य नान्यत्तीर्थं प्रतिग्रहात् । देवर्षिपितृगुर्व्वर्थं वृद्धातुरबुभुक्षतां ।
अन्तर्हितारितप्तानां यथाशक्ति बुभूषतां । द्रव्याणामतिशक्त्याऽपि देयमेषां कृतादपि ।
अर्हतामनुरूपाणां नादेयं ह्यस्ति किञ्चन । उच्चैःश्रवसमप्यश्वं प्रापणीयं सतां विदुः ।
अनुनीय यथाकामं सत्यसन्धो महाव्रतः । स्वैः प्राणैर्ब्राह्मणप्राणान् परित्राय दिवं गतः । ८५९०
रन्तिदेवश्च सांकृत्यो वशिष्ठाय महात्मने । अपः प्रदाय शीतोष्णा नाकपृष्ठे महीयते ।
आत्रेयश्चेन्द्रदमनो ह्यर्हते विविधं धनं । दत्त्वा लोकान् ययौ धीमाननन्तान् स महीपतिः ।
शिविरौशीनरोऽङ्गानि सुतञ्च प्रियमौरसं । ब्राह्मणार्थमुपाहृत्य नाकपृष्ठमितो गतः ।
प्रतर्द्दनः काशिपतिः प्रदाय नयने स्वके । ब्राह्मणायातुलां कीर्त्तिमिह चामुत्र चाश्नुते ।
दिव्यमष्टशलाकन्तु सौवर्णं परमर्द्धिमत् । छत्रं देवावृधो दत्त्वा सराष्ट्रोऽभ्यपतद्दिवं । ८५९५
सांकृतिश्च तथात्रेयः शिष्येभ्यो ब्रह्म निर्गुणं । उपदिश्य महातेजा गतो लोकाननुत्तमान् ।
अम्बरीषो गवां दत्त्वा ब्राह्मणेभ्यः प्रतापवान् । अर्व्वुदानि दशैकञ्च सराष्ट्रोऽभ्यपतद्दिवं ।
सावित्री कुण्डले दिव्ये शरीरं जनमेजयः । ब्राह्मणार्थे परित्यज्य जग्मतुर्लोकमुत्तमं ।
सर्व्वरत्नं वृषादर्भिर्युवनाश्वः प्रियाः स्त्रियः । रम्यमावसथञ्चैव दत्त्वा स्वर्लोकमास्थितः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निमी राष्ट्रञ्च वैदेहो जामदग्न्यो वसुन्धरां । ब्राह्मणेभ्यो ददौ चापि गयश्चोर्व्वीं सपत्तनां । ८६००
अवर्षति च पर्ज्जन्ये सर्व्वभूतानि भूतकृत् । वशिष्ठो जीवयामास प्रजापतिरिव प्रजाः ।
करन्धमस्य पुत्रस्तु कृतात्मा मरुतस्तथा । कन्यामङ्गिरसे दत्त्वा दिवमाशु जगाम ह ।
ब्रह्मदत्तश्च पाञ्चाल्यो राजा बुद्धिमतां वरः । निधिं शङ्खं द्विजाग्र्येभ्यो दत्त्वा लोकानवाप्तवान् ।
राजा मित्रसहश्चापि वशिष्ठाय महात्मने । दमयन्तीं प्रियां दत्त्वा तया सह दिवङ्गतः ।
सहस्रजिच्च राजर्षिः प्राणानिष्टान्महायशाः । ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् । ८६०५
सर्व्वकामैश्च संपूर्णं दत्त्वा वेश्म हिरण्मयं । मुद्गलाय गतः स्वर्गं शतद्युम्नो महीपतिः ।
नाम्ना च द्युतिमान्नाम शाल्वराजः प्रतापवान् । दत्त्वा राज्यमृचीकाय गतो लोकाननुत्तमान् ।
मदिराश्वश्च राजर्षिर्दत्त्वा कन्यां सुमध्यमां । हिरण्यहस्ताय गतो लोकान् देवैरभिष्टुतान् ।
लोमपादश्च राजर्षिः शान्तां दत्त्वा सुतां प्रभुः । ऋष्यशृङ्गाय विपुलैः सर्व्वकामैरयुज्यत ।
दत्त्वा शतसहस्रन्तु गवां राजा प्रसेनजित् । सवत्सानां महातेजा गतो लोकाननुत्तमान् । ८६१०
एते चान्ये च बहवो दानेन तपसैव च । महात्मानो गताः स्वर्गं शिष्टात्मानो जितेन्द्रियाः ।
तेषां प्रतिष्ठिता कीर्त्तिर्यावत् स्थास्यति मेदिनी । दानयज्ञप्रजासर्गैरेते हि दिवमाप्नुवन् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने चतुस्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३४ ॥
॥ व्यास उवाच ॥ त्रयीविद्यामवेक्षेत वेदेषूक्तामथाङ्गतः । ऋक्सामवर्णाक्षरतो यजुषोऽथर्व्वणस्तथा ।
तिष्ठत्येतेषु भगवान् षट्सु कर्म्मसु संस्थितः । वेदवादेषु कुशला ह्यध्यात्मकुशलाश्च ये ।
सत्त्ववन्तो महाभागाः पश्यन्ति प्रभवाप्ययं । एवं धर्म्मेण वर्त्तेत क्रियां शिष्टवदाचरेत् । ८६१५
असंरोधेन भूतानां वृत्तिं लिप्सेत वै द्विजः । सद्भ्य आगतविज्ञानः शिष्टः शास्त्रविचक्षणः ।
स्वधर्म्मेण क्रिया लोके कर्म्मसत्त्वस्वसङ्करः । तिष्ठते तेषु गृहवान् षट्सु कर्म्मसु स द्विजः ।
पञ्चभिः सततं यज्ञैः श्रद्दधानो यजेत च । धृतिमानप्रमत्तश्च दान्तो धर्म्मविदात्मवान् ।
वीतहर्षमदक्रोधो ब्राह्मणो नावसीदति । दानमध्ययनं यज्ञस्तपो ह्रीरार्ज्जवं दमः ।
एतैर्व्वर्द्धयते तेजः पाप्मानञ्चापकर्षति । धूतपाप्मा च मेधावी लघ्वाहारो जितेन्द्रियः । ८६२०
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं । अग्नींश्च ब्राह्मणांश्चार्च्चेद्देवताः प्रणमेत च ।
वर्ज्जयेदुषतीं वाचं हिंसाञ्चाधर्म्मसंहितां । एषा पूर्व्वगता वृत्तिर्ब्राह्मणस्य विधीयते ।
ज्ञानागमेन कर्म्माणि कुर्व्वन् कर्म्मसु सिद्ध्यति । पञ्चेन्द्रियजलां घोरां लोभमूलां सुदुस्तरां ।
मन्युपङ्कामनाधृष्यां नदीं तरति बुद्धिमान् । कालमभ्युद्यतं पश्येन्नित्यमत्यन्तमोहनं ।
महता विधिदृष्टेन बलेनाप्रतिघातिना । स्वभावस्रोतसा वृत्तमुह्यते सततं जगत् । ८६२५
कालोदकेन महता वर्षावर्त्तेन सन्ततं । मासोर्म्मिणर्त्तुवेगेन पक्षोलपतृणेन च ।
निमिषोन्मेषफेनेन अहोरात्रजलेन च । कामग्राहेण घोरेण वेदयज्ञप्लवेन च ।
धर्म्मद्वीपेन भूतानां चार्थकामजलेन च । ऋतवाङ्मोक्षतीरेण विहिंसातरुवाहिना ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

युगहृदीर्घमध्येन ब्रह्मप्रायभवेन च । धात्रा सृष्टानि भूतानि कृष्यन्ते यमसादनं ।
एतत् प्रज्ञामयैर्धीरा निस्तरन्ति मनीषिणः । प्लवैरप्लववन्तो हि किं करिष्यन्त्यचेतसः । ८६३०
उपपन्नं हि यत् प्राज्ञो निस्तरेन्नेतरो जनः । दूरतो गुणदोषौ हि प्राज्ञः सर्व्वत्र पश्यति ।
संशयं स तु कामात्मा चलचित्तोऽल्पचेतनः । अप्राज्ञो न तरत्येनं यो ह्यास्ते न स गच्छति ।
अप्लवोऽहि महादोषं गुह्यमानो नियच्छति । कामग्राहगृहीतस्य ज्ञानमप्यस्य न प्लवः ।
तस्मादुन्मज्जनस्यार्थे प्रयतेत विचक्षणः । एतदुन्मज्जनं तस्य यदयं ब्राह्मणो भवेत् ।
अवदातेषु संजातस्त्रिसन्देहस्त्रिकर्म्मकृत् । तस्मादुन्मज्जने तिष्ठेत् प्रज्ञया निस्तरेद्यथा । ८६३५
संस्कृतस्य हि दान्तस्य नियतस्य यतात्मनः । प्राज्ञस्यानन्तरा सिद्धिरिह लोके परत्र च ।
वर्त्तते तेषु गृहवानक्रुध्यन्ननसूयकः । पञ्चभिः सततं यज्ञैर्विघसाशी यजेत च ।
सतां धर्म्मेण वर्त्तेत क्रियां शिष्टवदाचरेत् । असंरोधेन लोकस्य वृत्तिं लिप्सेदगर्हितां ।
श्रुतविज्ञानतत्त्वज्ञः शिष्टाचारो विचक्षणः । स्वधर्म्मेण क्रियावांश्च कर्म्मणा सोऽप्यसङ्करः ।
क्रियावान् श्रद्दधानो हि दान्तः प्राज्ञोऽनसूयकः । धर्म्माधर्म्मविशेषज्ञः सर्व्वं तरति दुस्तरं । ८६४०
धृतिमानप्रमत्तश्च दान्तो धर्म्मविदात्मवान् । वीतहर्षमदक्रोधो ब्राह्मणो नावसीदति ।
एषा पुरातनी वृत्तिर्ब्राह्मणस्य विधीयते । ज्ञानवत्त्वे च कर्म्माणि कुर्व्वन् सर्व्वत्र सिध्यति ।
अधर्म्मं धर्म्मकामो हि करोति ह्यविचक्षणः । धर्म्मं वा धर्म्मसंकाशं शोचन्निव करोति सः ।
धर्म्मं करोमीति करोत्यधर्म्ममधर्म्मकामश्च करोति धर्म्मं । उभे बालः कर्म्मणी न प्रजानन् स जायते म्रियते चापि देही ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने पञ्चत्रिंशदधिकद्विशततोऽध्यायः ॥ २३५ ॥

॥ व्यास उवाच ॥ अथ चेद्रोचयेदेतदुह्येत स्रोतसा यथा । उन्मज्जंश्च निमज्जंश्च ज्ञानवान् प्लववान् भवेत् । ८६४५
प्रज्ञया निश्चिता धीरास्तारयन्त्यबुधान् प्लवैः । नाबुधास्तारयन्त्यन्यानात्मानं वा कथञ्चन ।
छिन्नदोषो मुनिर्य्योगान्युक्तो भुञ्जीत द्वादश । देशधर्म्मानुरागार्थानुपायापायनिश्चयः ।
चक्षुराहारसंहारैर्म्मनसा दर्शनेन च । यच्छेद्वाङ्मनसी बुद्ध्या य इच्छेज्ज्ञानमुत्तमं ।
ज्ञानेन यच्छेदात्मानं य इच्छेच्छान्तिमात्मनः । एतेषाञ्चेदनुद्रष्टा पुरुषोऽपि सुदारुणः ।
यदि वा सर्व्ववेदज्ञो यदि वाऽप्यनृचो द्विजः । यदि वा धार्म्मिको यज्वा यदि वा पापकृत्तमः । ८६५०
यदि वा पुरुषव्याघ्रो यदि वा क्लैब्यधारितः । तरत्येवं महादुर्गं जरामरणसागरं ।
एवं ह्येतेन योगेन युञ्जानो ह्येकमन्ततः । अपि जिज्ञासमानोऽपि शब्दब्रह्मातिवर्त्तते ।
धर्म्मोपस्थो ह्रीवरूथ उपायापायकूवरः । अपानाक्षः प्राणयुगः प्रज्ञायुर्जीवबन्धनः ।
चेतनाबन्धुरश्चारुश्चाचारग्रहनेमिमान् । दर्शनस्पर्शनवहो घ्राणश्रवणवाहनः ।
प्रज्ञानाभिः सर्व्वतन्त्रः प्रतोदो ज्ञानसारथिः । क्षेत्रज्ञाधिष्ठितो धीरः श्रद्धादमपुरःसरः । ८६५५
त्यागसूक्ष्मानुगः क्षेम्यः शौचगो ध्यानगोचरः । जीवयुक्तो रथो दिव्यो ब्रह्मलोके विराजते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ सन्तरमाणस्य रथमेवं युयुक्षतः । अक्षरं गन्तुमनसो विधिं वक्ष्यामि शीघ्रगं ।
सप्त या धारणाः कृत्स्ना वाग्यतः प्रतिपद्यते । पृष्ठतः पार्श्वतश्चान्यास्तावत्यस्ताः प्रधारणाः ।
क्रमशः पार्थिवं यच्च वायव्यं खं तथा पयः । ज्योतिषो यत्तदैश्वर्य्यमहङ्कारस्य बुद्धितः ।
अव्यक्तस्य तथैश्वर्य्यं क्रमशः प्रतिपद्यते । विक्रमाश्चापि यस्यैते यथा युक्तेषु योगतः । ८६६०
तथा योगस्य युक्तस्य सिद्धिमात्मनि पश्यतः । निर्म्मुच्यमानः सूक्ष्मत्वाद्रूपाणीमानि पश्यतः ।
शैशिरस्तु यथा धूमः सूक्ष्मः संश्रयते नभः । तथा देहाद्विमुक्तस्य पूर्व्वरूपं भवत्युत ।
अथ धूमस्य विरमे द्वितीयं रूपदर्शनं । जलरूपमिवाकाशे तथैवात्मनि पश्यति ।
अपां व्यतिक्रमे चास्य वह्निरूपं प्रकाशते । तस्मिन्नुपरतेऽजोऽस्य पीतशस्त्रः प्रकाशते ।
ऊर्णारूपसवर्णस्य तस्य रूपं प्रकाशते । अथ श्वेतां गतिं गत्वा वायव्यं सूक्ष्ममप्युत । ८६६५
अप्युक्तं तेजसः सौक्ष्म्यमप्युक्तं ब्राह्मणस्य वै । एतेष्वपि हि जातेषु फलजातानि मे शृणु ।
जातस्य पार्थिवैश्वर्य्यैः सृष्टिरत्र विधीयते । प्रजापतिरिवाक्षोभ्यः शरीरात् सृजते प्रजाः ।
अङ्गुल्यङ्गुष्ठमात्रेण हस्तपादेन वा तथा । पृथिवीं कम्पयत्येको गुणो वायोरिति श्रुतिः ।
आकाशभूतश्चाकाशे सवर्णत्वात् प्रकाशते । वर्णतो गृह्यते चापि कामात् पिवति वाश्रयान् ।
न चास्य तेजसा रूपं दृश्यते शाम्यते तथा । अहङ्कारेऽस्य विजिते पञ्चैते स्युर्व्वशानुगाः । ८६७०
षण्णामात्मनि बुद्धौ च जितायां प्रभवत्यथ । निर्द्दोषप्रतिभा ह्येनं कृत्स्ना समभिवर्त्तते ।
तथैव व्यक्तमात्मानमव्यक्तं प्रतिपद्यते । यतो विसरते लोको भवति व्यक्तसंज्ञकः ।
तत्राव्यक्तमयीं विद्यां शृणु त्वं विस्तरेण मे । तथा व्यक्तमयञ्चैव साङ्ख्ये पूर्व्वं निबोध मे ।
पञ्चविंशतितत्त्वानि तुल्यान्युभयतः समं । योगे साङ्ख्येऽपि च तथा विशेषं तत्र मे शृणु ।
प्रोक्तं तद्व्यक्तमित्येव जायते वर्द्धते च यत् । जीर्य्यते म्रियते चैव चतुर्भिर्लक्षणैर्युतं । ८६७५
विपरीतमतो यत्तु तदव्यक्तमुदाहृतं । द्वावात्मानौ च वेदेषु सिद्धान्तेष्वप्युदाहृतौ ।
चतुर्लक्षणजं त्वाद्यं चतुर्व्वर्गं प्रचक्षते । व्यक्तमव्यक्तजञ्चैव तथा बुद्धमचेतनं ।
सत्त्वं क्षेत्रज्ञ इत्येतद्द्वयमप्यनुदर्शितं । द्वावात्मानौ च वेदेषु विषयेष्वनुरज्यतः ।
विषयात् प्रतिसंहारः साङ्ख्यानां विद्धि लक्षणं । निर्म्ममश्चानहङ्कारो निर्द्वन्द्वश्छिन्नसंशयः ।
नैव क्रुध्यति न द्वेष्टि नानृता भाषते गिरः । आक्रुष्टस्ताडितश्चैव मैत्रेण ध्याति नाशुभं । ८६८०
वाग्दण्डकर्म्ममनसां त्रयाणाञ्च निवर्त्तकः । समः सर्व्वेषु भूतेषु ब्रह्माणमभिवर्त्तते ।
नैवेच्छति न चानिच्छो यात्रामात्राव्यवस्थितः । अलोलुपोऽव्यथो दान्तो न कृती न निराकृती ।
नास्येन्द्रियमनेकाग्रं नाविक्षिप्तमनोरथः । सर्व्वभूतसदृङ्मैत्रसमलोष्टककाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः । अस्पृहः सर्व्वकामेभ्यो ब्रह्मचर्य्यदृढव्रतः ।
अहिंस्रः सर्व्वभूतानामीदृक् साङ्ख्यो विमुच्यते । यथा योगाद्विमुच्यन्ते कारणैर्यैर्निबोध तत् । ८६८५
योगैश्वर्य्यमतिक्रान्तो यो निष्क्रामति मुच्यते । इत्येषा भावजा बुद्धिः कथिता ते न संशयः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

एवम्भवति निर्द्वन्द्वो ब्रह्माणञ्चाधिगच्छति । कर्म्मणा मनसायुक्तो ब्रह्माणं चातिवर्त्तते ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने षट्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३६ ॥

॥ व्यास उवाच ॥ अथ ज्ञानप्लवं धीरो गृहीत्वा शान्तिमात्मनः । उन्मज्जंश्च निमज्जंश्च ज्ञानमेवाभिसंश्रयेत् ।

॥ शुक उवाच ॥ किन्तज्ज्ञानमथो विद्या यया निस्तरते द्वयं । प्रवृत्तिलक्षणो धर्म्मो निवृत्तिरिति वा वद ।

॥ व्यास उवाच ॥ यस्तु पश्यन् स्वभावेन विना भावमचेतनः । पुष्यते च पुनः सर्व्वान् प्रज्ञया मुक्तिहेतुकान् । ८०९०

येषाञ्चैकान्तभावेन स्वभावात् कारणं मतं । श्रुत्वा तृणाम्वषीकां वा ते लभन्ते न किञ्चन ।

ये चैनं पक्षमाश्रित्य निवर्त्तन्त्यल्पमेधसः । स्वभावं कारणं ज्ञात्वा न श्रेयः प्राप्नुवन्ति ते ।

स्वभावो हि विनाशाय मोहकर्म्ममनोभवः । निरुक्तमेतयोरेतत् स्वभावपरिभावयोः ।

कृष्यादीनीह कर्म्माणि शस्यसंहरणानि च । प्रज्ञावद्भिः प्रक्लृप्तानि यानासनगृहाणि च ।

आक्रीडानां गृहाणाञ्च गदानामगदस्य च । प्रज्ञावन्तः प्रयोक्तारो ज्ञानवद्भिरनुष्ठिताः । ८०९५

प्रज्ञा संयोजयत्यर्थैः प्रज्ञाः श्रेयोऽधिगच्छति । राजानो भुञ्जते राज्यं प्रज्ञया तुल्यलक्षणाः ।

परावरन्तु भूतानां ज्ञानेनैवोपलभ्यते । विद्यया तात सृष्टानां विद्यैवेह परा गतिः ।

भूतानां जन्म सर्व्वेषां विविधानां चतुर्व्विधं । जरायुजाण्डजोद्भिज्जस्वेदजञ्चोपलक्षयेत् ।

स्थावरेभ्यो विशिष्टानि जङ्गमान्युपधारयेत् । उपपन्नं हि यच्चेष्टा विशिष्येत विशिष्यया ।

आहुर्व्वै बहुपादानि जङ्गमानि द्वयानि तु । बहुपाद्भ्यो विशिष्टानि द्विपादानि बहून्यपि । ८१००

द्विपादानि द्वयान्याहुः पार्थिवानीतराणि च । पार्थिवानि विशिष्टानि तानि ह्यन्नानि भुञ्जते

पार्थिवानि द्वयान्याहुर्म्मध्यमान्युत्तमानि तु । मध्यमानि विशिष्टानि जातिधर्म्मोपधारणात् ।

मध्यमानि द्वयान्याहुर्द्धर्म्मज्ञानीतराणि च । धर्म्मज्ञानि विशिष्टानि कार्य्याकार्य्योपधारणात् ।

धर्म्मज्ञानि द्वयान्याहुर्व्वेदज्ञानीतराणि च । वेदज्ञानि विशिष्टानि वेदो ह्येषु प्रतिष्ठितः ।

वेदज्ञानि द्वयान्याहुः प्रवक्तॄणीतराणि च । प्रवक्तॄणि विशिष्टानि सर्व्वधर्म्मोपधारणात् । ८१०५

विज्ञायन्ते हि यैर्व्वेदाः सधर्म्माः सक्रियाफलाः । सधर्म्मा निखिला वेदाः प्रवक्तृभ्यो विनिःसृताः ।

प्रवक्तॄणि द्वयान्याहुरात्मज्ञानीतराणि च । आत्मज्ञानि विशिष्टानि जन्माजन्मोपधारणात् ।

धर्म्मद्वयं हि यो वेद स धर्म्मज्ञः स सर्व्ववित् । स त्यागी सत्यसंकल्पः सत्यः शुचिरथेश्वरः ।

ब्रह्मज्ञानप्रतिष्ठं हि तं देवा ब्राह्मणं विदुः । शब्दब्रह्मणि निष्णातं परे च कृतनिश्चयं ।

अन्तःस्थञ्च वहिःस्थञ्च साधियज्ञाधिदैवतं । ज्ञानान्विता हि पश्यन्ति ते देवास्तात ते द्विजाः ८११०

तेषु विश्वमिदं भूतं सर्व्वञ्च जगदाहितं । तेषां माहात्म्यभावस्य सदृशं नास्ति किञ्चन ।

आद्यन्ते निधनञ्चैव कर्म्म चातीत्य सर्व्वशः । चतुर्व्विधस्य भूतस्य सर्व्वस्येशाः स्वयम्भुवः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने सप्तत्रिंशदधिकद्विशततोऽध्यायः ॥ २३७ ॥

॥ व्यास उवाच ॥ एषा पूर्व्वतरा वृत्तिर्ब्राह्मणस्य विधीयते । ज्ञानवानेव कर्म्माणि कुर्व्वन् सर्व्वत्र सिध्यति ।

तत्र चेन्न भवेदेवं संशयः कर्म्मसिद्धये । किन्तु कर्म्मस्वभावोऽयं ज्ञानं कर्म्मेति वा पुनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्र वेदविधिः स स्याज्ज्ञानञ्चेत् पुरुषं प्रति । उपपत्युपलब्धिभ्यां वर्णयिष्यामि तच्छृणु । ८११५
पौरुषं कारणं केचिदाहुः कर्म्मसु मानवाः । दैवमेके प्रशंसन्ति स्वभावमपरे जनाः ।
पौरुषं कर्म्म दैवञ्च कालवृत्तिस्वभावतः । त्रयमेतत्पृथग्भूतमविवेकन्तु केचन ।
एतदेवञ्च नैवञ्च न चोभे नानुभे तथा । कर्म्मस्था विषयं ब्रूयुः सत्त्वस्थाः समदर्शिनः ।
त्रेतायां द्वापरे चैव कलिजाश्च ससंशयाः । तपस्विनः प्रशान्ताश्च सत्त्वस्थाश्च कृते युगे ।
अपृथग्दर्शनाः सर्व्वे ऋक्सामसु यजुःषु च । कामद्वेषौ पृथक्कृत्वा तपः कृत उपासते । ८१२०
तपोधर्म्मेण संयुक्तस्तपोनित्यः सुसंशितः । तेन सर्व्वानवाप्नोति काम्यान् यान्मनसेच्छति ।
तपसा तदवाप्नोति यद्भूत्वा सृजते जगत् । तद्भूतश्च ततः सर्व्वो भूतानां भवति प्रभुः ।
तदुक्तं वेदवादेषु गहनं वेददर्शिभिः । वेदान्तेषु पुनर्व्यक्तं कर्म्मयोगेन लक्ष्यते ।
आरम्भयज्ञाः क्षत्त्राश्च हविर्यज्ञा विशः स्मृताः । परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः ।
परिनिष्ठितकार्य्यो हि स्वाध्यायेन द्विजो भवेत् । कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते । ८१२५
त्रेतादौ केवला वेदा यज्ञा वर्णाश्रमास्तथा । संरोधादायुषस्त्वेते व्यस्यन्ते द्वापरे युगे ।
द्वापरे विप्लवं यान्ति वेदाः कलियुगे तथा । दृश्यन्ते नापि दृश्यन्ते कलेरन्ते पुनः किल ।
उत्सीदन्ति स्वधर्म्माश्च तत्राधर्म्मेण पीडिताः । गवां भूमेश्च ये चापामोषधीनाञ्च ये रसाः ।
अधर्म्मान्तर्हिता वेदा वेदधर्म्मास्तथाश्रमाः । विक्रियन्ते स्वधर्म्मस्थाः स्थावराणि चराणि च ।
यथा सर्व्वाणि भूतानि वृष्टिर्भौमानि वर्षति । सृजते सर्व्वतोऽङ्गानि तथा वेदा युगे युगे । ८१३०
निश्चितं कालनानात्वमनादिनिधनञ्च यत् । कीर्त्तितं यत्पुरस्तान्मे सूते यच्चात्ति च प्रजाः ।
यच्चेदं प्रभवः स्थानं भूतानां संयमो यमः । स्वभावेनैव वर्त्तन्ते द्वन्द्वसृष्टानि भूरिशः ।
सर्गः कालो धृतिर्वेदाः कर्त्ता कार्य्यं क्रिया फलं । एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने अष्टत्रिंशदधिकद्विशततोऽध्यायः ॥ २३८ ॥
॥ भीष्म उवाच ॥ इत्युक्तोऽभिप्रशस्यैतत् परमर्षेस्तु शासनं । मोक्षधर्म्मार्थसंयुक्तमिदं प्रष्टुं प्रचक्रमे ।
॥ शुक उवाच ॥ प्रज्ञावान् श्रोत्रियो यज्वा कृतप्रज्ञोऽनसूयकः । अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति । ८१३५
तपसा ब्रह्मचर्य्येण सर्व्वत्यागेन मेधया । साङ्ख्ये वा यदि वा योग एतत् पृष्टो वदस्व मे ।
मनसश्चेन्द्रियाणाञ्च यथैकाग्र्यमवाप्यते । येनोपायेन पुरुषैस्तत्त्वं व्याख्यातुमर्हसि ।
॥ व्यास उवाच ॥ नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात् । नान्यत्र सर्व्वसन्त्यागात् सिद्धिं विन्दति कश्चन ।
महाभूतानि सर्व्वाणि पृथक् सिद्धिः स्वयम्भुवः । भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ।
भूमेर्द्देहो जलात् स्नेहो ज्योतिषश्चक्षुषी स्मृते । प्राणापानाश्रयो वायुः खेष्वाकाशं शरीरिणां । ८१४०
क्रान्ते विष्णुर्ब्बले शक्रः कोष्ठेऽग्निर्भोक्तुमिच्छति । कर्णयोः प्रदिशः श्रोत्रं जिह्वायां वाक् सरस्वती ।
कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी । दर्शनीयेन्द्रियोक्तानि द्वाराण्याहारसिद्धये ।
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः । इन्द्रियार्थान् पृथग्विद्यादिन्द्रियेभ्यस्तु नित्यदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इन्द्रियाणि मनो युङ्क्ते वश्यान् यन्तेव वाजिनः। मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः।
इन्द्रियाणां तथैवैषां सर्व्वेषामीश्वरं मनः। नियमे च विसर्गे च भूतात्मा मनसस्तथा।
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः। प्राणापानौ च जीवश्च नित्यं देहेषु देहिनां।
आश्रयो नास्ति सत्त्वस्य गुणाः शब्दो न चेतना। सत्त्वं हि तेजः सृजति न गुणान् वै कथञ्चन।
एवं सप्तदशं देहे वृतं षोडशभिर्गुणैः। मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि।
न ह्ययञ्चक्षुषा दृश्यो न च सर्व्वैरपीन्द्रियैः। मनसा तु प्रदीपेन महानात्मा प्रकाशते।
अशब्दस्पर्शरूपन्तद्रसागन्धमव्ययं। अशरीरं शरीरेषु निरीक्षेत निरिन्द्रियं।
अव्यक्तं सर्व्वदेहेषु मर्त्येषु परमाश्रितं। योऽनुपश्यति स प्रेत्य कल्पेत ब्रह्मभूयसे।
विद्याभिजनसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।
स हि सर्व्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च। वसत्येको महानात्मा येन सर्व्वमिदं ततं।
सर्व्वभूतेषु चात्मानं सर्व्वभूतानि चात्मनि। यदा पश्यति भूतात्मा ब्रह्म सम्पद्यते तदा।
यावानात्मनि वेदात्मा तावानात्मा परात्मनि। य एवं सततं वेद सोऽमृतत्वाय कल्पते।
सर्व्वभूतात्मभूतस्य सर्व्वभूतहितस्य च। देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः।
शकुन्तानामिवाकाशे मत्स्यानामिव चोदके। यथा गतिर्न दृश्येत तथा ज्ञानविदां गतिः।
कालः पचति भूतानि सर्व्वाण्येवात्मनात्मनि। यस्मिंस्तु पच्यते कालस्तं वेदेह न कश्चन।
न तदूर्द्ध्वं न तिर्य्यक् च नाधो न च पुनः पुनः। न मध्ये प्रतिगृह्णीते नैव किञ्चित् कुतश्चन।
सर्व्वेऽन्तःस्था इमे लोका बाह्यमेषां न किञ्चन। यद्यजस्रं समागच्छेद्यथा बाणो गुणच्युतः।
नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः। तस्मात् सूक्ष्मात् सूक्ष्मतरं नास्ति स्थूलतरं ततः।
सर्व्वतः पाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखं। सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति।
तदेवाणोरणुतरं तन्महद्भ्यो महत्तरं। तदन्तः सर्व्वभूतानां ध्रुवं तिष्ठन्न दृश्यते।
अक्षरञ्च क्षरञ्चैव द्वैधीभावोऽयमात्मनः। क्षरः सर्व्वेषु भूतेषु दिव्यं त्वमृतमक्षरं।
नवद्वारं पुरं गत्वा हंसो हि नियतो वशी। ईशः सर्व्वस्य भूतस्य स्थावरस्य चरस्य च।
हानिभङ्गविकल्पानां नवानां सञ्चयेन च। शरीराणामजस्याहुर्हंसत्वं पारदर्शिनः।
हंसोक्तञ्चाक्षरञ्चैव कूटस्थं यत्तदक्षरं। तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने ऊनचत्वारिंशदधिकद्विशततोऽध्यायः॥ २३९ ॥
॥ व्यास उवाच ॥ पृच्छतस्तव सत्पुत्र यथावदिह तत्त्वतः। साङ्ख्यज्ञानेन संयुक्तं यदेतत् कीर्त्तितं मया।
योगकृत्यन्तु ते कृत्स्नं वर्त्तयिष्यामि तच्छृणु। एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमं। तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना।
आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्म्मणा। योगदोषान् समुच्छिद्य पञ्च यान् कवयो विदुः।
कामं क्रोधञ्च लोभञ्च भयं स्वप्नञ्च पञ्चमं। क्रोधं शमेन जयति कामं सङ्कल्पवर्ज्जनात्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति। धृत्या शिश्नोदरं रक्षेत् पाणिपादञ्च चक्षुषा।
चक्षुःश्रोत्रे च मनसा मनो वाचञ्च कर्म्मणा। अप्रमादाद्भयं जह्याद्दम्भं प्राज्ञोपसेवनात्।
एवमेतान् योगदोषान् जयेन्नित्यमतन्द्रितः। अग्नींश्च ब्राह्मणांश्चार्च्चेद्देवताः प्रणमेत च। ८१७५
वर्ज्जयेदुषतीं वाचं हिंसायुक्तां मनोनुदां। ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं रसः।
एतस्य भूतं भूतस्य दृष्टं स्थावरजङ्गमं। ध्यानमध्ययनं दानं सत्यं ह्रीरार्ज्जवं क्षमा।
शौचमाचारसंशुद्धिरिन्द्रियाणाञ्च निग्रहः। एतैर्विवर्द्धते तेजः पाप्मानञ्चापकर्षति।
सिध्यन्ति चास्य सर्व्वार्था विज्ञानञ्च प्रवर्त्तते। समः सर्व्वेषु भूतेषु लब्धालब्धेन वर्त्तयन्।
धूतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः। कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं। ८१८०
मनसश्चेन्द्रियाणाञ्च कृत्वैकाग्र्यं समाहितः। पूर्व्वरात्रापरार्द्धे च धारयेन्मन आत्मनि।
जन्तोः पञ्चेन्द्रियस्यास्य यदेकं छिद्रमिन्द्रियं। ततोऽस्य स्रवते प्रज्ञा दृतेः पादादिवोदकं।
मनस्तु पूर्व्वमादद्यात् कुमीनमिव मत्स्यहा। ततः श्रोत्रं ततश्चक्षुर्ज्जिह्वा घ्राणञ्च योगवित्।
तत एतानि संयम्य मनसि स्थापयेद्यतिः। तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत्।
पञ्चेन्द्रियाणि सन्धाय मनसि स्थापयेद्यतिः। यदैतान्यवतिष्ठन्ति मनःषष्ठान्यथात्मनि। ८१८५
प्रसीदन्ति च संस्थाय तदा ब्रह्म प्रकाशते। विधूम इव दीप्तार्च्चिरादित्य इव दीप्तिमान्।
वैद्युतोऽग्निरिवाकाशे दृश्यतेत्मा तथात्मनि। सर्व्वस्तत्र स सर्व्वत्र व्यापकत्वाच्च दृश्यते।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः। धृतिमन्तो महाप्राज्ञाः सर्व्वभूतहिते रताः।
एवं परिमितं कालमाचरन् संशितव्रतः। आसीनो हि रहस्येको गच्छेदक्षरसाम्यतां।
प्रमोहो भ्रम आवर्त्तो घ्राणश्रवणदर्शने। अद्भुतानि रसस्पर्शे शीतोष्णे मारुताकृतिः। ८१९०
प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगतः। तांस्तत्त्वविदनादृत्य आत्मन्येव निवर्त्तयेत्।
कुर्य्यात् परिचयं योगे त्रैकाल्ये नियतो मुनिः। गिरिशृङ्गे तथा चैत्ये वृक्षाग्रेषु च योजयेत्।
संनियम्येन्द्रियग्रामं कोष्ठे भाण्डमना इव। एकाग्रश्चिन्तयेन्नित्यं योगान्नोद्विजयेन्मनः।
येनोपायेन शक्येत संनियन्तुं चलं मनः। तत्र युक्तो निषेवेत न चैव विचलेत्ततः।
शून्या गिरिगुहाश्चैव देवतायतनानि च। शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत्। ८१९५
नाभिष्वजेत् परं वाचा कर्म्मणा मनसाऽपि वा। उपेक्षको यताहारो लब्धालब्धे समो भवेत्।
यश्चैनमभिनन्देत यश्चैनमपवादयेत्। समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभं।
न प्रहृष्येत लाभेषु नालाभेषु च चिन्तयेत्। समः सर्व्वेषु भूतेषु सधर्म्मा मातरिश्वनः।
एवं स्वस्थात्मनः साधोः सर्व्वत्र समदर्शिनः। षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्त्तते।
वेदनार्त्ताः प्रजा दृष्ट्वा समलोष्टाश्मकाञ्चनः। एतस्मिन् विरतो मार्गे विरमेन्न च मोहितः। ८२००
अपि वर्णावकृष्टस्तु नारी वा धर्म्मकाङ्क्षिणी। तावप्येतेन मार्गेण गच्छेतां परमां गतिं।
अजं पुराणमजरं सनातनं यदिन्द्रियैरुपलभेत निश्चलैः। अणोरणीयो महतो महत्तरं तदात्मना पश्यति युक्तमात्मवान्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इदं महर्षेर्वचनं महात्मनो यथावदुक्तं मनसाऽनुदृश्य च । अवेक्ष्य चेमां परमेष्ठिसाम्यतां प्रयान्ति चाभूतगतिं मनीषिणः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने चत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४० ॥

॥ शुक उवाच ॥ यदिदं वेदवचनं कुरु कर्म्म त्यजेति च । कां दिशं विद्यया यान्ति कांश्च गच्छन्ति कर्म्मणा ।
एतद्वै श्रोतुमिच्छामि तद्भवान् प्रब्रवीतु मे । एतच्चान्योन्यवैरूप्ये वर्त्तेते प्रतिकूलतः । ८८०५॥
भीष्म उवाच ॥ इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतं । कर्म्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ।
यां दिशं विद्यया यान्ति यांश्च गच्छन्ति कर्म्मणा । शृणुष्वैकमना वत्स गह्वरं ह्येतदन्तरं ।
अस्ति धर्म्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत् । तस्य पक्षस्य सदृशमिदं मम भवेदथ ।
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्म्मो निवृत्तौ च सुभाषितः ।
कर्म्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते । तस्मात् कर्म्म न कुर्व्वन्ति यतयः पारदर्शिनः । ८८१०
कर्म्मणा जायते प्रेत्य मूर्त्तिमान् षोडशात्मकः । विद्यया जायते नित्यमव्यक्तं ह्यव्ययात्मकं ।
कर्म्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः । तेन ते देहजालानि रमयन्त उपासते ।
ये तु बुद्धिं परां प्राप्ता धर्म्मनैपुण्यदर्शिनः । न ते कर्म्म प्रशंसन्ति कूपं नद्यां पिबन्निव ।
कर्म्मणः फलमाप्नोति सुखदुःखे भवाभवौ । विद्यया तदवाप्नोति यत्र गत्वा न शोचति ।
यत्र गत्वा न म्रियते यत्र गत्वा न जायते । न पुनर्जायते यत्र यत्र गत्वा न वर्त्तते । ८८१५
यत्र तद्ब्रह्म परममव्यक्तमचलं ध्रुवं । अव्याकृतमनायासममृतञ्चावियोगि च ।
द्वन्द्वैर्न यत्र बाध्यन्ते मानसेन च कर्म्मणा । समाः सर्व्वत्र मैत्राश्च सर्व्वभूतहिते रताः ।
विद्यामयोऽन्यः पुरुषस्तात कर्म्ममयोऽपरः । विद्धि चन्द्रमसं दर्शे सूक्ष्मया कलया स्थितं ।
तदेतदृषिणा प्रोक्तं विस्तरेणानुगीयते । नवजं शशिनं दृष्ट्वा वक्रतन्तुमिवाम्बरे ।
एकादशविकारात्मा कलासम्भारसंभृतः । मूर्त्तिमानिति तं विद्धि तात कर्म्मगुणात्मकं । ८८२०
देवो यः संश्रितस्तस्मिन्नब्बिन्दुरिव पुष्करे । क्षेत्रज्ञं तं विजानीयात् नित्यं योगजितात्मकं ।
तमो रजश्च सत्त्वञ्च विद्धि जीवगुणात्मकं । जीवमात्मगुणं विद्यादात्मानं परमात्मनः ।
सचेतनं जीवगुणं वदन्ति स चेष्टते जीवयते च सर्व्वं । ततः परं क्षेत्रविदो वदन्ति प्राकल्पयद्यो भुवनानि सप्त ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने एकचत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४१ ॥

॥ शुक उवाच ॥ क्षरात्प्रभृति यः सर्गः सगुणानीन्द्रियाणि च । बुद्ध्यैश्वर्य्यातिसर्गोऽयं प्रधानस्यात्मनः श्रुतं ।
भूय एव तु लोकेऽस्मिन् सद्वृत्तिं कालहैतुकीं । यया सन्तः प्रवर्त्तन्ते तदिच्छाम्यनुवर्त्तितुं । ८८२५
वेदे वचनमुक्तन्तु कुरु कर्म्म त्यजेति च । कथमेतद्विजानीयां तच्च व्याख्यातुमर्हसि ।
लोकवृत्तान्ततत्त्वज्ञः पूतोऽहं गुरुशासनात् । कृत्वा बुद्धिं विमुक्तात्मा द्रक्ष्याम्यात्मानमव्ययं ।
॥ व्यास उवाच ॥ यथा वै विहिता वृत्तिः पुरस्ताद्ब्रह्मणा स्वयं । एषा पूर्व्वतरैः सद्भिराचीर्णा परमर्षिभिः ।
ब्रह्मचर्य्येण वै लोकान् जयन्ति परमर्षयः । आत्मनश्च ततः श्रेयांस्यन्विच्छन्मनसात्मनि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वने मूलफलाशी च तप्यन सुविपुलं तपः। पुण्यायतनचारी च भूतानामविहिंसकः। ८८३०
विधूमे सन्नमुषले वानप्रस्थप्रतिश्रये। काले प्राप्ते चरन् भैक्षं कल्पते ब्रह्मभूयसे।
निस्तुतिर्निर्नमस्कारः परित्यज्य शुभाशुभे। अरण्ये विचरैकाकी येन केनचिदाशितः।
॥ शुक उवाच ॥ यदिदं वेदवचनं लोकवादे विरुध्यते। प्रमाणे चाप्रमाणे च विरुद्धे शास्त्रता कुतः।
इत्येतच्छ्रोतुमिच्छामि प्रमाणं तूभयं कथं। कर्म्मणामविरोधेन कथं मोक्षः प्रवर्त्तते।
॥ भीष्म उवाच ॥ इत्युक्तः प्रत्युवाचेदं गन्धवत्याः सुतः सुतं। ऋषिस्तत्पूजयन् वाक्यं पुत्त्रस्यामिततेजसः। ८८३५
॥ व्यास उवाच ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः। यथोक्तचारिणः सर्व्वे गच्छन्ति परमां गतिं।
एको वाऽप्याश्रमानेतान् योऽनुतिष्ठेद्यथाविधि। अकामद्वेषसंयुक्तः स परत्र विधीयते।
चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता। एतामारुह्य निःश्रेणीं ब्रह्मलोके महीयते।
आयुषस्तु चतुर्भागं ब्रह्मचार्य्यनसूयकः। गुरौ वा गुरुपुत्त्रे वा वसेद्धर्म्मार्थकोविदः।
जघन्यशायी पूर्व्वं स्यादुत्थाय गुरुवेश्मनि। यच्च शिष्येण कर्त्तव्यं कार्य्यं दासेन वा पुनः। ८८४०
कृतमित्येव तत्सर्व्वं कृत्वा तिष्ठेत पार्श्वतः। किङ्करः सर्व्वकारी स्यात्सर्व्वकर्म्मसु कोविदः।
कर्म्मातिशेषेण गुरावध्येतव्यं बुभूषता। दक्षिणोऽनपवादी स्यादाहूतो गुरुमाश्रयेत्।
शुचिर्दक्षो गुणोपेतो ब्रूयादिष्टमिवान्तरा। चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेन्द्रियः।
नाभुक्तवति चाश्नीयादपीतवति नो पिबेत्। नातिष्ठति तथासीत नासुप्ते प्रस्वपेत च।
उत्तानाभ्याञ्च पाणिभ्यां पादावस्य मृदु स्पृशेत्। दक्षिणं दक्षिणेनैव सव्यं सव्येन पीडयेत्। ८८४५
अभिवाद्य गुरुं ब्रूयादधीष्व भगवन्निति। इदं करिष्ये भगवन्निदञ्चापि कृतं मया।
ब्रह्मंस्तदपि कर्त्ताऽस्मि यद्भवान् वक्ष्यते पुनः। इति सर्व्वमनुज्ञाप्य निवेद्य च यथाविधि।
कुर्य्यात् कृत्वा च तत् सर्व्वमाख्येयं गुरवे पुनः। यांस्तु गन्धान्रसान् वाऽपि ब्रह्मचारी न सेवते।
सेवेत तान् समावृत्त इति धर्म्मेषु निश्चयः। ये केचिद्विस्तरेणोक्ता नियमा ब्रह्मचारिणः।
तान् सर्व्वानाचरेन्नित्यं भवेच्चानपगो गुरोः। स एवं गुरवे प्रीतिमुपहृत्य यथाबलं। ८८५०
आश्रमादाश्रमेष्वेव शिष्यो वर्त्तेत कर्म्मणा। वेदव्रतोपवासेन चतुर्थे चायुषो गते।
गुरवे दक्षिणां दत्त्वा समावर्त्तेद्यथाविधि। धर्म्मलब्धैर्युतो दारैरग्नीनुत्पाद्य यत्नतः।
द्वितीयमायुषो भागं गृहमेधी भवेद्व्रती।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने द्वाचत्वारिंशदधिकद्विशतोऽध्यायः॥ २४२ ॥
॥ व्यास उवाच ॥ द्वितीयमायुषो भागं गृहमेधी गृहे वसेत्। धर्म्मलब्धैर्युतो दारैरग्नीनाहृत्य सुव्रतः।
गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः। कुशूलधान्यः प्रथमः कुम्भधान्यस्त्वनन्तरं। ८८५५
अश्वस्तनोऽथ कापोतीमाश्रितो वृत्तिमाहरेत्। तेषां परः परो ज्यायान् धर्म्मतो धर्म्मजित्तमः।
षट्कर्म्मा वर्त्तयत्येकस्त्रिभिरन्यः प्रवर्त्तते। द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः।
गृहमेधिव्रतान्यत्र महान्तीह प्रचक्षते। नात्मार्थे पाचयेदन्नं न वृथा घातयेत् पशून्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राणी वा यदि वाऽप्राणी संस्कारं यजुषाऽर्हति । न दिवा प्रस्वपेज्जातु न पूर्व्वापररात्रिषु ।
न भुञ्जीतान्तरा काले नानृतावाह्वयेत् स्त्रियं । नास्यानश्नन् गृहे विप्रो वसेत् कश्चिदपूजितः । ८८६०
तथाऽस्यातिथयः पूज्या हव्यकव्यवहाः सदा । वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः ।
स्वधर्म्मजीविनो दान्ताः क्रियावन्तस्तपस्विनः । तेषां हव्यञ्च कव्यञ्चाप्यर्हणार्थं विधीयते ।
नखरैः सम्प्रयातस्य स्वधर्म्मज्ञापकस्य च । अपविद्धाग्निहोत्रस्य गुरोर्व्वालीककारिणः ।
संविभागोऽत्र भूतानां सर्व्वेषामेव शिष्यते । तथैवापचमानेभ्यः प्रदेयं गृहमेधिना ।
विघसाशी भवेन्नित्यं नित्यञ्चामृतभोजनः । अमृतं यज्ञशेषं स्याद्भोजनं हविषा समं । ८८६५
भृत्यशेषन्तु योऽश्नाति तमाहुर्व्विघसाशिनं । विघसं भृत्यशेषन्तु यज्ञशेषमथामृतं ।
स्वदारनिरतो दान्तो ह्यनसूयुर्जितेन्द्रियः । ऋत्विक्पुरोहिताचार्य्यैर्म्मातुलातिथिसंश्रितैः ।
वृद्धबालातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः । मातापितृभ्यां जामीभिर्भ्रात्रा पुत्त्रेण भार्य्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् । एतान् विमुच्य संवादान् सर्व्वपापैर्व्विमुच्यते ।
एतैर्ज्जितस्तु जयति सर्व्वान् लोकान्न संशयः । आचार्य्यो ब्रह्मलोकेशः प्रजापत्ये पिता प्रभुः । ८८७०
अतिथिस्त्विन्द्रलोकस्य देवलोकस्य चर्त्विजः । जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः ।
सम्बन्धिबान्धवा दिक्षु पृथिव्यां मातृमातुलौ । वृद्धबालातुरकृशास्त्वाकाशे प्रभविष्णवः ।
भ्राता ज्येष्ठः समः पित्रा भार्य्या पुत्त्रः स्वका तनुः । छाया स्वा दासवर्गश्च दुहिता कृपणं परं ।
तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः । गृहधर्म्मपरो विद्वान् धर्म्मशीलो जितक्लमः ।
न चार्थबद्धः कर्म्माणि धर्म्मवान् कश्चिदाचरेत् । गृहस्थवृत्तयस्तिस्रस्तासां निःश्रेयसं परं । ८८७५
परं परं तथैवाहुश्चातुराश्रम्यमेव तत् । यथोक्ता नियमास्तेषां सर्व्वं कार्य्यं बुभूषता ।
कुम्भधान्यैरुञ्छशिलैः कापोतीञ्चास्थितास्तथा । यस्मिंश्चैते वसन्त्यर्हास्तद्राष्ट्रमभिवर्द्धते ।
पूर्व्वापरान् दश परान् पुनाति च पितामहान् । गृहस्थवृत्तिश्चाप्येता वर्त्तयेद्यो गतव्यथः ।
स चक्रधरलोकानां सदृशीमाप्नुयाद्गतिं । जितेन्द्रियाणामथ वा गतिरेषा विधीयते ।
स्वर्गलोको गृहस्थानामुदारमनसां हितः । स्वर्गो विमानसंयुक्तो वेददृष्टः सुपुष्पितः । ८८८०
स्वर्गलोको गृहस्थानां प्रतिष्ठा नियतात्मनां । ब्रह्मणा विहिता योनिरेषा यस्माद्विधीयते ।
द्वितीयं क्रमशः प्राप्य स्वर्गलोके महीयते ।
अतः परं परममुदारमाश्रमं तृतीयमाहुस्त्यजतां कलेवरं । वनौकसां गृहपतिनामनुत्तमं शृणुष्व संक्लिष्टशरीरकारिणां ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने त्रिचत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४२ ॥

॥ भीष्म उवाच ॥ प्रोक्ता गृहस्थवृत्तिस्ते विहिता या मनीषिभिः । तदनन्तरमुक्तं यत्तन्निबोध युधिष्ठिर ।
क्रमशस्त्ववधूयैनां तृतीयां वृत्तिमुत्तमां । संयोगव्रतखिन्नानां वानप्रस्थाश्रमौकसां । ८८८५
श्रूयतां पुत्त्र भद्रन्ते सर्व्वलोकाश्रमात्मनां । प्रेक्षापूर्व्वं प्रवृत्तानां पुण्यदेशनिवासिनां ।
॥ व्यास उवाच ॥ गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

 Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तृतीयमायुषो भागं वानप्रस्थाश्रमे वसेत्। तानेवाग्नीन् परिचरेद्यजमानो दिवौकसः।
नियतो नियताहारः षष्ठभक्तो प्रमत्तवान्। तदग्निहोत्रं ता गावो यज्ञाङ्गानि च सर्व्वशः।
अफालकृष्टं ब्रीहियवं नीवारं विघसानि च। हवींषि सम्प्रयच्छेत मखेष्वत्रापि पञ्चसु। ८८८०
वानप्रस्थाश्रमेऽप्येतास्चतस्रो वृत्तयः स्मृताः। सद्यः प्रक्षालकाः केचित् केचिन्मासिकसञ्चयाः।
वार्षिकं सञ्चयं केचित्केचिद्द्वादशवार्षिकं। कुर्व्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थमेव वा।
अभ्रावकाशवर्षासु हेमन्ते जलसंश्रयाः। ग्रीष्मे च पञ्चतपसः शश्वच्च मितभोजनाः।
भूमौ विपरिवर्त्तन्ते तिष्ठन्ति प्रपदैरपि। स्थानासनैर्व्वर्त्तयन्ति सवनेष्वभिषिञ्चते।
दन्तोलूखलिकाः केचिदश्मकुट्टास्तथाऽपरे। शुक्लपक्षे पिबन्त्येके यवागूं क्वथितां सकृत्। ८८८५
कृष्णपक्षे पिबन्त्यन्ये भुञ्जते वा यथागमं। मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः।
वर्त्तयन्ति यथान्यायं वैखानसगतिं श्रिताः। एताश्चान्याश्च विविधा दीक्षास्तेषां मनीषिणां।
चतुर्थश्चौपनिषदो धर्म्मः साधारणः स्मृतः। वानप्रस्थाद्गृहस्थाच्च ततोऽन्यः सम्प्रवर्त्तते।
अस्मिन्नेव युगे तात विप्रैः सर्व्वार्थदर्शिभिः। अगस्त्यः सप्त ऋषयो मधुच्छन्दोऽघमर्षणः।
सांकृतिः सुदिवातण्डिर्यथा वासोऽकृतश्रमः। अहोवीर्य्यस्तथा काव्यस्ताण्ड्यो मेधातिथिर्बुधः। ८९००
बलवान् कर्णनिर्व्वाकः शून्यपालः कृतश्रमः। एवं धर्म्मं कृतवन्तस्ततः स्वर्गमुपागमन्।
तात प्रत्यक्षधर्म्माणस्तथा यायावरा गणाः। ऋषीणामुग्रतपसां धर्म्मनैपुणदर्शिनां।
अन्ये चापरिमेयाश्च ब्राह्मणा वनमाश्रिताः। वैखानसा वालखिल्याः सैकताश्च तथाऽपरे।
कर्म्मभिस्ते निरानन्दा धर्म्मनित्या जितेन्द्रियाः। गताः प्रत्यक्षधर्म्माणस्ते सर्व्वे वनमाश्रिताः।
अनक्षत्रास्त्वनाधृष्या दृश्यन्ते ज्योतिषां गणाः। जरया च परिद्यूनो व्याधिना च प्रपीडितः। ८९०५
चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत्। सद्यस्कारां निरूप्येष्टिं सर्व्ववेदसदक्षिणां।
आत्मयाजी सोऽऽत्मरतिरात्मक्रीडात्मसंश्रयः। आत्मन्यग्नीन् समारोप्य त्यक्त्वा सर्व्वपरिग्रहान्।
सद्यस्कांश्च यजेद्यज्ञानिष्टीश्चैवेह सर्व्वदा। यदेव याजिनां यज्ञादात्मनीज्या प्रवर्त्तते।
त्रींश्चैवाग्नीन् यजेत् सम्यगात्मन्येवात्ममोक्षणात्। प्राणेभ्यो यजुषः पञ्च षट् प्राश्नीयादकुत्सयन्।
केशलोमनखान् वाप्य वानप्रस्थो मुनिस्ततः। आश्रमादाश्रमं पुण्यं पूतो गच्छति कर्म्मभिः। ८९१०
अभयं सर्व्वभूतेभ्यो दत्त्वा यः प्रव्रजेद्द्विजः। लोकास्तेजोमयास्तस्य प्रेत्य चानन्त्यमश्नुते।

सुशीलवृत्तो व्यपनीतकल्मषो न चेह नामुत्र च कर्त्तुमीहते। अरोषमोहो गतसन्धिविग्रहो भवेदुदासीनवदात्मवित्नरः।
यमेषु चैवानुगतेषु न व्यथेत् स्वशास्त्रसूत्राहुतिमन्त्रविक्रमः। भवेद्यथेष्टा गतिरात्मवेदिनि न संशयो धर्म्मपरे जितेन्द्रिये।
ततः परं ज्येष्ठमतीव सद्गुणैरधिष्ठितं त्रीनधिवृत्तिमुत्तमं। चतुर्थमुक्तं परमाश्रमं शृणु प्रकीर्त्त्यमानं परमं परायणं।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः॥ २४४॥

॥ शुक उवाच॥ वर्त्तमानस्तथैवात्र वानप्रस्थाश्रमे यथा। योक्तव्योऽऽत्मा कथं शक्त्या वेद्यं वै काङ्क्षता परं। ८९१५
॥ व्यास उवाच॥ प्राप्य संस्कारमेताभ्यामाश्रमाभ्यां ततः परं। यत् कार्य्यं परमार्थन्तु तदिहैकमनाः शृणु।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

कषायं पाचयित्वाशु श्रेणिस्थानेषु च त्रिषु । प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमं ।
तद्भवानेवमभ्यस्य वर्त्ततां श्रूयतां तथा । एक एव चरेद्धर्म्मं सिद्ध्यर्थमसहायवान् ।
एकश्चरति यः पश्यन्न जहाति न हीयते । अनग्निरनिकेतस्य ग्राममन्नार्थमाश्रयेत् ।
अश्वस्तनविधाता स्यान्मुनिर्भावसमाहितः । लघ्वाशी नियताहारः सकृदन्ननिषेविता । ८९२०
कपालं वृक्षमूलानि कुचेलमसहायता । उपेक्षा सर्व्वभूतानामेतावद्भिक्षुलक्षणं ।
यस्मिन् वाचः प्रविशन्ति कूपं त्रस्ता द्विपा इव । न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ।
नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित् । ब्राह्मणानां विशेषेण नैव ब्रूयात् कथञ्चन ।
यद्ब्राह्मणस्य कुशलं तदेव सततं वदेत् । तूष्णीमासीत निन्दायां कुर्व्वन् भैषज्यमात्मनः ।
येन पूर्णमिवाकाशं भवत्येकेन सर्व्वदा । शून्यं येन जनाकीर्णं तं देवा ब्राह्मणं विदुः । ८९२५
येन केनचिदाच्छन्नो येन केनचिदाशितः । यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः ।
अहेरिव गणाद्भीतः सौहित्यान्नरकादिव । कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ।
न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः । सर्व्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ।
नाभिनन्देत मरणं नाभिनन्देत जीवितं । कालमेव प्रतीक्षेत निदेशं भृतको यथा ।
अनभ्याहतचित्तः स्यादनव्याहतवाग्भवेत् । निर्मुक्तः सर्व्वपापेभ्यो निरमित्रस्य किं भयं । ८९३०
अभयं सर्व्वभूतेभ्यो भूतानामभयं यतः । तस्य मोहाद्विमुक्तस्य भयं नास्ति कुतश्चन ।
यथा नागपदेऽन्यानि पदानि पदगामिनां । सर्व्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं सर्व्वमहिंसायां धर्म्मार्थमपि धीयते । अमृतः स नित्यं वसति यो हिंसां न प्रपद्यते ।
अहिंसकः समः सत्यो धृतिमान्नियतेन्द्रियः । शरण्यः सर्व्वभूतानां गतिमाप्नोत्यनुत्तमां ।
एवं प्रज्ञानतृप्तस्य निर्भयस्य निराशिषः । न मृत्युरतिगो भावः स मृत्युरभिगच्छति । ८९३५
विमुक्तं सर्व्वसङ्गेभ्यो मुनिमाकाशवत् स्थितं । अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ।
जीवितं यस्य धर्म्मार्थं धर्म्मो हर्य्यर्थमेव च । अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ।
निराशिषमनारम्भं निर्नमस्कारमस्तुतिं । निर्म्मुक्तं बन्धनैः सर्व्वैस्तं देवा ब्राह्मणं विदुः ।

सर्व्वाणि भूतानि सुखे रमन्ते सर्व्वाणि दुःखस्य भृशं त्रसन्ते । तेषां भयोत्पादनजातखेदः कुर्य्यान्न कर्म्माणि हि श्रद्दधानः ।

दानं हि भूताभयदक्षिणायाः सर्व्वाणि दानान्यधितिष्ठतीह । तीक्ष्णां तनुं यः प्रथमं जहाति सोऽनन्त्यमाप्नोत्यभयं प्रजाभ्यः ।
८९४०

उत्तानआस्ये न हविर्जुहोति लोकस्य नाभिर्ज्जगतः प्रतिष्ठा । तस्याङ्गमङ्गानि कृताकृतञ्च वैश्वानरः सर्व्वमिदं प्रपेदे ।
प्रादेशमात्रे हृदि निःसृतं यत्तस्मिन् प्राणानात्मयाजी जुहोति । तस्याग्निहोत्रं हुतमात्मसंस्थं सर्व्वेषु लोकेषु सदैवकेषु ।
दैवं त्रिधातुं त्रिवृतं सुपर्णं ये विद्युरग्र्यं परमात्मताञ्च । ते सर्व्वलोकेषु महीयमाना देवाः समर्त्याः सुकृतं वदन्ति ।
वेदांश्च वेद्यन्तु विधिञ्च कृत्स्नमथो निरुक्तं परमार्थताञ्च । सर्व्वं शरीरात्मनि यः प्रवेद तस्यैव देवाः स्पृहयन्ति नित्यं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Jalgaon Equipment Heritage Foundation, Jalgaon

भूम्नावसक्तं दिवि चाप्रमेयं हिरण्मयं योऽण्डजमण्डमध्ये । पतत्रिणं पक्षिणमन्तरीक्षे यो वेद भोग्यात्मनि रश्मिदीप्तः । ८९४५

आवर्त्तमानमजरं विवर्त्तनं षण्णाभिकं द्वादशारं सुपर्व्वं । यस्येदमास्योपरि याति विश्वं तत् कालचक्रं निहितं गुहायां ।

यः सम्प्रसादं जगतः शरीरं सर्व्वान् स लोकानधिगच्छतीह । तस्मिन् हि सन्तर्पयतीह देवांस्ते वै तृप्तास्तर्पयन्त्या स्यमस्य ।

तेजोमयो नित्यमयः पुराणो लोकाननन्तानभयानुपैति । भूतानि यस्मान्न त्रसन्ते कदाचित् स भूतानां न च सते कदाचित् ।

अगर्हणीयो न च गर्हतेऽन्यान् स वै विप्रः परमात्मानमीक्षेत् । निवीतमोहो व्यपनीतकल्मषो न चेह नामुत्र च सोऽन्नमर्च्छति ।

अरोषमोहः समलोष्टकाञ्चनः प्रहीणकोषो गतसन्धिविग्रहः । अपेतनिन्दास्तुतिरप्रियाप्रियश्चरन्नुदासीनवदेष भिक्षुकः । ८९५०

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने पञ्चचत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४५ ॥

॥ व्यास उवाच ॥ प्रकृत्यास्तु विकाराये क्षेत्रज्ञस्तैरधिष्ठितः । न चैनं ते प्रजानन्ति स तु जानाति तानपि ।

तैश्चैवं कुरुते कार्य्यं मनःषष्ठैरिहेन्द्रियैः । सुदान्तैरिव संयन्ता दृढैः परमवाजिभिः ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ।

महतः परमव्यक्तमव्यक्तात् परतोऽमृतं । अमृतान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।

एवं सर्व्वेषु भूतेषु गूढात्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । ८९५५

अन्तरात्मनि संलीय मनःषष्ठानि मेधया । इन्द्रियाणीन्द्रियार्थांश्च वहुचिन्त्यमचिन्तयन् ।

ध्यानेनोपरमं कृत्वा विद्यासम्पादितं मनः । अनीश्वरः प्रशान्तात्मा ततोऽर्च्छत्यमृतं पदं ।

इन्द्रियाणान्तु सर्व्वेषां वश्यात्मा चलितस्मृतिः । आत्मनः सम्प्रदानेन मर्त्त्यो मृत्युमुपाश्नुते ।

आहृत्य सर्व्वसंकल्पान् सत्त्वे चित्तं निवेशयेत् । सत्त्वे चित्तं समाविश्य ततः कालञ्जरो भवेत् ।

चित्तप्रसादेन यतिर्ज्जहातीह शुभाशुभं । प्रसन्नात्मात्मनि स्थित्वा सुखमत्यन्तमश्नुते । ८९६०

लक्षणन्तु प्रसादस्य यथा स्वप्ने सुखं स्वपेत् । निवाते वा यथा दीपो दीप्यमानो न कम्पते ।

एवं पूर्व्वापरे काले युञ्जन्नात्मानमात्मनि । लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मनि ।

रहस्यं सर्व्ववेदानामनैतिह्यमनागमं । आत्मप्रत्ययिकं शास्त्रमिदं पुत्त्रानुशासनं ।

धर्म्माख्यानेषु सर्व्वेषु सत्याख्यानेषु च यद्वसु । दशेदमृक्सहस्राणि निर्मथ्यामृतमुद्धृतं ।

नवनीतं यथा दध्नः काष्ठादग्निर्यथैव च । तथैव विदुषां ज्ञानं पुत्त्रहेतोः समुद्धृत । ८९६५

स्नातकानामिदं शास्त्रं वाच्यं पुत्त्रानुशासनं । तदिदं नाप्रशान्ताय नादान्तायातपस्विने ।

नावेदविदुषे वाच्यं तथा नानुगताय च । नासूयकायानृजवे न चानिर्द्दिष्टकारिणे ।

न तर्कशास्त्रदग्धाय तथैव पिशुनाय च । श्लाघिने श्लाघनीयाय प्रशान्ताय तपस्विने ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इदं प्रियाय पुत्राय शिष्यायानुगताय च । रहस्यधर्म्मं वक्तव्यं नान्यस्मै तु कथञ्चन ।
यद्यप्यस्य महीं दद्याद्रत्नपूर्णामिमां नरः । इदमेव ततः श्रेय इति मन्येत तत्त्ववित् । ८९७०
अतो गुह्यतरार्थं तदध्यात्ममतिमानुषं । यत्तन्महर्षिभिर्दृष्टं वेदान्तेषु च गीयते ।
तत्तेऽहं सम्प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
यच्च ते मनसि वर्त्तते परं यत्र चास्ति तव संशयः क्वचित् । श्रूयतामयमहं तवाग्रतः पुत्र किं हि कथयामि ते पुनः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने षट्चत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४६ ॥

॥ शुक उवाच ॥ अध्यात्मं विस्तरेणेह पुनरेव वदस्व मे । यदध्यात्मं यथा चेदं भगवन्नृषिसत्तम ।
॥ व्यास उवाच ॥ अध्यात्मं यदिदं तात पुरुषस्येह पठ्यते । तत्तेऽहं वर्त्तयिष्यामि तस्य व्याख्यामिमां शृणु । ८९७५
भूमिरापस्तथा ज्योतिर्व्वायुराकाश एव च । महाभूतानि भूतानां सागरस्योर्म्मयो यथा ।
प्रसार्य्येह यथाऽङ्गानि कूर्म्मः संहरते पुनः । तद्वन्महान्ति भूतानि यवीयःसु विकुर्व्वते ।
इति तन्मयमेवेदं सर्व्वं स्थावरजङ्गमं । सर्गे च प्रलये चैव तस्मिन्निर्द्दिश्यते तथा ।
महाभूतानि पञ्चैव सर्व्वभूतेषु भूतकृत् । अकरोत्तात वैषम्यं यस्मिन् यदनुपश्यति ।
॥ शुक उवाच ॥ अकरोद्यच्छरीरेषु कथं तदुपलक्षयेत् । इन्द्रियाणि गुणाः केचित् कथं तानुपलक्षयेत् । ८९८०
॥ व्यास उवाच ॥ एतत्ते वर्त्तयिष्यामि यथावदनुपूर्व्वशः । शृणु तत्त्वमिहैकाग्रो यथातत्त्वं यथा च तत् ।
शब्दः श्रोत्रं तथा खानि त्रयमाकाशसम्भवं । प्राणश्चेष्टास्तथा स्पर्श एते वायुगुणास्त्रयः ।
रूपञ्चक्षुर्व्विपाकश्च त्रिधा ज्योतिर्व्विधीयते । रसोऽथ रसनं स्नेहो गुणास्त्वेते त्रयोऽम्भसः ।
घ्रेयं घ्राणं शरीरञ्च भूमेरेते गुणास्त्रयः । एतावानिन्द्रियग्रामो व्याख्यातः पाञ्चभौतिकः ।
वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमुच्यते । आकाशप्रभवः शब्दो गन्धो भूमिगुणः स्मृतः । ८९८५
मनो बुद्धिः स्वभावश्च त्रय एते स्वयोनिजाः । न गुणानतिवर्त्तन्ते गुणेभ्यः परमागताः ।
यथा कूर्म्म इवाङ्गानि प्रसार्य्य विनियच्छति । एवमेवेन्द्रियग्रामं बुद्धिः सृष्ट्वा नियच्छति ।
यदूर्द्ध्वं पादतलयोरवाङ्मूर्द्ध्नश्च पश्यति । एतस्मिन्नेव कृत्ये तु वर्त्तते बुद्धिरुत्तमा ।
गुणान्नेनीयते बुद्धिर्ब्बुद्धिरेवेन्द्रियाण्यपि । मनःषष्ठानि सर्व्वाणि बुद्ध्यभावे कुतो गुणाः ।
इन्द्रियाणि नरे पञ्च षष्ठन्तु मन उच्यते । सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञं पुनरष्टमं । ८९९०
चक्षुरालोचनायैव संशयं कुरुते मनः । बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ।
रजस्तमश्च सत्त्वञ्च त्रय एते स्वयोनिजाः । समाः सर्व्वेषु भूतेषु तान् गुणानुपलक्षयेत् ।
तत्र यत्प्रीतिसंयुक्तं किञ्चिदात्मनि लक्षयेत् । प्रशान्तमिव संशुद्धं सत्त्वं तदुपधारयेत् ।
यत्तु सन्तापसंयुक्तं काये मनसि वा भवेत् । प्रवृत्तं रज इत्येवं तत्र चाप्युपलक्षयेत् ।
यत्तु संमोहसंयुक्तमव्यक्तविषयं भवेत् । अप्रतर्क्यमविज्ञेयं तमस्तदुपधार्य्यतां । ८९९५
प्रहर्षः प्रीतिरानन्दः साम्यं स्वस्थात्मचित्तता । अकस्माद्यदि वा कस्माद्वर्त्तन्ते सात्त्विका गुणाः ।
अभिमानो मृषावादो लोभो मोहस्तथा क्षमा । लिङ्गानि रजसस्तानि वर्त्तन्ते हेत्वहेतुतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant : Equipment Heritage Foundation, Jalgaon

तथा मोहः प्रमादश्च निद्रा तन्द्रा प्रबोधिता । कथञ्चिदभिवर्त्तन्ते विज्ञेयास्तामसा गुणाः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥

॥ व्यास उवाच ॥ मनो विसृजते भावं बुद्धिरध्यवसायिनी । हृदयं प्रियाप्रिये वेद त्रिविधा कर्म्मचोदना ।
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा परो मतः । ९०००
बुद्धिरात्मा मनुष्यस्य बुद्धिरेवात्मनात्मनि । यदा विकुरुते भावं तदा भवति सा मनः ।
इन्द्रियाणां पृथग्भावाद्बुद्धिर्विक्रियते ह्यतः । शृण्वती भवति श्रोत्रं स्पृशती स्पर्श उच्यते ।
पश्यती भवते दृष्टीरसती रसनं भवेत् । जिघ्रती भवति घ्राणं बुद्धिर्विक्रियते पृथक् ।
इन्द्रियाणि तु तान्याहुस्तेष्वदृश्योऽधितिष्ठति । तिष्ठन्ती पुरुषे बुद्धिस्त्रिषु भावेषु वर्त्तते ।
कदाचिल्लभते प्रीतिं कदाचिदपि शोचति । न सुखेन न दुःखेन कदाचिदिह युज्यते । ९००५
सेयं भावात्मिका भावांस्त्रीनेतानतिवर्त्तते । सरितां सागरो भर्त्ता महावेलामिवोर्म्मिमान् ।
यदा प्रार्थयते किञ्चित्तदा भवति सा मनः । अधिष्ठानानि वै बुद्ध्या पृथगेतानि संस्मरेत् ।
इन्द्रियाण्येव मेध्यानि विजेतव्यानि कृत्स्नशः । सर्व्वाण्येवानुपूर्व्व्येण यद्यदाऽनुविधीयते ।
अविभागगता बुद्धिर्भावैर्मनसि वर्त्तते । ये चैव भावा वर्त्तन्ते सर्व्व एष्वेव ते त्रिषु ।
अन्वर्थाः सम्प्रवर्त्तन्ते रथनेमिमरा इव । प्रदीपार्थं मनः कुर्य्यादिन्द्रियैर्बुद्धिसत्तमैः । ९०१०
निश्चरद्भिर्यथायोगमुदासीनैर्यदृच्छया । एवं स्वभावमेवेदमिति विद्वान्न मुह्यति ।
अशोचन्नप्रहृष्यन् हि नित्यं विगतमत्सरः । न चात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः ।
प्रवर्त्तमानैरनघैर्दुष्करैरकृतात्मभिः । तेषान्तु मनसा रश्मीन् यदा सम्यङ्नियच्छति ।
तदा प्रकाशतेऽस्यात्मा दीपदीप्ता यथाकृतिः । सर्व्वेषामेव भूतानां तमस्यपगते यथा ।
प्रकाशं लभते सर्व्वं तथेदमुपधार्य्यतां । यथा वारिचरः पक्षी न लिप्यति जले चरन् । ९०१५
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते । एवमेव कृतप्रज्ञो न दोषैर्विषयांश्चरन् ।
असज्जमानः सर्व्वेषु कथञ्चन न लिप्यते । त्यक्त्वा पूर्व्वकृतं कर्म्म रतिर्यस्य सदात्मनि ।
सर्व्वभूतात्मभूतस्य गुणवर्गेष्वसज्जतः । सत्त्वमात्मा प्रसरति गुणान्नापि कदाचन ।
न गुणा विदुरात्मानं गुणान् वेद स सर्व्वदा । परिद्रष्टा गुणानाञ्च परिस्रष्टा यथातथं ।
सत्त्वक्षेत्रज्ञयोरेतदन्तरं विद्धि सूक्ष्मयोः । सृजतेऽत्र गुणानेक एको न सृजते गुणान् । ९०२०
पृथग्भूतौ प्रकृत्या तौ सम्प्रयुक्तौ च सर्व्वदा । यथा मत्स्योऽद्भिरन्यः स्यात् संप्रयुक्तौ तथैव तौ ।
मशकोदुम्बरौ वाऽपि सम्प्रयुक्तौ यथा सह । इषीका वा यथा मुञ्जे पृथक् च सह चैव च ।
तथैव सहितावेतावन्योन्यस्मिन् प्रतिष्ठितौ ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥

॥ व्यास उवाच ॥ सृजते तु गुणान् सत्त्वं क्षेत्रज्ञस्त्वनुतिष्ठति । गुणान् विक्रियतः सर्व्वानुदासीनवदीश्वरः ।
स्वभावयुक्तं तत्सर्व्वं यदिमान् सृजते गुणान् । ऊर्णनाभिर्यथा सूत्रं सृजते तद्गुणांस्तथा । ९०२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रध्वस्ता न निवर्त्तन्ते प्रवृत्तिर्नोपलभ्यते। एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे।
उभयं सम्प्रधार्य्यैतदध्यवस्येद्यथामति। अनेनैव विधानेन भवेदात्माश्रयो महान्।
अनादिनिधनो ह्यात्मा तं बुद्ध्वा विचरेन्नरः। अक्रुध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः।
इत्येवं हृदयग्रन्थिं बुद्धिचिन्तामयं दृढं। अनित्यं सुखमासीत अशोचंश्छिन्नसंशयः।
ताम्येयुः प्रच्युताः पृथ्व्या यथा पूर्णां नदीं नराः। अवगाढा ह्यविद्वांसो विद्धि लोकमिमं तथा। ९०३०
न तु ताम्यति वै विद्वान् स्थले चरति तत्त्ववित्। एवं यो विन्दते त्मानं केवलं ज्ञानमात्मनः।
एवं बुद्ध्वा नरः सर्व्वं भूतानामागतिं गतिं। समवेक्ष्य च वैषम्यं लभते शममुत्तमं।
एतद्वै जन्मसामर्थ्यं ब्राह्मणस्य विशेषतः। आत्मज्ञानं शमश्चैव पर्य्याप्तं तत्परायणं।
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणं। विज्ञायैतद्विमुच्यन्ते कृतकृत्या मनीषिणः।
न भवति विदुषां महद्भयं यदविदुषां महद्भयं परत्र। न हि गतिरधिकाऽस्ति कस्यचिद्भवति हि या विदुषः
सनातनो। ९०३५
लोकमातुरमसूयते जनस्तत्तदेव च निरीक्ष्य शोचते। तत्र पश्य कुशलानशोचतो ये विदुस्तदुभयं कृताकृतं।
यत्करोत्यनभिसन्धिपूर्व्वकं तच्च निर्नुदति यत्पुरा कृतं। न प्रियं तदुभयं न चाप्रियं तस्य तज्जनयतीह कुर्व्वतः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने ऊनपञ्चाशदधिकद्विशतोऽध्यायः ॥ २४९ ॥
॥ शुक उवाच ॥ यस्माद्धर्म्मात्परो धर्म्मो विद्यते नेह कश्चन। यो विशिष्टश्च धर्म्मेभ्यस्तं भवान् प्रब्रवीतु मे।
॥ व्यास उवाच ॥ धर्म्मन्ते सम्प्रवक्ष्यामि पुराणमृषिभिः कृतं। विशिष्टं सर्व्वधर्म्मेभ्यस्तमिहैकमनाः शृणु।
इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः। सर्व्वतो निष्पतिष्णूनि पिता बालानिवात्मजान्। ९०४०
मनसश्चेन्द्रियाणाञ्चाप्यैकाग्र्यं परमं तपः। तज्ज्यायः सर्व्वधर्म्मेभ्यः स धर्म्मः पर उच्यते।
तानि सर्व्वाणि सन्धाय मनःषष्ठानि मेधया। आत्मतृप्त इवासीत बहुचिन्त्यमचिन्तयन्।
गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्मनि। तदा त्वमात्मनात्मानं परं द्रक्ष्यसि शाश्वतं।
सर्व्वात्मानं महात्मानं विधूममिव पावकं। तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः।
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः। आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलं। ९०४५
एवमात्मा न जानीते क्व गमिष्ये कुतस्त्वहं। अन्यो ह्यात्माऽन्तरात्माऽस्ति यः सर्व्वमनुपश्यति।
ज्ञानदीपेन दीप्तेन पश्यत्यात्मानमात्मना। दृष्ट्वा त्वमात्मनात्मानं निरात्मा भव सर्व्ववित्।
विमुक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः। परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः।
सर्व्वतःस्रोतसं घोरां नदीं लोकप्रवाहिणीं। पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसं।
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपां। सत्यतीर्थामृतक्षोभां क्रोधपङ्कां सरिद्वरां। ९०५०
अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः। प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलां।
संसारसागरगमां योनिपातालदुस्तरां। आत्मजन्मोद्भवां तात जिह्वावर्त्तां दुरासदां।
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः। तां तीर्णः सर्व्वतो मुक्तो विधूतात्मात्मविच्छुचिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उत्तमां बुद्धिमास्थाय ब्रह्मभूयान् भविष्यसि । सन्तीर्णः सर्व्वसंसारात् प्रसन्नात्मा विकल्मषः ।
भूमिष्ठानीव भूतानि पर्व्वतस्थो निशामय । अक्रुध्यन्नप्रहृष्यंश्च न नृशंसमतिस्तथा । ९०५५
ततो द्रक्ष्यसि सर्व्वेषां भूतानां प्रभवाप्ययौ । एवं वै सर्व्वभूतेभ्यो विशिष्टं मेनिरे बुधाः ।
धर्म्मं धर्म्मभृतां श्रेष्ठा मुनयस्तत्त्वदर्शिनः । आत्मनो व्यापिनो ज्ञानमिदं पुत्रानुशासनं ।
प्रयताय प्रवक्तव्यं हितायानुगताय च । आत्मज्ञानमिदं गुह्यं सर्व्वगुह्यतमं महत् ।
अब्रुवं यदहं तात आत्मसाक्षिकमञ्जसा । नैव स्त्री न पुमानेतन्नैव चेदं नपुंसकं ।
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकं । नैतज्ज्ञात्वा पुमान् स्त्री वा पुनर्भवमवाप्नुते । ९०६०
अभवप्रतिपत्त्यर्थमेतद्धर्म्मं विधीयते । यथा मतानि सर्व्वाणि यथैतानि यथा तथा ।
कथितानि मया पुत्र भवन्ति न भवन्ति च ।
त्वत्प्रीतियुक्तेन गुणान्वितेन पुत्रेण सत्पुत्र दमान्वितेन । पृष्टो हि सम्प्रीतमना यथार्थं ब्रूयात् सुतस्येह यदुक्तमेतत् ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने पञ्चाशदधिकद्विशतोऽध्यायः ॥ २५० ॥

॥ व्यास उवाच ॥ गन्धान् रसान्नानुरुन्ध्यात् सुखं वा नालङ्कारांश्चाप्नुयात्तस्य तस्य । मानञ्च कीर्त्तिञ्च यशश्च नेच्छेत् स वै
प्रचारः पश्यतो ब्राह्मणस्य ।
सर्व्वान् वेदानधीयीत शुश्रूषुर्ब्रह्मचर्य्यवान् । ऋचो यजूंषि सामानि यो वेद न स वै द्विजः । ९०६५
ज्ञातिवत् सर्व्वभूतानां सर्व्ववित् सर्व्ववेदवित् । नाकामो म्रियते जातु न तेन न च वै द्विजः ।
इष्टीश्च विविधाः प्राप्य क्रतूंश्चैवाप्तदक्षिणान् । प्राप्नोति नैव ब्राह्मण्यमविधानात् कथञ्चन ।
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति । यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ।
यदा न कुरुते भावं सर्व्वभूतेषु पापकं । कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ।
कामबन्धनमेवैकं नान्यदस्तीह बन्धनं । कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते । ९०७०
कामतो मुच्यमानस्तु धूम्राभ्रादिव चन्द्रमाः । विरजाः कालमाकाङ्क्षन् धीरो धैर्य्येण वर्त्तते ।
आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत् कामा यं प्रविशन्ति सर्व्वे स शान्तिमाप्नोति न
कामकामः ।
स कामकान्तो न तु कामकामः स वै कामात् स्वर्गमुपैति देही ।
वेदस्योपनिषत् सत्यं सत्यस्योपनिषद्दमः । दमस्योपनिषद्दानं दानस्योपनिषत्तपः ।
तपसोपनिषत्त्यागस्त्यागस्योपनिषत् सुखं । सुखस्योपनिषत् स्वर्गः स्वर्गस्योपनिषच्छमः । ९०७५
क्लेदनं शोकमनसोः सन्तापं तृष्णया सह । सत्त्वमिच्छसि सन्तोषाच्छान्तिलक्षणमुत्तमं ।
विशोको निर्म्ममः शान्तः प्रसन्नात्मा विमत्सरः । षड्भिर्लक्षणवानेतैः समग्रः पुनरेष्यति ।
षड्भिः सत्त्वगुणोपेतैः प्राज्ञैरधिगतं त्रिभिः । ये विदुः प्रेत्य चात्मानमिहस्थं तं गुणं विदुः ।
अकृत्रिममसंहार्य्यं प्राकृतं निरुपस्कृतं । अध्यात्मं सुकृतं प्राप्तः सुखमव्ययमश्नुते ।
निष्प्रचारं मनः कृत्वा प्रतिष्ठाप्य च सर्व्वशः । यामयं लभते तुष्टिं सा न शक्यात्मनोऽन्यथा । ९०८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येन तृप्यत्यभुञ्जानो येन तृप्यत्यवित्तवान् । येनास्नेहो बलं धत्ते यस्तं वेद स वेदवित् ।
संगुप्तान्यात्मनो द्वाराण्यपिधाय विचिन्तयन् । यो ह्यास्ते ब्राह्मणः शिष्टः स आत्मरतिरुच्यते ।
समाहितं परे तत्त्वे क्षीणकाममवस्थितं । सर्व्वतः सुखमन्वेति वपुश्चान्द्रमसं यथा ।
अविशेषाणि भूतानि गुणांश्च जहतो मुनेः । सुखेनापोह्यते दुःखं भास्करेण तमो यथा ।
तमतिक्रान्तकर्म्माणमतिक्रान्तगुणक्षयं । ब्राह्मणं विषयाश्लिष्टं जरामृत्यू न विन्दतः । ९०८५
स यदा सर्व्वतो मुक्तः समः पर्य्यवतिष्ठते । इन्द्रियाणीन्द्रियार्थांश्च शरीरस्थोऽतिवर्त्तते ।
कारणं परमं प्राप्य अतिक्रान्तस्य कार्य्यतां । पुनरावर्त्तनं नास्ति सम्प्राप्तस्य परं पदं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥
॥ व्यास उवाच ॥ द्वन्द्वानि मोक्षजिज्ञासुरर्थधर्म्मावनुष्ठितः । वक्त्रा गुणवता शिष्यः श्राव्यपूर्व्वमिदं महत् ।
आकाशं मारुतो ज्योतिरापः पृथ्वी च पञ्चमी । भावाभावौ च कालश्च सर्व्वभूतेषु पञ्चसु ।
अन्तरात्मकमाकाशं तन्मयं श्रोत्रमिन्द्रियं । तस्य शब्दं गुणं विद्यान्मूर्त्तिशास्त्रविधानवित् । ९०९०
चरणं मारुतात्मेति प्राणापानौ च तन्मयौ । स्पर्शनञ्चेन्द्रियं विद्यात्तथा स्पर्शञ्च तन्मयं ।
तापः पाकः प्रकाशश्च ज्योतिश्चक्षुश्च पञ्चमं । तस्य रूपं गुणं विद्यात्ताम्रगौरासितात्मकं ।
प्रक्लेदः क्षुद्रता स्नेह इत्यपामुपदिश्यते । असृङ्मज्जा च यच्चान्यत् स्निग्धं विद्यात्तदात्मकं ।
रसनञ्चेन्द्रियं जिह्वा रसश्चापां गुणो मतः । सङ्घातः पार्थिवो धातुरस्थिदन्तनखानि च ।
श्मश्रु रोम च केशाश्च शिरा स्नायु च चर्म्म च । इन्द्रियं घ्राणसंज्ञातं नासिकेत्यभिसंज्ञिका । ९०९५
गन्धश्चैवेन्द्रियार्थोऽयं विज्ञेयः पृथिवीमयः । उत्तरेषु गुणाः सन्ति सर्व्वसत्त्वेषु चोत्तराः ।
पञ्चानां भूतसङ्घानां सन्ततिं मुनयो विदुः । मनो नवममेषान्तु बुद्धिस्तु दशमी स्मृता ।
एकादशस्त्वनन्तात्मा स सर्व्वः पर उच्यते । व्यवसायात्मिका बुद्धिर्मनो व्याकरणात्मकं ।
कर्म्मानुमानाद्विज्ञेयः स जीवः क्षेत्रसंज्ञकः । एभिः कालात्मकैर्भावैर्यः सर्व्वैः सर्व्वमन्वितं ।
पश्यत्यकलुषं कर्म्म स मोहं नानुवर्त्तते । ९१००
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥
॥ व्यास उवाच ॥ शरीराद्विप्रमुक्तं हि सूक्ष्मभूतं शरीरिणं । कर्म्मभिः परिपश्यन्ति शास्त्रोक्तैः शास्त्रवेदिनः ।
यथा मरीच्यः सहिताश्चरन्ति सर्व्वत्र तिष्ठन्ति च दृश्यमानाः । देहैर्व्विमुक्ता विचरन्ति लोकांस्तथैव सत्त्वान्यतिमानुषाणि ।
प्रतिरूपं यथैवाप्सु तापः सूर्य्यस्य लक्ष्यते । सत्त्ववत्तु तथा सत्त्वं प्रतिरूपं स पश्यति ।
तानि सूक्ष्माणि सत्त्वानि विमुक्तानि शरीरतः । स्वेन सत्त्वेन सत्त्वज्ञाः पश्यन्ति नियतेन्द्रियाः ।
स्वपतां जाग्रताञ्चैव सर्व्वेषामात्मचिन्तितं । प्रधानाद्वैधमुक्तानां जहतां कर्म्मजं रजः । ९१०५
यथाऽहनि तथा रात्रौ यथा रात्रौ तथाऽहनि । वशे तिष्ठति सत्त्वात्मा सततं योगयोगिनां ।
तेषां नित्यं सदा नित्यो भूतात्मा सततं गुणैः । सप्तभिस्त्वन्वितः सूक्ष्मैश्चरिष्णुरजरामरः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनोबुद्धिपराभूतः स्वदेहपरदेहवित्। स्वप्नेष्वपि भवत्येष विज्ञाता सुखदुःखयोः।
तत्रापि लभते दुःखं तत्रापि लभते सुखं। क्रोधलोभौ तु तत्रापि कृत्वा व्यसनमर्च्छति।
प्रीणितश्चापि भवति महतोऽर्थानवाप्य हि। करोति पुण्यं तत्रापि जीवन्निव च पश्यति।
अहोरात्रान्तर्गतश्चापि गर्भत्वं समुपेयिवान्। दश मासान् वसन् कुक्षौ नैषोऽन्नमिव जीर्य्यते।
तमेतमतितेजोऽंशं भूतात्मानं हृदि स्थितं। तमोरजोभ्यामाविष्टा नानुपश्यन्ति मूर्त्तिषु।
योगशास्त्रपरा भूत्वा तमात्मानं परीप्सवः। अनुच्छ्वासान्यमूर्त्तानि यानि वज्रोपमान्यपि।
पृथग्भूतेषु सृष्टेषु चतुर्थाश्रमकर्म्मसु। समाधौ योगमेवैतच्छाण्डिल्यः शममब्रवीत्।
विदित्वा सप्त सूक्ष्माणि षडङ्गञ्च महेश्वरं। प्रधानविनियोगस्थं परं ब्रह्मानुपश्यति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने त्रिपञ्चाशदधिकद्विशततोऽध्यायः॥ २५३ ॥
॥ व्यास उवाच ॥ हृदि कामद्रुमश्चित्रो मोहसञ्चयसम्भवः। क्रोधमानमहास्कन्धो विधित्सापरिषेचनः।
तस्य चाज्ञानमाधारः प्रमादः परिषेचनं। सोऽभ्यसूयापलाशो हि पुरा दुष्कृतसारवान्।
सम्मोहचिन्ताविटपः शोकशाखो भयाङ्कुरः। मोहनीभिः पिपासाभिर्लताभिरनुवेष्टितः।
उपासते महावृक्षं सुलुब्धास्तत्फलेप्सवः। आयासैः संयुताः पाशैः फलदं परिवेष्ट्य तं।
यस्तान् पाशान् वशे कृत्वा तं वृक्षमपकर्षति। गतः स दुःखयोरन्तं त्यज्यमानस्तयोर्द्वयोः।
संरोहत्यकृतप्रज्ञः सदा येन हि पादपं। स तमेव ततो हन्ति विषग्रन्थिरिवातुरं।
तस्यानुगतमूलस्य मूलमुद्ध्रियते बलात्। योगप्रसादात् कृतिना साम्येन परमासिना।
एवं यो वेद कामस्य केवलस्य निवर्त्तनं। बन्धं वै कामशास्त्रस्य स दुःखान्यतिवर्त्तते।
शरीरं पुरमित्याहुः स्वामिनी बुद्धिरिष्यते। तत्त्वबुद्धेः शरीरस्थं मनो नामार्थचिन्तकं।
इन्द्रियाणि मनः पौरास्तदर्थन्तु परा कृतिः। तत्र द्वौ दारुणौ दोषौ तमो नाम रजस्तथा।
तदर्थमुपजीवन्ति पौराः सह पुरेश्वरैः। अद्वारेण तमेवार्थं द्वौ दोषावुपजीवतः।
तत्र बुद्धिर्हि दुर्द्धर्षा मनः सामान्यमुच्यते। पौराश्चापि मनस्त्रस्तास्तेषामपि चला स्थितिः।
यदर्थं बुद्धिरध्यास्ते सोऽनर्थः परिषीदति। यदर्थं पृथगध्यास्ते मनस्तत् परिसीदति।
पृथग्भूतं मनो बुद्ध्या मनो भवति केवलं। तत्रैनं विवृतं शून्यं रजः पर्य्यवतिष्ठते।
तन्मनः कुरुते सख्यं रजसा सह सङ्गतं। तच्चादाय जनं पौरं रजसे संप्रयच्छति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने चतुःपञ्चाशदधिकद्विशततोऽध्यायः॥ २५४ ॥
॥ भीष्म उवाच ॥ भूतानां परिसङ्ख्यानं भूयः पुत्त्र निशामय। द्वैपायनमुखाद्भ्रष्टं श्लाघया परयाऽनघ।
दीप्तानलनिभः प्राह भगवान्धूमवर्च्चसे। ततोऽहमपि वक्ष्यामि भूयः पुत्त्र निदर्शनं।
भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता। गन्धो गुरुत्वं शक्तिश्च संघातस्थापना धृतिः।
अपां शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता। जिह्वा विस्यन्दनञ्चापि भौमानां श्रपणं तथा।
अग्नेर्दुर्द्धर्षता ज्योतिस्तापः पाकः प्रकाशनं। शोको रोगो लघुत्वञ्च तैक्ष्ण्यं सततञ्चोर्द्ध्वभासिता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

वायोरनियमस्पर्शो वादस्थानं स्वतन्त्रता । बलं शैघ्र्यञ्च मोक्षञ्च कर्म्मचेष्टात्मता भवः ।
आकाशस्य गुणः शब्दो व्यापित्वं छिद्रताऽपि च । अनाश्रयमनालम्बमव्यक्तमविकारिता ।
अप्रतीघातिता चैव भूतत्वं विकृतानि च । गुणाः पञ्चाशतं प्रोक्ताः पञ्चभूतात्मभाविताः ।
धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा । सदसच्चाशुता चैव मनसो नव वै गुणाः ।
इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता । संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः । ९१४०
॥ युधिष्ठिर उवाच ॥ कथं पञ्चगुणा बुद्धिः कथं पञ्चेन्द्रिया गुणाः । एतन्मे सर्व्वमाचक्ष्व सूक्ष्मज्ञानं पितामह ।
॥ भीष्म उवाच ॥ आहुः षष्टिं बुद्धिगुणान् वै भूतविशिष्टा नित्यविषक्ताः । भूतविभूतीश्चाक्षरसृष्टाः पुत्त्र न नित्यं तदिह वदन्ति ।
तत् पुत्त्र चिन्ताकलिलं तदुक्तमनागतं वै तव सम्प्रतीह । भूतार्थतत्त्वं तदवाप्य सर्व्वं भूतप्रभावाद्भव शान्तबुद्धिः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकानुप्रश्ने पञ्चपञ्चाशदधिकद्विशततोऽध्यायः ॥ २५५ ॥
॥ युधिष्ठिर उवाच ॥ य इमे पृथिवीपालाः शेरते पृथिवीतले । पृतनामध्य एते हि गतसंज्ञा महाबलाः ।
एकैकशो भीमबला नागायुतबलास्तथा । एते हि निहताः सङ्ख्ये तुल्यतेजोबलैर्नरैः । ९१४५
नैषां पश्यामि हन्तारं प्राणिनां संयुगे परं । विक्रमेणोपसम्पन्नास्तेजोबलसमन्विताः ।
अथ चेमे महाप्राज्ञाः शेरते हि गतासवः । मृता इति च शब्दोऽयं वर्त्तत्येषु गतासुषु ।
इमे मृता नृपतयः प्रायशो भीमविक्रमाः । तत्र मे संशयो जातः कुतः संज्ञा मृता इति ।
कस्य मृत्युः कुतो मृत्युः केन मृत्युरिह प्रजाः । हरत्यमरसंकाश तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ पुरा कृतयुगे तात राजासीदनुकम्पकः । स शत्रुवशमापन्नः संग्रामे क्षीणवाहनः । ९१५०
तस्य पुत्त्रो हरिर्नाम नारायणसमो बले । स शत्रुभिर्हतः सङ्ख्ये सबलः सपदानुगः ।
स राजा शत्रुवशगः पुत्त्रशोकसमन्वितः । यदृच्छया शान्तिपरो ददर्श भुवि नारदं ।
तस्मै स सर्व्वमाचष्ट यथा वृत्तं जनेश्वरः । शत्रुभिर्ग्रहणं सङ्ख्ये पुत्त्रस्य मरणं तथा ।
तस्य तद्वचनं श्रुत्वा नारदोऽथ तपोधनः । आख्यानमिदमाचष्ट पुत्त्रशोकापहं तदा ।
॥ नारद उवाच ॥ राजन् शृणु समाख्यानमद्येदं बहुविस्तरं । यथा वृत्तं श्रुतञ्चैव मयेदं वसुधाधिप । ९१५५
प्रजाः सृष्ट्वा महातेजाः प्रजासर्गे पितामहः । अतीव वृद्धा बहुला नामृष्यत पुनः प्रजाः ।
न ह्यन्तरमभूत् किञ्चित् क्वचिज्जन्तुभिरच्युत । निरुच्छ्वासमिवोन्नद्धं त्रैलोक्यमभवन्नृप ।
तस्य चिन्ता समुत्पन्ना संहारं प्रति भूपते । चिन्तयन्नाध्यगच्छच्च संहारे हेतुकारणं ।
तस्य रोषान्महाराज खेभ्योऽग्निरुदतिष्ठत । तेन सर्व्वा दिशो राजन्ददाह स पितामहः ।
ततो दिवं भुवं खञ्च जगच्च सचराचरं । ददाह पावको राजन् भगवत्कोपसम्भवः । ९१६०
तत्रादह्यन्त भूतानि जङ्गमानि ध्रुवाणि च । महता क्रोधवेगेन कुपिते प्रपितामहे ।
ततो हरिजटः स्थाणुर्वेदाध्वरपतिः शिवः । जगाम शरणं देवो ब्रह्माणं परवीरहा ।
तस्मिन्नभिगते स्थाणौ प्रजानां हितकाम्यया । अब्रवीत् परमो देवो ज्वलन्निव तदा शिवं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

करवाण्यद्य कं कामं वरार्होऽसि मतो मम। कर्त्ता ह्यस्मि प्रियं शम्भो तव यद्धृदि वर्त्तते।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि प्रजापतिसंवादे सप्तपञ्चाशदधिकद्विशततोऽध्यायः॥ २५७॥

॥ स्थाणुरुवाच॥ प्रजासर्गनिमित्तं मे कार्य्यवत्तामिमां प्रभो। विद्धि सृष्टास्त्वया हीमा मा कुप्यासां पितामह।
तव तेजोऽग्निना देव प्रजा दह्यन्ति सर्व्वशः। ता दृष्ट्वा मम कारुण्यं मा कुप्यासां जगत्प्रभो।
॥ प्रजापतिरुवाच॥ न कुप्ये न च मे कामो न भवेयुः प्रजा इति। लाघवार्थं धरण्यास्तु ततः संहार इष्यते।
इयं हि मां सदा देवी भारार्त्ता समचोदयत्। संहारार्थं महादेव भारेणाप्सु निमज्जती।
यदाऽहं नाधिगच्छामि बुद्ध्या बहु विचारयन्। संहारमासां वृद्धानां ततो मां क्रोध आविशत्।
॥ स्थाणुरुवाच॥ संहारार्थं प्रसीदस्व मा क्रुधो विबुधेश्वर। मा प्रजाः स्थावरञ्चैव जङ्गमञ्च व्यनीनशन्।
पल्वलानि च सर्व्वाणि सर्व्वञ्चैव तृणोलपं। स्थावरं जङ्गमञ्चैव भूतग्रामं चतुर्विधं।
तदेतद्भस्मसाद्भूतं जगत् सर्व्वमुपप्लुतं। प्रसीद भगवन् साधो वर एष वृतो मया।
नष्टा न पुनरेष्यन्ति प्रजा ह्येताः कथञ्चन। तस्मान्निवर्त्ततामेतत्तेन स्वेनैव तेजसा।
उपायमन्यं सम्पश्य भूतानां हितकाम्यया। यथाऽमी जन्तवः सर्व्वे न दह्येरन् पितामह।
अभावं हि न गच्छेयुरुच्छिन्नप्रजनाः प्रजाः। अधिदैवे नियुक्तोऽस्मि त्वया लोकेश्वरेश्वर।
तद्भवं हि जगन्नाथ एतत् स्थावरजङ्गमं। प्रसाद्य त्वां महादेव याचाम्यावृत्तिजाः प्रजाः।
॥ नारद उवाच॥ श्रुत्वा तु वचनं देवः स्थाणोर्नियतवाङ्मनाः। तेजस्तत् संनिजग्राह पुनरेवान्तरात्मनि।
ततोऽग्निमुपसंगृह्य भगवान् लोकपूजितः। प्रवृत्तिञ्च निवृत्तिञ्च कल्पयामास वै प्रभुः।
उपसंहरतस्तस्य तमग्निं रोषजं तदा। प्रादुर्ब्बभूव विश्वेभ्यः खेभ्यो नारी महात्मनः।
कृष्णरक्ताम्बरधरा कृष्णनेत्रतलान्तरा। दिव्यकुण्डलसंपन्ना दिव्याभरणभूषिता।
सा विनिःसृत्य वै खेभ्यो दक्षिणामाश्रिता दिशं। ददृशाते च तां कन्यां देवौ विश्वेश्वरावुभौ।
तामाहूय तदा देवो लोकानामादिरीश्वरः। मृत्यो इति महीपाल जहि चेमाः प्रजा इति।
त्वं हि संहारबुद्ध्या मे चिन्तिता रुषितेन च। तस्मात् संहर सर्व्वास्त्वं प्रजाः सजडपण्डिताः।
अविशेषेण चैव त्वं प्रजाः संहर कामिनि। मम त्वं हि नियोगेन श्रेयः परमवाप्स्यसि।
एवमुक्ता तु सा देवी मृत्युः कमलमालिनी। प्रदध्यौ दुःखिता बाला साश्रुपातमतीव च।
पाणिभ्याञ्चैव जग्राह तान्यश्रूणि जनेश्वर। मानवानां हितार्थाय ययाचे पुनरेव ह।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मृत्युप्रजापतिसंवादे अष्टपञ्चाशदधिकद्विशततोऽध्यायः॥ २५८॥

॥ नारद उवाच॥ विनीय दुःखमबला सात्मनैवायतेक्षणा। उवाच प्राञ्जलिर्भूत्वा तमेवावर्ज्जिता तदा।
त्वया सृष्टा कथं नारी मादृशी वदताम्वर। रौद्रकर्म्माऽभिजायेत सर्व्वप्राणिभयङ्करी।
बिभेम्यहमधर्म्मस्य धर्म्म्यमादिश कर्म्म मे। त्वं मां भीतामवेक्षस्व शिवेनेक्षस्व चक्षुषा।
बालान् वृद्धान् वयस्थांश्च न हरेयमनागसः। प्राणिनः प्राणिनामीश नमस्तेऽस्तु प्रसीद मे।
प्रियान् पुत्त्रान् वयस्यांश्च भ्रातॄन् मातॄः पितॄनपि। अपध्यास्यन्ति यद्येवं मृतास्तेषां बिभेम्यहं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृपणाश्रुपरिक्लेदो दहेत्मां शाश्वतीः समाः । तेभ्योऽहं बलवद्भीता शरणं त्वामुपागता ।
यमस्य भवने देव पात्यन्ते पापकर्म्मिणः । प्रसादये त्वां वरदं प्रसादं कुरु मे प्रभो ।
एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह । इच्छेयं त्वत्प्रसादार्थं तपस्तप्तुं महेश्वर ।
॥ पितामह उवाच ॥ मृत्यो सङ्कल्पिता मे त्वं प्रजाः संहारहेतुना । गच्छ संहर सर्व्वास्त्वं प्रजा मा च विचारय । ९१९५
एतदेवमवश्यं हि भविता नैतदन्यथा । क्रियतामनवद्याङ्गि यथोक्तं मद्वचोऽनघे ।
एवमुक्ता महाबाहो मृत्युः परपुरञ्जय । न व्याजहार तस्थौ च प्रह्वा भगवदुन्मुखी ।
पुनः पुनरथोक्ता सा गतसत्त्वेव भामिनी । तूष्णीमासीत्ततो देवो देवानामीश्वरेश्वरः ।
प्रससाद किल ब्रह्मा स्वयमेवात्मनात्मनि । स्मयमानश्च लोकेशो लोकान् सर्व्वानवैक्षत ।
निवृत्तरोषे तस्मिंस्तु भगवत्यपराजिते । सा कन्याऽथ जगामास्य समीपादिति नः श्रुतं । ९२००
अपसृत्याप्रतिश्रुत्य प्रजासंहरणं तदा । त्वरमाणेव राजेन्द्र मृत्युर्धेनुकमभ्यगात् ।
सा तत्र परमं देवी तपोऽचरत दुश्चरं । समा ह्येकपदे तस्थौ दश पद्मानि पञ्च च ।
तां तथा कुर्व्वतीं तत्र तपः परमदुश्चरं । पुनरेव महातेजा ब्रह्मा वचनमब्रवीत् ।
कुरुष्व मे वचो मृत्यो तदनादृत्य सत्वरा । तथैवैकपदे तात पुनरन्यानि सप्त सा ।
तस्थौ पद्मानि षट् चैव पञ्च द्वे चैव मानद । भूयः पद्मायुतं तात मृगैः सह चचार सा । ९२०५
द्वे चायुते नरश्रेष्ठ वाय्वाहारा महामते । पुनरेव ततो राजन् मौनमातिष्ठदुत्तमं ।
अप्सु वर्षसहस्राणि सप्त चैकञ्च पार्थिव । ततो जगाम सा कन्या कौशिकीं नृपसत्तम ।
तत्र वायुजलाहारा चचार नियमं पुनः । ततो ययौ महाभागा गङ्गां मेरुञ्च केवलं ।
तस्थौ दार्व्विव निश्चेष्टा प्रजानां हितकाम्यया । ततो हिमवतो मूर्द्ध्नि यत्र देवाः समीजिरे ।
तत्राङ्गुष्ठेन राजेन्द्र निखर्व्वमपरं ततः । तस्थौ पितामहञ्चैव तोषयामास यत्नतः । ९२१०
ततस्तामब्रवीत्तत्र लोकानां प्रभवाप्ययः । किमिदं वर्त्तते पुत्त्रि क्रियतां मम तद्वचः ।
ततोऽब्रवीत् पुनर्मृत्युर्भगवन्तं पितामहं । न हरेयं प्रजा देव पुनस्त्वाहं प्रसादये ।
तामधर्म्मभयाद्भीतां पुनरेव प्रयाचतीं । तदाऽब्रवीद्देवदेवो निगृह्येदं वचस्ततः ।
अधर्म्मो नास्ति ते मृत्यो संयच्छेमाः प्रजाः शुभे । मया ह्युक्तं मृषा भद्रे भविता नेह किञ्चन ।
धर्म्मः सनातनश्च त्वामिहैवानुप्रवेक्ष्यति । अहञ्च विबुधाश्चैव तद्धिते निरताः सदा । ९२१५
इममन्यञ्च ते कामं ददामि मनसेप्सितं । न त्वां दोषेण यास्यन्ति व्याधिसम्पीडिताः प्रजाः ।
पुरुषेषु स्वरूपेण पुरुषस्त्वं भविष्यसि । स्त्रीषु स्त्रीरूपिणी चैव तृतीयेषु नपुंसकं ।
सैवमुक्ता महाराज कृताञ्जलिरुवाच ह । पुनरेव महात्मानं नेति देवेशमव्ययं ।
तामब्रवीत्तदा देवो मृत्यो संहर मानवान् । अधर्म्मस्ते न भविता तथा ध्यास्याम्यहं शुभे ।
यानश्रुबिन्दून् पतितानपश्यं ये पाणिभ्यां धारितास्ते पुरस्तात् । ते व्याधयो मानवान् घोररूपाः प्राप्ते काले कालयिष्यन्ति मृत्यो । ९२२०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वेषां त्वं प्राणिनामन्तकाले कामक्रोधौ सहितौ योजयेथाः । एवं धर्म्मस्त्वामुपैष्यत्यमेयो न चाधर्म्मं लप्स्यसे तुल्य
वृत्तिः ।

एवं धर्म्मं पालयिष्यस्यथो त्वं न चात्मानं मज्जयिष्यस्यधर्म्मे । तस्मात् कामं रोचयाभ्यागतं त्वं संयोज्याथो संहरस्वेह
जन्तून् ।

सा वै तदा मृत्युसंज्ञापदेशा भीता शापाद्वाढमित्यब्रवीत्तं । अथो प्राणान् प्राणिनामन्तकाले कामक्रोधौ प्राप्य निर्म्मो
ह्य हन्ति ।

मृत्योर्ये ते व्याधयस्त्वाश्रुपाता मनुष्याणां रुज्यते यैः शरीरं । सर्व्वेषां वै प्राणिनां प्राणनान्ते तस्माच्छोकं मा कृथा
बुद्ध्यबुद्ध्या ।

सर्व्वे देवाः प्राणिनां प्राणनान्ते गत्वा वृत्ताः सन्निवृत्तास्तथैव । एवं सर्व्वे मानवाः प्राणनान्ते गत्वा वृत्ता देववद्राज
सिंह । ९२२५

वायुर्भीमो भीमनादो महौजाः स सर्व्वेषां प्राणिनां प्राणभूतः । नानावृत्तिर्देहिनां देहभेदे तस्माद्वायुर्द्देवदेवो वि
शिष्टः ।

सर्व्वे देवा मर्त्यसंज्ञाविशिष्टाः सर्व्वे मर्त्या देवसंज्ञाविशिष्टाः । तस्मात् पुत्त्रं मा शुचो राजसिंह पुत्त्रः स्वर्गं प्राप्यते
मोदते ह ।

एवं मृत्युर्देवसृष्टा प्रजानां प्राप्ते काले संहरन्ती यथावत् । तस्यास्चैव व्याधयस्तेऽश्रुपाताः प्राप्ते काले संहरन्तीह जन्तून् ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि मृत्युप्रजापतिसंवादे ऊनषष्ट्यधिकद्विशततोऽध्यायः ॥ २५९ ॥

॥ युधिष्ठिर उवाच ॥ इमे वै मानवाः सर्व्वे धर्म्मं प्रतिविशङ्किताः । कोऽयं धर्म्मः कुतो धर्म्मस्तन्मे ब्रूहि पितामह ।

धर्म्मस्त्वयमिहार्थः किममुत्रार्थोऽपि वा भवेत् । उभयार्थो हि वा धर्म्मस्तन्मे ब्रूहि पितामह । ९२३०

॥ भीष्म उवाच ॥ सदाचारः स्मृतिर्व्वेदास्त्रिविधं कर्म्मलक्षणं । चतुर्थमर्थमित्याहुः कवयो धर्म्मलक्षणं ।

अपि ह्युक्तानि धर्म्माणि व्यवस्यन्त्युत्तरावरे । लोकयात्रार्थमेवेह धर्म्मस्य नियमः कृतः ।

उभयत्र सुखोदर्क इह चैव परत्र च । अलब्ध्वा निपुणं धर्म्मं पापः पापेन युज्यते ।

न च पापकृतः पापान्मुच्यन्ते केचिदापदि । अपापवादी भवति यथा भवति धर्म्मवित् ।

धर्म्मस्य निष्ठा त्वाचारस्तमेवाश्रित्य भोत्स्यसे । यथा धर्म्मसमाविष्टो धनं गृह्णाति तस्करः । ९२३५

रमते निर्हरन् स्तेनः परवित्तमराजके । यदाऽस्य तद्धरन्त्यन्ये तदा राजानमिच्छति ।

तदा तेषां स्पृहयते ये वै तुष्टाः स्वकैर्द्धनैः । अभितः शुचिरभ्येति राजद्वारमशङ्कितः ।

न हि दुश्चरितं किञ्चिदन्तरात्मनि पश्यति । सत्यस्य वचनं साधु न सत्याद्विद्यते परं ।

सत्येन विधृतं सर्व्वं सर्व्वं सत्ये प्रतिष्ठितं । अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक् पृथक् ।

अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः । ते चेन्मिथो धृतिं कुर्य्युर्व्विनश्येयुरसंशयं । ९२४०

न हर्त्तव्यं परधनमिति धर्म्मः सनातनः । मन्यन्ते बलवन्तस्तं दुर्ब्बलैः सम्प्रकीर्त्तितं ।

यदा नियतिदौर्ब्बल्यमथैषामेव रोचते । न ह्यत्यन्तं बलवन्तो भवन्ति सुखिनोऽपि वा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मादनार्ज्जवे बुद्धिर्न कार्य्या ते कदाचन। असाधुभ्योऽस्य न भयं न चौरेभ्यो न राजतः।
अकिञ्चित् कस्यचित् कुर्व्वन्निर्भयः शुचिरावसेत्। सर्व्वतः शङ्कते स्तेनो मृगो ग्राममिवेयिवान्।
बहुधा चरितं पापमन्यत्रैवानुपश्यति। मुदितः शुचिरभ्येति सर्व्वतो निर्भयः सदा। ९२४५
न हि दुश्चरितं किञ्चिदात्मनोऽन्येषु पश्यति। दातव्यमित्ययं धर्म्म उक्तो भूतहिते रतैः।
तं मन्यन्ते धनयुताः कृपणैः सम्प्रवर्त्तितं। यदा नियतिकार्पण्यमथैषामेव रोचते।
न ह्यत्यन्तं धनवन्तो भवन्ति सुखिनोऽपि वा। यदन्यैर्विहितं नेच्छेदात्मनः कर्म्म पूरुषः।
न तत्परेषु कुर्व्वीत जानन्नप्रियमात्मनः। योऽन्यस्य स्यादुपपतिः स कं किं वक्तुमर्हति।
यदन्यस्य ततः कुर्य्यान्न मृष्येदिति मे मतिः। जीवितुं यः स्वयं चेच्छेत् कथं सोऽन्यं प्रघातयेत्। ९२५०
यद्यदात्मनि चेच्छेत तत्परस्यापि चिन्तयेत्। अतिरिक्तैः संविभजेद्भोगैरन्यानकिञ्चनान्।
एतस्मात् कारणाद्धात्रा कुसीदं सम्प्रवर्त्तितं। यस्मिंस्तु देवाः समये सन्तिष्ठेरंस्तथा भवेत्।
अथवा लाभसमये स्थितिर्द्धर्म्मेऽपि शोभना। सर्व्वं प्रियाभ्युपगतं धर्म्ममाहुर्म्मनीषिणः।
पश्यैतं लक्षणोद्देशं धर्म्माधर्म्मे युधिष्ठिर। लोकसंग्रहसंयुक्तं विधात्रा विहितं पुरा।
सूक्ष्मधर्म्मार्थनियतं सतां चरितमुत्तमं। धर्म्मलक्षणमाख्यातमेतत्ते कुरुसत्तम। ९२५५
तस्मादनार्ज्जवे बुद्धिर्न ते कार्य्या कथञ्चन।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि धर्म्मलक्षणकथने षष्ट्यधिकद्विशततोऽध्यायः॥ २६०॥
॥ युधिष्ठिर उवाच॥ सूक्ष्मं साधुसमुद्दिष्टं नियतं ब्रह्मलक्षणं। प्रतिभा त्वस्ति मे काचित्तां ब्रूयामनुमानतः।
भूयांसो हृदये ये मे प्रश्नास्ते व्याहृतास्त्वया। इदन्त्वन्यत् प्रवक्ष्यामि न राजन्निग्रहादिव।
इमानि हि प्राणयन्ति सृजन्त्युत्तारयन्ति च। न धर्म्मः परिपाठेन शक्यो भारत वेदितुं।
अन्यो धर्म्मः समस्थस्य विषमस्थस्य चापरः। आपदस्तु कथं शक्याः परिपाठेन वेदितुं। ९२६०
सदाचारो मतो धर्म्मः सन्तस्त्वाचारलक्षणाः। साध्यासाध्यं कथं शक्यं सदाचारो ह्यलक्षणः।
दृश्यते हि धर्म्मरूपेणाधर्म्मं प्राकृतश्चरन्। धर्म्मञ्चाधर्म्मरूपेण कश्चिदप्राकृतश्चरन्।
पुनरस्य प्रमाणं हि निर्द्दिष्टं शास्त्रकोविदैः। वेदवादाश्चानुयुगं ह्रसन्तीतीह नः श्रुतं।
अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे। अन्ये कलियुगे धर्म्मा यथाशक्तिकृता इव।
आम्नायवचनं सत्यमित्ययं लोकसंग्रहः। आम्नायेभ्यः पुनर्व्वेदाः प्रसृताः सर्व्वतोमुखाः। ९२६५
ते चेत् सर्व्वप्रमाणं वै प्रमाणं ह्यत्र विद्यते। प्रमाणेऽप्यप्रमाणेन विरुद्धे शास्त्रता कुतः।
धर्म्मस्य क्रियमाणस्य बलवद्भिर्दुरात्मभिः। या या विक्रियते संस्था ततः साऽपि प्रणश्यति।
विद्म दैवं न वा विद्म शक्यं वा वेदितुं न वा। अणीयान् क्षुरधाराया गरीयानपि पर्व्वतात्।
गन्धर्व्वनगराकारः प्रथमं संप्रदृश्यते। अन्वीक्ष्यमाणः कविभिः पुनर्गच्छत्यदर्शनं।
निपानानीव गोभ्योऽपि क्षेत्रे कुल्येव भारत। स्मृतिर्हि शाश्वतो धर्म्मो विप्रहीणो न दृश्यते। ९२७०
कामादन्येच्छया चान्ये कारणैरपरैस्तथा। असन्तोऽपि वृथाचारं भजन्ते बहवोऽपरे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्मो भवति स चिप्रं प्रलापस्त्वेव साधुषु। तथैतानाङ्गरुन्मत्तानपि चावहसन्त्युत।
महाजना ह्युपावृत्ता राजधर्म्मं समाश्रिताः। न हि सर्व्वहितः कश्चिदाचारः सम्प्रवर्त्तते।
तेनैवान्यः प्रभवति सोऽपरं बाधते पुनः। दृश्यते चैव स पुनस्तुल्यरूपो यदृच्छया।
येनैवान्यः प्रभवति सोऽपरानपि बाधते। आचाराणामनैकाग्र्यं सर्व्वेषामुपलचयेत्। ९२७५
चिराभिपन्नः कविभिः पूर्व्वं धर्म्म उदाहृतः। तेनाचारेण पूर्व्वेण संस्था भवति शाश्वती।
इति श्रीमहाभारते शान्तिपर्व्वणि मोचधर्म्मपर्व्वणि धर्म्मलचणकथने एकषष्ट्यधिकद्विशतोऽध्यायः॥ २६१ ॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। तुलाधारस्य वाक्यानि धर्म्मे जाजलिना सह।
वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः। सागरोद्देशमागम्य तपस्तेपे महातपाः।
नियतो नियताहारश्चीराजिनजटाधरः। मलपङ्कधरो धीमान् बहून् वर्षगणान्मुनिः।
स कदाचिन्महातेजा जलवासी महीपते। चचार लोकान् विप्रर्षिः प्रेचमाणो मनोजवः। ९२८०
स चिन्तयामास मुनिर्ज्जलवासे कदाचन। विप्रेच्य सागरान्तां वै महीं सवनकाननां।
न मया सदृशोऽस्तीह लोके स्थावरजङ्गमे। अप्सु वैहायसं गच्छेन्मया योऽन्यः सहेति वै।
अदृश्यमानो रचोभिर्ज्जलमध्येऽवदंस्तथा। अब्रुवंश्च पिशाचास्तं नैवं त्वं वक्तुमर्हसि।
तुलाधारो वणिग्धर्म्मा वाराणस्यां महायशाः। सोऽप्येवं नार्हते वक्तुं यथा त्वं द्विजसत्तम।
इत्युक्तो जाजलिर्भूतैः प्रत्युवाच महातपाः। पश्येयं तमहं प्राज्ञं तुलाधारं यशस्विनं। ९२८५
इति ब्रुवाणं तमृषिं रचांस्युद्धृत्य सागरात्। अब्रुवन् गच्छ पन्थानमास्थायेमं द्विजोत्तम।
इत्युक्तो जाजलिर्भूतैर्ज्जगाम विमनास्तदा। वाराणस्यान्तुलाधारं समासाद्याब्रवीदिदं।
॥ युधिष्ठिर उवाच ॥ किं कृतं दुष्करं तात कर्म्म जाजलिना पुरा। येन सिद्धिं परां प्राप्तस्तन्मे व्याख्यातु
मर्हसि।
॥ भीष्म उवाच ॥ अतीव तपसा युक्तो घोरेण स बभूव ह। तथोपस्पर्शनरतः सायं प्रातर्म्महातपाः।
अग्नीन् परिचरन् सम्यक् स्वाध्यायपरमो द्विजः। वानप्रस्थविधानज्ञो जाजलिर्ज्वलितः श्रिया। ९२९०
वने तपस्यतिष्ठत् स न च धर्म्ममवैचत। वर्षास्वाकाशशायी च हेमन्ते जलसंश्रयः।
वातातपसहो ग्रीष्मे न च धर्म्ममविन्दत। दुःखशय्यासु विविधा भूमौ च परिवर्त्तते।
ततः कदाचित् स मुनिर्वर्षास्वाकाशमास्थितः। अन्तरीचाज्जलं मूर्द्ध्ना प्रत्यगृह्णान्मुहुर्म्मुहुः।
अथ तस्य जटाः क्लिन्ना बभूवुर्ग्रथिताः प्रभो। अरण्यगमनान्नित्यं मलिनोऽमलसंयुतः।
स कदाचिन्निराहारो वायुभचो महातपाः। तस्थौ काष्ठवदव्यग्रो न चचाल च कर्हिचित्। ९२९५
तस्य स्म स्थाणुभूतस्य निर्व्विचेष्टस्य भारत। कुलिङ्गशकुनौ राजन्नीडं शिरसि चक्रतुः।
स तौ दयावान् ब्रह्मर्षिरुपप्रैचत दम्पती। कुर्व्वाणौ नीडकं तत्र जटासु तृणतन्तुभिः।
यदा न स चलत्येव स्थाणुभूतो महातपाः। ततस्तौ सुखविश्वस्तौ सुखं तत्रोषतुस्तदा।
अतीतास्वथ वर्षासु शरत्काल उपस्थिते। प्राजापत्येन विधिना विश्वासात् काममोहितौ।

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्रापातयतां राजन् शिरस्यण्डानि खेचरौ । तान्यबुध्यत तेजस्वी स विप्रः शंसितव्रतः ।
बुद्धा च स महातेजा न चचाल च जाजलिः । धर्म्मे कृतमना नित्यं नाधर्म्मं स त्वरोचयत् ।
अहन्यहनि चागत्य ततस्तौ तस्य मूर्द्धनि । आश्वासितौ निवसतः सम्प्रहृष्टौ तदा विभो ।
अण्डेभ्यस्त्वथ पुष्टेभ्यः प्राजायन्त शकुन्तकाः । व्यवर्द्धन्त च तत्रैव न चाकम्पत जाजलिः ।
स रक्षमाणस्त्वण्डानि कुलिङ्गानां धृतव्रतः । तथैव तस्थौ धर्म्मात्मा निर्व्विचेष्टः समाहितः ।
ततस्तु कालसमये बभूवुस्तेऽथ पक्षिणः । बुबुधे तांस्तु स मुनिर्जातपक्षान् कुलिङ्गकान् ।
ततः कदाचित्तांस्तत्र पश्यन् पक्षीन् यतव्रतः । बभूव परमप्रीतस्तदा मतिमतांवरः ।
तथा तानपि संवृद्धान् दृष्ट्वा चाप्नुवतां मुदं । शकुनौ निर्भयौ तत्र ऊषतुश्चात्मजैः सह ।
जातपक्षांश्च सोऽपश्यदुड्डीनान् पुनरागतान् । सायं सायं द्विजान् विप्रो न चाकम्पत जाजलिः ।
कदाचित् पुनरभ्येत्य पुनर्गच्छन्ति सन्ततं । त्यक्ता मातापितृभ्यां ते न चाकम्पत जाजलिः ।
तथा ते दिवसञ्चापि गत्वा सायं पुनर्नृप । उपावर्त्तन्त तत्रैव निवासार्थं शकुन्तकाः ।
कदाचिद्दिवसान् पञ्च समुत्पत्य विहङ्गमाः । षष्ठेऽहनि समाजग्मुर्न चाकम्पत जाजलिः ।
क्रमेण च पुनः सर्व्वे दिवसान् सुबहूनथ । नोपावर्त्तन्त शकुना जातप्राणाः स्म ते यदा ।
कदाचिन्मासमात्रेण समुत्पत्य विहङ्गमाः । नैवागच्छंस्ततो राजन् प्रातिष्ठत स जाजलिः ।
ततस्तेषु प्रनीडेषु जाजलिर्ज्जातविस्मयः । सिद्धोऽस्मीति मतिञ्चक्रे ततस्तं मान आविशत् ।
स तथा निर्गतान् दृष्ट्वा शकुन्तान्नियतव्रतः । सम्भावितात्मा सम्भाव्य भृशं प्रीतमनाऽभवत् ।
स नद्यां समुपस्पृश्य तर्पयित्वा हुताशनं । उदयन्तमथादित्यमुपातिष्ठन्महातपाः ।
सम्भाव्य चटकान्मूर्द्ध्नि जाजलिर्ज्जपतांवरः । आस्फोटयत्तथाकाशे धर्म्मः प्राप्तो मयेति वै ।
अथान्तरीक्षे वागासीत्ताञ्च शुश्राव जाजलिः । धर्म्मेण न समस्त्वं वै तुलाधारस्य जाजले ।
वाराणस्यां महाप्राज्ञस्तुलाधारः प्रतिष्ठितः । सोऽप्येवं नार्हते वक्तुं यथा त्वं भाषसे द्विज ।
सोऽमर्षवशमापन्नस्तुलाधारदिदृक्षया । पृथिवीमचरद्राजन् यत्र सायं गृहो मुनिः ।
कालेन महताऽगच्छत् स तु वाराणसीं पुरीं । विक्रीणन्तञ्च पण्यानि तुलाधारं ददर्श सः ।
सोऽपि दृष्ट्वैव तं विप्रमायान्तं भाण्डजीवनः । समुत्थाय सुसंहृष्टः स्वागतेनाभ्यपूजयत् ।
॥ तुलाधार उवाच ॥ आयानेवासि विदितो मम ब्रह्मन्न संशयः । ब्रवीमि यत्तु वचनं तच्छृणुष्व द्विजोत्तम ।
सागरानूपमाश्रित्य तपस्तप्तं त्वया महत् । न च धर्म्मस्य संज्ञां त्वं पुरा वेत्थ कथञ्चन ।
ततः सिद्धस्य तपसा तव विप्र शकुन्तकाः । क्षिप्रं शिरस्यजायन्त ते च सम्भाविता[स्]त्वया ।
जातपक्षा यदा ते च गताश्चारीमितस्ततः । मन्यमानस्ततो धर्म्मं चटकप्रभवं द्विज ।
खे वाचं त्वमथाश्रौषीर्म्मां प्रति द्विजसत्तम । अमर्षवशमापन्नस्ततः प्राप्तो भवानिह ।
करवाणि प्रियं किन्त तद्ब्रूहि द्विजसत्तम ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि तुलाधारजाजलिसंवादे द्विषष्ट्यधिकद्विशतोऽध्यायः ॥२६२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ इत्युक्तः स तदा तेन तुलाधारेण धीमता । प्रोवाच वचनं धीमान् जाजलिर्ज्जपतास्वरः ।
॥ जाजलिरुवाच ॥ विक्रीणतः सर्व्वरसान् सर्व्वगन्धांश्च वाणिज । वनस्पतीनोषधीश्च तेषां मूलफलानि च । ९२४०
अध्यगा नैष्ठिकीं बुद्धिं कुतस्त्वामिदमागतं । एतदाचक्ष्व मे सर्व्वं निखिलेन महामते ।
॥ भीष्म उवाच ॥ एवमुक्तस्तुलाधारो ब्राह्मणेन यशस्विना । उवाच धर्म्मसूक्ष्माणि वैश्यो धर्म्मार्थतत्त्ववित् ।
जाजलिं कष्टतपसं ज्ञानतृप्तस्तदा नृप ।
॥ तुलाधार उवाच ॥ वेदाहं जाजले धर्म्मं सरहस्यं सनातनं । सर्व्वभूतहितं मैत्रं पुराणं यं जना विदुः ।
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिः सा परो धर्म्मस्तेन जीवामि जाजले । ९२४५
परच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतं । अलक्तं पद्मकं तुङ्गं गन्धांश्चोच्चावचांस्तथा ।
रसांश्च तांस्तान् विप्रर्षे मद्यवर्ज्जान् बहूनहं । क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ।
सर्व्वेषां यः सुहृन्नित्यं सर्व्वेषाञ्च हिते रतः । कर्म्मणा मनसा वाचा स धर्म्मं वेद जाजले ।
नानुरुध्ये विरुध्ये वा न द्वेष्मि न च कामये । समोऽहं सर्व्वभूतेषु पश्य मे जाजले व्रतं ।
तुला मे सर्व्वभूतेषु समा तिष्ठति जाजले । नाहं परेषां कृत्यानि प्रशंसामि न गर्हये । ९२५०
आकाशस्येव विप्रेन्द्र पश्यन् लोकस्य चित्रतां । इति मां त्वं विजानीहि सर्व्वलोकस्य जाजले ।
समं मतिमतां श्रेष्ठ समलोष्टाश्मकाञ्चनं । यथाऽन्धबधिरोन्मत्ता उच्छ्वासपरमाः सदा ।
देवैरपिहितद्वाराः सोपमा पश्यतो मम । यथा वृद्धातुरकृशा निस्पृहा विषयान् प्रति ।
तथाऽर्थकामभोगेषु ममापि विगता स्पृहा । यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा । यदा न कुरुते भावं सर्व्वभूतेषु पापकं । ९२५५
कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा । न भूतो न भविष्योऽस्ति न च धर्म्मोऽस्ति कश्चन ।
योऽभयः सर्व्वभूतानां स प्राप्नोत्यभयं पदं । यस्मादुद्विजते लोकः सर्व्वो मृत्युमुखादिव ।
वाक्क्रूराद्दण्डपरुषात् स प्राप्नोति महद्भयं । यथावद्वर्त्तमानानां वृद्धानां पुत्त्रपौत्त्रिणां ।
अनुवर्त्तामहे वृत्तमहिंस्राणां महात्मनां । प्रनष्टः शाश्वतो धर्म्मः सदाचारेण मोहितः ।
तेन वैद्यस्तपस्वी वा बलवान् वा विमुह्यते । आचारात्जाजले प्राज्ञः क्षिप्रं धर्म्ममवाप्नुयात् । ९२६०
एवं यः साधुभिर्द्दान्तश्चरेदद्रोहचेतसा । नद्यां हि यथा काष्ठमुह्यमानं यदृच्छया ।
यदृच्छयैव काष्ठेन सन्धिं गच्छेत केनचित् । तत्रापराणि दारूणि संसृज्यन्ते परस्परं ।
तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया । यस्मान्नोद्विजते भूतं जातु किञ्चित् कथञ्चन ।
अभयं सर्व्वभूतेभ्यः स प्राप्नोति सदा मुने । यस्मादुद्विजते विद्वन् सर्व्वलोको वृकादिव ।
क्रोशतस्तीरमासाद्य यथा सर्व्वे जलेचराः । एवमेवायमाचारः प्रादुर्भूतो यतस्ततः । ९२६५
सहायवान् द्रव्यवान् यः सुभगोऽन्यः परस्तथा । ततस्तानेव कवयः शास्त्रेषु प्रवदन्त्युत ।
कीर्त्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्ननिर्णयाः । तपोभिर्यज्ञदानैश्च वाक्यैः प्रज्ञाश्रितैस्तथा ।
प्राप्नोत्यभयदानस्य यद्यत्फलमिहाश्नुते । लोके यः सर्व्वभूतेभ्यो ददात्यभयदक्षिणां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स सर्व्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणां । न भूतानामहिंसाया ज्यायान् धर्म्मोऽस्ति कश्चन ।
यस्मान्नोद्विजते भूतं जातु किञ्चित् कथञ्चन । सोऽभयं सर्व्वभूतेभ्यः संप्राप्नोति महामुने ।
यस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव । न स धर्म्ममवाप्नोति इह लोके परत्र च ।
सर्व्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः । देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ।
दानं भूताभयस्याहुः सर्व्वदानेभ्य उत्तमं । ब्रवीमि ते सत्यमिदं श्रद्दधस्व च जाजले ।
स एव सुभगो भूत्वा पुनर्भवति दुर्भगः । व्यापत्तिं कर्म्मणां दृष्ट्वा जुगुप्सन्ति जनाः सदा ।
अकारणो हि नैवास्ति धर्म्मः सूक्ष्मो हि जाजले । भूतभव्यार्थमेवेह धर्म्मप्रवचनं कृतं ।
सूक्ष्मत्वान्न स विज्ञातुं शक्यते बहुनिह्नवः । उपलभ्यान्तरा चान्यानाचारानवबुध्यते ।
ये चाच्छिन्दन्ति वृषणान् ये च भिन्दन्ति नस्तकान् । वहन्ति महतो भारान् बध्नन्ति दमयन्ति च ।
हत्वा सत्त्वानि खादन्ति तान् कथं न विगर्हसे । मानुषा मानुषानेव दासभावेन भुञ्जते ।
बधबन्धनिरोधेन कारयन्ति दिवानिशं । आत्मनश्चापि जानाति यद्दुःखं बधबन्धने ।
पञ्चेन्द्रियेषु भूतेषु सर्व्वं वसति दैवतं । आदित्यश्चन्द्रमा वायुर्ब्रह्मा प्राणः क्रतुर्यमः ।
तानि जीवानि विक्रीय का मृतेषु विचारणा । अजोऽग्निर्व्वरुणो मेषः सूर्य्योऽश्वः पृथिवी विराट् ।
धेनुर्व्वत्सश्च सोमो वै विक्रीयैतन्न सिद्ध्यति । का तैले का घृते ब्रह्मन् मध्वप्स्वौषधेषु वा ।
अदंशमशके देशे सुखसंवर्द्धितान् पशून् । तांश्च मातुः प्रियान् जानन्नाक्रम्य बहुधा नराः ।
बहुदंशाकुलान् देशान्नयन्ति बहुकर्द्दमान् । वाहसम्पीडिता धुर्य्याः सीदन्त्यविधिना परे ।
न मन्ये भ्रूणहत्याऽपि विशिष्टा तेन कर्म्मणा । कृषिं साध्विति मन्यन्ते सा च वृत्तिः सुदारुणा ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखं । तथैवानडुहो युक्तान् समवेक्षस्व जाजले ।
अघ्न्या इति गवां नाम क एता हन्तुमर्हति । महच्चकाराकुशलं वृषं गां वालभेत्तु यः ।
ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन् । गां मातरञ्चाप्यवधीर्वृषभञ्च प्रजापतिं ।
अकार्य्यं नहुषाकार्षीर्लप्स्यामस्त्वत्कृते व्यथां । शतञ्चैकञ्च रोगाणां सर्व्वभूतेष्वपातयन् ।
ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले । भ्रूणहं नहुषं त्वाहुर्न ते होष्यामहे हविः ।
इत्युक्त्वा ते महात्मानः सर्व्वे तत्त्वार्थदर्शिनः । ऋषयो यतयः शान्तास्तपसा प्रत्यवेदयन् ।
ईदृशानशिवान् घोरानाचारानिह जाजले । केवलाचरितत्वात्तु निपुणो नावबुध्यसे ।
कारणाद्धर्म्ममन्विच्छेन्न लोकचरितञ्चरेत् । यो हन्याद्यश्च मां स्तौति तत्रापि शृणु जाजले ।
समौ तावपि मे स्यातां न हि मेऽस्ति प्रियाप्रियं । एतदीदृशकं धर्म्मं प्रशंसन्ति मनीषिणः ।
उपपत्त्या हि सम्पन्नो यतिभिश्चैव सेव्यते । सततं धर्म्मशीलैश्च निपुणेनोपलक्षितः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि तुलाधारजाजलिसंवादे त्रिषष्ट्यधिकद्विशततोऽध्यायः ॥ २६३ ॥
॥ जाजलिरुवाच ॥ अयं प्रवर्त्तितो धर्म्मस्तुलां धारयता त्वया । स्वर्गद्वारञ्च वृत्तिञ्च भूतानामवरोत्स्यते ।
कृष्या ह्यन्नं प्रभवति ततस्त्वमपि जीवसि । पशुभिश्चौषधीभिश्च मर्त्या जीवन्ति वाणिज ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Financed Equipment Heritage Foundation, Jalgaon

ततो यज्ञः प्रभवति नास्तिक्यमपि जल्पसि। नहि वर्त्तेदयं लोको वार्त्तामुत्सृज्य केवलां।

॥ तुलाधार उवाच ॥ वक्ष्यामि जाजले वृत्तिं नास्ति ब्राह्मण नास्तिकः। न यज्ञञ्च विनिन्दामि यज्ञवित्तु सुदुर्लभः।

नमो ब्राह्मणयज्ञाय ये च यज्ञविदो जनाः। स्वयज्ञं ब्राह्मणा हित्वा क्षात्रयज्ञमिहास्थिताः।
लुब्धैर्वित्तपरैर्ब्रह्मन्नास्तिकैः सम्प्रवर्त्तितं। वेदवादानविज्ञाय सत्याभासमिवानृतं।
इदं देयमिदं देयमिति चायं प्रशस्यते। अतस्तैन्यं प्रभवति विकर्म्माणि च जाजले।
यदेव सुकृतं हव्यं तेन तुष्यन्ति देवताः। नमस्कारेण हविषा स्वाध्यायैरौषधैस्तथा।
पूजा स्याद्देवतानां हि यथा शास्त्रनिदर्शनं। इष्टापूर्त्तादसाधूनां विगुणा जायते प्रजा।
लुब्धेभ्यो जायते लुब्धः समेभ्यो जायते समः। यजमानास्तथात्मानमृत्विजश्च तथा प्रजाः।
यज्ञात् प्रजा प्रभवति नभसोऽम्भ इवामलं। अग्नौ प्रास्ताहुतिर्ब्रह्मन्नादित्यमुपगच्छति।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः। तस्मात् सुनिष्ठिताः पूर्व्वे सर्व्वान् कामांश्च लेभिरे।
अकृष्टपच्या पृथिवी आशीर्भिर्व्वीरुधोऽभवन्। न ते यज्ञेष्वात्मसु वा फलं पश्यन्ति किञ्चन।
शङ्कमानाः फलं यज्ञे ये यजेरन् कथञ्चन। जायन्ते ऽसाधवो धूर्त्ता लुब्धा वित्तप्रयोजनाः।
स स्म पापकृतां लोकान् गच्छेदशुभकर्म्मणा। प्रमाणमप्रमाणेन यः कुर्य्यादशुभं नरः।
पापात्मा सोऽकृतप्रज्ञः सदैवेह द्विजोत्तम। कर्त्तव्यमिति कर्त्तव्यं वेत्ति वै ब्राह्मणो भयं।
ब्रह्मैव वर्त्तते लोके नैव कर्त्तव्यतां पुनः। विगुणञ्च पुनः कर्म्म ज्याय इत्यनुशुश्रुम।
सर्व्वभूतोपघातश्च फलभावे च संयमः। सत्ययज्ञा दमयज्ञा अर्थलुब्धार्थतृप्तयः।
उत्पन्नत्यागिनः सर्व्वे जना आसन्नमत्सराः। क्षेत्रक्षेत्रज्ञतत्त्वज्ञाः स्वयज्ञपरिनिष्ठिताः।
ब्राह्मं वेदमधीयन्तस्तोषयन्त्यपरानपि। अखिलं दैवतं सर्व्वं ब्रह्म ब्राह्मणि संश्रितं।
तुष्यन्ति तृप्यतो देवास्तृप्तास्तृप्तस्य जाजले। यथा सर्व्वरसैस्तृप्तो नाभिनन्दति किञ्चन।
तथा प्रज्ञानतृप्तस्य नित्यतृप्तिः सुखोदया। धर्म्माधारा धर्म्मसुखाः कृत्स्नव्यवसितास्तथा।
अस्ति नस्तत्त्वतो भूय इति प्राज्ञस्त्ववेक्षते। ज्ञानविज्ञानिनः केचित् परं पारं तितीर्षवः।
अतीव पुण्यदं पुण्यं पुण्याभिजनसंहितं। यत्र गत्वा न शोचन्ति न च्यवन्ति व्यथन्ति वा।
ते तु तद्ब्रह्मणः स्थानं प्राप्नुवन्तीह सात्त्विकाः। नैव ते स्वर्गमिच्छन्ति न यजन्ति यशोधनैः।
सतां वर्त्मानुवर्त्तन्ते यजन्ते ऽविहिंसया। वनस्पतीनोषधीश्च फलं मूलञ्च ते विदुः।
न चैतानृत्विजो लुब्धा याजयन्ति फलार्थिनः। स्वमेव चार्थं कुर्व्वाणा यज्ञञ्चक्रुः पुनर्द्विजाः।
परिनिष्ठितकर्म्माणः प्रजानुग्रहकाम्यया। तस्मात्तानृत्विजो लुब्धा याजयन्त्यशुभान्नरान्।
प्रापयेयुः प्रजाः स्वर्गे स्वधर्म्माचरणेन वै। इति मे वर्त्तते बुद्धिः समा सर्व्वत्र जाजले।
यानि यज्ञेष्विहेज्यन्ति सदा प्राज्ञा द्विजर्षभाः। तेन ते देवयानेन पथा यान्ति महामुने।
आवृत्तिस्तत्र चैकस्य नास्त्यावृत्तिर्म्मनीषिणः। उभौ तौ देवयानेन गच्छतो जाजले यथा।
स्वयञ्चैषामनडुहो युज्यन्ति च वहन्ति च। स्वयमुस्राश्च दुह्यन्ते मनः सङ्कल्पसिद्धिभिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वयं यूपानुपादाय यजन्ते स्वाप्तदक्षिणैः । यस्तथा भावितात्मा स्यात् स गामालब्धुमर्हति ।
ओषधीभिस्तथा ब्रह्मन् यजेरंस्तेन तादृशाः । इति त्यागं पुरस्कृत्य तादृशं प्रब्रवीमि ते ।
निराशिषमनारम्भं निर्नमस्कारमस्तुतिं । अक्षीणं क्षीणकर्म्माणं तं देवा ब्राह्मणं विदुः । ९४३०
न श्रावयन्न च यजन्न ददद्ब्राह्मणेषु च । काम्यां वृत्तिं लिप्समानः कां गतिं यासि जाजले ।
इदन्तु दैवतं कृत्वा यथा यज्ञमवाप्नुयात् ।
॥ जाजलिरुवाच ॥ न वै मुनीनां शृणुमः स्म तत्त्वं पृच्छामि ते वाणिज कष्टमेतत् । पूर्व्वे पूर्व्वे चास्य नावेक्षमाणा नातः परं तमृषयः स्थापयन्ति ।
यस्मिन्नेवात्मतीर्थेन पशवः प्राप्नुयुर्म्मखं । अथ स्म कर्म्मणा केन वाणिज प्राप्नुयात् सुखं ।
शंस मे तन्महाप्राज्ञ भृशं वै श्रद्दधामि ते । ९४३५
॥ तुलाधार उवाच ॥ उत यज्ञा उतायज्ञा मखं नार्हन्ति ते क्वचित् । आज्येन पयसा दध्ना पूर्णाहुत्या विशेषतः ।
बालैः शृङ्गेण पादेन सम्भरत्येव गौर्म्मखं । पत्नीञ्चानेन विधिना प्रकरोति नियोजयन् ।
इष्टन्तु दैवतं कृत्वा यथा यज्ञमवाप्नुयात् । पुरोडाशो हि सर्व्वेषां पशूनां मेध्य उच्यते ।
सर्व्वा नद्यः सरस्वत्यः सर्व्वे पुण्याः शिलोच्चयाः । जाजले तीर्थमात्मैव मा स्म देशातिथिर्भव ।
एतानीदृशकान् धर्म्मानाचरन्निह जाजले । कारणैर्द्धर्म्ममन्विच्छन् स लोकानाप्नुते शुभान् । ९४४०
॥ भीष्म उवाच ॥ एतानीदृशकान् धर्म्मान् तुलाधारः प्रशंसति । उपपत्त्याऽभिसम्पन्नान् नित्यं सद्भिर्निषेवितान् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि तुलाधारजाजलिसंवादे चतुःषष्ट्यधिकद्विशततोऽध्यायः ॥ २६४ ॥
॥ तुलाधार उवाच ॥ सद्भिर्व्वा यदि वाऽसद्भिः पन्थानमिममास्थितं । प्रत्यक्षं क्रियतां साधु ततो ज्ञास्यसि तद्यथा ।
एते शकुन्ता बहवः समन्ताद्विचरन्ति ह । तवोत्तमाङ्गे सम्भूताः श्येन्याश्चान्याश्च जातयः ।
आह्वयैतान् महाब्रह्मन् विशमानांस्ततस्ततः । पश्येमान् हस्तपादेषु श्लिष्टान् देहेषु सर्व्वशः ।
सम्भावयन्ति पितरं त्वया सम्भाविताः खगाः । असंशयं पिता वै त्वं पुत्त्रानाह्वय जाजले । ९४४५
॥ भीष्म उवाच ॥ ततो जाजलिना तेन समाहूताः पतत्त्रिणः । वाचमुच्चारयन्ति स्म धर्म्मस्य वचनात् किल ।
अहिंसादिकृतं कर्म्म इह चैव परत्र च । श्रद्धां निहन्ति वै ब्रह्मन् सा हता हन्ति तं नरं ।
समानां श्रद्दधानानां संयतानां सुचेतसां । कुर्व्वतां यज्ञ इत्येव न यज्ञो जातु नेष्यते ।
श्रद्धा वैवस्वती सेयं सूर्य्यस्य दुहिता द्विज । सावित्री प्रसवित्री च बहिर्व्वाङ्मनसी ततः ।
वाग्वृद्धं त्रायते श्रद्धा मनोवृद्धञ्च भारत । श्रद्धावृद्धं वाङ्मनसी न यज्ञस्त्रातुमर्हति । ९४५०
अत्र गाथा ब्रह्मगीताः कीर्त्तयन्ति पुराविदः । शुचेरश्रद्दधानस्य श्रद्दधानस्य चाशुचेः ।
देवा वित्तममन्यन्त सदृशं यज्ञकर्म्मणि । श्रोत्रियस्य कदर्य्यस्य वदान्यस्य च वार्द्धुषेः ।
मीमांसित्वोभयं देवाः सममन्नमकल्पयन् । प्रजापतिस्तानुवाच विषमं कृतमित्युत ।
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् । भोज्यमन्नं वदान्यस्य कदर्य्यस्य न वार्द्धुषेः ।
अश्रद्दधान एवैको देवानां नार्हति हविः । तस्यैवान्नं न भोक्तव्यमिति धर्म्मविदो विदुः । ९४५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant & Equipment Heritage Foundation, Jalgaon

अश्रद्धा परमं पापं श्रद्धा पापप्रमोचनी । जहाति पापं श्रद्धावान् सर्पो जीर्णामिव त्वचं ।
ज्यायसी या पवित्राणां निवृत्तिः श्रद्धया सह । निवृत्तशीलदोषो यः श्रद्धावान् पूत एव सः ।
किं तस्य तपसा कार्य्यं किं वृत्तेन किमात्मना । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।
इति धर्म्मः समाख्यातः सद्भिर्द्धर्म्मार्थदर्शिभिः । वयं जिज्ञासमानास्तु सम्प्राप्ता धर्म्मदर्शनात् ।
श्रद्धां कुरु महाप्राज्ञ ततः प्राप्स्यसि यत् परं । श्रद्धावान् श्रद्दधानश्च धर्म्मश्चैव हि जाजले । ९४६०
स्ववर्त्मनि स्थितश्चैव गरीयानेव जाजले ।
॥ भीष्म उवाच ॥ ततोऽचिरेण कालेन तुलाधारः स एव च । दिवं गत्वा महाप्राज्ञौ विहरेतां यथासुखं ।
स्वस्वस्थानमुपागम्य स्वकर्म्मपरिवर्ज्जितं । एवं बहुविधार्थञ्च तुलाधारेण भाषितं ।
सम्यक् चेदमुपालभ्यो धर्म्मश्चोक्तः सनातनः । तस्य विख्यातवीर्य्यस्य श्रुत्वा वाक्यानि स द्विजः ।
तुलाधारस्य कौन्तेय शान्तिमेवान्वपद्यत । एवं बहुमतार्थञ्च तुलाधारेण भाषितं । ९४६५
यथोपम्येन देशेन किम्भूयः श्रोतुमिच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि तुलाधारजाजलिसंवादे पञ्चषष्ट्यधिकद्विशततोऽध्यायः ॥ २६५ ॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । प्रजानामनुकम्पार्थं गीतं राज्ञा विचख्नुना ।
छिन्नस्थूणं वृषं दृष्ट्वा विलापञ्च गवां भृशं । गोग्रहे यज्ञवाटस्य प्रेक्षमाणः स पार्थिवः ।
स्वस्ति गोभ्योऽस्तु लोकेषु ततो निर्व्वचनं कृतं । हिंसायां हि प्रवृत्तायामाशीरेषा तु कल्पिता ।
अव्यवस्थितमर्य्यादैर्व्विमूढैर्नास्तिकैर्नरैः । संशयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता । ९४७०
सर्व्वकर्म्मस्वहिंसां हि धर्म्मात्मा मनुरब्रवीत् । कामकारात्विहिंसन्ति वहिर्व्वेद्यां पशून्नराः ।
तस्मात् प्रमाणतः कार्य्यो धर्म्मः सूक्ष्मो विजानता । अहिंसा सर्व्वभूतेभ्यो धर्म्मेभ्यो ज्यायसी मता ।
उपोष्य संशितो भूत्वा हित्वा वेदकृताः श्रुतोः । आचार इत्यनाचारः कृपणाः फलहेतवः ।
यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः । वृथामांसानि खादन्ति नैष धर्म्मः प्रशस्यते ।
सुरां मत्स्यान्मधु मांसमासवं कृशरौदनं । धूर्त्तैः प्रवर्त्तितं ह्येतन्नैतद्वेदेषु कल्पितं । ९४७५
मानान्मोहाच्च लोभाच्च लौल्यमेतत् प्रकल्पितं । विष्णुमेवाभिजानन्ति सर्व्वयज्ञेषु ब्राह्मणाः ।
पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतं । यज्ञियाश्चैव ये वृक्षा वेदेषु परिकल्पिताः ।
यच्चापि किञ्चित् कर्त्तव्यमन्यच्चोक्षैः सुसंस्कृतं । महत् सत्त्वैः शुद्धभावैः सर्व्वं देवार्हमेव तत् ।
॥ युधिष्ठिर उवाच ॥ शरीरमापदश्चापि विवदन्त्यविहिंसतः । कथं यात्रा शरीरस्य निरारम्भस्य सेत्स्यते ।
॥ भीष्म उवाच ॥ यथा शरीरं न ग्लायेत् नेयान्मृत्युवशं यथा । तथा कर्म्मसु वर्त्तेत समर्थो धर्म्ममाचरेत् । ९४८०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि विचख्नुगीतायां षट्षष्ट्यधिकद्विशततोऽध्यायः ॥ २६६ ॥
॥ युधिष्ठिर उवाच ॥ कथं कार्य्यं परीक्षेत शीघ्रं वाऽथ चिरेण वा । सर्व्वथा कार्य्यदुर्गेऽस्मिन् भवान्नः परमो गुरुः ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । चिरकारेस्तु यत् पूर्व्वं वृत्तमाङ्गिरसे कुले ।
चिरकारिक भद्रन्ते भद्रन्ते चिरकारिक । चिरकारी हि मेधावी नापराध्यति कर्म्मसु ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः । चिरेण सर्व्वकार्य्याणि विमृश्यार्थान् प्रपद्यते ।
चिरं सञ्चिन्तयत्यर्थांश्चिरं जाग्रत् चिरं स्वपन् । चिरं कार्य्याभिपत्तिञ्च चिरकारी तथोच्यते । ९४८५
अलसग्रहणं प्राप्तो दुर्म्मेधावी तथोच्यते । बुद्धिलाघवयुक्तेन जनेनादीर्घदर्शिना ।
व्यभिचारे तु कस्मिंश्चिद्व्यतिक्रम्यापरान् सुतान् । पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ।
इत्युक्त्वा स तदा विप्रो गौतमो जपतांवरः । अविमृश्य महाभागो वनमेव जगाम सः ।
स तथेति चिरेणोक्त्वा स्वभावाच्चिरकारिकः । विमृश्य चिरकारित्वाच्चिन्तयामास वै चिरं ।
पितुराज्ञां कथं कुर्य्यां न हन्यां मातरं कथं । कथं धर्म्मच्छले नास्मिन्निमज्जेयमसाधुवत् । ९४९०
पितुराज्ञा परो धर्म्मः स्वधर्म्मो मातृरक्षणं । अस्वतन्त्रञ्च पुत्त्रत्वं किं नु मां नानुपीडयेत् ।
स्त्रियं हत्वा मातरञ्च को हि जातु सुखी भवेत् । पितरञ्चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ।
अनवज्ञा पितुर्युक्ता धारणं मातृरक्षणं । युक्तक्षमावुभावेतौ नातिवर्त्तेत मां कथं ।
पिता ह्यात्मानमाधत्ते जायायां जज्ञिवानिति । शीलचारित्रगोत्रस्य धारणार्थं कुलस्य च ।
सोऽहं मात्रा स्वयं पित्रा पुत्त्रत्वे प्रकृतः पुनः । विज्ञानं मे कथं न स्याद्द्वौ बुद्ध्ये चात्मसम्भवं । ९४९५
जातकर्म्मणि यत् प्राह पिता यच्चोपकर्म्मणि । पर्य्याप्तः स दृढीकारः पितुर्गौरवनिश्चये ।
गुरुरग्र्यः परो धर्म्मः पोषणाध्यापनान्वितः । पिता यदाह धर्म्मः स वेदेष्वपि सुनिश्चितः ।
प्रीतिमात्रं पितुः पुत्त्रः सर्व्वं पुत्त्रस्य वै पिता । शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ।
तस्मात् पितुर्व्वचः कार्य्यं न विचार्य्यं कथञ्चन । पातकान्यपि पूयन्ते पितुः शासनकारिणः ।
भोग्ये भोज्ये प्रवचने सर्व्वलोकनिदर्शने । भर्त्रा चैव समायोगे सीमन्तोन्नयने तथा । ९५००
पिता धर्म्मः पिता स्वर्गः पिता हि परमं तपः । पितरि प्रीतिमापन्ने सर्व्वाः प्रीयन्ति देवताः ।
आशिषस्ता भजन्त्येनं पुरुषं प्राह यत्पिता । निष्कृतिः सर्व्वपापानां पिता यच्चाभिनन्दति ।
मुच्यते बन्धनात् पुष्पं फलं वृन्तात् प्रमुच्यते । क्लिश्यन्नपि सुतं स्नेहैः पिता पुत्त्रं न मुञ्चति ।
एतद्विचिन्तितं तावत् पुत्त्रस्य पितृगौरवं । पिता नाल्पतरं स्थानं चिन्तयिष्यामि मातरं ।
यो ह्ययं मयि सङ्घातो मर्त्यत्वे पाञ्चभौतिकः । अस्य मे जननी हेतुः पावकस्य यथाऽरणिः । ९५०५
माता देहारणिः पुंसां सर्व्वस्यार्त्तस्य निर्वृतिः । मातृलाभे सनाथत्वमनाथत्वं विपर्य्यये ।
न च शोचति नाप्येनं स्थाविर्य्यमपकर्षति । श्रिया हीनोऽपि यो गेहमम्बेति प्रतिपद्यते ।
पुत्त्रपौत्त्रोपपन्नोऽपि जननीं यः समाश्रितः । अपि वर्षशतस्यान्ते स द्विहायनवच्चरेत् ।
समर्थं वाऽसमर्थं वा कृशं वाऽप्यकृशं तथा । रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः ।
तदा स वृद्धो भवति तदा भवति दुःखितः । तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते । ९५१०
नास्ति मातृसमा च्छाया नास्ति मातृसमा गतिः । नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया ।
कुक्षिसन्धारणाद्धात्री जननाज्जननी स्मृता । अङ्गानां वर्द्धनादम्बा वीरसूत्वेन वीरसूः ।
शिशोः शुश्रूषणाच्छुश्रूर्म्माता देहमनन्तरं । चेतनावान्नरो हन्याद्यस्य नासुषिरं शिरः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

दम्पत्योः प्राणसंश्लेषे योऽभिसन्धिः कृतः किल । तं माता च पिता चेति भूतार्थो मातरि स्थितः ।
माता जानाति यद्गोत्रं माता जानाति यस्य सः । मातुर्भरणमात्रेण प्रीतिः स्नेहः पितुः प्रजाः । ९५१५
पाणिबन्धं स्वयं कृत्वा सह धर्म्ममुपेत्य च । यदा यास्यन्ति पुरुषाः स्त्रियो नार्हन्ति याच्यतां ।
भरणाद्धि स्त्रिया भर्त्ता पात्याच्चैव स्त्रियाः पतिः । गुणस्यास्य निवृत्तौ तु न भर्त्ता न पुनः पतिः ।
एवं स्त्री नापराध्नोति नर एवापराध्यति । व्युच्चरंश्च महादोषं नर एवापराध्यति ।
स्त्रिया हि परमो भर्त्ता दैवतं परमं स्मृतं । तस्यात्मना तु सदृशमात्मानं परमं ददौ ।
नापराधोऽस्ति नारीणां नर एवापराध्यति । सर्व्वकार्य्यापराध्यत्वान्नापराध्यन्ति चाङ्गनाः । ९५२०
यश्च नोक्तोऽथ निर्द्देशः स्त्रिया मैथुनतृप्तये । तस्य स्मारयतो व्यक्तमधर्म्मो नास्ति संशयः ।
यावन्नारीं मातरञ्च गौरवे चाधिके स्थितां । अवध्यान्तु विजानीयुः पशवोऽप्यविचक्षणाः ।
देवतानां समावायमेकस्थं पितरं विदुः । मर्त्यानां देवतानाञ्च स्नेहादभ्येति मातरं ।
एवं विमृशतस्तस्य चिरकारितया बहु । दीर्घः कालो व्यतिक्रान्तस्ततोऽस्याभ्यागमत् पिता ।
मेधातिथिर्म्महाप्राज्ञो गौतमस्तपसि स्थितः । विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमं । ९५२५
सोऽब्रवीद्भृशसन्तप्तो दुःखेनाश्रूणि वर्त्तयन् । श्रुतधैर्य्यप्रसादेन पश्चात्तापमुपागतः ।
आश्रमं मम सम्प्राप्तस्त्रिलोकेशः पुरन्दरः । अतिथिव्रतमास्थाय ब्राह्मणं रूपमास्थितः ।
स मया सान्त्वितो वाग्भिः स्वागतेनाभिपूजितः । अर्घ्यं पाद्यं यथान्यायं मया च प्रतिपादितः ।
परवानस्मि चेत्युक्तः प्रणयिष्यति तेन च । अत्र चाकुशले जाते स्त्रिया नास्ति व्यतिक्रमः ।
एवं न स्त्री न चैवाहं नाध्वगस्त्रिदशेश्वरः । अपराध्यति धर्म्मस्य प्रमादस्त्वपराध्यति । ९५३०
ईर्ष्याजं व्यसनं प्राहुस्तेन चैवोर्द्ध्वरेतसः । ईर्ष्यया त्वहमाक्षिप्तो मग्नो दुष्कृतसागरे ।
हत्वा साध्वीञ्च नारीञ्च व्यसनित्वाच्च वासितां । भर्त्तव्यत्वेन भार्य्याञ्च को नु मां तारयिष्यति ।
अन्तरेण मया ज्ञप्तश्चिरकारीत्युदारधीः । यद्यद्य चिरकारी स्यात् स मां त्रायेत पातकात् ।
चिरकारिक भद्रन्ते भद्रन्ते चिरकारिक । यद्यद्य चिरकारी त्वं ततोऽसि चिरकारिकः ।
त्राहि मां मातरञ्चैव तपो यच्चार्ज्जितं मया । आत्मानं पातकेभ्यश्च भवाद्य चिरकारिकः । ९५३५
सहजं चिरकारित्वमतिप्रज्ञतया तव । सफलं तत्तथा तेऽस्तु भवाद्य चिरकारिकः ।
चिरमाशंसितो मात्रा चिरं गर्भेण धारितः । सफलं चिरकारित्वं कुरु त्वं चिरकारिक ।
चिरायते च सन्तापाच्चिरं स्वपिति धारितः । आवयोश्चिरसन्तापादवेक्ष्य चिरकारिक ।
एवं सुदुःखितो राजन् महर्षिर्गौतमस्तदा । चिरकारिं ददर्शाथ पुत्रं स्थितमथान्तिके ।
चिरकारी तु पितरं दृष्ट्वा परमदुःखितः । शस्त्रं त्यक्त्वा ततो मूर्द्ध्ना प्रसादायोपचक्रमे । ९५४०
गौतमस्तं ततो दृष्ट्वा शिरसा पतितं भुवि । पत्नीञ्चैव निराकारां परामभ्यागमन्मुदं ।
न हि सा तेन सम्भेदं पत्नी नीता महात्मना । विजने चाश्रमस्थेन पुत्त्रश्चापि समाहितः ।
हन्या इति समादेशः शस्त्रपाणौ सुते स्थिते । विनीते प्रसवत्यर्थे विवासे चात्मकर्म्मसु ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बुद्धिश्चासीत् सुतं दृष्ट्वा पितुश्चरणयोर्नतं । शस्त्रग्रहणचापल्यं संवृणोति भयादिति ।
ततः पित्रा चिरं स्तुत्वा चिरञ्चाघ्राय मूर्द्धनि । चिरं दोर्भ्यां परिष्वज्य चिरं जीवेत्युदाहृतः । ९५४५
एवं स गौतमः पुत्त्रं प्रीतिहर्षगणैर्युतः । अभिनन्द्य महाप्राज्ञ इदं वचनमब्रवीत् ।
चिरकारिक भद्रन्ते चिरकारी चिरं भव । चिराय यदि ते सौम्य चिरमस्मि न दुःखितः ।
गाथाश्चाप्यब्रवीद्विद्वान् गौतमो मुनिसत्तमः । चिरकारिषु धीरेषु गुणोद्देशसमाश्रयाः ।
चिरेण मित्रं बध्नीयात् चिरेण च कृतं त्यजेत् । चिरेण हि कृतं मित्रं चिरं धारणमर्हति ।
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि । अप्रिये चैव कर्त्तव्ये चिरकारी प्रशस्यते । ९५५०
बन्धूनां सुहृदाञ्चैव भृत्यानां स्त्रीजनस्य च । अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते ।
एवं स गौतमस्तत्र प्रीतः पुत्त्रस्य भारत । कर्म्मणाऽनेन कौरव्य चिरकारितया तथा ।
एवं सर्व्वेषु कार्य्येषु विमृश्य पुरुषस्ततः । चिरेण निश्चयं कृत्वा चिरं न परितप्यते ।
चिरं धारयते रोषं चिरं कर्म्म नियच्छति । पश्चात्तापकरं कर्म्म न किञ्चिदुपपद्यते ।
चिरं वृद्धानुपासीत चिरमन्वास्य पूजयेत् । चिरं धर्म्मं निषेवेत कुर्य्याच्चान्वेषणं चिरं । ९५५५
चिरमन्वास्य विदुषश्चिरं शिष्टान्निषेव्य च । चिरं विनीय चात्मानञ्चिरं यात्यनवज्ञतां ।
ब्रुवतश्च परस्यापि वाक्यं धर्म्मोपसंहितं । चिरं पृष्टोऽपि च ब्रूयात् चिरं न परितप्यते ।
उपास्य बहुलास्तस्मिन्नाश्रमे सुमहातपाः । समाः स्वर्गं गतो विप्रः पुत्त्रेण सहितस्तदा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि चिरकारिकोपाख्याने सप्तषष्ठ्यधिकद्विशततमोऽध्यायः ॥ २६७ ॥
॥ युधिष्ठिर उवाच ॥ कथं राजा प्रजा रक्षेन्न च किञ्चित् प्रघातयेत् । पृच्छामि त्वां सतां श्रेष्ठ तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । द्युमत्सेनस्य संवादं राज्ञा सत्यवता सह । ९५६०
अव्याहृतं व्याजहार सत्यवानिति नः श्रुतं । वधायोन्नीयमानेषु पितुरेवानुशासनात् ।
अधर्म्मतां याति धर्म्मो यात्यधर्म्मश्च धर्म्मतां । वधो नाम भवेद्धर्म्मो नैतद्भवितुमर्हति ।
॥ द्युमत्सेन उवाच ॥ अथ चेदवधो धर्म्मो धर्म्मः को जातुचिद्भवेत् । दस्यवश्चेन्न हन्येरन् सत्यवन् सङ्करो भवेत् ।
ममेदमिति नास्यैतत् प्रवर्त्तेत कलौ युगे । लोकयात्रा न चैव स्यादथ चेद्वेत्थ शंस नः ।
॥ सत्यवानुवाच ॥ सर्व्व एव त्रयो वर्णाः कार्य्या ब्राह्मणबन्धनाः । धर्म्मपाशनिबद्धानामन्योऽप्येवं चरिष्यति । ९५६५
यो यस्तेषामपचरेत्तमाचक्षीत वै द्विजः । अयं मे न शृणोतीति तस्मिन्राजा प्रधारयेत् ।
तत्त्वाभेदेन यच्छास्त्रं तत् कार्य्यं नान्यथाविधं । असमीक्ष्यैव कर्म्माणि नीतिशास्त्रं यथाविधि ।
दस्यून्निहन्ति वै राजा भूयसो वाऽप्यनागसः । भार्य्या माता पिता पुत्त्रो हन्यते पुरुषेण ते ।
परेणापकृतो राजा तस्मात् सम्यक् प्रधारयेत् । असाधुश्चैव पुरुषो लभते शीलमेकदा ।
साधोश्चापि ह्यसाधुभ्यः शोभना जायते प्रजा । न मूलघातः कर्त्तव्यो नैष धर्म्मः सनातनः । ९५७०
अपि खल्ववधेनैव प्रायश्चित्तं विधीयते । उद्वेजनेन बन्धेन विरूपकरणेन च ।
वधदण्डेन ते क्लेश्या न पुरोहितसंसदि । यदा पुरोहितं वा ते पर्य्येयुः शरणैषिणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

करिष्यामः पुनर्ब्रह्मन् न पापमिति वादिनः। तदा विसर्गमर्हाः स्युरितीदं धातृशासनं।
बिभ्रद्दण्डाजिनं मुण्डो ब्राह्मणोऽर्हति शासनं। गरीयांसो गरीयांसमपराधे पुनः पुनः।
तदा विसर्गमर्हन्ति न यथा प्रथमे तथा। ९५७५
॥ द्युमत्सेन उवाच ॥ यत्र यत्रैव शक्येरन् संयन्तुं समये प्रजाः। स तावान् प्रोच्यते धर्म्मो यावन्न प्रतिलङ्घ्यते।
अहन्यमानेषु पुनः सर्व्वमेव पराभवेत्। पूर्व्वे पूर्व्वतरे चैव सुशास्या ह्यभवन् जनाः।
मृदवः सत्यभूयिष्ठा अल्पद्रोहाऽल्पमन्यवः। पुरा धिग्दण्ड एवासीद्वाग्दण्डस्तदनन्तरं।
आसीदादानदण्डोऽपि बधदण्डोऽद्य वर्त्तते। बधेनापि न शक्यन्ते नियन्तुमपरे जनाः।
नैव दस्युर्म्मनुष्याणां न देवानामिति श्रुतिः। न गन्धर्व्वपितॄणाञ्च कः कस्येह न कश्चन। ९५८०
पद्मं श्मशानादादत्ते पिशाचाच्चापि दैवतं। तेषु कः समयं कुर्य्यादज्ञेषु हतबुद्धिषु।
॥ सत्यवानुवाच ॥ तान्न शक्नोषि चेत् साधून् परित्रातुमहिंसया। कस्यचिद्भूतभव्यस्य लाभेनान्तं तथा कुरु।
राजानो लोकयात्रार्थं तप्यन्ते परमं तपः। तेऽपत्रपन्ति तादृग्भ्यस्तथावृत्ता भवन्ति च।
वित्रास्यमानाः सुकृतो न कामाद्घ्नन्ति दुष्कृतीन्। सुकृतेनैव राजानो भूयिष्ठं शासते प्रजाः।
श्रेयसः श्रेयसो ऽप्येवं वृत्तं लोकोऽनुवर्त्तते। सदैव हि गुरोर्वृत्तमनुवर्त्तन्ति मानवाः। ९५८५
आत्मानमसमाधाय समाधित्सति यः परान्। विषयेष्विन्द्रियवशं मानवाः प्रहसन्ति तं।
यो राज्ञो दम्भमोहेन किञ्चित् कुर्य्यादसाम्प्रतं। सर्व्वोपायैर्नियम्यः स तथा पापान्निवर्त्तते।
आत्मैवादौ नियन्तव्यो दुष्कृतं संनियच्छता। दण्डयेच्च महादण्डैरपि बन्धूननन्तरान्।
यत्र वै पापकर्म्मा वा न महद्दुःखमर्च्छति। वर्द्धन्ते तत्र पापानि धर्म्मो ह्रसति च ध्रुवं।
इति कारुण्यशीलस्तु विद्वान् वै ब्राह्मणो ऽन्वशात्। इति चैवानुशिष्टोऽस्मि पूर्व्वैस्तात पितामहैः। ९५९०
आश्वासयद्भिः सुभृशमनुक्रोशात्तथैव च। एतत् प्रथमकल्पेन राजा कृतयुगे जयेत्।
पादोनेनापि धर्म्मेण गच्छेत्त्रेतायुगे तथा। द्वापरे तु द्विपादेन पादेन त्वपरे युगे।
तथा कलियुगे प्राप्ते राज्ञो दुश्चरितेन ह। भवेत् कालविशेषेण कला धर्म्मस्य षोडशी।
अथ प्रथमकल्पेन सत्यवन् सङ्करो भवेत्। आयुः शक्तिञ्च कालञ्च निर्द्दिश्य तप आदिशेत्।
सत्याय हि यथा नेह जह्याद्धर्म्मफलं महत्। भूतानामनुकम्पार्थं मनुः स्वायम्भुवोऽब्रवीत्। ९५९५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि द्युमत्सेनसत्यवद्वाक्ये अष्टषष्ट्यधिकद्विशतोऽध्यायः ॥ २६८ ॥
॥ युधिष्ठिर उवाच ॥ अविरोधेन भूतानां योगः षाड्गुण्यकारकः। यः स्यादुभयभाग्धर्म्मस्तन्मे ब्रूहि पितामह।
गार्हस्थ्यस्य च धर्म्मस्य योगधर्म्मस्य चोभयोः। अदूर संप्रस्थितयोः किंस्वित्श्रेयः पितामह।
॥ भीष्म उवाच ॥ उभौ धर्म्मौ महाभागावुभौ परमदुश्चरौ। उभौ महाफलौ तौ तु सद्भिराचरितावुभौ।
अत्र ते वर्त्तयिष्यामि प्रामाण्यमुभयोस्तयोः। शृणुष्वैकमनाः पार्थ च्छिन्नधर्म्मार्थसंशयं।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। कपिलस्य गोश्च संवादं तन्निबोध युधिष्ठिर। ९६००
आम्नायमनुपश्यन् हि पुराणं शाश्वतं ध्रुवं। नहुषः पूर्व्वमालेभे त्वष्टुर्गामिति नः श्रुतं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तां नियुक्तामदीनात्मा सत्त्वस्थः संयमे रतः। ज्ञानवान्नियताहारो ददर्श कपिलस्तथा।
स बुद्धिमुत्तमां प्राप्तो नैष्ठिकीमकुतोभयां। सतीमशिथिलां सत्यां वेदा इत्यब्रवीत् सकृत्।
तां गामृषिः स्यूमरश्मिः प्रविश्य यतिमब्रवीत्। हंहो वेदा यदि मता धर्म्माः के नापरे मताः।
तपस्विनो धृतिमन्तः श्रुतिविज्ञानचक्षुषः। सर्व्वमार्षं हि मन्यन्ते व्याहृतं विदितात्मनः। ९६०५
तस्यैवं गततृष्णस्य विज्वरस्य निराशिषः। का विवक्षाऽस्ति वेदेषु निरारम्भस्य सर्व्वतः।
॥ कपिल उवाच ॥ नाहं वेदान् विनिन्दामि न विवक्ष्यामि कर्हिचित्। पृथगाश्रमिणां कर्म्माण्येकार्थानीति नः श्रुतं।
गच्छत्येव परित्यागी वाणप्रस्थश्च गच्छति। गृहस्थो ब्रह्मचारी च उभौ तावपि गच्छतः।
देवयाना हि पन्थानश्चत्वारः शाश्वता मताः। एषां ज्यायःकनीयस्त्वं फलेषूक्तं बलाबलं।
एवं विदित्वा सर्व्वार्थानारभेतेति वैदिकं। नारभेतेति चान्यत्र नैष्ठिकी श्रूयते श्रुतिः। ९६१०
अनारम्भे हि दोषः स्यादारम्भे दोष उत्तमः। एवं स्थितस्य शास्त्रस्य दुर्व्विज्ञेयं बलाबलं।
यद्यत्र किञ्चित् प्रत्यक्षमहिंसायाः परं मतं। ऋते त्वागमशास्त्रेभ्यो ब्रूहि तद्यदि पश्यसि।
॥ स्यूमरश्मिरुवाच ॥ स्वर्गकामो यजेतेति सततं श्रूयते श्रुतिः। फलं प्रकल्प्य पूर्व्वं हि ततो यज्ञः प्रतायते।
अजश्चाश्वश्च मेषश्च गौश्च पक्षिगणाश्च ये। ग्राम्यारण्याश्चौषधयः प्राणस्यान्नमिति श्रुतिः।
तथैवान्नं ह्यहरहः सायम्प्रातर्निरूप्यते। पशवश्चाथ धान्यञ्च यज्ञस्याङ्गमिति श्रुतिः। ९६१५
एतानि सह यज्ञेन प्रजापतिरकल्पयत्। तेन प्रजापतिर्द्देवान् यज्ञेनायजत प्रभुः।
अस्यान्योन्यवराः सर्व्वे प्राणिनः सप्त सप्तधा। यज्ञेषूपाकृतं विश्वं प्राहुरुत्तमसंज्ञितं।
एतच्चैवाभ्यनुज्ञातं पूर्व्वैः पूर्व्वतरैस्तथा। को जातु न विचिन्वीत विद्वान् स्वां शक्तिमात्मनः।
पशवश्च मनुष्याश्च द्रुमाश्चौषधिभिः सह। स्वर्गमेवाभिकाङ्क्षन्ते न च स्वर्गस्ततो मखात्।
ओषध्यः पशवो वृक्षा वीरुदाज्यपयोदधि। हविर्भूमिर्द्दिशः श्रद्धा कालश्चैतानि द्वादश। ९६२०
ऋचो यजूंषि सामानि यजमानश्च षोडश। अग्निश्चैषां गृहपतिः स सप्तदश उच्यते।
अङ्गान्येतानि यज्ञस्य यज्ञो मूलमिति श्रुतिः। आज्येन पयसा दध्ना शकृतामिक्षया त्वचा।
वालैः शृङ्गेण पादेन सम्भवत्येव गौर्म्मखं। एवं प्रत्येकशः सर्व्वं यद्यदस्य विधीयते।
यज्ञं वहन्ति सम्भूय सहर्त्विग्भिः सदक्षिणैः। संहृत्यैतानि सर्व्वाणि यज्ञं निर्व्वर्त्तयन्त्युत।
यज्ञार्थानि हि सृष्टानि यथार्था श्रूयते श्रुतिः। एवं पूर्व्वतराः सर्व्वे प्रवृत्ताश्चैव मानवाः। ९६२५
न हिंसन्ति नारभते नाभिद्रुह्यन्ति किञ्चन। यज्ञो यष्टव्य इत्येव योजयत्यफलेप्सया।
यज्ञाङ्गान्यपि चैतानि यज्ञोक्तान्यनुपूर्व्वशः। विधिना विधियुक्तानि धारयन्ति परस्परं।
आम्नायमार्षं पश्यामि यस्मिन् वेदाः प्रतिष्ठिताः। तं विद्वांसोऽनुपश्यन्ति ब्राह्मणस्यानुदर्शनात्।
ब्राह्मणप्रभवो यज्ञो ब्राह्मणार्पण एव च। अनुयज्ञं जगत् सर्व्वं यज्ञश्चानुजगत् सदा।
ओमिति ब्रह्मणो योनिर्नमः स्वाहा स्वधा वषट्। यस्यैतानि प्रयुज्यन्ते यथाशक्ति कृतान्यपि। ९६३०
न तस्य त्रिषु लोकेषु परलोकभयं विदुः। इति वेदा वदन्तीह सिद्धाश्च परमर्षयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऋचो यजूंषि सामानि स्तोभाश्च विधिचोदिताः । यस्मिन्नेतानि सर्व्वाणि भवन्तीह स वै द्विजः ।
अग्न्याधेये यद्भवति यच्च सोमेषु ते द्विज । यच्चेतरैर्म्महायज्ञैर्व्वेद तद्भगवान् पुनः ।
तस्माद्ब्रह्मन् यजेच्चैव याजयेच्चाविचारयन् । यजतः स्वर्गविधिना प्रेत्य स्वर्गफलं महत् ।
नायं लोकोऽस्ति यज्ञानां परश्चेति विनिश्चयः । वेदवादविदश्चैव प्रमाणमुभयं तदा । ९२५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि गोकपिलीये ऊनसप्तत्यधिकद्विशतोऽध्यायः ॥ २६९ ॥
॥ कपिल उवाच ॥ एतावदनुपश्यन्ति यतयो यान्ति मार्गगाः । नैषां सर्व्वेषु लोकेषु कश्चिदस्ति व्यतिक्रमः ।
निर्द्वन्द्वा निर्नमस्कारा निराशीर्ब्बन्धना बुधाः । विमुक्ताः सर्व्वपापेभ्यश्चरन्ति शुचयोऽमलाः ।
अपवर्गेऽथ सन्त्यागे बुद्धौ च कृतनिश्चयाः । ब्रह्मिष्ठा ब्रह्मभूताश्च ब्रह्मण्येव कृतालयाः ।
विशोका नष्टरजसस्तेषां लोकाः सनातनाः । तेषां गतिं परां प्राप्य गार्हस्थ्ये किं प्रयोजनं ।
॥ स्यूमरश्मिरुवाच ॥ यद्येषा परमा काष्ठा यद्येषा परमा गतिः । गृहस्थानव्यपाश्रित्य नाश्रमोऽन्यः प्रवर्त्तते । ९३०
यथा मातरमाश्रित्य सर्व्वे जीवन्ति जन्तवः । एवं गार्हस्थ्यमाश्रित्य वर्त्तन्त इतराश्रमाः ।
गृहस्थ एव यजते गृहस्थस्तप्यते तपः । गार्हस्थ्यमस्य धर्म्मस्य मूलं यत्किञ्चिदेजते ।
प्रजनाद्धभिनिर्वृत्ताः सर्व्वे प्राणभृतो जनाः । प्रजनञ्चाप्युतान्यत्र न कथञ्चन विद्यते ।
यास्तु स्युर्वर्हिरोषध्यो वर्हिरन्यास्तथा द्विजाः । ओषधिभ्यो वर्हिर्यस्मात् प्राणात् कश्चिन्न दृश्यते ।
कस्यैषा वाग्भवेत् सत्या मोक्षो नास्ति गृहादिति । अश्रद्दधानैरप्राज्ञैः सूक्ष्मदर्शनवर्ज्जितैः । ९३५
निराशैरलसैः श्रान्तैस्तप्यमानैः स्वकर्म्मभिः । शमस्योपरमो दृष्टः प्रव्रज्यायामपण्डितैः ।
त्रैलोक्यस्यैव हेतुर्हि मर्य्यादा शाश्वती ध्रुवा । ब्राह्मणो नाम भगवन् जन्मप्रभृति पूज्यते ।
प्राग्गर्भधानान्मन्त्रा हि प्रवर्त्तन्ते द्विजातिषु । अविस्रम्भेषु वर्त्तन्ते विस्रम्भेष्वप्यसंशयं ।
दाहे पुनः संश्रयणे संस्थिते पात्रभोजने । दाने गवां पशूनां वा पिण्डानामप्सु मज्जने ।
अर्च्चिष्मन्तो वर्हिषदः क्रव्यादाः पितरस्तथा । मृतस्याप्यनुमन्यन्ते मन्त्रा मन्त्राश्च कारणं । ९४०
एवं क्रोशत्सु वेदेषु कुतो मोक्षोऽस्ति कस्यचित् । ऋणवन्तो यदा मर्त्त्याः पितृदेवद्विजातिषु ।
श्रिया विहीनैरलसैः पण्डितैः सम्प्रवर्त्तितं । वेदवादापरिज्ञानं सत्याभासमिवानृतं ।
न वै पापैर्ह्रियते कृष्यते वा यो ब्राह्मणो यजते वेदशास्त्रैः । ऊर्द्धं यज्ञैः पशुभिः सार्द्धमेति सन्तर्पितस्तर्पयते च कामैः ।
न वेदानां परिभवान्न शाठ्येन न मायया । महत् प्राप्नोति पुरुषो ब्रह्मणि ब्रह्म विन्दति ।
॥ कपिल उवाच ॥ दर्शश्च पौर्णमासश्च अग्निहोत्रञ्च धीमतः । चातुर्म्मास्यानि चैवासन् तेषु धर्म्मः सनातनः । ९४५
अनारम्भाः सुधृतयः शुचयो ब्रह्मसंज्ञिताः । ब्रह्मणैव स्म ते देवांस्तर्पयन्त्यमृतैषिणः ।
सर्व्वभूतात्मभूतस्य सर्व्वभूतानि पश्यतः । देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ।
चतुर्द्वारं पुरुषं चतुर्म्मुखं चतुर्द्धा चैनमुपयाति वाचा । बाहुभ्यां वाच उदरादुपस्थात्तेषां द्वारं द्वारपालो बुभूषेत् ।
नाक्षैर्द्दीव्येन्नाददीतान्यवित्तं न वा योनौ यस्य शृतं प्रगृह्णात् । क्रुद्धो न चैव प्रहरेत धीमान् तथाऽस्य तत् पाणि पादं सुगुप्तं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नाक्रोशमिच्छेन्न वृथा वदेच्च न पैशुनं जनवादञ्च कुर्य्यात्। सत्यव्रतो मितभाषी ऽप्रमत्तस्तथाऽस्य वाग्द्वारमथो सुगुप्तं। ९६६०
नानाशनः स्यान्न महाशनः स्यादलोलुपः साधुभिरागतः स्यात्। यात्रार्थमाहारमिहाददीत तथाऽस्य स्याज्जाठरी द्वार गुप्तिः।
न वीरपत्नीं विहरेत नारीं न चापि नारीमनृतावाह्वयीत। भार्य्याव्रतं ह्यात्मनि धारयीत तथाऽस्योपस्थद्वारगुप्तिर्भवेत।
द्वाराणि यस्य सर्व्वाणि सुगुप्तानि मनीषिणः। उपस्थमुदरं बाहू वाक् चतुर्थी भवेद्द्विज।
मोघान्यगुप्तद्वारस्य सर्व्वाण्येव भवन्त्युत। किन्तस्य तपसा कार्य्यं किं यज्ञेन किमात्मना।
अनुत्तरीयवसनमनुपस्तीर्णशायिनं। बाहूपधानं शाम्यन्तं तं देवा ब्राह्मणं विदुः। ९६६५
द्वन्द्वारामेषु सर्व्वेषु य एको रमते मुनिः। परेषामननुध्यायंस्तं देवा ब्राह्मणं विदुः।
येन सर्व्वमिदं बुद्धं प्रकृतिर्व्विकृतिश्च या। गतिज्ञः सर्व्वभूतानां तं देवा ब्राह्मणं विदुः।
अभयं सर्व्वभूतेभ्यः सर्व्वेषामभयं यतः। सर्व्वभूतात्मभूतो यस्तं देवा ब्राह्मणं विदुः।
नान्तरेणानुजानन्ति दानयज्ञक्रियाफलं। अविज्ञाय च तत् सर्व्वमन्यद्रोचयते फलं।
स्वकर्म्मभिः संश्रितानां तपो घोरत्वमागतं। तं सदाचारमाश्रित्य पुराणं शाश्वतं ध्रुवं। ९६७०
अशक्नुवन्तश्चरितुं किञ्चिद्धर्म्मेषु सूचितं। निरापद्धर्म्म आचारो ह्यप्रमादोऽपराभवः।
फलवन्ति च कर्म्माणि व्युष्टिमन्ति ध्रुवाणि च। विगुणानि च पश्यन्ति तथा नैकान्तिकानि च।
गुणाश्चात्र सुदुर्ज्ञेया ज्ञाताश्चात्र सुदुष्कराः। अनुष्ठिताश्चान्तवन्त इति त्वमनुपश्यसि।
॥ स्यूमरश्मिरुवाच ॥ यथा च वेदप्रामाण्यं त्यागश्च सफलो यथा। तौ पन्थानावुभौ व्यक्तौ भगवंस्तद्ब्रवीहि मे।
॥ कपिल उवाच ॥ प्रत्यक्षमिह पश्यन्ति भवन्तः सत्पथे स्थिताः। प्रत्यक्षन्तु किमत्रास्ति यद्भवन्त उपासते। ९६७५
॥ स्यूमरश्मिरुवाच ॥ स्यूमरश्मिरहं ब्रह्मन् जिज्ञासार्थमिहागतः। श्रेयस्कामः प्रत्यवोचमार्ज्जवान्न विवक्षया।
इमञ्च संशयं घोरं भगवान् प्रब्रवीतु मे। प्रत्यक्षमिह पश्यन्तो भवन्तः सत्पथे स्थिताः।
किमत्र प्रत्यक्षतमं भवन्तोयमुपासते। अन्यत्र तर्कशास्त्रेभ्य आगमार्थं यथागमं।
आगमो वेदवादास्तु तर्कशास्त्राणि चागमः। यथाश्रममुपासीत आगमस्तत्र सिद्ध्यति।
सिद्धिः प्रत्यक्षरूपा च दृश्यत्यागमनिश्चयात्। नौर्नावीव निबद्धा हि स्रोतसा सनिबन्धना। ९६८०
ह्रियमाणा कथं विप्र कुबुद्धींस्तारयिष्यति। एतद्ब्रवीतु भगवानुपपन्नोऽस्म्यधीहि भोः।
नैव त्यागी न सन्तुष्टो न शोको न निरामयः। नानिर्विधित्सो नावृत्तो नापवृत्तोऽस्ति कश्चन।
भवन्तोऽपि च हृष्यन्ति शोचन्ति च यथा वयं। इन्द्रियार्थाश्च भवतां समानाः सर्व्वजन्तुषु।
एवं चतुर्णां वर्णानामाश्रमाणां प्रवृत्तिषु। एकमालम्बमानानां निर्णये किं निरामयं।
॥ कपिल उवाच ॥ यद्यदाचरते शास्त्रमर्थं सर्व्वप्रवृत्तिषु। यस्य यत्र ह्यनुष्ठानं तत्र तत्र निरामयं। ९६८५
ज्ञानं श्रावयते सर्व्वं यो ज्ञानं ह्यनुवर्त्तते। ज्ञानादपेत्य या वृत्तिः सा विनाशयति प्रजाः।
भवन्तो ज्ञानिनो व्यक्तं सर्व्वतश्च निरामयाः। ऐकात्म्यं नाम कश्चिद्धि कदाचिदुपपद्यते।
शास्त्रं ह्यबुद्धा तत्त्वेन केचिद्वादबला जनाः। कामद्वेषाभिभूतत्वादहङ्कारवशं गताः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः। ब्रह्मस्तेना निरारम्भा दम्भमोहवशानुगाः।
नैर्गुण्यमेव पश्यन्ति न गुणाननुयुञ्जते। तेषां तमःशरीराणां तम एव परायणं। ९८९०
यो यथाप्रकृतिर्जन्तुः प्रकृतेः स्याद्वशानुगः। तस्य द्वेषश्च कामश्च क्रोधो दम्भोऽनृतं मदः।
नित्यमेवाभिवर्द्धन्ते गुणाः प्रकृतिसम्भवाः। एवं ध्यात्वाऽनुपश्यन्तः सन्त्यजेयुः शुभाशुभं।
परां गतिमभीप्सन्तो यतयः समये रताः।
॥ स्यूमरश्मिरुवाच ॥ सर्व्वमेतन्मया ब्रह्मन् शास्त्रतः परिकीर्त्तितं। न ह्यविज्ञाय शास्त्रार्थं प्रवर्त्तन्ते प्रवृत्तयः।
यः कश्चिन्नाय्य आचारः सर्व्वशास्त्रमिति श्रुतिः। यदन्यायमशास्त्रं तदित्येषा श्रूयते श्रुतिः। ९८९५
न प्रवृत्तिर्ऋते शास्त्रात् काचिदस्तीति निश्चयः। यदन्यद्वेदवादेभ्यस्तदशास्त्रमिति श्रुतिः।
शास्त्रादपेतं पश्यन्ति बहवो व्यक्तमानिनः। अविज्ञानहतप्रज्ञा हीनप्रज्ञास्तमोवृताः।
शास्त्रदोषान्न पश्यन्ति शोचन्ति च यथा वयं। इन्द्रियार्थांश्च भवतां समानाः सर्व्वजन्तुषु।
एवं चतुर्णां वर्णानामाश्रमाणां प्रवृत्तिषु। एकमालम्बमानानां निर्णयः सर्व्वतो दिशं।
आनन्त्यं वदमानेन शक्तेनावर्ज्जितात्मना। शक्यन्त्वेकेन युक्तेन कृतकृत्येन सर्व्वशः। ९९००
पिण्डमात्रमुपाश्रित्य चरितुं सर्व्वतोदिशं। तेनाविवदमानेन व्यक्तेन विजितात्मना।
वेदवादं व्यपाश्रित्य मोक्षोऽस्तीति प्रभाषितुं। अपेतन्यायशास्त्रेण सर्व्वलोकविगर्हिणा।
इदन्तु दुष्करं कर्म्म कुटुम्बमभिसंश्रितं। दानमध्ययनं यज्ञः प्रजासन्तानमार्ज्जवं।
यद्येतदेवं कृत्वाऽपि न विमोक्षोऽस्ति कस्यचित्। धिक् कर्त्तारञ्च कार्य्यञ्च श्रमश्चायं निरर्थकः।
नास्तिक्यमन्यथा च स्याद्वेदानां पृष्ठतः क्रिया। एतस्यानन्त्यमिच्छामि भगवन् श्रोतुमञ्जसा। ९९०५
तत्त्वं वदस्व मे ब्रह्मन्नुपसन्नोऽस्म्यधीहि भोः। यथा ते विदितो मोक्षस्तथेच्छाम्युपशिक्षितुं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि गोकपिलीये सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥
॥ कपिल उवाच ॥ वेदाः प्रमाणं लोकानां न वेदाः पृष्ठतः कृताः। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। शरीरमेतत् कुरुते यद्वेदे कुरुते तनुं।
कृतशुद्धशरीरो हि पात्रं भवति ब्राह्मणः। आनन्त्यमत्र बुद्ध्येदं कर्म्मणान्तद्ब्रवीमि ते।
निरागममनैतिह्यं प्रत्यक्षं लोकसाक्षिकं। धर्म्म इत्येव ये यज्ञान् वितन्वन्ति निराशिषः। ९९१०
उत्पन्नत्यागिनोऽलुब्धाः कृपासूयाविवर्ज्जिताः। धनानामेष वै पन्थास्तीर्थेषु प्रतिपादनं।
अनाश्रिताः पापकर्म्म कदाचित् कर्म्मयोगिनः। मनः सङ्कल्पसंसिद्धा विशुद्धज्ञाननिश्चयाः।
अक्रुध्यन्तोऽनसूयन्तो निरहङ्कारमत्सराः। ज्ञाननिष्ठास्त्रिशुक्लाश्च सर्व्वभूतहिते रताः।
आसन् गृहस्था भूयिष्ठा अव्युत्क्रान्ताः स्वकर्म्मसु। राजानश्च तथा युक्ता ब्राह्मणाश्च यथाविधि।
समा ह्यार्ज्जवसम्पन्नाः सन्तुष्टा ज्ञाननिश्चयाः। प्रत्यक्षधर्म्माः शुचयः श्रद्दधानाः परावरे। ९९१५
पुरस्ताद्भावितात्मानो यथावच्चरितव्रताः। चरन्ति धर्म्मं कृच्छ्रेऽपि दुर्गे चैवापि संहताः।
संहत्य धर्म्मं चरतां पुरासीत् सुखमेव तत्। तेषां नासीद्विधातव्यं प्रायश्चित्तं कथञ्चन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सत्यं हि धर्म्ममास्थाय दुराधर्षतमा मताः । न मात्रामनुरुध्यन्ते न धर्म्मच्छलमन्ततः ।
य एव प्रथमः कल्पस्तमेवाभ्याचरन् सह । तेषां नासीद्विधातव्यं प्रायश्चित्तं कदाचन ।
तस्मिन् विधौ स्थितानां हि प्रायश्चित्तं न विद्यते । दुर्ब्बलात्मन उत्पन्नं प्रायश्चित्तमिति श्रुतिः । ९७१०
एवं बहुविधा विप्राः पुराणा यज्ञवाहनाः । त्रैविद्यवृद्धाः शुचयो वृत्तवन्तो यशस्विनः ।
यजन्तोऽहरहर्यज्ञैर्निराशीर्ब्बन्धना बुधाः । तेषां यज्ञाश्च वेदाश्च कर्म्माणि च यथागमं ।
आगमाश्च यथाकालं संकल्पाश्च यथाक्रमं । अपेतकामक्रोधानां दुश्चराचारकर्म्मणां ।
स्वकर्म्मभिः संशितानां प्रकृत्या संशितात्मनां । ऋजूनां शमनित्यानां स्वेषु कर्म्मसु वर्त्ततां ।
सर्व्वमानन्त्यमेवासीदिति नः शाश्वती श्रुतिः । तेषामदीनसत्त्वानां दुश्चराचारकर्म्मणां । ९७१५
स्वकर्म्मभिः सम्भृतानां तपोघोरत्वमागतं । तं सदाचारमाश्चर्य्यं पुराणं शाश्वतं ध्रुवं ।
अशक्नुवद्भिश्चरितुं किञ्चिद्धर्म्मेषु सूक्ष्मतां । निरापद्धर्म्म आचारो ह्यप्रमादोऽपराभवः ।
सर्व्ववर्णेषु जातेषु नासीत्कश्चिद्व्यतिक्रमः । व्यस्तमेकश्चतुर्द्धा हि ब्राह्मणा आश्रमं विदुः ।
तं सन्तो विधिवत्प्राप्य गच्छन्ति परमां गतिं । गृहेभ्य एव निष्क्रम्य वनमन्ये समाश्रिताः ।
गृहमेवाभिसंश्रित्य ततोऽन्ये ब्रह्मचारिणः । तत्र ते दिवि दृश्यन्ते ज्योतिर्भूता द्विजातयः । ९७२०
नक्षत्राणीव धिष्ण्येषु बहवस्तारकागणाः । आनन्त्यमुपसंप्राप्ताः सन्तोषादिति वैदिकं ।
यद्यागच्छन्ति संसारं पुनर्योनिषु तादृशाः । न लिप्यन्ते पापकृत्यैः कदाचित्कर्म्मयोनितः ।
एवमेव ब्रह्मचारी शुश्रूषुर्घोरनिश्चयः । एवं युक्तो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत् ।
कर्म्मैवं पुरुषस्याह शुभं वा यदि वाऽशुभं । एवं पक्वकषायाणामानन्त्येन श्रुतेन च ।
सर्व्वमानन्त्यमासीद्वै एवं नः शाश्वती श्रुतिः । तेषामपेततृष्णानां निर्णिक्तानां शुभात्मनां । ९७२५
चतुर्थोपनिषद्धर्म्मः साधारण इति स्मृतिः । संसिद्धैः साध्यते नित्यं ब्राह्मणैर्नियतात्मभिः ।
सन्तोषमूलस्त्यागात्मा ज्ञानाधिष्ठानमुच्यते । अपवर्गमतिर्नित्यो यतिधर्म्मः सनातनः ।
साधारणः केवलो वा यथाबलमुपासते । गच्छतां गच्छतां क्षेमं दुर्ब्बलोऽत्रावसीदति ।
ब्रह्मणः पदमन्विच्छन् संसारान्मुच्यते शुचिः ।
॥ स्यूमरश्मिरुवाच ॥ ये भुञ्जते ये ददते यजन्तेऽधीयते च ये । मात्राभिरुपलब्धाभिर्ये वा त्यागं समाश्रिताः । ९७३०
एतेषां प्रेत्यभावे तु कतमः स्वर्गजित्तमः । एतदाचक्ष्व मे ब्रह्मन् यथातत्त्वेन पृच्छतः ।
॥ कपिल उवाच ॥ परिग्रहाः शुभाः सर्व्वे गुणतामभ्युपागताः । न तु त्यागसुख प्राप्ता एतत्त्वमपि पश्यसि ।
॥ स्यूमरश्मिरुवाच ॥ भवन्तो ज्ञाननिष्ठा वै गृहस्थाः कर्म्मनिश्चयाः । आश्रमाणाञ्च सर्व्वेषां निष्ठायामैक्यमुच्यते ।
एकत्वेन पृथक्त्वेन विशेषो नात्र दृश्यते । तद्यथावद्यथान्यायं भगवान् प्रब्रवीतु मे ।
॥ कपिल उवाच ॥ शरीरपक्तिः कर्म्माणि ज्ञानन्तु परमा गतिः । कषाये कर्म्मभिः पक्वे रसज्ञाने च तिष्ठति । ९७३५
आनृशंस्यं क्षमा शान्तिरहिंसा सत्यमार्ज्जवं । अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा शमस्तथा ।
पन्थानो ब्रह्मणस्त्वेते एतैः प्राप्नोति यत्परं । तद्विद्वाननुबुध्येत मनसा कर्म्मनिश्चयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

यां विप्राः सर्व्वतः शान्ता विशुद्धा ज्ञाननिश्चयाः। गतिं गच्छन्ति सन्तुष्टास्तामाहुः परमां गतिं।
वेदांश्च वेदितव्यञ्च विदित्वा च तथा स्थितिं। एवं वेदविदित्याहुरतोऽन्यो वातरेचकः।
सर्व्वं विदुर्व्वेदविदो वेदे सर्व्वं प्रतिष्ठितं। वेदे हि निष्ठा सर्व्वस्य यद्यदस्ति च नास्ति च। ९७५०
एषैव निष्ठा सर्व्वत्र यत्तदस्ति च नास्ति च। एतदन्तञ्च मध्यञ्च सर्व्वासच्च विजानतः।
समाप्तं त्याग इत्येव सर्व्वं वेदेषु निष्ठितं। सन्तोष इत्यनुगतमपवर्गे प्रतिष्ठितं।
ऋतं सत्यं विदितं वेदितव्यं सर्व्वस्यात्मा स्थावरं जङ्गमञ्च। सर्व्वं शिवं यच्छिवमुत्तरञ्च ब्रह्माव्यक्तप्रभवञ्चाव्ययञ्च।
तेजः क्षमा शान्तिरनामयं शुभं तथाविधं व्योम सनातनं ध्रुवं। एतैः सर्व्वैर्गम्यते बुद्धिनेत्रैस्तस्मै नमो ब्रह्मणे ब्राह्मणाय।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि गोकपिलीये एकसप्तत्यधिकद्विशततोऽध्यायः॥ २७१ ॥
॥ युधिष्ठिर उवाच ॥ धर्म्ममर्थञ्च कामञ्च वेदाः शंसन्ति भारत। कस्य लाभो विशिष्टोऽत्र तन्मे ब्रूहि पितामह। ९७५५
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनं। कुण्डधारेण यत् प्रीत्या भक्तायोपकृतं पुरा।
अधनो ब्राह्मणः कश्चित् कामाद्धर्म्ममवैक्षत। यज्ञार्थं स ततोऽर्थार्थी तपोऽतप्यत दारुणं।
स निश्चयमथो कृत्वा पूजयामास देवताः। भक्त्या न चैवाध्यगच्छद्धनं सम्पूज्य देवताः।
ततश्चिन्तामनुप्राप्तः कतमं दैवतन्तु तत्। यन्मे द्रुतं प्रसीदेत मानुषैरजडीकृतं।
सोऽथ सौम्येन मनसा देवानुचरमन्तिके। प्रत्यपश्यज्जलधरं कुण्डधारमवस्थितं। ९७६०
दृष्ट्वैव तं महाबाहुं तस्य भक्तिरजायत। अयं मे धास्यति श्रेयो वपुरेतद्धि तादृशं।
सन्निकृष्टश्च देवस्य न चान्यैर्म्मानुषैर्वृतः। एष मे दास्यति धनं प्रभूतं शीघ्रमेव च।
ततो धूपैश्च गन्धैश्च माल्यैरुच्चावचैरपि। बलिभिर्व्विविधाभिश्च पूजयामास तं द्विजः।
ततस्त्वल्पेन कालेन तुष्टो जलधरस्तदा। तस्योपकारनियतामिमां वाचमुवाच ह।
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा। निष्कृतिर्व्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः। ९७६५
आशायास्तनयो धर्म्मः क्रोधोऽसूयासुतः स्मृतः। लोभः पुत्रो निकृत्यायाः कृतघ्नो नार्हति प्रजां।
ततः स ब्राह्मणः स्वप्ने कुण्डधारस्य तेजसा। अपश्यत् सर्व्वभूतानि कुशेषु शयितस्तदा।
शमेन तपसा चैव भक्त्या च निरुपस्कृतः। शुद्धात्मा ब्राह्मणो रात्रौ निदर्शनमपश्यत।
माणिभद्रं स तत्रस्थं देवतानां महाद्युतिं। अपश्यत महात्मानं व्यादिशन्तं युधिष्ठिर।
तत्र देवाः प्रयच्छन्ति राज्यानि विविधानि च। शुभैः कर्म्मभिरारब्धाः प्रच्छिन्दन्त्यशुभेषु च। ९७७०
पश्यतामथ यक्षाणां कुण्डधारो महाद्युतिः। निपत्य पतितो भूमौ देवानां भरतर्षभ।
ततस्तु देववचनान्माणिभद्रो महामनाः। उवाच पतितं भूमौ कुण्डधार किमिष्यते।
कुण्डधार उवाच॥ यदि देवाः प्रसन्ना मे भक्तोऽयं ब्राह्मणो मम। अस्यानुग्रहमिच्छामि कृतं किञ्चित् सुखोदयं।
ततस्तं माणिभद्रस्तु पुनर्व्वचनमब्रवीत्। देवानामेव वचनात् कुण्डधारं महाद्युतिं।
॥ माणिभद्र उवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रन्ते कृतकृत्यः सुखी भव। धनार्थी यदि विप्रोऽयं धनमस्मै प्रदीयतां। ९७७५
यावद्धनं प्रार्थयते ब्राह्मणोऽयं सखा तव। देवानां शासनात्तावदसंख्येयं ददाम्यहं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विचार्य्य कुण्डधारस्तु मानुष्यं चलमध्रुवं । तपसे मतिमाधत्त ब्राह्मणस्य युधिष्ठिर ।
॥ कुण्डधार उवाच ॥ नाहं धनानि याचामि ब्राह्मणाय धनप्रद । अन्यमेवाहमिच्छामि भक्तायानुग्रहं कृतं ।
पृथिवीं रत्नपूर्णां वा महद्वा रत्नसञ्चयं । भक्ताय नाहमिच्छामि भवेदेष तु धार्म्मिकः ।
धर्म्मेऽस्य रमतां बुद्धिर्द्धर्म्मञ्चैवोपजीवतु । धर्म्मप्रधानो भवतु ममैषोऽनुग्रहो मतः । ९७८०
॥ मणिभद्र उवाच ॥ सदा धर्म्मफलं राज्यं सुखानि विविधानि च । फलान्येवायमश्नातु कायक्लेशविवर्ज्जितः ।
॥ भीष्म उवाच ॥ ततस्तदेव बहुशः कुण्डधारो महायशाः । अभ्यासमकरोद्धर्म्मे ततस्तुष्टाऽस्य देवताः ।
॥ मणिभद्र उवाच ॥ प्रीतास्ते देवताः सर्व्वा द्विजस्यास्य तथैव च । भविष्यत्येष धर्म्मात्मा धर्म्मे चाधास्यते मतिः ।
ततः प्रीतो जलधरः कृतकार्य्यो युधिष्ठिर । ईप्सितं मनसो लब्ध्वा वरमन्यैः सुदुर्लभं ।
ततोऽपश्यत चीराणि सूक्ष्माणि द्विजसत्तमः । पार्श्वतोऽभ्यासतो न्यस्तान्यथ निर्व्वेदमागतः । ९७८५
॥ ब्राह्मण उवाच ॥ अयं न सुकृतं वेत्ति को न्वन्यो वेत्स्यते कृतं । गच्छामि वनमेवाहं वरं धर्म्मेण जीवितुं ।
॥ भीष्म उवाच ॥ निर्व्वेदाद्देवतानाञ्च प्रसादात् स द्विजोत्तमः । वनं प्रविश्य सुमहत्तप आरब्धवांस्तदा ।
देवतातिथिशेषेण फलमूलाशनो द्विजः । धर्म्मे चास्य महाराज दृढा बुद्धिरजायत ।
त्यक्त्वा मूलफलं सर्व्वं पर्णाहारोऽभवद्द्विजः । पर्णं त्यक्त्वा जलाहारः पुनरासीद्द्विजस्तदा ।
वायुभक्षस्ततः पश्चाद्बहून् वर्षगणानभूत् । न चास्य क्षीयते प्राणस्तदद्भुतमिवाभवत् । ९७९०
धर्म्मे च श्रद्दधानस्य तपस्युग्रे च वर्त्ततः । कालेन महता तस्य दिव्या दृष्टिरजायत ।
तस्य बुद्धिः प्रादुरासीद्यदि दद्यामहं धनं । तुष्टः कस्यचिदेवेह मिथ्यावाङ्न भवेन्मम ।
ततः प्रहृष्टवदनो भूय आरब्धवांस्तपः । भूयश्चाचिन्तयत् सिद्धो यत्परं सोऽभिमन्यते ।
यदि दद्यामहं राज्यं तुष्टो वै यस्य कस्यचित् । स भवेदचिराद्राजा न मिथ्या वाग्भवेन्मम ।
तस्य साक्षात् कुण्डधारो दर्शयामास भारत । ब्राह्मणस्य तपोयोगात् सौहृदेनाभिचोदितः । ९७९५
समागम्य स तेनाथ पूजाञ्चक्रे यथाविधि । ब्राह्मणः कुण्डधारस्य विस्मितश्चाभवन्नृप ।
ततोऽब्रवीत् कुण्डधारो दिव्यन्ते चक्षुरुत्तमं । पश्य राज्ञां गतिं विप्र लोकांश्चैव तु चक्षुषा ।
ततो राजसहस्राणि मग्नानि निरये तदा । दूरादपश्यद्विप्रः स दिव्ययुक्तेन चक्षुषा ।
॥ कुण्डधार उवाच ॥ मां पूजयित्वा भावेन यदि त्वं दुःखमाप्नुयाः । कृतं मया भवेत् किन्ते कश्च तेऽनुग्रहो भवेत् ।
पश्य पश्य च भूयस्त्वं कामानिच्छेत् कथं नरः । स्वर्गद्वारं हि संरुद्धं मानुषेषु विशेषतः । ९८००
॥ भीष्म उवाच ॥ ततोऽपश्यत् स कामञ्च क्रोधं लोभं भयं मदं । निद्रां तन्द्रीं तथालस्यमावृत्य पुरुषान् स्थितान् ।
॥ कुण्डधार उवाच ॥ एतैर्लोकाः सुसंरुद्धा देवानां मानुषाद्भयं । तथैव देववचनाद्विघ्नं कुर्व्वन्ति सर्व्वशः ।
न देवैरननुज्ञातः कश्चिद्भवति धार्म्मिकः । एष शक्तोऽसि तपसा दातुं राज्यं धनानि च ।
॥ भीष्म उवाच ॥ ततः पपात शिरसा ब्राह्मणस्तोयधारिणे । उवाच चैनं धर्म्मात्मा महान्मेऽनुग्रहः कृतः । ९८०५
कामलोभानुबन्धेन पुरा ते यदसूयितं । मया स्नेहमविज्ञाय तच्च मे क्षन्तुमर्हसि ।
क्षान्तमेव मयेत्युक्त्वा कुण्डधारो द्विजर्षभं । सम्परिष्वज्य बाहुभ्यां तत्रैवान्तरधीयत ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततः सर्व्वांस्तदा लोकान् ब्राह्मणोऽनुचचार ह। कुण्डधारप्रसादेन तपसा सिद्धिमागतः।
विहायसा च गमनं तथा सङ्कल्पितार्थता। धर्म्मात् शक्त्या तथा योगात् या चैव परमा गतिः।
देवता ब्राह्मणाः सन्तो यक्षा मानुषचारणाः। धार्म्मिकान् पूजयन्तीह न धनाढ्यान्न कामिनः।
सुप्रसन्ना हि ते देवा यत्ते धर्म्मे रता मतिः। धने सुखकला काचित् धर्म्मे तु परमं सुखं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि कुण्डधारोपाख्याने द्विसप्तत्यधिकद्विशतोऽध्यायः ॥ २७२ ॥
॥ युधिष्ठिर उवाच ॥ बहूनां यज्ञतपसामेकार्थानां पितामह। धर्म्मार्थं न सुखार्थार्थं कथं यज्ञः समाहितः।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि नारदेनानुकीर्त्तितं। उञ्छवृत्तेः पुरावृत्तं यज्ञार्थे ब्राह्मणस्य च।
॥ नारद उवाच ॥ राष्ट्रे धर्म्मोत्तरे श्रेष्ठे विदर्भेष्वभवद्द्विजः। उञ्छवृत्तिर्ऋषिः कश्चिद्यज्ञं यष्टुं समादधे।
श्यामाकमशनन्तत्र सूर्य्यपर्णी सुवर्च्चला। तिक्तञ्च विरसं शाकं तपसा स्वादुतां गतं।
उपगम्य वने सिद्धिं सर्व्वभूताविहिंसया। अपि मूलफलैरिष्टो यज्ञः स्वर्ग्यः परन्तप।
तस्य भार्य्या व्रतकृशा शुचिः पुष्करधारिणी। यज्ञपत्नी समानीता सत्येनानुविधीयते।
सा तु शापपरित्रस्ता तत्स्वभावानुवर्त्तिनी। मायूरजीर्णपर्णानां वस्त्रं तस्यास्तु वर्णितं।
अकामया कृतस्तत्र यज्ञो होत्रनुशासनात्। शुक्रस्य चापध्यानात्तु पुनराज्ञाति धर्म्मवित्।
तस्मिन् वने समीपस्थो मृगोऽभूत् सहवासिकः। वचोभिरब्रवीत् सत्यं त्वयेदं दुष्कृतं कृतं।
यदि मन्त्राङ्गहीनोऽयं यज्ञो भवति वै कृतः। माम्भोः प्रक्षिप होत्रे त्वं गच्छ स्वर्गमनिन्दितः।
ततस्तु यज्ञे सावित्री साक्षात्तं संन्यमन्त्रयत्। निमन्त्रयन्ती प्रत्युक्ता न हन्यां सहवासिनं।
एवमुक्ता निवृत्ता सा प्रविष्टा यज्ञपावकं। किन्नु दुश्चरितं यज्ञे दिदृक्षुः सा रसातलं।
स तु बद्धाऽञ्जलिं सत्यमयाचद्धरिणः पुनः। सत्येन स परिष्वज्य सन्दिष्टो गम्यतामिति।
ततः स हरिणो गत्वा पदान्यष्टौ न्यवर्त्तत। साधु हिंसय मां सत्य हतो यास्यामि सद्गतिं।
पश्य ह्यप्सरसो दिव्या मया दत्तेन चक्षुषा। विमानानि विचित्राणि गन्धर्व्वाणां महात्मनां।
ततः स सुचिरं दृष्ट्वा स्पृहालग्नेन चक्षुषा। मृगमालोक्य हिंसायां स्वर्गवासं समर्थयत्।
स तु धर्म्मो मृगो भूत्वा बहुवर्षोषितो वने। तस्य निष्कृतिमाधत्त न ह्येषा यज्ञसंविधिः।
तस्य तेनानुभावेन मृगहिंसात्मनस्तदा। तपो महत् समुच्छिन्नं तस्माद्धिंसा न यज्ञिया।
ततस्तं भगवान् धर्म्मो यज्ञं याजयत स्वयं। समाधानञ्च भार्य्याया लेभे स तपसा परं।
अहिंसा सकलो धर्म्मो हिंसाधर्म्मस्तथाविधः। सत्यन्तेऽहं प्रवक्ष्यामि यो धर्म्मः सत्यवादिनां।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि यज्ञनिन्दायां त्रिसप्तत्यधिकद्विशतोऽध्यायः ॥ २७३ ॥
॥ युधिष्ठिर उवाच ॥ कथम्भवति पापात्मा कथं धर्म्मं करोति वा। केन निर्व्वेदमादत्ते मोक्षं वा केन गच्छति।
॥ भीष्म उवाच ॥ विदिताः सर्व्वधर्म्मास्ते स्थित्यर्थं त्वन्तु पृच्छसि। शृणु मोक्षं सनिर्व्वेदं पापं धर्म्मञ्च मूलतः।
विज्ञायार्थं हि पञ्चानामिच्छापूर्व्वं प्रवर्त्तते। प्राप्य तान् जायते कामो द्वेषो वा भरतर्षभ।
ततस्तदर्थं यतते कर्म्म चारभते महत्। इष्टानां रूपगन्धानामभ्यासञ्च चिकीर्षति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो रागः प्रभवति द्वेषस्य तदनन्तरं । ततो लोभः प्रभवति मोहस्य तदनन्तरं । ९८३५
लोभमोहाभिभूतस्य रागद्वेषान्वितस्य च । न धर्म्मे जायते बुद्धिर्व्याजाद्धर्म्मं करोति च ।
व्याजेन चरते धर्म्ममर्थं व्याजेन रोचते । व्याजेन सिद्ध्यमानेषु धनेषु कुरुनन्दन ।
तत्रैव कुरुते बुद्धिं ततः पापं चिकीर्षति । सुहृद्भिर्व्वार्य्यमाणोऽपि पण्डितैश्चापि भारत ।
उत्तरं न्यायसम्बन्धं ब्रवीति विधिचोदितं । अधर्म्मस्त्रिविधस्तस्य वर्द्धते रागमोहजः ।
पापं चिन्तयते चैव प्रब्रवीति करोति च । तस्याधर्म्मप्रवृत्तस्य दोषान् पश्यन्ति साधवः । ९८४०
एकशीलाश्च मित्रत्वं भजन्ते पापकर्म्मिणः । स नेह सुखमाप्नोति कुत एव परत्र वै ।
एवम्भवति पापात्मा धर्म्मात्मानन्तु मे शृणु । यथा कुशलधर्म्मा स कुशलं प्रतिपद्यते ।
कुशलेनैव धर्म्मेण गतिमिष्टां प्रपद्यते । य एतान् प्रज्ञया दोषान् पूर्व्वमेवानुपश्यति ।
कुशलः सुखदुःखानां साधूंश्चाप्युपसेवते । तस्य साधुसमाचारादभ्यासाच्चैव वर्द्धते ।
प्रज्ञा धर्म्मे च रमते धर्म्मञ्चैवोपजीवति । सोऽयं धर्म्मादवाप्तेषु धनेषु कुरुते मनः । ९८४५
तस्यैव सिञ्चते मूलं गुणान् पश्यति यत्र वै । धर्म्मात्मा भवति ह्येवं मित्रञ्च लभते शुभं ।
स मित्रधनलाभात्तु प्रेत्य चेह च नन्दति । शब्दे स्पर्शे रसे रूपे तथा गन्धे च भारत ।
प्रभुत्वं लभते जन्तुर्द्धर्म्मस्यैतत् फलं विदुः । स तु धर्म्मफलं लब्ध्वा न हृष्यति युधिष्ठिर ।
अतृप्यमानो निर्व्वेदमादत्ते ज्ञानचक्षुषा । प्रज्ञाचक्षुर्यदा कामे रसे गन्धे न रज्यते ।
शब्दे स्पर्शे तथा रूपे न च भावयते मनः । विमुच्यते तदा कामान्न च धर्म्मं विमुञ्चति । ९८५०
धर्म्मत्यागे च यतते दृष्ट्वा लोकं क्षयात्मकं । ततो मोक्षाय यतते नानुपायादुपायतः ।
शनैर्निर्व्वेदमादत्ते पापं कर्म्म जहाति च । धर्म्मात्मा नैव भवति मोक्षञ्च लभते परं ।
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि । पापं धर्म्मं तथा मोक्षो निर्व्वेदश्चैव भारत ।
तस्माद्धर्म्मे प्रवर्त्तेथाः सर्व्वावस्थं युधिष्ठिर । धर्म्मे स्थितानां कौन्तेय सिद्धिर्भवति शाश्वती ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि चतुःप्राश्निके चतुःसप्तत्यधिकद्विशतोऽध्यायः ॥ २७४ ॥
॥ युधिष्ठिर उवाच ॥ मोक्षः पितामहेनोक्त उपायान्नानुपायतः । तमुपायं यथान्यायं श्रोतुमिच्छामि भारत । ९८५५
॥ भीष्म उवाच ॥ त्वय्येवैतन्महाप्राज्ञ युक्तं निपुणदर्शनं । येनोपायेन सर्व्वार्थं नित्यं मृगयसेऽनघ ।
करणे घटस्य या बुद्धिर्घटोत्पत्तौ न सा मता । एवं धर्म्माभ्युपायेषु नान्यद्धर्म्मेषु कारणं ।
पूर्व्वे समुद्रे यः पन्था न स गच्छति पश्चिमं । एकः पन्था हि मोक्षस्य तन्मे विस्तरतः शृणु ।
क्षमया क्रोधमुच्छिन्द्यात् कामं सङ्कल्पवर्ज्जनात् । सत्त्वसंसेवनाद्धीरो निद्राञ्च च्छेत्तुमर्हति ।
अप्रमादाद्भयं रक्षेत् श्वासं क्षेत्रज्ञशीलनात् । इच्छां द्वेषञ्च कामञ्च धैर्य्येण विनिवर्त्तयेत् । ९८६०
भ्रमं संमोहमावर्त्तमभ्यासाद्विनिवर्त्तयेत् । निद्राञ्च प्रतिभाञ्चैव ज्ञानाभ्यासेन तत्त्ववित् ।
उपद्रवांस्तथा रोगान् हितजीर्णमिताशनात् । लोभं मोहञ्च सन्तोषाद्विषयांस्तत्त्वदर्शनात् ।
अनुक्रोशादधर्म्मञ्च जयेद्धर्म्ममवेक्षया । आयत्या च जयेदाशामर्थं सङ्गविवर्ज्जनात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनित्यत्वेन च स्नेहं क्षुधां योगेन पण्डितः। कारुण्येनात्मनो मानं तृष्णाञ्च परितोषतः।
उत्थानेन जयेत्तन्द्रीं वितर्कं निश्चयाज्जयेत्। मौनेन बहुभाष्यञ्च शौर्य्येण च भयं त्यजेत्। ९८६५
यच्छेद्वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा। ज्ञानमात्मावबोधेन यच्छेदात्मानमात्मना।
तदेतदुपशान्तेन बोद्धव्यं शुचिकर्म्मणा। योगदोषान् समुच्छिद्य पञ्च यान् कवयो विदुः।
कामं क्रोधञ्च लोभञ्च भयं स्वप्नञ्च पञ्चमं। परित्यज्य निषेवेत यतवाग्योगसाधनात्।
ध्यानमध्ययनं दानं सत्यं ह्रीरार्ज्जवं क्षमा। शौचमाहारतः शुद्धिरिन्द्रियाणाञ्च संयमः।
एतैर्विवर्द्धते तेजः पाप्मानमुपहन्ति च। सिध्यन्ति चास्य सङ्कल्पा विज्ञानञ्च प्रवर्त्तते। ९८७०
धूतपापः स तेजस्वी लघ्वाहारो जितेन्द्रियः। कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं।
अमूढत्वमसङ्गित्वं कामक्रोधविवर्ज्जनं। अदैन्यमनुदीर्णत्वमनुद्वेगो व्यवस्थितिः।
एष मार्गो हि मोक्षस्य प्रसन्नो विमलः शुचिः। तथा वाक्कायमनसां नियमः कामतोऽन्यथा।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि योगाचारानुवर्णने पञ्चसप्तत्यधिकद्विशतोऽध्यायः॥ २७५ ॥
॥ भीष्म उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनं। नारदस्य च संवादं देवलस्यासितस्य च।
आसीनं देवलं वृद्धं बुद्ध्वा बुद्धिमतांवरं। नारदः परिपप्रच्छ भूतानां प्रभवाप्ययं। ९८७५
॥ नारद उवाच ॥ कुतः सृष्टमिदं विश्वं ब्रह्मन् स्थावरजङ्गमं। प्रलये च कमभ्येति तद्भवान् प्रब्रवीतु मे।
॥ असित उवाच ॥ येभ्यः सृजति भूतानि कालो भावप्रचोदितः। महाभूतानि पञ्चेति तान्याहुर्भूतचिन्तकाः।
तेभ्यः सृजति भूतानि काल आत्मप्रचोदितः। एतेभ्यो यः परं ब्रूयादसद्ब्रूयादसंशयं।
विद्धि नारद पञ्चैतान् शाश्वतानचलान् ध्रुवान्। महतस्तेजसो राशीन् कालषष्ठान् स्वभावतः।
आपश्चैवान्तरीक्षञ्च पृथिवी वायुपावकौ। नासीद्धि परमन्तेभ्यो भूतेभ्यो मुक्तसंशयं। ९८८०
नोपपत्त्या न वा युक्त्या त्वसद्ब्रूयादसंशयं वेत्थ तानभिनिर्वृत्तान् षडेते यस्य राशयः।
पञ्चैव तानि कालश्च भावाभावौ च केवलौ। अष्टौ भूतानि भूतानां शाश्वतानि भवात्ययौ।
अभावं यान्ति तेष्वेव तेभ्यश्च प्रभवन्त्यपि। विनष्टोऽपि च तान्येव जन्तुर्भवति पञ्चधा।
तस्य भूमिमयो देहः श्रोत्रमाकाशसम्भवं। सूर्य्याच्चक्षुरसो वायोरद्भ्यस्तु खलु शोणितं।
चक्षुषी नासिका कर्णौ त्वग्जिह्वेति च पञ्चमी। इन्द्रियाणीन्द्रियार्थानां ज्ञानानि कवयो विदुः। ९८८५
दर्शनं श्रवणं घ्राणं स्पर्शनं रसनन्तथा। उपपत्त्या गुणान् विद्धि पञ्च पञ्चसु पञ्चधा।
रूपं गन्धो रसः स्पर्शः शब्दश्चैवाथ तद्गुणाः। इन्द्रियैरुपलभ्यन्ते पञ्चधा पञ्च पञ्चभिः।
रूपं गन्धं रसं स्पर्शं शब्दञ्चैवाथ तद्गुणान्। इन्द्रियाणि न बुध्यन्ते क्षेत्रज्ञस्तैस्तु बुध्यते।
चित्तमिन्द्रियसङ्घातात्परं तस्मात् परं मनः। मनसस्तु परा बुद्धिः क्षेत्रज्ञो बुद्धितः परः।
पूर्व्वं चेतयते जन्तुरिन्द्रियैर्व्विषयान् पृथक्। विचार्य्य मनसा पश्चादथ बुद्ध्या व्यवस्यति। ९८९०
इन्द्रियैरुपलब्धार्थान् बुद्धिमांस्तु व्यवस्यति। चित्तमिन्द्रियसङ्घातं मनो बुद्धिस्तथाष्टमी।
अष्टौ ज्ञानेन्द्रियाण्याहुरेतान्यध्यात्मचिन्तकाः। पाणिपादञ्च पायुञ्च मेहनं पञ्चमंमुखं।

CC-0. In Public Domain. Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति संशब्दमानानि शृणु कर्म्मेन्द्रियाण्यपि । जल्पनाभ्यवहारार्थं मुखमिन्द्रियमुच्यते ।
गमनेन्द्रियं तथा पादौ कर्म्मणः करणे करौ । पायूपस्थं विसर्गार्थमिन्द्रिये तुल्यकर्म्मणी ।
विसर्गे च पुरीषस्य विसर्गे चापि कामिके । बलं षष्ठं षडेतानि वाचा सम्यग्यथागमं । ९८९५
ज्ञानचेष्टेन्द्रियगुणाः सर्व्वे संशब्दिता मया । इन्द्रियाणां स्वकर्म्मभ्यः श्रमादुपरमो यदा ।
भवतीन्द्रियसन्त्यागादथ स्वपिति वै नरः । इन्द्रियाणां व्युपरमे मनो व्युपरतं यदि ।
सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनं । सात्त्विकास्चैव ये भावास्तथा तामसराजसाः ।
कर्म्मयुक्तान् प्रशंसन्ति सात्त्विकानितरांस्तथा । आनन्दः कर्म्मणां सिद्धिः प्रतिपत्तिः परा गतिः ।
सात्त्विकस्य निमित्तानि भावान् संश्रयते स्मृतिः । जन्तुष्वेकतमेष्वेवं भावा ये विधिमाश्रिताः । ९९००
भावयोरीप्सितं नित्यं प्रत्यक्षं गमनन्तयोः । इन्द्रियाणि च भावाश्च गुणाः सप्तदश स्मृताः ।
तेषामष्टादशो देही यः शरीरे स शाश्वतः । अथ वा सशरीरास्ते गुणाः सर्व्वे शरीरिणां ।
संश्रितास्तद्वियोगे हि सशरीरा न सन्ति ते । अथवा सन्निपातोऽयं शरीरं पाञ्चभौतिकं ।
एकश्च दश चाष्टौ च गुणाः सह शरीरिणा । उष्मणा सह विंशो वा संघातः पाञ्चभौतिकः ।
महान् सन्धारयत्येतच्छरीरं वायुना सह । तस्य प्रभावयुक्तस्य निमित्तं देहभेदने । ९९०५
तथैवोत्पद्यते किञ्चित्पञ्चत्वं गच्छते तथा । पुण्यपापविनाशान्ते पुण्यपापसमीरितः ।
देहं विशति कालेन ततोऽयं कर्म्मसम्भवं । हित्वा हित्वा ह्ययं प्रैति देहाद्देहं कृताश्रयः ।
कालसञ्चोदितः क्षेत्री विशीर्णाद्वा गृहाद्गृहं । तत्र नैवानुतप्यन्ते प्राज्ञा निश्चितनिश्चयाः ।
कृपणास्त्वनुतप्यन्ते जनाः सम्बन्धदर्शिनः । न ह्ययं कस्यचित्कश्चिन्नास्य कश्चन विद्यते ।
भवत्येको ह्ययं नित्यं शरीरे सुखदुःखकृत् । नैव संजायते जन्तुर्न्न च जातु विपद्यते । ९९१०
याति देहमयं मुक्त्वा कदाचित्परमां गतिं । पुण्यपापमयं देहं क्षपयन् कर्म्मसंक्षयात् ।
क्षीणदेहः पुनर्द्देही ब्रह्मत्वमुपगच्छति । पुण्यपापक्षयार्थं हि सांख्यज्ञानं विधीयते ।
तत्क्षये ह्यस्य पश्यन्ति ब्रह्मभावे परां गतिं ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारदासितसंवादे षट्सप्तत्यधिकद्विशततोऽध्यायः ॥ २७६ ॥

॥ युधिष्ठिर उवाच ॥ भ्रातरः पितरः पौत्त्रा ज्ञातयः सुहृदः सुताः । अर्थहेतोर्हताः क्रूरैरस्माभिः पापकर्म्मभिः ।
येयमर्थोद्भवा तृष्णा कथमेतां पितामह । निवर्त्तयेयं पापानि तृष्णया कारिता वयं । ९९१५
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । गीतं विदेहराजेन माण्डव्यायानुपृच्छते ।
सुसुखं वत जीवामि यस्य मे नास्ति किञ्चन । मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन ।
अर्थाः खलु समृद्धा हि वाढं दुःखं विजानतां । असमृद्धास्त्वपि सदा मोहयन्त्यविचक्षणान् ।
यच्च कामसुखं लोके यच्च दिव्यं महत् सुखं । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां ।
यथैव शृङ्गं गोः काले वर्द्धमानस्य वर्द्धते । तथैव तृष्णा वित्तेन वर्द्धमानेन वर्द्धते । ९९२०
किञ्चिदेव ममत्वेन यदा भवति कल्पितं । तदेव परितापाय नाशे सम्पद्यते पुनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नकामाननुरुध्येत दुःखं कामेषु वै रतिः । प्राप्यार्थमुपयुञ्जीत धर्म्मं कामान् विसर्ज्जयेत् ।
विद्वान् सर्व्वेषु भूतेषु आत्मना सोपमो भवेत् । कृतकृत्यो विशुद्धात्मा सर्व्वं त्यजति चैव ह ।
उभे सत्यानृते त्यक्त्वा शोकानन्दौ प्रियाप्रिये । भयाभये च संत्यज्य संप्रशान्तो निरामयः ।
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतः । योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखं । ९९२५
चारित्रमात्मनः पश्यंश्चन्द्रशुद्धमनामयं । धर्म्मात्मा लभते कीर्त्तिं प्रेत्य चेह यथासुखं ।
राज्ञस्तद्वचनं श्रुत्वा प्रीतिमानभवद्द्विजः । पूजयित्वा च तद्वाक्यं माण्डव्यो मोक्षमाश्रितः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि माण्डव्यजनकसंवादे सप्तसप्तत्यधिकद्विशततोऽध्यायः ॥ २७७ ॥
॥ युधिष्ठिर उवाच ॥ अतिक्रामति कालेऽस्मिन् सर्व्वभूतभयावहे । किं श्रेयः प्रतिपद्येत तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । पितुः पुत्त्रेण संवादं तन्निबोध युधिष्ठिर ।
द्विजातेः कस्यचित् पार्थ स्वाध्यायनिरतस्य वै । पुत्त्रो बभूव मेधावी मेधावी नाम नामतः । ९९३०
सोऽब्रवीत् पितरं पुत्त्रः स्वाध्यायकरणे रतं । मोक्षधर्म्मेष्वकुशलं मोक्षधर्म्मविचक्षणः ।
॥ पुत्त्र उवाच ॥ धीरः किं स्वित्तात कुर्य्यात् प्रजानन् क्षिप्रं ह्यायुर्भ्रश्यते मानवानां । पितस्तथाख्याहि यथार्थयोगं ममानुपूर्व्व्या येन धर्म्मं चरेयं ।
॥ पितोवाच ॥ अधीत्य वेदान् ब्रह्मचर्य्येषु पुत्त्र पुत्त्रानिच्छेत् पावनार्थं पितॄणां । अग्नीनाधाय विधिवच्चेष्टयज्ञो वनं प्रविश्याथ मुनिर्बुभूषेत् ।
॥ पुत्त्र उवाच ॥ एवमभ्याहते लोके सर्व्वतः परिवारिते । अमोघासु पतन्तीषु किं धीर इव भाषसे ।
॥ पितोवाच ॥ कथमभ्याहतो लोकः केन वा परिवारितः । अमोघाः काः पतन्तीह किं नु भीषयसीव मां । ९९३५
॥ पुत्त्र उवाच ॥ मृत्युनाऽभ्याहतो लोको जरया परिवारितः । अहोरात्राः पतन्तीमे तच्च कस्मान्न बुध्यसे ।
यदाऽहमेव जानामि न मृत्युस्तिष्ठतीति ह । सोऽहं कथं प्रतीक्षिष्ये ज्ञानेनापिहितश्चरन् ।
रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा । गाधोदके मत्स्य इव सुखं विन्देत कस्तदा ।
पुष्पाणीव विचिन्वन्तमन्यत्र गतमानसं । अनवाप्तेषु कामेषु मृत्युरभ्येति मानवं ।
श्वः कार्य्यमद्य कुर्व्वीत पूर्व्वाह्णे चापराह्णिकं । न हि प्रतीक्षते मृत्युः कृतं वाऽस्य न वा कृतं । ९९४०
अद्यैव कुरु यच्छ्रेयो मा त्वां कालोऽत्यगान्महान् । को हि जानाति कस्याद्य मृत्युकालो भविष्यति ।
अकृतेष्वेव कार्य्येषु मृत्युर्व्वै सम्प्रकर्षति । युवैव धर्म्मशीलः स्यादनिमित्तं हि जीवितं ।
कृते धर्म्मे भवेत् प्रीतिरिह प्रेत्य च शाश्वती । मोहेन हि समाविष्टः पुत्त्रदारार्थमुद्यतः ।
कृत्वा कार्य्यमकार्य्यं वा तुष्टिमेषां प्रयच्छति । तं पुत्त्रपशुसम्पन्नं व्यासक्तमनसं नरं ।
सुप्तं व्याघ्रं महौघो वा मृत्युरादाय गच्छति । संचिन्वानकमेवैनं कामानामवितृप्तकं । ९९४५
वृकीवोरणमासाद्य मृत्युरादाय गच्छति । इदं कृतमिदं कार्य्यमिदमन्यत् कृताकृतं ।
एवमीहासमायुक्तं मृत्युरादाय गच्छति । कृतानां फलमप्राप्तं कार्य्याणां कर्म्मसङ्गिनां ।
क्षेत्रापणगृहासक्तं मृत्युरादाय गच्छति । दुर्व्बलं बलवन्तञ्च प्राज्ञं शूरं जडं कविं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation- Jalgaon

अप्राप्तसर्व्वकामार्थं मृत्युरादाय गच्छति । मृत्युर्ज्जरा च व्याधिश्च दुःखञ्चानेककारणं ।
असन्त्याज्यं यदा मर्त्यै. किं स्वस्थ इव तिष्ठसि । जातमेवान्तकोऽन्ताय जरा चाभ्येति देहिनं । ९९५०
अनुषक्ता द्वयेनैते भावाः स्थावरजङ्गमाः । न मृत्युसेनामायान्तीं जातु कश्चित् प्रबाधते ।
बलात् सत्यमृते लेकं सत्ये ह्यमृतमाश्रितं । मृत्योर्व्वा गृहमेतद्वै या ग्रामे वसतो रतिः ।
देवानामेष वै गोष्ठो यदरण्यमिति श्रुतिः । निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्त्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः । यो न हिंसति सत्त्वानि मनोवाक्कर्म्महेतुभिः ।
जीवितार्थापनयनैः प्राणिभिर्न स बध्यते । तस्मात् सत्यव्रताचारः सत्यव्रतपरायणः । ९९५५
सत्यकामः समो दान्तः सत्येनैवान्तकं जयेत् । अमृतञ्चैव मृत्युश्च द्वयं देहे प्रतिष्ठितं ।
मृत्युरापद्यते मोहात् सत्येनापद्यतेऽमृतं । सोऽहं सत्यमहिंसार्थी कामक्रोधवहिष्कृतः ।
समाश्रित्य सुखं क्षेमी मृत्युं हास्याम्यमृत्युवत् । शान्तियज्ञरतो दान्तो ब्रह्मयज्ञे स्थितो मुनिः ।
वाङ्मनःकर्म्मयज्ञश्च भविष्याम्युदगायने । पशुयज्ञैः कथं हिंस्रैर्म्मादृशो यष्टुमर्हति ।
अन्तवद्भिरुत प्राज्ञः क्षत्रयज्ञैः पिशाचवत् । आत्मन्येवात्मना जात आत्मनिष्ठोऽप्रजः पितः । ९९६०
आत्मयज्ञो भविष्यामि न मां तारयति प्रजा । यस्य वाङ्मनसी स्यातां सम्यक् प्रणिहिते सदा ।
तपस्त्यागश्च योगश्च स तैः सर्व्वमवाप्नुयात् । नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं फलं ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं ।
नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च । शीले स्थितिर्द्दण्डविधानमार्ज्जवं ततस्ततश्चोपरमः क्रियाभ्यः ।
किन्ते धनैर्ब्बान्धवैर्व्वाऽपि किन्ते किन्ते दारैर्ब्राह्मण यो मरिष्यसि । आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क गताः पिता च । ९९६५
॥ भीष्म उवाच ॥ पुत्त्रस्यैतद्वचः श्रुत्वा तथाऽकार्षीत पिता नृप । तथा त्वमपि वर्त्तस्व सत्यधर्म्मपरायणः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पितापुत्त्रसंवादे अष्टसप्तत्यधिकद्विशतोऽध्यायः ॥ २७८ ॥

॥ युधिष्ठिर उवाच ॥ किंशीलः किंसमाचारः किंविद्यः किंपरायणः । प्राप्नोति ब्रह्मणः स्थानं यत् परं प्रकृतेर्ध्रुवं ।
॥ भीष्म उवाच ॥ मोक्षधर्म्मेषु निरतो लघ्वाहारो जितेन्द्रियः । प्राप्नोति परमं स्थानं यत् परं प्रकृतेर्ध्रुवं ।
स्वगृहादभिनिःसृत्य लाभालाभे समो मुनिः । समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ।
न चक्षुषा न मनसा न वाचा दूषयेदपि । न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत् क्वचित् । ९९७०
न हिंस्यात् सर्व्वभूतानि मैत्रायणगतश्चरेत् । नेदं जीवितमासाद्य वैरं कुर्व्वीत केनचित् ।
अभिवादांस्तितिक्षेत नाभिमन्येत किञ्चन । क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदेत् ।
प्रदक्षिणञ्च सव्यञ्च ग्राममध्ये न चाचरेत् । भैक्षचर्य्यामनापन्नो न गच्छेत् पूर्व्वकेतितः ।
अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत् । मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादकत्थनः ।
विधूमे न्यस्तमुषले व्यङ्गारे भुक्तवज्जने । अतीतपात्रसञ्चारे भिक्षां लिप्सेत वै मुनिः । ९९७५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राणयात्रिकमात्रः स्यान्मात्रालाभेष्वनादृतः । अलाभे न विहन्येत लाभश्चैनं न हर्षयेत् ।
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः । अभिपूजितलाभं हि जुगुप्सेतैव तादृशः ।
न चान्नदोषान्निन्देत न गुणानभिपूजयेत् । शय्यासने विविक्ते च नित्यमेवाभिपूजयेत् ।
शून्यागारं वृक्षमूलमरण्यमथवा गुहां । अज्ञातचर्य्यां गत्वाऽन्यां ततोऽन्यत्रैव संविशेत् ।
अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः । सुकृतं दुष्कृतञ्चोभे नानुरुध्येत कर्म्मणा । ९९८०
नित्यतृप्तः सुसन्तुष्टः प्रसन्नवदनेन्द्रियः । विभीर्जप्यपरो मौनी वैराग्यं समुपाश्रितः ।
अभ्यस्तं भौतिकं पश्यन् भूतानामागतिं गतिं । निःस्पृहः समदर्शी च पक्वापक्वेन वर्त्तयन् ।
आत्मना यः प्रशान्तात्मा लघ्वाहारो जितेन्द्रियः ।
वाचो वेगं मनसः क्रोधवेगं हिंसावेगमुदरोपस्थवेगं । एतान् वेगान् विषहेद्वै तपस्वी निन्दा चास्य हृदयं नोपहन्यात् ।
मध्यस्थ एव तिष्ठेत प्रशंसानिन्दयोः समः । एतत् पवित्रं परमं परिव्राजक आश्रमे । ९९८५
महात्मा सर्व्वतो दान्तः सर्व्वत्रैवानपाश्रितः । अपूर्व्वचारकः सौम्यो ह्यनिकेतः समाहितः ।
वानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित् । अज्ञातलिप्सां लिप्सेत न चैनं हर्ष आविशेत् ।
विजानतां मोक्ष एष श्रमः स्यादविजानतां । मोक्षयानमिदं कृत्स्नं विदुषां हारितोऽब्रवीत् ।
अभयं सर्व्वभूतेभ्यो दत्त्वा यः प्रव्रजेद्गृहात् । लोकास्तेजोमयास्तस्य तथानन्त्याय कल्पते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि हारीतगीतायां ऊनाशीत्यधिकद्विशततोऽध्याय.॥ २७९ ॥
॥ युधिष्ठिर उवाच ॥ धन्या धन्या इति जनाः सर्व्वेऽस्मान् प्रवदन्त्युत । न दुःखिततरः कश्चित् पुमानस्माभिरस्ति ह । ९९९०
लोकसम्भावितैर्दुःखं यत् प्राप्तं कुरुसत्तम । प्राप्य जातिं मनुष्येषु देवैरपि पितामह ।
कदा वयं करिष्यामः संन्यासं दुःखसंज्ञकं । दुःखमेतच्छरीराणां धारणं कुरुसत्तम ।
विमुक्ताः सप्तदशभिर्हेतुभूतैश्च पञ्चभिः । इन्द्रियार्थैर्गुणैश्चैव अष्टाभिश्च पितामह ।
न गच्छन्ति पुनर्भावं मुनयः संशितव्रताः । कदा वयं गमिष्यामो राज्यं हित्वा परन्तप ।
॥ भीष्म उवाच ॥ नास्त्यनन्तं महाराज सर्व्वं सङ्ख्यानगोचरं । पुनर्भावोऽपि विख्यातो नास्ति किञ्चिदिहाचलं । ९९९५
न चापि मन्यसे राजन्नेष दोषः प्रसङ्गतः । उद्योगादेव धर्म्मज्ञाः कालेनैव गमिष्यथ ।
नेशोऽयं सततं देही नृपते पुण्यपापयोः । तत एव समुत्थेन तमसा रुध्यतेऽपि च ।
यथाऽञ्जनमयो वायुः पुनर्म्मानःशिलं रजः । अनुप्रविश्य तद्वर्णो दृश्यते रञ्जयन्दिशः ।
यथा कर्म्मफलैर्द्देही रञ्जितस्तमसा वृतः । विवर्णो वर्णमाश्रित्य देहेषु परिवर्त्तते ।
ज्ञानेन हि सदा जन्तुरज्ञानप्रभवं तमः । व्यपोहति तदा ब्रह्म प्रकाशति सनातनं । १००००
अयत्नसाध्यं मुनयो वदन्ति ये चापि मुक्तास्त उपासितव्याः । त्वया च लोकेन च सामरेण तस्मान्न शाम्यन्ति महर्षिसङ्घाः ।
अस्मिन्नर्थे पुरा गीतं शृणुष्वैकमना नृप । यथा दैत्येन वृत्रेण भ्रष्टैश्वर्य्येण चेष्टितं ।
निर्ज्जितेनासहायेन हृतराज्येन भारत । अशोचता शत्रुमध्ये बुद्धिमास्थाय केवलां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भ्रष्टैश्वर्य्यं पुरा वृत्रमुशना वाक्यमब्रवीत् । काचित् पराजितस्याद्य न व्यथा तेऽस्ति दानव ।
॥ वृत्र उवाच ॥ सत्येन तपसा चैव विदित्वा संशयं ह्यहं । न शोचामि न हृष्यामि भूतानामागतिं गतिं । १००५
कालसञ्चोदिता जीवा मज्जन्ति नरकेऽवशाः । परितुष्टानि सर्व्वाणि दिव्यान्याहुर्म्मनीषिणः ।
क्षपयित्वा तु तं कालं गणितं कालचोदिताः । सावशेषेण कालेन सम्भवन्ति पुनः पुनः ।
तिर्य्यग्योनिसहस्राणि गत्वा नरकमेव च । निर्गच्छन्त्यवशा जीवाः कामबन्धनबन्धनाः ।
एवं संसरमाणानि जीवान्यहमदृष्टवान् । यथा कर्म्म तथा लाभ इति शास्त्रनिदर्शनं ।
तिर्य्यग्गच्छन्ति नरकं मानुष्यं दैवमेव च । सुखदुःखे प्रियद्वेष्ये चरित्वा पूर्व्वमेव ह । १०१०
कृतान्तविधिसंयुक्तः सर्व्वलोकः प्रपद्यते । गतं गच्छन्ति चाध्वानं सर्व्वभूतानि सर्व्वदा ।
कालसङ्ख्यानसङ्ख्यातं सृष्टिस्थितिपरायणं । तं भाषमाणं भगवानुशना प्रत्यभाषत ।
धीमान् दुष्टप्रलापांस्त्वं तात कस्मात् प्रभाषसे ।
॥ वृत्र उवाच ॥ प्रत्यक्षमेतद्भवतस्तथाऽन्येषां मनीषिणां । मया यज्जयलुब्धेन पुरा तप्तं महत्तपः ।
गन्धानादाय भूतानां रसांश्च विविधानपि । अवर्द्धं त्रीन् समाक्रम्य लोकान् वै स्वेन तेजसा । १०१५
ज्वालामालापरिक्षिप्तो वैहायसचरस्तथा । अजेयः सर्व्वभूतानामासं नित्यमपेतभीः ।
ऐश्वर्य्यं तपसा प्राप्तं भ्रष्टं तच्च स्वकर्म्मभिः । धृतिमास्थाय भगवन्न शोचामि ततस्त्वहं ।
युयुत्सुना महेन्द्रेण पुरा सार्द्धं महात्मना । ततो मे भगवान्दृष्टो हरिर्नारायणः प्रभुः ।
वैकुण्ठः पुरुषोऽनन्तः शुक्लो विष्णुः सनातनः । मुञ्जकेशो हरिश्मश्रुः सर्व्वभूतपितामहः ।
नूनन्तु तस्य तपसः सावशेषमिहास्ति वै । यदहं प्रष्टुमिच्छामि भगवन् कर्म्मणः फलं । १०२०
ऐश्वर्य्यं वै महद्ब्रह्म वर्णे कस्मिन् प्रतिष्ठितं । निवर्त्तते चापि पुनः कथमैश्वर्य्यमुत्तमं ।
कस्माद्भूतानि जीवन्ति प्रवर्त्तन्ति तथा पुनः । किं वा फलं परं प्राप्य जीवस्तिष्ठति शाश्वतः ।
केन वा कर्म्मणा शक्यमथ ज्ञानेन केन वा । तदवाप्तुं फलं विप्र तन्मे व्याख्यातुमर्हसि ।
इतीदमुक्तः स मुनिस्तदानीं प्रत्याह यत्तच्छृणु राजसिंह । मयोच्यमानं पुरुषर्षभ त्वमनन्यचित्तः सह सोदरीयैः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वृत्रगीतासु अशीत्यधिकद्विशततोऽध्यायः ॥ २८० ॥
॥ उशनोवाच ॥ नमस्तस्मै भगवते देवाय प्रभविष्णवे । यस्य पृथ्वीतलं तात साकाशं बाहुगोचरं । १०२५
मूर्द्धा यस्य त्वनन्तञ्च स्थानं दानवसत्तम । तस्याहं ते प्रवक्ष्यामि विष्णोर्म्माहात्म्यमुत्तमं ।
तयोः संवदतोरेवमाजगाम महामुनिः । सनत्कुमारो धर्म्मात्मा संशयच्छेदनाय वै ।
स पूजितोऽसुरेन्द्रेण मुनिनोशनसा तथा । निषसादासने राजन् महार्हे मुनिपुङ्गवः ।
तमासीनं महाप्राज्ञमुशना वाक्यमब्रवीत् । ब्रूह्यस्मै दानवेन्द्राय विष्णोर्म्माहात्म्यमुत्तमं ।
सनत्कुमारस्तु ततः श्रुत्वा प्राह वचोऽर्थवत् । विष्णोर्म्माहात्म्यसंयुक्तं दानवेन्द्राय धीमते । १०३०
शृणु सर्व्वमिदं दैत्य विष्णोर्म्माहात्म्यमुत्तमं । विष्णौ जगत् स्थितं सर्व्वमिति विद्धि परन्तप ।
सृजत्येव महाबाहो भूतग्रामं चराचरं । एष चाक्षिपते काले काले विसृजते पुनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अस्मिन् गच्छन्ति विलयमस्माच्च प्रभवन्त्युत। नैव ज्ञानवता शक्यं तपसा नैव चेज्यया।
सम्प्राप्तुमिन्द्रियाणान्तु संयमेनैव शक्यते। बाह्ये चाभ्यन्तरे चैव कर्म्मणोर्म्मनसि स्थितः।
निर्म्मलीकुरुते बुद्ध्या सोऽमुत्रानन्त्यमश्नुते। यथा हिरण्यकर्त्ता वै रूप्यमग्नौ विशोधयेत्। १००३५
बहुशोऽतिप्रयत्नेन महतात्मकृतेन ह। तद्वज्जातिशतैर्ज्जीवः शुद्ध्यतेऽनेन कर्म्मणा।
यत्नेन महता चैवाप्येकजातौ विशुद्ध्यते। लीलयाऽल्पं यथा गात्रात् प्रमृज्यादात्मनो रजः।
बहुयत्नेन महता दोषनिर्हरणन्तथा। यथा चाल्पेन माल्येन वासितं तिलसर्षपं।
न मुञ्चति स्वकं गन्धं तद्वत्सूक्ष्मस्य दर्शनं। तदेव बहुभिर्म्माल्यैर्व्वास्यमानं पुनः पुनः।
विमुञ्चति स्वकं गन्धं माल्यगन्धे च तिष्ठति। एवं जातिशतैर्युक्तो गुणैरेव प्रसङ्गिषु। १००४०
बुद्ध्या निवर्त्तते दोषो यत्नेनाभ्यासजेन ह। कर्म्मणा स्वनुरक्तानि विरक्तानि च दानव।
यथा कर्म्मविशेषांश्च प्राप्नुवन्ति तथा शृणु। यथावत्संप्रवर्त्तन्ते यस्मिंस्तिष्ठन्ति वा विभो।
तत्तेऽनुपूर्व्व्या व्याख्यास्ये तदिहैकमनाः शृणु। अनादिनिधनः श्रीमान् हरिर्नारायणः प्रभुः।
स वै सृजति भूतानि स्थावराणि चराणि च। स वै सर्व्वेषु भूतेषु चरस्थावर एव च।
एकादशविकारात्मा जगत्पिबति रश्मिभिः। पादौ तस्य महीं विद्धि मूर्द्धानं दिवमित्युत। १००४५
बाहवस्तु दिशो दैत्य श्रोत्रमाकाशमेव च। तस्य तेजोमयः सूर्य्यो मनश्चन्द्रमसि स्थितं।
बुद्धिर्ज्ञानगता नित्यं रसस्त्वप्सु प्रतिष्ठितः। भ्रुवोरनन्तरास्तस्य ग्रहा दानवसत्तम।
नक्षत्रचक्रं नेत्राभ्यां पादयोर्भूश्च दानव। रजस्तमश्च सत्यञ्च विद्धि नारायणात्मकं।
सोऽश्रमाणां फलं तात कर्म्मणस्तत्फलं विदुः। अकर्म्मणः फलश्चैव स एव परमव्ययः।
छन्दांसि यस्य रोमाणि ह्यक्षरञ्च सरस्वती। बहुश्रयो बहुमुखो धर्म्मो हृदि समाश्रितः। १००५०
स ब्रह्मपरमो धर्म्मस्तपश्च सदसच्च सः। श्रुतिशास्त्रग्रहोपेतः षोडशर्त्विक् क्रतुश्च सः।
पितामहश्च विष्णुश्च सोऽश्विनौ स पुरन्दरः। मित्रोऽथ वरुणश्चैव यमोऽथ धनदस्तथा।
ते पृथग्दर्शनास्तस्य संविदन्ति तथैकतां। एकस्य विद्धि देवस्य सर्व्वं जगदिदं वशे।
नानाभूतस्य दैत्येन्द्र तस्यैकत्वं वदत्ययं। जन्तुः पश्यति विज्ञानात्ततो ब्रह्म प्रकाशते।
संहारविक्षेपसहस्रकोटीस्तिष्ठन्ति जीवाः प्रचरन्ति चान्ये। प्रजाविसर्गस्य च पारिमाण्यं वापीसहस्राणि बहूनि दैत्य। १००५५
वाप्यः पुनर्योजनविस्तृतास्ताः क्रोशञ्च गम्भीरतयाऽवगाढाः। आयामतः पञ्चशताश्च सर्व्वाः प्रत्येकशो योजनतः प्रवृद्धाः।
वाप्या जलं क्षिप्यति वालकोट्या त्वह्ना सकृच्चाप्यथ न द्वितीयं। तासां क्षये विद्धि परं विसर्गं संहारमेकञ्च तथा प्रजानां।
षड्जीववर्णाः परमं प्रमाणं कृष्णो धूम्रो नीलमथास्य मध्यं। रक्तं पुनः सह्यतरं सुखन्तु हारिद्रवर्णं सुसुखञ्च शुक्लं।
परन्तु शुक्लं विमलं विशोकं गतक्लमं सिद्ध्यति दानवेन्द्र। गत्वा तु योनिप्रभवाणि दैत्य सहस्रशः सिद्धिमुपैति जीवः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतिञ्च यां दर्शनमाह देवो गत्वा शुभं दर्शनमेव चापि । गतिः पुनर्व्वर्णकृता प्रजानां वर्णस्तथा कालकृतोऽसु
रेन्द्र । १००६०

शतं सहस्राणि चतुर्द्दशेह परा गतिर्जीवगुणस्य दैत्य । आरोहणन्तत् कृतमेव विद्धि स्थानन्तथा निःसरणञ्च तेषां ।

कृष्णस्य वर्णस्य गतिर्निकृष्टा स सज्जते नरके पच्यमानः । स्थानन्तथा दुर्गतिभिस्तु तस्य प्रजाविसर्गान् सुबहून्
वदन्ति ।

शतं सहस्राणि ततश्चरित्वा प्राप्नोति वर्णं हरितन्तु पश्चात् । स चैव तस्मिन्निवसत्यनीशो युगक्षये तपसा संवृ
तात्मा ।

स वै यदा सत्त्वगुणेन युक्तस्तमो व्यपोहन् घटते स्वबुद्ध्या । स लोहितं वर्णमुपैति नीलान्मनुष्यलोके परिवर्त्तते च ।

स तत्र संहारविसर्गमेकं स्वधर्म्मजैर्ब्बन्धनैः क्लिश्यमानः । ततः स हारिद्रमुपैति वर्णं संहारविक्षेपशते व्यतीते । १००६५

हारिद्रवर्णस्तु प्रजाविसर्गात् सहस्रशस्तिष्ठति सञ्चरन् वै । अविप्रयुक्तो निरये च दैत्य ततः सहस्राणि दशापराणि ।

गतीः सहस्राणि च पञ्च तस्य चत्वारि संवर्त्तकृतानि चैव । विमुक्तमेनं निरयाच्च विद्धि सर्व्वेषु चान्येषु च सम्भवेषु ।

स देवलोके विहरत्यभीक्ष्णं ततश्च्युतो मानुषतामुपैति । संहारविक्षेपशतानि चाष्टौ मर्त्येषु तिष्ठत्यमृतत्वमेति ।

सोऽस्मादथ भ्रश्यति कालयोगात् कृष्णे तले तिष्ठति सर्व्वकृष्टे । यथा त्वयं सिध्यति जीवलोकस्तत्ते ऽभिधास्याम्य
सुरप्रवीर ।

दैवानि सव्यूहशतानि सप्त रक्तो हरिद्रोऽथ तथैव शुक्लः । संश्रित्य सन्धावति शुक्लमेतमष्टावरानर्च्चितमान् सलो
कान् । १००७०

अष्टौ च षष्टिञ्च शतानि यानि मनोविरुद्धानि महाद्युतीनां । शुक्लस्य वर्णस्य परा गतिर्य्या त्रीण्येव रुद्धानि महानुभाव ।

संहारविक्षेपमनिष्टमेकं चत्वारि चान्यानि वसत्यनीशः । षष्ठस्य वर्णस्य परा गतिर्य्या सिद्धा विसिद्धस्य गतक्लमस्य ।

सप्तोत्तरन्तत्र वसत्यनीशः संहारविक्षेपशतं सशेषं । तस्मादुपावृत्त्य मनुष्यलोके ततो महान्मानुषतामुपैति ।

तस्मादुपावृत्त्य ततः क्रमेण सोऽग्र्येण सन्तिष्ठति भूतसर्गं । स सप्तकृत्वश्च परैति लोकान् संहारविक्षेपकृतप्रभावः ।

सप्तैव संहारमुपप्लवानि सम्भाव्य सन्तिष्ठति जीवलोके । ततोऽव्ययं स्थानमनन्तमेति देवस्य विष्णोरथ ब्रह्मणश्च । १००७५

शेषस्य चैवाथ नरस्य चैव देवस्य विष्णोः परमस्य चैव । संहारकाले परिदग्धकाया ब्रह्माणमायान्ति सदा प्रजा हि ।

चेष्टात्मनो देवगणाश्च सर्व्वे ये ब्रह्मलोकादपराः स्म तेऽपि । प्रजाविसर्गन्तु सशेषकालं स्थानानि स्वान्येव सरन्ति
जीवाः ।

निःशेषतस्तत्पदं यान्ति चान्ते सर्व्वे देवा ये सदृशा मनुष्याः । ये तु च्युताः सिद्धलोकात् क्रमेण तेषां गतिं यान्ति
यथाऽनुपूर्व्व्या ।

जीवाः परे तद्बलतुल्यरूपाः स्वं स्वं विधिं यान्ति विपर्य्ययेण । स यावदेवास्ति सशेषभुक्तः प्रजाश्च देव्यौ च तथैव
शुक्ले ।

तावत्तदङ्गेषु विशुद्धभावः संयम्य पञ्चेन्द्रियरूपमेतत् । शुद्धां गतिं तां परमां परैति शुद्धेन नित्यं मनसा विचि
न्वन् । १००८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

 Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततोऽव्ययं स्थानमुपैति ब्रह्म दुष्प्रापमभ्येति स शाश्वतं वै। इत्येतदाख्यातमहीनसत्त्वनारायणस्येह बलं मया ते।
॥ वृत्र उवाच ॥ एवं गते मे न विषादोऽस्ति कश्चित् सम्यक् च पश्यामि वचस्तवैतत्। श्रुत्वा तु ते वाचमदीनसत्त्व विकल्मषोऽस्म्यद्य तथा विपाप्मा।
प्रवृत्तमेतद्भगवन्महर्षे महाद्युतेश्चक्रमनन्तवीर्य्यं। विष्णोरनन्तस्य सनातनन्तत् स्थानं सर्गा यत्र सर्व्वे प्रवृत्ताः।
स वै महात्मा पुरुषोत्तमो वै तस्मिन् जगत् सर्व्वमिदं प्रतिष्ठितं।
॥ भीष्म उवाच ॥ एवमुक्त्वा स कौन्तेय वृत्रः प्राणानवासृजत्। योजयित्वा तथात्मानं परं स्थानमवाप्तवान्। १००८५
॥ युधिष्ठिर उवाच ॥ अयं स भगवान् देवः पितामह जनार्द्दनः। सनत्कुमारो वृत्राय यत्तदाख्यातवान् पुरा।
॥ भीष्म उवाच ॥ मूलस्थायी महादेवो भगवान् स्वेन तेजसा। तत्स्थः सृजति तान् भावान् नानारूपान् महामनाः।
तुरीयार्द्धेन तस्येमं विद्धि केशवमच्युतं। तुरीयार्द्धेन लोकांस्त्रीन् भावयत्येव बुद्धिमान्।
अर्व्वाक् स्थितस्तु यः स्थायी कल्पान्ते परिवर्त्तते। स शेते भगवानप्सु योऽसावतिबलः प्रभुः।
तान् विधाता प्रसन्नात्मा लोकांश्चरति शाश्वतान्। १००९०
सर्व्वाण्यशून्यानि करोत्यनन्तः सनातनः सञ्चरते च लोकान्। स चानिरुद्धः सृजते महात्मा तत्स्थं जगत् सर्व्वमिदं विचित्रं।
॥ युधिष्ठिर उवाच ॥ वृत्रेण परमार्थज्ञ दृष्टा मन्येत्मनो गतिः। शुभा तस्मात् स सुखितो न शोचति पितामह।
शुक्लः शुक्लाभिजातीयः साध्यो नावर्त्ततेऽनघ। तिर्य्यग्गतेश्च निर्मुक्तो निरयाच्च पितामह।
हारिद्रवर्णे रक्ते वा वर्त्तमानस्तु पार्थिव। तिर्य्यगेवानुपश्येत कर्म्मभिस्तामसैर्वृतः।
वयन्तु भृशमापन्ना रक्ता दुःखसुखेऽसुखे। कां गतिं प्रतिपत्स्यामो नीलां कृष्णाधमामथ। १००९५
॥ भीष्म उवाच ॥ शुद्धाभिजनसम्पन्नाः पाण्डवाः शंसितव्रताः। विहृत्य देवलोकेषु पुनर्म्मानुषमेष्यथ।
प्रजाविसर्गं च सुखेन काले प्रेत्येत्य देवेषु सुखानि भुक्त्वा। सुखेन संयास्यथ सिद्धसंख्यां मा वो भयं भूद्विमलाः स्थ सर्व्वे।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वृत्रगीतायां एकाशीत्यधिकद्विशततोऽध्यायः ॥ २८१ ॥
॥ युधिष्ठिर उवाच ॥ अहो धर्म्मिष्ठता तात वृत्रस्यामिततेजसः। यस्य विज्ञानमतुलं विष्णौ भक्तिश्च तादृशी।
दुर्व्विज्ञेयं पदं तात विष्णोरमिततेजसः। कथं वा राजशार्द्दूल पदन्तु ज्ञातवानसौ।
भवता कथितं ह्येतच्छ्रद्दधे चाहमच्युतं। भूयस्तु मे समुत्पन्ना बुद्धिरव्यक्तदर्शनात्। १०१००
कथं विनिहतो वृत्रः शक्रेण पुरुषर्षभ। धर्म्मिष्ठो विष्णुभक्तश्च तत्त्वज्ञश्च पदान्वये।
एतन्मे संशयं ब्रूहि पृच्छते भरतर्षभ। वृत्रस्तु राजशार्द्दूल यथा शक्रेण निर्ज्जितः।
यथा चैवाभवद्युद्धं तच्चाचक्ष्व पितामह। विस्तरेण महाबाहो परं कौतूहलं हि मे।
॥ भीष्म उवाच ॥ रथेनेन्द्रः प्रयातो वै सार्द्धं देवगणैः पुरा। ददर्शाथाग्रतो वृत्रं धिष्ठितं पर्व्वतोपमं।
योजनानां शतान्यूर्द्धं पञ्चोच्छ्रितमरिन्दम। शतानि विस्तरेणाथ त्रीण्येवाभ्यधिकानि वै। १०१०५
तत् प्रेक्ष्य तादृशं रूपं त्रैलोक्येनापि दुर्ज्जयं। वृत्रस्य देवाः सन्त्रस्ता न शान्तिमुपलेभिरे।
शक्रस्य तु तदा राजन्नूरुस्तम्भो व्यजायत। भयाद्वृत्रस्य सहसा दृष्ट्वा तद्रूपमुत्तमं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो नादः समभवद्वादित्राणाञ्च निःस्वनः । देवासुराणां सर्व्वेषां तस्मिन् युद्धे ह्युपस्थिते ।
अथ वृत्रस्य कौरव्य दृष्ट्वा शक्रमवस्थितं । न सम्भ्रमो न भीः काचिदास्था वा समजायत ।
ततः समभवद्युद्धं त्रैलोक्यस्य भयङ्करं । शक्रस्य चासुरेन्द्रस्य वृत्रस्य च महात्मनः । १०११०
असिभिः पट्टिशैः शूलैः शक्तितोमरमुद्गरैः । शिलाभिर्व्विविधाभिश्च कार्म्मुकैश्च महास्वनैः ।
शस्त्रैश्च विविधैर्द्दिव्यैः पावकोल्काभिरेव च । देवासुरैस्ततः सैन्यैः सर्व्वमासीत् समाकुलं ।
पितामहपुरोगाश्च सर्व्वे देवगणास्तथा । ऋषयश्च महाभागास्तद्युद्धं द्रष्टुमागमन् ।
विमानाग्र्यैर्महाराज सिद्धाश्च भरतर्षभ । गन्धर्व्वाश्च विमानाग्र्यैरप्सरोभिः समागमन् ।
ततोऽन्तरीक्षमावृत्य वृत्रो धर्म्मभृताम्वरः । अश्मवर्षेण देवेन्द्रं समाकिरदतिद्रुतं । १०११५
ततो देवगणाः क्रुद्धाः सर्व्वतः शरवृष्टिभिः । अश्मवर्षमपोहन्त वृत्रप्रेरितमाहवे ।
वृत्रस्तु कुरुशार्द्दूल महामायो महाबलः । मोहयामास देवेन्द्रं मायायुद्धेन सर्व्वशः ।
तस्य वृत्रार्द्दितस्याथ मोह आसीच्छतक्रतोः । रथन्तरेण तं तत्र वशिष्ठः समबोधयत् ।
॥ वशिष्ठ उवाच ॥ देवश्रेष्ठोऽसि देवेन्द्र दैत्यासुरनिवर्हण । त्रैलोक्यबलसंयुक्तः कस्माच्छक्र विषीदसि ।
एष ब्रह्मा च विष्णुश्च शिवश्चैव जगत्पतिः । सोमश्च भगवान्देवः सर्व्वे च परमर्षयः । १०१२०
मा कार्षीः कश्मलं शक्र कश्चिदेवेतरो यथा । आर्य्यां युद्धे मतिं कृत्वा जहि शत्रून् सुराधिप ।
एष लोकगुरुस्त्र्यक्षः सर्व्वलोकनमस्कृतः । निरीक्षते त्वां भगवांस्त्यज मोहं सुराधिप ।
एते ब्रह्मर्षयश्चैव वृहस्पतिपुरोगमाः । स्तवेन शक्र दिव्येन स्तुवन्ति त्वां जयाय वै ।
॥ भीष्म उवाच ॥ एवं सम्बोध्यमानस्य वशिष्ठेन महात्मना । अतीव वासवस्यासीद्बलमुत्तमतेजसः ।
ततो बुद्धिमुपागम्य भगवान् पाकशासनः । योगेन महता युक्तस्तां मायां व्यपकर्षत । १०१२५
ततोऽङ्गिरःसुतः श्रीमांस्ते चैव परमर्षयः । दृष्ट्वा वृत्रस्य विक्रान्तमुपागम्य महेश्वरं ।
ऊचुर्वृत्रविनाशार्थं लोकानां हितकाम्यया । ततो भगवतस्तेजो ज्वरो भूत्वा जगत्पतेः ।
समाविशत्तदा रौद्रो वृत्रं दैत्यपतिन्तदा । विष्णुश्च भगवान्देवः सर्व्वलोकाभिपूजितः ।
ऐन्द्रं समाविशद्वज्रं लोकसंरक्षणे रतः । ततो वृहस्पतिर्धीमानुपागम्य शतक्रतुं ।
वशिष्ठश्च महातेजाः सर्व्वे च परमर्षयः । ते समासाद्य वरदं वासवं लोकपूजित । १०१३०
ऊचुरेकाग्रमनसो जहि वृत्रमिति प्रभो ।
॥ महेश्वर उवाच ॥ एष वृत्रो महान् शक्र बलेन महता वृतः । विश्वात्मा सर्व्वगश्चैव बहुमायश्च विश्रुतः ।
तदेनमसुरश्रेष्ठं त्रैलोक्येनापि दुर्ज्जयं । जहि त्वं योगमास्थाय माऽवमंस्थाः सुरेश्वर ।
अनेन हि तपस्तप्तं बलायममराधिप । षष्टिं वर्षसहस्राणि ब्रह्मा चास्मै वरं ददौ ।
महत्त्वं योगिनाञ्चैव महामायत्वमेव च । महाबलत्वञ्च तथा तेजश्चाग्र्यं सुरेश्वर । १०१३५
एतत्त्वां मामकं तेजः समाविशति वासव । व्यग्रमेनं त्वमप्येवं वज्रेण जहि दानवं ।
॥ शक्र उवाच ॥ भगवंस्त्वत्प्रसादेन दितिजं सुदुरासदं । वज्रेण निहनिष्यामि पश्यतस्ते सुरर्षभ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ आविश्यमाने दैत्ये तु ज्वरेणाथ महासुरे। देवतानामृषीणाञ्च हर्षनादो महानभूत्।
ततो दुन्दुभयश्चैव शङ्खाश्च सुमहास्वनाः। मुरजा डिण्डिमाश्चैव प्रावाद्यन्त सहस्रशः।
असुराणान्तु सर्व्वेषां स्मृतिलोपो महानभूत्। मायानाशश्च बलवान् क्षणेन समपद्यत। १०१४०
तथाविष्टमथो ज्ञात्वा ऋषयो देवतास्तथा। स्तुवन्तः शक्रमीशानं तथा प्राचोदयन्नपि।
रथस्थस्य हि शक्रस्य युद्धकाले महात्मनः। ऋषिभिः स्तूयमानस्य रूपमासीत् सुदुर्द्दृशं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्मपर्व्वणि वृत्रवधे द्व्यशीत्यधिकद्विशततोऽध्यायः ॥ २८२ ॥
॥ भीष्म उवाच ॥ वृत्रस्य तु महाराज ज्वराविष्टस्य सर्व्वशः। अभवन् यानि लिङ्गानि शरीरे तानि मे शृणु।
ज्वलितास्योऽभवद्घोरो वैवर्ण्यञ्चागमत् परं। गात्रकम्पश्च सुमहान् श्वासश्चाप्यभवन्महान्।
रोमहर्षश्च तीव्रोऽभून्निश्वासश्च महान्नृप। शिवा चाशिवसङ्काशा तस्य वक्त्रात् सुदारुणा। १०१४५
निष्पपात महाघोरा स्मृतिः सा तस्य भारत। उल्काश्च ज्वलितास्तस्य दीप्ताः पार्श्वे प्रपेदिरे।
गृध्राः कङ्का बलाकाश्च वाचोऽमुञ्चन् सुदारुणाः। वृत्रस्योपरि संहृष्टाश्चक्रवत् परिबभ्रमुः।
ततस्तं रथमास्थाय देवाप्यायित आहवे। वज्रोद्यतकरः शक्रस्तं दैत्यं समवैक्षत।
अमानुषमथो नादं स मुमोच महासुरः। व्यजृम्भच्चैव राजेन्द्र तीव्रज्वरसमन्वितः।
अथास्य जृम्भतः शक्रस्ततो वज्रमवासृजत्। स वज्रः सुमहातेजा कालाग्निसदृशोपमः। १०१५०
क्षिप्रमेव महाकायं वृत्रं दैत्यमपातयत्। ततो नादः समभवत् पुनरेव समन्ततः।
वृत्रं विनिहतं दृष्ट्वा देवानां भरतर्षभ। वृत्रन्तु हत्वा मघवान् दानवारिर्म्महायशाः।
वज्रेण विष्णुयुक्तेन दिवमेव समाविशत्। अथ वृत्रस्य कौरव्य शरीरादभिनिःसृता।
ब्रह्मवध्या महाघोरा रौद्रा लोकभयावहा। करालदशना भीमा विकृता कृष्णपिङ्गला।
प्रकीर्णमूर्द्धजा चैव घोरनेत्रा च भारत। कपालमालिनी चैव कृत्येव भरतर्षभ। १०१५५
रुधिरार्द्रा च धर्म्मज्ञ चीरवल्कलवासिनी। साऽभिनिष्क्रम्य राजेन्द्र तादृग्रूपभयावहा।
वज्रिणं मृगयामास तदा भरतसत्तम। कस्यचित्त्वथ कालस्य वृत्रहा कुरुनन्दन।
स्वर्गायाभिमुखः प्रायाल्लोकानां हितकाम्यया। सा विनिःसरमाणन्तु दृष्ट्वा शक्रं महौजसं।
जग्राह वध्या देवेन्द्रं सुलग्ना चाभवत्तदा। स हि तस्मिन् समुत्पन्ने ब्रह्मवध्याकृते भये।
नलिन्या विसमध्यस्थ उवासाब्दगणान् बहून्। अनुसृत्य तु यत्नात्स तया वै ब्रह्महत्यया। १०१६०
तदा गृहीतः कौरव्य निस्तेजाः समपद्यत। तस्या व्यपोहने शक्रः परं यत्नञ्चकार ह।
न चाशकत्तां देवेन्द्रो ब्रह्मवध्यां व्यपोहितुं। गृहीत एव तु तया देवेन्द्रो भरतर्षभ।
पितामहमुपागम्य शिरसा प्रत्यपूजयत्। ज्ञात्वा गृहीतं शक्रं स द्विजप्रवरवध्यया।
ब्रह्मा संचिन्तयामास तदा भरतसत्तम। तामुवाच महाबाहो ब्रह्मवध्यां पितामहः।
स्वरेण मधुरेणाथ सान्त्वयन्निव भारत। मुच्यतां त्रिदशेन्द्रोऽयं मत्प्रियं कुरु भाविनि। १०१६५
ब्रूहि किन्ते करोम्यद्य कामं किं त्वमिहेच्छसि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ ब्रह्मवध्योवाच ॥ त्रिलोकपूजिते देवे प्रीते त्रैलोक्यकर्त्तरि । कृतमेवेह मन्यामि निवासन्तु विधत्स्व मे ।
त्वया कृतेयं मर्य्यादा लोकसंरक्षणार्थिना । स्थापना वै सुमहती त्वया देव प्रवर्त्तिता ।
प्रीते तु त्वयि धर्म्मज्ञ सर्व्वलोकेश्वर प्रभो । शक्रादपगमिष्यामि निवासं संविधत्स्व मे ।
॥ भीष्म उवाच ॥ तथेति तां प्राह तदा ब्रह्मवध्यां पितामहः । उपायतः स शक्रस्य ब्रह्मवध्यां व्यपोहत । १०१७०
ततः स्वयम्भुवा ध्यातस्तत्र वह्निर्महात्मना । ब्रह्माणमुपसंगम्य ततो वचनमब्रवीत् ।
प्राप्तोऽस्मि भगवन्देव त्वत्सकाशमनिन्दित । यत्कर्त्तव्यं मया देव तद्भवान् वक्तुमर्हति ।
॥ ब्रह्मोवाच ॥ बहुधा विभजिष्यामि ब्रह्मवध्यामिमामहं । शक्रस्याद्य विमोक्षार्थं चतुर्भागं प्रतीच्छ वै ।
॥ अग्निरुवाच ॥ मम मोक्षस्य कोऽन्तो वै ब्रह्मन् ध्यायस्व वै प्रभो । एतदिच्छामि विज्ञातुं तत्त्वतो लोकपूजित ।
॥ ब्रह्मोवाच ॥ यस्त्वां ज्वलन्तमासाद्य स्वयं वै मानवः क्वचित् । बीजौषधिरसैर्वह्ने न यक्ष्यति तमोवृतः । १०१७५
तमेषा यास्यति क्षिप्रं तत्रैव च निवत्स्यति । ब्रह्मवध्या हव्यवाह व्येतु ते मानसो ज्वरः ।
इत्युक्तः प्रतिजग्राह तद्वचो हव्यकव्यभुक् । पितामहस्य भगवांस्तथा च तदभूत्प्रभो ।
ततो वृक्षौषधितृणं समाहूय पितामहः । इममर्थं महाराज वक्तुं समुपचक्रमे ।
ततो वृक्षौषधितृणं तथैवोक्तं यथातथं । व्यथितं वह्निवद्राजन् ब्रह्माणमिदमब्रवीत् ।
अस्माकं ब्रह्मवध्यायाः कोऽन्तो लोकपितामह । दैवेनाभिहतानस्मान्न पुनर्हन्तुमर्हसि । १०१८०
वयमग्निं तथा शीतं वर्षञ्च पवनेरितं । सहामः सततं देव तथा छेदनभेदने ।
ब्रह्मवध्यामिमामद्य भवतः शासनादयं । ग्रहीष्यामस्त्रिलोकेश मोक्षं चिन्तयतां भवान् ।
॥ ब्रह्मोवाच ॥ पर्व्वकाले तु संप्राप्ते यो वै छेदनभेदनं । करिष्यति नरो मोहात्तमेषाऽनुगमिष्यति ।
॥ भीष्म उवाच ॥ ततो वृक्षौषधितृणमेवमुक्तं महात्मना । ब्रह्माणमभिसंपूज्य जगामाशु यथा गतं ।
आहूयाप्सरसो देवस्ततो लोकपितामह । वाचा मधुरया प्राह सान्त्वयन्निव भारत । १०१८५
इयमिन्द्रादनुप्राप्ता ब्रह्मवध्या वराङ्गना । चतुर्थमस्या भागांश्च मयोक्ताः सम्प्रतीच्छत ।
॥ अप्सरस ऊचुः ॥ ग्रहणे कृतबुद्धीनां देवेश तव शासनात् । मोक्षं समयतोऽस्माकं चिन्तयस्व पितामह ।
॥ ब्रह्मोवाच ॥ रजस्वलासु नारीषु यो वै मैथुनमाचरेत् । तमेषा यास्यति क्षिप्रं व्येतु वो मानसो ज्वरः ।
॥ भीष्म उवाच ॥ तथेति हृष्टमनस इत्युक्त्वाऽप्सरसां गणाः । स्वानि स्थानानि सम्प्राप्य रेमिरे भरतर्षभ ।
ततस्त्रिलोककृद्देवः पुनरेव महातपाः । अपः सञ्चिन्तयामास ध्यातास्ताश्चाप्यथागमन् । १०१९०
तास्तु सर्व्वाः समागम्य ब्रह्माणममितौजसं । इदमूचुर्व्वचो राजन् प्रणिपत्य पितामहं ।
इमाः स्म देव सम्प्राप्तास्त्वत्सकाशमरिन्दम । शासनात्तव लोकेश समाज्ञापय नः प्रभो ।
॥ ब्रह्मोवाच ॥ इयं वृत्रादनुप्राप्ता पुरुहूतं महाभया । ब्रह्मवध्या चतुर्थांशमस्या यूयं प्रतीच्छत ।
॥ आप ऊचुः ॥ एवं भवतु लोकेश यथा वदसि नः प्रभो । मोक्षं समयतोऽस्माकं सञ्चिन्तयितुमर्हसि ।
त्वं हि देवेश सर्व्वस्य जगतः परमा गतिः । कोऽन्यः प्रसाद्यो हि भवेद्यः कृच्छ्रान्नः समुद्धरेत् । १०१९५
॥ ब्रह्मोवाच ॥ अल्पा इति मतिं कृत्वा यो नरो बुद्धिमोहितः । श्लेष्ममूत्रपुरीषाणि युष्मासु प्रतिमोक्ष्यति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

तमियं यास्यति चिप्रं तत्रैव च निवत्स्यति। तथा वो भविता मोक्ष इति सत्यं ब्रवीमि वः।
ततो विमुच्य देवेन्द्रं ब्रह्मवध्या युधिष्ठिर। यथा विसृष्टं तं वासमगमद्देवशासनात्।
एवं शक्रेण सम्प्राप्ता ब्रह्मवध्या जनाधिप। पितामहमनुज्ञाप्य सोऽश्वमेधमकल्पयत्।
श्रूयते च महाराज सम्प्राप्ता वासवेन वै। ब्रह्मवध्या ततः शुद्धिं हयमेधेन लब्धवान्। १०२००
समवाप्य श्रियं देवो हत्वाऽरींश्च सहस्रशः। प्रहर्षमतुलं लेभे वासवः पृथिवीपते।
वृत्रस्य रुधिराच्चैव शिखण्डाः पार्थ जज्ञिरे। द्विजातिभिरभक्ष्यास्ते दीक्षितैश्च तपोधनैः।
सर्व्वावस्थं त्वमप्येषां द्विजातीनां प्रियं कुरु। इमे हि भूतले देवाः प्रथिताः कुरुनन्दन।
एवं शक्रेण कौरव्य बुद्धिसौक्ष्म्यान्महासुरः। उपायपूर्व्वं निहतो वृत्रो ह्यमिततेजसा।
एवं त्वमपि कौन्तेय पृथिव्यामपराजितः। भविष्यसि यथा देवः शतक्रतुरमित्रहा। १०२०५
ये तु शक्रकथां दिव्यामिमां पर्व्वसुपर्व्वसु। विप्रमध्ये वदिष्यन्ति न ते प्राप्स्यन्ति किल्बिषं।
इत्येतद्वृत्रमाश्रित्य शक्रस्यात्यद्भुतं महत्। कथितं कर्म्म ते तात किं भूयः श्रोतुमिच्छसि।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वृत्रवधे त्र्यशीत्यधिकद्विशतोऽध्यायः॥ २८३॥
॥ युधिष्ठिर उवाच॥ पितामह महाप्राज्ञ सर्व्वशास्त्रविशारद। अस्मिन् वृत्रवधादेव विवचा मम जायते।
ज्वरेण मोहितो वृत्रः कथितस्ते जनाधिप। निहतो वासवेनेह वज्रेणेति तदाऽनघ।
कथमेष महाप्राज्ञ ज्वरः प्रादुर्ब्बभौ कुतः। ज्वरोत्पत्तिं निपुणतः श्रोतुमिच्छाम्यहं प्रभो। १०२१०
॥ भीष्म उवाच॥ शृणु राजन् ज्वरस्येमं सम्भवं लोकविश्रुतं। विस्तरञ्चास्य वक्ष्यामि यादृशश्चैव भारत।
पुरा मेरोर्महाराज शृङ्गं त्रैलोक्यपूजितं। ज्योतिष्कं नाम सावित्रं सर्व्वरत्नविभूषितं।
अप्रमेयमनाधृष्यं सर्व्वलोकेषु भारत। तत्र देवो गिरितटे हेमधातुविभूषिते।
पर्य्यङ्क इव विभ्राजन्नुपविष्टो बभूव ह। शैलराजसुता चास्य नित्यं पार्श्वे स्थिता बभौ।
तथा देवा महात्मानो वसवश्चामितौजसः। तथैव च महात्मानावश्विनौ भिषजाम्वरौ। १०२१५
तथा वैश्रवणो राजा गुह्यकैरभिसंवृतः। यक्षाणामीश्वरः श्रीमान् कैलासनिलयः प्रभुः।
उपासन्त महात्मानमुशना च महामुनिः। सनत्कुमारप्रमुखास्तथैव च महर्षयः।
अङ्गिरःप्रमुखाश्चैव तथा देवर्षयोऽपरे। विश्वावसुश्च गन्धर्व्वस्तथा नारदपर्व्वतौ।
अप्सरोगणसङ्घाश्च समाजग्मुरनेकशः। ववौ सुखः शिवो वायुर्नानागन्धवहः शुचिः।
सर्व्वर्त्तुकुसुमोपेताः पुष्पवन्तो द्रुमास्तथा। तथा विद्याधराश्चैव सिद्धाश्चैव तपोधनाः। १०२२०
महादेवं पशुपतिं पर्य्युपासन्त भारत। भूतानि च महाराज नानारूपधराण्यथ।
राक्षसाश्च महारौद्राः पिशाचाश्च महाबलाः। बहुरूपधरा हृष्टा नानाप्रहरणोद्यताः।
देवस्यानुचरास्तत्र तस्थिरे चानलोपमाः। नन्दी च भगवांस्तत्र देवस्यानुमते स्थितः।
प्रगृह्य ज्वलितं शूलं दीप्यमानः स्वतेजसा। गङ्गा च सरितां श्रेष्ठा सर्व्वतीर्थजलोद्भवा।
पर्य्युपासत तं देवं रूपिणी कुरुनन्दन। स एवं भगवांस्तत्र पूज्यमानः सुरर्षिभिः। १०२२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

देवैश्च सुमहातेजा महादेवी व्यतिष्ठत । कस्यचित्त्वथ कालस्य दक्षो नाम प्रजापतिः ।
पूर्व्वोक्तेन विधानेन यक्ष्यमाणोऽन्वपद्यत । ततस्तस्य मखं देवाः सर्व्वे शक्रपुरोगमाः ।
गमनाय समागम्य बुद्धिमापेदिरे तदा । ते विमानैर्म्महात्मानो ज्वलनार्कसमप्रभैः ।
देवस्यानुमते गच्छन् गङ्गाद्वारमिति श्रुतिः । प्रस्थिता देवता दृष्ट्वा शैलराजसुता तदा ।
उवाच वचनं साध्वी देवं पशुपतिं पतिं । भगवन् क नु यान्त्येते देवाः शक्रपुरोगमाः । १०११०
ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयं ।
॥ महेश्वर उवाच ॥ दक्षो नाम महाभागे प्रजानां पतिरुत्तमः । हयमेधेन यजते तत्र यान्ति दिवौकसः ।
॥ उमोवाच ॥ यज्ञमेतं महादेव किमर्थं नाधिगच्छसि । केन वा प्रतिषेधेन गमनन्ते न विद्यते ।
॥ महेश्वर उवाच ॥ सुरैरेव महाभागे पूर्व्वमेतदनुष्ठितं । यज्ञेषु सर्व्वेषु मम न भाग उपकल्पितः ।
पूर्व्वोपायोपपन्नेन मार्गेण वरवर्णिनि । न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धर्म्मतः । १०११५
॥ उमोवाच ॥ भगवन् सर्व्वभूतेषु प्रभावाभ्यधिको गुणैः । अजय्यश्चाप्यधृष्यश्च तेजसा यशसा श्रिया ।
अनेन ते महाभाग प्रतिषेधेन भागतः । अतीव दुःखमुत्पन्नं वेपथुश्च ममानघ ।
॥ भीष्म उवाच ॥ एवमुक्त्वा तु सा देवी देवं पशुपतिं पतिं । तूष्णींभूताऽभवद्राजन् दह्यमानेन चेतसा ।
अथ देव्या मतं ज्ञात्वा हृद्गतं यच्चिकीर्षितं । स समाज्ञापयामास तिष्ठ त्वमिति नन्दिनं ।
ततो योगबलं कृत्वा सर्व्वयोगेश्वरेश्वरः । तं यज्ञं स महातेजा भीमैरनुचरैस्तदा । १०१२०
सहसा घातयामास देवदेवः पिनाकधृक् । केचिन्नादानमुञ्चन्त केचिद्धासांश्च चक्रिरे ।
रुधिरेणापरे राजंस्तत्राग्निं समवाकिरन् । केचिद्यूपान् समुत्पाट्य बभ्रमुर्व्विकृताननाः ।
आस्यैरन्ये चाग्रसन्त तथैव परिचारकान् । ततः स यज्ञो नृपते बध्यमानः समन्ततः ।
आस्थाय मृगरूपं वै खमेवाभ्यागमत्तदा । तन्तु यज्ञं तथारूपं गच्छन्तमुपलभ्य सः ।
धनुरादाय बाणेन तदाऽन्वसरत प्रभुः । ततस्तस्य सुरेशस्य क्रोधादमिततेजसः । १०१२५
ललाटात्प्रसृतो घोरः स्वेदबिन्दुर्बभूव ह । तस्मिन् पतितमात्रे च स्वेदबिन्दौ तदा भुवि ।
प्रादुर्ब्बभूव सुमहानग्निः कालानलोपमः । तत्र चाजायत तदा पुरुषः पुरुषर्षभ ।
ह्रस्वोऽतिमात्रं रक्ताक्षो हरिश्मश्रुर्विभीषणः । ऊर्द्ध्वकेशोऽतिरोमाङ्गः श्येनोलूकस्तथैव च ।
करालः कृष्णवर्णश्च रक्तवासास्तथैव च । तं यज्ञं सुमहासत्त्वोऽदहत्कक्षमिवानलः ।
व्यचरत्सर्व्वतो देवान् प्राद्रवत्स ऋषींस्तथा । देवाश्चाप्यद्रवन् सर्व्वे ततो भीता दिशो दश । १०१३०
तेन तस्मिन् विचरता पुरुषेण विशाम्पते । पृथिवी ह्यचलद्राजन्नतीव भरतर्षभ ।
हाहाभूतं जगत्सर्व्वमुपलक्ष्य तदा प्रभुः । पितामहो महादेवं दर्शयन् प्रत्यभाषत ।
॥ ब्रह्मोवाच ॥ भवतोऽपि सुराः सर्व्वे भागं दास्यन्ति वै प्रभो । क्रियतां प्रतिसंहारः सर्व्वदेवेश्वर त्वया ।
इमा हि देवताः सर्व्वा ऋषयश्च परन्तप । तव क्रोधान्महादेव न शान्तिमुपलेभिरे ।
यश्चैष पुरुषो जातः स्वेदात्ते विबुधोत्तम । ज्वरो नामैष धर्म्मज्ञ लोकेषु प्रचरिष्यति । १०१३५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

एकीभूतस्य न त्वस्य धारणे तेजसः प्रभो। समर्था सकला पृथ्वी बहुधा सृज्यतामयं।
इत्युक्तो ब्रह्मणा देवो भागे चापि प्रकल्पिते। भगवन्तं तथेत्याह ब्रह्माणममितौजसं।
पराञ्च प्रीतिमगमदुत्स्मयंश्च पिनाकधृक्। अवाप च तदा भागं यथोक्तं ब्रह्मणा भवः।
ज्वरञ्च सर्व्वधर्म्मज्ञो बहुधा व्यसृजत्तदा। शान्त्यर्थं सर्व्वभूतानां शृणु तच्चापि पुत्रक।
शीर्षाभितापो नागानां पर्व्वतानां शिलाजतु। अपान्तु नीलिकां विद्यान्निर्म्मोकं भुजगेषु च। १०२१०
खोरकः सौरभेयाणामूषरं पृथिवीतले। पशूनामपि धर्म्मज्ञ दृष्टिप्रत्यवरोधनं।
रन्ध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणां। नेत्ररोगः कोकिलस्य ज्वरः प्रोक्तो महात्मना।
अवीनां पित्तभेदश्च सर्व्वेषामिति नः श्रुतं। शुकानामपि सर्व्वेषां हिक्किका प्रोच्यते ज्वरः।
शार्द्दूलेष्वथ धर्म्मज्ञ श्रमो ज्वर इहोच्यते। मानुषेषु तु धर्म्मज्ञ ज्वरो नामैष भारत।
मरणे जन्मनि तथा मध्ये चाविशते नरं। एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः। १०२१५
नमस्यश्चैव मान्यश्च सर्व्वप्राणिभिरीश्वरः। अनेन हि समाविष्टो वृत्रो धर्म्मभृताम्बरः।
व्यजृम्भत ततः शक्रस्तस्मै वज्रमवासृजत्। प्रविश्य वज्रं वृत्रञ्च दारयामास भारत।
दारितश्च स वज्रेण महायोगी महासुरः। जगाम परमं स्थानं विष्णोरमिततेजसः।
विष्णुभक्त्या हि तेनेदं जगद्व्याप्तमभूत्तदा। तस्माच्च निहतो युद्धे विष्णोः स्थानमवाप्तवान्।
इत्येष वृत्रमाश्रित्य ज्वरस्य महतो मया। विस्तरः कथितः पुत्र किमन्यत्प्रब्रवीमि ते। १०२२०
इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः। विमुक्तरोगः स सुखी मुदा युतो लभेत कामान् स यथा मनीषितान्।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि ज्वरोत्पत्तिकथने चतुरशीत्यधिकद्विशततोऽध्यायः॥ २८४॥

॥ जनमेजय उवाच॥ प्राचेतसस्य दक्षस्य कथं वैवस्वतेऽन्तरे। विनाशमगमद्ब्रह्मन् हयमेधः प्रजापतेः।
देव्या मन्युकृतं मत्वा क्रुद्धः सर्व्वात्मकः प्रभुः। प्रसादात्तस्य दक्षेण स यज्ञः सन्धितः कथं।
एतद्वेदितुमिच्छेयं तन्मे ब्रूहि यथातथं।
॥ वैशम्पायन उवाच॥ पुरा हिमवतः पृष्ठे दक्षो वै यज्ञमाहरत्। गङ्गाद्वारे शुभे देशे ऋषिसिद्धनिषेविते। १०२२५
गन्धर्व्वाप्सरसाकीर्णे नानाद्रुमलतावृते। ऋषिसंघैः परिवृतं दक्षं धर्म्मभृतां वरं।
पृथिव्यामन्तरीक्षे च ये च स्वर्लोकवासिनः। सर्व्वे प्राञ्जलयो भूत्वा उपतस्थुः प्रजापतिं।
देवदानवगन्धर्व्वाः पिशाचोरगराक्षसाः। हाहाहूहूश्च गन्धर्व्वौ तुम्बुरुर्नारदस्तथा।
विश्वावसुर्विश्वसेनो गन्धर्व्वाप्सरसस्तथा। आदित्या वसवो रुद्राः साध्याः सह मरुद्गणैः।
इन्द्रेण सहिताः सर्व्वे आगता यज्ञभागिनः। ऊष्मपाः सोमपाश्चैव धूमपा आज्यपास्तथा। १०२३०
ऋषयः पितरश्चैव आगता ब्रह्मणा सह। एते चान्ये च बहवो भूतग्रामाश्चतुर्विधाः।
जरायुजाण्डजाश्चैव सहसा स्वेदजोद्भिजैः। आहूता मन्त्रिताः सर्व्वे देवाश्च सह पत्निभिः।
विराजन्ते विमानस्था दीप्यमाना इवाग्नयः। तान्दृष्ट्वा मन्युनाविष्टो दधीचिर्व्वाक्यमब्रवीत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नायं यज्ञो न वा धर्म्मो यत्र रुद्रो न दृज्यते । बधबन्धं प्रपन्ना वै किन्तु कालस्य पर्य्ययः ।
किन्तु मोहान्न पश्यन्ति विनाशं पर्य्युपस्थितं । उपस्थितं महाघोरं न बुध्यन्ति महाध्वरे । १०२८५
इत्युक्त्वा स महायोगी पश्यति ध्यानचक्षुषा । स पश्यति महादेवं देवीञ्च वरदां शुभां ।
नारदश्च महात्मानं तस्या देव्याः समीपतः । सन्तोषं परमं लेभे इति निश्चित्य योगवित् ।
एकमन्त्रास्तु ते सर्व्वे येनेशो न निमन्त्रितः । तस्माद्देशादपाक्रम्य दधीचिर्व्वाक्यमब्रवीत् ।
अपूज्यपूजनाच्चैव पूज्यानाञ्चाप्यपूजनात् । नृघातकसमं पापं शश्वत् प्राप्नोति मानवः ।
अनृतं नोक्तपूर्व्वं मे न च वक्ष्ये कदाचन । देवतानामृषीणाञ्च मध्ये सत्यं ब्रवीम्यहं । १०२९०
आगतं पशुभर्त्तारं स्रष्टारं जगतः पतिं । अध्वरे यज्ञभोक्तारं सर्व्वेषां पश्यत प्रभुं ।
॥ दक्ष उवाच ॥ सन्ति नो बहवो रुद्राः शूलहस्ताः कपर्द्दिनः । एकादशस्थानगता नाहं वेद्मि महेश्वरं ।
॥ दधीचिरुवाच ॥ सर्व्वेषामेव मन्त्रोऽयं येनासौ न निमन्त्रितः । यथाऽहं शङ्करादूर्द्धं नान्यं पश्यामि दैवतं ।
तथा दक्षस्य विपुलो यज्ञोऽयं न भविष्यति ।
॥ दक्ष उवाच ॥ एतन्मखेशाय सुवर्णपात्रे हविः समस्तं विधिमन्त्रपूतं । विष्णोर्नयाम्यप्रतिमस्य भागं प्रभुर्विभुश्चाहवनीय एषः । १०२९५
॥ देव्युवाच ॥ किं नाम दानं नियमं तपो वा कुर्य्यामहं येन पतिर्म्ममाद्य । लभेत भागं भगवानचिन्त्यो अर्द्धं तथा भागमथो तृतीयं ।
एवं ब्रुवाणां भगवान् स्वपत्नीं प्रहृष्टरूपः क्षुभितामुवाच । न वेत्सि मां देवि कृशोदराङ्गि किन्नाम युक्तं वचनं मखेशे ।
अहं विजानामि विशालनेत्रे ध्यानेन हीना न विदन्त्यसन्तः । तवाद्य मोहेन च सेन्द्रदेवा लोकास्त्रयः सर्व्वत एव मूढाः ।
मामध्वरे शंसितारः स्तुवन्ति रथन्तरं सामगाश्चोपगान्ति । मां ब्राह्मणा ब्रह्मविदो यजन्ते ममाध्वर्य्यवः कल्पयन्ते च भागं ।
॥ देव्युवाच ॥ सुप्राकृतोऽपि पुरुषः सर्व्वः स्त्रीजनसंसदि । स्तौति गर्व्वायते चापि स्वमात्मानं न संशयः । १०३००
॥ भगवानुवाच ॥ नात्मानं स्तौमि देवेशि पश्य मे तनुमध्यमे । यं स्रक्ष्यामि वरारोहे यागार्थे वरवर्णिनि ।
इत्युक्त्वा भगवान् पत्नीमुमां प्राणैरपि प्रियां । सोऽसृजद्भगवान् वक्त्राद्भूतं घोरप्रहर्षणं ।
तमुवाचाक्षिप मखं दक्षस्येति महेश्वरः । ततो वक्त्राद्विमुक्तेन सिंहेनैकेन लीलया ।
देव्या मन्युव्यपोहार्थं हतो दक्षस्य वै क्रतुः । मन्युना च महाभीमा महाकाली महेश्वरी ।
आत्मनः कर्म्मसाक्षित्वे तेन सार्द्धं सहानुगा । देवस्यानुमतं मत्वा प्रणम्य शिरसा ततः । १०३०५
आत्मनः सदृशः शौर्य्याद्बलरूपसमन्वितः । स एव भगवान् क्रोधः प्रतिरूपसमन्वितः ।
अनन्तबलवीर्य्यश्च अनन्तबलपौरुषः । वीरभद्र इति ख्यातो देव्या मन्युप्रमार्ज्जकः ।
सोऽसृजद्रोमकूपेभ्यो रौम्यान्नाम गणेश्वरान् । रुद्रतुल्या गणा रौद्रा रुद्रवीर्य्यपराक्रमाः ।
ते निपेतुस्ततस्तूर्णं दक्षयज्ञविहिंसया । भीमरूपा महाकायाः शतशोऽथ सहस्रशः ।
ततः किलकिलाशब्दैराकाशं पूरयन्ति च । तेन शब्देन महता त्रस्तास्तत्र दिवौकसः । १०३१०
पर्व्वताश्च व्यशीर्य्यन्त चकम्पे च वसुन्धरा । मारुताश्चैव घूर्णन्ते चुक्षुभे वरुणालयः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry .

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अग्नयो नैव दीप्यन्ते नैव दीप्यति भास्करः। ग्रहा नैव प्रकाशन्ते नक्षत्राणि न चन्द्रमाः।
ऋषयो न प्रकाशन्ते न देवा न च मानुषाः। एवन्तु तिमिरीभूते निर्द्दहन्त्यपमानिताः।
प्रहरन्त्यपरे घोरा यूपानुत्पाटयन्ति च। प्रमर्द्दन्ति तथा चान्ये विमर्द्दन्ति तथा परे।
आधावन्ति प्रधावन्ति वायुवेगा मनोजवाः। चूर्ण्यन्ते यज्ञपात्राणि दिव्यान्याभरणानि च। १०११५
विशीर्णा इव दृश्यन्ते तारा इव नभस्तले। दिव्यान्नपानभक्ष्याणां राशयः पर्व्वतोपमाः।
क्षीरनद्योऽथ दृश्यन्ते घृतपायसकर्द्दमाः। दधिमण्डोदका दिव्याः खण्डशर्करवालुकाः।
षड्रसा निवहन्त्येता गुडकुल्या मनोरमाः। उच्चावचानि मांसानि भक्ष्याणि विविधानि च।
पानकानि च दिव्यानि लेह्यचूष्याणि यानि च। भुञ्जते विविधैर्व्वक्त्रैर्व्विलुम्पन्त्याक्षिपन्ति च।
रुद्रकोपान्महाकायाः कालाग्निसदृशोपमाः। क्षोभयन् सुरसैन्यानि भीषयन्तः समन्ततः। १०१२०
क्रीडन्ति विविधाकारास्चिक्षिपुः सुरयोषितः। रुद्रक्रोधात् प्रयत्नेन सर्व्वदेवैः सुरक्षितं।
तं यज्ञमदहच्छीघ्रं रुद्रकर्म्मा समन्ततः। चकार भैरवं नादं सर्व्वभूतभयङ्करं।
छित्त्वा शिरो वै यज्ञस्य ननाद च मुमोद च। ततो ब्रह्मादयो देवा दक्षश्चैव प्रजापतिः।
ऊचुः प्राञ्जलयः सर्व्वे कथ्यतां को भवानिति।
॥ वीरभद्र उवाच ॥ नाहं रुद्रो न वा देवो नैव भोक्तुमिहागतः। देव्या मन्युकृतं मत्वा क्रुद्धः सर्व्वात्मकः प्रभुः। १०१२५
द्रष्टुं वा नैव विप्रेन्द्रान्नैव कौतूहलेन वा। तव यज्ञविघातार्थं संप्राप्तं विद्धि मामिह।
वीरभद्र इति ख्यातो रुद्रकोपाद्विनिःसृतः। भद्रकालीति विख्याता देव्याः कोपाद्विनिःसृता।
प्रेषितौ देवदेवेन यज्ञान्तिकमिहागतौ। शरणं गच्छ विप्रेन्द्र देवदेवमुमापतिं।
वरं क्रोधोऽपि देवस्य वरदानं न चान्यतः। वीरभद्रवचः श्रुत्वा दक्षो धर्म्मभृताम्वरः।
तोषयामास स्तोत्रेण प्रणिपत्य महेश्वरं। प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययं। १०१३०
महादेवं महात्मानं विश्वस्य जगतः पतिं। दक्षः प्रजापतिर्यज्ञैर्द्रव्यैस्तैः सुसमाहितैः।
आहूता देवताः सर्व्वा ऋषयश्च तपोधनाः। देवो नाहूयते तत्र विश्वकर्म्मा महेश्वरः।
तत्र क्रुद्धा महादेवी गणांस्तत्र व्यसर्ज्जयत्। प्रदीप्ते यज्ञवाटे तु विद्रुतेषु द्विजातिषु।
तारागणमनुप्राप्ते रौद्रे दीप्ते महात्मनि। शूलनिर्भिन्नहृदयैः कूजद्भिः परिचारकैः।
निखातोत्पाटितैर्यूपैरपविद्धैरितस्ततः। उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृद्धिभिः। १०१३५
पक्षवातविनिर्द्धूतैः शिवाशतनिनादितैः। यक्षगन्धर्व्वसंघैश्च पिशाचोरगराक्षसैः।
प्राणापानौ संनिरुध्य वक्त्रस्थानेन यत्नतः। विचार्य्य सर्व्वतो दृष्टिं बहुदृष्टिरमित्रजित्।
सहसा देवदेवेशो ह्यग्निकुण्डात् समुत्थितः। बिभ्रत् सूर्य्यसहस्रस्य तेजः संवर्त्तकोपमः।
स्मितं कृत्वा ऽब्रवीद्वाक्यं ब्रूहि किं करवाणि ते। श्राविते च मखाध्याये देवानां गुरुणा ततः।
तमुवाचाञ्जलिं कृत्वा दक्षो देवं प्रजापतिः। भीतशङ्कितवित्रस्तः सवाष्पवदनेक्षणः। १०१४०
यदि प्रसन्नो भगवान् यदि वाऽहं भवत्प्रियः। यदि चाहमनुग्राह्यो यदि वा वरदो मम।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यद्दग्धं भक्षितं पीतमशितं यच्च नाशितं । चूर्णीकृतापविद्धञ्च यज्ञसम्भारसोद्भृशं ।
दीर्घकालेन महता प्रयत्नेन सुसञ्चितं । तन्न मिथ्या भवेन्मह्यं वरमेतमहं वृणे ।
तथाऽस्त्वित्याह भगवान् भगनेत्रहरो हरः । धर्म्माध्यक्षो विरूपाक्षस्त्र्यक्षो देवः प्रजापतिः ।
जानुभ्यामवनीं गत्वा दक्षो लब्ध्वा भवाद्वरं । नाम्नामष्टसहस्रेण स्तुतवान् वृषभध्वजं । १०९४५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि दक्षयज्ञविनाशे पञ्चाशीत्यधिकद्विशतोऽध्यायः ॥ २८५ ॥
॥ युधिष्ठिर उवाच ॥ यैर्नामधेयैस्तुतवान् दक्षो देवं प्रजापतिः । वक्तुमर्हसि मे तात श्रोतुं श्रद्धा ममानघ ।
॥ भीष्म उवाच ॥ श्रूयन्तां देवदेवस्य नामान्यद्भुतकर्म्मणः । गूढव्रतस्य गुह्यानि प्रकाशानि च भारत ।
नमस्ते देवदेवेश देवारिबलसूदन । देवेन्द्र बलविष्टम्भ देवदानवपूजित ।
सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिप प्रिय । सर्व्वतः पाणिपादान्त सर्व्वतोऽक्षिशिरोमुख ।
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठसि । शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय । १०९५०
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते । शतोदर शतावर्त्त शतजिह्व नमोऽस्तु ते ।
गायन्ति त्वां गायत्रिणो अर्च्चयन्त्यर्कमर्किणः । ब्रह्माणं त्वां शतक्रतुमूर्द्ध्वं खमिव मेनिरे ।
मूर्त्तौ हि ते महामूर्त्ते समुद्राम्बरसन्निभ । सर्व्वा वै देवता ह्यस्मिन् गावो गोष्ठ इवासते ।
भवच्छरीरे पश्यामि सोममग्निं जलेश्वरं । आदित्यमथ वै विष्णुं ब्रह्माणञ्च बृहस्पतिं ।
भगवान् कारणं कार्य्यं क्रिया करणमेव च । असतश्च सतश्चैव तथैव प्रभवाप्ययौ । १०९५५
नमो भवाय शर्व्वाय रुद्राय वरदाय च । पशूनां पतये नित्यं नमोऽस्त्वन्धकघातिने ।
त्रिजटाय त्रिशीर्षाय त्रिशूलवरपाणिने । त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ।
नमश्चण्डाय कुण्डाय अण्डायाण्डधराय च । दण्डिने समकर्णाय दण्डिमुण्डाय वै नमः ।
नमोर्द्ध्वदंष्ट्रकेशाय शुक्लायावतताय च । विलोहिताय धूम्राय नीलग्रीवाय वै नमः ।
नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च । सूर्य्याय सूर्य्यमालाय सूर्य्यध्वजपताकिने । १०९६०
नमः प्रमथनाथाय वृषस्कन्धाय धन्विने । शत्रुन्दमाय दण्डाय पर्णचीरपटाय च ।
नमो हिरण्यगर्भाय हिरण्यकवचाय च । हिरण्यकृतचूडाय हिरण्यपतये नमः ।
नमस्तुताय स्तुत्याय स्तूयमानाय वै नमः । सर्व्वाय सर्व्वभक्ष्याय सर्व्वभूतान्तरात्मने ।
नमो होत्रेऽथ मन्त्राय शुक्लध्वजपताकिने । नमो नाभाय नाभ्याय नमः कटकटाय च ।
नमोऽस्तु कृशनाशाय कृशाङ्गाय कृशाय च । संहृष्टाय नमस्तुभ्यं नमः किलकिलाय च । १०९६५
नमोऽस्तु शयमानाय शयितायोत्थिताय च । स्थिताय धावमानाय मुण्डाय जटिलाय च ।
नमो नर्त्तनशीलाय मुखवादित्रवादिने । नाद्योपहारलुब्धाय गीतवादित्रशालिने ।
नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च । कालनाथाय कल्पाय क्षयायोपक्षयाय च ।
भीमदुन्दभिहासाय भीमव्रतधराय च । उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ।
नमः कपालहस्ताय चितिभस्मप्रियाय च । विभीषणाय भीष्माय भीमव्रतधराय च । १०९७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

नमो विकृतवक्त्राय खड्गजिह्वाय दंष्ट्रिणे। पक्वाममांसलुब्धाय तुम्बीवीणाप्रियाय च।
नमो वृषाय वृष्याय गोवृषाय वृषाय च। कटङ्कटाय दण्डाय नमः पचपचाय च।
नमः सर्व्ववरिष्ठाय वराय वरदाय च। वरमाल्यगन्धवस्त्राय वरातिवरदे नमः।
नमो रक्तविरक्ताय भावनायाक्षमालिने। सम्भिन्नाय विभिन्नाय छायायातपनाय च।
अघोरघोररूपाय घोरघोरतराय च। नमः शिवाय शान्ताय नमः शान्ततमाय च। १०३७५
एकपाद्बहुनेत्राय एकशीर्ष्णे नमो नमः। क्षुद्राय क्षुद्रलुब्धाय संविभागप्रियाय च।
पञ्चालाय सिताङ्गाय नमः शमशमाय च। नमश्चण्डिकघण्टाय घण्टायाघण्टघण्टिने।
सहस्राध्मातघण्टाय घण्टामालाप्रियाय च। प्राणघण्टाय गन्धाय नमः कलकलाय च।
हुंहुंहुंकारपाराय हुंहुंकारप्रियाय च। नमः शमशमे नित्यं गिरिवृक्षालयाय च।
गर्भमांसशृगालाय तारकाय तराय च। नमो यज्ञाय यजिने हुताय प्रहुताय च। १०३८०
यज्ञवाहाय दान्ताय तप्याय तपनाय च। नमस्तटाय तव्याय तटानां पतये नमः।
अन्नदायान्नपतये नमस्त्वन्नभुजे तथा। नमः सहस्रशीर्षाय सहस्रचरणाय च।
सहस्रोद्यतशूलाय सहस्रनयनाय च। नमो बालार्कवर्णाय बालरूपधराय च।
बालानुचरगुप्ताय बालक्रीडनकाय च। नमो वृद्धाय लुब्धाय क्षुब्धाय क्षोभणाय च।
तरङ्गाङ्कितकेशाय मुञ्जकेशाय वै नमः। नमः षट्कर्म्मतुष्टाय त्रिकर्म्मनिरताय च। १०३८५
वर्णाश्रमाणां विधिवत् पृथक्कर्म्मनिवर्त्तिने। नमो घुष्याय घोषाय नमः कलकलाय च।
श्वेतपिङ्गलनेत्राय कृष्णरक्तेक्षणाय च। प्राणभग्नाय दण्डाय स्फोटनाय कृशाय च।
धर्म्मकामार्थमोक्षाणां कथनीयकथाय च। सांख्याय सांख्यमुख्याय सांख्ययोगप्रवर्त्तिने।
नमो रथ्यविरथ्याय चतुष्पथरताय च। कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने।
ईशानवज्रसंघात हरिकेश नमोऽस्तु ते। त्र्यम्बिकाम्बिकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते। १०३९०
काम कामद कामघ्न तृप्तातृप्तविचारिणे। सर्व्व सर्व्वद सर्व्वघ्न सन्ध्याराग नमोऽस्तु ते।
महामेघचयप्रख्य महाकाल नमोऽस्तु ते। स्थूलजीर्णाङ्गजटिले वल्कलाजिनधारिणे।
दीप्तसूर्य्याग्निजटिले वल्कलाजिनवाससे। सहस्रसूर्य्यप्रतिम तपोनित्य नमोऽस्तु ते।
उन्मादन शतावर्त्त गङ्गातोयार्द्रमूर्द्धज। चन्द्रावर्त्त युगावर्त्त मेघावर्त्त नमोऽस्तु ते।
त्वमन्नमन्नभोक्ता च अन्नदोऽन्नभुगेव च। अन्नस्रष्टा च पक्ता च पक्वभुक् पवनोऽनलः। १०३९५
जरायुजाण्डजाश्चैव स्वेदजाश्च तथोद्भिजाः। त्वमेव देवदेवेश भूतग्रामश्चतुर्व्विधः।
चराचरस्य स्रष्टा त्वं प्रतिहर्त्ता तथैव च। त्वामाहुर्ब्रह्मविदुषो ब्रह्म ब्रह्मविदाम्वर।
मनसः परमा योनिः खं वायुर्ज्योतिषां निधिः। ऋक्सामानि तथोङ्कारमाहुस्त्वां ब्रह्मवादिनः।
हायि हायि हुवा होयि हुवा होयि तथाऽसकृत्। गायन्ति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः।
यजुर्म्मय ऋङ्मयश्च त्वमाहुतिमयस्तथा। पठ्यसे श्रुतिभिश्चैव वेदोपनिषदां गणैः। १०४००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये । त्वमेव मेघसङ्घाश्च विद्युत्स्तनितगर्ज्जितः ।
संवत्सरस्त्वमृतवो मासो मासार्द्धमेव च । युगं निमेषाः काष्ठास्त्वं नक्षत्राणि ग्रहाः कलाः ।
वृक्षाणां ककुदोऽसि त्वं गिरीणां शिखराणि च । व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनां ।
क्षीरोदो ह्युदधीनाञ्च यन्त्राणां धनुरेव च । वज्रः प्रहरणानाञ्च व्रतानां सत्यमेव च ।
त्वमेव द्वेष इच्छा च रागो मोहः क्षमाक्षमे । व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ । १०४०५
त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा । छेत्ता भेत्ता प्रहर्त्ता त्वं नेता सन्तापिता मतः ।
दशलक्षणसंयुक्तो धर्म्मोऽर्थः काम एव च । गङ्गा समुद्राः सरितः पल्वलानि सरांसि च ।
लता वल्ल्यस्तृणौषध्यः पशवो मृगपक्षिणः । द्रव्यकर्म्मसमारम्भः कालपुष्पफलप्रदाः ।
आदिश्चान्तश्च वेदानां गायत्र्योङ्कार एव च । हरितो रोहितो नीलः कृष्णो रक्तस्तथाऽरुणः ।
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा । अवर्णश्च सुवर्णश्च वर्णकारो ह्यनौपमः । १०४१०
सुवर्णनामा च तथा सुवर्णप्रिय एव च । त्वमिन्द्रश्च यमश्चैव वरदो धनदोऽनलः ।
उपप्लवश्चित्रभानुः स्वर्भानुर्भानुरेव च । होत्रं होता च होम्यश्च हुतश्चैव तथा प्रभुः ।
त्रिसौवर्णं तथा ब्रह्म यजुषां शतरुद्रियं । पवित्रञ्च पवित्राणां मङ्गलानाञ्च मङ्गलं ।
गिरिको हिण्डुको वृक्षो जीवः पुद्गल एव च । प्राणः सत्त्वं रजश्चैव तमश्चाप्रमदस्तथा ।
प्राणोऽपानः समानश्च उदानो व्यान एव च । उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च । १०४१५
लोहितान्तर्गता दृष्टिर्म्महावक्त्रो महोदरः । शुचीरोमा हरिश्मश्रुरूर्द्ध्वकेशश्चलाचलः ।
गीतवादित्रतत्त्वज्ञो गीतवादनकप्रियः । मत्स्यो जलचरो जाल्यो ऽकलः केलिकलः कलिः ।
अकालश्चातिकालश्च दुष्कालः काल एव च । मृत्युः क्षुरश्च कृत्यश्च पक्षोऽपक्षक्षयङ्करः ।
मेघकालो महादंष्ट्रः संवर्त्तकवलाहकः । घण्टो ऽघण्टो घटी घण्टी चरुचेली मिलीमिली ।
ब्रह्मकायिकमग्नीनां दण्डी मुण्डस्त्रिदण्डधृक् । चतुर्युगश्चतुर्व्वेदश्चातुर्होत्रप्रवर्त्तकः । १०४२०
चातुराश्रम्यनेता च चातुर्व्वर्ण्यकरश्च यः । सदाचाक्षप्रियो धूर्त्तो गणाध्यक्षो गणाधिपः ।
रक्तमाल्याम्बरधरो गिरीशो गिरिकप्रियः । शिल्पिकः शिल्पिनां श्रेष्ठः सर्व्वशिल्पप्रवर्त्तकः ।
भगनेत्राङ्कुशश्चण्डः पुष्णो दन्तविनाशनः । स्वाहा स्वधा वषट्कारो नमस्कारो नमो नमः ।
गूढव्रतो गुह्यतपास्तारकस्तारकामयः । धाता विधाता सन्धाता विधाता धारणोऽधरः ।
ब्रह्मा तपश्च सत्यञ्च ब्रह्मचर्य्यमथार्ज्जवं । भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः । १०४२५
भूर्भुवः स्वरितश्चैव ध्रुवो दान्तो महेश्वरः । दीक्षितोऽदीक्षितः क्षान्तो दुर्द्दान्तो ऽदान्तनाशनः ।
चन्द्रावर्त्तो युगावर्त्तः संवर्त्तः सम्प्रवर्त्तकः । कामो विन्दुरणुः स्थूलः कर्णिकारस्रजप्रियः ।
नन्दीमुखो भीममुखः सुमुखो दुर्म्मुखोऽमुखः । चतुर्म्मुखो बहुमुखो रणेष्वग्निमुखस्तथा ।
हिरण्यगर्भः शकुनिर्म्महोरगपतिर्व्विराट् । अधर्म्महा महापार्श्वश्चण्डधारो गणाधिपः ।
गोनर्द्दो गोप्रतारश्च गोवृषेश्वरवाहनः । त्रैलोक्यगोप्ता गोविन्दो गोमार्गो मार्ग एव च । १०४३०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रेष्ठः स्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च। दुर्व्वारणो दुर्व्विषहो दुःसहो दुरतिक्रमः।

दुर्द्धर्षो दुष्प्रकम्पश्च दुर्व्विदो दुर्जयो जयः। शशः शशाङ्कः शमनः शीतोष्णक्षुज्जराधिधृक्।

आधयो व्याधयश्चैव व्याधिहा व्याधिरेव च। मम यज्ञमृगव्याधो व्याधीनामागमो गमः।

शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः। दण्डधारस्त्र्यम्बकश्च उग्रदण्डोऽण्डनाशनः।

विषाग्निपात् सुरश्रेष्ठः सोमपास्त्वं मरुत्पतिः। अमृतपास्त्वं जगन्नाथ देव देवगणेश्वरः। १०४३५

विषाग्निपा मृत्युपाश्च क्षीरपाः सोमपास्तथा। मधुश्च्युतानामग्रपास्त्वं त्वमेव तुषिताज्यपाः।

हिरण्यरेताः पुरुषस्त्वमेव त्वं स्त्री पुमांस्त्वञ्च नपुंसकञ्च। बालो युवा स्थविरो जीर्णदंष्ट्रस्त्वं नागेन्द्रः शक्रस्त्वं विश्वकृद्विश्व कर्त्ता।

विश्वकृद्विश्वकृतां वरेण्यस्त्वं विश्वबाहो विश्वरूपस्तेजस्वी विश्वतोमुखः। चन्द्रादित्यौ चक्षुषी ते हृदयञ्च पितामहः।

महोदधिः सरस्वती वाग्बलमनलोऽनिलः। अहोरात्रं निमेषोन्मेषकर्म्मा।

न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते। माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव। १०४४०

या मूर्त्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनं। त्राहि मां सततं रक्ष पिता पुत्त्रमिवौरसं।

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते। भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि।

यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दृशः। तिष्ठत्येकः समुद्रान्ते स मे गोप्ताऽस्तु नित्यशः।

यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः। ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः।

जटिले दण्डिने नित्यं लम्बोदरशरीरिणे। कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः। १०४४५

यस्य केशेषु जीमूता नद्यः सर्व्वाङ्गसन्धिषु। कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः।

सम्भक्ष्य सर्व्वभूतानि युगान्ते पर्य्युपस्थिते। यः शेते जलमध्यस्थस्तं प्रपद्ये ऽम्बुशायिनं।

प्रविश्य वदनं राहोर्यः सोमं पिवते निशि। ग्रसत्यर्कञ्च स्वर्भानुर्भूत्वा मां सोऽभिरक्षतु।

ये चानुपतिता गर्भा यथाभागानुपासते। नमस्तेभ्यः स्वधा स्वाहा प्राप्नुवन्तु मुदन्तु ते।

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्व्वदेहिनां। रक्षन्तु ते हि मां नित्यं नित्यञ्चाप्याययन्तु मां। १०४५०

ये न रोदन्ति देहस्था देहिनो रोदयन्ति च। हर्षयन्ति न हृष्यन्ति नमस्तेभ्योऽस्तु नित्यशः।

ये नदीषु समुद्रेषु पर्व्वतेषु गुहासु च। वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु ये।

चतुष्पथेषु रथ्यासु चत्वरेषु तटेषु च। हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च।

येषु पञ्चसु भूतेषु दिशासु विदिशासु च। चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु।

रसातलगता ये च ये च तस्मै परं गताः। नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योऽस्तु नित्यशः। १०४५५

येषां न विद्यते संख्या प्रमाणं रूपमेव च। असंख्येयगुणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः।

सर्व्वभूतकरो यस्मात् सर्व्वभूतपतिर्हरः। सर्व्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः।

त्वमेव हीज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः। त्वमेव कर्त्ता सर्व्वस्य तेन त्वं न निमन्त्रितः।

अथवा मायया देव सूक्ष्मया तव मोहितः। एतस्मात् कारणाद्वाऽपि तेन त्वं न निमन्त्रितः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रसीद मम भद्रन्ते भव भावगतस्य मे । त्वयि मे हृदयं देव त्वयि बुद्धिर्म्मनस्त्वयि । १०४६०
स्तुत्वैवं स महादेवं विरराम प्रजापतिः । भगवानपि सुप्रीतः पुनर्द्दक्षमभाषत ।
परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत । बहुनाऽत्र किमुक्तेन मत्समीपे भविष्यसि ।
अश्वमेधसहस्रस्य वाजपेयशतस्य च । प्रजापते मत्प्रसादात्फलभागी भविष्यति ।
अथैनमब्रवीद्वाक्यं लोकस्याधिपतिर्भवः । आश्वासनकरं वाक्यं वाक्यविद्वाक्यसम्मतं ।
दक्ष दक्ष न कर्त्तव्यो मन्युर्विघ्नमिमं प्रति । अहं यज्ञहरस्तुभ्यं दृष्टमेतत् पुरातनं । १०४६५
भूयश्च ते वरं दद्मि तं त्वं गृह्णीष्व सुव्रत । प्रसन्नवदनो भूत्वा तदिहैकमनाः शृणु ।
वेदात् षडङ्गादुद्धृत्य सांख्ययोगाच्च युक्तितः । तपः सुतप्तं विपुलं दुश्चरं देवदानवैः ।
अपूर्व्वं सर्व्वतोभद्रं विश्वतोमुखमव्ययं । अब्दैर्द्दशार्द्धसंयुक्तं गूढमप्राज्ञनिन्दितं ।
वर्णाश्रमकृतैर्द्धर्म्मैर्विपरीतं क्वचित् समं । गतान्तैरध्यवसितमत्याश्रममिदं व्रतं ।
मया पाशुपतं दक्ष शुभमुत्पादितं पुरा । तस्य चीर्णस्य तत्सम्यक् फलं भवति पुष्कलं । १०४७०
तच्चास्तु ते महाभाग त्यज्यतां मानसो ज्वरः । एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः । दक्षप्रोक्तं स्तवमिमं कीर्त्तयेद्यः शृणोति वा ।
नाशुभं प्राप्नुयात् किञ्चिद्दीर्घमायुरवाप्नुयात् । यथा सर्व्वेषु देवेषु वरिष्ठो भगवाञ्छिवः ।
तथा स्तवो वरिष्ठोऽयं स्तवानां ब्रह्मसम्मितः । यशोराज्यसुखैश्वर्य्यकामार्थधनकाङ्क्षिभिः ।
श्रोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः । व्याधितो दुःखितो दीनश्चौरग्रस्तो भयार्द्दितः । १०४७५
राजकार्य्याभियुक्तो वा मुच्यते महतो भयात् । अनेनैव तु देहेन गणानां समतां व्रजेत् ।
तेजसा यशसा चैव युक्तो भवति निर्म्मलः । न राक्षसाः पिशाचा वा न भूता न विनायकाः ।
विघ्नं कुर्य्युर्गृहे तस्य यत्रायं पठ्यते स्तवः । शृणुयाच्चैव या नारी तद्भक्ता ब्रह्मचारिणी ।
पितृपक्षे मातृपक्षे पूज्या भवति देववत् । शृणुयाद्यः स्तवं कृत्स्नं कीर्त्तयेद्वा समाहितः ।
तस्य सर्व्वाणि कर्म्माणि सिद्धिं गच्छन्त्यभीक्ष्णशः । मनसा चिन्तितं यच्च यच्च वाचाऽनुकीर्त्तितं । १०४८०
सर्व्वं सम्पद्यते तस्य स्तवस्यास्यानुकीर्त्तनात् । देवस्य च गुहस्यापि देव्या नन्दीश्वरस्य च ।
बलिं सुविहितं कृत्वा दमेन नियमेन च । ततस्तु युक्तो गृह्णीयान्नामान्याशु यथाक्रमं ।
ईप्सितान् लभते सोऽर्थान् भोगान् कामांश्च मानवः । मृतश्च स्वर्गमाप्नोति तिर्य्यक्षु च न जायते ।
इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि दक्षप्रोक्तशिवसहस्रनामस्तोत्रे षडशीत्यधिकद्विशतोऽध्यायः ॥ २८६ ॥

॥ युधिष्ठिर उवाच ॥ अध्यात्मं नाम यदिदं पुरुषस्येह विद्यते । यदध्यात्मं यतश्चैव तन्मे ब्रूहि पितामह । १०४८५
॥ भीष्म उवाच ॥ सर्व्वज्ञानपरं बुद्ध्वा यन्मां त्वमनुपृच्छसि । तद्व्याख्यास्यामि ते तात तस्य व्याख्यामिमां शृणु ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं । महाभूतानि भूतानां सर्व्वेषां प्रभवाप्ययौ ।
स तेषां गुणसंघातः शरीरं भरतर्षभ । सततं हि प्रलीयन्ते गुणास्ते प्रभवन्ति च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततः सृष्टानि भूतानि तानि यान्ति पुनः पुनः । महाभूतानि भूतेभ्य ऊर्म्मयः सागरे यथा ।
प्रसारयित्वेहाङ्गानि कूर्म्मः संहरते यथा । तद्वद्भूतानि भूतानामल्पीयांसि स्ववीयसा ।
आकाशात् खलु यो घोषः संघातस्तु महीगुणः । वायोः प्राणो रसस्त्वद्भ्यो रूपं तेजस उच्यते ।
इत्येतन्मयमेवैतत्सर्व्वं स्थावरजङ्गमं । प्रलये च तमभ्येति तस्मादुद्दिश्यते पुनः ।
महाभूतानि पञ्चैव सर्व्वभूतेषु भूतकृत् । विषयान् कल्पयामास यस्मिन् यदनुपश्यति ।
शब्दः श्रोत्रं तथा खानि त्रयमाकाशयोनिजं । रसः स्नेहश्च जिह्वा च अपामेते गुणाः स्मृताः ।
रूपं चक्षुर्व्विपाकाश्च त्रिविधं ज्योतिरुच्यते । घ्रेयं घ्राणं शरीरञ्च एते भूमिगुणाः स्मृताः ।
प्राणः स्पर्शश्च चेष्टा च वायोरेते गुणाः स्मृताः । इति सर्व्वगुणा राजन् व्याख्याताः पाञ्चभौतिकाः ।
सत्त्वं रजस्तमः कालः कर्म्म बुद्धिश्च भारत । मनःषष्ठानि चैतेषु ईश्वरः समकल्पयत् ।
यदूर्द्ध्वं पादतलयोरवाङ्मूर्द्ध्नश्च पश्यसि । एतस्मिन्नेव कृत्स्नेयं वर्त्तते बुद्धिरन्तरे ।
इन्द्रियाणि नरे पञ्च षष्ठन्तु मन उच्यते । सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञः पुनरष्टमः ।
इन्द्रियाणि च कर्त्ता च विचेतव्यानि भागशः । ततः सत्त्वं रजश्चैव तेऽपि भावास्तदाश्रयाः ।
चक्षुरालोचनायैव संशयं कुरुते मनः । बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ।
तमः सत्त्वं रजश्चेति कालः कर्म्म च भारत । गुणैर्न्नीयते बुद्धिर्बुद्धिरेवेन्द्रियाणि च ।
मनःषष्ठानि सर्व्वाणि बुद्ध्यभावे कुतो गुणाः । येन पश्यति तच्चक्षुः शृण्वती श्रोत्रमुच्यते ।
जिघ्रती भवति घ्राणं रसती रसना रसान् । स्पर्शनं स्पर्शती स्पर्शान् बुद्धिर्व्विक्रियते सकृत् ।
यदा प्रार्थयते किञ्चित्तदा भवति सा मनः । अधिष्ठानानि बुद्ध्या हि पृथगेतानि पञ्चधा ।
इन्द्रियाणीति तान्याहुस्तेषु दुष्टेषु दुष्यति । पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्त्तते ।
कदाचिल्लभते प्रीतिं कदाचिदपि शोचति । न सुखेन न दुःखेन कदाचिदपि वर्त्तते ।
सेयं भावात्मिका भावांस्त्रीनेतान् परिवर्त्तते । सरितां सागरो भर्त्ता यथा वेलामिवोर्म्मिमान् ।
इति भावगता बुद्धिर्भावे मनसि वर्त्तते । प्रवर्त्तमानन्तु रजस्तद्भावेनानुवर्त्तते ।
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता । कथञ्चिदुपपद्यन्ते पुरुषे सात्त्विका गुणाः ।
परिदाहस्तथा शोकः सन्तापो मूर्त्तिरक्षमा । लिङ्गानि रजसस्तानि दृश्यन्ते हेत्वहेतुभिः ।
अविद्या रागमोहौ च प्रमादस्तब्धताभयं । असमृद्धिस्तथा दैन्यं प्रमोहः स्वप्नतन्द्रिता ।
कथञ्चिदुपवर्त्तन्ते विविधास्तामसा गुणाः । अत्र यत् प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्त्तते सात्त्विको भाव इत्युपेक्षेत तत्तथा । अथ यद्दुःखसंयुक्तमप्रीतिकरमात्मनः ।
प्रवृत्तं रज इत्येव तदसंरभ्य चिन्तयेत् । अथ यन्मोहसंयुक्तं काये मनसि वा भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् । इति बुद्धिगतीः सर्व्वा व्याख्याता यावतीरिह ।
एतद्बुद्ध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणं । सत्त्वक्षेत्रज्ञयोरेतदन्तरं विद्धि सूक्ष्मयोः ।
सृजतेऽत्र गुणानेक एको न सृजते गुणान् । पृथग्भूतौ प्रकृत्या तु सम्प्रयुक्तौ च सर्व्वदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यथा मत्स्योऽद्भिरन्यः स्यात् सम्प्रयुक्तौ भवेत्तथा। न गुणा विदुरात्मानं स गुणान् वेद सर्व्वतः।
परिद्रष्टा गुणानान्तु संस्रष्टा मन्यते यथा। आश्रयो नास्ति सत्त्वस्य गुणसर्गेण चेतना। १०५१०
सत्त्वमस्य सृजन्त्यन्ये गुणान् वेद कदाचन। सृजते हि गुणान् सत्त्वं क्षेत्रज्ञः परिपश्यति।
संप्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवः। इन्द्रियैस्तु प्रदीपार्थं क्रियते बुद्धिरन्तरा।
निश्चक्षुर्भिरजानद्भिरिन्द्रियाणि प्रदीपवत्। एवं स्वभावमेवैतत् तद्बुद्ध्वा विहरेन्नरः।
अशोचन् प्रहृष्यंश्च स वै विगतमत्सरः। स्वभावसिद्धमेवैतत् यदिमान् सृजते गुणान्।
ऊर्णनाभिर्यथा सूत्रं विज्ञेयास्तन्तुवद्गुणाः। प्रध्वस्ता न निवर्त्तन्ते प्रवृत्तिर्नोपलभ्यते। १०५१५
एवमेके व्यवस्यन्ति निवृत्तिरिति चापरे। इतीमं हृदयग्रन्थिं बुद्धिचिन्तामयं दृढं।
विमुच्य सुखमासीत विशोकश्छिन्नसंशयः। ताम्येयुः प्रच्युताः पृथ्वीं मोहपूर्णां नदीं नराः।
यथा गाधमविद्वांसो बुद्धियोगमयं तथा। नैव ताम्यन्ति विद्वांसः प्लवन्तः पारमम्भसः।
अध्यात्मविदुषो धीरा ज्ञानन्तु परमं प्लवः।
न भवति विदुषां महद्भयं यदविदुषां सुमहद्भयं भवेत्। न हि गतिरधिकाऽस्ति कस्यचित् सकृदुपदर्शयतीह तुल्यतां। १०५२०
यत्करोति वक्रदोषमेकतस्तच्च दूषयति यत् पुरा कृतं। नाप्रियं तदुभयं करोत्यसौ यच्च दूषयति यत् करोति च।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पाञ्चभौतिके सप्ताशीत्यधिकद्विशततोऽध्यायः ॥ २८७ ॥

॥ युधिष्ठिर उवाच ॥ सुदुःखाच्च मृत्योश्च त्रसन्ते प्राणिनः सदा। उभयं नो यथा न स्यात्तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं। नारदस्य च संवादं समङ्गस्य च भारत।
॥ नारद उवाच ॥ उरसेव प्रणमसे बाहुभ्यां तरसीव च। सम्प्रहृष्टमना नित्यं विशोक इव लक्ष्यसे।
उद्वेगं न हि ते किञ्चित् सुसूक्ष्ममपि लक्षये। नित्यतृप्त इव स्वस्थो बालवच्च विचेष्टसे। १०५२५
॥ समङ्ग उवाच ॥ भूतभव्यं भविष्यच्च सर्व्वमेतत्तु मानद। तेषां तत्त्वानि जानामि ततो न विमना ह्यहं।
उपक्रमानहं वेद पुनरेव फलोदयान्। लोके फलानि चित्राणि ततो न विमना ह्यहं।
अगाधाश्चाप्रतिष्ठाश्च गतिमन्तश्च नारद। अन्धा जडाश्च जीवन्ति पश्यास्मानपि जीवतः।
विहितेनैव जीवन्ति अरोगाङ्गा दिवौकसः। बलवन्तोऽबलाश्चैव तस्मादस्मान् सभाजय।
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा। शोकेन चान्ये जीवन्ति पश्यास्मानपि जीवतः। १०५३०
यदा न शोचेम हि किन्न नः स्यात् धर्म्मेण वा नारद कर्म्मणा वा। कृतान्तवश्यानि यदा सुखानि दुःखानि वा यन्न विधर्षयन्ति।
यस्मै प्राज्ञाः कथयन्ते मनुष्याः प्रज्ञामूलो हीन्द्रियाणां प्रसादः। मुह्यन्ति शोचन्ति तथेन्द्रियाणि प्रज्ञालाभो नास्ति मूढेन्द्रियस्य।
मूढस्य दर्पः स पुनर्म्मोह एव मूढस्य नायं न परोऽस्ति लोकः। न ह्येव दुःखानि सदा भवन्ति सुखस्य वा नित्यशो लाभ एव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भवात्मकं परिवर्त्तमानं न मादृशः सञ्ज्वरं जातु कुर्य्यात्। इष्टान् भोगान्नानुरुध्येत् सुखं वा न चिन्तयेद्दुःखमभ्यागतं वा।
समाहितो न स्पृहयेत् परेषां नानागतं चाभिनन्देच्च लाभं। न चाभिहृष्येद्विपुलेऽर्थलाभे तथाऽर्थनाशे च न वै
विषीदेत्। १०५४५
न बान्धवा न च वित्तं न कौल्यं न च श्रुतं न च मन्त्रा न वीर्य्यं। दुःखात्त्रातुं सर्व्व एवोत्सहन्ते परत्र शीलेन तु
यान्ति शान्तिं।
नास्ति बुद्धिरयुक्तस्य नायोगाद्विन्दते सुखं। धृतिश्च दुःखत्यागश्चेत्युभयन्तु सुखं नृप।
प्रियं हि हर्षजननं हर्ष उत्सेकवर्द्धनं। उत्सेको नरकायैव तस्मात्तान् सन्त्यजाम्यहं।
एताञ्छोकभयोत्सेकान् मोहनान् सुखदुःखयोः। पश्यामि साक्षिवल्लोके देहस्यास्य विचेष्टनात्।
अर्थकामौ परित्यज्य विशोको विगतज्वरः। तृष्णामोहौ तु सन्त्यज्य चरामि पृथिवीमिमां। १०५५०
न च मृत्योर्न वा धर्म्मान्न लोभान्न कुतश्चन। पीतामृतस्येवात्यन्तमिह चामुत्र चाभयं।
एतद्ब्रह्मन् विजानामि महत् कृत्वा तपोऽव्ययं। तेन नारद सम्प्राप्तो न मां शोकः प्रबाधते।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि समङ्गनारदसंवादे अष्टाशीत्यधिकद्विशतोऽध्यायः॥ २८८॥
॥ युधिष्ठिर उवाच॥ अतत्त्वज्ञस्य शास्त्राणां सततं संशयात्मनः। अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह।
॥ भीष्म उवाच॥ गुरुपूजा च सततं वृद्धानां पर्य्युपासनं। श्रवणञ्चैव शास्त्राणां कूटस्थं श्रेय उच्यते।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। गालवस्य च संवादं देवर्षेर्नारदस्य च। १०५५५
वीतमोहक्लमं विप्रं ज्ञानतृप्तं जितेन्द्रियं। श्रेयस्कामो यतात्मानं नारदं गालवोऽब्रवीत्।
यैः कैश्चित् सम्मतो लोके गुणैश्च पुरुषो मुने। भवत्यनपगान् सर्व्वांस्तान् गुणान् लक्षयामहे।
भवानेवंविधोऽस्माकं संशयं छेत्तुमर्हति। अमूढश्चिरमूढानां लोकतत्त्वमजानतां।
ज्ञाने ह्येवं प्रवृत्तिः स्यात् कार्य्याणामविशेषतः। यत् कार्य्यं न व्यवस्यामस्तद्भवान् वक्तुमर्हति।
भगवन्नाश्रमाः सर्व्वे पृथगाचारदर्शिनः। इदं श्रेय इदं श्रेय इति सर्व्वे प्रबोधिताः। १०५६०
तांस्तु विप्रस्थितान् दृष्ट्वा शास्त्रैः शास्त्राभिनन्दिनः। स्वशास्त्रैः परितुष्टांश्च श्रेयो नोपलभामहे।
शास्त्रं यदि भवेदेकं श्रेयो व्यक्तं भवेत्तदा। शास्त्रैश्च बहुभिर्भूयः श्रेयो गुह्यं प्रवेशितं।
एतस्मात् कारणाच्छ्रेयः कलिलं प्रतिभाति मे। ब्रवीतु भगवांस्तन्मे उपसन्नोऽस्म्यधीहि भोः।
॥ नारद उवाच॥ आश्रमास्तात चत्वारो यथा सङ्कल्पिताः पृथक्। तान् सर्व्वाननुपश्य त्वं समाश्रित्यैति गालव।
तेषान्तेषान्तथा हि त्वमाश्रमाणान्ततस्ततः। नानारूपं गुणोद्देशं पश्य विप्रस्थितं पृथक्। १०५६५
न यान्ति चैव ते सम्यगभिप्रेतमसंशयं। ऋज्वपर्य्यस्तया सम्यगाश्रमाणां पराङ्गतिं।
यत्तु निःश्रेयसं सम्यक् तथैवासंशयात्मकं। अनुग्रहञ्च मित्राणाममित्राणाञ्च निग्रहं।
संग्रहञ्च त्रिवर्गस्य श्रेय आहुर्मनीषिणः। निवृत्तिः कर्म्मणः पापात् सततं पुण्यशीलता।
सद्भिश्च समुदाचारः श्रेय एतदसंशयं। मार्द्दवं सर्व्वभूतेषु व्यवहारेषु चार्ज्जवं।
वाक्चैव मधुरा प्रोक्ता श्रेय एतदसंशयं। देवतेभ्यः पितृभ्यश्च संविभागोऽतिथिष्वपि। १०५७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अहंत्यागस्च भृत्यानां श्रेय एतदसंशयं । सत्यस्य वचनं श्रेयः सत्यज्ञानन्तु दुष्करं ।
यद्भूतहितमत्यन्तमेतत् सत्यं ब्रवीम्यहं । अहङ्कारस्य च त्यागः प्रमादस्य च निग्रहः ।
सन्तोषस्चैकचर्य्या च कूटस्थं श्रेय उच्यते । धर्म्मेण वेदाध्ययनं वेदान्तानां तथैव च ।
ज्ञानार्थानाञ्च जिज्ञासा श्रेय एतदसंशयं । शब्दरूपरसस्पर्शान् सह गन्धेन केवलान् ।
नात्यर्थमुपसेवेत श्रेयसोऽर्थी कथञ्चन । नक्तञ्चर्य्यां दिवास्वप्नमालस्यं पैशुनं मदं । १०५७५
अतियोगमयोगञ्च श्रेयसोऽर्थी परित्यजेत् । आत्मोत्कर्षं न मार्गेत परेषां परिनिन्दया ।
स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात् । निर्गुणास्त्वेव भूयिष्ठमात्मसम्भाविता नराः ।
दोषैरन्यान् गुणवतः क्षिपन्त्यात्मगुणक्षयात् । अनूच्यमानास्तु पुनस्ते मन्यन्ते महाजनात् ।
गुणवत्तरमात्मानं स्वेन मानेन दर्पिताः । अब्रुवन् कस्यचिन्निन्दामात्मपूजामवर्णयन् ।
विपश्चिद्गुणसम्पन्नः प्राप्नोत्येव महद्यशः । अब्रुवन्नातिसुरभिर्गन्धः सुमनसां शुचिः । १०५८०
तथैवाव्याहरन् भाति विमलो भानुरम्बरे । एवमादीनि चान्यानि परित्यक्तानि मेधया ।
ज्वलन्ति यशसा लोके यानि न व्याहरन्ति च । न लोके दीप्यते मूर्खः केवलात्मप्रशंसया ।
अपि चापिहितः श्वभ्रे कृतविद्यः प्रकाशते । असदुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति ।
दीप्यते त्वेव लोकेषु शनैरपि सुभाषितं । मूढानामवलिप्तानामसारं भाषितं बहु ।
दर्शयत्यन्तरात्मानमग्निरूपमिवांशुमान् । एतस्मात् कारणात् प्रज्ञां मृगयन्ते पृथग्विधां १०५८५
प्रज्ञालाभो हि भूतानामुत्तमः प्रतिभाति मे । नापृष्टः कस्यचिद्ब्रूयान्नाप्यन्यायेन पृच्छतः ।
ज्ञानवानपि मेधावी जडवत् समुपाविशेत् । ततो वा सम्परीक्षेत धर्म्मनित्येषु साधुषु ।
मनुष्येषु वदान्येषु स्वधर्म्मनिरतेषु च । चतुर्णां यत्र वर्णानां धर्म्मव्यतिकरो भवेत् ।
न तत्र वासं कुर्व्वीत श्रेयोऽर्थी वै कथञ्चन । निरारम्भोऽप्ययमिह यथालब्धोपजीवनः ।
पुण्यं पुण्येषु विमलं पापं पापेषु चाप्नुयात् । अपामग्नेस्तथेन्दोश्च स्पर्शं वेदयते यथा । १०५९०
तथा पश्यामहे स्पर्शमुभयोः पुण्यपापयोः । अपश्यन्तोऽनुविषयं भुञ्जते विघसाशिनः ।
भुञ्जानश्चात्मविषयान् विषयान् विद्धि कर्म्मणां । यत्रागमयमानानामसत्कारेण पृच्छतां ।
प्रब्रूयाद्ब्राह्मणो धर्म्मं त्यजेत्तं देशमात्मवान् । शिष्योपाध्यायिका वृत्तिर्यत्र स्यात् सुसमाहिता ।
यथावत् शास्त्रसम्पन्ना कस्त देशं परित्यजेत् । आकाशस्थां ध्रुवं यत्र दोषान् ब्रूयुर्व्विपश्चितां
आत्मपूजाभिकामो वै को वसेत्तत्र पण्डितः । यत्र संलोडिता लुब्धैः प्रायशो धर्म्मसेतवः । १०५९५
प्रदीप्तमिव चैलान्तं कस्तं देशं न सन्त्यजेत् । यत्र धर्म्ममनाशङ्कास्चरेयुर्व्वीतमत्सराः ।
भवेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु । धर्म्ममर्थनिमित्तञ्च चरेयुर्यत्र मानवाः ।
नताननुवसेज्जातु ते हि पापकृतो जनाः । कर्म्मणा यत्र पापेन वर्त्तन्ते जीवितेप्सवः ।
व्यवधावेत् ततस्तूर्णं ससर्पाच्छरणादिव । येन खट्वासमारूढः कर्म्मणाऽनुशयी भवेत् ।
आदितस्तन्न कर्त्तव्यमिच्छता भवमात्मनः । यत्र राजा च राज्ञश्च पुरुषाः प्रत्यनन्तराः । १०६००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुटुम्बिनामग्रभुजस्त्यजेत्तद्राष्ट्रमात्मवान्। श्रोत्रियास्त्वग्रभोक्तारो धर्म्मनित्याः सनातनाः।
याजनाध्यापने युक्ता यत्र तद्राष्ट्रमावसेत्। स्वाहास्वधावषट्कारा यत्र सम्यगनुष्ठिताः।
अजस्रञ्चैव वर्त्तन्ते वसेत्तत्राविचारयन्। अशुचीन् यत्र पश्येत ब्राह्मणान् वृत्तिकर्षितान्।
त्यजेत्तद्राष्ट्रमासन्नमुपसृष्टमिवामिषं। प्रीयमाणा नरा यत्र प्रयच्छेयुरयाचिताः।
स्वस्थचित्तो वसेत्तत्र कृतकृत्यमिवात्मवान्। दण्डो यत्राविनीतेषु सत्कारस्च कृतात्मसु। १०८०५
चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु। उपसृष्टेषु दान्तेषु दुराचारेषु साधुषु।
अविनीतेषु लुब्धेषु सुमहद्दण्डधारणं। यत्र राजा धर्म्मनित्यो राज्यं धर्म्मेण पालयेत्।
अपास्य कामान् कामेशो वसेत्तत्राविचारयन्। तथाशीला हि राजानः सर्व्वान् विषयवासिनः।
श्रेयसा योजयन्त्याशु श्रेयसि प्रत्युपस्थिते। पृच्छतस्ते मया तात श्रेय एतदुदाहृतं।
न हि शक्यं प्रधानेन श्रेयः संख्यातुमात्मनः। एवं प्रवर्त्तमानस्य वृत्तिं प्रणिहितात्मनः। १०८१०
तपसैवेह बहुलं श्रेयो व्यक्तं भविष्यति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि श्रेयोवाचिके ऊननवत्यधिकद्विशततमोऽध्यायः॥ २८९॥
॥ युधिष्ठिर उवाच॥ कथं नु युक्तः पृथिवीं चरेदस्मद्विधो नृपः। नित्यं कैश्च गुणैर्युक्तः सङ्गपाशाद्विमुच्यते।
॥ भीष्म उवाच॥ अत्र ते वर्त्तयिष्येऽहमितिहासं पुरातनं। अरिष्टनेमिना प्रोक्तं सगरायानुपृच्छते।
॥ सगर उवाच॥ किं श्रेयः परमं ब्रह्मन् कृत्वेह सुखमश्नुते। कथं न शोचेन्न क्षुभ्येदेतदिच्छामि वेदितुं।
॥ भीष्म उवाच॥ एवमुक्तस्तदा तार्क्ष्यः सर्व्वशास्त्रविदाम्वरः। विबुध्य सम्पदं चाग्र्यं सद्वाक्यमिदमब्रवीत्। १०८१५
सुखं मोक्षसुखं लोके न च मूढोऽवगच्छति। प्रसक्तः पुत्त्रपशुषु धनधान्यसमाकुलः।
सक्तबुद्धिरशान्तात्मा न शक्यं तच्चिकित्सितुं। स्नेहपाशसितो मूढो न स मोक्षाय कल्पते।
स्नेहजानिह ते पाशान् वक्ष्यामि शृणु तान्मम। सकर्णकेन शिरसा शक्याः श्रोतुं विजानता।
सम्भाव्य पुत्त्रान् कालेन यौवनस्थान्निवेश्य च। समर्थान् जीवने ज्ञात्वा मुक्तश्चर यथासुखं।
भार्य्यां पुत्त्रवतीं वृद्धां लालितां पुत्त्रवत्सलां। ज्ञात्वा प्रजहि कालेन परार्थमनुदृश्य च। १०८२०
सापत्यो निरपत्यो वा मुक्तश्चर यथासुखं। इन्द्रियैरिन्द्रियार्थांस्त्वमनुभूय यथाविधि।
कृतकौतूहलस्तेषु मुक्तश्चर यथासुखं। उपपत्त्योपलब्धेषु लाभेषु च समो भव।
एष तावत्समासेन तव संकीर्त्तितो मया। मोक्षार्थे विस्तरेणाथ भूयो वक्ष्यामि तच्छृणु।
मुक्ता वीतभया लोके चरन्ति सुखिनो नराः। सक्तभावा विनश्यन्ति नरास्तत्र न संशयः
आहारसञ्चयाश्चैव तथा कीटे पिपीलिकाः। असक्ताः सुखिनो लोके सक्ताश्चैव विनाशिनः। १०८२५
स्वजनेन च ते चिन्ता कर्त्तव्या मोक्षबुद्धिना। इमे मया विनाभूता भविष्यन्ति कथन्त्विति।
स्वयमुत्पद्यते जन्तुः स्वयमेव विवर्द्धते। सुखदुःखे तथा मृत्युं स्वयमेवाधिगच्छति।
भोजनाच्छादने चैव माता पिता च संग्रहं। स्वकृतेनाधिगच्छन्ति लोके नास्त्यकृतं पुरा।
धात्रा विहितभक्ष्याणि सर्व्वभूतानि मेदिनीं। लोके विपरिधावन्ति रक्षितानि स्वकर्म्मभिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वयं मृत्पिण्डभूतस्य परतन्त्रस्य सर्व्वदा । को हेतुः स्वजनं पोष्टुं रक्षितु वा दृढात्मनः । १०९१०
स्वजनं हि यदा मृत्युर्हन्त्येव तव पश्यतः । कृतेऽपि यत्ने महति तत्र बोध्यव्यमात्मना ।
जीवन्तमपि चैवैनं भरणे रक्षणे तथा । असमाप्ते परित्यज्य पश्चादपि मरिष्यसि ।
यदा मृतश्च स्वजनं न ज्ञास्यसि कदाचन । सुखितं दुःखितं वापि ननु बोध्यव्यमात्मना ।
मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जनः । स्वकृतं ननु बुद्धैवं कर्त्तव्यं हितमात्मनः ।
एवं विजानन् लोकेऽस्मिन् कः कस्येत्यभिनिश्चितः । मोक्षे निवेशय मनो भूयश्चाप्युपधारय । १०९१५
क्षुत्पिपासादयो भावा जिता यस्येह देहिनः । क्रोधो लोभस्तथा मोहः सत्त्ववान् मुक्त एव सः ।
द्यूते पाने तथा स्त्रीषु मृगयायाञ्च यो नरः । न प्रमाद्यति संमोहात् सततं मुक्त एव सः ।
दिवसे दिवसे नाम रात्रौ रात्रौ पुमान् सदा । भोक्तव्यमिति यः खिन्नो दोषबुद्धिः स उच्यते ।
आत्मभावं तथा स्त्रीषु मुक्तमेवं पुनः पुनः । यः पश्यति सदा युक्तो यथावन्मुक्त एव सः ।
सम्भवञ्च विनाशञ्च भूतानां चेष्टितं तथा । यस्तत्त्वतो विजानाति लोकेऽस्मिन्मुक्त एव सः । १०९२०
प्रस्थं वाहसहस्रेषु यात्रार्थञ्चैव कोटिषु । प्रासादे मञ्चकं स्थानं यः पश्यति स मुच्यते ।
मृत्युनाऽभ्याहतं लोकं व्याधिभिश्चोपपीडितं । अवृत्तिकर्षितञ्चैव यः पश्यति स मुच्यते ।
यः पश्यति स सन्तुष्टो न पश्यंश्च विहन्यते । यश्चाप्यल्पेन सन्तुष्टो लोकेऽस्मिन्मुक्त एव सः ।
अग्नीषोमाविदं सर्व्वमिति यश्चानुपश्यति । न च संस्पृश्यते भावैरद्भुतैर्मुक्त एव सः ।
पर्य्यङ्कशय्या भूमिश्च समाने यस्य देहिनः । शालयश्च कदन्नञ्च यस्य स्यान्मुक्त एव सः । १०९२५
क्षौमञ्च कुशचीरञ्च कौशेयं वल्कलानि च । आविकं चर्म्माणि समं यस्य स्यान्मुक्त एव सः ।
पञ्चभूतसमुद्भूतं लोकं यश्चानुपश्यति । तथा च वर्त्तते दृष्ट्वा लोकेऽस्मिन्मुक्त एव सः ।
सुखदुःखे समे यस्य लाभालाभौ जयाजयौ । इच्छाद्वेषौ भयोद्वेगौ सर्व्वथा मुक्त एव सः ।
रक्तमूत्रपुरीषाणां दोषाणां सञ्चयांस्तथा । शरीरं दोषबहुलं दृष्ट्वा चैव विमुच्यते ।
वलीपलितसंयोगं कार्श्यं वैवर्ण्यमेव च । कुब्जभावञ्च जरया यः पश्यति स मुच्यते । १०९३०
पुंस्त्वोपघातं कालेन दर्शनोपरमन्तथा । वाधिर्य्यं प्राणमन्दत्वं यः पश्यति स मुच्यते ।
गतानृषींस्तथा देवानसुरांश्च तथा गतान् । लोकादस्मात् परं लोकं यः पश्यति स मुच्यते ।
प्रभावैरन्वितास्तैस्तैः पार्थिवेन्द्राः सहस्रशः । ये गताः पृथिवीं त्यक्त्वा इति ज्ञात्वा विमुच्यते ।
अर्थांश्च दुर्लभान् लोके क्लेशांश्च सुलभांस्तथा । दुःखञ्चैव कुटुम्बार्थे यः पश्यति स मुच्यते ।
अपत्यानाञ्च वैगुण्यं जनं विगुणमेव च । पश्यन् भूयिष्ठशो लोके को मोक्षं नाभिपूजयेत् । १०९३५
शास्त्रालोकाव्ययो बुद्धः सर्व्वं पश्यति मानवः । असारमिव मानुष्यं सर्व्वथा मुक्त एव सः ।
एतच्छ्रुत्वा मम वचो भवांश्चरतु मुक्तवत् । गार्हस्थ्ये यदि वा मोक्षे कृता बुद्धिरविक्लवा ।
तत्तस्य वचनं श्रुत्वा सम्यक् स पृथिवीपतिः । मोक्षजैश्च गुणैर्युक्तः पालयामास च प्रजाः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि सगरारिष्टनेमिसंवादे नवत्यधिकद्विशततोऽध्यायः ॥ २९० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ तिष्ठते मे सदा तात कौतूहलमिदं हृदि । तदहं श्रोतुमिच्छामि त्वत्तः कुरुपितामह ।
कथं देवर्षिरुशना सदा काव्यो महामतिः । असुराणां प्रियकरः सुराणामप्रिये रतः । १०६६०
वर्द्धयामास तेजश्च किमर्थममितौजसां । नित्यं वैरनिबद्धाश्च दानवाः सुरसत्तमैः ।
कथञ्चाप्युशनाः प्राप्य शुक्रत्वममरद्युतिः । ऋद्धिञ्च स कथं प्राप्तः सर्व्वमेतद्ब्रवीहि मे ।
न याति च स तेजस्वी मध्येन नभसः कथं । एतदिच्छामि विज्ञातुं निखिलेन पितामह ।
॥ भीष्म उवाच ॥ शृणु राजन्नवहितः सर्व्वमेतद्यथातथं । यथामति यथा चैतत् श्रुतपूर्व्वं मयाऽनघ ।
एष भार्गवदायादो मुनिर्म्मान्यो दृढव्रतः । सुराणां विप्रियकरो निमित्ते कारणात्मके । १०६६५
इन्द्रोऽथ धनदो राजा यक्षरक्षोधिपः सदा । प्रभविष्णुश्च कोषस्य जगतश्च तथा प्रभुः ।
तस्यात्मानमथाविश्य योगसिद्धो महामुनिः । रुद्ध्वा धनपतिं देवं योगेन हृतवान् वसु ।
हृते धने ततः शर्म्म न लेभे धनदस्तथा । आपन्नमन्युः संविग्नः सोऽभ्यगात् सुरसत्तमं ।
निवेदयामास तदा शिवायामिततेजसे । देवश्रेष्ठाय रुद्राय सौम्याय बहुरूपिणे ।
योगात्मकेनोशनसा रुद्ध्वा मम हृतं वसु । योगेनात्मगतं कृत्वा निःसृतश्च महातपाः । १०६७०
एतच्छ्रुत्वा ततः क्रुद्धो महायोगी महेश्वरः । संरक्तनयनो राजञ्छूलमादाय तस्थिवान् ।
कासौ कासाविति प्राह गृहीत्वा परमायुधं । उशना दूरतस्तस्य बभौ ज्ञात्वा चिकीर्षितं ।
स महायोगिनो बुद्ध्वा तं रोषं वै महात्मनः । गतिमागमनं वेत्ति स्थानञ्चैव ततः प्रभुः ।
सञ्चिन्त्योग्रेण तपसा महात्मानं महेश्वरं । उशना योगसिद्धात्मा शूलाग्रे प्रत्यदृश्यत ।
विज्ञानरूपः स तदा तपःसिद्धोऽथ धन्विना । ज्ञात्वा शूलञ्च देवेशः पाणिना समनामयत् । १०६७५
आनतेनाथ शूलेन पाणिनाऽमिततेजसा । पिनाकमिति चोवाच शूलमुग्रायुधः प्रभुः ।
पाणिमध्यगतं दृष्ट्वा भार्गवं तमुमापतिः । आस्यं विवृत्य ककुदी पाणिना प्राक्षिपच्छनैः ।
स तु प्रविष्ट उशना कोष्ठं माहेश्वरं प्रभुः । व्यचरच्चापि तत्रासौ महात्मा भृगुनन्दनः ।
॥ युधिष्ठिर उवाच ॥ किमर्थं व्यचरद्राजन्नुशनास्तस्य धीमतः । जठरे देवदेवस्य किञ्चाकार्षीन्महाद्युतिः ।
॥ भीष्म उवाच ॥ पुरा सोऽन्तर्जलगतः स्थाणुभूतो महाव्रतः । वर्षाणामभवद्राजन् प्रयुतान्यर्बुदानि च । १०६८०
उदतिष्ठत्तपस्तप्त्वा दुश्चरञ्च महाह्रदात् । ततो देवातिदेवस्तं ब्रह्मा वै समसर्पत ।
तपोवृद्धिमपृच्छच्च कुशलञ्चैवमव्ययः । तपः सुचीर्णमिति च प्रोवाच वृषभध्वजः ।
तत्संयोगेन वृद्धिञ्चाप्यपश्यत् स तु शङ्करः । महामतिरचिन्त्यात्मा सत्यधर्म्मरतः सदा ।
स तेनाढ्यो महायोगी तपसा च धनेन च । व्यराजत महाराज त्रिषु लोकेषु वीर्य्यवान् ।
ततः पिनाकी योगात्मा ध्यानयोगं समाविशत् । उशनास्तु समुद्विग्नो निलिल्ये जठरे ततः । १०६८५
तुष्टाव च महायोगी देवं तत्रस्थ एव च । निःसारं काङ्क्षमाणः स तेन स्म प्रतिहन्यते ।
उशनास्तु तथोवाच जठरस्थो महामुनिः । प्रसादं मे कुरुष्वेति पुनः पुनररिन्दम ।
तमुवाच महादेवो गच्छ शिश्नेन मोक्षणं । इति सर्व्वाणि स्रोतांसि रुद्ध्वा त्रिदशपुङ्गवः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अपश्यमानस्तद्द्वारं सर्व्वतः पिहितो मुनिः । पर्य्यक्रामद्दह्यमान इतश्चेतश्च तेजसा ।
स वै निष्क्रम्य शिश्नेन शुक्रत्वमभिपेदिवान् । कार्य्येण तेन नभसो नागच्छत स मध्यतः ।
विनिष्क्रान्तन्तु तं दृष्ट्वा ज्वलन्तमिव तेजसा । भवो रोषसमाविष्टः शूलोद्यतकरः स्थितः ।
अवारयत तं देवी क्रुद्धं पशुपतिं पतिं । पुत्त्रत्वमगमद्देव्या वारिते शङ्करे च सः ।
॥ देव्युवाच ॥ हिंसनीयस्त्वया नैव मम पुत्त्रत्वमागतः । न हि देवोदरात् कश्चित् निःसृतो नाशमर्हति ।
ततः प्रीतो भवो देव्याः प्रहसंश्चेदमब्रवीत् । गच्छत्वेष यथाकाममिति राजन् पुनः पुनः ।
ततः प्रणम्य वरदं देवं देवीमुमान्तथा । उशनाः प्रापतद्धीमान् गतिमिष्टां महामुनिः ।
एतत्ते कथितं तात भार्गवस्य महात्मनः । चरितं भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भवभार्गवसमागमे एकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥

॥ युधिष्ठिर उवाच ॥ अतः परं महाबाहो यच्छ्रेयस्तद्ब्रवीहि मे । न तृप्याम्यमृतस्येव वचसस्ते पितामह ।
किं कर्म्म पुरुषः कृत्वा शुभं पुरुषसत्तम । श्रेयः परमवाप्नोति प्रेत्य चेह च तद्वद ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि यथा पूर्व्वं महायशाः । पराशरं महात्मानं पप्रच्छ जनको नृपः ।
किं श्रेयः सर्व्वभूतानामस्मिन् लोके परत्र च । यद्भवेत् प्रतिपत्तव्यं तद्भवान् प्रब्रवीतु मे ।
ततः स तपसा युक्तः सर्व्वधर्म्मविधानवित् । नृपायानुग्रहमना मुनिर्व्वाक्यमथाब्रवीत् ।
॥ पराशर उवाच ॥ धर्म्म एव कृतः श्रेयानिह लोके परत्र च । तस्माद्धि परमं नास्ति यथा प्राहुर्म्मनीषिणः ।
प्रतिपद्य नरो धर्म्मं स्वर्गलोके महीयते । धर्म्मात्मकः कर्म्मविधिर्द्देहिनां नृपसत्तम ।
तस्मिन्नाश्रमिणः सन्तः स्वकर्म्माणीह कुर्व्वते । चतुर्व्विधा हि लोकेऽस्मिन् यात्रा तात विधीयते ।
मर्त्त्या यत्रावतिष्ठन्ते सा च कामात् प्रवर्त्तते । सुकृतासुकृतं कर्म्म निषेव्य विविधैः क्रमैः ।
दशार्द्धप्रविभक्तानां भूतानां बहुधा गतिः । सौवर्णं राजतञ्चापि यथा भाण्डं निषिच्यते ।
तथा निषिच्यते जन्तुः पूर्व्वकर्म्मवशानुगः । नाबीजाज्जायते किञ्चिन्नाकृत्वा सुखमेधते ।
सुकृतैर्व्विन्दते सौख्यं प्राप्य देहक्षयं नरः । दैवं तात न पश्यामि नास्ति दैवस्य साधनं ।
स्वभावतो हि संसिद्धा देवगन्धर्व्वदानवाः । प्रेत्य यान्ति कृतं कर्म्म न स्मरन्ति सदा जनाः ।
ते वै तस्य फलप्राप्तौ कर्म्म चापि चतुर्व्विधं । लोकयात्राश्रयश्चैव शब्दो वेदाश्रयः कृतः ।
शान्त्यर्थं मनसस्तात नैतद्वृद्धानुशासनं । चक्षुषा मनसा वाचा कर्म्मणा च चतुर्व्विधं ।
कुरुते यादृशं कर्म्म तादृशं प्रतिपद्यते । निरन्तरञ्च मिश्रञ्च लभते कर्म्म पार्थिव ।
कल्याणं यदि वा पापं न तु नाशोऽस्य विद्यते । कदाचित् सुकृतं तात कूटस्थमिव तिष्ठति ।
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते । ततो दुःखक्षयं कृत्वा सुकृतं कर्म्म सेवते ।
सुकृतक्षयाद्दुष्कृतञ्च तद्विद्धि मनुजाधिप । दमः क्षमा धृतिस्तेजः सन्तोषः सत्यवादिता ।
ह्रीरहिंसाऽव्यसनिता दाक्ष्यञ्चेति सुखावहाः । दुष्कृते सुकृते चापि न जन्तुर्नियतो भवेत् ।
नित्यं मनःसमाधाने प्रयतेत विचक्षणः । नायं परस्य सुकृतं दुष्कृतञ्चापि सेवते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

करोति यादृशं कर्म्म तादृशं प्रतिपद्यते । सुखदुःखे समाधाय पुमानन्येन गच्छति ।

अन्येनैव जनः सर्व्वः सङ्गतो यश्च पार्थिवः । परेषां यदसूयेत न तत् कुर्य्यात् स्वयं नरः ।

यो ह्यसूयुस्तथा युक्तः सोऽवहासं नियच्छति । १०३२०

भीरूराजन्यो ब्राह्मणः सर्व्वभक्ष्यो वैश्योऽनीहावान् हीनवर्णोऽलसश्च । विद्वांश्चाशीलो वृत्तहीनः कुलीनः सत्याद्विभ्रष्टो ब्राह्मणः स्त्री च दुष्टा ।

रागी युक्तः पचमानोऽात्महेतोर्मूर्खो वक्ता नृपहीनञ्च राष्ट्रं । एते सर्व्वे शोच्यतां यान्ति राजन् यश्चायुक्तः स्नेहहीनः प्रजासु ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतासु द्विनवत्यधिकद्विशततोऽध्यायः ॥ २९२ ॥

॥ पराशर उवाच ॥ मनोरथरथं प्राप्य इन्द्रियार्थहयं नरः । रश्मिभिर्ज्ञानसम्भूतैर्यो गच्छति स बुद्धिमान् ।

सेवाश्रितेन मनसा वृत्तिहीनस्य शस्यते । द्विजातिहस्तान्निर्वृत्ता न तु तुल्यात् परस्परात् ।

आयुर्न सुलभं लब्ध्वा नावकर्षेद्विशाम्पते । उत्कर्षार्थं प्रयतेत नरः पुण्येन कर्म्मणा । १०३२५

वर्णेभ्यो हि परिभ्रष्टो न वै संमानमर्हति । न तु यः सत्क्रियां प्राप्य राजसं कर्म्म सेवते ।

वर्णोत्कर्षमवाप्नोति नरः पुण्येन कर्म्मणा । दुर्लभं तमलब्ध्वा हि हन्यात् पापेन कर्म्मणा ।

अज्ञानाद्धि कृतं पापं तपसैवाभिनिर्नुदेत् । पापं हि कर्म्म फलति पापमेव स्वयं कृतं ।

तस्मात् पापं न सेवेत कर्म्म दुःखफलोदयं । पापानुबन्धं यत् कर्म्म यद्यपि स्यान्महाफलं ।

तन्न सेवेत मेधावी शुचिः कुशलिनं यथा । किं कष्टमनुपश्यामि फलं पापस्य कर्म्मणः । १०३३०

प्रत्यापन्नस्य हि ततो ऽनात्मा तावद्विरोचत । प्रत्यापत्तिश्च यस्येह बालिशस्य न जायते ।

तस्यापि सुमहांस्तापः प्रस्थितस्योपजायते । विरक्तं शोध्यते वस्त्रं न तु कृष्णोपसंहितं ।

प्रयत्नेन मनुष्येन्द्र पापमेवं निबोध मे । स्वयं कृत्वा तु यः पापं शुभमेवानुतिष्ठति ।

प्रायश्चित्तं नरः कर्त्तुमुभयं सोऽश्नुते पृथक् । अज्ञानात्तु कृतां हिंसामहिंसा व्यपकर्षति ।

ब्रह्मणः शास्त्रनिर्द्देशादित्याहुर्ब्रह्मवादिनः । तथा कामकृतं नास्य विहिंसैवानुकर्षति । १०३३५

इत्याहुर्ब्रह्मशास्त्रज्ञा ब्राह्मणा ब्रह्मवादिनः । अहन्तु तावत् पश्यामि कर्म्म यद्वर्त्तते कृतं ।

गुणयुक्तं प्रकाशं वा पापेनानुपसंहितं । यथा सूक्ष्माणि कर्म्माणि फलन्तीह यथातथं ।

बुद्धियुक्तानि तानीह कृतानि मनसा सह । भवत्यल्पफलं कर्म्म सेवितं नित्यमुल्वणं ।

अबुद्धिपूर्व्वं धर्म्मज्ञ कृतमुग्रेण कर्म्मणा । कृतानि यानि कर्म्माणि दैवतैर्मुनिभिस्तथा ।

न चरेत्तानि धर्म्मात्मा श्रुत्वा चापि न कुत्सयेत् । सञ्चिन्त्य मनसा राजन् विदित्वा शक्यमात्मनः । १०३४०

करोति यः शुभं कर्म्म स वै भद्राणि पश्यति । न वै कपाले सलिलं संन्यस्तं हीयते यथा ।

न वेतरे तथा भावं प्राप्नोति सुखभावितं । स तोयेऽन्यत्तु यत्तोयं तस्मिन्नेव प्रसिच्यते ।

वृद्धे वृद्धिमवाप्नोति सलिले सलिलं यथा । एवं कर्म्माणि यानीह बुद्धियुक्तानि पार्थिव ।

समानि चैव यानीह तानि पुण्यतमान्यपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

राज्ञा जेतव्याः शत्रवश्चोन्नताश्च सम्यक् कर्त्तव्यं पालनञ्च प्रजानां । अग्निश्चेयो बहुभिश्चापि यज्ञैरन्ते मध्ये वा वनमाश्रित्य स्थेयं । १०७४५

दमान्वितः पुरुषो धर्म्मशीलो भूतानि चात्मानमिवानुपश्येत् । गरीयसः पूजयेदात्मशक्त्या सत्येन शीलेन सुखं नरेन्द्र ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां त्रिनवत्यधिकद्विशततोऽध्यायः ॥ २९३ ॥

॥ पराशर उवाच ॥ कः कस्य चोपकुरुते कस्य कस्मै प्रयच्छति । प्राणी करोत्ययं कर्म्म सर्व्वमात्मार्थमात्मना ।
गौरवेण परित्यक्तं निःस्नेहं परिवर्ज्जयेत् । सोदर्य्यं भ्रातरमपि किमुतान्यं पृथग्जनं ।
विशिष्टस्य विशिष्टाच्च तुल्यौ दानप्रतिग्रहौ । तयोः पुण्यतरं दानं तद्द्विजस्य प्रयच्छतः ।
न्यायागतं धनञ्चैव न्यायेनैव विवर्द्धितं । संरक्ष्यं यत्नमास्थाय धर्म्मार्थमिति निश्चयः । १०७५०
न धर्म्मार्थी नृशंसेन कर्म्मणा धनमर्ज्जयेत् । शक्तितः सर्व्वकार्य्याणि कुर्य्यान्नर्द्धिमनुस्मरेत् ।
अपो हि प्रयतः शीतास्तापिता ज्वलनेन वा । शक्तितोऽतिथये दत्वा क्षुधार्त्तायाश्नुते फलं ।
रन्तिदेवेन लोकेष्टा सिद्धिः प्राप्ता महात्मना । फलपत्रैरथो मूलैर्मुनीनर्च्चितवांश्च सः ।
तैरेव फलपत्रैश्च स माठरमतोषयत् । तस्माल्लेभे परं स्थानं शैव्योऽपि पृथिवीपतिः ।
देवतातिथिभृत्येभ्यः पितृभ्यश्चात्मनस्तथा । ऋणवान् जायते मर्त्यस्तस्मादनृणतां व्रजेत् । १०७५५
स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्म्मणा । पितृभ्यः श्राद्धदानेन नृणामभ्यर्च्चनेन च ।
वाचा शेषावहार्य्येण पालनेनात्मनोऽपि च । यथावद्भृत्यवर्गस्य चिकीर्षेत्कर्म्म आदितः ।
प्रयत्नेन च संसिद्धा धनैरपि विवर्ज्जिताः । सम्यग्घुत्वा हुतवहं मुनयः सिद्धिमागताः ।
विश्वामित्रस्य पुत्रत्वमृचीकतनयोऽगमत् । ऋग्भिः स्तुत्वा महाबाहो देवान् वै यज्ञभागिनः ।
गतः शुक्रत्वमुशना देवदेवप्रसादनात् । देवीं स्तुत्वा तु गगने मोदते यशसा वृतः । १०७६०
असितो देवलश्चैव तथा नारदपर्व्वतौ । कक्षीवान् जामदग्न्यश्च रामस्ताण्ड्यस्तथात्मवान् ।
वशिष्ठो जमदग्निश्च विश्वामित्रोऽत्रिरेव च । भरद्वाजो हरिश्मश्रुः कुण्डधारः श्रुतश्रवाः ।
एते महर्षयः स्तुत्वा विष्णुमृग्भिः समाहिताः । लेभिरे तपसा सिद्धिं प्रसादात्तस्य धीमतः ।
अनर्हाश्चार्हतां प्राप्ताः सन्तः स्तुत्वा तमेव ह । न तु वृद्धिमिहान्विच्छेत्कर्म्म कृत्वा जुगुप्सितं ।
येऽर्था धर्म्मेण ते सत्या येऽधर्म्मेण धिगस्तु तान् । धर्म्मं वै शाश्वतं लोके न जह्याद्धनकाङ्क्षया । १०७६५
आहिताग्निर्हि धर्म्मात्मा यः स पुण्यकृदुत्तमः । वेदा हि सर्व्वे राजेन्द्र स्थितास्त्रिष्वग्निषु प्रभो ।
स चाप्यग्न्याहितो विप्रः क्रिया यस्य न हीयते । श्रेयो ह्यनाहिताग्नित्वमग्निहोत्रं न निष्क्रियं ।
अग्निरात्मा च माता च पिता जनयिता तथा । गुरुश्च नरशार्दूल परिचर्य्या यथातथं ।

मानं त्यक्त्वा यो नरो वृद्धसेवी विद्वान् क्लीवः पश्यति प्रीतियोगात् । दाक्ष्येण हीनो धर्म्मयुक्तो न दान्तो लोकेऽस्मिन् वै पूज्यते सद्भिरार्य्यः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां चतुर्नवत्यधिकद्विशततोऽध्यायः ॥ २९४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

॥ पराशर उवाच ॥ वृत्तिः सकाशाद्वर्णेभ्यस्त्रिभ्यो हीनस्य शोभना । प्रीत्योपनीता निर्द्दिष्टा धर्म्मिष्ठान् कुरुते सदा । १०७७०
वृत्तिश्चेन्नास्ति शूद्रस्य पितृपैतामही ध्रुवा । न वृत्तिं परतो मार्गेत् शुश्रूषान्तु प्रयोजयेत् ।
सद्भिस्तु सह संसर्गः शोभते धर्म्मदर्शिभिः । नित्यं सर्व्वास्ववस्थासु नासद्भिरिति मे मतिः ।
यथोदयगिरौ द्रव्यं सन्निकर्षेण दीप्यते । तथा सत्सन्निकर्षेण हीनवर्णोऽपि दीप्यते ।
यादृशेन हि वर्णेन भाव्यते शुक्लमम्बरं । तादृशं कुरुते रूपमेतदेवमवेहि मे ।
तस्माद्गुणेषु रज्येथा मा दोषेषु कदाचन । अनित्यमिह मर्त्यानां जीवितं हि चलाचलं । १०७७५
सुखे वा यदि वा दुःखे वर्त्तमानो विचक्षणः । यश्चिनोति शुभान्येव स तन्त्राणीह पश्यति ।
धर्म्मादपेतं यत् कर्म्म यद्यपि स्यान्महाफलं । न तत् सेवेत मेधावी न तद्धितमिहोच्यते ।
यो हृत्वा गोसहस्राणि नृपो दद्यादरक्षिता । स शब्दमात्रफलभाक् राजा भवति तस्करः ।
स्वयम्भूरसृजच्चाग्रे धातारं लोकसत्कृतं । धाताऽसृजत् पुत्त्रमेकं लोकानां धारणे रतं ।
तमर्च्चयित्वा वैश्यस्तु कुर्य्याद्वृत्त्यर्थमृद्धिमत् । रक्षितव्यन्तु राजन्यैरुपयोज्यं द्विजातिभिः । १०७८०
अजिह्मैरशठक्रोधैर्हव्यकव्यप्रयोक्तृभिः । शूद्रैर्निर्म्मार्जनं कार्य्यमेवं धर्म्मो न नश्यति ।
अप्रनष्टे ततो धर्म्मे भवन्ति सुखिताः प्रजाः । सुखेन तासां राजेन्द्र मोदन्ते दिवि देवताः ।
तस्माद्यो रक्षति नृपः स्वधर्म्मेणेति पूज्यते । अधीते चापि यो विप्रो वैश्यो यश्चार्ज्जने रतः ।
यश्च शुश्रूषते शूद्रः सततं नियतेन्द्रियः । अतोऽन्यथा मनुष्येन्द्र स्वधर्म्मात् परिहीयते ।
प्राणसन्तापनिर्द्दिष्टाः काकिन्योऽपि महाफलाः । न्यायेनोपार्ज्जिता दत्ताः किमुतान्याः सहस्रशः । १०७८५
सत्कृत्य हि द्विजातिभ्यो यो ददाति नराधिपः । यादृशं तादृशं नित्यमश्नाति फलमूर्ज्जितं ।
अभिगम्य च तत्तुष्ट्या दत्तमाहुरभिष्टुतं । याचितेन तु यद्दत्तं तदाहुर्म्मध्यमं बुधाः ।
अवज्ञया दीयते यत्तथैवाश्रद्धयाऽपि वा । तदाहुरधमं दानं मुनयः सत्यवादिनः ।
अतिक्रामेन्मज्जमानो विविधेन नरः सदा । तथा प्रयत्नं कुर्व्वीत यथा मुच्येत संश्रयात् ।
दमेन शोभते विप्रः क्षत्त्रियो विजयेन तु । धनेन वैश्यः शूद्रस्तु नित्यं दाक्ष्येण शोभते । १०७९०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां पञ्चनवत्यधिकद्विशतोऽध्यायः ॥ २९५ ॥
॥ पराशर उवाच ॥ प्रतिग्रहगता विप्रे क्षत्त्रिये युधि निर्ज्जिताः । वैश्ये न्यायार्ज्जिताश्चैव शूद्रे शुश्रूषयाऽर्ज्जिताः ।
स्वल्पाऽप्यर्थाः प्रशस्यन्ते धर्म्मस्यार्थे महाफलाः । नित्यं त्रयाणां वर्णानां शुश्रूषुः शूद्र उच्यते ।
क्षत्त्रधर्म्मा वैश्यधर्म्मा नावृत्तिः पतते द्विजः । शूद्रधर्म्मा यदा तु स्यात्तदा पतति वै द्विजः ।
वाणिज्यं पाशुपाल्यञ्च तथा शिल्पोपजीवनं । शूद्रस्यापि विधीयन्ते यदा वृत्तिर्न जायते ।
रङ्गावतरणञ्चैव तथा रूपोपजीवनं । मद्यमांसोपजीव्यञ्च विक्रयं लोहचर्म्मणोः । १०७९५
अपूर्व्विणा न कर्त्तव्यं कर्म्म लोके विगर्हितं । कृतपूर्व्वन्तु त्यजतो महान् धर्म्म इति श्रुतिः ।
संसिद्धः पुरुषो लोके यदाचरति पापकं । मदेनाभिप्लुतमनास्तच्च न ग्राह्यमुच्यते ।
श्रूयन्ते हि पुराणेषु प्रजा धिग्दण्डशासनाः । दान्ता धर्म्मप्रधानाश्च न्यायधर्म्मानुवृत्तिकाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धर्म्म एव सदा नृणामिह राजन् प्रशस्यते। धर्म्मवृद्धा गुणानेव सेवन्ते हि नरा भुवि।
तं धर्म्ममसुरास्तात नामृष्यन्त जनाधिप। विवर्द्धमानाः क्रमशस्तत्र तेऽन्वाविशन् प्रजाः। १०८००
तासां दर्पः समभवत् प्रजानां धर्म्मनाशनः। दर्पात्मनान्ततः पश्चात् क्रोधस्तासामजायत।
ततः क्रोधाभिभूतानां वृत्तं लज्जासमन्वितं। ह्रीश्चैवाप्यनशद्राजंस्ततो मोहो व्यजायत।
ततो मोहपरीतास्ता नापश्यन्त यथा पुरा। परस्परावमर्द्देन वर्द्धयन्त्यो यथासुखं।
ताः प्राप्य तु सधिग्दण्डो न कारणमतोऽभवत्। ततोऽभ्यगच्छन्देवांश्च ब्राह्मणांश्चावमन्य ह।
एतस्मिन्नेव काले तु देवा देववरं शिवं। अगच्छन्शङ्करं धीरं बहुरूपं गुणाधिकं। १०८०५
तेन स्म ते गगनगाः सपुराः पातिताः क्षितौ। तिस्रोऽप्येकेन वाणेन देवाप्यायिततेजसा।
तेषामधिपतिस्त्वासीद्भीमो भीमपराक्रमः। देवतानां भयकरः स हतः शूलपाणिना।
तस्मिन् हतेऽथ स्वं भावं प्रत्यपद्यन्त मानवाः। प्रापद्यन्त च वेदान् वै शास्त्राणि च यथा पुरा।
ततोऽभिषिच्य राज्ये तु देवानां दिवि वासवं। सप्तर्षयश्चान्वयुञ्जन्नराणां दण्डधारणे।
सप्तर्षीणामधोर्द्धञ्च विपृथुर्नाम पार्थिवः। राजानः क्षत्त्रियाश्चैव मण्डलेषु पृथक् पृथक्। १०८१०
महाकुलेषु ये जाता वृद्धाः पूर्व्वतराश्च ये। तेषामप्यासुरो भावो हृदयान्नापसर्पति।
तस्मात्तेनैव भावेन सानुषङ्गेण पार्थिवाः। आसुराण्येव कर्म्माणि न्यसेवन् भीमविक्रमाः।
प्रत्यतिष्ठंश्च तेष्वेव तान्येव स्थापयन्त्यपि। भजन्ते ते न चाद्यापि ये बालिशतरा नराः।
तस्मादहं ब्रवीमि त्वां राजन् सञ्चिन्त्य शास्त्रतः। संसिद्धाधिगमं कुर्य्यात् कर्म्म हिंसात्मकं त्यजेत्।
न सङ्करेण द्रविणं प्रचिन्वीयाद्विचक्षणः। धर्म्मार्थं न्यायमुत्सृज्य न तत्कल्याणमुच्यते। १०८१५
स त्वमेवंविधो दान्तः क्षत्त्रियः प्रियबान्धवः। प्रजा भृत्यांश्च पुत्त्रांश्च स्वधर्म्मेणानुपालय।
इष्टानिष्टसमायोगे वैरं सौहार्द्दमेव च। अथ जातिसहस्राणि बहूनि परिवर्त्तते।
तस्माद्गुणेषु रज्येथा मा दोषेषु कथञ्चन। निर्गुणोऽपि हि दुर्ब्बुद्धिरात्मनः सोऽतिरज्यते।
मानुषेषु महाराज धर्म्माधर्म्मौ प्रवर्त्ततः। न तथाऽन्येषु भूतेषु मनुष्यरहितेष्विह।
धर्म्मशीलो नरो विद्वानीहकोऽनीहकोऽपि वा। आत्मभूतः सदा लोके चरेद्भूतान्यहिंसया। १०८२०
यदा व्यपेतहृल्लेखं मनो भवति तस्य वै। नानृतञ्चैव भवति तदा कल्याणमृच्छति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां षण्णवत्यधिकद्विशततोऽध्यायः॥ २९६॥
॥ पराशर उवाच ॥ एष धर्म्मविधिस्तात गृहस्थस्य प्रकीर्त्तितः। तपोविधिन्तु वक्ष्यामि तन्मे निगदतः शृणु।
प्रायेण च गृहस्थस्य ममत्वं नाम जायते। सङ्गागतं नरश्रेष्ठ भावैराजसतामसैः।
गृहाण्याश्रित्य गावश्च क्षेत्राणि च धनानि च। दाराः पुत्त्राश्च भृत्याश्च भवन्तीह नरस्य वै।
एवन्तस्य प्रवृत्तस्य नित्यमेवानुपश्यतः। रागद्वेषौ विवर्द्धेते ह्यनित्यत्वमपश्यतः। १०८२५
रागद्वेषाभिभूतञ्च नरं द्रव्यवशानुगं। मोहजाता रतिर्नाम समुपैति नराधिप।
कृतार्थं भोगिनं मत्वा सर्व्वो रतिपरायणः। लाभं ग्राम्यसुखादन्यं रतितो नानुपश्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

ततो लोभाभिभूतात्मा सङ्गाद्वर्द्धयते जनं। तुष्ट्यर्थञ्चैव तस्येह जनस्यार्थं चिकीर्षति।
स जानन्नपि चाकार्य्यमर्थार्थं सेवते नरः। बालस्नेहपरीतात्मा तत्क्षणाच्चानुतप्यते।
ततो मानेन सम्पन्नो रक्षन्नात्मपराजयं। करोति येन भोगी स्यामिति तस्माद्विनश्यति। १०८३०
तथाहि बुद्धियुक्तानां शाश्वतंब्रह्मवादिनां। अन्विच्छतां शुभं कर्म्म नराणां त्यजतां सुखं।
स्नेहायतननाशाच्च धननाशाच्च पार्थिव। आधिव्याधिप्रतापाच्च निर्व्वेदमुपगच्छति।
निर्व्वेदादात्मसम्बोधः सम्बोधाच्छास्त्रदर्शनं। शास्त्रार्थदर्शनाद्राजंस्तप एवानुपश्यति।
दुर्लभो हि मनुष्येन्द्र नरः प्रत्यवमर्शवान्। यो वै प्रियसुखे क्षीणस्तपः कर्त्तुं व्यवस्यति।
तपः सर्व्वगतं तात हीनस्यापि विधीयते। जितेन्द्रियस्य दान्तस्य स्वर्गमार्गप्रवर्त्तकं। १०८३५
प्रजापतिः प्रजाः पूर्व्वमसृजत्तपसा विभुः। क्वचित् क्वचिद्व्रतपरो व्रतान्यास्थाय पार्थिव।
आदित्या वसवो रुद्रास्तथैवाग्न्यश्विमारुताः। विश्वेदेवास्तथा साध्याः पितरोऽथ मरुद्गणाः।
यक्षराक्षसगन्धर्व्वाः सिद्धाश्चान्ये दिवौकसः। संसिद्धास्तपसा तात ये चान्ये स्वर्गवासिनः।
ये चादौ ब्राह्मणाः सृष्टा ब्रह्मणा तपसा पुरा। ते भावयन्तः पृथिवीं विचरन्ति दिवं तथा।
मर्त्यलोके च राजानो ये चान्ये गृहमेधिनः। महाकुलेषु दृश्यन्ते तत् सर्व्वं तपसः फलं। १०८४०
कौशिकानि च वस्त्राणि शुभान्याभरणानि च। वाहनासनयानानि तत् सर्व्वं तपसः फलं।
मनोऽनुकूलाः प्रमदा रूपवत्यः सहस्रशः। वासः प्रासादपृष्ठे च तत्सर्व्वं तपसः फलं।
शयनानि च मुख्यानि भोज्यानि विविधानि च। अभिप्रेतानि सर्व्वाणि भवन्ति शुभकर्म्मिणां।
नाप्राप्यं तपसः किञ्चित्त्रैलोक्येऽपि परन्तप। उपभोगपरित्यागः फलान्यकृतकर्म्मणां।
सुखितो दुःखितो वाऽपि नरो लोभं परित्यजेत्। अवेक्ष्य मनसा शास्त्रं बुद्ध्या च नृपसत्तम। १०८४५
असन्तोषोऽसुखायेति लोभादिन्द्रियसम्भ्रमः। ततोऽस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्ज्जिता
नष्टप्रज्ञो यदा तु स्यात्तदा न्यायं न पश्यति। तस्मात् सुखक्षये प्राप्ते पुमानुग्रं तपश्चरेत्।
यदिष्टं तत् सुखं प्राहुर्द्वेष्यं दुःखमिहेष्यते। कृताकृतस्य तपसः फलं पश्यस्व यादृशं।
नित्यं भद्राणि पश्यन्ति विषयांश्चोपभुञ्जते। प्राकाश्यं चैव गच्छन्ति कृत्वा निष्कल्मषं तपः।
अप्रियाण्यवमानांश्च दुःखं बहुविधात्मकं। फलार्थी तत्फलं त्यक्त्वा प्राप्नोति विषयात्मकं। १०८५०
धर्म्मे तपसि दाने च विचिकित्सा चास्य जायते। स कृत्वा पापकान्येवं निरयं प्रतिपद्यते।
सुखे तु वर्त्तमानो वै दुःखे वाऽपि नरोत्तम। स्ववृत्ताद्यो न चलते शास्त्रचक्षुः स मानवः।
इषुप्रपातमात्रं हि स्पर्शयोगे रतिः स्मृता। रसने दर्शने घ्राणे श्रवणे च विशाम्पते।
ततोऽस्य जायते तीव्रा वेदना तत्क्षयात् पुनः। अबुधा न प्रशंसन्ति मोक्षं सुखमनुत्तमं।
ततः फलार्थं सर्व्वस्य भवन्ति ज्यायसे गुणाः। धर्म्मवृत्त्या च सततं कामार्थाभ्यां न हीयते। १०८५५
अप्रयत्नागताः सेव्या गृहस्थैर्विषयाः सदा। प्रयत्नेनोपगम्यश्च स्वधर्म्म इति मे मतिः।
मानिनां कुलजातानां नित्यं शास्त्रार्थचक्षुषां। क्रियाधर्म्मवियुक्तानामशक्त्यासंवृतात्मनां।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रियमाणं यदा कर्म्म नाशं गच्छति मानुषं । तेषां नान्यदृते लोके तपसः कर्म्म विद्यते ।
सर्व्वात्मना तु कुर्व्वीत गृहस्थः कर्म्म निश्चयं । दाक्ष्येण हव्यकव्यार्थं स्वधर्म्मे विचरन्नृप ।
यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिं । एवमाश्रमिनः सर्व्वे गृहस्थे यान्ति संस्थितिं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां सप्तनवत्यधिकद्विशततोऽध्यायः ॥ २९७ ॥
॥ जनक उवाच ॥ वर्णो विशेषवर्णानां महर्षे केन जायते । एतदिच्छाम्यहं ज्ञातुं तद्ब्रूहि वदताम्वर ।
यदेतज्जायतेऽपत्यं स एवायमिति श्रुतिः । कथं ब्राह्मणतो जातो विशेषे ग्रहणं गतः ।
॥ पराशर उवाच ॥ एवमेतन्महाराज येन जातः स एव सः । तपसस्त्वपकर्षेण जातिग्रहणतां गतः ।
सुक्षेत्राच्च सुवीजाच्च पुण्यो भवति सम्भवः । अतोऽन्यतरतो हीनादवरो नाम जायते ।
वक्त्राद्भुजाभ्यामूरुभ्यां पद्भ्याञ्चैवाथ जज्ञिरे । सृजतः प्रजापतेर्लोकानिति धर्म्मविदो विदुः ।
मुखजा ब्राह्मणास्तात बाहुजाः क्षत्रियाः स्मृताः । ऊरुजा धनिनो राजन् पादजाः परिचारकाः ।
चतुर्णामेव वर्णानामागमः पुरुषर्षभ । अतोऽन्ये त्वतिरिक्ता ये ते वै सङ्करजाः स्मृताः ।
क्षत्रियातिरथाम्बष्ठा उग्रा वैदेहकास्तथा । श्वपाकाः पुक्कशास्तेना निषादाः सूतमागधाः ।
अयोगाः करणा व्रात्याश्चाण्डालाश्च नराधिप । एते चतुर्भ्यो वर्णेभ्यो जायन्ते वै परस्परात् ।
॥ जनक उवाच ॥ ब्रह्मणैकेन जातानां नानात्वं गोत्रतः कथं । बहूनीह हि लोके वै गोत्राणि मुनिसत्तम ।
यत्र तत्र कथं जाताः स्वयोनिं मुनयो गताः । शूद्रयोनौ समुत्पन्ना वियोनौ च तथाऽपरे ।
॥ पराशर उवाच ॥ राजन्नैतद्भवेद्ग्राह्यमपकृष्टेन जन्मना । महात्मनां समुत्पत्तिस्तपसा भावितात्मनां ।
उत्पाद्य पुत्रान्मुनयो नृपते यत्र तत्र ह । स्वेनैव तपसा तेषामृषित्वं प्रदधुः पुनः ।
पितामहश्च मे पूर्व्वमृष्यशृङ्गश्च काश्यपः । वेदस्ताण्ड्यः कृपश्चैव काक्षीवत्कमठादयः ।
यवक्रीतश्च नृपते द्रोणश्च वदताम्वरः । आयुर्मतङ्गो दत्तश्च द्रुमदो मात्स्य एव च ।
एते स्वां प्रकृतिं प्राप्ता वैदेह तपसोऽश्रयात् । प्रतिष्ठिता वेदविदो दमेन तपसैव हि ।
मूलगोत्राणि चत्वारि समुत्पन्नानि पार्थिव । अङ्गिराः काश्यपश्चैव वशिष्ठो भृगुरेव च ।
कर्म्मतोऽन्यानि गोत्राणि समुत्पन्नानि पार्थिव । नामधेयानि तपसा तानि च ग्रहणं सतां ।
॥ जनक उवाच ॥ विशेषधर्म्मान् वर्णानां प्रब्रूहि भगवन्मम । ततः सामान्यधर्म्मांश्च सर्व्वत्र कुशलो ह्यसि ।
॥ पराशर उवाच ॥ प्रतिग्रहो याजनञ्च तथैवाध्यापनं नृप । विशेषधर्म्मो विप्राणां रक्षा क्षत्रस्य शोभना ।
कृषिश्च पाशुपाल्यञ्च वाणिज्यञ्च विशामपि । द्विजानां परिचर्य्या च शूद्रकर्म्म नराधिप ।
विशेषधर्म्मा नृपते वर्णानां परिकीर्त्तिताः । धर्म्मान् साधारणांस्तात विस्तरेण शृणुष्व मे ।
आनृशंस्यमहिंसा चाप्रमादः संविभागिता । श्राद्धकर्म्मातिथेयञ्च सत्यमक्रोध एव च ।
स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता । आत्मज्ञानं तितिक्षा च धर्म्माः साधारणा नृप ।
ब्राह्मणा क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः । अत्र तेषामधीकारो धर्म्मेषु द्विपदाम्वर ।
विकर्म्मावस्थिता वर्णाः पतन्ति नृपते त्रयः । उन्नमन्ति यथा सन्तमाश्रित्येह स्वकर्म्मसु ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न चापि शूद्रः पततीति निश्चयो न चापि संस्कारमिहार्हतीति वा । श्रुतिप्रवृत्तं न च धर्म्ममाप्नुते न चास्य धर्म्मे प्रतिषेधनं कृतं ।

वैदेह कं शूद्रमुदाहरन्ति द्विजा महाराज श्रुतोपपन्नाः । अहं हि पश्यामि नरेन्द्रदेवं विश्वस्य विष्णुं जगतः प्रधानं ।

सतां वृत्तमधिष्ठाय निहीनानुजिहीर्षवः । मन्त्रवर्ज्जं न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः क्रियाः ।

यथा यथा हि सद्वृत्तमालम्बन्तीतरे जनाः । तथा तथा सुखं प्राप्य प्रेत्य चेह च मोदते । १०८९०

॥ जनक उवाच ॥ किं कर्म्म दूषयत्येनमथो जातिर्म्महामुने । सन्देहो मे समुत्पन्नस्तन्मे व्याख्यातुमर्हसि ।

॥ पराशर उवाच ॥ असंशयं महाराज उभयं दोषकारकं । कर्म्म चैव हि जातिश्च विशेषन्तु निशामय ।

जात्या च कर्म्मणा चैव दुष्टं कर्म्म न सेवते । जात्या दुष्टश्च यः पापं न करोति स पूरुषः ।

जात्या प्रधानं पुरुषं कुर्व्वाणं कर्म्म धिक्कृतं । कर्म्म तद्दूषयत्येनं तस्मात् कर्म्म न शोभनं ।

॥ जनक उवाच ॥ कानि कर्म्माणि धर्म्म्याणि लोकेऽस्मिन् द्विजसत्तम । न हिंसन्तीह भूतानि क्रियमाणानि सर्व्वदा । १०८९५

॥ पराशर उवाच ॥ शृणु मेऽत्र महाराज यन्मां त्वं परिपृच्छसि । यानि कर्म्माण्यहिंस्राणि नरं त्रायन्ति सर्व्वदा ।

संन्यस्याग्नीनुदासीनाः पश्यन्ति विगतज्वराः । नैःश्रेयसं कर्म्मपथं समारुह्य यथाक्रमं ।

प्रश्रिता विनयोपेता दमनित्याः सुसंश्रिताः । प्रयान्ति स्थानमजरं सर्व्वकर्म्मविवर्ज्जिताः ।

सर्व्वे वर्णा धर्म्मकार्य्याणि सम्यक् कृत्वा राजन् सत्यवाक्यानि चोक्त्वा । त्यक्त्वा धर्म्मं दारुणं जीवलोके यान्ति स्वर्गं नात्र कार्य्यो विचारः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां अष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥

॥ पराशर उवाच ॥ पिता सखायो गुरवः स्त्रियश्च न निर्गुणानां प्रभवन्ति लोके । अनन्यभक्ताः प्रियवादिनश्च हिताश्च वश्यास्च तथैव राजन् । १०९००

पिता परं दैवतं मानवानां मातुर्व्विशिष्टं पितरं वदन्ति । ज्ञानस्य लाभं परमं वदन्ति जितेन्द्रियार्थाः परमाप्नुवन्ति ।

रणाजिरे यत्र शराग्निसंस्तरे नृपात्मजो घातमवाप्य दह्यते । प्रयाति लोकानमरैः सुदुर्लभान्निषेवते स्वर्गफलं यथासुखं ।

श्रान्तं भीतं भ्रष्टशस्त्रं रुदन्तं पराङ्मुखं परिवर्हैश्च हीनं । अनुद्यन्तं रोगिणं याचमानं न वै हिंस्याद्बालवृद्धौ च राजन् ।

परिवर्हैः सुसंयुक्तमुद्यन्तं तुल्यतां गतं । अतिक्रमेत्तं नृपतिः संग्रामे क्षत्रियात्मजं ।

तुल्यादिह वधः श्रेयान् विशिष्टाच्चेति निश्चयः । निहीनात् कातराच्चैव कृपणाद्गर्हितो वधः । १०९०५

पापात् पापसमाचारान्निहीनाच्च नराधिप । पाप एष वधः प्रोक्तो नरकायेति निश्चयः ।

न कश्चित्त्राति वै राजन् दिष्टान्तवशमागतं । सावशेषायुषं वापि कश्चिन्नैवापकर्षति ।

स्निग्धैश्च क्रियमाणानि कर्म्माणीह निवर्त्तयेत् । हिंसात्मकानि सर्व्वाणि नायुरिच्छेत् परायुषा ।

गृहस्थानान्तु सर्व्वेषां विनाशमभिकाङ्क्षतां । निधनं शोभनं तात पुलिनेषु क्रियावतां ।

आयुषि क्षयमापन्ने पञ्चत्वमुपगच्छति । तथा ह्यकारणाद्भवति कारणैरुपपादित । १०९१०

तथा शरीरं भवति देहाद्येनोपपादितं । अध्वानं गतकश्चायं प्राप्तश्चायं गृहाद्गृहं ।

द्वितीयं कारणं तत्र नान्यत् किञ्चन विद्यते । तद्देहं देहिनां युक्तं मोक्षभूतेषु वर्त्तते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शिरास्नाय्वस्थिसंघातं बीभत्सामेध्यसंकुलं । भूतानामिन्द्रियाणाञ्च गुणानाञ्च समागमं ।
त्वगन्तं देहमित्याहुर्विद्वांसोऽध्यात्मचिन्तकाः । गुणैरपि परिक्षीणं शरीरं मर्त्यतां गतं ।
शरीरिणा परित्यक्तं निश्चेष्टं गतचेतनं । भूतैः प्रकृतिमापन्नैस्ततो भूमौ निमज्जति । १०९१५
भावितं कर्म्मयोगेन जायते तत्र तत्र ह । इदं शरीरं वैदेह म्रियते यत्र यत्र ह ।
तत्स्वभावोऽपरो दृष्टो विसर्गः कर्म्मणस्तथा । न जायते तु नृपते कञ्चित् कालमयं पुनः ।
परिभ्रमति भूतात्मा द्यामिवाम्बुधरो महान् । स पुनर्ज्जायते राजन् प्राप्येहायतनं नृप ।
मनसः परमो ह्यात्मा इन्द्रियेभ्यः परं मनः । विविधानाञ्च भूतानां जङ्गमाः परमा नृप ।
जङ्गमानामपि तथा द्विपदाः परमा गताः । द्विपदानामपि तथा द्विजा वै परमाः स्मृताः । १०९२०
द्विजानामपि राजेन्द्र प्रज्ञावन्तः परा मताः । प्राज्ञानामात्मसम्बुद्धाः सम्बुद्धानाममानिनः ।
जातमन्वेति मरणं नृणामिति विनिश्चयः । अन्तवन्ति हि कर्म्माणि सेवन्ते गुणतः प्रजाः ।
आपन्ने तूत्तरां काष्ठां सूर्य्ये यो निधनं व्रजेत् । नक्षत्रे च मुहूर्त्ते च पुण्ये राजन् स पुण्यकृत् ।
अयोजयित्वा क्लेशेन जनं साव्य च दुष्कृतं । मृत्युनाप्राकृतेनेह कर्म्म कृत्वात्मशक्तिभिः ।
विषमुद्बन्धनं दाहो दस्युहस्तात्तथा वधः । दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते । १०९२५
न चैभिः पुण्यकर्म्माणो युज्यन्ते चापि सन्धिजैः । एवंविधैश्च बहुभिरपरैः प्राकृतैरपि ।
ऊर्द्ध्वं भित्त्वा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप । मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणां ।
एकः शत्रुर्न्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् । येनावृतः कुरुते संप्रयुक्तो घोराणि कर्म्माणि सुदारुणानि ।
प्रबोधनार्थं श्रुतिधर्म्मयुक्तं वृद्धानुपास्य प्रभवेत यस्य । प्रयत्नसाध्यो हि स राजपुत्त्र प्रज्ञाशरेणोन्मथितः परैति ।
अधीत्य वेदांस्तपसा ब्रह्मचारी यज्ञाञ्छक्त्या सन्निसृज्येह पञ्च । वनं गच्छेत्पुरुषो धर्म्मकामः श्रेयः स्थित्वा स्थापयित्वा
स्ववंशं । १०९३०
उपभोगैरपि त्यक्तं नात्मानं सादयेन्नरः । चाण्डालत्वेऽपि मानुष्यं सर्व्वथा तात शोभनं ।
इयं हि योनिः प्रथमा यां प्राप्य जगतीपते । आत्मा वै शक्यते त्रातुं कर्म्मभिः शुभलक्षणैः ।
कथं न विप्रणश्येम योनितोऽस्या इति प्रभो । कुर्व्वन्ति धर्म्मं मनुजाः श्रुतिप्रामाण्यदर्शनात् ।
यो दुर्लभतरं प्राप्य मानुष्यं द्विषते नरः । धर्म्मावमन्ता कामात्मा भवेत्स खलु वञ्चते ।
यस्तु प्रीतिपुरोगेण चक्षुषा तात पश्यति । दीपोपमानि भूतानि यावदर्थान्न पश्यति । १०९३५
सान्त्वेनान्नप्रदानेन प्रियवादेन चाप्युत । समदुःखसुखो भूत्वा स परत्र न हीयते ।
दानं त्यागः शोभना मूर्त्तिरद्भ्यो भूप प्लाव्यं तपसा वै शरीरं । सरस्वती नैमिषपुष्करेषु ये चाप्यन्ये पुण्यदेशाः पृथिव्यां ।
गृहेषु येषामसवः पतन्ति तेषामयो निर्हरणं प्रशस्तं । यानेन वै प्रापणञ्च श्मशाने शौचेन नूनं विधिना चैव दाहः ।
इष्टिः पुष्टिर्यजनं याजनञ्च दानं पुण्यानां कर्म्मणाञ्च प्रयोगः । शक्त्या पित्र्यं यच्च किञ्चित्प्रशस्तं सर्व्वाण्यात्मार्थे मानवोऽयं
करोति ।
धर्म्मशास्त्राणि वेदाश्च षडङ्गानि नराधिप । श्रेयसोऽर्थे विधीयन्ते नरस्याक्लिष्टकर्म्मणः । १०९४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ एतद्वै सर्व्वमाख्यातं मुनिना सुमहात्मना । विदेहराजाय पुरा श्रेयसोऽर्थे नराधिप ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां नवनवत्यधिकद्विशततोऽध्यायः ॥ २९९ ॥

॥ भीष्म उवाच ॥ पुनरेव तु पप्रच्छ जनको मिथिलाधिपः । पराशरं महात्मानं धर्म्मे परमनिश्चयं ।

॥ जनक उवाच ॥ किं श्रेयः का गतिर्ब्रह्मन् किं कृतं न विनश्यति । क गतो न निवर्त्तेत तन्मे ब्रूहि महामते ।

॥ पराशर उवाच ॥ असङ्गः श्रेयसो मूलं ज्ञाने ज्ञानगतिः परा । चीर्णं तपो न प्रणश्येद्वापः क्षेत्रे न नश्यति ।

छित्त्वा धर्म्ममयं पाशं यदा धर्म्मेऽभिरज्यते । दत्त्वाऽभयकृतं दानं तदा सिद्धिमवाप्नुते । १०९४५

यो ददाति सहस्राणि गवामश्वशतानि च । अभयं सर्व्वभूतेभ्यः सदा तमभिवर्त्तते ।

वसन् विषयमध्येऽपि न वसत्येव बुद्धिमान् । संवसत्येव दुर्बुद्धिरसत्सु विषयेष्वपि ।

नाधर्म्मः श्लिष्यते प्राज्ञं पयः पुष्करपर्णवत् । अप्राज्ञमधिकं पापं श्लिष्यते जतुकाष्ठवत् ।

नाधर्म्मः कारणापेक्षी कर्त्तारमभिमुञ्चति । कर्त्ता खलु यथाकालं ततः समभिपद्यते ।

न भिद्यन्ते कृतात्मान आत्मप्रत्ययदर्शिनः । बुद्धिकर्म्मेन्द्रियाणां हि प्रमत्तो यो न बुध्यते । १०९५०

शुभाशुभेषु सक्तात्मा प्राप्नोति सुमहद्भयं । वीतरागो जितक्रोधः सम्यग्भवति यः सदा ।

विषये वर्त्तमानोऽपि न स पापेन युज्यते । मर्य्यादायां धर्म्मसेतुर्निर्बद्धो नैव सीदति ।

पुष्टस्रोत इवासक्तः स्फीतो भवति सञ्चयः । यथा भानुगतं तेजो मणिः शुद्धः समाधिना ।

आदत्ते राजशार्दूल तथा योगः प्रवर्त्तते ।

यथा तिलानामिह पुष्पसंश्रयात् पृथक् पृथग्याति गुणोऽतिसौम्यतां । तथा नराणान्तु विभावितात्मनां यथाश्रयं सत्त्वगुणः प्रवर्त्तते । १०९५५

जहाति दारांश्च जहाति सम्पदः पदञ्च यानं विविधाश्च सत्क्रियाः । त्रिविष्टपे जातमतिर्यदा नरस्तदाऽस्य बुद्धिर्व्विषयेषु भिद्यते ।

प्रसक्तबुद्धिर्व्विषयेषु यो नरो न बुध्यते ह्यात्महितं कदाचन । स सर्व्वभावानुगतेन चेतसा नृपामिषेणेव झषो विकृष्यते ।

यथा जातवत्सर्व्वलोकः परस्परमपाश्रितः । कदलीगर्भनिःसारो नौरिवाप्सु निमज्जति ।

न धर्म्मकालः पुरुषस्य निश्चितो न चापि मृत्युः पुरुषं प्रतीक्षते । सदा हि धर्म्मस्य क्रियैव शोभना यदा नरो मृत्यु मुखेऽभिवर्त्तते ।

यथाऽन्धः स्वगृहे युक्तो ह्यभ्यासादेव गच्छति । तथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिं । १०९६०

मरणं जन्मनि प्रोक्तं जन्म वै मरणाश्रितं । अविद्वान्मोक्षधर्म्मेषु बद्धो भवति चक्रवत् ।

बुद्धिमार्गप्रयातस्य सुखन्त्विह परत्र च । विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ।

परार्थं विस्तराः सर्व्वे त्यागमात्महितं विदुः । यथा मृणालानुगतमाशु मुञ्चति कर्द्दमं ।

तथात्मा पुरुषस्येह मनसा परिमुच्यते । मनः प्रणयतेऽत्मानं स एनमभियुञ्जति ।

युक्तो यदा स भवति तदा तं पश्यते परं । परार्थं वर्त्तमानस्तु स्वं कार्य्यं योऽभिमन्यते । १०९६५

इन्द्रियार्थेषु संसक्तः स्वकार्य्यात्परिमुच्यते । अधस्तिर्य्यग्गतिञ्चैव स्वर्गे चैव परां गतिं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राप्नोति सुकृतैरात्मा प्राप्यस्येहेतरस्य च । मृन्मये भाजने पक्वे यथा वै न्यस्यति द्रवः ।
तथा शरीरं तपसा तप्तं विषयमश्नुते । विषयानश्नुते यस्तु न स मोक्ष्यत्यसंशयं ।
यस्तु भोगांस्त्यजेदात्मा स वै भोक्तुं व्यवस्यति । नीहारेण हि संवीतः शिश्नोदरपरायणः ।
जात्यन्ध इव पन्थानमावृतात्मा न बुध्यते । वणिग्यथा समुद्राद्वै यथार्थं लभते धनं । १०९७०
तथा मर्त्यार्णवे जन्तोः कर्म्म विज्ञानतो गतिः । अहोरात्रमये लोके जरारूपेण संचरन् ।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा । स्वयंकृतानि कर्म्माणि जातो जन्तुः प्रपद्यते ।
नाकृत्वा लभते कश्चित् किञ्चिदस्ति प्रियाप्रियं । शयानं यान्तमासीनं प्रवृत्तं विषयेषु च ।
शुभाशुभानि कर्म्माणि प्रपद्यन्ते नरं सदा । नह्यन्यत्तीरमासाद्य पुनस्तर्त्तुं व्यवस्यति ।
दुर्लभो दृश्यते ह्यस्य विनिपातो महार्णवे । यथा भारावसन्ना हि नौर्म्महाम्भसि तन्तुना । १०९७५
तथा मनोभियोगाद्वै शरीरं प्रचिकीर्षति । यथा समुद्रमभितः संश्रिताः सरितोऽपराः ।
तथाद्या प्रकृतिर्योगादभिसंश्रीयते सदा । स्नेहपाशैर्ब्बहुविधैरासक्तमनसो नराः ।
प्रकृतिस्था विषीदन्ति जले सैकतवेश्मवत् । शरीरगृहसंज्ञस्य शौचतीर्थस्य देहिनः ।
बुद्धिमार्गप्रयातस्य सुखन्त्विह परत्र च । विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ।
परार्थं विस्तराः सर्व्वे त्यागमात्महितं विदुः । सङ्कल्पजो मित्रवर्गो ज्ञातयः कारणात्मकाः । १०९८०
भार्य्या पुत्त्रश्च दासश्च समर्थमुपभुञ्जते । न माता न पिता किञ्चित् कस्यचित् प्रतिपद्यते ।
दानपथ्यौदनो जन्तुः स्वकर्म्मफलमश्नुते । माता पुत्त्रः पिता भ्राता भार्य्या मित्रजनस्तथा ।
अष्टापदपदस्थाने दक्षमुद्रेव लक्ष्यते ।
सर्व्वाणि कर्म्माणि पुरा कृतानि शुभाशुभान्यात्मनो यान्ति जन्तोः । उपस्थितं कर्म्मफलं विदित्वा बुद्धिं तथा चोदयतेऽन्तरात्मा ।
व्यवसायं समाश्रित्य सहायान् योऽधिगच्छति । न तस्य कश्चिदारम्भः कदाचिदवसीदति । १०९८५
अद्वैधमनसं युक्तं शूरं धीरं विपश्चितं । न श्रीः संत्यजते नित्यमादित्यमिव रश्मयः ।
आस्तिक्यव्यवसायाभ्यामुपायाद्विस्मयाद्धिया । समारभेदनिन्द्यात्मा न सोऽर्थः परिसीदति ।
सर्व्वः स्वानि शुभाशुभानि नियतं कर्म्माणि जन्तुः स्वयं गर्भात् संप्रतिपद्यते तदुभयं यत्तेन पूर्व्वं कृतं ।
मृत्युश्चापरिहारवान् समगतिः कालेन विच्छेदिना दारोश्चूर्णमिवाश्मसारविहितं कर्म्मान्तिकं प्रापयेत् ।
स्वरूपतामात्मकृतञ्च विस्तरं कुलान्वयं द्रव्यसमृद्धिसञ्चयं । नरो हि सर्व्वो लभते यथाकृतं शुभाशुभेनात्मकृतेन कर्म्मणा । १०९९०
॥ भीष्म उवाच ॥ इत्युक्तो जनको राजन् यथातथ्यं मनीषिणा । श्रुत्वा धर्म्मविदां श्रेष्ठः परां मुदमवाप ह ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां द्विशततोऽध्यायः ॥ २०० ॥
॥ युधिष्ठिर उवाच ॥ सत्यं दमं क्षमां प्रज्ञां प्रशंसन्ति पितामह । विद्वांसो मनुजा लोके कथमेतन्मतं तव ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्येऽहमितिहासं पुरातनं । साध्यानामिह संवादं हंसस्य च युधिष्ठिर ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हंसो भूत्वाऽथ सौवर्णस्त्वजो नित्यः प्रजापतिः। स वै पर्य्येति लोकांस्त्रीनथ साध्यानुपागमत्।
॥ साध्या ऊचुः॥ शकुने वयं स्म देवा वै साध्यास्त्वामनुयुज्महे। पृच्छामस्त्वां मोक्षधर्म्मं भवांश्च किल मोक्षवित्। १०९९५
श्रुतोऽसि नः पण्डितो धीरवादी साधुशब्दश्चरते ते पतत्रिन्। किं मन्यसे श्रेष्ठतमं द्विज त्वं कस्मिन् मनस्ते रमते महात्मन्।
तन्नः कार्य्यं पक्षिवर प्रशाधि यत् कार्य्याणां मन्यसे श्रेष्ठमेकं। यत्कृत्वा वै पुरुषः सर्व्वबन्धैर्विमुच्यते विहगेन्द्रेह शीघ्रं।
॥ हंस उवाच ॥ इदं कार्य्यममृताशाः शृणोमि तपो दमः सत्यमात्माभिगुप्तिः। ग्रन्थीन् विमुच्य हृदयस्य सर्व्वान् प्रियाप्रिये स्वं वशमानयीत।
नारुन्तुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत। ययाऽस्य वाचा पर उद्विजेत न तां वदेदुषतीं पापलोक्यां।
वाक्सायका वदनान्निष्पतन्ति यैराहतः शोचति रात्र्यहानि। परस्य नामर्म्मसु ते पतन्ति तान् पण्डितो नावसृजेत् परेषु। ११०००
परश्चेदेनमतिवादवाणैर्भृशं विध्येच्छम एवेह कार्य्यः। संरोष्यमाणः प्रतिहृष्यते यः स आदत्ते सुकृतं वै परस्य।
क्षेपायमाणमभिषङ्गव्यलीकं निगृह्णाति ज्वलितं यश्च मन्युं। अदुष्टचेता मुदितोऽनसूयुः स आदत्ते सुकृतं वै परेषां।
आक्रुश्यमाणो न वदामि किञ्चित् क्षमाम्यहं ताड्यमानश्च नित्यं। श्रेष्ठं ह्येतद्यत् क्षमामाहुरार्य्याः सत्यं तथैवार्ज्जवमानृशंस्यं।
वेदस्योपनिषत् सत्यं सत्यस्योपनिषद्दमः। दमस्योपनिषन्मोक्ष एतत् सर्व्वानुशासनं।
वाचोवेगं मनसः क्रोधवेगं विधित्साविगमुदरोपस्थवेगं। एतान् वेगान् यो विषहेदुदीर्णान् तं मन्येऽहं ब्राह्मणं वै मुनिञ्च। ११००५
अक्रोधनः क्रुध्यतां वै विशिष्टस्तथा तितिक्षुरतितिक्षोर्व्विशिष्टः। अमानुषान्मानुषो वै विशिष्टस्तथाऽज्ञानाज्ज्ञानविद्वै विशिष्टः।
आक्रुश्यमाणो नाक्रुश्येन्मन्युरेनं तितिक्षतः। आक्रोष्टारं निर्द्दहति सुकृतञ्चास्य विन्दति।
योऽनात्युक्तः प्राह रूक्षं प्रियं वा यो वा हतो न प्रतिहन्ति धैर्य्यात्। पापञ्च यो नेच्छति तस्य हन्तुस्तस्येह देवाः स्पृहयन्ति नित्यं।
पापीयसः क्षमेतैव श्रेयसः सदृशस्य च। विमानितो हतोत्क्रुष्ट एवं सिद्धिं गमिष्यति।
सदाऽहमार्य्यान्निभृतोऽप्युपासे न मे विधित्सोत्सहते न रोषः। न चाप्यहं लिप्समानः परैमि न चैव किञ्चिद्विषयेण यामि। ११०१०
नाहं शप्तः प्रतिशपामि कञ्चिद्दमं द्वारं ह्यमृतस्येह वेद्मि। गुह्यं ब्रह्म तदिदं वो ब्रवीमि न मानुषात् श्रेष्ठतरं हि किञ्चित्।
निर्म्मुच्यमानः पापेभ्यो घनेभ्य इव चन्द्रमाः। विरजाः कालमाकाङ्क्षन् धीरो धैर्य्येण सिध्यति।
यः सर्व्वेषां भवति ह्यर्चनीय उत्सेधनस्तम्भ इवाभिजातः। यस्मै वाचं सुप्रसन्नां वदन्ति स वै देवान् गच्छति संयतात्मा।
न तथा वक्तुमिच्छन्ति कल्याणात् पुरुषे गुणात्। यथैषां वक्तुमिच्छन्ति नैर्गुण्यमनुयुञ्जकाः।
यस्य वाङ्मनसी गुप्ते सम्यक् प्रणिहिते सदा। वेदास्तपश्च त्यागश्च स इदं सर्व्वमाप्नुयात्। ११०१५
आक्रोशनावमानाभ्यां नाबुधान् गर्हयेद्बुधः। तस्मान्न वर्द्धयेदन्यं न चात्मानं विहिंसयेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अमृतस्येव सन्तृप्येदवमानस्य पण्डितः । सुखं ह्यवमतः शेते योऽवमन्ता स नश्यति ।
यत् क्रोधनो यजति यद्ददाति यद्वा तपस्तप्यति यज्जुहोति । वैवस्वतस्तद्धरतेऽस्य सर्व्वं मोघः श्रमो भवति हि क्रो
धनस्य ।
चत्वारि यस्य द्वाराणि सुगुप्तान्यमरोत्तमाः । उपस्थमुदरं हस्तौ वाक् चतुर्थी स धर्म्मवित् ।
सत्यं दमं ह्यार्ज्जवमानृशंस्यं धृतिं तितिक्षामतिसेवमानः । स्वाध्यायनित्योऽस्पृहयन् परेषामेकान्तशील्यूर्द्ध्वगतिर्भ
वेत् सः । ११०२०
सर्व्वांश्चैनाननुचरन् वत्सवच्चतुरस्तनात् । न पावनतमं किञ्चित् सत्यादध्यगमं क्वचित् ।
आचक्षेऽहं मानुषेभ्यो देवेभ्यः प्रतिसञ्चरन् । सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।
यादृशैः सन्निवसति यादृशांश्चोपसेवते । यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ।
यदि सन्तं सेवति यद्यसन्तं तपस्विनं यदि वा स्तेनमेव । वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति ।
सदा देवाः साधुभिः संवदन्ते न मानुषं विषयं यान्ति द्रष्टुं । नेन्दुः समः स्यादसमो हि वायुरुच्चावचं विषयं यः स
वेद । ११०२५
अदुष्टं वर्त्तमाने तु हृदयान्तरपूरुषे । तेनैव देवाः प्रीयन्ते सतां मार्गस्थितेन वै ।
शिश्नोदरे ये निरताः सदैव स्तेना नरा वाक्परुषाश्च नित्यं । अपेतदोषानपि तान् विदित्वा दूराद्देवाः सम्परिवर्ज्जयन्ति ।
न वै देवा हीनसत्त्वेन तोष्याः सर्व्वाशिना दुष्कृतकर्म्मणा वा । सत्यव्रता ये तु नराः कृतज्ञा धर्म्मे रतास्तैः सह सं भजन्ते ।
अव्याहृतं व्याहृताच्छ्रेय आहुः सत्यं वदेद्व्याहृतं तद्द्वितीयं । धर्म्मं वदेद्व्याहृतं तत्तृतीयं प्रियं वदेद्व्याहृतं तच्चतुर्थं ।
॥ साध्या ऊचुः ॥ केनायमावृतो लोकः केन वा न प्रकाशते । केन त्यजति मित्राणि केन स्वर्गं न गच्छति । ११०३०
॥ हंस उवाच ॥ अज्ञानेनावृतो लोको मात्सर्य्यान्न प्रकाशते । लोभात्त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति ।
॥ साध्या ऊचुः ॥ कः स्विदेको रमते ब्राह्मणानां कः स्विदेको बहुभिर्जोषमास्ते । कः स्विदेको बलवान् दुर्ब्बलोऽपि कः स्वि
देषां कलहं नान्ववैति ।
॥ हंस उवाच ॥ प्राज्ञ एको रमते ब्राह्मणानां प्राज्ञश्चैको बहुभिर्जोषमास्ते । प्राज्ञ एको बलवान् दुर्ब्बलोऽपि प्राज्ञ एषां कल
हं नान्ववैति ।
॥ साध्या ऊचुः ॥ किं ब्राह्मणानां देवत्वं किञ्च साधुत्वमुच्यते । असाधुत्वञ्च किन्त्वेषां किमेषां मानुषं मतं ।
॥ हंस उवाच ॥ स्वाध्याय एषां देवत्वं व्रतं साधुत्वमुच्यते । असाधुत्वं परीवादो मृत्युर्म्मानुष्यमुच्यते । ११०३५
॥ भीष्म उवाच ॥ संवाद इत्ययं श्रेष्ठः साध्यानां परिकीर्त्तितः । क्षेत्रं वै कर्म्मणां योनिः सद्भावः सत्यमुच्यते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि हंसगीतायां एकाधिकद्विशततोऽध्यायः ॥ २०१ ॥
॥ युधिष्ठिर उवाच ॥ साङ्ख्ये योगे च मे तात विशेषं वक्तुमर्हसि । तव धर्म्मज्ञ सर्व्वं हि विदितं कुरुसत्तम ।
॥ भीष्म उवाच ॥ साङ्ख्याः साङ्ख्यं प्रशंसन्ति योगा योगं द्विजातयः । वदन्ति कारणं श्रेष्ठं स्वपक्षोद्भावनाय वै ।
अनीश्वरः कथं मुच्येदित्येवं शत्रुकर्षण । वदन्ति कारणं श्रेष्ठं योगाः सम्यग्मनीषिणः ।
वदन्ति कारणञ्चेदं साङ्ख्याः सम्यग्द्विजातयः । विज्ञायेह गतीः सर्व्वा विरक्तो विषयेषु यः । ११०४०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऊर्द्धं स देहात् सुव्यक्तं विमुच्येदिति नान्यथा। एतदाऊर्महाप्राज्ञाः साङ्ख्यं वै मोक्षदर्शनं।
स्वपक्षे कारणं ग्राह्यं समर्थे वचनं हितं। शिष्टानां हि मतं ग्राह्यं लद्विधैः शिष्टसम्मतैः।
प्रत्यक्षहेतवो योगाः साङ्ख्याः शास्त्रविनिश्चयाः। उभे चैते मते तत्त्वे मम तात युधिष्ठिर।
उभे चैते मते ज्ञाने नृपते शिष्टसंमते। अनुष्ठिते यथाशास्त्रं येन तां परमां गतिं।
तुल्यं शौचं तपोयुक्तं दया भूतेषु चानघ। व्रतानां धारणं तुल्यं दर्शनं न समन्तयोः। ११०४५
॥ युधिष्ठिर उवाच॥ यदि तुल्यं व्रतं शौचं दया चात्र फलं तथा। न तुल्यं दर्शनं कस्मात्तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ रागं मोहं तथा स्नेहं कामं क्रोधञ्च केवलं। योगाच्छित्त्वा ततो दोषान् पञ्चैतान् प्राप्नुवन्ति तत्।
यथैवानिमिषाः स्थूला जालं छित्त्वा पुनर्ज्जलं। प्राप्नुवन्ति तथा योगास्तत्पदं वीतकल्मषाः।
तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः। प्राप्नुयुर्व्विमलं मार्गं विमुक्ताः सर्व्वबन्धनैः।
लोभजानि तथा राजन् बन्धनानि बलान्विताः। छित्त्वा योगाः परं मार्गं गच्छन्ति विमलं शिवं। ११०५०
अबलाश्च मृगा राजन् वागुरासु तथाऽपरे। विनश्यन्ति न सन्देहस्तद्वद्योगबलादृते।
बलहीनाश्च कौन्तेय यथा जालं गता झषाः। वधं गच्छन्ति राजेन्द्र योगास्तद्वत् सुदुर्ब्बलाः।
यथा च शकुनाः सूक्ष्मं प्राप्य जालमरिन्दम। तत्र सक्ता विपद्यन्ते मुच्यन्ते च बलान्विताः।
कर्म्मजैर्ब्बन्धनैर्बद्धास्तद्वद्योगाः परन्तप। अबला वै विनश्यन्ति मुच्यन्ते च बलान्विताः।
अल्पकश्च यथा राजन् वह्निः शाम्यति दुर्ब्बलः। आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगोऽबलः प्रभो। ११०५५
स एव च यदा राजन् वह्निर्ज्जातबलः पुनः। समीरणगतः क्षिप्रं दहेत् कृत्स्नां महीमपि।
तद्वज्जातबलो योगी दीप्ततेजा महाबलः। अन्तकाल इवादित्यः कृत्स्नं संशोषयेज्जगत्।
दुर्ब्बलश्च यथा राजन् स्रोतसा ह्रियते नरः। बलहीनस्तथा योगो विषयैर्ह्रियतेऽवशः।
तदेव च महास्रोतो विष्टम्भयति वारणः। तद्वद्योगबलं लब्ध्वा व्यूहते विषयान् बहून्।
विशन्ति चावशाः पार्थ योगाद्योगबलान्विताः। प्रजापतीनृषीन् देवान् महाभूतानि चेश्वराः। ११०६०
न यमो नान्तकः क्रुद्धो न मृत्युर्भीमविक्रमः। ईशते नृपते सर्व्वे योगस्यामिततेजसः।
आत्मनाञ्च सहस्राणि बहूनि भरतर्षभ। योगः कुर्य्याद्बलं प्राप्य तैश्च सर्व्वैर्म्महीञ्चरेत्।
प्राप्नुयाद्विषयान् कश्चित् पुनश्चोग्रं तपश्चरेत्। सङ्क्षिपेच्च पुनस्तात सूर्य्यस्तेजोगुणानिव।
बलस्थस्य हि योगस्य बन्धनेशस्य पार्थिव। विमोक्षे प्रभविष्णुत्वमुपपन्नमसंशयं।
बलानि योगप्राप्तानि मयैतानि विशाम्पते। निदर्शनार्थं सूक्ष्माणि वक्ष्यामि च पुनस्तव। ११०६५
आत्मनश्च समाधाने धारणां प्रति वा विभो। निदर्शनानि सूक्ष्माणि शृणु मे भरतर्षभ।
अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः। युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयं।
स्नेहपूर्णे यथा पात्रे मन आधाय निश्चलं। पुरुषो युक्त आरोहेत् सोपानं युक्तमानसः।
युक्तस्तथाऽयमात्मानं योगः पार्थिव निश्चलं। करोत्यमलमात्मानं भास्करोपमदर्शनं।
यथा च नावं कौन्तेय कर्णधारः समाहितः। महार्णवगतां शीघ्रं नयेत् पार्थिवसत्तम। ११०७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तद्वदात्मसमाधानं युक्ता योगेन तत्त्ववित् । दुर्गमं स्थानमाप्नोति हित्वा देहमिमं नृप ।
सारथिश्च यथा युक्ता सदश्वान् सुसमाहितः । देशमिष्टं नयत्याशु धन्विनं पुरुषर्षभं ।
तथैव नृपते योगी धारणासु समाहितः । प्राप्नोत्याशु परं स्थानं लक्ष्यं मुक्त इवाशुगः ।
प्रवेश्यात्मनि चात्मानं योगी तिष्ठति योऽचलः । पापं हन्ति पुनीतानां पदमाप्नोति सोऽजरं ।
नाभ्यां कण्ठे च शीर्षे च हृदि वक्षसि पार्श्वयोः । दर्शने श्रवणे चापि घ्राणे चामितविक्रम । ११०७५
स्थानेष्वेतेषु यो योगी महाव्रतसमाहितः । आत्मना सूक्ष्ममात्मानं युङ्क्ते सम्यग्विशाम्पते ।
स शीघ्रमचलप्रख्यं कर्म्म दग्ध्वा शुभाशुभं । उत्तमं योगमास्थाय यदीच्छति विमुच्यते ।
॥ युधिष्ठिर उवाच ॥ आहारान् कीदृशान् कृत्वा कानि जित्वा च भारत । योगी बलमवाप्नोति तद्भवान् वक्तुमर्हति ।
॥ भीष्म उवाच ॥ कणानां भक्षणे युक्तः पिण्याकस्य च भारत । स्नेहानां वर्ज्जने युक्तो योगी बलमवाप्नुयात् ।
भुञ्जानो यावकं रूक्षं दीर्घकालमरिन्दम । एकाहारो विशुद्धात्मा योगी बलमवाप्नुयात् । ११०८०
पक्षान्मासानृतूंश्चैतान् संवत्सरानहस्तथा । अपः पीत्वा पयोमिश्रा योगी बलमवाप्नुयात् ।
अखण्डमपि वा मांसं सततं मनुजेश्वर । उपोष्य सम्यक् शुद्धात्मा योगी बलमवाप्नुयात् ।
कामं जित्वा तथा क्रोधं शीतोष्णवर्षमेव च । भयं शोकं तथा श्वासं पौरुषान् विषयांस्तथा ।
अरतिं दुर्ज्जयाञ्चैव घोरां तृष्णाञ्च पार्थिव । स्पर्शं निद्रां तथा तन्द्रां दुर्ज्जयां नृपसत्तम ।
दीपयन्ति महात्मानः सूक्ष्ममात्मानमात्मना । वीतरागमहाप्रज्ञा ध्यानाध्ययनसंपदा । ११०८५
दुर्गस्त्वेष महापन्था ब्राह्मणानां विपश्चितां । यः कश्चिद्व्रजति ह्यस्मिन् क्षेमेण भरतर्षभ ।
यथा कश्चिद्वनं घोरं बहुसर्पसरीसृपं । श्वभ्रवत्तोयहीनञ्च दुर्गमं बहुकण्टकं ।
अभक्तमटवीप्रायं दावदग्धमहीरुहं । पन्थानं तस्कराकीर्णं क्षेमेणाभिपतेद्युवा ।
योगमार्गं तथासाद्य यः कश्चिद्व्रजते द्विजः । क्षेमेणोपरमेन्मार्गाद्बहुदोषो हि स स्मृतः ।
सुस्थेयं क्षुरधारासु निशितासु महीपते । धारणासु तु योगस्य दुःस्थेयमकृतात्मभिः । ११०९०
विपन्ना धारणास्तात नयन्ति न शुभां गतिं । नेतृहीना यथा नावः पुरुषानर्णवे नृप ।
यस्तु तिष्ठति कौन्तेय धारणासु यथाविधि । मरणं जन्मदुःखञ्च सुखञ्च स विमुञ्चति ।
नानाशास्त्रेषु निष्पन्नं योगेष्विदमुदाहृतं । परं योगस्य यत् कृत्यं निश्चितं तद्द्विजातिषु ।
परं हि तद्ब्रह्ममयं महात्मन् ब्रह्माणमीशं वरदञ्च विष्णुं । भवञ्च धर्म्मञ्च षडाननञ्च यद्ब्रह्मपुत्त्रांश्च महानुभावान् ।
तमश्च कष्टं सुमहद्रजश्च सत्त्वञ्च शुद्धं प्रकृतिं पराञ्च । सिद्धिञ्च देवीं वरुणस्य पत्नीं तेजश्च कृत्स्नं सुमहच्च धैर्य्यं । ११०९५
ताराधिपं खे विमलं सतारं विश्वांश्च देवानुरगान् पितॄंश्च । शैलांश्च कृत्स्नानुदधींश्च घोरानुदीर्य्य सर्व्वाः सवनान् घनांश्च ।
नागान्नगान् यक्षगणान् दिशश्च गन्धर्व्वसंघान् पुरुषान् स्त्रियश्च । परस्परं प्राप्य महान् महात्मा विशेत योगी न चिरा
द्विमुक्तः ।
कथा च येयं नृपते प्रसक्ता देवे महावीर्य्यमतौ शुभेयं । योगी स सर्व्वानभिभूय मर्त्यान्नारायणात्मा कुरुते महात्मा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि योगविधौ द्व्यधिकत्रिशततोऽध्यायः ॥ ३०२ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ सम्यक् त्वयाऽयं नृपते वर्णितः शिष्टसम्मतः । योगमार्गो यथान्यायं शिष्यायेह हितैषिणा ।
साङ्ख्ये त्विदानीं कार्त्स्न्येन विधिं प्रब्रूहि पृच्छते । त्रिषु लोकेषु यज्ज्ञानं सर्व्वं तद्विदितं हि ते ।
॥ भीष्म उवाच ॥ शृणु मे त्वमिदं सूक्ष्मं सांख्यानां विदितात्मनां । विहितं यतिभिः सर्व्वैः कपिलादिभिरीश्वरैः । १११००
यस्मिन्न विभ्रमाः केचिद्दृश्यन्ते मनुजर्षभ । गुणाश्च यस्मिन् बहवो दोषहानिश्च केवला ।
ज्ञानेन परिसंख्याय सदोषान् विषयान्नृप । मानुषान् दुर्ज्जयान् कृत्स्नान् पैशाचान् विषयांस्तथा ।
राक्षसान् विषयान् ज्ञात्वा यक्षाणां विषयांस्तथा । विषयानौरगान् ज्ञात्वा गान्धर्व्वविषयांस्तथा ।
पितॄणां विषयान् ज्ञात्वा तिर्य्यक्षु चरतां नृप । सुपर्णविषयान् ज्ञात्वा मरुतां विषयांस्तथा ।
राजर्षिविषयान् ज्ञात्वा ब्रह्मर्षिविषयांस्तथा । आसुरान् विषयान् ज्ञात्वा वैश्वदेवांस्तथैव च । १११०५
देवर्षिविषयान् ज्ञात्वा योगानामपि चेश्वरान् । प्रजापतीनां विषयान् ब्रह्मणो विषयांस्तथा ।
आयुषश्च परं कालं लोके विज्ञाय तत्त्वतः । सुखस्य च परं तत्त्वं विज्ञाय वदताम्वर ।
प्राप्ते काले च यद्दुःखं सततं विषयैषिणां । तिर्य्यक्षु पततां दुःखं पततां नरके च यत् ।
स्वर्गस्य च गुणान् कृत्स्नान् दोषान् सर्व्वांश्च भारत । वेदवादेऽपि ये दोषा गुणा ये चापि वैदिकाः ।
ज्ञानयोगे च ये दोषा गुणा योगे च ये नृप । साङ्ख्यज्ञाने च ये दोषास्तथैव च गुणा नृप । ११११
सत्त्वं दशगुणं ज्ञात्वा रजो नवगुणन्तथा । तमश्चाष्टगुणं ज्ञात्वा बुद्धिं सप्तगुणान्तथा ।
षड्गुणञ्च मनो ज्ञात्वा नभः पञ्चगुणन्तथा । बुद्धिं चतुर्गुणां ज्ञात्वा तमश्च त्रिगुणं तथा ।
द्विगुणञ्च रजो ज्ञात्वा सत्त्वमेकगुणं पुनः । मार्गं विज्ञाय तत्त्वेन प्रलये प्रेक्षणे तथा ।
ज्ञानविज्ञानसम्पन्नाः कारणैर्भाविताः शुभाः । प्राप्नुवन्ति शुभं मोक्षं सूक्ष्मा इव नभः परं ।
रूपेण दृष्टिं संयुक्तां घ्राणं गन्धगुणेन च । शब्दे शक्तं तथा श्रोत्रं जिह्वां रसगुणेषु च । १११११५
तनुं स्पर्शे तथा सक्तां वायुं नभसि चाश्रितं । मोहं तमसि संयुक्तं लोभमर्थेषु संश्रितं ।
विष्णुक्रान्ते बले शक्रं कोष्ठे सक्तं तथाऽनलं । अप्सु देवीं समासक्तामापस्तेजसि संश्रिताः ।
तेजो वायौ तु संसक्तं वायुं नभसि चाश्रितं । नभो महति संयुक्तं महद्बुद्धौ च संश्रितं ।
बुद्धिं तमसि संसक्तां तमो रजसि संश्रितं । रजः सत्त्वे तथा सक्तं सत्त्वं सक्तं तथात्मनि ।
सक्तमात्मानमीशे च देवे नारायणे तथा । देवं मोक्षे च संसक्तं मोक्षं सक्तन्तु न क्वचित् । १११२०
ज्ञात्वा सत्त्वगुणं देहं वृतं षोडशभिर्गुणैः । स्वभावं चेतनाञ्चैव ज्ञात्वा देहसमाश्रिते ।
मध्यस्थमेकमात्मानं पापं यस्मिन्न विद्यते । द्वितीयं कर्म्म विज्ञाय नृपते विषयैषिणां ।
इन्द्रियाणीन्द्रियार्थांश्च सर्व्वानात्मनि संश्रितान् । दुर्लभत्वञ्च मोक्षस्य विज्ञाय श्रुतिपूर्व्वकं ।
प्राणापानौ समानञ्च व्यानोदानौ च तत्त्वतः । अधश्चैवानिलं ज्ञात्वा प्रवहञ्चानिलं पुनः ।
सप्तवातांस्तथा ज्ञात्वा सप्तधा विहितान् पुनः । प्रजापतीनृषींश्चैव मार्गांश्चैव बहून् वरान् । १११२५
सप्तर्षींश्च बहून् ज्ञात्वा राजर्षींश्च परन्तप । सुरर्षीन्महतश्चान्यान् ब्रह्मर्षीन् सूर्य्यसन्निभान् ।
ऐश्वर्य्याच्च्यावितान् दृष्ट्वा कालेन महता नृप । महतां भूतसङ्घानां श्रुत्वा नाशञ्च पार्थिव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतिञ्चाप्यशुभां ज्ञात्वा नृपते पापकर्म्मिणां । वैतरण्याञ्च यद्दुःखं पतितानां यमक्षये ।
योनीषु च विचित्रासु संसारानशुभांस्तथा । जठरे चाशुभे वासं शोणितोदकभाजने ।
श्लेष्ममूत्रपुरीषे च तीव्रगन्धसमन्विते । शुक्रशोणितसंघाते मज्जास्नायुपरिग्रहे । ११११०
शिराशतसमाकीर्णे नवद्वारपुरेऽशुचौ । विज्ञाय हितमात्मानं योगांश्च विविधान्नृप ।
तामसानाञ्च जन्तूनां रमणीयावृतात्मनां । सात्त्विकानाञ्च जन्तूनां कुत्सितं भरतर्षभ ।
गर्हितं महतामर्थे साङ्ख्यानां विदितात्मनां । उपप्लवांस्तथा घोरान् शशिनस्तेजसस्तथा ।
ताराणां पतनं दृष्ट्वा नक्षत्राणाञ्च पर्य्ययं । द्वन्द्वानां विप्रयोगञ्च विज्ञाय कृपणं नृप ।
अन्योन्यभक्षणं दृष्ट्वा भूतानामपि चाशुभं । बाल्ये मोहञ्च विज्ञाय क्षयं देहस्य चाशुभं । ११११५
रागे मोहे च संप्राप्ते क्वचित् सत्त्वं समाश्रितं । सहस्रेषु नरः कश्चित् मोक्षबुद्धिं समाश्रितः ।
दुर्लभत्वञ्च मोक्षस्य विज्ञाय श्रुतिपूर्व्वकं । बहुमानमलब्धेषु लब्धे मध्यस्थतां पुनः ।
विषयाणाञ्च दौरात्म्यं विज्ञाय नृपते पुनः । गतासूनाञ्च कौन्तेय देहान्दृष्ट्वा तथा शुभान् ।
वासं कुलेषु जन्तूनां दुःखं विज्ञाय भारत । ब्रह्मघ्नानां गतिं ज्ञात्वा पतितानां सुदारुणां ।
सुरापाने च सक्तानां ब्राह्मणानां दुरात्मनां । गुरुदारप्रसक्तानां गतिं विज्ञाय चाशुभां । १११२०
जननीषु च वर्त्तन्ते ये नसम्यग्युधिष्ठिर । सदैवकेषु लोकेषु ये न वर्त्तन्ति मानवाः ।
तेन ज्ञानेन विज्ञाय गतिञ्चाशुभकर्म्मणां । तिर्य्यग्योनिगतानाञ्च विज्ञाय गतयः पृथक् ।
वेदवादांस्तथा चित्रानृतूनां पर्य्ययांस्तथा । क्षयं संवत्सराणाञ्च मासानाञ्च क्षयन्तथा ।
पक्षक्षयं तथा दृष्ट्वा दिवसानाञ्च संक्षयं । क्षयं वृद्धिञ्च चन्द्रस्य दृष्ट्वा प्रत्यक्षतस्तथा ।
वृद्धिं दृष्ट्वा समुद्राणां क्षयन्तेषां तथा पुनः । क्षयं धनानां दृष्ट्वा च पुनर्वृद्धिं तथैव च । १११२५
संयोगानां क्षयं दृष्ट्वा युगानाञ्च विशेषतः । क्षयञ्च दृष्ट्वा शैलानां क्षयञ्च सरितान्तथा ।
वर्णानाञ्च क्षयं दृष्ट्वा क्षयान्तञ्च पुनः पुनः । जरां मृत्युं तथा जन्म दृष्ट्वा दुःखानि चैव ह ।
देहदोषांस्तथा ज्ञात्वा तेषां दुःखञ्च तत्त्वतः । देहविक्लवताञ्चैव सम्यग्विज्ञाय तत्त्वतः ।
आत्मदोषांश्च विज्ञाय सर्व्वानात्मनि संश्रितान् । स्वदेहादुत्थितान् गन्धांस्तथा विज्ञाय चाशुभान् ।
॥ युधिष्ठिर उवाच ॥ कान् स्वगात्रोद्भवान् दोषान् पश्यस्यमितविक्रम । एतन्मे संशयं कार्त्स्न्येन वक्तुमर्हसि तत्त्वतः । १११३०
॥ भीष्म उवाच ॥ पञ्च दोषान् प्रभो देहे प्रवदन्ति मनीषिणः । मार्गज्ञाः कापिलाः साङ्ख्याः शृणु तानरिसूदन ।
कामक्रोधौ भयं निद्रा पञ्चमः श्वास उच्यते । एते दोषाः शरीरेषु दृश्यन्ते सर्व्वदेहिनां ।
छिन्दन्ति क्षमया क्रोधं कामं संकल्पवर्ज्जनात् । सत्त्वसंसेवनान्निद्रामप्रमादाद्भयन्तथा ।
छिन्दन्ति पञ्चमं श्वासमल्पाहारतया नृप । गुणान् गुणशतैर्ज्ञात्वा दोषान् दोषशतैरपि ।
हेतून् हेतुशतैश्चित्रैश्चित्रान् विज्ञाय तत्त्वतः । अपां फेनोपमं लोकं विष्णोर्म्मायाशतैर्वृतं । १११३५
चित्रभित्तिप्रतीकाशं नलसारमनर्थकं । तमःश्वभ्रनिभं दृष्ट्वा वर्षबुद्बुदसन्निभं ।
नाशप्रायं सुखाद्धीनं नाशोत्तरमिहावशं । रजस्तमसि संलग्नं पङ्के द्विपमिवावशं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सांख्या राजन् महाप्राज्ञास्त्यक्त्वा देहं प्रजाकृतं । ज्ञानयोगेन सांख्येन व्यापिना महता नृप ।
राजसानशुभान् गन्धांस्तामसांश्च तथाविधान् । पुण्यांश्च सात्त्विकान् गन्धान् स्पर्शजान् देहसंश्रितान् ।
छित्त्वाशु ज्ञानशस्त्रेण तपोदण्डेन भारत । ततो दुःखोदकं घोरं चिन्ताशोकमहाह्रदं । ११६६०
व्याधिमृत्युमहाग्राहं महाभयमहोरगं । तमःकूर्म्मं रजोमीनं प्रज्ञया सन्तरन्त्युत ।
स्नेहपङ्कजरादुर्गं ज्ञानद्वीपमरिन्दम । कर्म्मागाधं सत्यतीरं स्थितव्रतमरिन्दम ।
हिंसाशीघ्रमहावेगं नानारससमाकरं । नानाप्रीतिमहारत्नं दुःखज्वरसमीरणं ।
शोकतृष्णामहावर्त्तन्तीक्ष्णव्याधिमहागजं । अस्थिसंघातसंघट्टं श्लेष्मफेनमरिन्दम ।
दानमुक्ताकरं घोरं शोणितह्रदविद्रुमं । हसितोत्कृष्टनिर्घोषं नानाज्ञानसुदुस्तरं । ११६६५
रोदनाश्रुमलक्षारं सङ्गत्यागपरायणं । पुनराजन्मलोकौघं पुत्त्रबान्धवपत्तनं ।
अहिंसासत्यमर्य्यादं प्राणत्यागमहोर्म्मिणं । वेदान्तगमनद्वीपं सर्व्वभूतदयोदधिं ।
मोक्षदुर्लभविषयं वडवामुखसागरं । तरन्ति यतयः सिद्धा ज्ञानयोगेन भारत ।
तीर्त्वा च दुस्तरं जन्म विशन्ति विमलं नभः । ततस्तान् सुकृतीन् सांख्यान् सूर्य्यो वहति रश्मिभिः ।
पद्मतन्तुवदाविश्य प्रवहन् विषयान्नृप । तत्र तान् प्रवहो वायुः प्रतिगृह्णाति भारत। ११६७०
वीतरागान् यतीन् सिद्धान् वीर्य्ययुक्तांस्तपोधनान् । सूक्ष्मः शीतः सुगन्धी च सुखस्पर्शश्च भारत ।
सप्तानां मरुतां श्रेष्ठो लोकान् गच्छति यः शुभान् । स तान् वहति कौन्तेय नभसः परमां गतिं ।
नभो वहति लोकेश रजसः परमां गतिं । रजो वहति राजेन्द्र सत्त्वस्य परमां गतिं ।
सत्त्वं वहति शुद्धात्मन् परं नारायणं प्रभुं । प्रभुर्व्वहति शुद्धात्मा परमात्मानमात्मना ।
परमात्मानमासाद्य तद्भूतायतनाऽमलाः । अमृतत्वाय कल्पन्ते न निवर्त्तन्ति वा विभो । ११६७५
परमा सा गतिः पार्थ निर्द्वन्द्वानां महात्मनां । सत्यार्ज्जवरतानां वै सर्व्वभूतदयावतां ।
॥ युधिष्ठिर उवाच ॥ स्थानमुत्तममासाद्य भगवन्तं स्थिरव्रताः । आजन्ममरणं वा ते स्मरन्त्युत न वाऽनघ ।
यदत्र तथ्यं तन्मे त्वं यथावद्वक्तुमर्हसि । त्वदृते पुरुषं नान्यं प्रष्टुमर्हामि कौरव ।
मोक्षे दोषो महानेष प्राप्य सिद्धिगतानृषीन् । यदि तत्रैव विज्ञाने वर्त्तन्ते यतयः परे ।
प्रवृत्तिलक्षणं धर्म्मं पश्यामि परमं नृप । मग्नस्य हि परे ज्ञाने किन्तु दुःखतरम्भवेत् । ११६८०
॥ भीष्म उवाच ॥ यथान्यायं त्वया तात प्रश्नः पृष्टः सुसङ्कटः । बुधानामपि संमोहः प्रश्नेऽस्मिन् भरतर्षभ ।
अत्रापि तत्त्वं परमं शृणु सम्यङ्मयेरितं । बुद्धिश्च परमा यत्र कापिलानां महात्मनां ।
इन्द्रियाण्यवबुद्ध्यन्ते स्वदेहे देहिनां नृप । करणान्यात्मनस्तानि सूक्ष्मः पश्यति तैस्तु सः ।
आत्मना विप्रहीणानि काष्ठकुड्यसमानि तु । विनश्यन्ति न सन्देहः फेना इव महार्णवे ।
इन्द्रियैः सह सुप्तस्य देहिनः शत्रुतापन । सूक्ष्मश्चरति सर्व्वत्र नभसीव समीरणः । ११६८५
स पश्यति यथान्यायं स्पर्शान् स्पृशति वा विभो । बुध्यमानो यथा पूर्व्वमखिलेनेह भारत ।
इन्द्रियाणीह सर्व्वाणि स्वे स्वे स्थाने यथाविधि । अनीशत्वात् प्रलीयन्ते सर्पा हतविषा इव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इन्द्रियाणान्तु सर्व्वेषां स्वस्थानेष्वेव सर्व्वशः आक्रम्य गतयः सूक्ष्माश्चरत्यात्मा न संशयः ।
सत्त्वस्य च गुणान् कृत्स्नान् रजसश्च गुणान् पुनः । गुणांश्च तमसः सर्व्वान् गुणान् बुद्धेश्च भारत ।
गणांश्च मनसश्चापि नभसश्च गुणांश्च सः । गुणान् वायोश्च धर्म्मात्मन् स्नेहजांश्च गुणान् पुनः । ११११०
अपां गुणांस्तथा पार्थ पार्थिवांश्च गुणानपि । सर्व्वाण्येव गुणैर्व्याप्य क्षेत्रज्ञेषु युधिष्ठिर ।
आत्मा च याति क्षेत्रज्ञं कर्म्मणी च शुभाशुभे । शिष्या इव महात्मानमिन्द्रियाणि च तं प्रभो ।
प्रकृतिञ्चाप्यतिक्रम्य गच्छत्यात्मानमव्ययं । परं नारायणात्मानं निर्द्वन्द्वं प्रकृतेः परं ।
विमुक्तः पुण्यपापेभ्यः प्रविष्टस्तमनामयं । परमात्मानमगुणं न निवर्त्तति भारत ।
शिष्टं तत्र मनस्तात इन्द्रियाणि च भारत । आगच्छन्ति यथाकालं गुरोः सन्देशकारिणः । ११११५
शक्यञ्चाल्पेन कालेन शान्तिं प्राप्तं गुणार्थिना । एवमुक्तेन कौन्तेय युक्तज्ञानेन मोक्षिणा ।
सांख्या राजन्महाप्राज्ञा गच्छन्ति परमां गतिं । ज्ञानेनानेन कौन्तेय तुल्यं ज्ञानं न विद्यते ।
अत्र ते संशयो माभूज्ज्ञानं साङ्ख्यं परं मतं । अक्षरं ध्रुवमेवोक्तं पूर्णं ब्रह्म सनातनं ।
अनादिमध्यनिधनं निर्द्वन्द्वं कर्तृ शाश्वतं । कूटस्थञ्चैव नित्यञ्च यद्वदन्ति मनीषिणः ।
यतः सर्व्वाः प्रवर्त्तन्ते सर्गप्रलयविक्रियाः । यच्च शंसन्ति शास्त्रेषु वदन्ति परमर्षयः । ११२००
सर्व्वे विप्राश्च देवाश्च तथा शमविदो जनाः । ब्रह्मण्यं परमं देवमनन्तं परमच्युतं ।
प्रार्थयन्तश्च तं विप्रा वदन्ति गुणबुद्धयः । सम्यग्युक्तास्तथा योगाः सांख्याश्चामितदर्शनाः ।
अमूर्त्तस्तस्य कौन्तेय सांख्यं मूर्त्तिरिति श्रुतिः । अभिज्ञानानि तस्याहुर्म्मतं हि भरतर्षभ ।
द्विविधानीह भूतानि पृथिव्यां पृथिवीपते । जङ्गमागमसंज्ञानि जङ्गमन्तु विशिष्यते ।
ज्ञानं महद्यद्धि महत्सु राजन् वेदेषु सांख्येषु तथैव योगे । यच्चापि दृष्टं द्विविधं पुराणे सांख्यागतं तन्निखिलं नरेन्द्र । ११२०५
यच्चेतिहासेषु महत्सु दृष्टं यच्चार्थशास्त्रे नृप शिष्टजुष्टे । ज्ञानञ्च योगे यदिहास्ति किञ्चित् सांख्यागतं तच्च महन्महात्मन् ।
शमश्च दृष्टः परमं बलञ्च ज्ञानञ्च सूक्ष्मञ्च यथावदुक्तं । तपांसि सूक्ष्माणि सुखानि चैव सांख्ये यथावद्विहितानि राजन् ।
विपर्य्यये तस्य हि पार्थ देवान् गच्छन्ति सांख्याः सततं सुखेन । तांश्चानुसञ्चार्य्य ततः कृतार्थाः पतन्ति विप्रेषु यतेषु भूयः ।
हित्वा च देहं प्रविशन्ति देवं दिवौकसो द्यामिव पार्थ सांख्याः । अतोऽधिकं तेऽभिरता महार्हे सांख्ये द्विजाः पार्थिव शिष्टजुष्टे ।
तेषां न तिर्य्यग्गमनं हि दृष्टं नार्व्वाग्गतिः पापकृताधिवासः । न वा प्रधाना अपि ते द्विजातयो ये ज्ञानमेकं नृपतेऽनुरक्ताः । ११२१०
साङ्ख्यं विशालं परमं पुराणं महार्णवं विमलमुदारकान्तं । कृत्स्नञ्च सांख्यं नृपते महात्मा नारायणो धारयतेऽप्रमेयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतन्मयोक्तं नरदेव तत्त्वं नारायणो विश्वमिदं पुराणं । स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूयः ।
संहृत्य सर्व्वं निजदेहसंस्थं कृत्वा सुशेते जगदन्तरात्मा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि सांख्यकथने त्र्यधिकत्रिशततोऽध्यायः ॥ ३०३ ॥
॥ युधिष्ठिर उवाच ॥ किन्तदक्षरमित्युक्तं यस्मान्नावर्त्तते पुनः । किञ्च तत् क्षरमित्युक्तं यस्मादावर्त्तते पुनः ।
अक्षरक्षरयोर्व्यक्तिं पृच्छाम्यरिनिसूदन । उपलब्धुं महाबाहो तत्त्वेन कुरुनन्दन ।
त्वं हि ज्ञाननिधिर्व्विप्रैरुच्यसे वेदपारगैः । ऋषिभिश्च महाभागैर्यतिभिश्च महात्मभिः ।
शेषमल्पं दिनानान्ते दक्षिणायनभास्करे । आवृत्ते भगवत्यर्के गन्ताऽसि परमां गतिं ।
त्वयि प्रतिगते श्रेयः कुतः श्रोष्यामहे वयं । कुरुवंशप्रदीपस्त्वं ज्ञानदीपेन दीप्यसे ।
तदेतच्छ्रोतुमिच्छामि त्वत्तः कुरुकुलोद्वह । न तृप्यामीह राजेन्द्र शृण्वन्नमृतमीदृशं ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनं । वशिष्ठस्य च संवादं करालजनकस्य च ।
वशिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिं । पप्रच्छ जनको राजा ज्ञानं नैःश्रेयसं परं ।
परमध्यात्मकुशलमध्यात्मगतिनिश्चयं । मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ।
स्वक्षरं प्रश्रितं वाक्यं मधुरञ्चाप्यनुल्वणं । पप्रच्छर्षिवरं राजा करालजनकः पुरा ।
भगवन् श्रोतुमिच्छामि परं ब्रह्म सनातनं । यस्मान्न पुनरावृत्तिमाप्नुवन्ति मनीषिणः ।
यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् । यच्चाक्षरमिति प्रोक्तं शिवं क्षेममनामयं ।
॥ वशिष्ठ उवाच ॥ श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् । यन्न क्षरति पूर्व्वेण यावत्कालेन वाऽप्यथ ।
युगं द्वादशसाहस्रं कल्पं विद्धि चतुर्युगं । दशकल्पशतावृत्तमहस्तद्ब्राह्ममुच्यते ।
रात्रिश्चैतावती राजन् यस्यान्ते प्रतिबुध्यते । सृजत्यनन्तकर्म्माणं महान्तं भूतमग्रजं ।
मूर्त्तिमन्तममूर्त्तात्मा विश्वं शम्भुः स्वयम्भुवः । अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययं ।
सर्व्वतः पाणिपादान्तं सर्व्वतोऽक्षिशिरोमुखं । सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ।
हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः । महानिति च योगेषु विरिञ्चिरिति चाप्यजः ।
सांख्ये च पठ्यते शास्त्रे नामभिर्व्बहुधात्मकः । विचित्ररूपो विश्वात्मा एकोऽक्षर इति स्मृतः ।
वृतं नैकात्मकं येन कृतं त्रैलोक्यमात्मना । तथैव बहुरूपत्वाद्विश्वरूप इति श्रुतः ।
एष वै विक्रियापन्नः सृजत्यात्मानमात्मना । अहङ्कारं महातेजाः प्रजापतिमहङ्कृतं ।
अव्यक्ताद्व्यक्तमापन्नं विद्यासर्गं वदन्ति तं । महान्तञ्चाप्यहङ्कारमविद्यासर्गमेव च ।
अविधिश्च विधिश्चैव समुत्पन्नौ तथैकतः । विद्याविद्येति विख्याते श्रुतिशास्त्रार्थचिन्तकैः ।
भूतसर्गमहङ्कारात्तृतीयं विद्धि पार्थिव । अहङ्कारेषु सर्व्वेषु चतुर्थं विद्धि वै कृतं ।
वायुर्ज्योतिरथाकाशमापोऽथ पृथिवी तथा । शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
एवं युगपदुत्पन्नं दशवर्गमसंशयं । पञ्चमं विद्धि राजेन्द्र भौतिकं सर्गमर्थवत् ।
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणमेव च पञ्चमं । वाक् च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बुद्धीन्द्रियाणि चैतानि तथा कर्म्मेन्द्रियाणि च । सम्भूतानीह युगपन्मनसा सह पार्थिव ।
एषा तत्त्वचतुर्विंशी सर्व्वाकृतिषु वर्त्तते । यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ।
एतद्देहं समानाख्यं त्रैलोक्ये सर्व्वदेहिषु । वेदितव्यं नरश्रेष्ठ सदेवनरदानवे ।
सयक्षभूतगन्धर्व्वे सकिन्नरमहोरगे । सचारणपिशाचे वै सदेवर्षिनिशाचरे ।
सदंशकीटमशके सपूतिकृमिमूषिके । शुनि श्वपाके चैणेये सचाण्डाले सपुक्कसे । ११२४५
हस्त्यश्वखरशार्दूले सवृके गवि चैव ह । यच्च मूर्त्तिमयं किञ्चित् सर्व्वत्रैतन्निदर्शनं ।
जले भुवि तथाकाशे नान्यत्रेति विनिश्चयः । स्थानं देहवतामासीदित्येवमनुशुश्रुम ।
कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञितं । अहन्यहनि भूतात्मा ततः क्षर इति स्मृतः ।
एतदक्षरमित्युक्तं क्षरतीदं तथा जगत् । जगन्मोहात्मकं प्राहुरव्यक्तं व्यक्तसंज्ञकं ।
महांश्चैवाग्रजो नित्यमेतत्क्षरनिदर्शनं । कथितन्ते महाराज यन्मां त्वं परिपृच्छसि । ११२५०
पञ्चविंशतिमो विष्णुर्निस्तत्त्वस्तत्त्वसंज्ञितः । तत्त्वसंश्रयणादेतत् तत्त्वमाहुर्म्मनीषिणः ।
यन्मर्त्यमसृजद्व्यक्तं तत्तन्मूर्त्त्यधितिष्ठति । चतुर्विंशतिमोऽव्यक्तो ह्यमूर्त्तः पञ्चविंशकः ।
स एव हृदि सर्व्वासु मूर्त्तिष्वातिष्ठते त्मवान् । केवलश्चेतनो नित्यः सर्व्वमूर्त्तिरमूर्त्तिमान् ।
सर्गप्रलयधर्म्मिण्या स सर्गप्रलयात्मकः । गोचरे वर्त्तते नित्यं निर्गुणं गुणसंज्ञितं ।
एवमेष महानात्मा सर्गप्रलयकोविदः । विकुर्व्वाणः प्रकृतिमानभिमन्यत्यबुद्धिमान् । ११२५५
तमःसत्त्वरजोयुक्तस्तासु तास्विह योनिषु । लीयते प्रतिबुद्धत्वादबुद्धजनसेवनात् ।
सहवाससविनाशित्वान्नान्योऽहमिति मन्यते । योऽहं सोऽहमिति ह्युक्तो गुणानेवानुवर्त्तते ।
तमसा तामसान् भावान् विविधान् प्रतिपद्यते । रजसा राजसांश्चैव सात्त्विकान् सत्त्वसंश्रयात् ।
शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु । सर्व्वाण्येतानि रूपाणि यानीह प्राकृतानि वै ।
तामसा निरयं यान्ति राजसा मानुषानथ । सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः । ११२६०
निष्कैवल्येन पापेन तिर्य्यग्योनिमवाप्नुयात् । पुण्यपापेन मानुष्यं पुण्येनैकेन देवताः ।
एवमव्यक्तविषयं क्षरमाहुर्म्मनीषिणः । पञ्चविंशतिमो योऽयं ज्ञानादेव प्रवर्त्तते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे चतुरधिकत्रिशततोऽध्यायः ॥ ३०४ ॥
॥ वशिष्ठ उवाच ॥ एवमप्रतिबुद्धत्वादबुद्धमनुवर्त्तते । देहाद्देहसहस्राणि तथा समभिपद्यते ।
तिर्य्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि । उपपद्यति संयोगाद्गुणैः सह गुणक्षयात् ।
मानुषत्वाद्दिवं यान्ति दिवो मानुष्यमेव च । मानुष्यान्निरयस्थानमानन्त्यं प्रतिपद्यते । ११२६५
कोषकारो यथात्मानं कीटः समवरुन्धति । सूत्रतन्तुगुणैर्नित्यं तथाऽयमगुणो गुणैः ।
द्वन्द्वमेति च निर्द्वन्द्वस्तासु तास्विह योनिषु । शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे ।
जलोदरे तृषारोगज्वरगण्डे विषूचिके । श्वित्रे कुष्ठेऽग्निदग्धे च सिध्मापस्मारयोरपि ।
यानि चान्यानि द्वन्द्वानि प्राकृतानि शरीरिषु । उत्पद्यन्ते विचित्राणि तान्येषोऽप्यभिमन्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तिर्य्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि । अभिमन्यत्यभीमानात्तथैव सुकृतान्यपि । ११२७०
शुक्लवासास्तुर्व्वासाः शायी नित्यमधस्तथा । मण्डूकशायी च तथा वीरासनगतस्तथा ।
चीरधारणमाकाशे शयनं स्थानमेव च । इष्टकाप्रस्तरे चैव कण्टकप्रस्तरे तथा ।
भस्मप्रस्तरशायी च भूमिशय्यातलेषु च । वीरस्थानाम्बुपङ्के च शयनं फलकेषु च ।
विविधासु च शय्यासु फलगृध्यान्वितस्तथा । मुञ्जमेखलनग्नत्वं क्षौमकृष्णाजिनानि च ।
शाणीवालपरीधानो व्याघ्रचर्म्मपरिच्छदः । सिंहचर्म्मपरीधानः पट्टवासास्तथैव च । ११२७५
फलकं परिधानश्च तथा कण्टकवस्त्रधृक् । कीटकावसनश्चैव चीरवासास्तथैव च ।
वस्त्राणि चान्यानि बहून्यभिमन्यत्यबुद्धिमान् । भोजनानि विचित्राणि रत्नानि विविधानि च ।
एकरात्रान्तराशित्वमेककालिकभोजनं । चतुर्थाष्टमकालश्च षष्ठकालिक एव च ।
षड्रात्रभोजनश्चैव तथैवाष्टाहभोजनः । सप्तरात्रदशाहारो द्वादशाहिकभोजनः ।
मासोपवासी मूलाशी फलाहारस्तथैव च । वायुभक्षोऽम्बुपिण्याकदधिगोमयभोजनः । ११२८०
गोमूत्रभोजनश्चैव शाकपुष्पाद एव च । शैवालभोजनश्चैव तथाचामेन वर्त्तयन् ।
वर्त्तयन् शीर्णपर्णैश्च प्रकीर्णफलभोजनः । विविधानि च कृच्छ्राणि सेवते सिद्धिकाङ्क्षया ।
चान्द्रायणानि विधिवल्लिङ्गानि विविधानि च । चातुराश्रम्यपन्थानमाश्रयत्यपथानपि ।
उपाश्रमानप्यपरान् पाषण्डान् विविधानपि । विविक्ताश्च शिलाच्छायास्तथा प्रस्रवणानि च ।
पुलिनानि विविक्तानि विविक्तानि वनानि च । देवस्थानानि पुण्यानि विविक्तानि सरांसि च । ११२८५
विविक्ताश्चापि शैलानां गुहा गृहनिभोपमाः । विविक्तानि च जप्यानि व्रतानि विविधानि च ।
नियमान् विविधांश्चापि विविधानि तपांसि च । यज्ञांश्च विविधाकारान् विधींश्च विविधांस्तथा ।
वणिक्पथं द्विजं क्षत्त्रं वैश्यशूद्रांस्तथैव च । दानञ्च विविधाकारं दीनान्धकृपणादिषु ।
अभिमन्यत्यसंबोधात्तथैव त्रिविधान् गुणान् । सत्त्वं रजस्तमश्चैव धर्म्मार्थौ काम एव च ।
प्रकृत्यात्मानमेवात्मा एवं प्रविभजत्युत । स्वधाकारवषट्कारौ स्वाहाकारनमस्क्रियाः । ११२९०
याजनाध्यापनं दानं तथैवाहुः प्रतिग्रहं । यजनाध्ययने चैव यच्चान्यदपि किञ्चन ।
जन्ममृत्युविवादे च तथा विशसनेऽपि च । शुभाशुभमयं सर्व्वमेतदाहुः क्रियापथं ।
प्रकृतिः कुरुते देवी भवं प्रलयमेव च । दिवसान्ते गुणानेतानभ्येत्यैकोऽवतिष्ठते ।
रश्मिजालमिवादित्यस्तत्तत्काले नियच्छति । एवमेषोऽसकृत् पूर्व्वं क्रीडार्थमभिमन्यते ।
आत्मरूपगुणानेतान् विविधान् हृदयप्रियान् । एवमेतां विकुर्व्वाणः सर्गप्रलयधर्म्मिणीं । ११२९५
क्रियां क्रियापथे रक्तस्त्रिगुणां त्रिगुणाधिपः । क्रियां क्रियापथोपेतस्तथा तदितिमन्यते ।
प्रकृत्या सर्व्वमेवेदं जगदन्धीकृतं विभो । रजसा तमसा चैव व्याप्तं सर्व्वमनेकधा ।
एवं द्वन्द्वान्यथैतानि समावर्त्तन्ति नित्यशः । ममैवैतानि जायन्ते धावन्ते तानिमानिति ।
निस्तर्त्तव्यान्यथैतानि सर्व्वाणीति नराधिप । मन्यते यं ह्यबुद्धत्वात्तथैव सुकृतान्यपि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भोक्तव्यानि मयैतानि देवलोकगतेन वै । इहैव चैनं भोक्ष्यामि शुभाशुभफलोदयं । ११९००
सुखमेव तु कर्त्तव्यं सकृत् कृत्वा सुखं मम । यावदन्तञ्च मे सौख्यं जात्यां जात्यां भविष्यति ।
भविष्यति च मे दुःखं कृतेनेहाप्यनन्तकं । महद्दुःखं हि मानुष्यं निरये चापि मज्जनं ।
निरयाच्चापि मानुष्यं कालेनैष्याम्यहं पुनः । मनुष्यत्वाच्च देवत्वं देवत्वात् पौरुषं पुनः ।
मनुष्यत्वाच्च निरयं पर्य्यायेणोपगच्छति । य एवं वेत्ति नित्यं वै निरात्मात्मगुणैर्वृतः ।
तेन देवमनुष्येषु निरये चोपपद्यते । ममत्वेनावृतो नित्यं तत्रैव परिवर्त्तते । ११९०५
सर्गकोटिसहस्राणि मरणान्तासु मूर्त्तिषु । य एवं कुरुते कर्म्म शुभाशुभफलात्मकं ।
स एवं फलमाप्नोति त्रिषु लोकेषु मूर्त्तिमान् । प्रकृतिः कुरुते कर्म्म शुभाशुभफलात्मकं ।
प्रकृतिश्च तदश्नाति त्रिषु लोकेषु कामगा । तिर्य्यग्योनिमनुष्यत्वे देवलोके तथैव च ।
त्रीणि स्थानानि चैतानि जानीयात् प्राकृतानि ह । अलिङ्गां प्रकृतिं त्वाहुर्लिङ्गैरनुमिमीमहे ।
तथैव पौरुषं लिङ्गमनुमानाद्धि मन्यते । स लिङ्गान्तरमासाद्य प्राकृतं लिङ्गमव्रणं । ११९१०
व्रणद्वाराण्यधिष्ठाय कर्म्मण्यात्मनि मन्यते । श्रोत्रादीनि तु सर्व्वाणि पञ्चकर्म्मेन्द्रियाण्यथ ।
रागादीनि प्रवर्त्तन्ते गुणेष्विह गुणैः सह । अहमेतानि वै सर्व्वमय्येतानीन्द्रियाणि ह ।
निरिन्द्रियो हि मन्येत व्रणवानस्मि निर्व्रणः । अलिङ्गो लिङ्गमात्मानमकालः कालमात्मनः ।
असत्त्वं सत्त्वमात्मानमतत्त्वं तत्त्वमात्मनः । अमृत्युर्मृत्युमात्मानमचरश्चरमात्मनः ।
अक्षेत्रः क्षेत्रमात्मानमसर्गः सर्गमात्मनः । अतपास्तप आत्मानमगतिर्गतिमात्मनः । ११९१५
अभवो भवमात्मानमभयो भयमात्मनः । अक्षरः क्षरमात्मानमबुद्धिस्त्वभिमन्यते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे पञ्चाधिकत्रिशततोऽध्यायः ॥ २०५ ॥
॥ वशिष्ठ उवाच ॥ एवमप्रतिबुद्धत्वादबुद्धजनसेवनात् । सर्गकोटिसहस्राणि पतनान्तानि गच्छति ।
धाम्ना धामसहस्राणि मरणान्तानि गच्छति । तिर्य्यग्योनिमनुष्यत्वे देवलोके तथैव च ।
चन्द्रमा इव भूतानां पुनस्तत्र सहस्रशः । नीयते प्रतिबुद्धत्वादेवमेष ह्यबुद्धिमान् ।
कला पञ्चदशी योनिस्तद्धाम प्रतिबुध्यते । नित्यमेतद्धि जानीहि सोमं वै षोडशीं कलां । ११९२०
कलायां जायतेऽजस्रं पुनः पुनरबुद्धिमान् । धाम तस्योपयुञ्जन्ति भूय एवोपजायते ।
षोडशी तु कला सूक्ष्मा स सोम उपधार्य्यतां । न त्वुपयुज्यते देवैर्देवानुपयुनक्ति सा ।
एतामपक्षयित्वा हि जायते नृपसत्तम । सा ह्यस्य प्रकृतिर्दृष्टा तत्क्षयान्मोक्ष उच्यते ।
तदेव षोडशकलं देहमव्यक्तसंज्ञकं । ममाऽयमिति मन्वानस्तत्रैव परिवर्त्तते ।
पञ्चविंशो महानात्मा तस्यैवाप्रतिरोधनात् । विमलस्य विशुद्धस्य शुद्धाशुद्धनिषेवणात् । ११९२५
अशुद्ध एव शुद्धात्मा तादृग्भवति पार्थिव । अबुद्धसेवनाच्चापि बुद्धोऽप्यबुद्धतां व्रजेत् ।
तथैवाप्रतिबुद्धोऽपि विज्ञेयो नृपसत्तम । प्रकृतेस्त्रिगुणायास्तु सेवनात्त्रिगुणो भवेत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे षडधिकत्रिशततोऽध्यायः ॥ २०६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2|Equipment Heritage Foundation, Jalgaon

॥ जनक उवाच ॥ अचरचरयोरेष दयो: सम्बन्ध दृश्यते। स्त्रीपुंसोर्व्वाऽपि भगवान् सम्बन्धस्तद्वदुच्यते।
ऋते तु पुरुषं नेह स्त्री गर्भं धारयत्युत। ऋते स्त्रियं न पुरुषो रूपं निर्व्वर्त्तयेत्तथा।
अन्योन्यस्याभिसम्बन्धादन्योन्यगुणसंश्रयात्। रूपं निवर्त्तयत्येतदेवं सर्व्वासु योनिषु। ११२३०
रत्यर्थमभिसम्बन्धादन्योन्यगुणसंश्रयात्। ऋतौ निवर्त्त्यते रूपं तद्वक्ष्यामि निदर्शनं।
ये गुणाः पुरुषस्येह ये च मातृगुणास्तथा। अस्थिस्नायुश्च मज्जा च जानीमः पितृतो द्विज।
त्वङ्मांसशोणितञ्चेति मातृजान्यपि शुश्रुम। एवमेतद्द्विजश्रेष्ठ वेदे शास्त्रे च पठ्यते।
प्रमाणं यत् स्ववेदोक्तं शास्त्रोक्तं यच्च पठ्यते। वेदशास्त्रद्वयञ्चैव प्रमाणं तत् सनातनं।
अन्योन्यगुणसंरोधादन्योन्यगुणसंश्रयात्। एवमेवाभिसम्बद्धौ नित्यं प्रकृतिपूरुषौ। ११२३५
पश्यामि भगवंस्तस्मान्मोक्षधर्म्मो न विद्यते। अथ वानन्तरकृतं किञ्चिदेव निदर्शनं।
तन्ममाचक्ष्व तत्त्वेन प्रत्यक्षो ह्यसि सर्व्वदा। मोक्षकामा वयञ्चापि काङ्क्षामो यदनामयं।
अदेहमजरं नित्यमतीन्द्रियमनीश्वरं।
॥ वशिष्ठ उवाच ॥ यदेतदुक्तं भवता वेदशास्त्रनिदर्शनं. एवमेतद्यथा चैतन्निगृह्णाति तथा भवान्।
धार्य्यते हि त्वया ग्रन्थ उभयोर्व्वेदशास्त्रयोः। न च ग्रन्थस्य तत्त्वज्ञो यथाच त्वं नरेश्वर। ११२४०
यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्परः। न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा।
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः। यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा।
ग्रन्थस्यार्थस्य पृष्टः सन् तादृशो वक्तुमर्हति। यथा तत्त्वाभिगमनादर्थं तस्य स विन्दति।
न यः संसत्सु कथयेद्ग्रन्थार्थं स्थूलबुद्धिमान्। स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात्।
निर्णयञ्चापि छिद्रात्मा न तं वक्ष्यति तत्त्वतः। सोपहासात्मतामेति यस्माच्चैवात्मवानपि। ११२४५
तस्मात्त्वं शृणु राजेन्द्र यथैतदनुदृश्यते। याथातथ्येन सांख्येषु योगेषु च महात्मसु।
यदेव योगाः पश्यन्ति सांख्यैस्तदनुगम्यते। एकं सांख्यञ्च योगञ्च यः पश्यति स बुद्धिमान्।
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जा च स्नायु च। एतदैन्द्रियकं तात यद्भवानिदमाह मां।
द्रव्याद्द्रव्यस्य निर्वृत्तिरिन्द्रियादिन्द्रियं तथा। देहाद्देहमवाप्नोति वीजाद्वीजं तथैव च।
निरिन्द्रियस्यावीजस्य निर्द्रव्यस्याप्यदेहिनः। कथं गुणा भविष्यन्ति निर्गुणत्वान्महात्मनः। ११२५०
गुणा गुणेषु जायन्ते तत्रैव निविशन्ति च। एवं गुणाः प्रकृतितो जायन्ते निविशन्ति च।
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जाऽस्थि स्नायु च। अष्टौ तान्यथ शुक्रेण जानीहि प्राकृतानि वै।
पुमांश्चैवापुमांश्चैव त्रैलिङ्ग्यं प्राकृतं स्मृतं। न वाऽपुमान् पुमांश्चैव स लिङ्गीत्यभिधीयते।
अलिङ्गात् प्रकृतिर्लिङ्गैरुपालभ्यति सात्मजैः। यथा पुष्पफलैर्नित्यमृतवो मूर्त्तयस्तथा।
एवमप्यनुमानेन ह्यलिङ्गमुपलभ्यते। पञ्चविंशतिमस्तात लिङ्गेषु नियतात्मकः। ११२५५
अनादिनिधनोऽनन्तः सर्व्वदर्शी निरामयः। केवलन्त्वभिमानित्वाद्गुणेषु गुण उच्यते।
गुणा गुणवतः सन्ति निर्गुणस्य कुतो गुणाः। तस्मादेवं विजानन्ति ये गुणा गुणदर्शिनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदा त्वेष गुणानेतान् प्राकृतानभिमन्यते । तदा स गुणवांश्चैव तं परमेवानुपश्यति ।
यत्तद्बुद्धेः परं प्राहुः सांख्ययोगाश्च सर्व्वशः । बुध्यमानं महाप्राज्ञमबुद्धपरिवर्ज्जनात् ।
अप्रबुद्धमथाव्यक्तमगुणं प्राहुरीश्वरं । निर्गुणञ्चेश्वरं नित्यमधिष्ठातारमेव च । ११२६०
प्रकृतेश्च गुणानाञ्च पञ्चविंशतिकं बुधाः । सांख्ययोगे च कुशला बुध्यन्ते परमैषिणः ।
यदा प्रबुध्य ह्यव्यक्तमवस्थाजन्मभीरवः । बुध्यमानं प्रबुध्यन्ति गमयन्ति समं तदा ।
एतन्निदर्शनं सम्यगसम्यगनिदर्शनं । बुध्यमानाप्रबुद्धाभ्यां पृथक् पृथगरिन्दम ।
परस्परेणैतदुक्तं क्षराक्षरनिदर्शनं । एकत्वमक्षरं प्राहुर्नानात्वं क्षरमुच्यते ।
पञ्चविंशतिनिष्ठोऽयं यदा सम्यक् प्रवर्त्तते । एकत्वं दर्शनञ्चास्य नानात्वञ्चाप्यदर्शनं । ११२६५
तत्त्वनिस्तत्त्वयोरेतत् पृथगेव निदर्शनं । पञ्चविंशतिसर्गन्तु तत्त्वमाहुर्मनीषिणः ।
निस्तत्त्वं पञ्चविंशस्य परमाहुर्निदर्शनं । सर्गस्य वर्गमाचारं तत्त्वं तत्त्वात् सनातनं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे सप्ताधिकत्रिशततोऽध्यायः ॥ ३०७ ॥
॥ जनक उवाच ॥ नानात्वैकत्वमित्युक्तं त्वयैतदृषिसत्तम । पश्याम्येतद्धि सन्दिग्धमेतयोर्वै निदर्शनं ।
तथा बुद्धप्रबुद्धाभ्यां बुध्यमानस्य चानघ । स्थूलबुद्ध्या न पश्यामि तत्त्वमेतन्न संशयः ।
अक्षरक्षरयोरुक्तं त्वया यदपि कारणं । तदप्यस्थिरबुद्धित्वात् प्रनष्टमिव मेऽनघ । ११२७०
तदेतच्छ्रोतुमिच्छामि नानात्वैकत्वदर्शनं । बुद्धञ्चाप्रतिबुद्धञ्च बुध्यमानञ्च तत्त्वतः ।
विद्याविद्ये च भगवन्नक्षरं क्षरमेव च । सांख्यं योगञ्च कार्त्स्न्येन पृथक् चैवापृथक् च ह ।
॥ वशिष्ठ उवाच ॥ हन्त ते सम्प्रवक्ष्यामि यदेतदनुपृच्छसि । योगकृत्यं महाराज पृथगेव शृणुष्व मे ।
योगकृत्यन्तु योगानां ध्यानमेव परं बलं । तच्चापि द्विविधं ध्यानमाहुर्व्विद्याविदो जनाः ।
एकाग्रता च मनसः प्राणायामस्तथैव च । प्राणायामस्तु सगुणो निर्गुणो मनसस्तथा । ११२७५
मूत्रोत्सर्गपुरीषे च भोजने च नराधिप । त्रिकालं नाभियुञ्जीत शेषं युञ्जीत तत्परः ।
इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्त्य मनसा शुचिः । दशद्वादशभिर्व्वाऽपि चतुर्व्विंशात् परन्ततः ।
सञ्चोदनाभिर्म्मतिमानात्मानञ्चोदयेदथ । तिष्ठन्तमजरं तन्तु यत्तदुक्तं मनीषिभिः ।
तैश्चात्मा सततं ज्ञेय इत्येवमनुशुश्रुम । द्रव्यं ह्यहीनमनसो नान्यथेति विनिश्चयः ।
विमुक्तः सर्व्वसङ्गेभ्यो लघ्वाहारो जितेन्द्रियः । पूर्व्वरात्रेऽपररात्रे धारयीत मनोऽत्मनि । ११२८०
स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर । मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ।
स्थाणुवच्चाप्यकम्पः स्याद्गिरिवच्चापि निश्चलः । बुधा विधिविधानज्ञास्तदा युक्तं प्रचक्षते ।
न शृणोति न चाघ्राति न रस्यति न पश्यति । न च स्पर्शं विजानाति न सङ्कल्पयते मनः ।
न चाभिमन्यते किञ्चिन्न च बुध्यति काष्ठवत् । तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ।
निर्व्वाते हि यथा दीपन्दीप्यमानस्तद्वत् प्रकाशते । निर्लिङ्गोऽविचलश्चोर्द्ध्वं न तिर्य्यग्गतिमाप्नुयात् । ११२८५
तदा तमनुपश्येत यस्मिन् दृष्टे न कथ्यते । हृदयस्थोऽन्तरात्मेति ज्ञेयोज्ञस्तात मद्विधैः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विधूम इव सप्तार्चिरादित्य इव रश्मिमान्। वैद्युतोऽग्निरिवाकाशे दृश्यतेऽत्मा तथात्मनि।
ये पश्यन्ति महात्मानो धृतिमन्तो मनीषिणः। ब्राह्मणा ब्रह्मयोनिस्था ह्ययोनिममृतात्मकं।
तदेवाहुरणुभ्योऽणु तन्महद्भ्यो महत्तरं। तत्तत्त्वं सर्व्वभूतेषु ध्रुवं तिष्ठन्न दृश्यते।
बुद्धिद्रव्येण दृश्येत मनोदीपेन लोककृत्। महतस्तमसस्तात पारे तिष्ठन्न तामसः। ११३९०
स तमोनुद इत्युक्तः सर्व्वज्ञैर्व्वेदपारगैः। विमलो वितमस्कश्च निर्लिङ्गो लिङ्गसंज्ञितः।
योग एष हि योगानां किमन्यद्योगलक्षणं। एवं पश्यं प्रपश्यन्ति आत्मानमजरं परं।
योगदर्शनमेतावदुक्तन्ते तत्त्वतो मया। सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानदर्शनं।
अव्यक्तमाहुः प्रकृतिं परं प्रकृतिवादिनः। तस्मान्महत् समुत्पन्नं द्वितीयं राजसत्तम।
अहङ्कारस्तु महतस्तृतीयमिति नः श्रुतं। पञ्चभूतान्यहङ्कारादाहुः संख्यात्मदर्शिनः। ११३९५
एताः प्रकृतयश्चाष्टौ विकाराश्चापि षोडश। पञ्च चैव विशेषा वै तथा पञ्चेन्द्रियाणि च।
एतावदेव तत्त्वानां सांख्यमाहुर्म्मनीषिणः। सांख्ये विधिविधानज्ञा नित्यं सांख्यपथे रताः।
यस्माद्यदभिजायेत तत्तत्रैव प्रलीयते। लीयन्ते प्रतिलोमानि सृज्यन्ते चान्तरात्मना।
अनुलोमेन जायन्ते लीयन्ते प्रतिलोमतः। गुणा गुणेषु सततं सागरस्योर्म्मयो यथा।
सर्गप्रलय एतावान् प्रकृतेर्नृपसत्तम। एकत्वं प्रलये चास्य बहुत्वञ्च यदाऽसृजत्। ११४००
एवमेव च राजेन्द्र विज्ञेयं ज्ञानकोविदैः। अधिष्ठातारमव्यक्तमस्याप्येतन्निदर्शनं।
एकत्वञ्च बहुत्वञ्च प्रकृतेरर्थतत्त्ववान्। एकत्वं प्रलये चास्य बहुत्वञ्च प्रवर्त्तनात्।
बहुधात्मा प्रकुर्व्वीत प्रकृतिं प्रसवात्मिकां। तच्च क्षेत्रं महानात्मा पञ्चविंशोऽधितिष्ठति।
अधिष्ठातेति राजेन्द्र प्रोच्यते यतिसत्तमैः। अधिष्ठानादधिष्ठाता क्षेत्राणामिति नः श्रुतं।
क्षेत्रं जानाति चाव्यक्तं क्षेत्रज्ञ इति चोच्यते। अव्यक्तिके पुरे शेते पुरुषश्चेति कथ्यते। ११४०५
अन्यदेव च क्षेत्रं स्यादन्यः क्षेत्रज्ञ उच्यते। क्षेत्रमव्यक्तमित्युक्तं ज्ञातारं पञ्चविंशकं।
अन्यदेव च ज्ञानं स्यादन्यज्ज्ञेयं तदुच्यते। ज्ञानमव्यक्तमित्युक्तं ज्ञेयो वै पञ्चविंशकः।
अव्यक्तं क्षेत्रमित्युक्तं तथा सत्त्वं तथेश्वरः। अनीश्वरमतत्त्वञ्च तत्त्वं तत्पञ्चविंशकं।
सांख्यदर्शनमेतावत् परिसंख्यानुदर्शनं। सांख्याः प्रकुर्व्वते चैव प्रकृतिञ्च प्रचक्षते।
तत्त्वानि च चतुर्व्विंशत् परिसंख्याय तत्त्वतः। सांख्याः सह प्रकृत्या तु निस्तत्त्वः पञ्चविंशकः। ११४१०
पञ्चविंशोऽप्रकृत्यात्मा बुध्यमान इति स्मृतः। यदा तु बुध्यतेऽत्मानं तदा भवति केवलः।
सम्यग्दर्शनमेतावद्भाषितं तव तत्त्वतः। एवमेतद्विजानन्तः साम्यतां प्रति यान्युत।
सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा। गुणतत्त्वान्यथैतानि निर्गुणोऽन्यस्तथा भवेत्।
न त्वेवं वर्त्तमानानामावृत्तिर्विद्यते पुनः। विद्यतेऽक्षरभावत्वादपरं परमव्ययं।
पश्येरन्नेकमतयो न सम्यक् तेषु दर्शनं। ते व्यक्तं प्रतिपद्यन्ते पुनः पुनररिन्दम। ११४१५
सर्व्वमेतद्विजानन्तो न सर्व्वस्य प्रबोधनात्। व्यक्तीभूता भविष्यन्ति व्यक्तस्य वशवर्त्तिनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्व्वमव्यक्तमित्युक्तमसर्व्वः पञ्चविंशकः । य एनमभिजानन्ति न भयं तेषु वर्त्तते ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे अष्टाधिकत्रिशतोऽध्यायः ॥ ३०८ ॥

॥ वशिष्ठ उवाच ॥ सांख्यदर्शनमेतावदुक्तं ते नृपसत्तम । विद्याविद्ये त्विदानीं मे त्वं निबोधानुपूर्व्वशः ।
अविद्यामाहुरव्यक्तं सर्गप्रलयधर्म्मि वै । सर्गप्रलयनिर्म्मुक्तां विद्यां वै पञ्चविंशकः ।
परस्परस्य विद्या वै तन्निबोधानुपूर्व्वशः । यथोक्तमृषिभिस्तात सांख्यस्याभिनिदर्शनं ।
कर्म्मेन्द्रियाणां सर्व्वेषां विद्या बुद्धीन्द्रियं स्मृतं । बुद्धीन्द्रियाणाञ्च तथा विशेषा इति नः श्रुतं ।
विशेषाणां मनस्तेषां विद्यामाहुर्म्मनीषिणः । मनसः पञ्चभूतानि विद्या इत्यभिचक्षते ।
अहङ्कारस्तु भूतानां पञ्चानां नात्र संशयः । अहङ्कारस्य च तथा बुद्धिर्विद्या नरेश्वर ।
विद्याप्रकृतिरव्यक्तं तत्त्वानां परमेश्वरी । विद्या ज्ञेया नरश्रेष्ठ विधिश्च परमः स्मृतः ।
अव्यक्तस्य परं प्राहुर्व्विद्या वै पञ्चविंशकं । सर्व्वस्य सर्व्वमित्युक्तं ज्ञेयं ज्ञानस्य पार्थिव ।
ज्ञानमव्यक्तमित्युक्तं ज्ञेयो वै पञ्चविंशकः । तथैव ज्ञानमव्यक्तं विज्ञाता पञ्चविंशकः ।
विद्याऽविद्यार्थतत्त्वेन मयोक्ता ते विशेषतः । अक्षरञ्च क्षरञ्चैव यदुक्तं तन्निबोध मे ।
उभावेवाक्षरावुक्तावुभावेतावनक्षरौ । कारणन्तु प्रवक्ष्यामि याथातथ्यन्तु ज्ञानतः ।
अनादिनिधनावेतौ उभावेवेश्वरौ मतौ । तत्त्वसंज्ञावुभावेतौ प्रोच्येते ज्ञानचिन्तकैः ।
सर्गप्रलयधर्म्मत्वादव्यक्तं प्राहुरक्षरं । तदेतद्गुणसर्गाय विकुर्व्वाणं पुनः पुनः ।
गुणानां महदादीनामुत्पत्तिश्च परस्परं । अधिष्ठानात् क्षेत्रमाहुरेतत्तत्पञ्चविंशकं ।
यदा तु गुणजालन्तदव्यक्तात्मनि संक्षिपेत् । तदा सह गुणैस्तैस्तु पञ्चविंशो विलीयते ।
गुणा गुणेषु लीयन्ते तदैका प्रकृतिर्भवेत् । क्षेत्रज्ञोऽपि यदा तात तत्क्षेत्रे संप्रलीयते ।
तदाक्षरत्वं प्रकृतिर्गच्छते गुणसंश्रिता । निर्गुणत्वञ्च वैदेह गुणेष्वप्रतिवर्त्तनात् ।
एवमेव च क्षेत्रज्ञः क्षेत्रज्ञानपरिक्षये । प्रकृत्या निर्गुणस्त्वेष इत्येवमनुशुश्रुम ।
क्षरो भवत्येष यदा तदा गुणवतीमथ । प्रकृतिन्त्वभिजानाति निर्गुणत्वं तथात्मनः ।
तदा विशुद्धो भवति प्रकृतेः परिवर्ज्जनात् । अन्योऽहमन्येयमिति यदा बुध्यति बुद्धिमान् ।
तदैष तत्त्वतामेति न चापि मिश्रितां व्रजेत् । प्रकृत्या चैव राजेन्द्र मिश्रो ह्यन्यश्च दृश्यते ।
यदा तु गुणजालन्तत्प्राकृतं वै जुगुप्सते । पश्यते च परं पश्यं तदा पश्यन्न संत्यजेत् ।
किं मया कृतमेतावद्योऽहं कालमिमं जनं । मत्स्यो जालं ह्यविज्ञानादनुवर्त्तितवानिह ।
अहमेव हि संमोहादन्यमन्यज्जनाज्जनं । मत्स्यो यथोदकज्ञानादनुवर्त्तितवानहं ।
मत्स्योऽन्यत्वं यथाऽज्ञानादुदकान्नाभिमन्यते । आत्मानं तद्वदज्ञानादन्यत्वञ्चैव वेद्म्यहं ।
ममास्तु धिगबुद्धस्य योऽहं मग्नमिमं पुनः । अनुवर्त्तितवान्मोहादन्यमन्यज्जनाज्जनं ।
अयमत्र भवेद्बन्धुरनेन सह मे क्षमं । साम्यमेकत्वमायातो यादृशस्तादृशस्त्वहं ।
तुल्यतामिह पश्यामि सदृशोऽहमनेन वै । अयं हि विमलो व्यक्तमहमीदृशकस्तया ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

योऽहमज्ञानसंमोहादज्ञया संप्रवृत्तवान्। ससङ्गयाहं निःसङ्गः स्थितः कालमिमं त्वहं।
अनयाऽहं वशीभूतः कालमेतन्न बुद्धवान्। उच्चमध्यमनीचानां तामहं कथमावसे।
समानयाऽनया चेह सहवासमहं कथं। गच्छाम्यबुद्धभावत्वादेषेदानीं स्थिरो भवे।
सहवासं न यास्यामि कालमेतद्धि वञ्चनात्। वञ्चितोऽस्म्यनया यद्धि निर्व्विकारो विकारया।
न चायमपराधोऽस्या ह्यपराधो ह्ययं मम। योऽहमत्राभवं सक्तः पराङ्मुखमुपस्थितः। ११४५०
ततोऽस्म्यरूपोरूपासु स्थितो मूर्त्तिष्वमूर्त्तिमान्। अमूर्त्तश्चापि मूर्त्तात्मा ममत्वेन प्रधर्षितः।
प्राकृतेन ममत्वेन तासु तास्विह योनिषु। निर्म्ममस्य ममत्वेन किं कृतं तासु तासु च।
योनीषु वर्त्तमानेन नष्टसंज्ञेन चेतसा। मम नात्राऽनया कार्य्यमहङ्कारकृता त्वया।
आत्मानं बहुधा कृत्वा येयं भूयो युनक्ति मां। इदानीमेष बुद्धोऽस्मि निर्म्ममो निरहङ्कृतः।
ममत्वमनया नित्यमहङ्कारकृतात्मकं। अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयं। ११४५५
अनेन साम्यं यास्यामि नानयाऽहमचेतया। क्षेमं मम सहानेन नैकत्वमनया सह।
एवं परमसम्बोधात् पञ्चविंशोऽनुबुद्धवान्। अक्षरत्वं नियच्छेत त्यक्त्वाक्षरमनामयं।
अव्यक्तं व्यक्तधर्म्माणं सगुणं निर्गुणन्तथा। निर्गुणं प्रथमं दृष्ट्वा तादृग्भवति मैथिल।
अक्षरक्षरयोरेतदुक्तं तव निदर्शनं। मयेह ज्ञानसम्पन्नं यथा श्रुतिनिदर्शनात्।
निःसन्दिग्धञ्च सूक्ष्मञ्च विबुद्धं विमलं यथा। प्रवक्ष्यामि तु ते भूयस्तन्निबोध यथाश्रुतं। ११४६०
सांख्ययोगौ मया प्रोक्तौ शास्त्रद्वयनिदर्शनात्। यदेव शास्त्रं सांख्योक्तं योगदर्शनमेव तत्।
प्रबोधनकरं ज्ञानं सांख्यानामवनीपते। विस्पष्टं प्रोच्यते तत्र शिष्याणां हितकाम्यया।
बृहच्चैवमिदं शास्त्रमित्याहुर्व्विदुषो जनाः। अस्मिंश्च शास्त्रे योगानां पुनर्व्वेदे पुरःसराः।
पञ्चविंशात्परं तत्त्वं पश्यते न नराधिप। सांख्यानान्तु परं तत्त्वं यथावदनुवर्णितं।
बुद्धमप्रतिबुद्धत्वाद्बुध्यमानञ्च तत्त्वतः। बुध्यमानञ्च बुद्धञ्च प्राहुर्योगनिदर्शनं। ११४६५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे नवाधिकत्रिशतोऽध्यायः ॥ ३०९ ॥
॥ वशिष्ठ उवाच ॥ अथ बुद्धमथाबुद्धमिमं गुणविधं शृणु। आत्मानं बहुधा कृत्वा तान्येव प्रविचक्षते।
एतदेवं विकुर्व्वाणो बुध्यमानो न बुध्यते। गुणान् धारयते ह्येष सृजत्याक्षिपते तदा।
अजस्रं त्विह क्रीडार्थं विकरोति जनाधिप। अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्यपि।
न त्वेव बुध्यते व्यक्तं सगुणं तात निर्गुणं। कदाचित्त्वेव खल्वेतदाहुरप्रतिबुद्धकं।
बुध्यते यदि वा व्यक्तमेतद्वै पञ्चविंशकं। बुध्यमानो भवत्येव सङ्गात्मक इति श्रुतिः। ११४७०
अनेनाप्रतिबुद्धेति वदन्त्यव्यक्तमच्युतं। अव्यक्तबोधनाच्चापि बुध्यमानं वदन्त्युत।
पञ्चविंशं महात्मानं न चासावपि बुध्यते। षड्विंशं विमलं बुद्धमप्रमेयं सनातनं।
सततं पञ्चविंशञ्च चतुर्व्विंशञ्च बुध्यते। दृश्यादृश्ये ह्यनुगतं स्वभावेन महाद्युते।
अव्यक्तमच तद्ब्रह्म बुध्यते तात केवलं। केवलं पञ्चविंशञ्च चतुर्व्विंशं न पश्यति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बुध्यमानो यदात्मानमन्योऽहमिति मन्यते। तदा प्रकृतिमानेष भवत्यव्यक्तलोचनः। ११४७५
बुध्यते च परां बुद्धिं विशुद्धाममलां यदा। षड्विंशो राजशार्दूल तथा बुद्धत्वमाव्रजेत्।
ततस्त्यजति सोऽव्यक्तं सर्गप्रलयधर्म्मि वै। निर्गुणप्रकृतिं वेद गुणयुक्तामचेतनां।
ततः केवलधर्म्माऽसौ भवत्यव्यक्तदर्शनात्। केवलेन समागम्य विमुक्तात्मानमाप्नुयात्।
एतत्तु तत्त्वमित्याहुर्निस्तत्त्वमजरामरं। तत्त्वसंश्रयणादेतत्तत्त्ववन्न च मानद।
पञ्चविंशतितत्त्वानि प्रवदन्ति मनीषिणः। न चैष तत्त्ववांस्तात निस्तत्त्वस्त्वेष बुद्धिमान्। ११४८०
एष मुञ्चति तत्त्वं हि क्षिप्रं बुद्धस्य लक्षणं। षड्विंशोऽहमिति प्राज्ञो गृह्यमाणोऽजरामरः।
केवलेन बलेनैव समतां यात्यसंशयं। षड्विंशेन प्रबुद्धेन बुद्धमानोऽप्यबुद्धिमान्।
एतन्नानात्वमित्युक्तं सांख्यश्रुतिनिदर्शनात्। चेतनेन समेतस्य पञ्चविंशतिकस्य ह।
एकत्वं वै भवत्यस्य यदा बुद्ध्यानुबुध्यते। बुध्यमानोऽप्रबुद्धेन समतां याति मैथिल।
सङ्गधर्म्मा भवत्येष निःसङ्गात्मा नराधिप। निःसङ्गात्मानमासाद्य षड्विंशकमजं विभुं। ११४८५
विभुस्त्यजति चाव्यक्तं यदा त्वेतद्विबुध्यते। चतुर्व्विंशमसारञ्च षड्विंशस्य प्रबोधनात्।
एष ह्यप्रतिबुद्धश्च बुध्यमानश्च तेऽनघ। प्रोक्तो बुद्धश्च तत्त्वेन यदा श्रुतिनिदर्शनात्।
नानात्वैकत्वमेतावद्द्रष्टव्यं शास्त्रदर्शनात्। मशकोदुम्बरे यद्वदन्यत्वं तद्वदेतयोः।
मत्स्योदके यथा तद्वदन्यत्वमुपलभ्यते। एवमेवावगन्तव्यं नानात्वैकत्वमेतयोः।
एतद्धि मोक्ष इत्युक्तमव्यक्तज्ञानसंहितं। पञ्चविंशतिकस्यास्य योऽयं देहेषु वर्त्तते। ११४९०
एष मोक्षयितव्येति प्राहुरव्यक्तगोचरात्। सोऽयमेवं प्रमुच्येत नान्यथेति विनिश्चयः।
परश्च परधर्म्मा च भवत्येष समेत्य वै। विशुद्धधर्म्मा शुद्धेन बुद्धेन च स बुद्धिमान्।
विमुक्तधर्म्मा मुक्तेन समेत्य पुरुषर्षभ। वियोगधर्म्मिणा चैव विमुक्तात्मा भवत्यथ।
विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत्। शुचिकर्म्मा शुचिश्चैव भवत्यमितदीप्तिमान्।
विमलात्मा च भवति समेत्य विमलात्मना। केवलात्मा तथा चैव केवलेन समेत्य वै। ११४९५
स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्नुयात्।

एतावदेतत् कथितं मया ते तथ्यं महाराज यथार्थतत्त्वं। अमत्सरत्वं परिगृह्य चार्थं सनातनं ब्रह्मविशुद्धमाद्यं।
अवेदनिष्ठस्य जनस्य राजन् प्रदेयमेतत् परमं त्वया भवेत्। विधित्समानाय प्रबोधकारणं प्रबोधहेतोः प्रणतस्य शासनं।
न देयमेतच्च तथाऽनृतात्मने शठाय क्लीवाय न जिह्मबुद्धये। न पण्डितज्ञानपरोपतापिने देयन्तु देयञ्च निबोध यादृशे।
श्रद्धान्विताथाय गुणान्विताय परापवादाद्विरताय नित्यं। विशुद्धयोगाय बुधाय नित्यं क्रियावते च क्षमिणे हिताय। ११५००
विविक्तशीलाय विधिप्रियाय विवादहीनाय बहुश्रुताय। विजानते चैव न चाहितक्षमे दमे च शक्ताय शमे च देयं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतैर्गुणैर्हीनतमे न देयमेत् परं ब्रह्म विशुद्धमाहुः। न श्रेयसा योक्ष्यति तादृशे कृतं धर्म्मप्रवक्तारमपात्रदानात्।
पृथ्वीमिमां यद्यपि रत्नपूर्णां दद्यान्न देयन्त्विदमव्रताय। जितेन्द्रियायैतदसंशयन्ते भवेत् प्रदेयं परमं नरेन्द्र।
कराल मा ते भयमस्तु किञ्चिदेतत् श्रुतं ब्रह्म परं त्वयाऽद्य। यथावदुक्तं परमं पवित्रं विशोकमत्यन्तमनादिमध्यं।
अगाधजन्मामरणञ्च राजन्निरामयं वीतभयं शिवञ्च। समीक्ष्य मोहं त्यज वाऽद्य सर्व्वं ज्ञानस्य तत्त्वार्थमिदं विदित्वा। ११५०५
अवाप्तमेतद्धि मया सनातनाद्धिरण्यगर्भाद्गदतो नराधिप। प्रसाद्य यत्नेन तमुग्रचेतसं सनातनं ब्रह्म यथाऽद्य वै तथा।
पृष्टस्त्वया चास्मि यथा नरेन्द्र यथा मयेदं त्वयि चोक्तमद्य। तथाऽवाप्तं ब्रह्मणो मे नरेन्द्र महाज्ञानं मोक्षविदां परायणं।
॥ भीष्म उवाच ॥ एतदुक्तं परं ब्रह्म यस्मान्नावर्त्तते पुनः। पञ्चविंशो महाराज परमर्षिनिदर्शनात्।
पुनरावृत्तिमाप्नोति परं ज्ञानमवाप्य च। नावबुध्यति तत्त्वेन बुध्यमानोऽजरामरं।
एतन्निःश्रेयसकरं ज्ञानन्ते परमं मया। कथितं तत्त्वतस्तात श्रुत्वा देवर्षितो नृप। ११५१०
हिरण्यगर्भादृषिणा वशिष्ठेन महात्मना। वशिष्ठादृषिशार्दूलान्नारदोऽवाप्तवानिदं।
नारदाद्विदितं मह्यमेतद्ब्रह्म सनातनं। मा शुचः कौरवेन्द्र त्वं श्रुत्वैतत् परमं पदं।
येन चराचरे वित्ते भयं तस्य न विद्यते। विद्यते तु भयं तस्य यो नैतद्वेत्ति पार्थिव।
अविज्ञानाच्च मूढात्मा पुनः पुनरुपाद्रवत्। प्रेत्य जातिसहस्राणि मरणान्तान्युपाश्नुते।
देवलोकं तथा तिर्य्यङ्मनुष्यमपि चाश्नुते। यदि शुध्यति कालेन तस्मादज्ञानसागरात्। ११५१५
अज्ञानसागरो घोरो ह्यव्यक्तोऽगाध उच्यते। अहन्यहनि मज्जन्ति यत्र भूतानि भारत।
यस्मादगाधादव्यक्तादुत्तीर्णस्त्वं सनातनात्। तस्मात्त्वं विरजाश्चैव वितमस्कश्च पार्थिव।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि वशिष्ठकरालजनकसंवादे दशाधिकत्रिशतोऽध्यायः ॥ ३१० ॥
॥ भीष्म उवाच ॥ मृगयां विचरन् कश्चिद्विजने जनकात्मजः। वने ददर्श विप्रेन्द्रमृषिं वंशधरं भृगोः।
उपासीनमुपासीनः प्रणम्य शिरसा मुनिं। पश्चादनुमतस्तेन पप्रच्छ वसुमानिदं।
भगवन् किमिदं श्रेयः प्रेत्य चापीह वा भवेत्। पुरुषस्याध्रुवे देहे कामस्य वशवर्त्तिनः। ११५२०
सत्कृत्य परिपृष्टः स सुमहात्मा महातपाः। निजगाद ततस्तस्मै श्रेयस्करमिदं वचः।
॥ ऋषिरुवाच ॥ मनसोऽप्रतिकूलानि प्रेत्य चेह च वाञ्छसि। भूतानां प्रतिकूलेभ्यो निवर्त्तस्व जितेन्द्रियः।
धर्म्मः सतां हितः पुंसां धर्म्मश्चैवाश्रयः सतां। धर्म्माल्लोकास्त्रयस्तात प्रवृत्ताः सचराचराः।
स्वादुकामुककामानां वैतृष्ण्यं किं न गच्छसि। मधु पश्यसि दुर्ब्बुद्धे प्रपातं नानुपश्यसि।
यथाज्ञाने परिचयः कर्त्तव्यस्तत्फलार्थिना। तथा धर्म्मे परिचयः कर्त्तव्यस्तत्फलार्थिना। ११५२५
असता धर्म्मकामेन विशुद्धं कर्म्म दुष्करं। सता तु धर्म्मकामेन सुकरं कर्म्म दुष्करं।
वने ग्राम्यसुखाचारो यथा ग्राम्यस्तथैव सः। ग्रामे च न सुखाचारो यथा वनचरस्तथा।
मनोवाक्कायिके धर्म्मे कुरु श्रद्धां समाहितः। निवृत्तौ वा प्रवृत्तौ वा सम्प्रधार्य्य गुणागुणान्।

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नित्यञ्च बहु दातव्यं साधुभ्यश्चानसूयता । प्रार्थितं व्रतशौचाभ्यां सत्कृतं देशकालयोः ।
शुभेन विधिना लब्धमर्हाय प्रतिपादयेत् । क्रोधमुत्सृज्य दद्याच्च नानुतप्येन्न कीर्त्तयेत् । ११५३०
अनृशंसः शुचिर्दान्तः सत्यवागार्ज्जवे स्थितः । योनिकर्म्मविशुद्धश्च पात्रं स्याद्वेदविद्द्विजः ।
सत्कृता चैकपत्नी च जात्या योनिरिहेष्यते । ऋग्यजुःसामगो विद्वान् षट्कर्म्मा पात्रमुच्यते ।
स एव धर्म्मः सोऽधर्म्मस्तं तं प्रति नरं भवेत् । पात्रकर्म्मविशेषेण देशकालाववेक्ष्य च ।
लीलयाऽल्पं यथा गात्रात्प्रमृज्यात्तु रजः पुमान् । बहुयत्नेन च महत्यापनिर्हरणन्तथा ।
विविक्तस्य यथा सम्यग्घृतं भवति भेषजं । तथा निर्हृतदोषस्य प्रेत्य धर्म्मः सुखावहः । ११५३५
मानसं सर्व्वभूतेषु वर्त्तते वै शुभाशुभं । अशुभेभ्यः समाक्षिप्य शुभेष्वेवावतारयेत् ।
सर्व्वं सर्व्वेण सर्व्वत्र क्रियमाणञ्च पूजयेत् । स्वधर्म्मे यत्र रागस्ते कामं धर्म्मो विधीयतां ।
अधृतात्मन् धृतौ तिष्ठ दुर्ब्बुद्धे बुद्धिमान् भव । अप्रशान्तः प्रशाम्य त्वमप्राज्ञः प्राज्ञवच्चर ।
तेजसा शक्यते प्राप्तुमुपायसहचारिणा । इह च प्रेत्य च श्रेयस्तस्य मूलं धृतिः परा ।
राजर्षिरधृतिः स्वर्गात्पतितो हि महाभिषः । ययातिः क्षीणपुण्योऽपि धृत्या लोकानवाप्तवान् । ११५४०
तपस्विनां धर्म्मवतां विदुषाञ्चोपसेवनात् । प्राप्स्यसे विपुलां बुद्धिं तथा श्रेयोऽभिपत्स्यसे ।
॥ भीष्म उवाच ॥ स तु स्वभावसम्पन्नस्तच्छ्रुत्वा मुनिभाषितं । विनिवर्त्त्य मनः कामाद्धर्म्मे बुद्धिञ्चकार ह ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जनकानुशासने एकादशाधिकत्रिशतोऽध्यायः ॥ ३११ ॥
॥ युधिष्ठिर उवाच ॥ धर्म्माधर्म्मविमुक्तं यद्विमुक्तं सर्व्वसंशयात् । जन्ममृत्युविमुक्तञ्च विमुक्तं पुण्यपापयोः ।
यच्छिवं नित्यमभयं नित्यमक्षरमव्ययं । शुचि नित्यमनायासं तद्भवान् वक्तुमर्हति ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनं । याज्ञवल्क्यस्य संवादं जनकस्य च भारत । ११५४५
याज्ञवल्क्यमृषिश्रेष्ठं दैवरातिर्म्महायशाः । पप्रच्छ जनको राजा प्रश्नं प्रश्नविदाम्वरं ।
॥ जनक उवाच ॥ कतीन्द्रियाणि विप्रर्षे कति प्रकृतयः स्मृताः । किमव्यक्तं परं ब्रह्म तस्माच्च परतस्तु किं ।
प्रभवञ्चाप्ययञ्चैव कालसंख्यां तथैव च । वक्तुमर्हसि विप्रेन्द्र त्वदनुग्रहकाङ्क्षिणः ।
अज्ञानात्परिपृच्छामि त्वं हि ज्ञानमयो निधिः । तदहं श्रोतुमिच्छामि सर्व्वमेतदसंशयं ।
॥ याज्ञवल्क्य उवाच ॥ श्रूयतामवनीपाल यदेतदनुपृच्छसि । योगानां परमं ज्ञानं सांख्यानाञ्च विशेषतः । ११५५०
न तवाविदितं किञ्चिन्मान्तु जिज्ञासते भवान् । पृष्टेन चापि वक्तव्यमेष धर्म्मः सनातनः ।
अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश । अत्र तु प्रकृतीरष्टौ प्राहुरध्यात्मचिन्तकाः ।
अव्यक्तञ्च महान्तञ्च तथाऽहङ्कारमेव च । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं ।
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु । श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणञ्च पञ्चमं ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च । वाक् च हस्तौ च पादौ च पायुर्म्मेढ्रन्तथैव च । ११५५५
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु । बुद्धीन्द्रियाण्यथैतानि सविशेषाणि मैथिल ।
मनः षोडशकं प्राहुरध्यात्मगतिचिन्तकाः । त्वञ्चैवान्ये च विद्वांसस्तत्त्वबुद्धिविशारदाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अव्यक्ताच्च महानात्मा समुत्पद्यति पार्थिव । प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः ।
महतश्चाप्यहङ्कार उत्पन्नो हि नराधिप । द्वितीयं सर्गमित्याहुरेतद्बुद्ध्यात्मकं स्मृतं ।
अहङ्काराच्च सम्भूतं मनो भूतगुणात्मकं । तृतीयः सर्ग इत्येष आहङ्कारिक उच्यते । ११५६०
मनसस्तु समुद्भूता महाभूता नराधिप । चतुर्थं सर्गमित्येतन्मानसं विद्धि मे मतं ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च । पञ्चमं सर्गमित्याहुर्भौतिकं भूतचिन्तकाः ।
श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणञ्च पञ्चमं । सर्गन्तु षष्ठमित्याहुर्ब्बहुचिन्तात्मकं स्मृतं ।
अधःश्रोत्रेन्द्रियग्राममुत्पद्यति नराधिप । सप्तमं सर्गमित्याहुरेतदैन्द्रियकं स्मृतं ।
ऊर्द्ध्वस्रोतस्तथा तिर्य्यगुत्पद्यति नराधिप । अष्टमं सर्गमित्याहुरेतदार्ज्जवकं स्मृतं । ११५६५
तिर्य्यक्स्रोतस्त्वधः स्रोत उत्पद्यति नराधिप । नवमं सर्गमित्याहुरेतदार्ज्जवकं बुधाः ।
एतानि नव सर्गाणि तत्त्वानि च नराधिप । चतुर्व्विंशतिरुक्तानि यथा श्रुतिनिदर्शनात् ।
अत ऊर्द्ध्वं महाराज गुणस्यैतस्य तत्त्वतः । महात्मभिरनुप्रोक्तां कालसंख्यां निबोध मे ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे द्वादशाधिकत्रिशततोऽध्यायः ॥ ३१२ ॥
॥ याज्ञवल्क्य उवाच ॥ अव्यक्तस्य नरश्रेष्ठ कालसंख्यां निबोध मे । पञ्चकल्पसहस्राणि द्विगुणान्यहरुच्यते ।
रात्रिरेतावती चास्य प्रतिबुद्धो नराधिप । सृजत्योषधिमेवाग्रे जीवनं सर्व्वदेहिनां । ११५७०
ततो ब्रह्माणमसृजद्धिरण्याण्डसमुद्भवं । सा मूर्त्तिः सर्व्वभूतानामित्येवमनुशुश्रुम ।
संवत्सरमुषित्वाऽण्डे निष्क्रम्य च महामुनिः । सन्दधे स महीं कृत्स्नां दिवमूर्द्ध्वं प्रजापतिः ।
द्यावापृथिव्योरित्येष राजन् वेदेषु पठ्यते । तयोः शकलयोर्म्मध्यमाकाशमकरोत् प्रभुः ।
एतस्यापि च सङ्ख्यानं वेदवेदाङ्गपारगैः । दशकल्पसहस्राणि पादोनान्यहरुच्यते ।
रात्रिमेतावतीञ्चास्य प्राहुरध्यात्मचिन्तकाः । सृजत्यहङ्कारमृषिर्भूतं दिव्यात्मकं तथा । ११५७५
चतुरश्चापरान् पुत्त्रान् देहात् पूर्ब्बं महानृषिः । ते वै पितॄणां पितरः श्रूयन्ते राजसत्तम ।
देवाः पितॄणाञ्च सुता देवैर्लोकाः समावृताः । चराचरा नरश्रेष्ठ इत्येवमनुशुश्रुम ।
परमेष्ठी त्वहङ्कारः सृजन् भूतानि पञ्चधा । पृथिवीवायुराकाशमापो ज्योतिश्च पञ्चमं ।
एतस्यापि निशामाहुस्तृतीयमिह कुर्व्वतः । पञ्च कल्पसहस्राणि तावदेवाहरुच्यते ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च । एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु । ११५८०
यैराविष्टानि भूतानि अहन्यहनि पार्थिव । अन्योन्यं स्पृहयन्त्येते अन्योन्यस्य हिते रताः ।
अन्योन्यमतिवर्त्तन्ते अन्योन्यस्पर्द्धिनस्तथा । ते बध्यमाना ह्यन्योन्यं गुणैर्हारिभिरव्ययैः ।
इहैव परिवर्त्तन्ते तिर्य्यग्योनिप्रवेशिनः । त्रीणि कल्पसहस्राणि एतेषामहरुच्यते ।
रात्रिरेतावती चैव मनसश्च नराधिप । मनश्चरति राजेन्द्र चारितं सर्व्वमिन्द्रियैः ।
न चेन्द्रियाणि पश्यन्ति मन एवानुपश्यति । चक्षुः पश्यति रूपाणि मनसा तु न चक्षुषा । ११५८५
मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति । तथेन्द्रियाणि सर्व्वाणि पश्यन्तीत्यभिचक्षते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न चेन्द्रियाणि पश्यन्ति मन एवात्र पश्यति । मनस्युपरते राजन्निन्द्रियोपरमो भवेत् ।
तदिन्द्रियेषूपरमं मनस्युपरमो भवेत् । एवं मनःप्रधानानि इन्द्रियाणि प्रभावयेत् ।
इन्द्रियाणान्तु सर्व्वेषामीश्वरं मन उच्यते । एतद्विशन्ति भूतानि सर्व्वाणीह महायशः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि जनकयाज्ञवल्क्यसंवादे त्रयोदशाधिकत्रिशततोऽध्यायः ॥ ३१३ ॥
॥ याज्ञवल्क्य उवाच ॥ तत्त्वानां सर्गसङ्ख्या च कालसङ्ख्या तथैव च । मया प्रोक्तानुपूर्व्व्येण संहारमपि मे शृणु । ११५८०
यथा संहरते जन्तून् ससर्ज्ज च पुनःपुनः । अनादिनिधनो ब्रह्मा नित्यश्चाक्षर एव च ।
अहःक्षयमथो बुद्ध्वा निशि स्वप्नमनास्तथा । चोदयामास भगवानव्यक्तोऽहङ्कृतं नरं ।
ततः शतसहस्रांशुरव्यक्तेनाभिचोदितः । कृत्वा द्वादशधात्मानमादित्यो ज्वलदग्निवत् ।
चतुर्व्विधं महीपाल निर्द्दहत्याशु तेजसा । जरायुजाण्डजस्वेदजोद्भिज्जञ्च नराधिप ।
एतदुन्मेषमात्रेण विनष्टं स्थाणुजङ्गमं । कूर्म्मपृष्ठसमा भूमिर्भवत्यथ समन्ततः । ११५८५
जगद्दग्ध्वामितबलः केवलां जगतीं ततः । अम्भसा बलिना क्षिप्रमापूरयति सर्व्वशः ।
ततः कालाग्निमासाद्य तदम्भो याति सङ्क्षयं । विनष्टेऽम्भसि राजेन्द्र जाज्वलत्यनलो महान् ।
तमप्रमेयोऽतिबलं ज्वलमानं विभावसुं । ऊष्माणं सर्व्वभूतानां सप्तार्च्चिषमथाञ्जसा ।
भक्षयामास भगवान् वायुरष्टात्मको बली । विचरन्नमितप्राणस्तिर्य्यगूर्द्ध्वमधस्तथा ।
तमप्रतिबलं भीममाकाशं ग्रसतेऽत्मना । आकाशमप्यभिनदन्मनो ग्रसति चाधिकं । ११५९०
मनो ग्रसति भूतात्मा सोऽहङ्कारः प्रजापतिः । अहङ्कारं महानात्मा भूतभव्यभविष्यवित् ।
तमप्यनुपमात्मानं विश्वं शम्भुः प्रजापतिः । अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ।
सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः । सर्व्वतः श्रुतिमाल्लोके सर्व्वमावृत्य तिष्ठति ।
हृदयं सर्व्वभूतानां पर्व्वणाङ्गुष्ठमात्रतः । अथ ग्रसत्यनन्तो हि महात्मा विश्वमीश्वरः ।
ततः समभवत् सर्व्वमक्षयाव्ययमव्रणं । भूतभव्यभविष्याणां स्रष्टारमनघन्तथा । ११५९५
एषो ऽप्यतस्ते राजेन्द्र यथावत् समुदाहृतः । अध्यात्ममधिभूतञ्च अधिदैवञ्च श्रूयतां ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे चतुर्द्दशाधिकत्रिशततोऽध्यायः ॥ ३१४ ॥
॥ याज्ञवल्क्य उवाच ॥ पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः । गन्तव्यमधिभूतञ्च विष्णुस्तत्राधिदैवतं ।
पायुरध्यात्ममित्याहुर्यथा तत्त्वार्थदर्शिनः । विसर्गमधिभूतञ्च मित्रस्तत्राधिदैवतं ।
उपस्थोऽध्यात्ममित्याहुर्यथा योगप्रदर्शिनः । अधिभूतं तथानन्दो दैवतञ्च प्रजापतिः ।
हस्तावध्यात्ममित्याहुर्यथासंख्यानदर्शिनः । कर्त्तव्यमधिभूतञ्च इन्द्रस्तत्राधिदैवतं । ११६००
वागध्यात्ममिति प्राहुर्यथा श्रुतिनिदर्शिनः । वक्तव्यमधिभूतन्तु वह्निस्तत्राधिदैवतं ।
चक्षुरध्यात्ममित्याहुर्यथा श्रुतिनिदर्शिनः । रूपमत्राधिभूतन्तु सूर्य्यश्चाप्यधिदैवतं ।
श्रोत्रमध्यात्ममित्याहुर्यथा श्रुतिनिदर्शिनः । शब्दस्तत्राधिभूतन्तु दिशस्तत्राधिदैवतं ।
जिह्वामध्यात्ममित्याहुर्यथा श्रुतिनिदर्शिनः । रस एवाधिभूतन्तु आपस्तत्राधिदैवतं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

घ्राणमध्यात्ममित्याहुर्यथा श्रुतिनिदर्शिनः । गन्ध एवाधिभूतन्तु पृथिवी चाधिदैवतं । ११६१५
त्वगध्यात्ममिति प्राहुस्तत्त्वबुद्धिविशारदाः । स्पर्शमेवाधिभूतन्तु पवनश्चाधिदैवतं ।
मनोऽध्यात्ममिति प्राहुर्यथा शास्त्रविशारदाः । मन्तव्यमधिभूतन्तु चन्द्रमाश्चाधिदैवतं ।
अहङ्कारिकमध्यात्ममाहुस्तत्त्वनिदर्शिनः । अभिमानोऽधिभूतन्तु बुद्धिश्चात्राधिदैवतं ।
बुद्धिरध्यात्ममित्याहुर्यथावदभिदर्शिनः । बोद्धव्यमधिभूतन्तु क्षेत्रज्ञश्चाधिदैवतं ।
एषा ते व्यक्तितो राजन् विभूतिरनुदर्शिता । आदौ मध्ये तथान्ते च यथा तत्त्वेन तत्त्ववित् । ११६२०
प्रकृतिर्गुणान् विकुरुते स्वच्छन्देनात्मकाम्यया । क्रीडार्थन्तु महाराज शतशोऽथ सहस्रशः ।
यथा दीपसहस्राणि दीपान्मर्त्याः प्रकुर्व्वते । प्रकृतिस्तथा विकुरुते पुरुषस्य गुणान् बहून् ।
सत्त्वमानन्द उद्रेकः प्रीतिः प्राकाश्यमेव च । सुखं शुद्धित्वमारोग्यं सन्तोषः श्रद्दधानता ।
अकार्पण्यमसंरम्भः क्षमा धृतिरहिंसता । समता सत्यमानृण्यं मार्द्दवं ह्रीरचापलं ।
शौचमार्ज्जवमाचारमलौल्यं हृद्यसम्भ्रमः । इष्टानिष्टवियोगानां कृतानामविकल्पना । ११६२५
दानेन चात्मग्रहणमस्पृहत्वं परार्थता । सर्व्वभूतदया चैव सत्त्वस्यैते गुणाः स्मृताः ।
रजोगुणानां संघातो रूपमैश्वर्य्यविग्रहे । अत्यागित्वमकारुण्यं सुखदुःखोपसेवनं ।
परापवादेषु रतिर्विवादानाञ्च सेवनं । अहङ्कारमसत्कारचिन्ता वैरोपसेवनं ।
परितापोऽभिहरणं ह्रीनाशोऽनार्ज्जवं तथा । भेदः परुषता चैव कामः क्रोधो मदस्तथा ।
दर्पो द्वेषोऽतिवादश्च एते प्रोक्ता रजोगुणाः । तामसानान्तु संघातं प्रवक्ष्याम्युपधार्य्यतां । ११६३०
मोहोऽप्रकाशस्तामिस्रमन्धतामिस्रसंज्ञितं । मरणञ्चान्धतामिस्रं तामिस्रं क्रोध उच्यते ।
तमसो लक्षणानीह भक्षणाद्यभिरोचनं । भोजनानामपर्य्याप्तिस्तथा पेयेष्वतृप्तता ।
गन्धवासो विहारेषु शयनेष्वासनेषु च । दिवास्वप्नेऽतिवादे च प्रमादेषु च वै रतिः ।
नृत्यवादित्रगीतानामज्ञानात् श्रद्दधानता । द्वेषो धर्म्मविशेषाणामेते वै तामसा गुणाः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे पञ्चदशाधिकद्विशतोऽध्यायः ॥ २१५ ॥
॥ याज्ञवल्क्य उवाच ॥ एते प्रधानस्य गुणास्त्रयः पुरुषसत्तम । कृत्स्नस्य चैव जगतस्तिष्ठन्त्यनपगाः सदा । ११६३५
अव्यक्तरूपो भगवान् शतधा च सहस्रधा । शतधा सहस्रधा चैव तथा शतसहस्रधा ।
कोटिशश्च करोत्येष प्रत्यगात्मानमात्मना । सात्त्विकस्योत्तमं स्थानं राजसस्येह मध्यमं ।
तामसस्याधमं स्थानं प्राहुरध्यात्मचिन्तकाः । केवलेनेह पुण्येन गतिमूर्द्ध्वामवाप्नुयात् ।
पुण्यपापेन मानुष्यमधर्म्मेणाप्यधोगतिं । द्वन्द्वमेषां त्रयाणान्तु सन्निपातञ्च तत्त्वतः ।
सत्त्वस्य रजसश्चैव तमसश्च शृणुष्व मे । सत्त्वस्य तु रजो दृष्टं रजसश्च तमस्तथा । ११६४०
तमसश्च तथा सत्त्वं सत्यस्याव्यक्तमेव च । अव्यक्तः सत्त्वसंयुक्तो देवलोकमवाप्नुयात् ।
रजःसत्त्वसमायुक्तो मानुष्येषु प्रपद्यते । रजस्तमोभ्यां संयुक्तस्तिर्य्यग्योनिषु जायते ।
राजसैस्तामसैः सत्त्वैर्युक्तो मानुष्यमाप्नुयात् । पुण्यपापवियुक्तानां स्थानमाहुर्म्महात्मनां ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शाश्वतश्चाव्ययश्चैवमक्षयश्चामृतश्च तत्। ज्ञानिनां सम्भवं श्रेष्ठं स्थानमव्रणमच्युतं।
अतीन्द्रियमवीजञ्च जन्ममृत्युतमोनुदं। अव्यक्तस्थं परं यत्तत् पृष्टस्तेऽहं नराधिप। ११६४५
स एव प्रकृतिस्थो हि तत्स्थ इत्यभिधीयते। अचेतना चैव मता प्रकृतिश्चापि पार्थिव।
एतेनाधिष्ठिता चैव सृजते संहरत्यपि।
॥ जनक उवाच ॥ अनादिनिधनावेतावुभावेव महामते। अमूर्त्तिमन्तावचलावप्रकम्प्यगुणागुणौ।
अग्राह्यावृषिशार्दूल कथमेको ह्यचेतनः। चेतनावांस्तथा चैकः क्षेत्रज्ञ इति भाषितः।
त्वं हि विप्रेन्द्र कार्त्स्न्येन मोक्षधर्ममुपाससे। साकल्यं मोक्षधर्म्मस्य श्रोतुमिच्छामि तत्त्वतः। ११६५०
अस्तित्वं केवलत्वञ्च विनाभावन्तथैव च। दैवतानि च मे ब्रूहि देहं यान्याश्रितानि वै।
तथैवोत्क्रमिणः स्थानं देहिनो वै विपद्यतः। कालेन यद्धि प्राप्नोति स्थानं तत् प्रब्रवीहि मे।
साङ्ख्यज्ञानञ्च तत्त्वेन पृथग्योगन्तथैव च। अरिष्टानि च तत्त्वानि वक्तुमर्हसि सत्तम।
विदितं सर्व्वमेतत्ते पाणावामलकं यथा।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

॥ याज्ञवल्क्य उवाच ॥ न शक्यो निर्गुणस्तात गुणीकर्त्तुं विशाम्पते। गुणवांश्चाप्यगुणवान् यथातत्त्वं निबोध मे। ११६५५
गुणैर्हि गुणवानेव निर्गुणश्चागुणस्तथा। प्राहुरेवं महात्मानो मुनयस्तत्त्वदर्शिनः।
गुणस्वभावस्त्वव्यक्तो गुणान्नैवातिवर्त्तते। उपयुङ्क्ते च तानेव स चैवाज्ञः स्वभावतः।
अव्यक्तस्तु न जानीते पुरुषोऽज्ञः स्वभावतः। न मत्तः परमोऽस्तीति नित्यमेवाभिमन्यते।
अनेन कारणेनैतदव्यक्तं स्यादचेतनं। नित्यत्वाच्चाक्षरत्वाच्च क्षरत्वान्न तदन्यथा।
यदज्ञानेन कुर्व्वीत गुणसर्गं पुनः पुनः। यदात्मानं न जानीते तदात्मापि न मुच्यते। ११६६०
कर्तृत्वाच्चापि सर्गाणां सर्गधर्म्मा तथोच्यते। कर्तृत्वाच्चापि योगानां योगधर्म्मा तथोच्यते।
कर्तृत्वात् प्रकृतीनाञ्च तथा प्रकृतिधर्म्मिता। कर्तृत्वाच्चापि वीजानां वीजधर्म्मा तथोच्यते।
गुणानां प्रसवत्वाच्च प्रलयत्वात्तथैव च। उपेक्षत्वादनन्यत्वादभिमानाच्च केवलं।
मन्यन्ते यतयः सिद्धा अध्यात्मज्ञा गतज्वराः। अनित्यं नित्यमव्यक्तं व्यक्तमेतद्धि शुश्रुम।
अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषास्तथा। सर्व्वभूतदयावन्तः केवलं ज्ञानमास्थिताः। ११६६५
अन्यः स पुरुषो व्यक्तस्त्वध्रुवो ध्रुवसंज्ञकः। यथा मुञ्ज इषीकाणां तथैवैतद्धि जायते।
अन्यञ्च मशकं विद्यादन्यच्चोडुम्बरं तथा। न चोडुम्बरसंयोगैर्म्मशकस्तत्र लिप्यते।
अन्य एव तथा मत्स्यस्तदन्यदुदकं स्मृतं। न चोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्व्वशः।
अन्यो ह्यग्निरुखाऽप्यन्या नित्यमेवमवेहि भोः। न चोपलिप्यते सोऽग्निरुखासंस्पर्शनेन वै।
पुष्करन्त्वन्यदेवात्र तथान्यदुदकं स्मृतं। नचोदकस्य स्पर्शेन लिप्यते तत्र पुष्करं। ११६७०
एतेषां सहवासञ्च निवासञ्चैव नित्यशः। याथातथ्येन पश्यन्ति न नित्यं प्राकृता जनाः।
ये त्वन्यथैवं पश्यन्ति न सम्यक् तेषु दर्शनं। ते व्यक्तं निरयं घोरं प्रविशन्ति पुनः पुनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

साङ्ख्यदर्शनमेतत्ते परिसंख्यानमुत्तमं। एवं हि परिसंख्याय सांख्याः केवलतां गताः।
ये त्वन्ये तत्वकुशलास्तेषामेतन्निदर्शनं। अतः परं प्रवक्ष्यामि योगानामनुदर्शनं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे सप्तदशाधिकत्रिशततोऽध्यायः॥ ३१७॥
॥ याज्ञवल्क्य उवाच॥ सांख्यज्ञानं मया प्रोक्तं योगज्ञानं निबोध मे। यथाश्रुतं यथादृष्टं तत्त्वेन नृप सत्तम। ११६०५
नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलं। तावुभावेकचर्य्यौ तु उभावनिधनौ स्मृतौ।
पृथक् पृथक् प्रपश्यन्ति येऽल्पबुद्धिरता नराः। वयन्तु राजन् पश्याम एकमेव तु निश्चयात्।
यदेव योगाः पश्यन्ति तत्सांख्यैरपि दृश्यते। एकं सांख्यञ्च योगञ्च यः पश्यति स तत्त्ववित्।
रुद्रप्रधानानपरान् विद्धि योगानरिन्दम। तेनैव चाथ देहेन विचरन्ति दिशो दश।
यावद्धि प्रलयस्तात सूक्ष्मेणाष्टगुणेन ह। योगेन लोकान् विचरन् सुखं संन्यस्य चानघ। ११६८०
वेदेषु चाष्टगुणिनं योगमाहुर्म्मनीषिणः। सूक्ष्ममष्टगुणं प्राहुर्नेतरं नृपसत्तम।
द्विगुणं योगकृत्यन्तु योगानां प्राहुरुत्तमं। सगुणं निर्गुणञ्चैव यथा शास्त्रनिदर्शनं।
धारणञ्चैव मनसः प्राणायामश्च पार्थिव। एकाग्रता च मनसः प्राणायामस्तथैव च।
प्राणायामो हि सगुणो निर्गुणं धारयेन्मनः। यद्यदृश्यति मुञ्चन् वै प्राणान्मैथिलसत्तम।
वाताधिक्यं भवत्येव तस्मात्तन्न समाचरेत्। निशायाः प्रथमे यामे चोदना द्वादश स्मृताः। ११६८५
मध्ये स्वप्नात् परे यामे द्वादशैव तु चोदनाः। तदेवमुपशान्तेन दान्तेनैकान्तशीलिना।
आत्मारामेण बुद्धेन योक्तव्योऽत्मा न संशयः। पञ्चानामिन्द्रियाणान्तु दोषानाक्षिप्य पञ्चधा।
शब्दं रूपं तथा स्पर्शं रसं गन्धन्तथैव च। प्रतिभामपवर्गञ्च प्रतिसंहृत्य मैथिल।
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य ह। मनस्तथैवाहङ्कारे प्रतिष्ठाप्य नराधिप।
अहङ्कारन्तथा बुद्धौ बुद्धिञ्च प्रकृतावपि। एवं हि परिसंख्याय ततो ध्यायन्ति केवलं। ११६९०
विरजस्कमलं नित्यमनन्तं शुद्धमव्रणं। तस्थुषं पुरुषं नित्यमभेद्यमजरामरं।
शाश्वतञ्चाव्ययञ्चैव ईशानं ब्रह्म चाव्ययं। युक्तस्य तु महाराज लक्षणान्युपधारय।
लक्षणन्तु प्रसादस्य यथा तृप्तः सुखं स्वपेत्। निर्वाते तु यथा दीपो ज्वलेत्स्नेहसमन्वितः।
निश्चलोर्द्ध्वशिखस्तद्वद्युक्तमाहुर्म्मनीषिणः। पाषाण इव मेघोत्थैर्यथाविन्दुभिराहतः।
नालञ्चालयितुं शक्यस्तथा युक्तस्य लक्षणं। शङ्खदुन्दुभिनिर्घोषैर्विविधैर्गीतवादितैः। ११६९५
क्रियमाणैर्न कम्पेत युक्तस्यैतन्निदर्शनं। तैलपात्रं यथा पूर्णं कराभ्यां गृह्य पूरुषः।
सोपानमारुहेद्भीतस्तर्ज्यमानोऽसिपाणिभिः। संयतात्मा भयात्तेषां न पात्राद्बिन्दुमुत्सृजेत्।
तथैवोत्तरमागम्य एकाग्रमनसस्तथा। स्थिरत्वादिन्द्रियाणान्तु निश्चलत्वात्तथैव च।
एवं युक्तस्य तु मुनेर्लक्षणान्युपलक्षयेत्। स्वयुक्तः पश्यते ब्रह्म यत्तत् परममव्ययं।
महतस्तमसो मध्ये स्थितं ज्वलनसन्निभं। एतेन केवलं याति त्यक्त्वा देहमसाक्षिकं। ११७००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कालेन महता राजन् श्रुतिरेषा सनातनी । एतद्धि योगं योगानां किमन्यद्योगलक्षणं ।
विज्ञाय तद्धि मन्यन्ते कृतकृत्या मनीषिणः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे अष्टादशाधिकत्रिशतोऽध्यायः ॥ ३१८ ॥
॥ याज्ञवल्क्य उवाच ॥ तथैवोत्क्रममाणन्तु शृणुष्वावहितो नृप । पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुच्यते ।
जंघाभ्यान्तु वसून् देवानाप्नुयादिति नः श्रुतं । जानुभ्यान्तु महाभागान् साध्यान्देवानवाप्नुयात् ।
पायुनोत्क्रममाणन्तु मैत्रं स्थानमवाप्नुयात् । पृथिवीं जघनेनाथ ऊरुभ्याञ्च प्रजापतिं । ११००५
पार्श्वाभ्यां मरुतो देवान्नाभ्यामिन्द्रत्वमेव च । बाहुभ्यामिन्द्रमेवाहुरुरसा रुद्रमेव च ।
ग्रीवयातु मुनिश्रेष्ठं नरमाप्नोत्यनुत्तमं । विश्वेदेवान् मुखेनाथ दिशः श्रोत्रेण चाप्नुयात् ।
घ्राणेन गन्धवहनं नेत्राभ्यामग्निमेव च । भ्रूभ्याञ्चैवाश्विनौ देवौ ललाटेन पितॄनथ ।
ब्रह्माणमाप्नोति विभुमूर्द्ध्ना देवाग्रजं तथा । एतान्युत्क्रमणस्थानान्युक्तानि मिथिलेश्वर ।
अरिष्टानि प्रवक्ष्यामि विहितानि मनीषिभिः । संवत्सरवियोगस्य सम्भवन्ति शरीरिणः । ११०१०
योऽरुन्धतीं न पश्येत दृष्टपूर्व्वां कदाचन । तथैव ध्रुवमित्याहुः पूर्णेन्दुं दीपमेव च ।
खण्डाभासं दक्षिणतस्तेऽपि सम्वत्सरायुषः । परचक्षुषि चात्मानं ये न पश्यन्ति पार्थिव ।
आत्मच्छायाकृतीभूतं तेऽपि संवत्सरायुषः । अतिद्युतिरतिप्रज्ञा अप्रज्ञा चाद्युतिस्तथा ।
प्रकृतेर्व्विक्रियापत्तिः षण्मासान्मृत्युलक्षणं । दैवतान्यवजानाति ब्राह्मणैश्च विरुध्यते ।
कृष्णश्यामच्छवि च्छायः षण्मासान्मृत्युलक्षणं । ऊर्णनाभेर्य्यथा चक्रं छिद्रं सोमं प्रपश्यति । ११०१५
तथैव च सहस्रांशुं सप्तरात्रेण मृत्युभाक् । शवगन्धमुपाघ्राति सुरभिं प्राप्य यो नरः ।
देवतायतनस्थस्तु सप्तरात्रेण मृत्युभाक् । कर्णनासावनमनं दन्तदृष्टिविरागिता ।
संज्ञालोपो निरुष्मत्वं सद्यो मृत्युनिदर्शनं । अकस्माच्च स्रवेद्यस्य वाममक्षि नराधिप ।
मूर्द्धतो वोत्पतेद्धूमः सद्यो मृत्युनिदर्शनं । एतावन्ति त्वरिष्टानि विदित्वा मानवोत्मवान् ।
निशि चाहनि चात्मानं योजयेत् परमात्मनि । प्रतीक्षमाणस्तत्कालं यत्कालं प्रेतता भवेत् । ११०२०
अथास्य नेष्टं मरणं स्थातुमिच्छेदिमां क्रियां । सर्व्वगन्धान्रसांश्चैव धारयीत नराधिप ।
ससांख्यधारणञ्चैव विदितात्मा नरर्षभ । जयेच्च मृत्युं योगेन तत्परेणान्तरात्मना ।
गच्छेत् प्राप्याक्षयं कृत्स्नमजन्मशिवमव्ययं । शाश्वतं स्थानमचलं दुष्प्रापमकृतात्मभिः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे ऊनविंशत्यधिकत्रिशतोऽध्यायः ॥ ३१९ ॥
॥ याज्ञवल्क्य उवाच ॥ अव्यक्तस्थं परं यत्तत् पृष्टस्तेऽहं नराधिप । परं गुह्यमिमं प्रश्नं शृणुष्वावहितो नृप ।
यथार्षेणेह विधिना चरताऽवनतेन ह । मयादित्यादवाप्तानि यजूंषि मिथिलाधिप । ११०२५
महता तपसा देवस्तपिष्णुः सेवितो मया । प्रीतेन चाहं विभुना सूर्य्येणोक्तस्तथाऽनघ ।
वरं वृणीष्व विप्रर्षे यदिष्टं ते सुदुर्लभं । तत्ते दास्यामि प्रीतात्मा मत्प्रसादो हि दुर्लभः ।
ततः प्रणम्य शिरसा मयोक्तस्तपताम्वरः । यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततो मां भगवानाह वितरिष्यामि ते द्विज। सरस्वतीह वाग्भूता शरीरन्ते प्रवेच्यति।
ततो मामाह भगवानास्यं त्वं विवृतं कुरु। विवृतञ्च ततो मेस्यं प्रविष्टा च सरस्वती। ११७३०
ततो विदह्यमानोऽहं प्रविष्टोऽम्भस्तदानघ। अविज्ञानादमर्षाच्च भास्करस्य महात्मनः।
ततो विदह्यमानं मामुवाच भगवान् रविः। मूहूर्त्तं सह्यतां दाहस्ततः शीतीभविष्यसि।
शीतीभूतञ्च मां दृष्ट्वा भगवानाह भास्करः। प्रतिष्ठास्यति ते वेदः सखिलः सोत्तरो द्विज।
कृत्स्नं शतपथञ्चैव प्रणेष्यसि द्विजर्षभ। तस्यान्ते चापुनर्भावे बुद्धिस्तव भविष्यति।
प्राप्स्यसे च यदिष्टं तत् सांख्ययोगेप्सितं पदं। एतावदुक्त्वा भगवानस्तमेवाभ्यवर्त्तत। ११७३५
ततोनु व्याहृतं श्रुत्वा गते देवे विभावसौ। गृहमागत्य संहृष्टो ऽचिन्तयं वै सरस्वतीं।
ततः प्रवृत्ताऽतिशुभा स्वरव्यञ्जनभूषिता। ओंकारमादितः कृत्वा मम देवी सरस्वती।
ततोऽहमर्घ्यं विधिवत् सरस्वत्यै न्यवेदयं। तपताञ्च वरिष्ठाय निषण्णस्तत्परायणः।
ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहं। चक्रे सपरिशेषञ्च हर्षेण परमेण ह।
कृत्वा चाध्ययनं तेषां शिष्याणां शतमुत्तमं। विप्रियार्थं सशिष्यस्य मातुलस्य महात्मनः। ११७४०
ततः सशिष्येण मया सूर्य्येणेव गभस्तिभिः। व्यस्तो यज्ञो महाराज पितुस्तव महात्मनः।
मिषतो देवलस्यापि ततोर्द्धं कृतवानहं। स्ववेददक्षिणायार्थे विमर्द्दे मातुलेन ह।
सुमन्तुनाऽथ पैलेन तथा जैमिनिना च वै। पित्रा ते मुनिभिश्चैव ततोऽहमनुमानितः।
दश पञ्च च प्राप्तानि यजूंष्यर्कान्मयाऽनघ। तथैव रोमहर्षेण पुराणमवधारितं।
वीजमेतत् पुरस्कृत्य देवीञ्चैव सरस्वतीं। सूर्य्यस्य चानुभावेन प्रवृत्तोऽहं नराधिप। ११७४५
कर्त्तुं शतपथञ्चेदमपूर्व्वञ्च कृतं मया। यथाभिलषितं मार्गं तथा तच्चोपपादितं।
शिष्याणामखिलं कृत्स्नमनुज्ञातं ससंग्रहं। सर्व्वे च शिष्याः शुचयो गताः परमहर्षिताः।
शाखाः पञ्चदशेमास्तु विद्याभास्करदेशिताः। प्रतिष्ठाप्य यथाकामं वेद्यं तदनुचिन्तयेत्।
किमत्र ब्रह्मण्यमृतं किञ्च वेद्यमनुत्तमं। चिन्तयंस्तत्र चागत्य गन्धर्व्वो मामपृच्छत।
विश्वावसुस्ततो राजन् वेदान्तज्ञानकोविदः। चतुर्व्विंशत्ततोऽपृच्छत् प्रश्नान् वेदस्य पार्थिव। ११७५०
पञ्चविंशतिमं प्रश्नं पप्रच्छान्वीक्षिकीन्तदा। विश्वाविश्वं तथाऽश्वाश्वं मित्रं वरुणमेव च।
ज्ञानं ज्ञेयं तथाऽज्ञोज्ञः कस्तपा अतपास्तथा। सूर्य्यादः सूर्य्य इति च विद्याविद्ये तथैव च।
वेद्यावेद्यन्तथा राजन्नचलं चलमेव च। अपूर्व्वमक्षयं क्षय्यमेतत् प्रश्नमनुत्तमं।
अथोक्तस्तु महाराज राजा गन्धर्व्वसत्तमः। पृष्टवाननुपूर्व्वेण प्रश्नमर्थवदुत्तमं।
मुहूर्त्तमृष्यतां तावद्यावदेवं विचिन्तये। वाढमित्येव कृत्वा च तुष्णीं गन्धर्व्व आस्थितः। ११७५५
ततोऽनुचिन्तयमहं भूयो देवीं सरस्वतीं। मनसा स च मे प्रश्नो दध्नो घृतमिवोद्धृतं।
तत्रोपनिषदञ्चैव परिशेषञ्च पार्थिव। मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं परां।
चतुर्थी राजशार्दूल विद्येषा साम्परायिकी। उदीरिता मया तुभ्यं पञ्चविंशादधिष्ठिता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथोक्तस्तु मया राजन् राजा विश्वावसुस्तदा । श्रूयतां यद्भवानस्मान् प्रश्नं संपृष्टवानिह ।
विश्वाविश्वेति यदिदं गन्धर्व्वेन्द्रानुपृच्छसि । विश्वाव्यक्तं परं विद्याद्भूतभव्यभयङ्करं । ११०६०
त्रिगुणं गुणकर्तृत्वादविश्वोऽन्यो निष्कलस्तथा । अश्वस्तथैव मिथुनमेवमेवानुदृश्यते ।
अव्यक्तं प्रकृतिं प्राज्ञः पुरुषेति च निर्गुणं । तथैव मित्रं पुरुषं वारुणं प्रकृतिन्तथा ।
ज्ञानन्तु प्रकृतिं प्राज्ञैर्ज्ञेयं निष्कलमेव च । अज्ञश्च ज्ञश्च पुरुषस्तस्मान्निष्कल उच्यते ।
कस्तपा अतपाः प्रोक्तः कोऽसौ पुरुष उच्यते । तपास्तु प्रकृतिं प्राहुरतपा निष्कलः स्मृतः ।
तथैवावेद्यमव्यक्तं वेद्यः पुरुष उच्यते । चलाचलमिति प्रोक्तं त्वया तदपि मे शृणु । ११०६५
चलान्तु प्रकृतिं प्राहुः कारणं क्षयसर्गयोः । आक्षेपसर्गयोः कर्त्ता निश्चलः पुरुषः स्मृतः ।
तथैव वेद्यमव्यक्तमवेद्यः पुरुषस्तथा । अज्ञावुभौ ध्रुवौ चैव अक्षयौ चाप्युभावपि ।
अजौ नित्यावुभौ प्राहुरध्यात्मगतिनिश्चयात् । अक्षयत्वात् प्रजनने अजमत्राहुरव्ययं ।
अक्षयं पुरुषं प्राहुःक्षयो ह्यस्य न विद्यते । गुणक्षयत्वात् प्रकृतिः कर्तृत्वादक्षयं बुधाः ।
एषा ते न्वीक्षिकी विद्या चतुर्थी साम्परायिकी । विद्योपेतं धनं कृत्वा कर्म्मणा नित्यकर्म्मणि । ११०७०
एकान्तदर्शना वेदाः सर्व्वे विश्वावसो स्मृताः । जायन्ते च म्रियन्ते च यस्मिन्नेते यतश्च्युताः ।
वेदार्थं ये न जानन्ति वेद्यं गन्धर्व्वसत्तम । साङ्गोपाङ्गानपि यदि यश्च वेदानधीयते ।
वेदवेद्यं न जानीते वेदभारवहो हि सः । यो घृतार्थी खरीक्षीरं मथेद्गन्धर्व्वसत्तम ।
विष्ठां तत्रानुपश्येत न मण्डं न च वै घृतं । तथा वेद्यमवेद्यञ्च वेदविद्यो न विन्दति ।
स केवलं मूढमतिर्ज्ञानभारवहः स्मृतः । द्रष्टव्यौ नित्यमेवैतौ तत्परेणान्तरात्मना । ११०७५
यथाऽस्य जन्मनिधने न भवेतां पुनः पुनः । अजस्रं जन्मनिधनं चिन्तयित्वा त्रयीमिमां ।
परित्यज्य क्षयमिह अक्षयं धर्म्ममास्थितः । यदानुपश्यतेऽत्यन्तमहन्यहनि काश्यप ।
तथा स केवलीभूतः षड्विंशमनुपश्यति । अन्यश्च शाश्वतोऽव्यक्तस्तथाऽन्यः पञ्चविंशकः ।
तस्य द्वावनुपश्येतां तमेकमिति साधवः । तेनैतन्नाभिनन्दन्ति पञ्चविंशकमच्युतं ।
जन्ममृत्युभयोद्विग्नाः सांख्याश्च परमैषिणः । ११०८०
॥ विश्वावसुरुवाच ॥ पञ्चविंशं यदेतत्ते प्रोक्तं ब्राह्मणसत्तम । तथा तन्न तथा वेति तद्भवान् वक्तुमर्हति ।
जैगीषव्यस्यासितस्य देवलस्य मया श्रुतं । पराशरस्य विप्रर्षेर्व्वार्षगण्यस्य धीमतः ।
भृगोः पञ्चशिखस्यास्य कपिलस्य शुकस्य च । गौतमस्यार्ष्टिषेणस्य गर्गस्य च महात्मनः ।
नारदस्यासुरेश्चैव पुलस्त्यस्य च धीमतः । सनत्कुमारस्य ततः शुक्रस्य च महात्मनः ।
कश्यपस्य पितुश्चैव पूर्व्वमेव मया श्रुतं । तदनन्तरञ्च रुद्रस्य विश्वरूपस्य धीमतः । ११०८५
दैवतेभ्यः पितृभ्यश्च दैतेयेभ्यस्ततस्ततः । प्राप्तमेतन्मया कृत्स्नं वेद्यं नित्यं वदन्त्युत ।
तस्मात्तद्वै भवद्बुद्ध्या श्रोतुमिच्छामि ब्राह्मण । भवान् प्रबर्हः शास्त्राणां प्रगल्भश्चातिबुद्धिमान् ।
न तवाविदितं किञ्चिद्भवान् श्रुतिनिधिः स्मृतः । कथ्यते देवलोके च पितृलोके च ब्राह्मण ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

ब्रह्मलोकगतास्चैव कथयन्ति महर्षयः। पतिश्च तपतां श्रेष्ठादित्यस्तव भाषिता।
सांख्यज्ञानं त्वया ब्रह्मन्नवाप्तं कृत्स्नमेव च। तथैव योगशास्त्रञ्च याज्ञवल्क्य विशेषतः। ११८७०
निःसन्दिग्धं प्रबुद्धस्त्वं बुध्यमानश्चराचरं। श्रोतुमिच्छामि तज्ज्ञानं घृतं मण्डमयं यथा।
॥ याज्ञवल्क्य उवाच ॥ कृत्स्नधारिणमेव त्वां मन्ये गन्धर्व्वसत्तम। जिज्ञाससे च मां राजंस्तन्निबोध यथाश्रुतं।
अबुध्यमानां प्रकृतिं बुध्यते पञ्चविंशकः। न तु बुध्यति गन्धर्व्व प्रकृतिः पञ्चविंशकं।
अनेन प्रतिबोधेन प्रधानं प्रवदन्ति तत्। सांख्ययोगाश्च तत्त्वज्ञा यथाश्रुतिनिदर्शनात्।
पश्यंस्तथैव चापश्यन् पश्यत्यन्यः सदाऽनघ। षड्‌विंशं पञ्चविंशञ्च चतुर्व्विंशञ्च पश्यति। ११८७५
न तु पश्यति पश्यंस्तु यश्चैनमनुपश्यति। पञ्चविंशोऽभिमन्येत नान्योऽस्ति परतो मम।
न चतुर्व्विंशको ग्राह्यो मनुजैर्ज्ञानदर्शिभिः। मत्स्यश्चोदकमन्वेति प्रवर्त्तेत प्रवर्त्तनात्।
यथैव बुध्यते मत्स्यस्तथैषोऽप्यनुबुध्यते। स्नेहात् सहवासाच्च साभिमानाच्च नित्यशः।
स निमज्जति कालस्य यदैकत्वं न बुध्यते। उन्मज्जति हि कालस्य ममत्वेनाभिसंवृतः।
यदा तु मन्यतेऽन्योऽहमन्य एष इति द्विज। तदा स केवलीभूतः षड्‌विंशमनुपश्यति। ११८८०
अन्यश्च राजन्यवरस्तथाऽन्यः पञ्चविंशकः। तत्स्थानाच्चानुपश्यन्ति एक एवेति साधवः।
तेनैतन्नाभिनन्दन्ति पञ्चविंशकमच्युतं। जन्ममृत्युभयाद्भीता योगाः सांख्याश्च काश्यप।
षड्‌विंशमनुपश्यन्तः शुचयस्तत्परायणाः। यदा स केवलीभूतः षड्‌विंशमनुपश्यति।
तदा स सर्व्वविद्विद्वान् न पुनर्ज्जन्म विन्दति। एवमप्रतिबुद्धश्च बुध्यमानश्च तेऽनघ।
बुद्धश्चोक्तो यथातत्त्वं मयाश्रुतिनिदर्शनात्। पश्यापश्यं यो न पश्येत् क्षेम्यं तत्त्वञ्च काश्यप। ११८८५
केवलाकेवलञ्चाद्यं पञ्चविंशं परञ्च यत्।
॥ विश्वावसुरुवाच ॥ तथ्यं शुभञ्चैतदुक्तं त्वया विभो सम्यक् क्षेम्यं दैवताद्यं यथावत्। स्वस्त्यक्षयं भवतश्चास्तु नित्यं बुद्ध्या सदा बुद्धियुक्तं नमस्ते।
॥ याज्ञवल्क्य उवाच ॥ एवमुक्त्वा सम्प्रयातो दिवं स विभ्राजन् वै श्रीमता दर्शनेन। तुष्टश्च तुष्ट्या परयाऽभिनन्द्य प्रदक्षिणं मम कृत्वा महात्मा।
ब्रह्मादीनां खेचराणां क्षितौ च ये चाधस्तात् संवसन्ते नरेन्द्र। तत्रैव तद्दर्शनं दर्शयन् वै सम्यक् क्षेम्यं ये पथं संश्रिता वै।
सांख्याः सर्व्वे सांख्यधर्म्मे रताश्च तद्वद्योगा योगधर्म्मे रताश्च। ये चाप्यन्ये मोक्षकामा मनुष्यास्तेषामेतद्दर्शनं ज्ञानदृष्टं। ११८९०
ज्ञानान्मोक्षो जायते राजसिंह नास्त्यज्ञानादेवमाहुर्नरेन्द्र। तस्माज्ज्ञानं तत्त्वतोऽन्वेषितव्यं येनात्मानं मोचयेज्जन्ममृत्योः।
प्राप्य ज्ञानं ब्राह्मणात् क्षत्त्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णं। श्रद्धातव्यं श्रद्दधानेन नित्यं न श्रद्धिनं जन्ममृत्यू विशेतां।
सर्व्वे वर्णा ब्राह्मणा ब्रह्मजाश्च सर्व्वे नित्यं व्याहरन्ते च ब्रह्म। तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि सर्व्वं विश्वं ब्रह्म चैतत् समस्तं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ब्रह्मास्यतो ब्राह्मणाः सम्प्रसूता बाहुभ्यां वै क्षत्रियाः सम्प्रसूताः । नाभ्यां वैश्याः पादतश्चापि शूद्राः सर्व्वे वर्णा नान्यथा वेदितव्याः ।
अज्ञानतः कर्म्मयोनिं भजन्ते तां तां राजंस्ते यथा यान्त्यभावं । तथा वर्णा ज्ञानहीनाः पतन्ते घोरादज्ञानात् प्राकृतं योनिजालं । ११८१५
तस्माज्ज्ञानं सर्व्वतो मार्गितव्यं सर्व्वत्रस्थं चैतदुक्तं मया ते । तत्स्थो ब्रह्मा तस्थिवांश्चापरो यस्तस्मै नित्यं मोक्षमाहुर्नरेन्द्र ।
यत्ते पृष्टं तन्मया चोपदिष्टं याथातथ्यं तद्विशोको भवस्व । राजन् गच्छस्वैतदर्थस्य पारं सम्यक् प्रोक्तं स्वस्ति तेऽस्तु नित्यं ।
॥ भीष्म उवाच ॥ स एवमनुशास्तस्तु याज्ञवल्क्येन धीमता । प्रीतिमानभवद्राजा मिथिलाधिपतिस्तदा ।
गते मुनिवरे तस्मिन् कृते चापि प्रदक्षिणे । दैवरातिर्नरपतिरासीनस्तत्र मोक्षवित् ।
गोकोटिं स्पर्शयामास हिरण्यन्तु तथैव च । रत्नाञ्जलिमथैकञ्च ब्राह्मणेभ्यो ददौ तदा । ११८२०
विदेहराज्यञ्च तदा प्रतिष्ठाप्य सुतस्य वै । यतिधर्म्ममुपासंश्चाप्यवसन्मिथिलाधिपः ।
साङ्ख्यज्ञानमधीयानो योगशास्त्रञ्च कृत्स्नशः । धर्म्माधर्म्मञ्च राजेन्द्र प्राकृतं परिगर्हयन् ।
अनन्त इति कृत्वा स नित्यं केवलमास्थितः । धर्म्माधर्म्मौ पुण्यपापे सत्यासत्ये तथैव च ।
जन्ममृत्यू च राजेन्द्र प्राकृतं तदचिन्तयत् । व्यक्ताव्यक्तस्य कर्म्मेदमिति नित्यं नराधिप ।
पश्यन्ति योगाः साङ्ख्याश्च स्वशास्त्रकृतलक्षणाः । इष्टानिष्टविमुक्तं हि तस्थौ ब्रह्म परात्परं । ११८२५
नित्यं तदाहुर्विद्वांसः शुचि तस्माच्छुचिर्भव । दीयते यच्च लभते दत्तं यच्चानुमन्यते ।
ददाति च नरश्रेष्ठ प्रतिगृह्णाति यच्च ह । ददात्यव्यक्त इत्येतत् प्रतिगृह्णाति यच्च वै ।
आत्मा ह्येवात्मनो ह्येकः कोऽन्यस्तस्मात् परो भवेत् । एवं मन्यस्व सततमन्यथा मा विचिन्तय ।
यस्याव्यक्तं न विदितं सगुणं निर्गुणं पुनः । तेन तीर्थानि यज्ञाश्च सेवितव्या विपश्चिता ।
न स्वाध्यायैस्तपोभिर्व्वा यज्ञैर्व्वा कुरुनन्दन । लभते व्यक्तिकं स्थानं ज्ञात्वा व्यक्तं महीयते । ११८३०
तथैव महतः स्थानमाहङ्कारिकमेव च । अहङ्कारात् परश्चापि स्थानानि समवाप्नुयात् ।
येत्वव्यक्तात् परं नित्यं जानते शास्त्रतत्पराः । जन्ममृत्युविमुक्तञ्च विमुक्तं सदसच्च यत् ।
एतन्मयाप्तं जनकात् पुरस्तात्तेनापि चाप्तं नृप याज्ञवल्क्यात् । ज्ञानं विशिष्टं न तथा हि यज्ञा ज्ञानेन दुर्गं तरते न यज्ञैः ।
दुर्गं जन्मनिधनञ्चापि राजन् न भौतिकं ज्ञानविदो वदन्ति । यज्ञैस्तपोभिर्नियमैर्व्रतैश्च दिवं समासाद्य पतन्ति भूमौ ।
तस्मादुपासस्व परं महच्छुचिः शिवं विमोक्षं विमलं पवित्रं । क्षेत्रं ज्ञात्वा पार्थिवज्ञानयज्ञमुपास्य वै तत्त्वमृषिर्भविष्यसि । ११८३५
यदुपनिषदनुपाकरोत्तथासौ जनकनृपस्य पुरा हि याज्ञवल्क्यः । यदुपगणितं शाश्वताव्ययं तच्छुभममृतत्वमशोकमर्च्छति ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि याज्ञवल्क्यजनकसंवादे विंशत्यधिकशततोऽध्यायः ॥ ३२० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

॥ युधिष्ठिर उवाच ॥ ऐश्वर्य्यं वा महत् प्राप्य धनं वा भरतर्षभ । दीर्घमायुरवाप्याथ कथं मृत्युमतिक्रमेत् ।
तपसा वा सुमहता कर्म्मणा वा श्रुतेन वा । रसायनप्रयोगैर्व्वा कैर्नाप्नोति जरान्तकौ ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । भिक्षोः पञ्चशिखस्येह संवादं जनकस्य च ।
वैदेहो जनको राजा महर्षिं वेदवित्तमं । पर्य्यपृच्छत् पञ्चशिखं छिन्नधर्म्मार्थसंशयं । ११८४०
केन वृत्तेन भगवन्नतिक्रामेज्जरान्तकौ । तपसा वाथ वा बुद्ध्या कर्म्मणा वा श्रुतेन वा ।
एवमुक्तः स वैदेहं प्रत्युवाचापरोक्षवित् । निवृत्तिर्न तयोरस्ति नानिवृत्तिः कथञ्चन ।
न ह्यहानि निवर्त्तन्ते न मासा न पुनः क्षपाः । सोऽयं प्रपद्यते ऽध्वानं चिराय ध्रुवमध्रुवः ।
सर्व्वभूतसमुच्छेदः स्रोतसेवोह्यते सदा । उह्यमानं निमज्जन्तमप्लवे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदभिपद्यते । नैवास्य कश्चिद्भवति नासौ भवति कस्यचित् । ११८४५
पथि सङ्गतमेवेदं दारैरन्यैश्च बन्धुभिः । नायमत्यन्तसंवासो लब्धपूर्व्वो हि केनचित् ।
क्षिप्यन्ते तेन तेनैव निष्टनन्तः पुनः पुनः । कालेन यातायाता हि वायुनेवाभ्रसञ्चयाः ।
जरामृत्यू हि भूतानां खादितारौ वृकाविव । बलिनां दुर्ब्बलानाञ्च ह्रस्वानां महतामपि ।
एवम्भूतेषु भूतात्मा नित्यभूतो ध्रुवेषु च । कथं हि हृष्येज्जातेषु मृतेषु च न संज्वरेत् ।
कुतोऽहमागतः कोऽस्मि क्व गमिष्यामि कस्य वा । कस्मिन् स्थितः क्व भविता कस्मात् किमनुशोचसि । ११८५०
द्रष्टा स्वर्गस्य कोऽन्योऽस्ति तथैव नरकस्य च । आगमांस्त्वनतिक्रम्य दद्याच्चैव यजेत च ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि भिक्षुपञ्चशिखजनकसंवादे एकविंशत्यधिकत्रिशतोऽध्यायः ॥ २२१ ॥

॥ युधिष्ठिर उवाच ॥ अपरित्यज्य गार्हस्थ्यं कुरुराजर्षिसत्तम । कः प्राप्तो विनयं बुद्ध्या मोक्षतत्त्वं वदस्व मे ।
संन्यस्यते यथात्मायं व्यक्तस्यात्मा यथा च यत् । परं मोक्षस्य यच्चापि तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । जनकस्य च संवादं सुलभायाश्च भारत ।
सन्न्यासफलिकः कश्चिद्बभूव नृपतिः पुरा । मैथिलो जनको नाम धर्म्मध्वज इति श्रुतः । ११८५५
स वेदे मोक्षशास्त्रे च स्वे च शास्त्रे कृतागमः । इन्द्रियाणि समाधाय शशास वसुधामिमां ।
तस्य वेदविदः प्राज्ञाः श्रुत्वा तां साधुवृत्ततां । लोकेषु स्पृहयन्त्यन्ये पुरुषाः पुरुषेश्वर ।
अथ धर्म्मयुगे तस्मिन् योगधर्म्ममनुष्ठिता । महीमनुचचारैका सुलभा नाम भिक्षुकी ।
तया जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः । तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः ।
सातिसूक्ष्मां कथां श्रुत्वा तथ्यं नेति ससंशया । दर्शने जातसङ्कल्पा जनकस्य बभूव ह । ११८६०
तत्र सा विप्रहायाथ पूर्व्वरूपं हि योगतः । अबिभ्रदनवद्याङ्गी रूपमन्यदनुत्तमं ।
चक्षुर्निमेषमात्रेण लघ्वस्त्रगतिगामिनी । विदेहानां पुरीं सुभ्रूर्जगाम कमलेक्षणा ।
सा प्राप्य मिथिलां रम्यां प्रभूतजनसंकुलां । भैक्ष्यचर्य्यापदेशेन ददर्श मिथिलेश्वरं ।
राजा तस्याः परं दृष्ट्वा सौकुमार्य्यं वपुस्तदा । केयं कस्य कुतो वेति बभूवागतविस्मयः । ११८६५
ततोऽस्याः स्वागतं कृत्वा व्यादिश्य च वरासनं । पूजितां पादशौचेन वरान्नेनाप्यतर्पयत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ भुक्तवती प्रीत्या राजानं मन्त्रिभिर्वृतं । सर्व्वभाष्यविदां मध्ये चोदयामास भिक्षुकी ।
सुलभा त्वस्य धर्म्मेषु मुक्तो नेति ससंशया । सत्त्वं सत्त्वेन योगज्ञा प्रविवेश महीपतेः ।
नेत्राभ्यां नेत्रयोरस्य रश्मीन् संयम्य रश्मिभिः । सा स्म सञ्चोदयिष्यन्ती योगबन्धैर्ब्बबन्ध ह ।
जनकोऽप्युत्स्मयन्राजा भावमस्या विशेषयन् । प्रतिजग्राह भावेन भावमस्या नृपोत्तम ।
तदेकस्मिन्नधिष्ठाने संवादः श्रूयतामयं । छत्रादिषु विमुक्तस्य मुक्तायाश्च त्रिदण्डके । ११८७०
॥ जनक उवाच ॥ भगवत्याः क्व चर्य्येयं कृता क्व च गमिष्यसि । कस्य च त्वं कुतो वेति पप्रच्छैनां महीपतिः ।
श्रुते वयसि जातौ च सद्भावो नाधिगम्यते । एष्वर्थेषूत्तरं तस्मात् प्रवेद्यं सत्समागमे ।
छत्रादिषु विशेषेषु मुक्तं मां विद्धि तत्त्वतः । स त्वां संमन्तुमिच्छामि मानार्हा हि मतासि मे ।
यस्माच्चैतन्मया प्राप्तं ज्ञानं वैशेषिकं पुरा । यस्य नान्यः प्रवक्तास्ति मोक्षं तमपि मे शृणु ।
पराशरसगोत्रस्य वृद्धस्य सुमहात्मनः । भिक्षोः पञ्चशिखस्याहं शिष्यः परमसम्मतः । ११८७५
साङ्ख्यज्ञाने च योगे च महीपालविधौ तथा । त्रिविधे मोक्षधर्म्मेऽस्मिन् गताध्वा छिन्नसंशयः ।
स यथाशास्त्रदृष्टेन मार्गेणेह परिभ्रमन् । वार्षिकांश्चतुरो मासान् पुरा मयि सुखोषितः ।
तेनाहं साङ्ख्यमुख्येन सुदृष्टार्थेन तत्त्वतः । श्रावितस्त्रिविधं मोक्षं न च राज्याद्विचालितः ।
सोऽहं तामखिलां वृत्तिं त्रिविधां मोक्षसंहितां । मुक्तरागश्चराम्येकः पदे परमके स्थितः ।
वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः । ज्ञानादेव च वैराग्यं जायते येन मुच्यते । ११८८०
ज्ञानेन कुरुते यत्नं यत्नेन प्राप्यते महत् । महद्द्वन्द्वप्रमोक्षाय सा सिद्धिर्या वयोतिगा ।
सेयं परमिका बुद्धिः प्राप्ता निर्द्वन्द्वतां मया । इहैव गतमोहेन चरता मुक्तसङ्गिना ।
यथा क्षेत्रं मृदूभूतमद्भिराप्लावितं यथा । जनयत्यङ्कुरं कर्म्म नृणां तद्वत् पुनर्भवं ।
यथा चोत्तापितं वीजं कपाले यत्र तत्र वा । प्राप्याप्यङ्कुरहेतुत्वमवीजत्वान्न जायते ।
तद्वद्भगवतानेन शिखाप्रोक्तेन भिक्षुणा । ज्ञानं कृतमवीजं मे विषयेषु न जायते । ११८८५
नाभिरज्यति कस्मिंश्चिन्नानर्थे न परिग्रहे । नाभिरज्यति चैतेषु व्यर्थत्वाद्रागरोषयोः ।
यश्च मे दक्षिणं बाहुं चन्दनेन समुक्षयेत् । सव्यं वास्यापि यस्तक्षेत् समावेतावुभौ मम ।
सुखी सोऽहमवाप्तार्थः समलोष्टाश्मकाञ्चनः । मुक्तसङ्गः स्थितो राज्ये विशिष्टोऽन्यैस्त्रिदण्डिभिः ।
मोक्षे हि त्रिविधा निष्ठा दृष्टाऽन्यैर्मोक्षवित्तमैः । ज्ञानं लोकोत्तरं यच्च सर्व्वत्यागश्च कर्म्मणां ।
ज्ञाननिष्ठां वदन्त्येके मोक्षशास्त्रविदो जनाः । कर्म्मनिष्ठान्तथैवान्ये यतयः सूक्ष्मदर्शिनः । ११८९०
प्रहायोभयमप्येवं ज्ञानं कर्म्म च केवलं । तृतीयेयं समाख्याता निष्ठा तेन महात्मना ।
यमे च नियमे चैव कामे द्वेषे परिग्रहे । माने दम्भे तथा स्नेहे सदृशास्ते कुटुम्बिभिः ।
त्रिदण्डादिषु यद्यस्ति मोक्षो ज्ञानेन कस्यचित् । छत्रादिषु कथं न स्यात्तुल्यहेतौ परिग्रहे ।
येन येन हि यस्यार्थः कारणेनेह कर्म्मणि । तत्तदालम्बते सर्व्वं द्रव्यं स्वार्थपरिग्रहे ।
दोषदर्शी तु गार्हस्थ्ये यो व्रजत्याश्रमान्तरे । उत्सृजन् परिगृह्णंश्च सोपि सङ्गान्न मुच्यते । ११८९५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आधिपत्ये तथा तुल्ये निग्रहानुग्रहात्मके । राजभिर्भिक्षुकास्तुल्या मुच्यन्ते केन हेतुना ।
अथ सत्याधिपत्येऽपि ज्ञानेनैवेह केवलं । मुच्यन्ते सर्व्वपापेभ्यो देहे परमके स्थिताः ।
काषायधारणं मौण्ड्यं त्रिविष्टब्धं कमण्डलुः । लिङ्गान्युत्पथभूतानि न मोक्षायेति मे मतिः ।
यदि सत्यपि लिङ्गेऽस्मिन् ज्ञानमेवात्र कारणं । निर्म्मोक्षायेह दुःखस्य लिङ्गमात्रं निरर्थकं ।
अथवा दुःखशैथिल्यं वीक्ष्य लिङ्गे कृता मतिः । किन्तदेवार्थसामान्यं छत्रादिषु न लक्ष्यते । ११९००
आकिञ्चन्येन मोक्षोऽस्ति किञ्चन्ये नास्ति बन्धनं । किञ्चन्ये चेतरे चैव जन्तुर्ज्ञानेन मुच्यते ।
तस्माद्धर्म्मार्थकामेषु तथा राज्यपरिग्रहे । बन्धनायतनेष्वेषु विद्ध्यबन्धे पदे स्थितं ।
राज्यैश्वर्य्यमयः पाशः स्नेहायतनबन्धनः । मोक्षाश्मनि शितेनेह छिन्नस्त्यागासिना मया ।
सोऽहमेवङ्गता मुक्ता ज्ञातार्थस्त्वयि भिक्षुकि । अयथार्थं हि ते वर्णं वक्ष्यामि शृणु तन्मम ।
सौकुमार्य्यं तथारूपं वपुरग्र्यन्तथा वयः । तवैतानि समस्तानि नियमश्चेति संशयः । ११९०५
यच्चाप्यननुरूपन्ते लिङ्गस्यास्य विचेष्टितं । मुक्तोऽयं स्यान्न वेति स्याद्धर्षितो मत्परिग्रहः ।
न च कामसमायुक्ते युक्तेऽप्यस्ति त्रिदण्डकं । न रक्ष्यते त्वया चेदं विमुक्तस्यास्ति गोपना ।
मत्पक्षसंश्रयाच्चायं शृणु यस्ते व्यतिक्रमः । आश्रयन्त्याः स्वभावेन मम पूर्व्वं परिग्रहं ।
प्रवेशस्ते कृतः केन मम राष्ट्रे पुरेऽपि वा । कस्य वा सन्निकर्षात्त्वं प्रविष्टा हृदयं मम ।
वर्णप्रवरमुख्यासि ब्राह्मणी क्षत्रियस्त्वहं । नावयोरेकयोगोऽस्ति मा कृथा वर्णसङ्करं । ११९१०
वर्त्तसे मोक्षधर्म्मेण त्वं गार्हस्थ्येऽहमाश्रमे । अयञ्चापि सुकष्टस्ते द्वितीयो आश्रमसङ्करः ।
सगोत्रां वाऽसगोत्रां वा न वेद त्वां न वेत्थ मां । सगोत्रमाविशन्त्यास्ते तृतीयो गोत्रसङ्करः ।
अथ जीवति ते भर्त्ता प्रोषितोऽप्यथ वा क्वचित् । अगम्या परभार्य्येति चतुर्थो धर्म्मसङ्करः ।
सा त्वमेतान्यकार्य्याणि कार्य्यापेक्षा व्यवस्यसि । अविज्ञानेन वा युक्ता मिथ्याज्ञानेन वा पुनः ।
अथवापि स्वतन्त्रासि स्वदोषेण हि कर्हिचित् । यदि किञ्चित् श्रुतं तेऽस्ति सर्व्वं कृतमनर्थकं । ११९१५
इदमन्यत्तृतीयन्ते भावस्पर्शविघातकं । दुष्टाया लक्ष्यते लिङ्गं विवृण्वत्याः प्रकाशितं ।
न मय्येवाभिसन्धिस्ते जयैषिण्या जये कृतः । येयं मत्परिषत् कृत्स्ना जेतुमिच्छसि तामपि ।
तथाह्येतस्ततश्च त्वं दृष्टिं स्वां प्रतिमुञ्चसि । मत्पक्षप्रतिघाताय स्वपक्षोद्भावनाय च ।
सा स्वेनामर्षजेन त्वमृद्धिमोहेन मोहिता । भूयः सृजसि योगांस्त्वं विषामृतमिवैकतां ।
इच्छतोरत्र यो लाभः स्त्रीपुंसोरमृतोपमः । अलाभश्चापि रक्तस्य सोऽपि दोषो विषोपमः । ११९२०
मां प्राक्षीः साधु जानीष्व स्वशास्त्रमनुपालय । कृतेयं हि विजिज्ञासा मुक्तो नेति त्वया मम ।
एतत् सर्व्वं प्रतिच्छन्नं मयि नार्हसि गूहितुं । सा यदि त्वं स्वकार्य्येण यद्यन्यस्य महीपते ।
तत्त्वं सत्रप्रतिच्छन्ना मयि नार्हसि गूहितुं । न राजानं मृषा गच्छेन्न द्विजातिं कथञ्चन ।
न स्त्रियं स्त्रीगुणोपेतां हन्युर्ह्येते मृषागताः । राज्ञां हि बलमैश्वर्य्यं ब्रह्म ब्रह्मविदाम्बलं ।
रूपयौवनसौभाग्यं स्त्रीणां बलमनुत्तमं । अत एतैर्ब्बलैरेव बलिनः स्वार्थमिच्छता । ११९२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वार्ज्जवेनाभिगन्तव्या विनाशाय ह्यनार्ज्जवं । सा त्वं जातिं श्रुतं वृत्तं भावं प्रकृतिमात्मनः ।
कृत्यमागमने चैव वक्तुमर्हसि तत्त्वतः ।
॥ भीष्म उवाच ॥ इत्येतैरसुखैर्व्वाक्यैरयुक्तैरसमञ्जसैः । प्रत्यादिष्टा नरेन्द्रेण सुलभा न व्यकम्पत ।
उक्तवाक्ये तु नृपतौ सुलभा चारुदर्शना । ततश्चारुतरं वाक्यं प्रचक्रामाथ भाषितुं ।
॥ सुलभोवाच ॥ नवभिर्नवभिश्चैव दोषैर्व्वाग्बुद्धिदूषणैः । अपेतमुपपन्नार्थमष्टादशगुणान्वितां ।
सौक्ष्म्यं साङ्ख्यक्रमौ चोभौ निर्णयः सप्रयोजनः । पञ्चैतान्यर्थजातानि वाक्यमित्युच्यते नृप ।
एषामेकैकशोऽर्थानां सौक्ष्म्यादीनां सुलक्षणं । शृणु संसार्य्यमाणानां पदार्थपदवाक्यतः ।
ज्ञानं ज्ञेयेषु भिन्नेषु यदा भेदेन वर्त्तते । यत्राधिवासिनी बुद्धिस्तत्सौक्ष्म्यमितिवर्त्तते ।
दोषाणाञ्च गुणानाञ्च प्रमाणं प्रविभागतः । कञ्चिदर्थमभिप्रेत्य सा सङ्ख्येत्युपधार्य्यतां ।
इदं पूर्व्वमिदं पश्चाद्वक्तव्यं यद्विवक्षितं । क्रमयोगन्तमप्याहुर्वाक्यं वाक्यविदो जनाः ।
धर्म्मकामार्थमोक्षेषु प्रतिज्ञाय विशेषतः । इदं तदिति वाक्यान्ते प्रोच्यते स विनिर्णयः ।
इच्छाद्वेषभवैर्दुःखैः प्रकर्षो यत्र जायते । तत्र या नृपतेर्वृत्तिस्तत्प्रयोजनमिष्यते ।
तान्येतानि यथोक्तानि सौक्ष्म्यादीनि जनाधिप । एकार्थसमवेतानि वाक्यं मम निशामय ।
उपेतार्थमभिन्नार्थं न्यायवृत्तं न चाधिकं । न श्लक्ष्णं न च सन्दिग्धं वक्ष्यामि परमन्ततः ।
न गुर्व्वक्षरसंयुक्तं पराङ्मुखसुखं न च । नानृतं न त्रिवर्गेण विरुद्धं नाप्यसंस्कृतं ।
न न्यूनं कष्टशब्दं वा विक्रमाभिहतं न च । न शेषमनुकल्पेन निष्कारणमहेतुकं ।
कामात् क्रोधाद्भयाल्लोभात् दैन्याच्चानार्य्यकात्तथा । ह्रीतोऽनुक्रोशतो मानान्न वक्ष्यामि कथञ्चन ।
वक्ता श्रोता च वाक्यञ्च यदा त्वविकलं नृप । सममेति विवक्षायां तदा सोऽर्थः प्रकाशते ।
वक्तव्ये तु यदा वक्ता श्रोतारमवमन्य वै । स्वार्थमाह परार्थन्तत्तदा वाक्यं न रोहति ।
अथ यः स्वार्थमुत्सृज्य परार्थं प्राह मानवः । विशङ्का जायते तस्मिन् वाक्यन्तदपि दोषवत् ।
यस्तु वक्ता द्वयोरर्थमविरुद्धं प्रभाषते । श्रोतुश्चैवात्मनश्चैव स वक्ता नेतरो नृप ।
तदर्थवदिदं वाक्यं राजन्नेकमनाः शृणु । यथा जतु च काष्ठञ्च पांशवश्चोदविन्दवः ।
संश्लिष्टानि तथा राजन् प्राणिनामिह सम्भवः । शब्दः स्पर्शो रसो रूपं गन्धः पञ्चेन्द्रियाणि च ।
पृथगात्मान आत्मानं संश्लिष्टा जतुकाष्ठवत् । न चैषां चोदना काचिदस्तीत्येष विनिश्चयः ।
एकैकस्येह विज्ञानं नास्त्यात्मनि तथा परे । न वेद चक्षुश्चक्षुष्ट्वं श्रोत्रं नात्मनि वर्त्तते ।
तथैव व्यभिचारेण न वर्त्तन्ते परस्परं । संश्लिष्टाश्च न जानन्ति यथाप इव पांशवः ।
वाह्यानन्यानपेक्षन्ते गुणांस्तानपि मे शृणु । रूपं चक्षुः प्रकाशश्च दर्शने हेतवस्त्रयः ।
यथैवात्र तथान्येषु ज्ञानज्ञेयेषु हेतवः । ज्ञानज्ञेयान्तरे तस्मिन् मनो नामापरो गुणः ।
विचारयति येनायं निश्चये साध्वसाधुनी । द्वादशस्त्वपरस्तत्र बुद्धिर्नाम गुणः स्मृतः ।
येन संशयपूर्व्वेषु वोद्धव्येषु व्यवस्यति । अथ द्वादशके तस्मिन् सत्त्वं नामापरो गुणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महासत्त्वोऽल्पसत्त्वो वा जन्तुर्य्येनानुमीयते । अहं कर्त्तेति चाप्यन्यो गुणस्तत्र चतुर्द्दश: ।
ममायमिति येनायं मन्यते न ममेति च । अथ पञ्चदशो राजन् गुणस्तत्रापर: स्मृत: ।
पृथक् कलासमूहस्य सामग्र्यन्तदिहोच्यते । गुणस्त्वेवापरस्तत्र सङ्घात इव षोडश: ।
प्रकृतिर्व्यक्तिरित्येतौ गुणौ यस्मिन् समाश्रितौ । सुखासुखे जरामृत्यू लाभालाभौ प्रियाप्रिये ।
इति चैकोनविंशोऽयं द्वन्द्वयोग इति स्मृत: । ऊर्द्ध्वञ्चैकोनविंशत्या कालो नाम परो गुण: । ११९६०
इतीमं विद्धि विंशत्या भूतानां प्रभवाप्ययं । विंशकश्चैष सङ्घातो महाभूतानि पञ्च च ।
सदसद्भावयोगौ तु गुणावन्यौ प्रकाशकौ । इत्येवं विंशकश्चैव गुणा: सप्त च ये स्मृता: ।
विधि: शुक्रं बलञ्चेति त्रय एते गुणा: परे । विंशतिर्द्दश चैवं हि गुणा: सङ्ख्यानत: स्मृता: ।
समग्रा यत्र वर्त्तन्ते तच्छरीरमिति स्मृतं । अव्यक्तं प्रकृतिं त्वासां कलानां कश्चिदिच्छति ।
व्यक्तञ्चासां तथा चान्य: स्थूलदर्शी प्रपश्यति । अव्यक्तं यदि वा व्यक्तं द्वयीमथ चतुष्टयीं । ११९६५
प्रकृतिं सर्व्वभूतानां पश्यन्त्यध्यात्मचिन्तका: । येयं प्रकृतिरव्यक्ता कलाभिर्व्यक्ततां गता: ।
अहञ्च त्वञ्च राजेन्द्र ये चाप्यन्ये शरीरिण: । बिन्द्वन्यासादयोऽवस्था: शुक्रशोणितसम्भवा: ।
यासामेव निपातेन कललं नाम जायते । कललाद्बुद्बुदोत्पत्ति: पेशी च बुद्बुदात् स्मृता ।
पेश्यास्त्वङ्गाभिनिर्वृत्तिर्नखरोमाणि चाङ्गत: । सम्पूर्णे नवमे मासि जन्तोर्जातस्य मैथिल ।
जायते नामरूपत्वं स्त्रीपुमान् वेति लिङ्गत: । जातमात्रन्तु तद्रूपं दृष्ट्वा ताम्रनखाङ्गुलि । ११९७०
कौमारं रूपमापन्नं रूपतो नोपलभ्यते । कौमाराद्यौवनञ्चापि स्थाविर्य्यञ्चापि यौवनात् ।
अनेन क्रमयोगेन पूर्व्वं पूर्व्वं न लभ्यते । कलानां पृथगर्थानां प्रतिभेद: क्षणे क्षणे ।
वर्त्तते सर्व्वभूतेषु सौक्ष्म्यात्तु न विभाव्यते । न चैषामत्ययो राजन् लक्ष्यते प्रभवो न च ।
अवस्थायामवस्थायां दीपस्येवार्च्चिषो गति: । तस्याप्येवं प्रभावस्य सदश्वस्येव धावत: ।
अजस्रं सर्व्वलोकस्य क: कुतो वा न वा कुत: । कस्येदं कस्य वा नेदं कुतो वेदं न वा कुत: । ११९७५
सम्बन्ध: कोऽस्ति भूतानां स्वैरप्यवयवैरिह । यथादित्यान्मणेश्चापि वीरुद्भ्यश्चैव पावक: ।
जायन्त्येवं समुदयात् कलानामिव जन्तव: । आत्मन्येवात्मनात्मानं यथा त्वमनुपश्यसि ।
एवमेवात्मनात्मानं यथा त्वमनुपश्यसि । एवमेवात्मनात्मानमन्यस्मिन किं न पश्यसि ।
यद्यात्मनि परस्मिंश्च समतामध्यवस्यति । अथ मां कासि कस्येति किमर्थमनुपृच्छसि ।
इदं मे स्यादिदं नेति द्वन्द्वैर्म्मुक्तस्य मैथिल । कासि कस्य कुतो वेति वचनै: किं प्रयोजनं । ११९८०
रिपौ मित्रेऽथ मध्यस्थे विजये सन्धिविग्रहे । कृतवान् यो महीपाल: किं तस्मिन्मुक्तलक्षणं ।
त्रिवर्गं सप्तधा व्यक्तं यो न वेदेह कर्म्मसु । सङ्गवान् यस्त्रिवर्गेण किं तस्मिन् मुक्तलक्षणं ।
तदयुक्तस्य ते मोक्षे योऽभिमानो भवेन्नृप । सुहृद्भि: सन्निवार्य्यस्ते ऽविरक्तस्येव भेषजं ।
तानि तानि तु सञ्चित्य सङ्गस्थानान्यरिन्दम । आत्मनात्मनि संपश्येत् किमन्यन्मुक्तलक्षणं ।
इमान्यन्यानि सूक्ष्माणि मोक्षमाश्रित्य कानिचित् । चतुरङ्गप्रवृत्तानि सङ्गस्थानानि मे शृणु । ११९८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

य इमां पृथिवीं कृत्स्नामेकच्छत्त्रां प्रशास्ति ह । एक एव स वै राजा पुरमध्यावसत्युत ।
तत्पुरे चैकमेवास्य गृहं यदधितिष्ठति । गृहे शयनमप्येकं निशायां यत्र लीयते ।
शय्यार्द्धन्तस्य चाप्यत्र स्त्रीपूर्व्वमधितिष्ठति । तदनेन प्रसङ्गेन फलेनैवेह युज्यते ।
एवमेवोपभोगेषु भोजनाच्छादनेषु च । गुणेषु परिमेयेषु निग्रहानुग्रहं प्रति ।
परतन्त्रः सदा राजा स्वल्पे सोऽपि प्रसज्जते । सन्धिविग्रहयोगे च कुतो राज्ञः स्वतन्त्रता । ११९९०
स्त्रीषु क्रीडाविहारेषु नित्यमस्या स्वतन्त्रता । मन्त्रे चामात्यसमितौ कुतस्तस्य स्वतन्त्रता ।
यदा त्वाज्ञापयत्यन्यांस्तत्रास्योक्ता स्वतन्त्रता । अवशः कार्य्यते तत्र तस्मिन् तस्मिन् क्षणे स्थितः ।
स्वप्नकामो न लभते स्वप्तुं कार्य्यार्थिभिर्ज्जनैः । शयने चाप्यनुज्ञातः सुप्त उत्थाप्यते वशः ।
स्नाह्यालभ पिव प्राश जुहुध्यग्नीन् यजेत्यपि । ब्रवीहि शृणु चापीति विवशः कार्य्यते परैः ।
अभिगम्याभिगम्यैवं याचन्ते सततं नराः । न चाप्युत्सहते दातुं वित्तरक्षी महाजनान् । ११९९५
दाने कोषक्षयोऽप्यस्य वैरं चास्य प्रयच्छतः । क्षणेनास्योपवर्त्तन्ते दोषा वैराग्यकारकाः ।
प्राज्ञान् शूरांस्तथैवाढ्यानेकस्थानेऽपि शङ्कते । भयमप्यभये राज्ञो यैश्च नित्यमुपास्यते ।
तथा चैते प्रदुष्यन्ति राजन् ये कीर्त्तिता मया । तथैवास्य भयन्तेभ्यो जायते पश्य यादृशं ।
सर्व्वः स्वे स्वे गृहे राजा सर्व्वः स्वे स्वे गृहे गृही । निग्रहानुग्रहान् कुर्व्वन् तुल्यो जनक राजभिः ।
पुत्त्रदारास्तथैवात्मा कोषो मित्राणि सञ्चयाः । परैः साधारणा ह्येते तैस्तैरेवास्य हेतुभिः । १२०००
हतो देशः पुरं दग्धं प्रधानः कुञ्जरो मृतः । लोकसाधारणेष्वेषु मिथ्याज्ञानेन तप्यते ।
अमुक्तो मानसैर्दुःखैरिच्छाद्वेषभयोद्भवैः । शिरोरोगादिभी रोगैस्तथैवाभिनिमन्त्रिभिः ।
द्वन्द्वैस्तैस्तैरुपहतः सर्व्वतः परिशङ्कितः । बहुप्रत्यर्थिकं राज्यमुपास्ते गणयन्निशाः ।
तदल्पसुखमत्यर्थं बहुदुःखमसारवत् । तृणाग्निज्वलनप्रख्यं फेनबुद्बुदसन्निभं ।
को राज्यमभिपद्येत प्राप्य चोपशमं लभेत् । ममेदमिति यच्चेदं पुरं राष्ट्रञ्च मन्यसे । १२००५
बलं कोषममात्यांश्च कस्यैतानि न वा नृप । मित्रामात्यपुरं राष्ट्रं दण्डः कोषो महीपतिः ।
सप्ताङ्गस्यास्य राज्यस्य त्रिदण्डस्येव तिष्ठतः । अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः ।
तेषु तेषु हि कालेषु तत्तदङ्गं विशिष्यते । येन यत् सिध्यते कार्य्यं तत् प्राधान्याय कल्पते ।
सप्ताङ्गश्चैव संघातस्त्रयश्चान्ये नृपोत्तम । सम्भूय दशवर्गोऽयं भुङ्क्ते राज्यं हि राजवत् ।
यश्च राजा महोत्साहः क्षत्त्रधर्म्मे रतो भवेत् । स तुष्येद्दशभागेन ततस्त्वन्यो दशावरैः । १२०१०
नास्त्यसाधारणो राजा नास्ति राज्यमराजकं । राज्येऽसति कुतो धर्म्मो धर्म्मेऽसति कुतः परं ।
योऽप्यत्र परमो धर्म्मः पवित्रं राज्यराजयोः । पृथिवी दक्षिणा यस्य सोऽश्वमेधेन युज्यते ।
सोऽहमेतानि कर्म्माणि राजदुःखानि मैथिल । समर्था शतशो वक्तुमथवापि सहस्रशः ।
स्वदेहेनाभिषङ्गो मे कुतः परपरिग्रहे । न मामेवं विधां युक्तामीदृशं वक्तुमर्हसि ।
ननु नाम त्वया मोक्षः कृत्स्नः पञ्चशिखात् श्रुतः । सोपायः सोपनिषदः सोपासङ्गः सनिश्चयः । १२०१५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

तस्य ते मुक्तसंज्ञस्य पाशानाक्रम्य तिष्ठतः। छत्रादिषु विशेषेषु पुनः सङ्गः कथं नृप।
श्रुतन्ते न श्रुतं मन्ये मृषावापि श्रुतं श्रुतं। अथवा श्रुतसङ्काशं श्रुतमन्यत् श्रुतं त्वया।
अथापीमासु संज्ञासु लौकिकीषु प्रतिष्ठसे। अभिषङ्गावरोधाभ्यां बद्धस्त्वं प्राकृतो यथा।
सत्त्वेनानुप्रवेशो हि योऽयं त्वयि कृतो मया। किं तवापकृतं तत्र यदि मुक्तोऽसि सर्व्वशः।
नियमो ह्येष वर्णेषु यतीनां वन्यवासिता। शून्यमावेशयन्त्या च मया किं कस्य दूषितं। १२०२०
न पाणिभ्यां न बाहुभ्यां पादोरुभ्यां न चानघ। न गात्रावयवैरन्यैः स्पृशामि त्वां नराधिप।
कुले महति जातेन ह्रीमता दीर्घदर्शिना। नैतत् सदसि वक्तव्यं सद्वाऽसद्वा मिथः कृतं।
ब्राह्मणा गुरवस्त्वेमे तथा मान्या गुरूत्तमाः। त्वञ्चाथ गुरुरप्येषामेवमन्योन्यगौरवं।
तदेवमनुसंदृश्य वाच्यावाच्यं परीक्षता। स्त्रीपुंसोः समवायोऽयं त्वया वाच्यो न संसदि।
यथा पुष्करपर्णस्थं जलं तत्पर्णमस्पृशत्। तिष्ठत्यस्पृशती तद्वत्त्वयि वत्स्यामि मैथिल। १२०२५
यदि चाप्यस्पृशन्त्या मे स्पर्शं जानासि किञ्चन। ज्ञानं कृतमबीजन्ते कथन्तेनेह भिक्षुणा।
स गार्हस्थ्याच्च्युतस्त्वं मोक्षं चानाप्य दुर्व्विदं। उभयोरन्तराले वै वर्त्तसे मोक्षवार्त्तिकः।
नहि मुक्तस्य मुक्तेन ज्ञस्यैकत्वपृथक्त्वयोः। भावाभावसमायोगे जायते वर्णसङ्करः।
वर्णाश्रमाः पृथक्त्वेन दृष्टार्थस्यापृथक्त्विनः। नान्यदन्यदिति ज्ञात्वा नान्यदन्यत्र वर्त्तते।
पाणौ कुण्डं तथा कुण्डे पयः पयसि मक्षिका। आश्रिताश्रययोगेन पृथक्त्वेनाश्रिताः पुनः। १२०३०
न तु कुण्डे पयोभावः पयश्चापि न मक्षिका। स्वयमेवाप्नुवन्त्येते भावाननुपराश्रयं।
पृथक्त्वादाश्रमाणाञ्च वर्णान्यत्वे तथैव च। परस्परपृथक्त्वाच्च कथन्ते वर्णसङ्करः।
नास्मि वर्णोत्तमा जात्या न वैश्या नावरा तथा। तव राजन् सवर्णास्मि शुद्धयोनिरविप्लुता।
प्रधानो नाम राजर्षिर्व्यक्तन्ते श्रोत्रमागतः। कुले तस्य समुत्पन्नां सुलभां नाम विद्धि मां।
द्रोणस्य शतशृङ्गस्य चक्रद्वारस्य पर्व्वतः। मम सत्रेषु पूर्व्वेषां चिता मघवता सह। १२०३५
साऽहं तस्मिन् कुले जाता भर्त्तर्य्यसति मद्विधे। विनीता मोक्षधर्म्मेषु चराम्येका मुनिव्रतं।
नास्मि सत्रप्रतिच्छन्ना न परस्वापहारिणी। न धर्म्मसङ्करकरी स्वधर्म्मेऽस्मि धृतव्रता।
नास्थिरा स्वप्रतिज्ञायां नासमीक्ष्य प्रवादिनी। नासमीक्ष्य गता चेह त्वत्सकाशं जनाधिप।
मोक्षे ते भाविता बुद्धिं श्रुत्वाहं कुशलैषिणी। तव मोक्षस्य चाप्यस्य जिज्ञासार्थमिहागता।
न वर्गस्था ब्रवीम्येतत् स्वपक्षपरपक्षयोः। मुक्तो व्यायच्छते यस्य शान्तो यस्य न शाम्यति। १२०४०
यथा शून्ये पुरागारे भिक्षुरेकां निशां वसेत्। तथाहं त्वच्छरीरेऽस्मिन्निमां वत्स्यामि शर्व्वरीं।
साऽहं मानप्रदानेन वागातिथ्येन चार्च्चिता। सुप्तासु शरणं प्रीता श्वो गमिष्यामि मैथिल।
॥ भीष्म उवाच ॥ इत्येतानि स वाक्यानि हेतुमन्त्यर्थवन्ति च। श्रुत्वा नाधिजगौ राजा किञ्चिदन्यदतः परं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि सुलभाजनकसंवादे द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥
॥ युधिष्ठिर उवाच ॥ कथं निर्व्वेदमापन्नः शुको वैयासकिः पुरा। एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अव्यक्ताव्यक्ततत्त्वानां निश्चयं बुद्धिनिश्चयं। वक्तुमर्हसि कौरव्य देवस्याजस्य या कृतिः । १२०४५
॥ भीष्म उवाच ॥ प्राकृतेन सुवृत्तेन चरन्तमकुतोभयं। अध्याप्य कृत्स्नं स्वाध्यायमन्वशाद्वै पिता सुतं।
॥ व्यास उवाच ॥ धर्म्मं पुत्त्र निषेवस्व सुतीक्ष्णौ च हिमातपौ। क्षुत्पिपासे च वायुञ्च जय नित्यं जितेन्द्रियः ।
सत्यमार्ज्जवमक्रोधमनसूयां दमं तपः । अहिंसाञ्चानृशंस्यञ्च विधिवत् परिपालय ।
सत्ये तिष्ठ रतो धर्म्मे हित्वा सर्व्वमनार्ज्जवं। देवतातिथिशेषेण यात्रां प्राणस्य संलिह।
फेनमात्रोपमे देहे जीवे शकुनिवत्स्थिते। अनित्ये प्रियसंवासे कथं स्वपिषि पुत्त्रक । १२०५०
अप्रमत्तेषु जाग्रत्सु नित्ययुक्तेषु शत्रुषु । अन्तरं लिप्समानेषु बालस्त्वं नावबुध्यसे ।
अहःसु गण्यमानेषु क्षीयमाणे तथायुषि। जीविते लिख्यमाने च किमुत्थाय न धावसि ।
ऐहलौकिकमीहन्ते मांसशोणितवर्द्धनं। पारलौकिककार्य्येषु प्रसुप्ता भृशनास्तिकाः।
धर्म्माय येऽभ्यसूयन्ति बुद्धिमोहान्विता नराः। अपथागच्छतान्तेषामनुयातापि पीड्यते।
ये तु तुष्टाः श्रुतिपरा महात्मानो महाबलाः। धर्म्म्यं पन्थानमारूढास्तानुपास्स्व च पृच्छ च। १२०५५
उपधार्य्य मतन्तेषां बुधानां धर्म्मदर्शिनां। नियच्छ परया बुद्ध्या चित्तमुत्पथगामि वै।
अद्यकालिकया बुद्ध्या दूरे श्व इति निर्भयाः। सर्व्वभक्षा न पश्यन्ति कर्म्मभूमिमचेतसः ।
धर्म्मनिःश्रेणिमास्थाय किञ्चित् किञ्चित् समारुह। कोषकारवदात्मानं वेष्टयन्नानुबुध्यसे।
नास्तिकं भिन्नमर्य्यादं कुलपातमिव स्थितं। वामतः कुरु विस्रब्धो नरं वेणुमिवोद्धृतं।
कामं क्रोधञ्च मृत्युञ्च पञ्चेन्द्रियजलां नदीं। नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर । १२०६०
मृत्युनाऽभ्याहते लोके जरया परिपीडिते। अमोघासु पतन्तीषु धर्म्मपोतेन सन्तर ।
तिष्ठन्तञ्च शयानञ्च मृत्युरन्वेषते यदा। निर्वृतिं लभते कस्मादकस्मान्मृत्युनाशितः ।
सञ्चिन्वानकमेवैनं कामानामवितृप्तकं। वृकीवोरणमासाद्य मृत्युरादाय गच्छति ।
क्रमशः सञ्चितशिखो धर्म्मबुद्धिमयो महान्। अन्धकारे प्रवेष्टव्यं दीपो यत्नेन धार्य्यतां।
सम्पतन् देहजालानि कदाचिदिह मानुषे। ब्राह्मण्यं लभते जन्तुस्तत्पुत्त्र परिपालय । १२०६५
ब्राह्मणस्य तु देहोऽयं न कामार्थाय जायते। इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखं।
ब्राह्मण्यं बहुभिरवाप्यते तपोभिस्तल्लब्ध्वा न रतिपरेण हेलितव्यं। स्वाध्याये तपसि दमे च नित्ययुक्तः क्षेमार्थी कुशलपरः सदा यतस्व ।
अव्यक्तप्रकृतिरयं कलाशरीरः सूक्ष्मात्मा क्षणत्रुटिशोनिमेषरोमा । सम्यास्यः समबलशुक्लकृष्णनेत्रो मासाङ्गो द्रवति वयो हयो नराणां।
तं दृष्ट्वा प्रसृतमजस्रमुग्रवेगं गच्छन्तं सततमिहानवेक्ष्यमाणं। चक्षुस्ते यदि न परप्रणेतृनेयं धर्म्मे ते भवतु मनः परं निशम्य।
ये चात्र प्रचलितधर्म्मकामवृत्ताः क्रोशन्तः सततमनिष्टसंप्रयोगाः। क्लिश्यन्तः परिगतवेदनाशरीरा बह्वीभिः सुभृशमधर्म्मकारणाभिः । १२०७०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

राजा सदा धर्म्मपरः शुभाशुभस्य गोप्ता समीक्ष्य सुकृतिना दधाति लोकान्। बहुविधमपि चरति प्रविशति सुखमनुगतं निरवद्यं।

श्वानो भीषणकाया अयोमुखानि वयांसि बलगृध्रकुलपक्षिणाञ्च संघाः। नरकदने रुधिरपा गुरुवचननुदमुपरतं विशन्त्य सन्तः।

मर्य्यादानियता स्वयम्भुवा य इहेमाः प्रभिनत्ति दशगुणा मनोनुगत्वात्। निवसति भृशमसुखं पितृविषयविपिनमवगाह्य स पापः।

यो लुब्धः सुभृशं प्रियानृतश्च मनुष्यः सततनिकृतिवचनाभिरतिः स्यात्। उपनिधिभिरसुखकृत्सपरमनिरयगोभृशमसुखमं भवति दुष्कृतकर्म्मा।

उष्णां वैतरणीं नदीमवगाढोऽसिपत्त्रवनभिन्नगात्त्रः। परशुवनशयोनिपतितो वसति च महानिरये भृशार्त्तः। १२०७५

महापदानि कत्थसे न चाप्यवेक्षसे परं। चिरस्य मृत्युकारिकामनागतां न बुध्यसे।

प्रयायतां किमास्यते समुत्थितं महद्भयं। अतिप्रमाथि दारुणं सुखस्य संविधीयतां।

पुरामृतः प्रणीयसे यमस्य राजशासनात्। त्वमन्तकायदारुणैः प्रयत्नमार्ज्जवे कुरु।

पुरा समूलबान्धवं प्रभुर्हरत्यदुःखवित्। तवेह जीवितं यमो न चास्ति तस्य वारकः।

पुराभिवाति मारुतो यमस्य यः पुरःसरः। पुरैक एव नीयसे कुरुष्व साम्परायिकं। १२०८०

पुरा सहि क एव ते प्रवाति मारुतोऽन्तकः। पुरा च विभ्रमन्ति ते दिशोमहाभयागमे।

श्रुतिश्च संनिरुध्यते पुरा तवेह पुत्त्रक। समाकुलस्य गच्छतः समाधिमुत्तमं कुरु।

शुभाशुभे पुराकृते प्रमादकर्म्मविप्लुते। स्मरन् पुरा न तप्यसे विधित्स्व केवलं निधिं।

पुरा जरा कलेवरं विजर्ज्जरीकरोति ते। बलाङ्गरूपहारिणी निधत्स्व केवलं निधिं।

पुरा शरीरमन्तको भिनत्ति रोगसारथिः। प्रसह्य जीवितक्षये तपो महत्समाचर। १२०८५

पुरा वृका भयङ्करा मनुष्यदेहगोचराः। अभिद्रवन्ति सर्व्वतो यतस्व पुण्यशीलने।

पुरान्धकारमेककोनु पश्यसि त्वरस्व वै। पुरा हिरण्मयान्नगान्निरीक्षसेऽद्रिमूर्द्धनि।

पुरा कुसङ्गतानि ते सुहृन्मुखाश्च शत्रवः। विचालयन्ति दर्शनात् घटस्व पुत्त्र यत् परं।

धनस्य यस्य राजतो भयं नचास्ति चौरतः। मृतञ्च यन्न मुञ्चति समर्ज्जयस्व तद्धनं।

न तत्र संविभज्यते स्वकर्म्मभिः परस्परं। यदेव यस्य यौतकं तदेव तत्र सोऽश्नुते। १२०९०

परत्र येन जीव्यते तदेव पुत्त्र दीयतां। धनं यदक्षरं ध्रुवं समर्ज्जयस्व तत्स्वयं।

न यावदेव पच्यते महाजनस्य यावकं। अपक्व एव यावके पुरा प्रलीयसे त्वर।

न मातृपुत्त्रबान्धवा न संस्तुतः प्रियोजनः। अनुव्रजन्ति सङ्कटे व्रजन्तमेकपातिनं।

यदेव कर्म्म केवलं पुराकृतं शुभाशुभं। तदेव पुत्त्र सार्थिकं भवत्यमुत्र गच्छतः।

हिरण्यरत्नसञ्चयाः शुभाशुभेन सञ्चिताः। न तस्य देहसंक्षये भवन्ति कार्य्यसाधकाः। १२०९५

परत्रगामि कस्य ते कृताकृतस्य कर्म्मणः। न साक्षि आत्मना समो नृणामिहास्ति कश्चन।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मनुष्यदेहशून्यकं भवत्यमुत्र गच्छतः। प्रविश्य बुद्धिचक्षुषा प्रदृश्यते हि सर्व्वशः।
इहाग्निसूर्य्यवायवः शरीरमाश्रितास्त्रयः। तएव तस्य साक्षिणो भवन्ति धर्म्मदर्शिनः।
अहर्निशेषु सर्व्वतः स्पृशत्सु सर्व्वचारिषु। प्रकाशगूढवृत्तिषु स्वधर्म्ममेव पालय।
अनेकपारिपान्थिके विरूपरौद्रमाक्षिके। स्वमेव कर्म्म रक्षतां स्वकर्म्म तत्र गच्छति। १२१००
न तत्र संविभज्यते स्वकर्म्मणा परस्परं। तथा कृतं स्वकर्म्मजं तदेव भुज्यते फलं।
यथाप्सरोगणाः फलं सुखं महर्षिभिः सह। तथाप्नुवन्ति कर्म्मजं विमानकामगामिनः।
यथेह यत् कृतं शुभं विपाप्मभिः कृतात्मभिः। तदाप्नुवन्ति मानवास्तथा विशुद्धयोनयः
प्रजापतेः सलोकतां वृहस्पतेः शतक्रतोः। व्रजन्ति ते परां गतिं गृहस्थधर्म्मसेतुभिः।
सहस्रशोऽप्यनेकशः प्रवक्तुमुत्सहाम ते। अबुद्धिमोहनं पुनः प्रभुर्विनाय पावकः। १२१०५
गता त्रिरष्टवर्षता ध्रुवोऽसि पञ्चविंशकः। कुरुष्व धर्म्मसञ्चयं वयो हि तेऽतिवर्त्तते।
पुराकरोति सोऽन्तकः प्रमादगोऽसुखां चमूं। यथा गृहीतमुत्थितस्त्वरस्व धर्म्मपालने।
यथा त्वमेव पृष्ठतस्त्वमग्रतो गमिष्यसि। तथा गतिं गमिष्यतः किमात्मना परेण वा।
यदेकपातिनां सतां भवत्यमुत्र गच्छतां। भयेषु साम्परायिकं निधत्स्व केवलं निधिं।
सकूलमूलबान्धवं प्रभुर्हरत्यसङ्गवान्। न सन्ति यस्य वारकाः कुरुष्व धर्म्मसन्निधिं। १२११०
इदं निदर्शनं मया तवेह पुत्र साम्प्रतं। स्वदर्शनानुमानतः प्रवर्णितं कुरुष्व तत्।
दधाति यः स्वकर्म्मणा ददाति यस्य कस्यचित्। अबुद्धिमोहजैर्गुणैः स एक एव युज्यते।
श्रुतं समस्तमश्नुते प्रकुर्व्वतः शुभाः क्रियाः। तदेतदर्थदर्शनं कृतज्ञमर्थसंहितं।
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः। छित्त्वैतां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः।
किन्ते धनेन वन्धुभिस्ते किन्ते पुत्रैः पुत्त्रक यो मरिष्यसि। आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताश्च सर्व्वे। १२११५
श्वः कार्य्यमद्य कुर्व्वीत पूर्व्वाह्णे चापराह्णिकं। न हि प्रतीक्षते मृत्युः कृतं वास्य नवाकृतं।
अनुगम्य विनाशान्ते निवर्त्तन्तेह बान्धवाः। अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा।
नास्तिकान् निरनुक्रोशान् नरान् पापमते स्थितान्। वामतः कुरु विस्रब्धं परं प्रेप्सुरतन्द्रितः।
एवमभ्याहते लोके कालेनोपनिपीडिते। सुमहद्धैर्य्यमालम्ब्य धर्म्मं सर्व्वात्मना कुरु।
अथेमं दर्शनोपायं सम्यग्यो वेत्ति मानवः। सम्यक् स्वधर्म्मं कृत्वेह परत्र सुखमश्नुते। १२१२०
न देहभेदे मरणं विजानतां न च प्रणाशः स्वनुपालिते पथि। धर्म्मं हि यो वर्द्धयते स पण्डितो य एव धर्म्माच्च्यवते स मुह्यति।
प्रयुक्तयोः कर्म्मपथि स्वकर्म्मणोः फलं प्रयोक्ता लभते यथा कृतं। निहीनकर्म्मा निरयं प्रपद्यते त्रिविष्टपं गच्छति धर्म्मपारगः।
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं। तथात्मानं समादध्यात् भ्रश्यते न पुनर्यथा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्य नोत्क्रामति मतिः स्वर्गमार्गानुसारिणी । तमाहुः पुण्यकर्म्माणमशोच्यं पुत्त्रबान्धवैः ।
यस्य नोपहता बुद्धिर्निश्चये ह्यवलम्बते । स्वर्गे कृतावकाशस्य नास्ति तस्य महद्भयं । १२१२५
तपोवनेषु ये जातास्तत्रैव निधनङ्गताः । तेषामल्पतरो धर्म्मः कामभोगानजानतां ।
यस्तु भोगान् परित्यज्य शरीरेण तपश्चरेत् । न तेन किञ्चिन्न प्राप्तं तन्मे बहुमतं फलं ।
मातापितृसहस्राणि पुत्त्रदारशतानि च । अनागतान्यतीतानि कस्य ते कस्य वा वयं ।
अहमेको न मे कश्चिन्नाहमन्यस्य कस्य चित् । न तं पश्यामि यस्याहं तं न पश्यामि यो मम ।
न तेषां भवता कार्य्यं न कार्य्यन्तव तैरपि । स्वकृतैस्तानि यातानि भवांश्चैव गमिष्यति । १२१३०
इह लोके हि धनिनां स्वजनः स्वजनायते । स्वजनस्तु दरिद्राणां जीवतामपि नश्यति ।
संचिनोत्यशुभं कर्म्म कलत्त्रापेक्षया नरः । ततः क्लेशमवाप्नोति परत्रेह तथैव च ।
पश्यति छिन्नभूतं हि जीवलोकं स्वकर्म्मणा । तत्कुरुष्व तथा पुत्त्र कृत्स्नं यत्समुदाहृतं ।
तदेतत् संप्रदृश्यैव कर्म्मभूमिं प्रपश्यता । शुभान्याचरितव्यानि परलोकमभीप्सता ।
मासर्त्तुसंज्ञापरिवर्त्तकेन सूर्य्याग्निना रात्त्रिदिवेन्धनेन । स्वकर्म्मनिष्ठाफलसाक्षिकेण भूतानि कालः पचति प्रसह्य । १२१३५
धनेन किं यन्न ददाति चाश्नुते बलेन किं येन रिपुं न बाधते । श्रुतेन किं येन न धर्म्ममाचरेत् किमात्मना यो न जितेन्द्रियो वशी ।
॥ भीष्म उवाच ॥ इदं द्वैपायनवचो हितमुक्तं निशम्य तु । शुको गतः परित्यज्य पितरं मोक्षदैशिकं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पावकोनाम त्रयोविंशत्यधिकत्रिशतोऽध्यायः ॥ २२३ ॥
॥ युधिष्ठिर उवाच ॥ यद्यस्ति दत्तमिष्टं वा तपस्तप्तं तथैव च । गुरूणां वापि शुश्रूषा तन्मे ब्रूहि पितामह ।
॥ भीष्म उवाच ॥ आत्मनानर्थयुक्तेन पापे निविशते मनः । स कर्म्म कलुषं कृत्वा क्लेशे महति धीयते ।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयं । मृतेभ्यः प्रमृता यान्ति दरिद्राः पापकर्म्मिणः । १२१४०
उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखं । श्रद्दधानाश्च दान्ताश्च धनस्थाः शुभकारिणः ।
व्यालकुञ्जरदुर्गेषु सर्पचौरभयेषु च । हस्तावापेन गच्छन्ति नास्तिकाः किमतः परं ।
प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः । क्षेम्यमात्मवतां मार्गमास्थिता दत्तदक्षिणाः ।
पुलाका इव धान्येषु पूत्यण्डा इव पक्षिषु । तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणं ।
सुशीघ्रमपि धावन्तं विधानमनुधावति । शेते सह शयानेन येन येन यथाकृतं । १२१४५
पापं तिष्ठति तिष्ठन्तं धावन्तमनुधावति । करोति कुर्व्वतः कर्म्म छायेवानुविधीयते ।
येन येन यथा यद्यत् पुरा कर्म्म सुनिश्चितं । तत्तदेवोत्तरं भुङ्क्ते नित्यं विहितमात्मना ।
समानकर्म्मविक्षेपविधानपरिरक्षणं । भूतग्राममिमं कालः समन्तादपकर्षति ।
अचोद्यमानानि यथा पुष्पाणि च फलानि च । स्वं कालं नातिवर्त्तन्ते तथा कर्म्म पुरा कृतं ।
सम्मानश्चावमानश्च लाभोऽलाभः क्षयाव्ययौ । प्रवृत्ता न निवर्त्तन्ते निधनान्ताः पदे पदे । १२१५०
आत्मना विहितं दुःखमात्मना विहितं सुखं । गर्भशय्यामुपादाय भजते पूर्व्वदैहिकं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-IKS Grant-2 Equipment Heritage Foundation, Jalgaon

बालो युवा वा वृद्धश्च यत् करोति शुभाशुभं। तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि।
यथा धेनुसहस्रेषु वत्सो विन्दति मातरं। तथा पूर्व्वकृतं कर्म्म कर्त्तारमनुगच्छति।
मलिनं हि यथा वस्त्रं पश्चात् शुध्यति वारिणा। उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकं।
दीर्घकालेन तपसा सेवितेन महामते। धर्म्मनिर्धूतपापानां संसिध्यन्ते मनोरथाः। १२१५५
शकुनानामिवाकाशे मत्स्यानामिव चोदके। पदं यथा न दृश्येत तथा पुण्यकृतां गतिः।
अलमन्यैरुपालम्भैः कीर्त्तितैश्च व्यतिक्रमैः। पेशलञ्चानुरूपञ्च कर्त्तव्यं हितमात्मनः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि धर्म्ममूलिकोनाम चतुर्विंशत्यधिकत्रिशतोऽध्यायः॥ ३२४॥
॥ युधिष्ठिर उवाच॥ कथं व्यासस्य धर्म्मात्मा शुको जज्ञे महातपाः। सिद्धिञ्च परमां प्राप्तस्तन्मे ब्रूहि पितामह।
कस्याञ्चोत्पादयामास शुकं व्यासस्तपोधनः। न ह्यस्य जननीं विद्म जन्म चाग्र्यं महात्मनः।
कथञ्च बालस्य सतः सूक्ष्मज्ञाने गता मतिः। यथा नान्यस्य लोकेऽस्मिन् द्वितीयस्येह कस्यचित्। १२१६०
एतदिच्छाम्यहं श्रोतुं विस्तरेण महामते। नहि मे तृप्तिरस्तीह शृण्वतोऽमृतमुत्तमं।
माहात्म्यमात्मयोगञ्च विज्ञानञ्च शुकस्य ह। यथावदनुपूर्व्वेण तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः। ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्।
तपोमूलमिदं सर्व्वं यन्मां पृच्छसि पाण्डव। तदिन्द्रियाणि संयम्य तपो भवति नान्यथा।
इन्द्रियाणां प्रसङ्गेन दोषमर्च्छत्यसंशयं। संनियम्य तु तान्येव सिद्धिमाप्नोति मानवः। १२१६५
अश्वमेधसहस्रस्य वाजपेयशतस्य च। योगस्य कलया तात न तुल्यं विद्यते फलं।
अत्र ते वर्त्तयिष्यामि जन्मयोगफलं यथा। शुकस्याग्र्यां गतिञ्चैव दुर्व्विदामकृतात्मभिः।
मेरुशृङ्गे किल पुरा कर्णिकारवनायुते। विजहार महादेवो भीमैर्भूतगणैर्वृतः।
शैलराजसुता चैव देवी तत्राभवत् पुरा। तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनस्तदा।
योगेनात्मानमाविश्य योगधर्म्मपरायणः। धारयन् स तपस्तेपे पुत्त्रार्थं कुरुसत्तम। १२१७०
अग्नेर्भूमेरपां वायोरन्तरीक्षस्य वा विभो। धैर्य्येण सम्मितः पुत्त्रो मम भूयादिति स्म ह।
सङ्कल्पेनाथ योगेन दुष्प्रापमकृतात्मभिः। वरयामास देवेशमास्थितस्तप उत्तमं।
अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः। आराधयन्महादेवं बहुरूपमुमापतिं।
तत्र ब्रह्मर्षयश्चैव सर्व्वे राजर्षयस्तथा। लोकपालाश्च लोकेशं साध्याश्च वसुभिः सह।
आदित्याश्चैव रुद्राश्च दिवाकरनिशाकरौ। वासवो मरुतश्चैव सागराः सरितस्तथा। १२१७५
अश्विनौ देवगन्धर्व्वास्तथा नारदपर्व्वतौ। विश्वावसुश्च गन्धर्व्वः सिद्धाश्चाप्सरसस्तथा।
तत्र रुद्रो महादेवः कर्णिकारमयीं शुभां। धारयानः स्रजं भाति ज्योत्स्नामिव निशाकरः।
तस्मिन् दिव्ये वने रम्ये देवदेवर्षिसङ्कुले। आस्थितः परमं योगमृषिः पुत्त्रार्थमच्युतः।
न चास्य हीयते प्राणो न ग्लानिरुपजायते। त्रयाणामपि लोकानान्तदद्भुतमिवाभवत्।
जटाश्च तेजसा तस्य वैश्वानरशिखोपमाः। प्रज्वलन्त्यः स्म दृश्यन्ते युक्तस्यामिततेजसः। १२१८०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मार्कण्डेयो हि भगवानेतदाख्यातवान्मम। स देवचरितानीह कथयामास मे सदा।
एता अद्यापि कृष्णस्य तपसा तेन दीपिताः। अग्निवर्णा जटास्तात प्रकाशन्ते महात्मनः।
एवंविधेन तपसा तस्य भक्त्या च भारत। महेश्वरः प्रसन्नात्मा चकार मनसा मतिं।
उवाच चैवं भगवांस्त्र्यम्बकः प्रहसन्निव। एवंविधस्ते तनयो द्वैपायन भविष्यति।
यथा ह्यग्निर्यथा वायुर्यथा भूमिर्यथा जलं। यथा च खं तथा शुद्धो भविता ते सुतो महान्। १२१८५
तद्भावभावी तद्बुद्धिस्तदात्मा तदपाश्रयः। तेजसावृत्य लोकांस्त्रीन् यशः प्राप्स्यति ते सुतः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकोत्पत्तौ पञ्चविंशत्यधिकत्रिशततोऽध्यायः॥ ३२५॥
॥ भीष्म उवाच ॥ स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः। अरणीसहिते गृह्य ममन्थाग्निचिकीर्षया।
अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा। घृताचीन्नामाप्सरसमपश्यद्भगवानृषिः।
ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः। अभवद्भगवान् व्यासो वने तस्मिन् युधिष्ठिर।
सा च दृष्ट्वा तदा व्यासं कामसंविग्नमानसं। शुकीभूत्वा महाराज घृताची समुपागमत्। १२१९०
स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृतां। शरीरजेनानुगतः सर्व्वगात्रातिगेन ह।
स तु धैर्य्येण महता निगृह्णन् हृच्छयं मुनिः। न शशाक नियन्तुन्तत् व्यासः प्रविसृतं मनः।
भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः। यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया।
अरण्यामेव सहसा तस्य शुक्रमवापतत्। सोऽविशङ्केन मनसा तथैव द्विजसत्तमः।
अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृप। शुक्रे निर्म्मथ्यमाने स शुको जज्ञे महातपाः। १२१९५
परमर्षिर्म्महायोगी अरणीगर्भसम्भवः। यथाऽध्वरे समिद्धोऽग्निर्भाति हव्यमुदावहन्।
तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा। बिभ्रत् पितुश्च कौरव्य रूपवर्णमनुत्तमं।
बभौ तदा भावितात्मा विधूमइव पावकः। तं गङ्गा सरितां श्रेष्ठा मेरुपृष्ठे जनेश्वर।
स्वरूपिणी तदाभ्येत्य स्नापयामास वारिणा। अन्तरीक्षाच्च कौरव्य दण्डः कृष्णाजिनञ्च ह।
पपात भूमिं राजेन्द्र शुकस्यार्थे महात्मनः। जेगीयन्ते स्म गन्धर्व्वा ननृतुश्चाप्सरोगणाः। १२२००
देवदुन्दुभयश्चैव प्रावाद्यन्त महास्वनाः। विश्वावसुश्च गन्धर्व्वस्तथा तुम्बुरुनारदौ।
हाहाहूहूश्च गन्धर्व्वौ तुष्टुवुः शुकसम्भवं। तत्र शक्रपुरोगाश्च लोकपालाः समागताः।
देवा देवर्षयश्चैव तथा ब्रह्मर्षयोऽपि च। दिव्यानि सर्व्वपुष्पाणि प्रववर्ष च मारुतः।
जङ्गमाजङ्गमञ्चैव प्रहृष्टमभवज्जगत्। तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः।
जातमात्रं मुनेः पुत्त्रं विधिनोपानयत्तदा। तस्य देवेश्वरः शक्रो दिव्यमद्भुतदर्शनं। १२२०५
ददौ कमण्डलुं प्रीत्या देववासांसि वा विभो। हंसाश्च शतपत्राश्च सारसाश्च सहस्रशः।
प्रदक्षिणमवर्त्तन्त शुकाश्चाषाश्च भारत। आरणेयस्ततो दिव्यं प्राप्य जन्म महाद्युतिः।
तत्रैवोवास मेधावी व्रतचारी समाहितः। उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः।
उपतस्थुर्म्महाराज यथास्य पितरन्तथा। बृहस्पतिञ्च वव्रे स वेदवेदाङ्गभाष्यवित्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उपाध्यायं महाराज धर्म्ममेवानुचिन्तयन् । सोऽधीत्य निखिलान् वेदान् सरहस्यान् ससंग्रहान् । १२२१०
इतिहासञ्च कार्त्स्न्येन राजशास्त्राणि वा विभो । गुरवे दक्षिणां दत्त्वा समावृत्तो महामुनिः ।
उग्रन्तपः समारेभे ब्रह्मचारी समाहितः । देवतानामृषीणाञ्च बाल्येऽपि स महातपाः ।
सम्मन्त्रणीयो मान्यश्च ज्ञानेन तपसा तथा । न त्वस्य रमते बुद्धिराश्रमेषु नराधिप ।
त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्म्मानुदर्शिनः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकोत्पत्तौ षड्विंशत्यधिकत्रिशतोऽध्यायः ॥ ३२६ ॥

॥ भीष्म उवाच ॥ स मोक्षमनुचिन्त्यैव शुकः पितरमभ्यगात् । प्राहाभिवाद्य च गुरुं श्रेयोऽर्थी विनयान्वितः । १२२१५
मोक्षधर्म्मेषु कुशलो भगवान् प्रब्रवीतु मे । यथा मे मनसः शान्तिः परमा सम्भवेत् प्रभो ।
श्रुत्वा पुत्त्रस्य तु वचः परमर्षिरुवाच तं । अधीष्व पुत्त्र मोक्षं वै धर्म्मांश्च विविधानपि ।
पितुर्नियोगाज्जग्राह शुको धर्म्मभृताम्वरः । योगशास्त्रञ्च निखिलं कापिलञ्चैव भारत ।
स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमं । मेने पुत्त्रं यदा व्यासो मोक्षधर्म्मविशारदं ।
उवाच गच्छेति तदा जनकं मिथिलेश्वरं । स ते वक्ष्यति मोक्षार्थं निखिलं मिथिलेश्वरः । १२२२०
पितुर्नियोगमादाय जगाम मिथिलां नृप । प्रष्टुं धर्म्मस्य निष्ठां वै मोक्षस्य च परायणं ।
उक्तश्च मानुषेण त्वं पथा गच्छस्वविस्मितः । न प्रभावेण गन्तव्यमन्तरीक्षचरेण वै ।
आर्ज्जवेनैव गन्तव्यं न सुखान्वेषिणा तथा । नान्वेष्टव्या विशेषेण विशेषा हि प्रसङ्गिनः ।
अहङ्कारो न कर्त्तव्यो याज्ये तस्मिन्नराधिपे । स्थातव्यञ्च वशे तस्य स ते छेत्स्यति संशयं ।
स धर्म्मकुशलो राजा मोक्षशास्त्रविशारदः । याज्यो मम स यद्ब्रूयात्तत् कार्य्यमविशङ्कया । १२२२५
एवमुक्तः स धर्म्मात्मा जगाम मिथिलां मुनिः । पद्भ्यां शक्तोऽन्तरीक्षेण क्रान्तुं पृथ्वीं ससागरां ।
स गिरींश्चाप्यतिक्रम्य नदीतीर्थसरांसि च । बहुव्यालमृगाकीर्णा ह्यटवीश्च वनानि च ।
मेरोर्हरेश्च द्वे वर्षे वर्षं हैमवतन्ततः । क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत् ।
स देशान् विविधान् पश्यंश्चीनहूणनिषेवितान् । आर्य्यावर्त्तमिमं देशमाजगाम महामुनिः ।
पितुर्व्वचनमाज्ञाय तमेवार्थं विचिन्तयन् । अध्वानं सोऽतिचक्राम खचरः खे चरन्निव । १२२३०
पत्तनानि च रम्याणि स्फीतानि नगराणि च । रत्नाणि च विचित्राणि पश्यन्नपि न पश्यति ।
उद्यानानि च रम्याणि तथैवायतनानि च । पुण्याणि चैव रत्नानि सोऽत्यक्रामदथाध्वगः ।
सोऽचिरेणैव कालेन विदेहानाससाद ह । रक्षितान् धर्म्मराजेन जनकेन महात्मना ।
तत्र ग्रामान् बहून् पश्यन् बह्वन्नरसभोजनान् । पल्लीघोषान् समृद्धांश्च बहुगोकुलसङ्कुलान् ।
स्फीतांश्च शालियवैर्हंससारससेवितान । पद्मिनीभिश्च शतशः श्रीमतीभिरलङ्कृतान् । १२२३५
स विदेहानतिक्रम्य समृद्धजनसेवितान् । मिथिलोपवनं रम्यमाससाद समृद्धिमत् ।
हस्त्यश्वरथसङ्कीर्णं नरनारीसमाकुलं । पश्यन्नपश्यन्निव तत् समतिक्राम्यदच्युतः ।
मनसा तं वहन् भारं तमेवार्थं विचिन्तयन् । आत्मारामः प्रसन्नात्मा मिथिलामाससाद ह ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

तस्या द्वारं समासाद्य निःशङ्कः प्रविवेश ह। तत्रापि द्वारपालास्तमुग्रवाचा न्यषेधयन्।
तथैव च शुकस्तत्र निर्म्मन्युः समतिष्ठत। नचातपाध्वसन्तप्तः क्षुत्पिपासाश्रमान्वितः। १२२३०
प्रताम्यति ग्लायति वा नापैति च तथातपात्। तेषान्तु द्वारपालानामेकः शोकसमन्वितः।
मध्यङ्गतमिवादित्यं दृष्ट्वा शुकमिव स्थितं। पूजयित्वा यथान्यायमभिवाद्य कृताञ्जलिः।
प्रावेशयत्ततः कक्षां द्वितीयां राजवेश्मनः। तत्रासीनः शुकस्तात मोक्षमेवान्वचिन्तयत्।
छायायामातपे चैव समदर्शी समद्युतिः। तं मुहूर्त्तादिवागम्य राज्ञो मन्त्री कृताञ्जलिः।
प्रावेशयत्ततः कक्षां तृतीयां राजवेश्मनः। तत्रान्तःपुरसम्बद्धं महच्चैत्ररथोपमं। १२२३५
सुविभक्तजलाक्रीडं रम्यं पुष्पितपादपं। शुकं प्रावेशयन्मन्त्री प्रमदावनमुत्तमं।
स तस्यासनमादिश्य निश्चक्राम ततः पुनः। तं चारुवेशाः सुश्रोण्यस्तरुण्यः प्रियदर्शनाः।
सूक्ष्मरक्ताम्बरधरास्तप्तकाञ्चनभूषणाः। संलापोल्लापकुशला नृत्यगीतविशारदाः।
स्मितपूर्व्वाभिभाषिण्यो रूपेणाप्सरसां समाः। कामोपचारकुशला भावज्ञाः सर्व्वकोविदाः।
परं पञ्चाशतं नार्य्यो वारमुख्याः समाद्रवन्। पाद्यादीनि प्रतिग्राह्य पूजया परयार्च्चयन्। १२२४०
कालोपपन्नेन तदा स्वाद्वन्नेनाभ्यतर्पयन्। तस्य भुक्तवतस्तात तदन्तःपुरकाननं।
सुरम्यं दर्शयामासुरेकैकश्येन भारत। क्रीडन्त्यश्च हसन्त्यश्च गायन्त्यश्चापि ताः शुभं।
उदारसत्त्वं सत्त्वज्ञाः स्त्रियः पर्य्यचरंस्तथा। आरणेयस्तु शुद्धात्मा निःसन्देहः स्वकर्म्मकृत्।
वश्येन्द्रियो जितक्रोधो न हृष्यति न कुप्यति। तस्मै शय्यासनं दिव्यं देवार्हं रत्नभूषितं।
स्पर्द्ध्यास्तरणसङ्कीर्णं ददुस्ताः परमस्त्रियः। पादशौचन्तु कृत्वैव शुकः सन्ध्यामुपास्य च। १२२४५
निषसादासने पुण्ये तमेवार्थं विचिन्तयन्। पूर्व्वरात्रे तु तत्रासौ भूत्वा ध्यानपरायणः।
मध्यरात्रे यथान्यायं निद्रामाहारयत् प्रभुः। ततो मुहूर्त्तादुत्थाय कृत्वा शौचमनन्तरं।
स्त्रीभिः परिवृतो धीमान् ध्यानमेवान्वपद्यत। अनेन विधिना कार्ष्णिस्तदहःशेषमच्युतः।
ताञ्च रात्रिं नृपकुले वर्त्तयामास भारत।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुककृतौ सप्तविंशत्यधिकत्रिशतोऽध्यायः॥ ३२७॥
॥ भीष्म उवाच ॥ ततः स राजा जनको मन्त्रिभिः सह भारत। पुरः पुरोहितं कृत्वा सर्व्वाण्यन्तःपुराणि च। १२२५०
आसनञ्च पुरस्कृत्य रत्नानि विविधानि च। शिरसा चार्घ्यमादाय गुरुपुत्त्रं समभ्यगात्।
स तदासनमादाय बहुरत्नविभूषितं। स्पर्द्ध्यास्तरणसंस्तीर्णं सर्व्वतोभद्रमृद्धिमत्।
पुरोधसा संगृहीतं हस्तेनालभ्य पार्थिवः। प्रददौ गुरुपुत्त्राय शुकाय परमार्च्चितं।
तत्रोपविष्टं तं कार्ष्णिं शास्त्रतः प्रत्यपूजयत्। पाद्यं निवेद्य प्रथममर्घ्यं गाञ्च न्यवेदयत्।
स च तां मन्त्रवत्पूजां प्रत्यगृह्णात् यथाविधि। प्रतिगृह्य तु तां पूजां जनकात् द्विजसत्तमः। १२२५५
गाञ्चैव समनुज्ञाय राजानमनुमान्य च। पर्य्यपृच्छन्महातेजा राज्ञः कुशलमव्ययं।
अनामयञ्च राजेन्द्र शुकः सानुचरस्य ह। अनुशिष्टस्तु तेनासौ निषसाद सहानुगः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उदारसत्त्वाभिजनो भूमौ राजा कृताञ्जलिः । कुशलञ्चाव्ययञ्चैव पृष्ट्वा वैयासकिं नृपः ।
किमागमनमित्येव पर्य्यपृच्छत पार्थिवः ।
॥ शुक उवाच ॥ पित्राहमुक्तो भद्रन्ते मोक्षधर्म्मार्थकोविदः । विदेहराजो याज्यो मे जनको नाम विश्रुतः । ११२७०
तत्र गच्छस्व वै तूर्णं यदि ते हृदि संशयः । प्रवृत्तौ वा निवृत्तौ वा स ते छेत्स्यति संशयं ।
सोऽहं पितुर्नियोगात्त्वामुपप्रष्टुमिहागतः । तन्मे धर्म्मभृतां श्रेष्ठ यथावद्वक्तुमर्हसि ।
किं कार्य्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः । कथञ्च मोक्षः प्राप्तव्यो ज्ञानेन तपसाथ वा ।
॥ जनक उवाच ॥ यत् कार्य्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु । कृतोपनयनस्तात भवेद्वेदपरायणः ।
तपसा गुरुवृत्त्या च ब्रह्मचर्य्येण वा विभो । देवतानां पितॄणाञ्चाप्यनृणो ह्यनसूयकः । ११२७५
वेदानधीत्य नियतो दक्षिणामपवर्ज्य च । अभ्यनुज्ञामथ प्राप्तः समावर्त्तेत वै द्विजः ।
समावृत्तश्च गार्हस्थ्ये स्वदारनिरतो वसेत् । अनसूयो यथान्यायमाहिताग्निस्तथैव च ।
उत्पन्नपुत्त्रपौत्त्रस्तु वन्याश्रमपदे वसेत् । तानेवाग्नीन् यथा शास्त्रमर्च्चयन्नतिथिप्रियः ।
स वनेऽग्नीन् यथान्यायमात्मन्यारोप्य धर्म्मवित् । निर्द्वन्द्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ।
॥ शुक उवाच ॥ उत्पन्ने ज्ञानविज्ञाने निर्द्वन्द्वे हृदि शाश्वते । किमवश्यं निवस्तव्यमाश्रमेषु भवेत्त्रिषु । ११२८०
एतद्भवन्तं पृच्छामि तद्भवान् वक्तुमर्हति । यथा वेदार्थतत्त्वेन ब्रूहि मे त्वं जनाधिप ।
॥ जनक उवाच ॥ न विना ज्ञानविज्ञाने मोक्षस्याधिगमो भवेत् । न विना गुरुसम्बन्धं ज्ञानस्याधिगमः स्मृतः ।
गुरुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते । विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ।
अनुच्छेदाय लोकानामनुच्छेदाय कर्म्मणां । पूर्ब्बैराचरितो धर्म्मश्चातुराश्रम्यसङ्कटः ।
अनेन क्रमयोगेन बहुजातिषु कर्म्मणां । हित्वा शुभाशुभं कर्म्म मोक्षो नामेह लभ्यते । ११२८५
भावितैः करणैश्चायं बहुसंसारयोनिषु । आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ।
तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः । त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत् परमभीप्सतः ।
राजसांस्तामसांश्चैव नित्यं दोषान् विवर्जयेत् । सात्त्विकं मार्गमास्थाय पश्येदात्मानमात्मना ।
सर्व्वभूतेषु चात्मानं सर्व्वभूतानि चात्मनि । सम्पश्यन्नोपलिप्येत जले वारिचरो यथा ।
पक्षिवत् प्रवणादूर्द्ध्वममुत्रानन्त्यमश्नुते । विहाय देहान्निर्मुक्तो निर्द्वन्द्वः प्रशमङ्गतः । ११२९०
अत्र गाथाः पुरागीताः शृणु राज्ञा ययातिना । धार्य्यन्ते या द्विजैस्तात मोक्षशास्त्रविशारदैः ।
ज्योतिरात्मनि नान्यत्र सर्व्वजन्तुषु तत्समं । स्वयञ्च शक्यते द्रष्टुं सुसमाहितचेतसा ।
न बिभेति परो यस्मान्न बिभेति पराच्च यः । यश्च नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ।
यदा भावं न कुरुते सर्व्वभूतेषु पापकं । कर्म्मणा मनसा वाचा ब्रह्म संपद्यते तदा ।
संयोज्य मानसात्मानमीर्ष्यामुत्सृज्य मोहिनीं । त्यक्त्वा कामञ्च मोहञ्च तदा ब्रह्मत्वमश्नुते । ११२९५
यदा श्राव्ये च दृश्ये च सर्व्वभूतेषु चाप्ययं । समो भवति निर्द्वन्द्वो ब्रह्म सम्पद्यते तदा ।
यदा स्तुतिञ्च निन्दाञ्च समत्वेनैव पश्यति । काञ्चनञ्चायसञ्चैव सुखदुःखे तथैव च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation; Jalgaon

शीतमुष्णं तथैवार्थमनर्थं प्रियमप्रियं। जीवितं मरणञ्चैव ब्रह्म सम्पद्यते तदा।
प्रसार्य्येह यथाङ्गानि कूर्म्मः संहरते पुनः। तथेन्द्रियाणि मनसा संयन्तव्यानि भिक्षुणा।
तमःपरिगतं वेश्म यथा दीपेन दृश्यते। तथा बुद्धिप्रदीपेन शक्य आत्मा निरीक्षितुं।
एतत् सर्व्वञ्च पश्यामि त्वयि बुद्धिमताम्वर। यच्चान्यदपि वेत्तव्यं तत्त्वतो वेद तद्भवान्।
ब्रह्मर्षे विदितश्चासि विषयान्तमुपागतः। गुरोस्तव प्रसादेन तव चैवोपशिक्षया।
तस्यैव च प्रसादेन प्रादुर्भूतं महामुने। ज्ञानंदिव्यं ममापीदं तेनासि विदितो मम।
अधिकं तव विज्ञानमधिका च गतिस्तव। अधिकन्तव चैश्वर्य्यं तच्च त्वन्नाववुध्यवे।
बाल्याद्वा संशयाद्वापि भयाद्वाप्यविमोक्षजात्। उत्पन्ने चापि विज्ञाने नाधिगच्छसि तां गतिं।
व्यवसायेन शुद्धेन मद्विधैश्छिन्नसंशयः। विमुच्य हृदयग्रन्थीनासादयति तां गतिं।
भवांश्चोत्पन्नविज्ञानः स्थिरबुद्धिरलोलुपः। व्यवसायादृते ब्रह्मन्नासादयति तत्परं।
नास्ति ते सुखदुःखेषु विशेषो नास्ति लोलुपः। नौत्सुक्यं नृत्यगीतेषु न राग उपजायते।
न बन्धुष्वनुबन्धस्ते न भयेष्वस्ति ते भयं। पश्यामि त्वां महाभाग तुल्यलोष्टाश्मकाञ्चनं।
अहं त्वामनुपश्यामि ये चाप्यन्ये मनीषिणः। आस्थितं परमं मार्गमक्षयं तमनामयं।
यत्फलं ब्राह्मणस्येह मोक्षार्थस्य यदात्मकः। तस्मिन् वै वर्त्तसे ब्रह्मन् किमन्यत् परिपृच्छसि।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकक्कतौ अष्टाविंशत्यधिकत्रिशततोऽध्यायः॥ २२८॥

॥ भीष्म उवाच॥ एतत् श्रुत्वा तु वचनं कृतात्मा कृतनिश्चयः। आत्मनात्मानमास्थाय दृष्ट्वा चात्मानमात्मना।
कृतकार्य्यः सुखी शान्तस्तूष्णीं प्रायादुदङ्मुखः। शैशिरं गिरिमुद्दिश्य सधर्म्मा मातरिश्वनः।
एतस्मिन्नेव काले तु देवर्षिर्नारदस्तथा। हिमवन्तमियाद्द्रष्टुं सिद्धचारणसेवितं।
तमप्सरोगणाकीर्णं शान्तस्वननिनादितं। किन्नराणां सहस्रैश्च भृङ्गराजैस्तथैव च।
मद्गुभिः खञ्जरीटैश्च विचित्रैर्जीवजीवकैः। चित्रवर्णैर्मयूरैश्च केकाशतविराजितैः।
राजहंससमूहैश्च कृष्णैः परभृतैस्तथा। पक्षिराजो गरुत्मांश्च यन्नित्यमधितिष्ठति।
चत्वारो लोकपालाश्च देवाः सर्षिगणास्तथा। तत्र नित्यं समायान्ति लोकस्य हितकाम्यया।
विष्णुना यत्र पुत्त्रार्थं तपस्तप्तं महात्मना। तत्रैव च कुमारेण बाल्ये क्षिप्ता दिवौकसः।
शक्तिर्न्यस्ता क्षितितले त्रैलोक्यमवमन्य वै। तत्रोवाच जगत् स्कन्दः क्षिपन् वाक्यमिदं तदा।
योऽन्योऽस्ति मत्तोऽभ्यधिको विप्रा यस्याधिकं प्रियाः। यो ब्रह्मण्यो द्वितीयोऽस्ति त्रिषु लोकेषु वीर्य्यवान्।
सोऽभ्युद्धरत्विमां शक्तिमथ वा कम्पयत्विति। तत् श्रुत्वा व्यथिता लोकाः क इमामुद्धरेदिति।
अथ देवगणं सर्व्वं सम्भ्रान्तेन्द्रियमानसं। अपश्यद्भगवान् विष्णुः क्षिप्तं सासुरराक्षसं।
किन्वत्र सुकृतं कार्य्यं भवेदिति विचिन्तयन्। अनामृष्य ततः क्षेपमैक्षत च पावकिं।
संप्रगृह्य विशुद्धात्मा शक्तिं प्रज्वलितां तदा। कम्पयामास सव्येन पाणिना पुरुषोत्तमः।
शक्त्यान्तु कम्पमानायां विष्णुना बलिना तदा। मेदिनी कम्पिता सर्व्वा सशैलवनकानना।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शक्तेनापि समुद्धर्त्तुं कम्पिता साभवत्तदा । रक्षिता स्कन्दराजस्य धर्षणा प्रभविष्णुना ।
तां कम्पयित्वा भगवान् प्रह्लादमिदमब्रवीत् । पश्य वीर्य्यं कुमारस्य नैतदन्यः करिष्यति ।
सो मृष्यमाणस्तद्वाक्यं समुद्धरणनिश्चितः । जग्राह तां तदा शक्तिं नचैनां स व्यकम्पयत् ।
नादं महान्तं मुक्ता स मूर्च्छितो गिरिमूर्द्धनि । विह्वलः प्रापतद्भूमौ हिरण्यकशिपोः सुतः ।
तत्रोत्तरां दिशं गत्वा शैलराजस्य पार्श्वतः । तपोऽतप्यत दुर्द्धर्षं तत्र नित्यं वृषध्वजः ।
पावकेन परिक्षिप्तं दीप्यता यस्य चाश्रमं । आदित्यपर्व्वतं नाम दुर्द्धर्षमकृतात्मभिः ।
न तत्र शक्यते गन्तुं यक्षराक्षसदानवैः । दशयोजनविस्तारमग्निज्वालासमावृतं ।
भगवान् पावकस्तत्र स्वयं तिष्ठति वीर्य्यवान् । सर्व्वान् विघ्नान् प्रशमयन्महादेवस्य धीमतः ।
दिव्यं वर्षसहस्रं हि पादेनैकेन तिष्ठतः । देवान् सन्तापयंस्तत्र महादेवो महाव्रतः ।
ऐन्द्रीन्तु दिशमास्थाय शैलराजस्य धीमतः । विविक्ते पर्व्वततटे पाराशर्य्यो महातपाः ।
वेदानध्यापयामास व्यासः शिष्यान्महातपाः । सुमन्तुञ्च महाभागं वैशम्पायनमेव च ।
जैमिनिञ्च महाप्राज्ञं पैलञ्चापि तपस्विनं । यत्र शिष्यैः परिवृतो व्यासश्चास्ते महातपाः ।
तमाश्रमपदं रम्यं ददर्श पितुरुत्तमं । आरणेयो विशुद्धात्मा नभसीव दिवाकरः ।
अथ व्यासः परिक्षिप्तं ज्वलन्तमिव पावकं । ददृशे सुतमायान्तं दिवाकरसमप्रभं ।
असज्जमानं वृक्षेषु शैलेषु विषयेषु च । योगयुक्तं महात्मानं यथावाणं गुणच्युतं ।
सोऽभिगम्य पितुः पादावग्टह्लादरणीसुतः । यथोपयोषं तैश्चापि समागच्छन् महामुनिः ।
ततो निवेदयामास पित्रे सर्व्वमशेषतः । शुको जनकराजेन संवादं प्रीतमानसः ।
एवमध्यापयञ्छिष्यान् व्यासः पुत्त्रञ्च वीर्य्यवान् । उवास हिमवत्पृष्ठे पाराशर्य्यो महामुनिः ।
ततः कदाचिच्छिष्यास्तं परिवार्य्यावतस्थिरे । वेदाध्ययनसम्पन्नाः शान्तात्मानो जितेन्द्रियाः ।
वेदेषु निष्ठां सम्प्राप्य साङ्गेष्वपि तपस्विनः । अथोचुस्ते तदा व्यासं शिष्याः प्राञ्जलयो गुरुं ।
॥ शिष्या ऊचुः ॥ महता तेजसा युक्ता यशसा चापि वर्द्धिताः । एकन्त्विदानीमिच्छामो गुरुणानुग्रहं कृतं ।
इति तेषां वचः श्रुत्वा ब्रह्मर्षिस्तानुवाच ह । उच्यतामिति तद्वत्सा यद्वः कार्य्यं प्रियं मया ।
एतद्वाक्यं गुरोः श्रुत्वा शिष्यास्ते हृष्टमानसाः । पुनः प्राञ्जलयो भूत्वा प्रणम्य शिरसा गुरुं ।
ऊचुस्ते सहिता राजन्निदं वचनमुत्तमं । यदि प्रीत उपाध्यायो धन्याः स्मो मुनिसत्तम ।
काङ्क्षामस्तु वयं सर्व्वे वरं दातुं महर्षिणा । षष्ठः शिष्यो न ते ख्यातिं गच्छेदत्र प्रसीद नः ।
चत्वारस्ते वयं शिष्या गुरुपुत्त्रश्च पञ्चमः । इह वेदाः प्रतिष्ठेरन्नेष नः काङ्क्षितो वरः ।
शिष्याणां वचनं श्रुत्वा व्यासो वेदार्थतत्त्ववित । पराशरात्मजो धीमान् परलोकार्थचिन्तकः ।
उवाच शिष्यान् धर्म्मात्मा धर्म्म्यं नैःश्रेयसं वचः । ब्राह्मणाय सदा देयं ब्रह्मशुश्रूषवे तथा ।
ब्रह्मलोके निवासं यो ध्रुवं समभिकाङ्क्षते । भवन्तो बहुलाः सन्तु वेदो विस्तार्य्यतामयं ।
नाशिष्ये सम्प्रदातव्यो नाव्रते नाकृतात्मनि । एते शिष्यगुणाः सर्व्वे विज्ञातव्या यथार्थतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नापरीक्षितचारित्रे विद्या देया कथञ्चन। यथा हि कनकं शुद्धं तापच्छेदनिघर्षणैः।
परीक्षेत तथा शिष्यानीक्षेत् कुलगुणादिभिः। न नियोज्याश्च वः शिष्या अनियोगे महाभये।
यथामति यथापाठं यथा विद्या फलिष्यति। सर्व्वस्तरतु दुर्गाणि सर्व्वो भद्राणि पश्यतु।
श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः। वेदस्याध्ययनं हीदं तच्च कार्य्यं महत् स्मृतं। १२२६०
स्तुत्यर्थमिह देवानां वेदाः सृष्टाः स्वयम्भुवा। यो निर्व्वदेत संमोहात् ब्राह्मणं वेदपारगं।
सोऽभिध्यानाद्ब्राह्मणस्य पराभूयादसंशयं। यश्चाधर्म्मेण विब्रूयाद्यश्चाधर्म्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषञ्चाधिगच्छति। एतद्वः सर्व्वमाख्यातं स्वाध्यायस्य विधिं प्रति।
उपकुर्य्याच्च शिष्याणामेतच्च हृदि वो भवेत्।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुककृत्ये एकोनत्रिंशदधिकत्रिशततोऽध्यायः॥ ३२९॥
॥ भीष्म उवाच॥ एतच्छ्रुत्वा गुरोर्व्वाक्यं व्यासशिष्या महौजसः। अन्योन्यं हृष्टमनसः परिषस्वजिरे तदा। १२२६५
उक्ताः स्मो यद्भगवता तदात्वायतिसंहितं। तन्नो मनसि संरूढं करिष्यामस्तथा च तत्।
अन्योन्यं संविभाष्यैवं सुप्रीतमनसः पुनः। विज्ञापयन्ति स्म गुरुं पुनर्व्वाक्यविशारदाः।
शैलादस्मान्महीं गन्तुं काङ्क्षितं नो महामुने। वेदाननेकधा कर्तुं यदि ते रुचितं प्रभो।
शिष्याणां वचनं श्रुत्वा पराशरसुतः प्रभुः। प्रत्युवाच ततो वाक्यं धर्म्मार्थसहितं हितं।
क्षितिं वा देवलोकं वा गम्यतां यदि रोचते। अप्रमादश्च वः कार्य्यो ब्रह्म हि प्रचुरच्छलं। १२२७०
तेनानुज्ञातास्ततः सर्व्वे गुरुणा सत्यवादिना। जग्मुः प्रदक्षिणं कृत्वा व्यासं मूर्द्ध्नाभिवाद्य च।
अवतीर्य्य महीं तेऽथ चातुर्होत्रमकल्पयन्। संयाजयन्तो विप्रांश्च राजन्यांश्च विशस्तथा।
पूज्यमाना द्विजैर्नित्यं मोदमाना गृहे रताः। याजनाध्यापनरताः श्रीमन्तो लोकविश्रुताः।
अवतीर्णेषु शिष्येषु व्यासः पुत्त्रसहायवान्। तूष्णीं ध्यानपरो धीमानेकान्ते समुपाविशत्।
तं ददर्शाश्रमपदे नारदः सुमहातपाः। अथैनमब्रवीत् काले मधुराक्षरया गिरा। १२२७५
भो भो ब्रह्मर्षिर्वाशिष्ठ ब्रह्मघोषो न वर्त्तते। एको ध्यानपरस्तूष्णीं किमास्से चिन्तयन्निव।
ब्रह्मघोषैर्व्विरहितः पर्व्वतोऽयं न शोभते। रजसा तमसा चैव सोमः सोपप्लवो यथा।
न भ्राजते यथा पूर्व्वं निषादानामिवालयः। देवर्षिगणजुष्टोऽपि वेदध्वनिनिराकृतः।
ऋषयश्च हि देवाश्च गन्धर्व्वाश्च महौजसः। वियुक्ता ब्रह्मघोषेण न भ्राजन्ते यथा पुरा।
नारदस्य वचः श्रुत्वा कृष्णद्वैपायनोऽब्रवीत्। महर्षे यत्त्वया प्रोक्तं वेदवादविचक्षण। १२२८०
एतन्मनोनुकूलं मे भवानर्हति भाषितुं। सर्व्वज्ञः सर्व्वदर्शी च सर्व्वत्र च कुतूहली।
त्रिषु लोकेषु यद्वृत्तं सर्व्वं तव मते स्थितं। तदाज्ञापय विप्रर्षे ब्रूहि किं करवाणि ते।
यन्मया समनुष्ठेयं ब्रह्मर्षे तदुदाहर। वियुक्तस्येह शिष्यैर्मे नातिहृष्टमिदं मनः।
॥ नारद उवाच॥ अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलं। मलं पृथिव्या वाहीकाः स्त्रीणां कौतूहलं मलं।
अधीयतां भवान् वेदान् सार्द्धं पुत्त्रेण धीमता। विधुन्वन् ब्रह्मघोषेण रक्षोभयकृतं तमः। १२२८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ नारदस्य वचः श्रुत्वा व्यासः परमधर्म्मवित्। तथेत्युवाच संहृष्टो वेदाभ्यासदृढव्रतः।
शुकेन सह पुत्त्रेण वेदाभ्यासमथाकरोत्। स्वरेणोच्चैः सशैक्ष्येण लोकानापूरयन्निव।
तयोरभ्यस्यतोरेव नानाधर्म्मप्रवादिनोः। वातोऽतिमात्रं प्रववौ समुद्रानिलवेजितः।
ततोऽनध्याय इति तं व्यासः पुत्त्रमवारयत्। शुको वारितमात्रस्तु कौतूहलसमन्वितः।
अपृच्छत् पितरं ब्रह्मन् कुतो वायुरभूदयं। आख्यातुमर्हति भवान् वायोः सर्व्वं विचेष्टितं।
शुकस्यैतद्वचः श्रुत्वा व्यासः परमविस्मितः। अनध्यायनिमित्तेऽस्मिन्निदं वचनमब्रवीत्।
दिव्यन्ते चक्षुरुत्पन्नं स्वयं ते निर्म्मलं मनः। तमसा रजसा चापि त्यक्तः सत्त्वे व्यवस्थितः।
आदर्शे स्वामिव च्छायां पश्यस्यात्मानमात्मना। न्यस्यात्मनि स्वयं वेदान् बुद्ध्या समनुचिन्तय।
देवयानचरो विष्णोः पितृयानस्तु तामसः। द्वावेतौ प्रेत्य पन्थानौ दिवञ्चाधश्च गच्छतः।
पृथिव्यामन्तरीक्षे च यत्र संवान्ति वायवः। सप्तैते वायुमार्गा वै तान्निबोधानुपूर्व्वशः।
तत्र देवगणाः साध्या महाभूता महाबलाः। तेषामप्यभवत् पुत्त्रः समानो नाम दुर्ज्जयः।
उदानस्तस्य पुत्त्रोऽभूद्व्यानस्तस्याभवत्सुतः। अपानश्च ततो ज्ञेयः प्राणश्चापि ततोऽपरः।
अनपत्योऽभवत् प्राणो दुर्द्धर्षः शत्रुतापनः। पृथक्कर्म्माणि तेषान्तु प्रवक्ष्यामि यथातथं।
प्राणिनां सर्व्वतो वायुश्चेष्टां वर्त्तयते पृथक्। प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते।
प्रेरयत्यभ्रसंघातान् धूमजांश्चोष्मजांश्च यः। प्रथमः प्रथमे मार्गे प्रवहो नाम योऽनिलः।
अम्बरे स्नेहमभ्येत्य तडिद्भ्यश्चोत्तमद्युतिः। आवहो नाम संभाति द्वितीयश्वसनो नदन्।
उदयं ज्योतिषां शश्वत् सोमादीनां करोति यः। अन्तर्देहेषु चोदानं यं वदन्ति मनीषिणः।
यश्चतुर्भ्यः समुद्रेभ्यो वायुर्धारयते जलं। उद्धृत्याददते चापो जीमूतेभ्योऽम्बरेऽनिलः।
योऽद्भिः संयोज्य जीमूतान् पर्ज्जन्याय प्रयच्छति। उद्वहो नाम वंहिष्ठस्तृतीयः स सदागतिः।
समुह्यमाना बहुधा येन नीताः पृथग् घनाः। वर्षमोक्षकृतारम्भास्ते भवन्ति घनाघनाः।
संहता येन चाविद्धा भवन्ति नदतां नदाः। रक्षणार्थाय सम्भूता मेघत्वमुपयान्ति च।
योऽसौ वहति भूतानां विमानानि विहायसा। चतुर्थः संवहो नाम वायुः स गिरिमर्द्दनः।
येन वेगवता रुग्णा रूक्षेणारुजता नगान्। वायुना सहिता मेघास्ते भवन्ति बलाहकाः।
दारुणोत्पातसञ्चारो नभसस्तनयित्नुमान्। पञ्चमः स महावेगो विवहो नाम मारुतः।
यस्मिन् पारिप्लवा दिव्या वहन्त्यापो विहायसा। पुण्यञ्चाकाशगङ्गायास्तोयं विष्टभ्य तिष्ठति।
दूरात्प्रतिहतो यस्मिन्नेकरश्मिर्दिवाकरः। योनिरंशुसहस्रस्य येन भाति वसुन्धरा।
यस्मादाप्यायते सोमः क्षीणः सम्पूर्णमण्डलः। षष्ठः परिवहो नाम स वायुर्ज्जयतांवरः।
सर्व्वप्राणभृतां प्राणान् योऽन्तकाले निरस्यति। यस्य वर्त्मानुवर्त्तेते मृत्युवैवस्वतावुभौ।
सम्यगन्वीक्षतां बुद्ध्या शान्तयाध्यात्मचिन्तकाः। ध्यानाभ्यासाभिरामाणां योऽमृतत्वाय कल्पते।
यं समासाद्य वेगेन दिशोऽन्तं प्रतिपेदिरे। दक्षस्य दशपुत्त्राणां सहस्राणि प्रजापते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येन सृष्टः पुरा भूतो यात्येव न निवर्त्तते । परावहो नाम परो वायुः स दुरतिक्रमः ।
एवमेते दितेः पुत्रा मारुताः परमाद्भुताः । अनारतन्ते संवान्ति सर्व्वगाः सर्व्वधारिणः ।
एतत्तु महदाश्चर्य्यं यदयं पर्व्वतोत्तमः । कम्पितः सहसा तेन वायुनातिप्रवायता ।
विष्णोर्निश्वाससंतो वातो यदा वेगसमीरितः । सहसोदीर्य्यते तात जगत् प्रव्यथते तदा ।
तस्माद्ब्रह्मविदो वेदान्नाधीयन्तेऽतिवायति । वायोर्व्वायुभयं ह्युक्तं ब्रह्म तत् पीडितं भवेत् । १२५२०
एतावदुक्त्वा वचनं पराशरसुतः प्रभुः । उक्त्वा पुत्त्रमधीष्वेति व्योमगङ्गामगात्तदा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुककृत्ये त्रिंशदधिकत्रिशततोऽध्यायः ॥ ३३० ॥
॥ भीष्म उवाच ॥ एतस्मिन्नन्तरे शून्ये नारदः समुपागमत् । शुकं स्वाध्यायनिरतं वेदार्थं प्रष्टुमीप्सया ।
देवर्षिं तं शुको दृष्ट्वा नारदं समुपस्थितं । अर्घ्यपूर्व्वेण विधिना यथोक्तेनाभ्यपूजयत् ।
नारदोऽथाब्रवीत् प्रीतो ब्रूहि धर्म्मभृताम्वर । केन त्वां श्रेयसा वत्स योजयामीति हृष्टवत् ।
नारदस्य वचः श्रुत्वा शुकः प्रोवाच भारत । अस्मिन् लोके हितं यत्स्यात्तेन मां योक्तुमर्हसि । १२५२५
॥ नारद उवाच ॥ तत्त्वं जिज्ञासतां पूर्व्वमृषीणाम्भावितात्मनां । सनत्कुमारो भगवानिदं वचनमब्रवीत् ।
नास्ति विद्यासमञ्चक्षुर्नास्ति सत्यसमं तपः । नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं ।
निवृत्तिः कर्म्मणः पापात्सततं पुण्यशीलता । सद्वृत्तिः समुदाचारः श्रेय एतदनुत्तमं ।
मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति । नालं स दुःखमोक्षाय संयोगो दुःखलक्षणं ।
सक्तस्य बुद्धिश्चलति मोहजालविवर्द्धनी । मोहजालावृतो दुःखमिह चामुत्र चाश्नुते । १२५३०
सर्व्वोपायात्तु कामस्य क्रोधस्य च विनिग्रहः । कार्य्यः श्रेयोऽर्थिना तौ हि श्रेयोघातार्थमुद्यतौ ।
नित्यं क्रोधात्तपो रक्षेत् श्रियं रक्षेच्च मत्सरात् । विद्यां मानावमानाभ्यामात्मानन्तु प्रमादतः ।
आनृशंस्यं परो धर्म्मः क्षमा च परमं बलं । आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परं ।
सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत् । यद्भूतहितमत्यन्तमेतत् सत्यं मतं मम ।
सर्व्वारम्भपरित्यागी निराशी निष्परिग्रहः । येन सर्व्वं परित्यक्तं स विद्वान् स च पण्डितः । १२५३५
इन्द्रियैरिन्द्रियार्थान् यश्चरत्यात्मवशैरिह । असज्जमानः शान्तात्मा निर्व्विकारः समाहितः ।
आत्मभूतैरतद्भूतः सह चैव विनैव च । स विमुक्तः परं श्रेयो न चिरेणाधितिष्ठति ।
अदर्शनमसंस्पर्शस्तथासम्भाषणं सदा । यस्य भूतैः सह मुने स श्रेयो विन्दते परं ।
न हिंस्यात् सर्व्वभूतानि मैत्रायणगतश्चरेत् । नेदं जन्म समासाद्य वैरं कुर्व्वीत केनचित् ।
आकिञ्चन्यं सुसन्तोषो निराशीस्त्वमचापलं । एतदाहुः परं श्रेय आत्मज्ञस्य जितात्मनः । १२५४०
परिग्रहं परित्यज्य भव तात जितेन्द्रियः । अशोकं स्थानमातिष्ठ इह चामुत्र चाभयं ।
निरामिषा न शोचन्ति त्यजेदामिषमात्मनः । परित्यज्यामिषं सौम्य दुःखतापाद्विमोक्ष्यसे ।
तपोनित्येन दान्तेन मुनिना संयतात्मना । अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना ।
गुणसङ्गेष्वनासक्त एकचर्य्यारतः सदा । ब्राह्मणो न चिरादेव दुःखमायात्यनुत्तमं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

द्वन्द्वारामेषु भूतेषु य एको रमते मुनिः । विद्धि प्रज्ञानतृप्तं तं ज्ञानतृप्तो न शोचति ।
शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषं । अशुभैश्चाप्यधोजन्म कर्म्मभिर्लभते वशः ।
तत्र मृत्युजरादुःखैः सततं समभिद्रुतः । संसारे पच्यते जन्तुस्तत् कथं न विबुध्यसे ।
अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः । अनर्थे चार्थसंज्ञस्त्वं किमर्थं नावबुध्यसे ।
संवेष्टमानं बहुभिर्मोहात्तन्तुभिरात्मजैः । कोषकारवदात्मानं वेष्टयन्नावबुध्यसे ।
अलं परिग्रहेणेह दोषवान् हि परिग्रहः । क्रिमिर्हि कोषकारस्तु बध्यते स्वपरिग्रहात् ।
पुत्त्रदारकुटुम्बेषु सक्ताः सीदन्ति जन्तवः । सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ।
महाजालसमाकृष्टान् स्थले मत्स्यानिवोद्धृतान् । स्नेहजालसमाकृष्टान् पश्य जन्तून् सुदुःखितान् ।
कुटुम्बं पुत्त्रदारांश्च शरीरं सञ्चयाश्च ये । पारक्यमध्रुवं सर्व्वं किं स्वं सुकृतदुष्कृतं ।
यदा सर्व्वान् परित्यज्य गन्तव्यमवशेन ते । अनर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठसि ।
अविश्रान्तमनालम्बमपाथेयमदैशिकं । तमः कान्तारमध्वानं कथमेको गमिष्यसि ।
न हि त्वां प्रस्थितं कश्चित् पृष्ठतोऽनुगमिष्यति । सुकृतं दुष्कृतञ्च त्वां यास्यन्तमनुयास्यति ।
विद्या कर्म्म च शौचञ्च ज्ञानञ्च बहुविस्तरं । अर्थार्थमनुसार्य्यन्ते सिद्धार्थश्च विमुच्यते ।
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः । छित्त्वैतां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः ।
रूपकूलां मनःस्रोतां स्पर्शद्वीपां रसावहां । गन्धपङ्कां शब्दजलां स्वर्गमार्गदुरावहां ।
क्षमारित्रां सत्यमयीं धर्म्मस्थैर्य्यवटारकां । त्यागवाताध्वगां शीघ्रां नौताय्यां तां नदीं तरेत् ।
त्यज धर्म्ममधर्म्मञ्च तथा सत्यानृते त्यज । उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ।
त्यज धर्म्ममसङ्कल्पादधर्म्मञ्चाप्यलिप्सया । उभे सत्यानृते बुद्ध्या बुद्धिं परमनिश्चयात् ।
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनं । चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ।
जराशोकसमाविष्टं रोगायतनमातुरं । रजस्वलमनित्यञ्च भूतावासमिमं त्यज ।
इदं विश्वं जगत् सर्व्वमजगच्चापि यद्भवेत् । महाभूतात्मकं सर्व्वं महद्यत्परमाश्रयात् ।
इन्द्रियाणि च पञ्चैव तमः सत्त्वं रजस्तथा । इत्येष सप्तदशको राशिरव्यक्तसंज्ञकः ।
सर्व्वैरिहेन्द्रियार्थैश्च व्यक्ताव्यक्तैर्हि संज्ञितः । चतुर्व्विंशक इत्येष व्यक्ताव्यक्तमयो गुणः ।
एतैः सर्व्वैः समायुक्तः पुमानित्यभिधीयते । त्रिवर्गन्तु सुखं दुःखं जीवितं मरणं तथा ।
य इदं वेद तत्त्वेन स वेद प्रभवाप्ययौ । पारम्पर्य्येण बोद्धव्यं ज्ञानानां यच्च किञ्चन ।
इन्द्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः । अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियं ।
इन्द्रियैर्नियतैर्देही धाराभिरिव तर्प्यते । लोके विततमात्मानं लोकांश्चात्मनि पश्यति ।
परावरदृशः शक्तिर्ज्ञानमूला न नश्यति । पश्यतः सर्व्वभूतानि सर्व्वावस्थासु सर्व्वदा ।
सर्व्वभूतस्य संयोगो नाशुभेनोपपद्यते । ज्ञानेन विविधान् क्लेशानतिवृत्तस्य मोहजान् ।
लोके बुद्धिप्रकाशेन लोकमार्गो न रिष्यते । अनादिनिधनं जन्तुमात्मनि स्थितमव्ययं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अकर्त्तारममूर्त्तञ्च भगवानाह तीर्थवित्। यो जन्तुः स्वकृतैस्तैस्तैः कर्म्मभिर्नित्यदुःखितः। १२४७५
स दुःखप्रतिघातार्थं हन्ति जन्तूननेकधा। ततः कर्म्म समादत्ते पुनरन्यं नवं बहु।
तप्यतेऽथ पुनस्तेन भुक्त्वा पथ्यमिवातुरः। अजस्रमेव मोहान्धो दुःखेषु सुखसंज्ञितः।
बध्यते मथ्यते चैव कर्म्मभिर्म्मन्थवत्सदा। ततो निबद्धः स्वां योनिं कर्म्मणामुदयादिह।
परिभ्रमति संसारं चक्रवद्बहुवेदनः। स त्वं निवृत्तबन्धस्तु निवृत्तश्चापि कर्म्मतः।
सर्व्ववित् सर्व्वजित् सिद्धो भव भावविवर्ज्जितः। संयमेन नवं बन्धं निवर्त्त्य तपसो बलात्। १२४७८
सम्प्राप्ता बहवः सिद्धिमप्यबाधां सुखोदयां।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकनारदसंवादे एकत्रिंशदधिकत्रिशततोऽध्यायः॥ ३३१ ॥

॥ नारद उवाच ॥ अशोकं शोकनाशार्थं शास्त्रं शान्तिकरं शिवं। निशम्य लभते बुद्धिं तां लब्ध्वा सुखमेधते।
शोकस्थानसहस्राणि भयस्थानशतानि च। दिवसे दिवसे मूढमाविशन्ति न पण्डितं।
तस्मादनिष्टनाशार्थमितिहासं निबोध मे। तिष्ठते चेद्वशे बुद्धिर्लभते शोकनाशनं।
अनिष्टसम्प्रयोगाच्च विप्रयोगात् प्रियस्य च। मनुष्या मानुषैर्दुःखैर्युज्यन्ते स्वल्पबुद्धयः। १२४८५
द्रव्येषु समतीतेषु ये गुणास्तान्न चिन्तयेत्। न तानाद्रियमाणस्य स्नेहबन्धः प्रमुच्यते।
दोषदर्शी भवेत्तत्र यत्र रागः प्रवर्त्तते। अनिष्टवर्द्धितं पश्येत्तथा चिप्रं विरज्यते।
नार्थो न धर्म्मो न यशो योऽतीतमनुशोचति। अप्यभावेन युज्येत तच्चास्य न निवर्त्तते।
गुणैर्भूतानि युज्यन्ते वियुज्यन्ते तथैव च। सर्व्वाणि नैतदेकस्य शोकस्थानं हि विद्यते।
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति। दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते। १२४९०
नाश्रु कुर्व्वन्ति ये बुद्ध्या दृष्ट्वा लोकेषु सन्ततिं। सम्यक् प्रपश्यतः सर्व्वं नाश्रुकर्म्मोपपद्यते।
दुःखोपघाते शारीरे मानसे चाप्युपस्थिते। यस्मिन्न शक्यते कर्त्तुं यत्नस्तन्नानुचिन्तयेत्।
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत्। चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्द्धते।
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः। एतद्विज्ञानसामर्थ्यं न बालैः समतामियात्।
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः। आरोग्यं प्रियसंवासो गृध्येत्तत्र न पण्डितः। १२४९५
न जानपदिकं दुःखमेकः शोचितुमर्हति। अशोचन् प्रतिकुर्व्वीत यदि पश्येदुपक्रमं।
सुखाद्बहुतरं दुःखं जीवितेनात्र संशयः। स्निग्धत्वञ्चेन्द्रियार्थेषु मोहान्मरणमप्रियं।
परित्यजति यो दुःखं सुखञ्चाप्युभयं नरः। अभ्येति ब्रह्म सोऽत्यन्तं न तं शोचन्ति पण्डिताः।
त्यज्यन्ते दुःखमर्था हि पालनेन च ते सुखाः। दुःखेन चाधिगम्यन्ते नाशमेषां न चिन्तयेत्।
अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः। अतृप्ता यान्ति विध्वंसं सन्तोषं यान्ति पण्डिताः। १२५००
सर्व्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः। संयोगा विप्रयोगान्ता मरणान्तं हि जीवितं।
अन्तो नास्ति पिपासायास्तुष्टिस्तु परमं सुखं। तस्मात्सन्तोषमेवेह धनं पश्यन्ति पण्डिताः।
निमेषमात्रमपि हि वयो गच्छन्न तिष्ठति। स्वशरीरेष्वनित्येषु नित्यं किमनुचिन्तयेत्।

६ स

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

भूतेषु भावं सञ्चिन्त्य ये बुद्ध्वा मनसः परं । न शोचन्ति गताध्वानः पश्यन्तः परमां गतिं ।
सञ्चिन्वानकमेवैनं कामानामवितृप्तकं । व्याघ्रः पशुमिवासाद्य मृत्युरादाय गच्छति । १२५०५
तथाप्युपायं सम्पश्येद्दुःखस्य परिमोक्षणं । अशोचन्नारभेच्चैव मुक्तश्चाव्यसनो भवेत् ।
शब्दे स्पर्शे च रूपे च गन्धेषु च रसेषु च । नोपभोगात् परं किञ्चिद्धनिनो वाऽधनस्य वा ।
प्राक्सम्प्रयोगाद्भूतानां नास्ति दुःखं परायणं । विप्रयोगात्तु सर्व्वस्य न शोचेत् प्रकृतिस्थितः ।
धृत्या शिश्नोदरं रक्षेत् पाणिपादञ्च चक्षुषा । चक्षुः श्रोत्रे च मनसा मनो वाचञ्च विद्यया ।
प्रणयं प्रतिसंहृत्य संस्तुतेष्वितरेषु च । विचरेदसमुन्नद्धः स सुखी स च पण्डितः । १२५१०
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः । आत्मनैव सहायेन यश्चरेत् स सुखी भवेत् ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्मपर्व्वणि शुकाभिपतने द्वात्रिंशदधिकत्रिशतोऽध्यायः ॥ ३३२ ॥
॥ नारद उवाच ॥ सुखदुःखविपर्य्यासो यदा समुपपद्यते । नैनं प्रज्ञा सुनीतं वा त्रायते नापि पौरुषं ।
स्वभावाद्यत्नमातिष्ठेद्यत्नवान्नावसीदति । जरामरणरोगेभ्यः प्रियमात्मानमुद्धरेत् ।
रुजन्ति हि शरीराणि रोगाः शारीरमानसाः । सायका इव तीक्ष्णाग्राः प्रयुक्ता दृढधन्विभिः ।
व्यथितस्य विधित्साभिस्ताम्यतो जीवितैषिणः । अवशस्य विनाशाय शरीरमपकृष्यते । १२५१५
स्रवन्ति न निवर्त्तन्ते स्रोतांसि सरितामिव । आयुरादाय मर्त्यानां रात्र्यहानि पुनः पुनः ।
व्यत्ययो ह्ययमत्यन्तं पक्षयोः शुक्लकृष्णयोः । जातान्मर्त्त्यान् जरयति निमेषान्नावतिष्ठते ।
सुखदुःखानि भूतानामजरो जरयत्यसौ । आदित्यो ह्यस्तमभ्येति पुनः पुनरुदेति च ।
अदृष्टपूर्व्वानादाय भावानपरिशङ्कितान् । इष्टानिष्टान्मनुष्याणामस्तं गच्छन्ति रात्रयः ।
यो यमिच्छेद्यथाकामं कामानान्तदवाप्नुयात् । यदि स्यान्न पराधीनं पुरुषस्य क्रियाफलं । १२५२०
संयताश्च हि दक्षाश्च मतिमन्तश्च मानवाः । दृश्यन्ते निष्फलाः सन्तः प्रहीणाः सर्व्वकर्म्मभिः ।
अपरे बालिशाः सन्तो निर्गुणाः पुरुषाधमाः । आशीर्भिरप्यसंयुक्ता दृश्यन्ते सर्व्वकामिनः ।
भूतानामपरः कश्चिद्धिंसायां सततोत्थितः । वञ्चनायाञ्च लोकस्य स सुखेष्वेव जीर्य्यते ।
अचेष्टमानमासीनं श्रीः कञ्चिदुपतिष्ठते । कश्चित् कर्म्मानुसृत्यान्यो नाप्राप्यमधिगच्छति ।
अपराधं समाचक्ष्व पुरुषस्य स्वभावतः । शुक्रमन्यत्र सम्भूतं पुनरन्यत्र गच्छति । १२५२५
तस्य योनौ प्रयुक्तस्य गर्भो भवति वा न वा । आम्रपुष्पोपमा यस्य निर्वृत्तिरुपलभ्यते ।
केषाञ्चित् पुत्त्रकामानामनुसन्तानमिच्छतां । सिद्धौ प्रयतमानानां न चाण्डमुपजायते ।
गर्भाच्चोद्विजमानानां क्रुद्धादाशीविषादिव । आयुष्मान् जायते पुत्त्रः कथं प्रेत्य इवाभवत् ।
देवानिष्ट्वा तपस्तप्त्वा कृपणैः पुत्त्रगृद्धिभिः । दश मासान् परिधृता जायन्ते कुलपांसनाः ।
अपरे धनधान्यानि भोगांश्च पितृसञ्चितान् । विपुलानभिजायन्ते लब्धास्तैरेव मङ्गलैः । १२५३०
अन्योन्य समभिप्रेत्य मैथुनस्य समागमे । उपद्रव इवाविष्टो योनिर्गर्भः प्रपद्यते ।
शीघ्रं परशरीराणि च्छिन्नबीजं शरीरिणं । प्राणिनां प्राणसंरोधे मांसश्लेष्मविचेष्टितं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निर्द्दग्धं परदेहे हि परदेहं चलाचलं। विनश्यन्तं विनाशान्ते नावि नावमिवाहितं।
सङ्गत्या जठरे न्यस्तं रेतोविन्दुमचेतनं। केन यत्नेन जीवन्तं गर्भं त्वमिह पश्यसि।
अन्नपानानि जीर्य्यन्ते यत्र भक्ष्याश्च भक्षिताः। तस्मिन्नेवोदरे गर्भः किं नान्नमिव जीर्य्यते। १२५३५
गर्भे मूत्रपुरीषाणां स्वभावनियता गतिः। धारणे वा विसर्गे वा न कर्त्ता विद्यते वशः।
स्रवन्ति ह्युदराद्गर्भा जायमानास्तथा परे। आगमेन तथान्येषां विनाश उपपद्यते।
एतस्माद्योनिसम्बन्धाद्यो वीजं परिमुच्यते। प्रजाञ्च लभते काञ्चित् पुनर्द्वन्द्वेषु सज्जति।
स तस्य सहजातस्य सप्तमीं नवमीं दशां। प्राप्नुवन्ति ततः पञ्च न भवन्ति गतायुषः।
नाभ्युत्थाने मनुष्याणां योगाः स्युर्नात्र संशयः। व्याधिभिश्च विमथ्यन्ते व्याधैः क्षुद्रमृगा इव। १२५४०
व्याधिभिर्मथ्यमानानां त्यजतां विपुलं धनं। वेदनां नापकर्षन्ति यतमानाश्चिकित्सकाः।
ते चापि निपुणा वैद्याः कुशलाः सम्भृतौषधाः। व्याधिभिः परिकृष्यन्ते मृगा व्याधैरिवार्द्दिताः।
ते पिवन्तः कषायांश्च सर्पींषि विविधानि च। दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः।
के वा भुवि चिकित्सन्ते रोगार्त्तान् मृगपक्षिणः। श्वापदानि दरिद्रांश्च प्रायो नार्त्ता भवन्ति ते।
घोरानपि दुराधर्षान्नृपतीनुग्रतेजसः। आक्रम्याददते रोगाः पशून् पशुगणा इव। १२५४५
इति लोकमनाक्रन्दं मोहशोकपरिप्लुतं। स्रोतसा सहसा क्षिप्तं ह्रियमाणं वलीयसा।
न धनेन न राज्येन नोग्रेण तपसा तथा। स्वभावमतिवर्त्तन्ते योनियुक्ताः शरीरिणः।
न म्रियेरन्न जीर्य्येरन् सर्व्वे स्युः सर्व्वकामिनः। नाप्रियं प्रतिपश्येयुरुत्थानस्य फले सति।
उपर्य्युपरि लोकस्य सर्व्वो गन्तुं समीहते। यतते च यथाशक्ति न च तत् वर्त्तते तथा।
ऐश्वर्य्यमदमत्तांश्च मत्तान्मद्यमदेन च। अप्रमत्ताऽशठा शूरा विक्रान्ताः पर्य्युपासते। १२५५०
क्लेशाः परिनिवर्त्तन्ते केषाञ्चिदसमीक्षिताः। स्वं स्वञ्च पुनरन्येषां न किञ्चिदधिगम्यते।
महच्च फलवैषम्यं दृश्यते कर्म्मसङ्गिषु। वहन्ति शिविकामन्ये यान्त्यन्ये शिविकागताः।
सर्व्वेषामृद्धिकामानामन्ये रथपुरःसराः। मनुष्याश्च गतस्त्रीकाः शतशो विविधाः स्त्रियः।
द्वन्द्वारामेषु भूतेषु गच्छन्त्येकैकशो नराः। इदमन्यत् पदं पश्य नात्र मोहं करिष्यसि।
त्यज धर्म्ममधर्म्मञ्च उभे सत्यानृते त्यज। उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज। १२५५५
एतत्ते परमं गुह्यमाख्यातमृषिसत्तम। येन देवाः परित्यज्य मर्त्यलोकं दिवं गताः।
नारदस्य वचः श्रुत्वा शुकः परमबुद्धिमान्। सञ्चिन्त्य मनसा धीरो निश्चयं नाध्यगच्छत।
पुत्रदारैर्म्महान् क्लेशो विद्याम्नाये महान् श्रमः। किन्नु स्यात् शाश्वतं स्थानमल्पक्लेशं महोदयं।
ततो मुहूर्त्तं सञ्चिन्त्य निश्चिताङ्गतिमात्मनः। परावरज्ञो धर्म्मस्य परां नैःश्रेयसीं गतिं।
कथन्त्वहमसंक्लिष्टो गच्छेयं गतिमुत्तमां। नावर्त्तेयं यथा भूयो योनिसङ्करसागरे। १२५६०
परं भावं हि काङ्क्षामि यत्र नावर्त्तते पुनः। सर्व्वसङ्गान् परित्यज्य निश्चितो मनसा गतिं।
तत्र यास्यामि यत्रात्मा शमं मेऽधिगमिष्यति। अक्षयश्चाव्ययश्चैव यत्र स्थास्यामि शाश्वतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न तु योगमृते शक्या प्राप्तुं सा परमा गतिः । अवबन्धो हि बुद्धस्य कर्म्मभिर्न्नोपपद्यते ।
तस्माद्योगं समास्थाय त्यक्त्वा गृहकलेवरं । वायुभूतः प्रवेक्ष्यामि तेजोराशिं दिवाकरं ।
नह्येष क्षयतां याति सोमः सुरगणैर्यथा । कम्पितः पतते भूमिं पुनश्चैवाधिरोहति । १२५६५
क्षीयते हि सदा सोमः पुनश्चैवाभिपूर्य्यते । नेच्छाम्येवं विदित्वैतद्ह्रासवृद्धी पुनः पुनः ।
रविस्तु सन्तापयते लोकान् रश्मिभिरुल्बनैः । सर्व्वतस्तेज आदत्ते नित्यमक्षयमण्डलः ।
अतो मे रोचते गन्तुमादित्यं दीप्ततेजसं । अत्र वत्स्यामि दुर्द्धर्षो निःशङ्केनान्तरात्मना ।
सूर्य्यस्य सदने चाहं निक्षिप्येदं कलेवरं । ऋषिभिः सह यास्यामि सौरं तेजोतिदुःसहं ।
आपृच्छामि नगान्नागान् गिरीनुर्व्वीं दिशो दिवं । देवदानवगन्धर्व्वान् पिशाचोरगराक्षसान् । १२५७०
लोकेषु सर्व्वभूतानि प्रवेक्ष्यामि न संशयः । पश्यन्तु योगवीर्य्यं मे सर्व्वे देवाः सहर्षिभिः ।
अथानुज्ञाप्य तमृषिं नारदं लोकविश्रुतं । तस्मादनुज्ञां सम्प्राप्य जगाम पितरं प्रति ।
सोऽभिवाद्य महात्मानं कृष्णद्वैपायनं मुनिं । शुकः प्रदक्षिणं कृत्वा कृष्णमापृष्टवान् मुनिं ।
श्रुत्वा चर्षिस्तद्वचनं शुकस्य प्रीतो महात्मा पुनराह चैनं । भो भो पुत्र स्थीयतां तावदद्य यावच्चक्षुः प्रीणयामि त्वदर्थे ।
निरपेक्षः शुको भूत्वा निःस्नेहो मुक्तसंशयः । मोक्षमेवानुसञ्चिन्त्य गमनाय मनो दधे । १२५७५
पितरं स परित्यज्य जगाम मुनिसत्तमः । कैलासपृष्ठं विपुलं सिद्धसङ्घनिषेवितं ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकाभिपतने त्रयस्त्रिंशदधिकत्रिशतोऽध्यायः ॥ ३३३ ॥

॥ भीष्म उवाच ॥ गिरिशृङ्गं समारुह्य सुतो व्यासस्य भारत । समे देशे विविक्ते स निःशलाक उपाविशत् ।
धारयामास चात्मानं यथाशास्त्रं यथाविधि । पादप्रभृतिगात्रेषु क्रमेण क्रमयोगवित् ।
ततः स प्राङ्मुखो विद्वानादित्येनाचिरोदिते । पाणिपादं समादाय विनीतवदुपाविशत् ।
न तत्र पक्षिसङ्घातो न शब्दो नातिदर्शनं । यत्र वैयासकिर्धीमान् योक्तुं समुपचक्रमे । १२५८०
स ददर्श तदात्मानं सर्व्वसङ्गविनिःसृतं । प्रजहास ततो हासं शुकः सम्प्रेक्ष्य तत्परं ।
स पुनर्य्योगमास्थाय मोक्षमार्गोपलब्धये । महायोगेश्वरो भूत्वा सोऽत्यक्रामद्विहायसा ।
ततः प्रदक्षिणं कृत्वा देवर्षिं नारदं तथा । निवेदयामास च तं स्वं योगं परमर्षये ।
॥ शुक उवाच ॥ दृष्टो मार्गः प्रवृत्तोऽस्मि स्वस्ति तेऽस्तु तपोधन । त्वत्प्रसादाद्गमिष्यामि गतिमिष्टां महाद्युते ।
नारदेनाभ्यनुज्ञातः शुको द्वैपायनात्मजः । अभिवाद्य पुनर्य्योगमास्थायाकाशमाविशत् । १२५८५
कैलासपृष्ठादुत्पत्य स पपात दिवं तदा । अन्तरीक्षचरः श्रीमान् वायुभूतः सुनिश्चितः ।
तमुद्यन्तं द्विजश्रेष्ठं वैनतेयसमद्युतिं । ददृशुः सर्व्वभूतानि मनोमारुतरंहसं ।
व्यवसायेन लोकांस्त्रीन् सर्व्वान् सोऽथ विचिन्तयन् । आस्थितो दीर्घमध्वानं पावकार्कसमप्रभः ।
तमेकमनसं यान्तमव्यग्रमकुतोभयं । ददृशुः सर्व्वभूतानि स्थावराणि चराणि च ।
यथाशक्ति यथान्यायं पूजां वै चक्रिरे तदा । पुष्पवर्षैश्च दिव्यैस्तमवचक्रुर्दिवौकसः । १२५९०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं दृष्ट्वा विस्मिताः सर्व्वे गन्धर्व्वाप्सरसाङ्गणाः। ऋषयश्चैव संसिद्धाः परं विस्मयमागताः।
अन्तरीक्षगतः कोऽयं तपसा सिद्धिमागतः। अधःकायोर्द्ध्ववक्त्रश्च नेत्रैः समभिरज्यते।
ततः परमधर्म्मात्मा त्रिषु लोकेषु विश्रुतः। भास्करं समुदीक्षन् स प्राङ्मुखो वाग्यतोऽगमत्।
शब्देनाकाशमखिलं पूरयन्निव सर्व्वशः। तमापतन्तं सहसा दृष्ट्वा सर्व्वाप्सरोगणाः।
सम्भ्रान्तमनसो राजन्नासन् परमविस्मिताः। पञ्चचूडाप्रभृतयो भृशमुत्फुल्ललोचनाः। १२५९५
दैवतं कतमं ह्येतदुत्तमाङ्गतिमास्थितं। सुनिश्चितमिहायाति विमुक्तमिव निस्पृहं।
ततः समभिचक्राम मलयं नाम पर्व्वतं। उर्व्वशी पूर्व्वचित्तिश्च यं नित्यमुपसेवतः।
तस्य ब्रह्मर्षिपुत्त्रस्य विस्मयं ययतुः परं। अहो बुद्धिसमाधानं वेदाभ्यासरते द्विजे।
अचिरेणैव कालेन नभश्चरति चन्द्रवत्। पितृशुश्रूषया बुद्धिं संप्राप्तोऽयमनुत्तमां।
पितृभक्तो दृढतपाः पितुः सुदयितः सुतः। अनन्यमनसा तेन कथं पित्रा विसर्ज्जितः। १२६००
उर्व्वश्या वचनं श्रुत्वा शुकः परमधर्म्मवित्। उदैक्षत दिशः सर्व्वा वचने गतमानसः।
सोऽन्तरीक्षं महीञ्चैव सशैलवनकाननां। विलोकयामास तदा सरांसि सरितस्तथा।
ततो द्वैपायनसुतं बहुमानात् समन्ततः। कृताञ्जलिपुटाः सर्व्वा निरीक्षन्ते स्म देवताः।
अब्रवीत्तास्तदा वाक्यं शुकः परमधर्म्मवित् पिता यद्यनुगच्छेन्मां क्रोशमानः शुकेति वै।
ततः प्रतिवचो देयं सर्व्वैरेव समाहितैः। एतन्मे स्नेहतः सर्व्वे वचनं कर्त्तुमर्हथ। १२६०५
शुकस्य वचनं श्रुत्वा दिशः सर्व्वाः सकाननाः। समुद्राः सरितः शैलाः प्रत्यूचुस्तं समन्ततः।
यथाज्ञापयसे विप्र वाढमेवं भविष्यति। ऋषेर्व्याहरतो वाक्यं प्रतिवक्ष्यामहे वयं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकाभिपतने चतुस्त्रिंशदधिकत्रिशतोऽध्यायः ॥ २३४ ॥
॥ भीष्म उवाच ॥ इत्येवमुक्त्वा वचनं महर्षिः सुमहातपाः। प्रातिष्ठत शुकः सिद्धिं हित्वा दोषांश्चतुर्व्विधान्।
तमो ह्यष्टविधं हित्वा जहौ पञ्चविधं रजः। ततः सत्त्वं जहौ धीमांस्तदद्भुतमिवाभवत्।
ततस्तस्मिन् पदे नित्ये निर्गुणे लिङ्गवर्जिते। ब्रह्मणि प्रत्यतिष्ठत् स विधूमोऽग्निरिव ज्वलन्। १२६१०
उल्कापाता दिशां दाहा भूमिकम्पस्तथैव च। प्रादुर्भूताः क्षणे तस्मिंस्तदद्भुतमिवाभवत्।
द्रुमाः शाखाश्च मुमुचुः शिखराणि च पर्व्वताः। निर्घातशब्दैश्च गिरिर्हिमवान् दीर्य्यतीव ह।
न बभासे सहस्रांशुर्न जज्वाल च पावकः। ह्रदाश्च सरितश्चैव चुक्षुभुः सागरास्तथा।
ववर्ष वासवस्तोयं रसवच्च सुगन्धि च। ववौ समीरणश्चापि दिव्यगन्धवहः शुचिः।
सशृङ्गे प्रथमे दिव्ये हिमवन्मेरुसम्भवे। संश्लिष्टे श्वेतपीते द्वे रुक्मरूप्यमये शुभे। १२६१५
शतयोजनविस्तारे तिर्य्यगूर्द्ध्वञ्च भारत। उदीचीं दिशमास्थाय रुचिरे संददर्श ह।
सोऽविशङ्केन मनसा तथैवाभ्यपतच्छुकः। ततः पर्व्वतशृङ्गे द्वे सहसैव द्विधाकृते।
अदृश्येतां महाराज तदद्भुतमिवाभवत्। ततः पर्व्वतशृङ्गाभ्यां सहसैव विनिःसृतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न च प्रतिजघानास्य स गतिं पर्व्वतोत्तमः । ततो महानभूच्छब्दो दिवि सर्व्वदिवौकसां ।
गन्धर्व्वाणामृषीणाञ्च येच शैलनिवासिनः । दृष्ट्वा शुकमतिक्रान्तं पर्व्वतञ्च द्विधाकृतं । १२६८०
साधु साध्विति तत्रासीत् नादः सर्व्वत्र भारत । स पूज्यमानो देवैश्च गन्धर्व्वैरृषिभिस्तथा ।
यक्षराक्षससङ्घैश्च विद्याधरगणैस्तथा । दिव्यैः पुष्पैः समाकीर्णमन्तरीक्षं समन्ततः ।
आसीत्किल महाराज शुकाभिपतने तदा । ततो मन्दाकिनीं रम्यामुपरिष्टादभिव्रजन् ।
शुको ददर्श धर्म्मात्मा पुष्पितद्रुमकाननां । तस्यां क्रीडन्त्यभिरता ते चैवाप्सरसाङ्गणाः ।
शून्याकारं निराकाराः शुकं दृष्ट्वा विवाससः । तं प्रक्रामन्तमाज्ञाय पिता स्नेहसमन्वितः । १२६८५
उत्तमाङ्गतिमास्थाय पृष्ठतोऽनुससार ह । शुकस्तु मारुतादूर्द्ध्वं गतिं कृत्वान्तरीक्षगां ।
दर्शयित्वा प्रभावं स्वं ब्रह्मभूतोऽभवत्तदा । महायोगगतिं त्वन्यां व्यासोत्थाय महातपाः ।
निमेषान्तरमात्रेण शुकाभिपतनं ययौ । स ददर्श द्विधा कृत्वा पर्व्वताग्रं शुकं गतं ।
शशंसुरृषयस्तस्य कर्म्म पुत्त्रस्य तत्तदा । ततः शुकेति दीर्घेण शब्देनाक्रन्दितस्तदा ।
स्वयं पित्रा स्वरेणोच्चैस्त्रींल्लोकाननुनाद्य वै । शुकः सर्व्वगतो भूत्वा सर्व्वात्मा सर्व्वतोमुखः । १२६९०
प्रत्यभाषत धर्म्मात्मा भोः शब्देनानुवादयन् । तत एकाक्षरं नादं भोरित्येव समीरयन् ।
प्रत्याहरञ्जगत् सर्व्वमुच्चैः स्थावरजङ्गमं । ततः प्रभृति चाद्यापि शब्दानुच्चारितान् पृथक् ।
गिरिगह्वरपृष्ठेषु व्याहरन्ति शुकं प्रति । अन्तर्हितः प्रभावन्तु दर्शयित्वा शुकस्तदा ।
गुणान् संत्यज्य शब्दादीन् पदमभ्यगमत् परं । महिमानन्तु तं दृष्ट्वा पुत्त्रस्यामिततेजसः ।
निषसाद गिरिप्रस्थे पुत्त्रमेवान्वचिन्तयत् । ततो मन्दाकिनीतीरे क्रीडन्तोऽप्सरसाङ्गणाः । १२६९५
आसाद्य तमृषिं सर्व्वाः संभ्रान्ता गतचेतसः । जले निलिल्यिरे काश्चित्काश्चिद्गुल्मान् प्रपेदिरे ।
वसनान्याददुः काश्चित्तं दृष्ट्वा मुनिसत्तमं । तां मुक्ततान्तु विज्ञाय मुनिः पुत्त्रस्य वै तदा ।
सक्ततामात्मनश्चैव प्रीतोऽभूद्व्रीडितश्च ह । तं देवगन्धर्व्ववृतो महर्षिगणपूजितः ।
पिणाकहस्तो भगवानभ्यागच्छत शङ्करः । तमुवाच महादेवः सान्त्वपूर्व्वमिदं वचः ।
पुत्त्रशोकाभिसन्तप्तं कृष्णद्वैपायनं तदा । अग्नेर्भूमेरपां वायोरन्तरीक्षस्य चैव ह । १२७००
वीर्य्येण सदृशः पुत्त्रः पुरा मत्तस्त्वया वृतः । स तथालक्षणो जातस्तपसा तव सम्भृतः ।
मम चैव प्रसादेन ब्रह्मतेजोमयः शुचिः । स गतिं परमां प्राप्तो दुष्प्रापामजितेन्द्रियैः ।
दैवतैरपि विप्रर्षे त्वं तं किमनुशोचसि । यावत् स्थास्यन्ति गिरयो यावत् स्थास्यन्ति सागराः ।
तावत्तवाक्षया कीर्त्तिः सपुत्त्रस्य भविष्यति । छायां स्वपुत्त्रसदृशीं सर्व्वतोऽनपगां सदा ।
द्रक्ष्यसे त्वञ्च लोकेऽस्मिन्मत्प्रसादान्महामुने । सोऽनुनीतो भगवता स्वयं रुद्रेण भारत । १२७०५
छायां पश्यन् समावृत्तः स मुनिः परया मुदा । इति जन्मगतिश्चैव शुकस्य भरतर्षभ ।
विस्तरेण समाख्याता यन्मां त्वं परिपृच्छसि । एतदाचष्ट मे राजन् देवर्षिर्नारदः पुरा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

 Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्यासश्चैव महायोगी सञ्जल्पेषु पदे पदे। इतिहासमिमं पुण्यं मोक्षधर्म्मोपसंहितं।
धारयेद्यः शमपरः स गच्छेत् परमां गतिं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि शुकाभिपतने पञ्चत्रिंशदधिकत्रिशततोऽध्यायः॥ ३३५॥
॥ युधिष्ठिर उवाच॥ गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः। य इच्छेत् सिद्धिमास्थातुं देवतां कां यजेत सः।
कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैःश्रेयसं परं। विधिना केन जुहुयात् दैवं पित्र्यं तथैव च।
मुक्तश्च कां गतिं गच्छेत् मोक्षश्चैव किमात्मकः। स्वर्गतश्चैव किं कुर्य्याद्येन न च्यवते दिवः।
देवतानाञ्च को देवः पितॄणाञ्च पिता तथा। तस्मात् परतरं यच्च तन्मे ब्रूहि पितामह।
॥ भीष्म उवाच॥ गूढं मां प्रश्नवित् प्रश्नं पृच्छसे त्वमिहानघ। न ह्येतत्तर्कया शक्यं वक्तुं वर्षशतैरपि।
ऋते देवप्रसादाद्वा राजन् ज्ञानागमेन वा। गहनं ह्येतदाख्यानं व्याख्यातव्यं तवारिहन्।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। नारदस्य च संवादं ऋषेर्नारायणस्य च।
नारायणो हि विश्वात्मा चतुर्मूर्त्तिः सनातनः। धर्म्मात्मजः सम्बभूव पितैवं मेऽभ्यभाषत।
कृते युगे महाराज पुरा स्वायम्भुवेऽन्तरे। नरनारायणश्चैव हरिः कृष्णः स्वयम्भुवः।
तेषां नारायणनरौ तपस्तेपतुरव्ययौ। वदर्य्याश्रममासाद्य शकटे कनकामये।
अष्टचक्रं हि तद्यानं भूतयुक्तं मनोरमं। यत्राद्यौ लोकनाथौ तौ कृशौ धमनिसन्ततौ।
तपसा तेजसा चैव दुर्निरीक्ष्यौ सुरैरपि। यस्य प्रसादं कुर्व्वाते स देवो द्रष्टुमर्हति।
नूनन्तयोरनुमते हृदि हृच्छयचोदितः। महामेरोर्गिरेः शृङ्गात् प्रच्युतो गन्धमादनं।
नारदः सुमहद्भूतं सर्व्वलोकानचीचरत्। तं देशमगमद्राजन् वदर्य्याश्रममाशुगः।
तयोराह्निकवेलायां तस्य कौतूहलन्त्वभूत्। इदं तदास्पदं कृत्स्नं यस्मिंल्लोकाः प्रतिष्ठिताः।
सदेवासुरगन्धर्व्वाः सकिन्नरमहोरगाः। एका मूर्त्तिरियं पूर्व्वं जाता भूयश्चतुर्व्विधा।
धर्म्मस्य कुलसन्ताने धर्म्मादिभिर्व्विवर्द्धितः। अहो ह्यनुगृहीतोऽद्य धर्म्म एभिः सुरैरिह।
नरनारायणाभ्याञ्च कृष्णेन हरिणा तथा। अत्र कृष्णो हरिश्चैव कस्मिंश्चित् कारणान्तरे।
स्थितौ धर्म्मोत्तरौ ह्येतौ तथा तपसि धिष्ठितौ। एतौ हि परमं धाम कानयोराह्निकक्रिया।
पितरौ सर्व्वभूतानां दैवतञ्च यशस्विनौ। कां देवतान्तु यजतः पितॄन् कामान् महामती।
इति सञ्चिन्त्य मनसा भक्त्या नारायणस्य तु। सहसा प्रादुरभवत् समीपे देवयोस्तदा।
कृते दैवे च पित्र्ये च ततस्ताभ्यां निरीक्षितः। पूजितश्चैव विधिना यथाप्रोक्तेन शास्त्रतः।
तं दृष्ट्वा महदाश्चर्य्यमपूर्व्वं विधिविस्तरं। उपोपविष्टः सुप्रीतो नारदो भगवानृषिः।
नारायणं संनिरीक्ष्य प्रसन्नेनान्तरात्मना। नमस्कृत्य महादेवमिदं वचनमब्रवीत्।
॥ नारद उवाच॥ वेदेषु सपुराणेषु साङ्गोपाङ्गेषु गीयसे। त्वमजः शाश्वतो धाता मतोऽमृतमनुत्तमं।
प्रतिष्ठितं भूतभव्यं त्वयि सर्व्वमिदं जगत्। चत्वारो ह्याश्रमा देव सर्व्वे गार्हस्थ्यमूलकाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यजन्ते त्वामहरहर्नानामूर्त्तिसमास्थितं। पिता माता च सर्व्वस्य जगतः शाश्वतो गुरुः।
कं त्वद्य यजसे देवं पितरं कं न विद्महे।
॥ श्रीभगवानुवाच ॥ अवाच्यमेतद्वक्तव्यं आत्मगुह्यं सनातन। तव भक्तिमतो ब्रह्मन् वक्ष्यामि तु यथातथं।
यत्तत् सूक्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवं। इन्द्रियैरिन्द्रियार्थैश्च सर्व्वभूतैश्च वर्ज्जितं।
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते। त्रिगुणव्यतिरिक्तो वै पुरुषश्चेति कल्पितः। १२६८०
तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम। अव्यक्ताव्यक्तभावस्था या सा प्रकृतिरव्यया।
तां योनिमावयोर्व्विद्धि योऽसौ सदसदात्मकः। आवाभ्यां पूज्यते सो हि दैवे पित्र्ये च कल्पते।
नास्ति तस्मात् परोऽन्यो हि पिता देवोऽथवा द्विजः। आत्मा हि नः स विज्ञेयस्ततस्तं पूजयावहे।
तेनैषा प्रथिता ब्रह्मन्मर्य्यादा लोकभाविनी। दैवं पित्र्यं च कर्त्तव्यमिति तस्यानुशासनं।
ब्रह्मा स्थाणुर्मनुर्द्दक्षो भृगुर्धर्म्मस्तथा यमः। मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः। १२६८५
वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च। कर्द्दमश्चापि यः प्रोक्तः क्रोधो विक्रीत एव च।
एकविंशतिरुत्पन्नास्ते प्रजापतयः स्मृताः। तस्य देवस्य मर्य्यादां पूजयन्तः सनातनीं।
दैवं पित्र्यञ्च सततं तस्य विज्ञाय तत्त्वतः। आत्मप्राप्तानि च ततः प्राप्नुवन्ति द्विजोत्तमाः।
स्वर्गस्था अपि ये केचित्तं नमस्यन्ति देहिनः। ते तत्प्रसादात् गच्छन्ति तेनादिष्टफलाङ्गतिं।
ये हीनाः सप्तदशभिर्गुणैः कर्म्मभिरेव च। कलाः पञ्चदश त्यक्तास्ते मुक्ता इति निश्चयः। १२६९०
मुक्तानान्तु गतिर्ब्रह्मन् क्षेत्रज्ञ इति कल्पिता। स हि सर्व्वगुणश्चैव निर्गुणश्चैव कथ्यते।
दृश्यते ज्ञानयोगेन आवाञ्च प्रसृतौ ततः। एवं ज्ञात्वा तमात्मानं पूजयावः सनातनं।
तं वेदाश्चाश्रमाश्चैव नानामतसमास्थिताः। भक्त्या सम्पूजयन्त्याशु गतिञ्चैषां ददाति सः।
ये तु तद्भाविता लोके ह्येकान्तित्वं समास्थिताः। एतदभ्यधिकं तेषां यत्ते तं प्रविशन्त्युत।
इति गुह्यसमुद्देशस्तव नारद कीर्त्तितः। भक्त्या प्रेम्णा च विप्रर्षे अस्मद्भक्त्या च ते श्रुतः। १२६९५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये षट्त्रिंशदधिकत्रिशततोऽध्यायः ॥ ३३६ ॥
॥ भीष्म उवाच ॥ स एवमुक्तो द्विपदां वरिष्ठो नारायणेनोत्तमपूरुषेण। जगाद वाक्यं द्विपदां वरिष्ठं नारायणं लोकहिताधिवासं।
॥ नारद उवाच ॥ यदर्थमात्मप्रभवेण जन्म कृतं त्वया धर्म्मगृहे चतुर्द्धा। तत् साध्यतां लोकहितार्थमद्य गच्छामि द्रष्टुं प्रकृतिं तवाद्यां।
पूजां गुरूणां सततं करोमि परस्य गुह्यं न तु भिन्नपूर्व्वं। वेदाः स्वधीता मम लोकनाथ तप्तं तपो नानृतमुक्तपूर्व्वं।
गुप्तानि चत्वारि यथागमं मे शत्रौ च मित्रे च समोऽस्मि नित्य। तञ्चादिदेवं सततं प्रपन्न एकान्तभावेन वृणोम्यजस्रं।
एभिर्व्विशेषैः परिशुद्धसत्त्वः कस्मान्न पश्येयमनन्तमीशं। तत्पारमेष्ठस्य वचो निशम्य नारायणः शाश्वतधर्म्मगोप्ता। १२७००
गच्छेति तं नारदमुक्तवान् स सम्पूजयित्वात्मविधिक्रियाभिः। ततो विसृष्टः परमेष्ठिपुत्त्रः सोऽभ्यर्चयित्वा तमृषिं पुराणं।
खमुत्पपातोत्तमवेगयुक्तस्ततोऽधिमेरौ सहसा निलिल्ये। तत्रावतस्थे च मुनिर्मुहूर्त्तमेकान्तमासाद्य गिरेः स शृङ्गे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आलोकयन्नुत्तरपश्चिमेन ददर्श चाप्यद्भुतमुक्तरूपं । क्षीरोदधेर्य्योत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः ।
मेरोः सहस्रैः स हि योजनानां द्वात्रिंशतोर्द्ध्वं कविभिर्निरुक्तः । अनिन्द्रियाश्चानशनाश्च तत्र निस्पन्दहीनाः सुसुगन्धिनस्ते ।
श्वेताः पुमांसो गतसर्व्वपापाश्चक्षुर्मुषः पापकृतां नराणां । वज्रास्थिकायाः सममानोन्माना दिव्यान्वयरूपाः शुभसारो
पेताः । १२७०५
छत्राकृतिशीर्षा मेघौघनिनादाः समसुष्कचतुष्का राजीवशतपादाः । षष्ठ्या दन्तैर्युक्ताः शुक्लैरष्टाभिर्दंष्ट्राभिर्ये जिह्वाभिर्ये
विश्ववक्त्रं लेलिह्यन्ते सूर्य्यप्रख्यं ।
भक्त्या देवं विश्वोत्पन्नं यस्मात् सर्व्वे लोकाः सम्प्रसूताः । वेदा धर्म्मा मुनयः शान्ता देवाः सर्व्वे तस्य निसर्गः ।
॥ युधिष्ठिर उवाच ॥ अनिन्द्रिया निराहारा अनिस्पन्दाः सुगन्धिनः । कथन्ते पुरुषा जाताः का तेषां गतिरुत्तमा ।
ये च मुक्ता भवन्तीह नरा भरतसत्तम । तेषां लक्षणमेतद्धि तच्छ्वेतद्वीपवासिनां ।
तस्मान्मे संशयं छिन्धि परं कौतूहलं हि मे । त्वं हि सर्व्वकथारामस्त्वाञ्चैवापाश्रिता वयं । १२७१०
॥ भीष्म उवाच ॥ विस्तीर्णैषा कथा राजन् श्रुता मे पितृसन्निधौ । सैषा तव हि वक्तव्या कथासारो हि सा मता ।
राजोपरिचरो नाम बभुवाधिपतिर्भुवः । आखण्डलसखः ख्यातो भक्तो नारायणं हरिं ।
धार्म्मिको नित्यभक्तश्च पितुर्नित्यमतन्द्रितः । साम्राज्यं तेन सम्प्राप्तं नारायणवरात्पुरा ।
सात्वतं विधिमास्थाय प्राक् सूर्य्यमुखनिःसृतं । पूजयामास देवेशं तच्छेषेण पितामहान् ।
पितृशेषेण विप्रांश्च संविभज्य श्रितांश्च सः । शेषान्नभुक् सत्यपरः सर्व्वभूतेष्वहिंसकः । १२७१५
सर्व्वभावेन भक्तः स देवदेवं जनार्द्दनं । अनादिमध्यनिधनं लोककर्त्तारमव्ययं ।
तस्य नारायणे भक्तिं वहतो मित्रकर्षिणः । एकशय्यासनं देवो दत्तवान् देवराट् स्वयं ।
आत्मराज्यं धनञ्चैव कलत्रं वाहनन्तथा । यत्तद्भागवतं सर्व्वमिति तत् प्रोक्षितं सदा ।
काम्यनैमित्तिका राजन् यज्ञियाः परमक्रियाः । सर्व्वाः सात्वतमास्थाय विधिश्चक्रे समाहितः ।
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः । प्राणयं भगवत् प्रोक्तं भुञ्जते चाग्रभोजनं । १२७२०
तस्य प्रशासतो राज्यं धर्म्मेणामित्रघातिनः । नानृता वाक् समभवन्मनो दुष्टं न चाभवत् ।
न च कायेन कृतवान् स पापं परमाण्वपि । ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः ।
तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमं । वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ ।
आस्यैः सप्तभिरुद्गीर्णं लोकधर्म्ममनुत्तमं । मरीचिरत्र्याङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः । सप्तप्रकृतयो ह्येतास्तथा स्वायम्भुवोऽष्टमः । १२७२५
एताभिर्धार्य्यते लोकास्ताभ्यः शास्त्रं विनिःसृतं । एकाग्रमनसो दान्ता मुनयः संयमे रताः ।
भूतभव्यभविष्यज्ञाः सत्यधर्म्मपरायणाः । इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमं ।
लोकान् सञ्चिन्त्य मनसा ततः शास्त्रं प्रचक्रिरे । तत्र धर्म्मार्थकामा हि मोक्षः पश्चाच्च कीर्त्तितः ।
मर्य्यादा विविधाश्चैव दिवि भूमौ च संस्थिताः । आराध्य तपसा देवं हरिं नारायणं प्रभुं ।
दिव्यं वर्षसहस्रं वै सर्व्वे ते ऋषिभिः सह । नारायणानुशिष्टा हि तदा देवी सरस्वती । १२७३०

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विवेश तानृषीन् सर्व्वान् लोकानां हितकाम्यया । ततः प्रवर्त्तिता सम्यक् तपोविद्भिर्द्विजातिभिः ।
शब्दे चार्थे च हेतौ च एषा प्रथमसर्गजा । आदावेव हि तच्छास्त्रमोङ्कारस्वरपूजितं ।
ऋषिभिः श्रावितं तत्र यत्र कारुणिको ह्यसौ । ततः प्रसन्नो भगवाननिर्द्दिष्टशरीरगः ।
ऋषीनुवाच तान् सर्व्वानदृश्यः पुरुषोत्तमः । कृतं शतसहस्रं हि श्लोकानामिदमुत्तमं ।
लोकतन्त्रस्य कृत्स्नस्य यस्माद्धर्म्मः प्रवर्त्तते । प्रवृत्तौ च निवृत्तौ च यस्मादेतद्भविष्यति । १२०३५
यजुर्ऋक्सामभिर्जुष्टमथर्व्वाङ्गिरसैस्तथा । यथा प्रमाणं हि मया कृतो ब्रह्मप्रसादतः ।
रुद्रस्य क्रोधजो विप्रा यूयं प्रकृतयस्तथा । सूर्य्याचन्द्रमसौ वायुर्भूमिरापोऽग्निरेव च ।
सर्व्वे च नक्षत्रगणा यच्च भूताभिशब्दितं । अधिकारेषु वर्त्तन्ते यथा स्वं ब्रह्मवादिनः ।
सर्व्वे प्रमाणं हि यथा तथा तच्छास्त्रमुत्तमं । भविष्यति प्रमाणं वै एतन्मदनुशासनं ।
तस्मात् प्रवक्ष्यते धर्म्मान्मनुः स्वायम्भुवः स्वयं । उशना बृहस्पतिश्चैव यदोत्पन्नौ भविष्यतः । १२०४०
तदा प्रवक्ष्यतः शास्त्रं युष्मन्मतिभिरुद्धृतं । स्वायम्भुवेषु धर्म्मेषु शास्त्रे चौशनसे कृते ।
बृहस्पतिमते चैव लोकेषु प्रतिचारिते । युष्मत्कृतमिदं शास्त्रं प्रजापालो वसुस्ततः ।
बृहस्पतिसकाशाद्वै प्राप्स्यते द्विजसत्तमाः । स हि सद्भावितो राजा मद्भक्तश्च भविष्यति ।
तेन शास्त्रेण लोकेषु क्रियाः सर्व्वाः करिष्यति । एतद्धि युष्मच्छास्त्राणां शास्त्रमुत्तमसंज्ञितं ।
एतदर्थ्यञ्च धर्म्म्यञ्च रहस्यञ्चैतदुत्तमं । अस्य प्रवर्त्तनाच्चैव प्रजावन्तो भविष्यथ । १२०४५
स च राजा श्रिया युक्तो भविष्यति महान् वसुः । संस्थिते तु नृपे तस्मिन् शास्त्रमेतत् सनातनं ।
अन्तर्द्धास्यति तत् सर्व्वमेतद्वः कथितं मया । एतावदुक्त्वा वचनमदृश्यः पुरुषोत्तमः ।
विसृज्य तानृषीन् सर्व्वान् कामपि प्रसृतो दिशं । ततस्ते लोकपितरः सर्व्वलोकार्थचिन्तकाः ।
प्रावर्त्तयन्त तच्छास्त्रं धर्म्मयोनिं सनातनं । उत्पन्नेऽङ्गिरसे चैव युगे प्रथमकल्पिते ।
साङ्गोपनिषदं शास्त्रं स्थापयित्वा बृहस्पतौ । जग्मुर्यथेप्सितं देशं तपसे कृतनिश्चयाः । १२०५०
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रवर्त्तकाः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये सप्तत्रिंशदधिकत्रिशततोऽध्यायः ॥ ३३७ ॥

॥ भीष्म उवाच ॥ ततोऽतीते महाकल्पे उत्पन्नेऽङ्गिरसः सुते । बभूवुर्निर्वृता देवा जाते देवपुरोहिते ।
बृहद्ब्रह्म महच्चेति शब्दाः पर्य्यायवाचकाः । एभिः समन्वितो राजन् गुणैर्व्विद्वान् बृहस्पतिः ।
तस्य शिष्यो बभूवाग्र्यो राजोपरिचरो वसुः । अधीतवांस्तदा शास्त्रं सम्यक् चित्रशिखण्डिजं ।
स राजा भावितः पूर्व्वं दैवेन विधिना वसुः । पालयामास पृथिवीं दिवमाखण्डलो यथा । १२०५५
तस्य यज्ञो महानासीदश्वमेधो महात्मनः । बृहस्पतिरुपाध्यायस्तत्र होता बभूव ह ।
प्रजापतिसुताश्चात्र सदस्यास्त्वभवंस्त्रयः । एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ।
धनुषाख्योऽथ रैभ्यश्च अर्व्वावसुपरावसू । ऋषिर्मेधातिथिश्चैव ताण्ड्यश्चैव महानृषिः ।
ऋषिः शान्तिर्म्महाभागस्तथावेदशिरास्च यः । ऋषिश्रेष्ठश्च कपिलः शालिहोत्रपिता स्मृतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आद्यः कठस्तैत्तिरिश्च वैशम्पायनपूर्व्वजः । कण्वोऽथ देवहोत्रश्च एते षोडश कीर्त्तिताः । १२०६०
सम्भूताः सर्व्वसम्भारास्तस्मिन्राजन्महाक्रतौ । न तत्र पशुघातोऽभूत् स राजैवास्थितोऽभवत् ।
अहिंस्रः शुचिरक्षुद्रो निराशीः सर्व्वसंस्तुतः । आरण्यकपदोद्भूता भागास्तत्रोपकल्पिताः ।
प्रीतस्ततोऽस्य भगवान् देवदेवः पुरातनः । साक्षात्तं दर्शयामास सोऽदृश्योऽन्येन केनचित् ।
स्वयम्भागमुपाघ्राय पुरोडाशं गृहीतवान् । अदृश्येन हृतो भागो देवेन हरिमेधसा ।
बृहस्पतिस्ततः क्रुद्धः स्रुचमुद्यम्य वेगितः । आकाशं घ्नन् स्रुचः पातैरोषादश्रूण्यवर्त्तयत् । १२०६५
उवाच चोपरिचरं मया भागोऽयमुद्यतः । ग्राह्यः स्वयं हि देवेन मत्प्रत्यक्षं न संशयः ।
॥ युधिष्ठिर उवाच ॥ उद्यता यज्ञभागा हि साक्षात् प्राप्ताः सुरैरिह । किमर्थमिह न प्राप्तो दर्शनं स हरिर्विभुः ।
॥ भीष्म उवाच ॥ ततः स तं समुद्भूतं भूमिपालो महान् वसुः । प्रसादयामास मुनिं सदस्यास्ते च सर्व्वशः ।
ऊचुश्चैनमसम्भ्रान्तं न रोषं कर्त्तुमर्हसि । नैष धर्म्मः कृतयुगे यस्त्वं रोषमचीकृथाः ।
अरोषणो ह्यसौ देवो यस्य भागोऽयमुद्यतः । न शक्यः स त्वया द्रष्टुमस्माभिर्व्वा बृहस्पते । १२०७०
यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति । एकतद्वितत्रिताश्चोचुस्ततश्चित्रशिखण्डिनः ।
वयं हि ब्रह्मणः पुत्रा मानसाः परिकीर्त्तिताः । गता निःश्रेयसार्थं हि कदाचिद्दिशमुत्तरां ।
तप्त्वा वर्षसहस्राणि चरित्वा तप उत्तमं । एकपादास्थिताः सम्यक् काष्ठभूताः समाहिताः ।
मेरोरुत्तरभागे तु क्षीरोदस्यानुकूलतः । स देशो यत्र नस्तप्तं तपः परमदारुणं ।
कथं पश्येम हि वयं देवं नारायणात्मकं । वरेण्यं वरदं तं वै देवदेवं सनातनं । १२०७५
कथं पश्येम हि वयं देवं नारायणं त्विति । अथ व्रतस्यावभृथे वागुवाचाशरीरिणी ।
स्निग्धगम्भीरया वाचा प्रहर्षणकरी विभो । सुतप्तं वस्तपो विप्राः प्रसन्नेनान्तरात्मना ।
यूयं जिज्ञासवो भक्ताः कथं द्रक्ष्यथ तं विभुं । क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः ।
तत्र नारायणपरा मानवाश्चन्द्रवर्च्चसः । एकान्तभावोपगतास्ते भक्ताः पुरुषोत्तमं ।
ते सहस्रार्चिषं देवं प्रविशन्ति सनातनं । अनिन्द्रिया निराहारा अनिस्पन्दाः सुगन्धिनः । १२०८०
एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः । गच्छध्वं तत्र मुनयस्तत्रात्मा नः प्रकाशितः ।
अथ श्रुत्वा वयं सर्व्वे वाचं तामशरीरिणीं । यथाख्यातेन मार्गेण तं देशं प्रतिपेदिरे ।
प्राप्य श्वेतं महाद्वीपं तच्चित्तास्तद्दिदृक्षवः । ततोऽस्मद्दृष्टिविषयस्ततोऽप्रतिहतोऽभवत् ।
न च पश्याम पुरुषं तत्तेजोहृतदर्शनाः । ततो नः प्रादुरभवद्विज्ञानं देवयोगजं ।
न किलातप्ततपसा शक्यते द्रष्टुमञ्जसा । ततः पुनर्व्वर्षशतं तप्त्वा तात्कालिकं महत् । १२०८५
व्रतावसाने च शुभान्नरान्ददृशिरे वयं । श्वेतांश्चन्द्रप्रतीकाशान् सर्व्वलक्षणलक्षितान् ।
नित्याञ्जलिकृतान् ब्रह्म जपतः प्रागुदङ्मुखान् । मानसो नाम स जपो जप्यते तैर्म्महात्मभिः ।
तेनैकाग्रमनस्त्वेन प्रीतो भवति वै हरिः । याभवन्मुनिशार्दूल भाः सूर्य्यस्य युगक्षये ।
एकैकस्य प्रभा तादृक् साभवन्मानवस्य ह । तेजोनिवासः स द्वीप इति वै मेनिरे वयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न तत्राभ्यधिकः कश्चित् सर्व्वे ते समतेजसः । अथ सूर्य्यसहस्रस्य प्रभां युगपदुत्थितां । १२७९०
सहसा दृष्टवन्तः स्म पुनरेव बृहस्पते । सहितास्ताभ्यधावन्त ततस्ते मानवा द्रुतं ।
कृताञ्जलिपुटा हृष्टा नमइत्येव वादिनः । ततो हि वदतां तेषामश्रौष्म विपुलं ध्वनिं ।
बलिः किलोपक्रियते तस्य देवस्य तैर्नरैः । वयन्तु तेजसा तस्य सहसा हृतचेतसः ।
न किञ्चिदपि पश्यामो हतचक्षुर्बलेन्द्रियाः । एकस्तु शब्दो विततः श्रुतोऽस्माभिरुदीरितः ।
जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुषपूर्व्वज । १२७९५
इति शब्दः श्रुतोऽस्माभिः शिक्षाक्षरसमन्वितः । एतस्मिन्नन्तरे वायुः सर्व्वगन्धवहः शुचिः
दिव्यान्युवाह पुष्पाणि कर्म्मण्याश्चौषधीस्तथा । तैरिष्टपञ्चकालज्ञैर्हरिरेकान्तिभिर्नरैः ।
भक्त्या परमया युक्तैर्मनोवाक्कर्म्मभिस्तदा । नूनन्तत्रागतो देवो यथा तैर्वागुदीरिता ।
वयन्त्वेनं न पश्यामो मोहितास्तस्य मायया । मारुते संनिवृत्ते च बलौ च प्रतिपादिते ।
चिन्ताव्याकुलितात्मानो जाताः स्मोऽङ्गिरसाम्वर । मानवानां सहस्रेषु तेषु वै शुद्धयोनिषु । १२८००
अस्मान् कश्चिन्मनसा चक्षुषा वाप्यपूजयत् । तेऽपि स्वस्था मुनिगणा एकभावमनुव्रताः ।
नास्मासु दधिरे भावं ब्रह्मभावमनुष्ठिताः । ततोऽस्मान् सुपरिश्रान्तांस्तपसा चातिकर्षितान् ।
उवाच खस्थं किमपि भूतं तत्राशरीरकं ।
॥ देव उवाच ॥ दृष्टारः पुरुषाः श्वेताः सर्व्वेन्द्रियविवर्ज्जिताः । दृष्टो भवति देवेश एभिर्दृष्टैर्द्विजोत्तमैः ।
गच्छध्वं मुनयः सर्व्वे यथागतमितोऽचिरात् । न स शक्यस्त्वभक्तेन द्रष्टुं देवः कथञ्चन । १२८०५
कामं कालेन महता एकान्तित्वमुपागतैः । शक्यो द्रष्टुं स भगवान् प्रभामण्डलदुर्दृशः ।
महत्कार्य्यञ्च कर्त्तव्यं युष्माभिर्द्विजसत्तमाः । इतः कृतयुगेऽतीते विपर्य्यासङ्गतेऽपि च ।
वैवस्वतेऽन्तरे विप्राः प्राप्ते त्रेतायुगे पुनः । सुराणां कार्य्यसिद्ध्यर्थं सहाया वै भविष्यथ ।
ततस्तदद्भुतं वाक्यं निशम्यैवाम्रुतोपमं । तस्य प्रसादात् प्राप्ताः स्मो देशमीप्सितमञ्जसा ।
एवं सुतपसा चैव हव्यकव्यैस्तथैव च । देवोऽस्माभिर्न दृष्टः स कथं त्वं द्रष्टुमर्हसि । १२८१०
नारायणो महद्भूतं विश्वसृक् हव्यकव्यभुक् । अनादिनिधनोऽव्यक्तो देवदानवपूजितः ।
एवमेकतवाक्येन द्वितत्रितमतेन च । अनुनीतः सदस्यैश्च बृहस्पतिरुदारधीः ।
समानयत्ततो यज्ञं दैवतं समपूजयत् । समाप्तयज्ञो राजापि प्रजां पालितवान् वसुः ।
ब्रह्मशापाद्दिवो भ्रष्टः प्रविवेश महीं ततः । स राजा राजशार्दूल सत्यधर्म्मपरायणः ।
अन्तर्भूमिगतश्चैव सततं धर्म्मवत्सलः । नारायणपरो भूत्वा नारायणजपं जपन् । १२८१५
तस्यैव च प्रसादेन पुनरेवोत्थितस्तु सः । महीतलाद्गतस्थानं ब्रह्मणः समनन्तरं ।
पराङ्गतिमनुप्राप्त इति नैष्ठिकमञ्जसा ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये अष्टत्रिंशदधिकत्रिशततोऽध्यायः ॥ ३३८ ॥
॥ युधिष्ठिर उवाच ॥ यदा भागवतोऽत्यर्थमासीद्राजा महान् वसुः । किमर्थं स परिभ्रष्टो विवेश विवरं भुवः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । ऋषीणाञ्चैव संवादं त्रिदशानाञ्च भारत।
अजेन यष्टव्यमिति प्राहुर्द्देवा द्विजोत्तमान् । स च छागोऽप्यजो ज्ञेयो नान्यः पशुरिति स्थितिः। १२८२०
॥ ऋषय ऊचुः ॥ वीजैर्य्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः । अजसंज्ञानि वीजानि च्छागं नो हन्तुमर्हथ ।
नैष धर्म्मः सतां देवा यत्र बध्येत वै पशुः । इदं कृतयुगं श्रेष्ठं कथं बध्येत वै पशुः ।
॥ भीष्म उवाच ॥ तेषां संवदतामेवमृषीणां विबुधैः सह । मार्गागतो नृपश्रेष्ठस्तं देशं प्राप्तवान् वसुः ।
अन्तरीक्षचरः श्रीमान् समग्रबलवाहनः । तं दृष्ट्वा सहसायान्तं वसुं ते त्वन्तरीक्षगं।
ऊचुर्द्विजातयो देवानेष च्छेत्स्यति संशयं। यज्वा दानपतिः श्रेष्ठः सर्व्वभूतहितप्रियः । १२८२५
कथंस्विदन्यथा ब्रूयादेव वाक्यं महान् वसुः । एवं ते संविदं कृत्वा विबुधा ऋषयस्तथा ।
अपृच्छन् सहसाभ्येत्य वसुं राजानमन्तिकात् । भो राजन् केन यष्टव्यमजेनाहोस्विदौषधैः।
एतन्नः संशयं छिन्धि प्रमाणं नो भवान्मतः । स तान् कृताञ्जलिर्भूत्वा परिपप्रच्छ वै वसुः ।
कस्य वैको मतः कामो ब्रूत सत्यं द्विजोत्तमाः ।
॥ ऋषय ऊचुः ॥ धान्यैर्यष्टव्यमित्येव पक्षोऽस्माकं नराधिप । देवानान्तु पशुः पक्षो मतो राजन् वदस्व नः । १२८३०
॥ भीष्म उवाच ॥ देवानान्तु मतं ज्ञात्वा वसुना पक्षसंश्रयात् । छागेनाजेन यष्टव्यमेवमुक्तं वचस्तदा ।
कुपितास्ते ततः सर्व्वे मुनयः सूर्य्यवर्च्चसः । ऊचुर्व्वसुं विमानस्थं देवपक्षार्थवादिनं ।
सुरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत । अद्यप्रभृति ते राजन्नाकाशे विहिता गतिः।
अस्मच्छापाभिघातेन महीं भित्त्वा प्रवेक्ष्यसि । ततस्तस्मिन्मुहूर्त्तेऽथ राजोपरिचरस्तदा ।
अधो वै सम्बभूवाशु भूमेर्व्विवरगो नृप । स्मृतिस्त्वेवं न विजहौ तदा नारायणाज्ञया । १२८३५
देवास्तु सहिताः सर्व्वे वसोः शापविमोक्षणं । चिन्तयामासुरव्यग्राः सुकृतं हि नृपस्य तत् ।
अनेनास्मत्कृते राज्ञा शापः प्राप्तो महात्मना । अस्य प्रतिप्रियं कार्य्यं सहितैर्नो दिवौकसः ।
इति बुद्ध्या व्यवस्याशु गत्वा निश्चयमीश्वराः । ऊचुः संहृष्टमनसो राजोपरिचरन्तदा ।
ब्रह्मण्यदेवभक्तस्त्वं सुरासुरगुरुर्हरिः । कामं स तव तुष्टात्मा कुर्य्याच्छापविमोक्षणं ।
मानना तु द्विजातीनां कर्त्तव्या वै महात्मनां । अवश्यं तपसा तेषां फलितव्यं नृपोत्तम । १२८४०
यतस्त्वं सहसा भ्रष्ट आकाशान्मेदिनीतलं । एकन्त्वनुग्रहं तुभ्यं दद्मो वै नृपसत्तम ।
यावत्त्वं शापदोषेण कालमासिष्यसेऽनघ । भूमेर्व्विवरगो भूत्वा तावत्त्वं कालमाप्स्यसि ।
यज्ञेषु सुहुतं विप्रैर्व्वसोर्द्धारां समाहितैः । प्राप्स्यसेऽस्मदनुध्यानान्मा च त्वां ग्लानिरस्पृशत् ।
न क्षुत्पिपासे राजेन्द्र भूमेश्छिद्रे भविष्यतः । वसोर्द्धाराभिपीतत्वात्तेजसाप्यायितेन च ।
स देवोऽस्मद्वरात् प्रीतो ब्रह्मलोकं हि नेष्यति । एवं दत्त्वा वरं राज्ञे सर्व्वे ते च दिवौकसः। १२८४५
गताः स्वभवनं देवा ऋषयश्च तपोधनाः । चक्रे वसुस्ततः पूजां विष्वक्सेनाय भारत।
जप्यं जगौ च सततं नारायणमुखोद्गतं। तत्रापि पञ्चभिर्यज्ञैः पञ्चकालानरिन्दम।
अयजद्धरिं सुरपतिं भूमेर्व्विवरगोऽपि सन् । ततोऽस्य तुष्टो भगवान् भक्त्या नारायणो हरिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनन्यभक्तस्य सतस्तत्परस्य जितात्मनः । वरदो भगवान् विष्णुः समीपस्थं द्विजोत्तमं ।
गरुत्मन्तं महावेगमाबभाषेप्सितं तदा । द्विजोत्तम महाभाग पश्यतां वचनान्मम । १२८५०
सम्राड्राजा वसुर्नाम धर्म्मात्मा संशितव्रतः । ब्राह्मणानां प्रकोपेन प्रविष्टो वसुधातलं ।
मानितास्ते तु विप्रेन्द्रास्तन्तु गच्छ द्विजोत्तम । भूमेर्व्विवरसंगुप्तं गरुडेह ममाज्ञया ।
अधश्चरं नृपश्रेष्ठं खेचरं कुरु मा चिरं । गरुत्मानथ विक्षिप्य पक्षौ मारुतवेगवान् ।
विवेश विवरं भूमेर्यत्रास्ते पार्थिवो वसुः । तत एनं समुत्क्षिप्य सहसा विनतासुतः ।
उत्पपात नभस्तूर्णं तत्र चैनममुञ्चत । तस्मिन्मुहूर्त्ते संजज्ञे राजोपरिचरः पुनः । १२८५५
सशरीरो गतश्चैव ब्रह्मलोकं नृपोत्तमः । एवन्तेनापि कौन्तेय वाग्दोषाद्देवताज्ञया ।
प्राप्ता गतिरधस्तात्तु द्विजशापान्महात्मना । केवलं पुरुषस्तेन सेवितो हरिरीश्वरः ।
ततः शीघ्रं जहौ शापं ब्रह्मलोकमवाप च ।
॥ भीष्म उवाच ॥ एतत्ते सर्व्वमाख्यातं सम्भूता मानवा यथा । नारदोऽपि यथा श्वेतं द्वीपं स गतवानृषिः ।
तत्ते सर्व्वं प्रवक्ष्यामि शृणुष्वैकमना नृप । १२८६०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये ऊनचत्वारिंशदधिकत्रिशतोऽध्यायः ॥ ३३९ ॥
॥ भीष्म उवाच ॥ प्राप्य श्वेतं महाद्वीपं नारदो भगवानृषिः । ददर्श तानेव नरान् श्वेतांश्चन्द्रसमप्रभान् ।
पूजयामास शिरसा मनसा तैश्च पूजितः । दिदृक्षुर्जप्यपरमः सर्व्वकृच्छ्रगतः स्थितः ।
भूत्वैकाग्रमना विप्र ऊर्द्ध्वबाहुः समाहितः । स्तोत्रं जगौ स विश्वाय निर्गुणाय गुणात्मने ।

॥ नारद उवाच ॥ नमस्ते देवदेवेश निष्क्रिय निर्गुण लोकसाक्षिन् क्षेत्रज्ञ पुरुषोत्तम अनन्त पुरुष महापुरुष पुरुषोत्तम त्रिगुणप्रधान अमृत अमृताख्य अनन्ताख्य व्योम सनातन सदसद्व्यक्ताव्यक्त ऋतधामन् आदिदेव वसुप्रद प्रजापते सुप्रजापते वनस्पते महाप्रजापते ऊर्ज्जस्पते वाचस्पते जगत्पते मनस्पते दिवस्पते मरुत्पते सलिलपते पृथिवीपते दिक्पते पूर्व्वनिवास गुह्य ब्रह्मपुरोहित ब्रह्मकायिक महाराजिक चातुर्म्महाराजिक आभासुर महाभासुर सप्तमहाभाग याम्य महायाम्य संज्ञासंज्ञ तुषित महातुषित प्रमर्द्दन परिनिर्म्मित अपरिनिर्म्मित वशवर्त्तिन् अपरिनिन्दित अपरिमित वशवर्त्तिन् अवशवर्त्तिन् यज्ञ महायज्ञ यज्ञसम्भव यज्ञयोने यज्ञगर्भ यज्ञहृदय यज्ञस्तुत यज्ञभागहर पञ्चयज्ञ पञ्चकालकर्तृपते पञ्चरात्रिक वैकुण्ठ अपराजित मानसिक नामनामिक परस्वामिन् सुस्नात हंस परमहंस महाहंस परमयाज्ञिक साङ्ख्ययोग साङ्ख्यमूर्त्ते अमृतेशय हिरण्येशय देवेशय कुशेशय ब्रह्मेशय पद्मेशय विश्वेश्वर विष्वक्सेन त्वं जगदन्वयः त्वं जगत्प्रकृतिः तवाग्निरास्यं वडवामुखोऽग्निः त्वमाहुतिः सारथिः त्वं वषट्कारः त्वं ओङ्कारः त्वं तपः त्वं मनः त्वं चन्द्रमाः त्वं चक्षुराज्यं त्वं सूर्य्यस्त्वं दिशां गजस्त्वं दिग्भानो विदिग्भानो हयशिरः प्रथमत्रिसौपर्णः वर्णधर पञ्चाग्ने त्रिणाचिकेत षडङ्गनिधान प्राग्ज्योतिषज्येष्ठ सामग सांसिकव्रतधर अथर्व्वशिराः पञ्चमहाकल्प फेनपाचार्य्य वालखिल्य वैखानस अभग्नयोग अभग्नपरिसङ्ख्यान युगादे युगमध्य युगनिधन आखण्डल प्राचीनगर्भ कौशिक पुरुष्टुत पुरुहूत विश्वकृत् विश्वरूप अनन्तगते अनन्तभोग अनन्त अनादे अमध्य अव्यक्त अव्यक्तनिधन व्रतावास समुद्राधिवास यशोवास तपोवास दयावास लक्ष्म्यावास विद्यावास कीर्त्त्यावास श्रीवास सर्व्वावास वासुदेव सर्व्वच्छन्दक हरिहय हरिमेध महायज्ञ भागहर वरप्रद सुखप्रद धनप्रद हरिमेध यमनियम महानियम कृच्छ्र अतिकृच्छ्र

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

महाचक्षु सर्व्वचक्षु नियमधर निवृत्तभ्रम प्रवचन गतप्रवृत्त वेदक्रिय अज सर्व्वगते सर्व्वदर्शिन् अग्राह्य अचल महाविभूते माहात्म्यशरीर पवित्र महापवित्र हिरण्मय बृहत् अप्रतर्क्य अविज्ञेय ब्रह्माग्र्य प्रजासर्गकर प्रजानिधनकर महामायाधर चित्रशिखण्डिन् वरप्रद पुरोडाशभागहर गताध्वर छिन्नतृष्ण छिन्नसंशय सर्व्वतोवृत्त निवृत्तरूप ब्राह्मणरूप ब्राह्मणप्रिय विश्वमूर्त्ते महामूर्त्ते बान्धव भक्तवत्सल ब्राह्मणदेव भक्तोऽहं त्वां दिदृक्षुरेकान्तदर्शनाय नमो नमः॥

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये महापुरुषस्तवे चत्वारिंशदधिकत्रिशततोऽध्यायः॥ ३४०॥

॥ भीष्म उवाच ॥ एवं स्तुतः स भगवान् गुह्यैस्तथ्यैश्च नामभिः। तं मुनिं दर्शयामास नारदं विश्वरूपधृक्। १२८६५
किञ्चिच्चन्द्राद्विशुद्धात्मा किञ्चिच्चन्द्राद्विशेषवान्। कृशानुवर्णः किञ्चिच्च किञ्चिद्धिष्ण्याकृतिः प्रभुः।
शुकपत्रनिभः किञ्चित् किञ्चित् स्फटिकसन्निभः। नीलाञ्जनचयप्रख्यो जातरूपप्रभः क्वचित्।
प्रवालाङ्कुरवर्णश्च श्वेतवर्णस्तथा क्वचित्। क्वचित् सुवर्णवर्णाभो वैदूर्य्यसदृशः क्वचित्।
नीलवैदूर्य्यसदृशः इन्द्रनीलनिभः क्वचित्। मयूरग्रीववर्णाभो मुक्ताहारनिभः क्वचित्।
एतान् बहुविधान् वर्णान् रूपैर्बिभ्रत् सनातनः। सहस्रनयनः श्रीमाञ्छतशीर्षः सहस्रपात्। १२८७०
सहस्रोदरबाहुश्च अव्यक्त इति च क्वचित्। ओङ्कारमुद्गिरन् वक्त्रात् सावित्रीञ्च तदन्वयां।
शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्व्वेदान् गिरन् बहून्। आरण्यकं जगौ देवो हरिर्नारायणो वशी।
वेदीं कमण्डलुं शुभ्रान् मणीनुपानहौ कुशान्। अजिनं दण्डकाष्ठञ्च ज्वलितञ्च हुताशनं।
धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा। तं प्रसन्नं प्रसन्नात्मा नारदो द्विजसत्तमः।
वाग्यतः प्रणतो भूत्वा ववन्दे परमेश्वरं। तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः। १२८७५
॥ श्रीभगवानुवाच ॥ एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः। इमं देशमनुप्राप्ता मम दर्शनलालसाः।
न च मां ते ददृशिरे नच द्रक्ष्यति कश्चन। ऋते ह्येकान्तिकश्रेष्ठात्त्वञ्चैवैकान्तिकोत्तमः।
ममैतास्तनवः श्रेष्ठा जाता धर्म्मगृहे द्विज। तास्त्वं भजस्व सततं साधयस्व यथागतं।
वृणीष्व च वरं विप्र मत्तस्त्वं यदिहेच्छसि। प्रसन्नोऽहं तवाद्येह विश्वमूर्त्तिरिहाव्ययः।
॥ नारद उवाच ॥ अद्य मे तपसो देव यमस्य नियमस्य च। सद्यः फलमवाप्तं वै दृष्टो यद्भगवान्मया। १२८८०
वर एष ममात्यन्तं दृष्टस्त्वं यत्सनातनः। भगवन् विश्वदृक् सिंहः सर्व्वमूर्त्तिर्महान् प्रभुः।
॥ भीष्म उवाच ॥ एवं सन्दर्शयित्वा तु नारदं परमेष्ठिनं। उवाच वचनं भूयो गच्छ नारद मा चिरं।
इमे ह्यनिन्द्रियाहारा मद्भक्ताश्चन्द्रवर्चसः। एकाग्राश्चिन्तयेयुर्म्मां नैषां विघ्नो भवेदिति।
सिद्धा ह्येते महाभागाः पुरा ह्येकान्तिनोऽभवन्। तमोरजोभिर्निर्मुक्ता मां प्रवेक्ष्यन्त्यसंशयं।
न दृश्यश्चक्षुषा योऽसौ न स्पृश्यः स्पर्शनेन च। न घ्रेयश्चैव गन्धेन रसेन च विवर्ज्जितः। १२८८५
सत्त्वं रजस्तमश्चैव न गुणास्तं भजन्ति वै। यश्च सर्व्वगतः साक्षी लोकस्यात्मेति कथ्यते।
भूतग्रामशरीरेषु नश्यत्सु न विनश्यति। अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा।
द्विर्द्वादशेभ्यस्तत्त्वेभ्यः ख्यातो यः पञ्चविंशकः। पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते।
यं प्रविश्य भवन्तीह मुक्ता वै द्विजसत्तमाः। स वासुदेवो विज्ञेयः परमात्मा सनातनः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पश्य देवस्य माहात्म्यं महिमानञ्च नारद। शुभाशुभैः कर्म्मभिर्यो न लिप्यति कदाचन।
सत्त्वं रजस्तमश्चेति गुणानेतान् प्रचक्षते। एते सर्व्वशरीरेषु तिष्ठन्ति विचरन्ति च।
एतान् गुणांस्तु क्षेत्रज्ञो भुङ्क्ते नैभिः स भुज्यते। निर्गुणो गुणभुक् चैव गुणस्रष्टा गुणाधिकः।
जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिःष्वापः प्रलीयन्ते ज्योतिर्व्वायौ प्रलीयते।
खे वायुः प्रलयं याति मनस्याकाशमेव च। मनो हि परमं भूतं तदव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये सम्प्रलीयते। नास्ति तस्मात् परतरः पुरुषाद्वै सनातनात्।
नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमं। ऋते तमेकं पुरुषं वासुदेवं सनातनं।
सर्व्वभूतात्मभूतो हि वासुदेवो महाबलः। पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं।
ते समेता महात्मानः शरीरमिति संज्ञितं। तदा विशति यो ब्रह्मन्नदृश्यो लघुविक्रमः।
उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः। न विना धातुसंघातं शरीरं भवति क्वचित्।
न च जीवं विना ब्रह्मन् वायवश्चेष्टयन्त्युत। स जीवः परिसङ्ख्यातः शेषः सङ्कर्षणः प्रभुः।
तस्मात् सनत्कुमारत्वं यो लभेत् स्वेन कर्म्मणा। यस्मिंश्च सर्व्वभूतानि प्रलयं यान्ति संक्षये।
स मनः सर्व्वभूतानां प्रद्युम्नः परिपठ्यते। तस्मात् प्रसूतो यः कर्त्ता कारणं कार्य्यमेव च।
तस्मात् सर्व्वं सम्भवति जगत् स्थावरजङ्गमं। सोऽनिरुद्धः स ईशानो व्यक्तः स सर्व्वकर्म्मसु।
यो वासुदेवो भगवान् क्षेत्रज्ञो निर्गुणात्मकः। ज्ञेयः स एव राजेन्द्र जीवः सङ्कर्षणः प्रभुः।
सङ्कर्षणाच्च प्रद्युम्नो मनोभूतः स उच्यते। प्रद्युम्नाद्योऽनिरुद्धस्तु सोऽहङ्कारः स ईश्वरः।
मत्तः सर्व्वं सम्भवति जगत् स्थावरजङ्गमं। अक्षरञ्च क्षरञ्चैव सच्चासच्चैव नारद।
मां प्रविश्य भवन्तीह मुक्ता भक्तास्तु ये मम। अहं हि पुरुषो ज्ञेयो निष्क्रियः पञ्चविंशकः।
निर्गुणो निष्कलश्चैव निर्द्वन्द्वो निष्परिग्रहः। एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते।
इच्छन्मुहूर्त्तान्नश्येयमीशोऽहं जगतो गुरुः। माया ह्येषा मया सृष्टा यन्मां पश्यति नारद।
सर्व्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि। मयैतत् कथितं सम्यक् तव मूर्त्तिचतुष्टयं।
अहं हि जीवसंज्ञातो मयि जीवः समाहितः। नैवं ते बुद्धिरत्राभूद्दृष्टो जीवो मयेति वै।
अहं सर्व्वत्रगो ब्रह्मन् भूतग्रामान्तरात्मकः। भूतग्रामशरीरेषु नश्यत्सु न नशाम्यहं।
सिद्धा हि ते महाभागा नरा ह्येकान्तिनोऽभवन्। तमोरजोभ्यां निर्मुक्ताः प्रवेक्ष्यन्ति च मां मुने।
हिरण्यगर्भो लोकादिश्चतुर्व्वक्त्रो निरुक्तगः। ब्रह्मा सनातनो देवो मम बह्वर्थचिन्तकः।
ललाटाच्चैव मे रुद्रो देवक्रोधाद्विनिःसृतः। पश्यैकादश मे रुद्रान् दक्षिणं पार्श्वमास्थितान्।
द्वादशैव तथादित्यान् वामपार्श्वं समास्थितान्। अग्रतश्चैव मे पश्य वसूनष्टौ सुरोत्तमान्।
नासत्यञ्चैव दस्रञ्च भिषजौ पश्य पृष्ठतः। सर्व्वान् प्रजापतीन् पश्य पश्य सप्त ऋषींस्तथा।
वेदान् यज्ञांश्च शतशः पश्यामृतमथौषधीः। तपांसि नियमांश्चैव यमानपि पृथग्विधान्।
तथाष्टगुणमैश्वर्य्यमेकस्थं पश्य मूर्त्तिमत्। श्रियं लक्ष्मीञ्च कीर्त्तिञ्च पृथिवीञ्च ककुद्मिनीं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेदानां मातरं पश्य मत्स्थां देवीं सरस्वतीं। ध्रुवञ्च ज्योतिषां श्रेष्ठं पश्य नारद खेचरं। १२९२०
अम्भोधरान् समुद्रांश्च सरांसि सरितस्तथा। मूर्त्तिमतः पितृगणांश्चतुरः पश्य सत्तम।
त्रींश्चैवेमान् गुणान् पश्य मत्स्थान् मूर्त्तिविवर्ज्जितान्। देवकार्य्यादपि मुने पितृकार्य्यं विशिष्यते।
देवानाञ्च पितॄणाञ्च पिता ह्येकोऽहमादितः। अहं हयशिरा भूत्वा समुद्रे पश्चिमोत्तरे।
पिबामि सुहुतं हव्यं कव्यञ्च श्रद्धयान्वितं। मया सृष्टः पुरा ब्रह्मा मां यज्ञमयजत् स्वयं।
ततस्तस्मिन् वरान् प्रीतो दत्तवानस्म्यनुत्तमान्। मत्पुत्त्रत्वञ्च कल्पादौ लोकाध्यक्षत्वमेव च। १२९२५
अहङ्कारकृतञ्चैव नामपर्य्यायवाचकं। त्वया कृताञ्च मर्य्यादां नातिक्रंस्यति कश्चन।
त्वञ्चैव वरदो ब्रह्मन् वरेप्सूनां भविष्यसि। सुरासुरगणानाञ्च ऋषीणाञ्च तपोधन।
पितॄणाञ्च महाभाग सततं संशितव्रत। विविधानाञ्च भूतानां त्वमुपास्यो भविष्यसि।
प्रादुर्भावगतश्चाहं सुरकार्य्येषु नित्यदा। अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा।
एतांश्चान्यांश्च रुचिरान् ब्रह्मणेऽमिततेजसे। अहं दत्त्वा वरान् प्रीतो निवृत्तिपरमोऽभवं। १२९३०
निर्व्वाणं सर्व्वधर्म्माणां निवृत्तिः परमा स्मृता। तस्मान्निवृत्तिमापन्नश्चरेत् सर्व्वाङ्गनिर्वृतः।
विद्यासहायवन्तञ्च आदित्यस्थं समाहितं। कपिलं प्राहुराचार्य्याः साङ्ख्यनिश्चितनिश्चयाः।
हिरण्यगर्भो भगवानेष छन्दसि सुष्टुतः। सोऽहं योगरतिर्ब्रह्मन् योगशास्त्रेषु शब्दितः।
एषोऽहं व्यक्तिमागत्य तिष्ठामि दिवि शाश्वतः। ततो युगसहस्रान्ते संहरिष्ये जगत्पुनः।
कृत्वा मत्स्थानि भूतानि स्थावराणि चराणि च। एकाकी विद्यया सार्द्धं विहरिष्ये जगत्पुनः। १२९३५
ततो भूयो जगत् सर्व्वं करिष्यामीह विद्यया। अस्मन्मूर्त्तिश्चतुर्थी या साऽसृजच्छेषमव्ययं।
स हि सङ्कर्षणः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत्। प्रद्युम्नादनिरुद्धोऽहं सर्गो मम पुनः पुनः।
अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः। ब्रह्मणः सर्व्वभूतानि चराणि स्थावराणि च।
एतां सृष्टिं विजानीहि कल्पादिषु पुनः पुनः। यथा सूर्य्यस्य गगणादुदयास्तमने इह।
नष्टे पुनर्ब्बलात् काल आनयत्यमितद्युतिः। तथाबलादहं पृथ्वीं सर्व्वभूतहिताय वै। १२९४०
सत्त्वैराक्रान्तसर्व्वाङ्गां नष्टां सागरमेखलां। आनयिष्यामि स्वस्थानं वाराहं रूपमास्थितः।
हिरण्याक्षं बधिष्यामि दैतेयं बलगर्व्वितं। नारसिंहं वपुः कृत्वा हिरण्यकशिपुं पुनः।
सुरकार्य्ये हनिष्यामि यज्ञघ्नं दितिनन्दनं। विरोचनस्य बलवान् बलिः पुत्त्रो महासुरः।
अबध्यः सर्व्वलोकानां सदेवासुररक्षसां। भविष्यति सशक्रञ्च स्वराज्याच्चारयिष्यति।
त्रैलोक्येऽपहृते तेन विमुखे च शचीपतौ। अदित्यां द्वादशादित्यः सम्भविष्यामि कश्यपात्। १२९४५
ततो राज्यं प्रदास्यामि शक्रायामिततेजसे। देवताः स्थापयिष्यामि स्वेषु स्थानेषु नारद।
बलिञ्चैव करिष्यामि पातालतलवासिनं। दानवञ्च वलिं श्रेष्ठमवध्यं सर्व्वदैवतैः।
त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः। क्षत्त्रञ्चोत्सादयिष्यामि समृद्धबलवाहनः।
सन्ध्यांशे समनुप्राप्ते त्रेतायां द्वापरस्य च। अहं दाशरथी रामो भविष्यामि जगत्पतिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation Jalgaon

त्रितोपघाताद्वैरूप्यमेकतोऽथ द्वितस्तथा । प्राप्स्यते वानरत्वं हि प्रजापतिसुतावृषी । १२९५०
तयोर्ये त्वन्वये जाता भविष्यन्ति वनौकसः । महाबला महावीर्य्याः शक्रतुल्यपराक्रमाः ।
ते सहाया भविष्यन्ति सुरकार्य्ये मम द्विज । ततो रक्षःपतिं घोरं पुलस्त्यकुलपांसनं ।
हनिष्ये रावणं रौद्रं सगणं लोककण्टकं । द्वापरस्य कलेश्चैव सन्धौ पर्य्यवसानिके ।
प्रादुर्भावः कंसहेतोर्म्मथुरायां भविष्यति । तत्राहं दानवान् हत्वा सुबहून् देवकण्टकान् ।
कुशस्थलीं करिष्यामि निवेशं द्वारकां पुरीं । वसानस्तत्र वै पुर्य्यामदितेर्व्विप्रियङ्करं । १२९५५
हनिष्ये नरकं भौमं मुरं पीठञ्च दानवं । प्राग्ज्योतिषं पुरं रम्यं नानाधनसमन्वितं ।
कुशस्थलीं नयिष्यामि हत्वा वै दानवोत्तमं । महेश्वरमहासेनौ वाणप्रियहितैषिणौ ।
पराजेष्याम्यथोद्युक्तौ देवलोकनमस्कृतौ । ततः सुतं वलेर्जित्वा वाणं बाहुसहस्रिणं ।
विनाशयिष्यामि ततः सर्व्वान् सौभनिवासिनः । यः कालयवनः ख्यातो गार्ग्यतेजोऽभिसंभृतः ।
भविष्यति वधस्तस्य मत्त एव द्विजोत्तम । जरासन्धश्च बलवान् सर्व्वराजविरोधनः । १२९६०
भविष्यत्यसुरः स्फीतो भूमिपालो गिरिव्रजे । मम बुद्धिपरिस्पन्दाद्वधस्तस्य भविष्यति ।
शिशुपालं वधिष्यामि यज्ञे धर्म्मसुतस्य वै । समागतेषु बलिषु पृथिव्यां सर्व्वराजसु ।
वासविः सुसहायो वै मम ह्येको भविष्यति । युधिष्ठिरं स्थापयिष्ये स्वराज्ये भ्रातृभिः सह ।
एवं लोका वदिष्यन्ति नरनारायणावृषी । उद्युक्तौ दहतः क्षत्रं लोककार्य्यार्थमीश्वरौ ।
कृत्वा भारावतरणं वसुधाया यथेप्सितं । सर्व्वसात्वतमुख्यानां द्वारकायाश्च सत्तम । १२९६५
करिष्ये प्रलयं घोरमात्मज्ञानाभिसंवृतं । कर्म्माण्यपरिमेयाणि चतुर्मूर्त्तिधरो ह्यहं ।
कृत्वा लोकान् गमिष्यामि स्वानहं ब्रह्मसत्कृतान् । हंसः कूर्म्मश्च मत्स्यश्च प्रादुर्भावा द्विजोत्तम ।
वाराहो नरसिंहश्च वामनो राम एव च । रामो दाशरथिश्चैव सात्वतः कल्किरेव च ।
यदा वेदश्रुतिर्नष्टा मया प्रत्याहृता पुनः । सवेदाः सश्रुतीकाश्च कृताः पूर्व्वं कृते युगे ।
अतिक्रान्ताः पुराणेषु श्रुतास्ते यदि वा क्वचित् । अतिक्रान्ताश्च बहवः प्रादुर्भावा ममोत्तमाः । १२९७०
लोककार्य्याणि कृत्वा च पुनः स्वां प्रकृतिं गताः । नह्येतद्ब्रह्मणा प्राप्तमीदृशं मम दर्शनं ।
यत्त्वया प्राप्तमद्येह एकान्तगतबुद्धिना । एतत्ते सर्व्वमाख्यातं ब्रह्मन् भक्तिमतो मया ।
पुराणञ्च भविष्यञ्च सरहस्यञ्च सत्तम ।
॥ भीष्म उवाच ॥ एवं स भगवान्देवो विश्वमूर्त्तिधरोऽव्ययः । एतावदुक्त्वा वचनं तत्रैवान्तर्द्दधे पुनः ।
नारदोऽपि महातेजाः प्राप्यानुग्रहमीप्सितं । नरनारायणौ द्रष्टुं वदर्य्याश्रममाद्रवत् । १२९७५
इदं महोपनिषदं चतुर्व्वेदसमन्वितं । साङ्ख्ययोगकृतं तेन पञ्चरात्रानुशब्दितं ।
नारायणमुखोद्गीतं नारदोऽश्रावयत् पुनः । ब्रह्मणः सदने तात यथा दृष्टं यथा श्रुतं ।
॥ युधिष्ठिर उवाच ॥ एतदाश्चर्य्यभूतं हि माहात्म्य तस्य धीमतः । किं वै ब्रह्मा न जानीते यतः शुश्राव नारदात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पितामहोऽपि भगवांस्तस्माद्देवादनन्तरः । कथं स न विजानीयात् प्रभावममितौजसः ।
॥ भीष्म उवाच ॥ महाकल्पसहस्राणि महाकल्पशतानि च । समतीतानि राजेन्द्र सर्गाश्च प्रलयाश्च ह । १२९८०
सर्गस्यादौ स्मृतो ब्रह्मा प्रजासर्गकरः प्रभुः । जानाति देवप्रवरं भूयश्चातोऽधिकं नृप ।
परमात्मानमीशानमात्मनः प्रभवं तथा । ये त्वन्ये ब्रह्मसदने सिद्धसंघाः समागताः ।
तेभ्यस्तच्छ्रावयामास पुराणं वेदसम्मितं । तेषां सकाशात् सूर्य्यस्तु श्रुत्वा वै भावितात्मनां ।
आत्मानुगामिनां राजन् श्रावयामास वै ततः । षट्षष्टिर्हि सहस्राणि ऋषीणां भावितात्मनां ।
सूर्य्यस्य तपतो लोकान्निर्म्मिता ये पुरःसराः । तेषामकथयत् सूर्य्यः सर्व्वेषां भावितात्मनां । १२९८५
सूर्य्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः । मेरौ समागता देवाः श्राविताश्चेदमुत्तमं ।
देवानान्तु सकाशाद्वै ततः श्रुत्वासितो द्विजः । श्रावयामास राजेन्द्र पितॄणां मुनिसत्तमः ।
मम चापि पिता तात कथयामास शान्तनुः । ततो मयापि श्रुत्वा च कीर्त्तितं तव भारत ।
सुरैर्व्वा मुनिभिर्व्वापि पुराणं यैरिदं श्रुतं । सर्व्वे ते परमात्मानं पूजयन्ति समन्ततः ।
इदमाख्यानमार्षेयं पारम्पर्य्यागतं नृप । नावासुदेवभक्ताय त्वया देयं कथञ्चन । १२९९०
मत्तोऽन्यानि च ते राजन्नुपाख्यानशतानि वै । यानि श्रुतानि सर्व्वाणि तेषां सारोऽयमुद्धृतः ।
सुरासुरैर्यथा राजन्निर्मथ्यामृतमुद्धृतं । एवमेतत् पुरा विप्रैः कथामृतमिहोद्धृतं ।
यश्चेदं पठते नित्यं यश्चेदं शृणुयान्नरः । एकान्तभावोपगत एकान्तेषु समाहितः ।
प्राप्य श्वेतं महाद्वीपं भूत्वा चन्द्रप्रभो नरः । स सहस्रार्च्चिषं देवं प्रविशेन्नात्र संशयः ।
मुच्येदार्त्तस्तथा रोगाच्छ्रुत्वेमामादितः कथां । जिज्ञासुर्लभते कामान् भक्तो भक्तगतिं व्रजेत् । १२९९५
त्वयापि सततं राजन्नभ्यर्च्च्यः पुरुषोत्तमः । स हि माता पिता चैव कृत्स्नस्य जगतो गुरुः ।
ब्रह्मण्यदेवो भगवान् प्रीयतां ते सनातनः । युधिष्ठिर महाबाहो महाबुद्धिर्जनार्द्दनः ।
॥ वैशम्पायन उवाच ॥ श्रुत्वैतदाख्यानवरं धर्म्मराड्जनमेजय । भ्रातरश्चास्य ते सर्व्वे नारायणपराभवन् ।
जितं भगवता तेन पुरुषेणेति भारत । नित्यं जप्यपरा भूत्वा सरस्वतीमुदीरयन् ।
यो ह्यस्माकं गुरुः श्रेष्ठः कृष्णद्वैपायनो मुनिः । जगौ परमकं जप्यं नारायणमुदीरयन् । १३०००
गत्वान्तरीक्षात् सततं क्षीरोदममृताशयं । पूजयित्वा च देवेशं पुनरायात् स्वमाश्रमं ।
॥ भीष्म उवाच ॥ एतत्ते सर्व्वमाख्यातं नारदोक्तं मयेरितं । पारम्पर्य्यागतं ह्येतत् पित्रा मे कथितं पुरा ।
॥ सूतउवाच ॥ एतत्ते सर्व्वमाख्यातं वैशम्पायनकीर्त्तितं । जनमेजयेन तत् श्रुत्वा कृतं सम्यग्यथाविधि ।
यूयं हि तप्ततपसः सर्व्वे च चरितव्रताः । सर्व्वे वेदविदो मुख्या नैमिषारण्यवासिनः ।
शौनकस्य महासत्रं प्राप्ताः स[illegible] । यजध्वं सुहुतैर्यज्ञैः शाश्वतं परमेश्वरं । १३००५
पारम्पर्य्यागतं ह्येतत् पित्रा मे कथितं पुरा ।
इति श्रीमहाभारते शान्तिप[illegible]पर्व्वणि नारायणीये एकचत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४१ ॥
॥ शौनक उवाच ॥ कथं स भ[illegible]यज्ञेष्वग्रहरः प्रभुः । यज्ञधारी च सततं वेदवेदाङ्गवित्तथा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निवृत्तश्चास्थितोधर्म्मं क्षमी भागवतः प्रभुः । निवृत्तिधर्म्मान् विदधे स एव भगवान् प्रभुः ।
कथं प्रवृत्तिधर्म्मेषु भागार्हा देवताः कृताः । कथं निवृत्तिधर्म्माश्च कृता व्यावृत्तबुद्धयः ।
एतन्नः संशयं सूत छिन्धि गुह्यं सनातनं । त्वया नारायणकथाः श्रुता वै धर्म्मसंहिताः । १३०१०
॥ सौतिरुवाच ॥ जनमेजयेन यत् पृष्टः शिष्यो व्यासस्य धीमतः । तत्तेऽहं कथयिष्यामि पौराणं शौनकोत्तम ।
श्रुत्वा माहात्म्यमेतस्य देहिनां परमात्मनः । जनमेजयो महाप्राज्ञो वैशम्पायनमब्रवीत् ।
॥ जनमेजय उवाच ॥ इमे सब्रह्मका लोकाः ससुरासुरमानवाः । क्रियास्वभ्युदयोक्तासु सक्ता दृश्यन्ति सर्व्वशः ।
मोक्षश्चोक्तस्त्वया ब्रह्मन्निर्व्वाणं परमं सुखं । ये तु मुक्ता भवन्तीह पुण्यपापविवर्ज्जिताः ।
ते सहस्रार्च्चिषं देवं प्रविशन्तीह शुश्रुम । अयं हि दुरनुष्ठेयो मोक्षधर्म्मः सनातनः । १३०१५
यं हित्वा देवताः सर्व्वा हव्यकव्यभुजोऽभवन् । किञ्च ब्रह्मा च रुद्रश्च शक्रश्च बलभित् प्रभुः ।
सूर्य्यस्ताराधिपो वायुरग्निर्व्वरुण एव च । आकाशं जगती चैव ये च शेषा दिवौकसः ।
प्रलयं न विजानन्ति आत्मनः परिनिर्म्मितं । ततस्तेनास्थिता मार्गं ध्रुवमक्षरमव्ययं ।
स्मृतिं कालपरीमाणं प्रवृत्तिं ये समास्थिताः । दोषः कालपरीमाणे महानेष क्रियावतां ।
एतन्मे संशयं विप्र हृदि शल्यमिवार्पितं । छिन्धीतिहासकथनात् परं कौतूहलं हि मे । १३०२०
कथं भागहराः प्रोक्ता देवताः क्रतुषु द्विज । किमर्थञ्चाध्वरे ब्रह्मन्निज्यन्ते त्रिदिवौकसः ।
ये च भागं प्रगृह्णन्ति यज्ञेषु द्विजसत्तम । ते यजन्तो महायज्ञैः कस्य भागं ददन्ति वै ।
॥ वैशम्पायन उवाच ॥ अहो गूढतमः प्रश्नस्त्वया पृष्टो जनेश्वर । नातप्ततपसा ह्येष नावेदविदुषा तथा ।
नापुराणविदा चैव शक्यो व्याहर्त्तुमञ्जसा । हन्त ते कथयिष्यामि यन्मे पृष्टः पुरा गुरुः ।
कृष्णद्वैपायनो व्यासो वेदव्यासो महानृषिः । सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः । १३०२५
अहञ्चतुर्थः शिष्योवै पञ्चमश्च शुकः स्मृतः । एतान् समागतान् सर्व्वान् पञ्चशिष्यान्दमान्वितान् ।
शौचाचारसमायुक्तान् जितक्रोधान् जितेन्द्रियान् । वेदानध्यापयामास महाभारतपञ्चमान् ।
मेरौ गिरिवरे रम्ये सिद्धचारणसेविते । तेषामभ्यस्यतां वेदान् कदाचित् संशयोऽभवत् ।
एष वै यस्त्वया पृष्टस्तेन तेषां प्रकीर्त्तितः । ततः श्रुतो मया चापि तवाख्येयोऽद्य भारत ।
शिष्याणां वचनं श्रुत्वा सर्व्वाज्ञानतमोनुदः । पराशरसुतः श्रीमान् व्यासो वाक्यमथाब्रवीत् । १३०३०
मया हि सुमहत्तप्तं तपः परमदारुणं । भूतं भव्यं भविष्यञ्च जानीयामिति सत्तमाः ।
तस्य मे तप्ततपसो निगृहीतेन्द्रियस्य च । नारायणप्रसादेन क्षीरोदस्यानुकूलतः ।
त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं तथेप्सितं । तत् शृणुध्वं यथान्यायं वक्ष्ये संशयमुत्तमं ।
यथावृत्तं हि कल्पादौ दृष्टं मे ज्ञानचक्षुषा । परमात्मेति यं प्राहुः साङ्ख्या योगविदो जनाः ।
महापुरुषसंज्ञां स लभते स्वेन कर्म्मणा । तस्मात् प्रसूतमव्यक्तं प्रधानं तं विदुर्बुधाः । १३०३५
अव्यक्ताद्व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात् । अनिरुद्धोहि लोकेषु महानात्मेति कथ्यते ।
योऽसौ व्यक्तत्वमापन्नो निर्ममे च पितामहं । सोऽहङ्कार इति प्रोक्तः सर्व्वतेजोमयो हि सः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं। अहङ्कारप्रसूतानि महाभूतानि पञ्चधा ।
महाभूतानि सृष्ट्वैव तान् गुणान्निर्म्ममे पुनः । भूतेभ्यश्चैव निष्पन्ना मूर्त्तिमन्तश्च तान् शृणु।
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः। वशिष्ठश्च महात्मा वै मनुः स्वायम्भुवस्तथा । १२०४०
ज्ञेयाः प्रकृतयोऽष्टौ ता यासु लोकाः प्रतिष्ठिताः। वेदवेदाङ्गसंयुक्तान् यज्ञान् यज्ञाङ्गसंयुतान्।
निर्म्ममे लोकसिद्ध्यर्थं ब्रह्मा लोकपितामहः। अष्टाभ्यः प्रकृतिभ्यश्च जातं विश्वमिदं जगत्।
रुद्रो रोषात्मको जातो दशान्यान् सोऽसृजत् स्वयं । एकादशैते रुद्रास्तु विकाराः पुरुषाः स्मृताः ।
ते रुद्राः प्रकृतिश्चैव सर्व्वे चैव सुरर्षयः । उत्पन्ना लोकसिद्ध्यर्थं ब्रह्माणं समुपस्थिताः ।
वयं सृष्टा हि भगवंस्त्वया च प्रभविष्णुना । येन यस्मिन्नधीकारे वर्त्तितव्यं पितामह । १२०४५
योऽसौ त्वयाभिनिर्द्दिष्टो ह्यधिकारोऽर्थचिन्तकः । परिपाल्यः कथं तेन साहङ्कारेण कर्तृणा।
प्रदिशस्व बलन्तस्य योऽधिकारार्थचिन्तकः । एवमुक्तो महादेवो देवांस्तानिदमब्रवीत्।
॥ ब्रह्मोवाच ॥ साध्वहं ज्ञापितो देवा युष्माभिर्भद्रमस्तु वः । ममाप्येषा समुत्पन्ना चिन्ता या भवतां मता।
लोकत्रयस्य कृत्स्नस्य कथं कार्य्यः परिग्रहः । कथं बलक्षयो न स्याद्युष्माकं ह्यात्मनश्च मे ।
इतः सर्व्वेऽपि गच्छामः शरणं लोकसाक्षिणं। महापुरुषमव्यक्तं स नो वक्ष्यति यद्धितं। १२०५०
ततस्ते ब्रह्मणा सार्द्धमृषयो विबुधास्तथा । क्षीरोदस्योत्तरं कूलं जग्मुर्लोकहितार्थिनः ।
ते तपः समुपातिष्ठन् ब्रह्मोक्तं वेदकल्पितं । स महानियमो नाम तपश्चर्य्या सुदारुणा ।
ऊर्द्ध्वा दृष्टिर्ब्बाहवश्च एकाग्रञ्च मनोऽभवत्। एकपादाः स्थिताः सर्व्वे काष्ठभूताः समाहिताः ।
दिव्यं वर्षसहस्रन्ते तपस्तप्त्वा सुदारुणं । शुश्रुवुर्म्मधुरां वाणीं वेदवेदाङ्गभूषितां ।
॥ श्रीभगवानुवाच ॥ भो भोः सब्रह्मका देवा ऋषयश्च तपोधनाः । स्वागतेनार्च्च्य वः सर्व्वान् श्रावये वाक्यमुत्तमं। १२०५५
विज्ञातं वो मया कार्य्यं तच्च लोकहितं महत्। प्रवृत्तियुक्तं कर्त्तव्यं युष्मत्प्राणोपबृंहणं।
सुतप्तञ्च तपो देवा ममाराधनकाम्यया । भोक्ष्यथास्य महासत्त्वास्तपसः फलमुत्तमं।
एष ब्रह्मा लोकगुरुर्म्महाँल्लोकपितामहः । यूयञ्च विबुधश्रेष्ठा मां यजध्वं समाहिताः।
सर्व्वे भागान् कल्पयध्वं यज्ञेषु मम नित्यशः। तथा श्रेयोऽभिधास्यामि यथाधीकारमीश्वराः।
॥ वैशम्पायन उवाच ॥ श्रुत्वैतद्देवदेवस्य वाक्यं हृष्टतनूरुहाः। ततस्ते विबुधाः सर्व्वे ब्रह्मा ते च महर्षयः। १२०६०
वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन्। तस्मिन् सत्रे सदा ब्रह्मा स्वयं भागमकल्पयत्।
देवा देवर्षयश्चैवं स्वं स्वं भागमकल्पयन्। ते कार्त्तयुगधर्म्माणो भागाः परमसत्कृताः।
प्रापुरादित्यवर्णं तं पुरुषं तमसः परं। बृहन्तं सर्व्वगं देवमीशानं वरदं प्रभुं।
ततोऽथ वरदो देवस्तान् सर्व्वानमरान् स्थितान्। अशरीरो बभाषेदं वाक्यं खस्थो महेश्वरः।
येन यः कल्पितो भागः स तथा मामुपागतः । प्रीतोऽहं प्रदिशाम्यद्य फलमावृत्तिलक्षणं । १२०६५
एतद्वो लक्षणं देवा मत्प्रसादसमुद्भवं । स्वयं यज्ञैर्यजमानाः समाप्तवरदक्षिणैः ।
युगे युगे भविष्यध्वं प्रवृत्तिफलभागिनः । यज्ञैर्ये चापि यक्ष्यन्ति सर्व्वलोकेषु वै सुराः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कल्पयिष्यन्ति वो भागांस्ते नरा वेदकल्पितान् । यो मे यथा कल्पितवान् भागमस्मिन्महाक्रतौ ।
स तथा यज्ञभागार्हो वेदसूत्रे मया कृतः । यूयं लोकान् भावयध्वं यज्ञभागफलोचिताः ।
सर्व्वार्थचिन्तका लोके यथाधीकारनिर्म्मिताः । याः क्रियाः प्रचरिष्यन्ति प्रवृत्तिफलसत्कृताः । १३०७०
ताभिराप्यायितबला लोकान् वै धारयिष्यथ । यूयं हि भाविता यज्ञैः सर्व्वे यज्ञेषु मानवैः ।
मां ततो भावयिष्यध्वमेषा वो भावना मम । इत्यर्थं निर्म्मिता वेदा यज्ञाश्चौषधिभिः सह ।
एभिः सम्यक्प्रयुक्तैर्हि प्रीयन्ते देवताः क्षितौ । निर्म्माणमेतद्युष्माकं प्रवृत्तिगुणकल्पितं ।
मया कृतं सुरश्रेष्ठ यावत्कल्पक्षयादिह । चिन्तयध्वं लोकहितं यथाधीकारमीश्वराः ।
मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः । वशिष्ठ इति सप्तैते मानसा निर्म्मिता हि ते । १३०७५
एते वेदविदो मुख्या वेदाचार्य्याश्च कल्पिताः । प्रवृत्तिधर्म्मिणश्चैव प्राजापत्ये च कल्पिताः ।
अयं क्रियावतां पन्था व्यक्तीभूतः सनातनः । अनिरुद्ध इति प्रोक्तो लोकसर्गकरः प्रभुः ।
सनः सनत्सुजातश्च सनकः ससनन्दनः । सनत्कुमारः कपिलः सप्तमश्च सनातनः ।
सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः सुताः । स्वयमागतविज्ञाना निवृत्तिं धर्म्ममास्थिताः ।
एते योगविदो मुख्याः साङ्ख्यज्ञानविशारदाः । आचार्य्या धर्म्मशास्त्रेषु मोक्षधर्म्मप्रवर्त्तकाः । १३०८०
यतोऽहं प्रसृतः पूर्व्वमव्यक्तस्त्रिगुणो महान् । तस्मात् परतरो योऽसौ क्षेत्रज्ञ इति कल्पितः ।
सोऽहं क्रियावतां पन्थाः पुनरावृत्तिदुर्लभः । यो यथा निर्म्मितो जन्तुर्यस्मिन् यस्मिंश्च कर्म्मणि ।
प्रवृत्तौ वा निवृत्तौ वा तत्फलं सोऽश्नुते महत् । एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः ।
एष माता पिता चैव युष्माकञ्च पितामहः । मयानुशिष्टो भविता सर्व्वभूतवरप्रदः ।
अस्य चैवात्मजो रुद्रो ललाटाद्यः समुत्थितः । ब्रह्मानुशिष्टो भविता सर्व्वभूतधरः प्रभुः । १३०८५
गच्छध्वं स्वानधीकारांश्चिन्तयध्वं यथाविधि । प्रवर्त्तन्तां क्रियाः सर्व्वाः सर्व्वलोकेषु मा चिरं ।
प्रदृश्यन्ताञ्च कर्म्माणि प्राणिनां गतयस्तथा । परिनिष्ठितकालानि आयूंषीह सुरोत्तमाः ।
इदं कृतयुगं नाम कालः श्रेष्ठः प्रवर्त्तितः । अहिंस्या यज्ञपशवो युगेऽस्मिन्न तदन्यथा ।
चतुष्पात् सकलो धर्म्मो भविष्यत्यत्र वै सुराः । ततस्त्रेतायुगं नाम त्रयी यत्र भविष्यति ।
प्रोक्षिता यत्र पशवो वधं प्राप्स्यन्ति वै मखे । यत्र पादश्चतुर्थो वै धर्म्मस्य न भविष्यति । १३०९०
ततो वै द्वापरं नाम मिश्रः कालो भविष्यति । द्विपादहीनो धर्म्मश्च युगे तस्मिन् भविष्यति ।
ततस्तिष्येऽथ सम्प्राप्ते युगे कलिपुरस्कृते । एकपादस्थितो धर्म्मो यत्र तत्र भविष्यति ।
देवा देवर्षयश्चोचुस्तमेवंवादिनं गुरुं । एकपादस्थिते धर्म्मे यत्र क्वचन गामिनि ।
कथं कर्त्तव्यमस्माभिर्भगवंस्तद्वदस्व नः ।
॥ श्रीभगवानुवाच ॥ यत्र वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा । अहिंसा धर्म्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः । १३०९५
स वो देशः सेवितव्यो मा वोऽधर्म्मः पदा स्पृशेत् ।
॥ व्यास उवाच ॥ तेऽनुशिष्टा भगवता देवाः सर्षिगणास्तथा । नमस्कृत्वा भगवते जग्मुर्देशान् यथेप्सितान् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतेषु त्रिदिवौकःसु ब्रह्मैकः पर्य्यवस्थितः । दिदृक्षुर्भगवन्तन्तमनिरुद्धतनौ स्थितं ।
तं देवो दर्शयामास कृत्वा हयशिरो महत् । साङ्गानावर्त्तयन् वेदान् कमण्डलुत्रिदण्डधृक् ।
॥ व्यास उवाच ॥ ततोऽश्वशिरसं दृष्ट्वा तं देवममितौजसं । लोककर्त्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया । १३१००
मूर्द्ध्ना प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः । स परिष्वज्य देवेन वचनं श्रावितस्तदा ।
॥ श्रीभगवानुवाच ॥ लोककार्य्यगतीः सर्व्वास्त्वं चिन्तय यथाविधि । धाता त्वं सर्व्वभूतानां त्वं प्रभुर्जगतो गुरुः ।
त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यथाञ्जसा । यदा च सुरकार्य्यन्ते अविषह्यं भविष्यति ।
प्रादुर्भावं गमिष्यामि तदात्मज्ञानदेशिकं । एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत ।
तेनानुशिष्टो ब्रह्मापि स्वं लोकमचिराद्गतः । एवमेष महाभाग पद्मनाभः सनातनः । १३१०५
यज्ञेष्वग्रहरः प्रोक्तो यज्ञधारी च नित्यदा । निवृत्तिञ्चास्थितो धर्म्मं गतिमक्षयधर्म्मिणां ।
प्रवृत्तिधर्म्मान् विदधे कृत्वा लोकस्य चित्रतां ।
स आदिः स मध्यः सचान्तः प्रजानां स धाता स धेयः स कर्त्ता स कार्य्यं । युगान्ते प्रसुप्तः सुसंक्षिप्य लोकान् युगादौ प्रबुद्धो जगद्ध्युत्ससर्ज्ज ।
तस्मै नमध्वं देवाय निर्गुणाय महात्मने । अजाय विश्वरूपाय धाम्ने सर्व्वदिवौकसां ।
महाभूताधिपतये रुद्राणाम्पतये तथा । आदित्यपतये चैव वसूनां पतये तथा । १३११०
अश्विभ्यां पतये चैव मरुतां पतये तथा । वेदयज्ञाधिपतये वेदाङ्गपतयेऽपि च ।
समुद्रवासिने नित्यं हरये मुञ्जकेशिने । शान्ताय सर्व्वभूतानां मोक्षधर्म्मानुभाषिणे ।
तपसान्तेजसाञ्चैव पतये यशसामपि । वचसां पतये नित्यं सरितां पतये तथा ।
कपर्द्दिने वराहाय एकशृङ्गाय धीमते । विवस्वतेऽश्वशिरसे चतुर्मूर्त्तिधृते सदा ।
गुह्याय ज्ञानदृश्याय अक्षराय क्षराय च । एष देवः सञ्चरति सर्व्वत्र गतिरव्ययः । १३११५
एष चैतत् परं ब्रह्म ज्ञेयो विज्ञानचक्षुषा । एवमेतत् पुरा दृष्टं मया वै ज्ञानचक्षुषा ।
कथितं तच्च वै सर्व्वं मया पृष्टेन तत्त्वतः । क्रियतां मद्वचः शिष्याः सेव्यतां हरिरीश्वरः ।
गीयतां वेदशब्दैश्च पूज्यताञ्च यथाविधि ।
॥ वैशम्पायन उवाच ॥ इत्युक्तास्तु वयन्तेन वेदव्यासेन धीमता । सर्व्वे शिष्याः सुतश्चास्य शुकः परमधर्म्मवित् ।
स चास्माकमुपाध्यायः सहास्माभिर्व्विशाम्पते । चतुर्व्वेदोद्गताभिस्तमृग्भिः समभितुष्टुवे । १३१२०
एतत्ते सर्व्वमाख्यातं यन्मां त्वं परिपृच्छसि । एवं मेऽकथयद्राजन् पुरा द्वैपायनो गुरुः ।
यश्चेदं शृणुयान्नित्यं यश्चैनं परिकीर्त्तयेत् । नमो भगवते कृत्वा समाहितमतिर्नरः ।
भवत्यरोगो मतिमान् बलरूपसमन्वितः । आतुरो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
कामान् कामी लभेत् कामं दीर्घञ्चायुरवाप्नुयात् । ब्राह्मणः सर्व्ववेदी स्यात् क्षत्त्रियो विजयी भवेत् ।
वैश्यो विपुललाभः स्यात् शूद्रः सुखमवाप्नुयात् । अपुत्त्रो लभते पुत्त्रं कन्या चैवेप्सितं पतिं । १३१२५
लग्नगर्भा विमुच्येत गर्भिणी जनयेत् सुतं । बन्ध्या प्रसवमाप्नोति पुत्त्रपौत्त्रसमृद्धिमत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation-Jalgaon

तेनैव गच्छेदध्वानमिदं यः पठते पथि। यो यं कामं कामयते स तमाप्नोति च ध्रुवं।
इदं महर्षेर्व्वचनं विनिश्चितं महात्मनः पुरुषवरस्य कीर्त्तितं। समागमञ्चर्षिदिवौकसामिमं निशम्य भक्ताः सुसुखं लभन्ते।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये द्विचत्वारिंशदधिकत्रिशततोऽध्यायः॥ ३४२॥

॥ जनमेजय उवाच ॥ अस्तौषीद्यैरिदं व्यासः सशिष्यो मधुसूदनं। नामभिर्व्विविधैरेषां निरुक्तं भगवन्मम।
वक्तुमर्हसि शुश्रूषोः प्रजापतिपतेर्हरेः। श्रुत्वा भवेयं यत्पूतः शरच्चन्द्र इवामलः। १३१३०
॥ वैशम्पायन उवाच ॥ शृणु राजन् यथाचष्ट फाल्गुनस्य हरिः प्रभुः। प्रसन्नात्मात्मनो नाम्नां निरुक्तं गुणकर्म्मजं।
नामभिः कीर्त्तितैस्तस्य केशवस्य महात्मनः। पृष्टवान् केशवं राजन् फाल्गुनः परवीरहा।
॥ अर्ज्जुन उवाच ॥ भगवन् भूतभव्येश सर्व्वभूतसृगव्यय। लोकधाम जगन्नाथ लोकानामभयप्रद।
यानि नामानि ते देव कीर्त्तितानि महर्षिभिः। वेदेषु सपुराणेषु यानि गुह्यानि कर्म्मभिः।
तेषां निरुक्तं त्वत्तोऽहं श्रोतुमिच्छामि केशव। नह्यन्यो वर्णयेन्नाम्नां निरुक्तं त्वामृते प्रभो। १३१३५
॥ श्रीभगवानुवाच ॥ ऋग्वेदे स यजुर्व्वेदे तथैवाथर्व्वसामसु। पुराणे सोपनिषदे तथैव ज्योतिषेऽर्ज्जुन।
साङ्ख्ये च योगशास्त्रे च आयुर्व्वेदे तथैव च। बहूनि मम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानिचित्। निरुक्तं कर्म्मजानां त्वं शृणुष्व प्रयतोऽनघ।
कथ्यमानं मया तात त्वं हि मेऽर्द्धं स्मृतः पुरा। नमोऽतियशसे तस्मै देहिनां परमात्मने।
नारायणाय विश्वाय निर्गुणाय गुणात्मने। यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः। १३१४०
योऽसौ योनिर्हि सर्व्वस्य स्थावरस्य चरस्य च। अष्टादशगुणं यत्तत् सत्त्वं सत्त्ववताम्वर।
प्रकृतिः सा परा मह्यं रोदसी योगधारिणी। ऋता सत्यामराजय्या लोकानामात्मसंज्ञिता।
तस्मात् सर्व्वाः प्रवर्त्तन्ते सर्गप्रलयविक्रियाः। तपो यज्ञश्च यष्टा च पुराणः पुरुषो विराट्।
अनिरुद्ध इति प्रोक्तो लोकानां प्रभवाव्ययः। ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः।
प्रसादात् प्रादुरभवत् पद्मं पद्मनिभेक्षण। ततो ब्रह्मा समभवत् स तस्यैव प्रसादजः। १३१४५
अह्नः क्षये ललाटाच्च सुतो देवस्य वै तथा। क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः।
एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजावुभौ। तदादेशितपन्थानौ सृष्टिसंहारकारकौ।
निमित्तमात्रं तावत्र सर्व्वप्राणिवरप्रदौ। कपर्द्दी जटिलो मुण्डः श्मशानगृहसेवकः।
उग्रव्रतधरो रुद्रो योगी परमदारुणः। दक्षक्रतुहरश्चैव भगनेत्रहरस्तथा।
नारायणात्मको ज्ञेयः पाण्डवेय युगे युगे। तस्मिन् हि पूज्यमाने वै देवदेवे महेश्वरे। १३१५०
सम्पूजितो भवेत् पार्थ देवो नारायणः प्रभुः। अहमात्मा हि लोकानां विश्वेषां पाण्डुनन्दन।
तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहं। यद्यहं नार्च्चयेयं वै ईशानं वरदं शिवं।
आत्मानं नार्च्चयेत् कश्चिदिति मे भावितात्मनः। मया प्रमाणं हि कृतं लोकः समनुवर्त्तते।
प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहं। यस्तं वेत्ति स मां वेत्ति यो नु तं स हि मामनु।
रुद्रो नारायणश्चैव सत्त्वमेकं द्विधाकृतं। लोके चरति कौन्तेय व्यक्तिस्थं सर्व्वकर्म्मसु। १३१५५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न हि मे केनचिद्देयो वरः पाण्डवनन्दन । इति सञ्चिन्त्य मनसा पुराणं रुद्रमीश्वरं ।
पुत्त्रार्थमाराधितवानहमात्मानमात्मना । न हि विष्णुः प्रणमति कस्मैचिद्विबुधाय च ।
ऋत आत्मानमेवेति ततो रुद्रं भजाम्यहं । सब्रह्मकाः सरुद्राश्च सेन्द्रा देवाः सहर्षिभिः ।
अर्च्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिं । भविष्यतां वर्त्ततान्च भूतानाञ्चैव भारत ।
सर्व्वेषामग्रणीर्व्विष्णुः सेव्यः पूज्यश्च नित्यशः । नमस्व हव्यदं विष्णुं तथाशरणदं नमः । १२१६०
वरदं नमस्व कौन्तेय हव्यकव्यभुजं नमः । चतुर्व्विधा मम जना भक्ता एव हि मे श्रुतं ।
तेषामेकान्तिनः श्रेष्ठा ये चैवानन्यदेवताः । अहमेव गतिस्तेषां निराशीः कर्म्मकारिणां ।
ये च शिष्टास्त्रयो भक्ताः फलकामा हि मे मताः । सर्व्वे च्यवनधर्म्मास्ते प्रतिबुद्धस्तु श्रेष्ठभाक् ।
ब्रह्माणं शितिकण्ठञ्च याश्चान्या देवताः स्मृताः । प्रबुद्धचर्य्याः सेवन्तो मामेवैष्यन्ति यत् परं ।
भक्तं प्रति विशेषस्ते एष पार्थानुकीर्त्तितः । त्वञ्चैवाहञ्च कौन्तेय नरनारायणौ स्मृतौ । १२१६५
भारावतरणार्थन्तु प्रविष्टौ मानुषीं तनुं । जानाम्यध्यात्मयोगांश्च योऽहं यस्माच्च भारत ।
निवृत्तिलक्षणो धर्म्मस्तथाभ्युदयिकोऽपि च । नराणामयनं ख्यातमहमेकः सनातनः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं मम तत्पूर्व्वमतो नारायणो ह्यहं ।
च्छादयामि जगद्विश्वं भूत्वा सूर्य्य इवांशुभिः । सर्व्वभूताधिवासश्च वासुदेवस्ततो ह्यहं ।
गतिश्च सर्व्वभूतानां प्रजनश्चापि भारत । व्याप्ता मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम । १२१७०
अधिभूतानि चान्तेषु तदिच्छंश्चास्मि भारत । क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ।
दमात् सिद्धिं परीप्सन्तो मां जनाः कामयन्ति ह । दिवञ्चोर्व्वीञ्च मध्यञ्च तस्माद्दामोदरो ह्यहं ।
पृश्निरित्युच्यते चान्नं वेदा आपो मृतं तथा । ममैतानि सदा गर्भः पृश्निगर्भस्ततो ह्यहं ।
ऋषयः प्राहुरेवं मां त्रितं कूपनिपातितं । पृश्निगर्भ त्रितं पाहीत्येकतद्वितपातितं ।
ततः स ब्रह्मणः पुत्त्र आद्यो ह्यृषिवरस्त्रितः । उत्ततारोदपानाद्वै पृश्निगर्भानुकीर्त्तनात् । १२१७५
सूर्य्यस्य तपतो लोकानग्नेः सोमस्य चाप्युत । अंशवो यत् प्रकाशन्ते मम ते केशसंज्ञिताः ।
सर्व्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः । सपत्न्यामाहिते गर्भे उतथ्येन महात्मना ।
उतथ्येऽन्तर्हिते चैव कदाचिद्देवमायया । बृहस्पतिरथाविन्दत् पत्नीन्तस्य महात्मनः ।
ततो वै तमृषिश्रेष्ठं मैथुनोपगतन्तथा । उवाच गर्भः कौन्तेय पञ्चभूतसमन्वितः ।
पूर्व्वागतोऽहं वरद नार्हस्यम्बां प्रबाधितुं । एतद्बृहस्पतिः श्रुत्वा चुक्रोध च शशाप च । १२१८०
मैथुनायागतो यस्मात्त्वयाहं विनिवारितः । तस्मादन्धो यास्यसि त्वं मच्छापान्नात्र संशयः ।
स शापादृषिमुख्यस्य दीर्घन्तम उपेयिवान् । स हि दीर्घतमा नाम नाम्ना ह्यासीदृषिः पुरा ।
वेदानवाप्य चतुरः साङ्गोपाङ्गान् सनातनान् । प्रयोजयामास तदा नाम गुह्यमिदं मम ।
अनुपूर्व्वेण विधिना केशवेति पुनः पुनः । स चक्षुष्मान् समभवद्गौतमश्चाभवत् पुनः ।
एवं हि वरदं नाम केशवेति ममार्ज्जुन । देवानामथ सर्व्वेषां ऋषीणाञ्च महात्मनां । १२१८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अग्निः सोमेन संयुक्त एकयोनित्वमागतः । अग्नीषोममयं तस्माज्जगत् कृत्स्नं चराचरं ।
अपि हि पुराणे भवति एकयोन्यात्मकावग्नीषोमौ देवताश्चाग्निमुखा इति । एकयोनित्वाच्च परस्परमर्हन्तो लोकानधारयन्त इति ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये त्रिचत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४३ ॥

॥ अर्ज्जुन उवाच ॥ अग्नीषोमौ कथं पूर्व्वमेकयोनी प्रवर्त्तितौ । एष मे संशयो जातस्तञ्छिन्धि मधुसूदन ।
॥ श्रीभगवानुवाच ॥ हन्त ते वर्त्तयिष्यामि पुराणं पाण्डुनन्दन । आत्मतेजोद्भवं पार्थ शृणुष्वैकमना मम ।
सम्प्रक्षालनकालेऽतिक्रान्ते चतुर्युगसहस्रान्ते । अव्यक्ते सर्व्वभूतप्रलये सर्व्वभूतस्थावरजङ्गमे । ११९०
ज्योतिर्धरणिवायुरहिते अन्धे तमसि जलैकार्णवे लोके । आप इत्येवं ब्रह्मभूतं संज्ञके ऽद्वितीये प्रतिष्ठिते ।
न वै रात्र्यां न दिवसे न सति नासति न व्यक्ते नचाप्यव्यक्ते व्यवस्थिते । एवमस्यामवस्थायां नारायणगुणाश्रयादजरामरादनिन्द्रियादग्राह्यादसम्भवात् सत्यादहिंस्राल्ललामादिविधप्रवृत्तिविशेषादवैरादक्षयादमरादजरादमूर्त्तितः सर्व्वव्यापिनः सर्व्वकर्त्तुः शाश्वतस्तमसः पुरुषः प्रादुर्भूतो हरिरव्ययः ।
निदर्शनमपि ह्यत्र भवति ॥ नासीदहो न रात्रिरासीन्न सदासीन्नासदासीत्तम एव पुरस्तादभवद्विश्वरूपं । सा विश्वरूपस्य रजनी हि एवमस्यार्थोऽनुभाष्यः ।
तस्येदानीं तमसः सम्भवस्य पुरुषस्य ब्रह्मयोनेर्ब्रह्मणः प्रादुर्भावे स पुरुषः प्रजाः सिसृक्षमाणो नेत्राभ्यामग्नीषोमौससर्ज्ज। ततो भूतसर्गेषु सृष्टेषु प्रजाः क्रमवशाद्ब्रह्मक्षत्त्रमुपातिष्ठन् । यः सोमस्तद्ब्रह्म यद्ब्रह्म ते ब्राह्मणाः योऽग्निस्तत् क्षत्त्रं क्षत्त्राद्ब्रह्म बलवत्तरं कस्मादिति लोकप्रत्यक्षगुणमेतत् तद्यथा ।
ब्राह्मणेभ्यः परं भूतं नोत्पन्नपूर्व्वं दीप्यमानेऽग्नौ जुहोति यो ब्राह्मणमुखे जुहोतीति कृत्वा ब्रवीमि भूतसर्गः कृतो ब्रह्मणा भूतानि च प्रतिष्ठाप्य त्रैलोक्यं धार्य्यत इति मन्त्रवादोऽपि हि भवति । त्वमग्ने यज्ञानां होता विश्वेषां हितो देवानां मानुषाणाञ्च जगतइति । निदर्शनञ्चात्र भवति विश्वेषामग्ने यज्ञानां त्वं होतेति त्वं हितो देवैर्मनुष्यैर्जगतइति । ११९५
अग्निर्हि यज्ञानां होता कर्त्ता स चाग्निर्ब्रह्म । नह्यृते मन्त्राणां हवनमस्ति न विना पुरुषं तपः सम्भवति हविर्मन्त्राणां सम्पूजाविद्यते देवमानुषऋषीणामनेन त्वं होतेति नियुक्तः ।
ये च मानुषहोत्राधिकारास्ते च ब्राह्मणस्य हि याजनं विधीयते न क्षत्त्रवैश्ययोर्द्विजात्योस्तस्माद्ब्राह्मणा ह्यग्निभूता यज्ञानुद्वहन्ति ।
यज्ञास्ते देवांस्तर्पयन्ति देवाः पृथिवीं भावयन्ति शतपथेऽपि हि ब्राह्मणमुखे भवति ।
अग्नौ समिद्धे स जुहोति यो विद्वान् ब्राह्मणमुखेनाहुतिं जुहोति । एवमप्यग्निभूता ब्राह्मणा विद्वांसोऽग्निं भावयन्ति ।
अग्निर्विष्णुः सर्व्वभूतान्यनुप्रविश्य प्राणानधारयन्तीति । अपि चात्र सनत्कुमारगीताः श्लोका भवन्ति । १२००
ब्रह्मा विश्वं सृजत् पूर्व्वं सर्व्वादिर्निरवस्कृतं । ब्रह्मघोषैर्द्दिवं गच्छन्त्यमरा ब्रह्मयोनयः ।
ब्राह्मणानां मतिर्व्वाक्यं कर्म्मश्रद्धातपांसि च । धारयन्ति महीं द्याञ्च शैक्यो वागमृतं तथा ।
नास्ति सत्यात् परो धर्म्मो नास्ति मातृसमो गुरुः । ब्राह्मणेभ्यः परं नास्ति प्रेत्य चेह च भूतले ।
नैषामुक्षा वहति नोतवाहा न गर्गरो मथ्यति सम्प्रदाने । अपध्वस्ता दस्युभूता भवन्ति येषां राष्ट्रे ब्राह्मणा वृत्तिहीनाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

वेदपुराणेतिहासप्रामाण्यान्नारायणमुखाद्गताः सर्व्वकर्त्तारः सर्व्वभावाश्च ब्राह्मणाश्च वाक्संयमकाले हितस्य वरप्रदस्य देवदेवस्य ब्राह्मणाः प्रथमं प्रादुर्भूता ब्राह्मणेभ्यश्च शेषा वर्णाः प्रादुर्भूता इत्यश्च सुरासुरविशिष्टा ब्राह्मणा य एव मया ब्रह्मभूतेन पुरा स्वयमेवोत्पादिताः सुरासुरमहर्षयः भूतविशेषाः स्थापिता निगृहीताश्च अहल्याधर्षणनिमित्तं हि गौतमाद्धरिश्मश्रुतामिन्द्रः प्राप्तः कौशिकनिमित्तञ्चेन्द्रो मुष्कवियोगं मेषवृषणत्वञ्चावाप ॥ १३१९५

अश्विनोर्ग्रहप्रतिषेधोद्यतवज्रस्य पुरन्दरस्य च्यवनेन स्तम्भितो बाहुः क्रतुवधप्राप्तमन्युना च दक्षेण भूयस्तपसा चात्मानं संयोज्य नेत्राकृतिरन्या ललाटे रुद्रस्योत्पादिता त्रिपुरवधार्थं दीक्षामुपगतस्य रुद्रस्य उशनसा जटाः शिरस उत्कृत्य प्रयुक्ताः ततः प्रादुर्भूता भुजगास्तैरस्य भुजगैः पीड्यमानः कण्ठो नीलतामुपगतः पूर्व्वं च मन्वन्तरे स्वायम्भुवे नारायणहस्तग्रहणान्नीलकण्ठत्वमेव च अमृतोत्पादनपुरश्चरणतामुपगतस्याङ्गिरसो बृहस्पतेरुपस्पृशतो न प्रसादं गतवत्यः किलापः अथ बृहस्पतिरपो चुक्रोध यस्मान्ममोपस्पृशतः कलुषीभूता न च प्रसादमुपगतास्तस्मादद्य प्रभृति झषमकरकच्छपजन्तुभिः कलुषीभवितेति ॥

तदाप्रभृत्यापो यादोभिः सङ्कीर्णाः सम्प्रवृत्ताः। विश्वरूपो हि वै त्वाष्ट्रः पुरोहितो देवानामासीत्।

स्वस्रीयोऽसुराणां सप्रत्यक्षं देवेभ्यो भागमदात् परोक्षमसुरेभ्यः अथ हिरण्यकशिपुं पुरस्कृत्य विश्वरूपमातरं स्वसारमसुरा वरमयाचन्त।

हे स्वसः अयन्ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरा देवानां पुरोहितः प्रत्यक्षं देवेभ्यो भागमदात् परोक्षमस्माकं ततो देवा वर्द्धन्ते वयं क्षीयामस्तदेनं त्वं वारयितुमर्हसि तथा यथास्मान् भजेदिति अथ विश्वरूपं नन्दनवनमुपगतं मातोवाच पुत्र किं परपक्षवर्द्धनस्त्वं मातुलपक्षं नाशयसि नार्हस्येवं कर्त्तुमिति स विश्वरूपो मातुर्व्वाक्यमनतिक्रमणीयमिति मत्वा सम्पूज्य हिरण्यकशिपुमगात् हैरण्यगर्भाच्च वशिष्ठाद्धिरण्यकशिपुः शापं प्राप्तवान्।

यस्मात्त्वयान्यो वृतो होता तस्मादसमाप्तयज्ञस्त्वमपूर्व्वात् सत्त्वजाताद्वधं प्राप्स्यसीति तच्छापदानाद्धिरण्यकशिपुः १३२१०
प्राप्तवान् वधं ॥

अथ विश्वरूपो मातृपक्षवर्द्धनोऽत्यर्थं तपस्यभवत्तस्य व्रतभङ्गार्थमिन्द्रो बह्वीः श्रीमत्यो ऽप्सरसो नियोजितास्च दृष्ट्वा मनः क्षुभितं तस्याभवत् तासु चाप्सरःसु न चिरादेव सक्तोऽभवत् सक्तञ्चैनं ज्ञात्वा अप्सरस ऊचुः॥ गच्छामहे वयं यथागतमिति तास्त्वाष्ट्र उवाच क गमिष्यथास्यतां तावन्मया सह श्रेयो भविष्यतीति तास्तमब्रुवन् वयं देवस्त्रियोऽप्सरसः इन्द्रं देवं वरदं पुराप्रभविष्णुं वृणीमहइति अथ ता विश्वरूपोऽब्रवीदद्यैव सेन्द्रा देवा न भविष्यन्तीति॥ ततो मन्त्रान् जजाप तैर्म्मन्त्रैरवर्द्धत त्रिशिराः एकेनास्येन सर्व्वलोकेषु यथावद्द्विजैः क्रियावद्भिर्यज्ञे सुहुतं सोमं पपौ॥ एकेनान्नमेकेन सेन्द्रान्देवानथेन्द्रस्तं विवर्द्धमानं सोमपानाप्यायितसर्व्वगात्रं दृष्ट्वा चिन्तामापेदे सह देवैः ते देवाः सेन्द्रा ब्रह्माणमभिजग्मुः ॥

॥ त ऊचुः॥ विश्वरूपेण सर्व्वयज्ञेषु सुहुतः सोमः पीयते वयमभागाः संवृत्ता असुरपक्षो वर्द्धते वयं क्षीयामः तदर्हसि नोविधातुं श्रेयोऽनन्तरमिति। तान् ब्रह्मोवाच ऋषिर्भार्गवस्तपस्तप्यते दधीचः स याच्यतां वरः स यथा कलेवरं जह्यात्तथा विधीयतां तस्यास्थिभिर्व्वज्रं क्रियतामिति ततो देवास्तत्रागच्छन् यत्र दधीचो भगवानृषिस्तपस्तेपे सेन्द्रा देवास्तं तथाभिगम्योचुर्भगवंस्तपः सुकुशलमविघ्नञ्चेति ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ तान्दधीच उवाच ॥ स्वागतं भवद्भ्यः उच्यतां किं क्रियतामिति यद्वक्ष्यथ तत् करिष्यामि ते तमब्रुवन् शरीरपरित्यागं लोकहितार्थं भगवान् कर्त्तुमर्हतीति अथ दधीचस्तथैवाविमनाः सुखदुःखसमो महायोगी आत्मानं समाधाय शरीरपरित्यागं चकार तस्य परमात्मन्यपसृते तान्यस्थीनि धाता संगृह्य वज्रमकरोत् तेन वज्रेणाभेद्यनाप्रधृष्येण ब्रह्मास्थिसम्भूतेन विष्णुप्रविष्टेन इन्द्रो विश्वरूपं जघान शिरसश्चास्य च्छेदनमकरोत् तस्मादनन्तरं विश्वरूपगात्रमथनसम्भवं त्वाष्ट्रोत्पादितमेवारिं वृत्रमिन्द्रो जघान तस्यां द्वैधीभूतायां ब्रह्मवध्यायां भयादिन्द्रो देवराज्यं पर्य्यत्यजत् ॥ अप्सुसम्भवाञ्च शीतलां मानससरोगतां नलिनीं प्रतिपेदे तत्र चैश्वर्य्ययोगादणुमात्रो भूत्वा बिसग्रन्थिं प्रविवेश ॥

अथ ब्रह्मवध्याभयप्रनष्टे त्रैलोक्यनाथे शचीपतौ जगदनीश्वरं बभूव देवान्रजस्तमश्चाविवेश मन्त्रा न प्रावर्त्तन्त महर्षीणां रक्षांसि प्रादुरभवन् ब्रह्म चोत्सादनं जगाम अनिन्द्राश्चावला लोकाः सुप्रधृष्या बभूवुः अथ देवा ऋषयश्चायुषः पुत्रं नहुषं नाम देवराज्येऽभिषिषिचुः नहुषः पञ्चभिः शतैर्ज्योतिषां ललाटे ज्वलद्भिः सर्व्वभूततेजोहरैस्त्रिपिष्टपं पालयाम्बभूव अथ लोकाः प्रकृतिमापेदिरे स्वस्थाश्च हृष्टाश्च बभूवुः अथोवाच नहुषः सर्व्वं मां शक्रोपभुक्तं उपस्थितमृते शचीमिति स एवमुक्त्वा शचीसमीपमगमत् उवाच चैनां सुभगेऽहमिन्द्रो देवानां भजस्व मामिति तं शची प्रत्युवाच प्रकृत्या त्वं धर्म्मवत्सलः सोमवंशोद्भवश्च नार्हसि परपत्नीधर्षणं कर्त्तुमिति तामथोवाच नहुषः ऐन्द्रं पदमध्यास्यते मया अहमिन्द्रस्य राज्यरत्नहरो नात्र धर्म्मः कश्चित् त्वमिन्द्रोपभुक्तेति सा तमुवाचास्ति मम किञ्चिद्व्रतमपर्य्यवसितं तस्यावभृथे त्वामुपगमिष्यामि कैश्चिदेवाहोभिरिति स शच्यैवमभिहितो जगाम ॥ अथ शची दुःखशोकार्त्ता भर्तृदर्शनलालसा नहुषभयगृहीता बृहस्पतिमुपागच्छत् स च तामत्युद्विग्नां दृष्ट्वैव ध्यानं प्रविश्य भर्तृकार्य्यतत्परां ज्ञात्वा बृहस्पतिरुवाच ॥

अनेनैव व्रतेन तपसा चान्विता देवीं वरदामुपश्रुतिमाह्वय तदा सा ते इन्द्रं दर्शयिष्यतीति साथ महानियमसास्थिता देवीं वरदामुपश्रुतिं मन्त्रैराह्वयति सोपश्रुतिः शचीसमीपमगादुवाच चैनामियमस्मीति त्वयाहूतोपस्थिता किन्ते प्रियं करवाणीति तां मूर्द्ध्ना प्रणम्योवाच शची भगवत्यर्हसि मे भर्त्तारं दर्शयितुं त्वं सत्या ऋता चेति सैनां मानसं सरोऽनयत्॥ १२२१५

तत्रेन्द्रं बिसग्रन्थिगतमदर्शयत् तामथ पत्नीं कृशां ग्लानाञ्चेन्द्रो दृष्ट्वा चिन्तयाम्बभूव अहो मम दुःखमिदमुपगतं नष्टं हि मामियमन्विष्य यत् पत्न्यभ्यागमद्दुःखार्त्तेति तामिन्द्र उवाच कथं वर्त्तयसीति सा तमुवाच नहुषो मामाह्वयति पत्नीं कर्त्तुं कालश्चास्य मया कृत इति तामिन्द्र उवाच गच्छ नहुषस्त्वया वाच्यः अपूर्व्वेण मामृषियुक्तेन यानेन त्वमधिरूढ उद्वहस्वेति इन्द्रस्य महान्ति वाहनानि सन्ति मनःप्रियाण्यधिरूढानि मया त्वमन्येनापयातुमर्हसीति सैवमुक्ता हृष्टा जगाम इन्द्रोऽपि बिसग्रन्थिमेवाविवेश भूयः अथेन्द्राणीमभ्यागतां दृष्ट्वा तामुवाच नहुषः पूर्णः स काल इति तं शच्यब्रवीच्छक्रेण यथोक्तं स महर्षियुक्तं वाहनमधिरूढः शचीसमीपमुपागच्छत् अथ मैत्रावरुणिः कुम्भयोनिरगस्त्य ऋषिवरो महर्षीन् धिक्क्रियमाणांस्तान्नहुषेणापश्यत् पद्भ्याञ्च तमस्पृशत् ततः स नहुषमब्रवीत् अकार्य्यप्रवृत्त पाप पतस्व महीं सर्पो भव यावद्भूमिर्गिरयश्च तिष्ठेयुस्तावदिति स महर्षिवाक्यसमकालमेव तस्माद्यानादवापतत् अथानिन्द्रं पुनस्त्रैलोक्यमभवत् ॥

ततो देवाश्च ऋषयश्च भगवन्तं विष्णुं शरणमिन्द्रार्थेऽभिजग्मुः ऊचुश्चैनं भगवन्निन्द्रं ब्रह्महत्याभिभूतं त्रातुमर्हसीति ततः स वरदस्तानब्रवीत् अश्वमेधं यज्ञं वैष्णवं शक्रोऽभियजतां ततः स्वस्थानं प्राप्स्यतीति ततो देवा ऋषयश्चेन्द्रं नापश्यन् यदा तदा शचीमूचुः गच्छ सुभगे इन्द्रमानयस्वेति सा पुनस्तत्सरः समभ्यगच्छदिन्द्रश्च तस्मात् सरसः प्रत्युत्थाय बृहस्पतिमभिजगाम बृहस्पतिश्चाश्वमेधं महाक्रतुं शक्रायाहरत् तत्र कृष्णसारं मेध्यमश्वमुत्सृज्य वाहनं तमेव कृत्वा इन्द्रं मरुत्पतिं बृहस्पतिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वस्थानं प्रापयामास ततः सदेवराट् देवैर्ऋषिभिः स्तूयमानस्त्रिपिष्टपस्थो निष्कल्मषो बभूव ब्रह्मवध्याञ्चतुर्षु स्थानेषु वनि ताग्निवनस्पतिगोषु व्यभजत् ॥

एवमिन्द्रो ब्रह्मतेजःप्रभावोपबृंहितः शत्रुवधं कृत्वा स्वं स्थानं प्रापितः आकाशगङ्गागतश्च पुरा भरद्वाजो महर्षि रुपास्पृशत् त्रीन् क्रमान् क्रमता विष्णुनाभ्यासादितः स भरद्वाजेन सलिलेन पाणिनोरसि ताडितः सलक्षणोरस्कः संवृत्तः भृगुणा महर्षिणा शप्तो ऽग्निः सर्व्वभक्षत्वमुपानीतः अदितिर्वै देवानामन्नमपचत् ॥

एतद्भुक्त्वासुरान् हनिष्यन्तीति तत्र बुधो व्रतचर्य्यासमाप्तावागच्छददितिञ्चावोचत् भिक्षां देहीति तत्र देवैः पूर्व्व मेतत् प्राश्यन्नान्येनेत्यदितिर्भिक्षां नादात् अथ भिक्षाप्रत्याख्यानरुषितेन बुधेन ब्रह्मभूतेन अदितिः शप्ता अदितेरुद रे भविष्यति व्यथा विवस्वतो द्वितीयजन्मन्यण्डसंज्ञितस्य अण्डमातुरदित्याः स्मारितः स मार्त्तण्डो विवस्वानभवच्छ्राद्ध देवः दक्षस्य या वै दुहितरः षष्टिरासन् ताभ्यः कश्यपाय त्रयोदश प्रादात् दश धर्म्माय दश मनवे सप्तविंशतिमिन्दवे तासु तुल्यासु नक्षत्राख्यां गतासु सोमो रोहिण्यामभ्यधिकं प्रीतिमानभूत्ततस्ताः शिष्टाः पत्न्य ईर्षावत्यः पितुः समीपङ्गत्वा इम मर्थं शशंसुः भगवन्नस्मासु तुल्यप्रभवासु सोमो रोहिणीं प्रत्यधिकं भजतीति सोऽब्रवीद्यक्ष्मैनमाविश्यत इति दक्षशापात् सोमं राजानं यक्ष्मा विवेश स यक्ष्मणाविष्टो दक्षमगमत् दक्षश्चैनमब्रवीत् न समं वर्त्तयसीति तत्रर्षयः सोममब्रुवन् ।

क्षीयसे यक्ष्मणा पश्चिमस्यां दिशि समुद्रे हिरण्यसरस्तीर्थं तत्र गत्वा आत्मानमभिषेचयस्वेति अथागच्छत् सोमस्तत्र हिरण्यसरस्तीर्थं गत्वा चात्मनः सेचनमकरोत् । १२२२०

स्नात्वा चात्मानं पाप्मनो मोक्षयामास तत्र चावभासितस्तीर्थे यदा सोमस्तदाप्रभृति च तीर्थं तत् प्रभा सर्मिति नाम्ना ख्यातं बभूव ॥ तच्छापादद्यापि सोमः अमावास्यान्तरास्थः पौर्णमासीमात्रेऽधिष्ठितः मेघलेखाप्रतिच्छन्नं वपुर्दर्शयति मेघसदृशं वर्णमगमत् तदस्य शशलक्ष्म विमलमभवत् ॥ स्थूलशिरा महर्षिर्म्मेरोः प्रागुत्तरे दिग्विभागे तप स्तेपे ततस्तस्य तपस्तप्यमानस्य सर्व्वगन्धवहः शुचिर्व्वायुर्व्विवायमानः शरीरमस्पृशत् स तपसा तापितशरीरः कृशो वायुनो पवीज्यमानो हृदये परितोषमगमत् ॥

तत्र किल तस्यानिलव्यजनकृतपरितोषस्य सद्यो वनस्पतयः पुष्पशोभां निदर्शितवन्त इति स एतान् शशाप न सर्व्व कालं पुष्पवन्तो भविष्यथेति नारायणो लोकहितार्थं वडवामुखो नाम पुरा महर्षिर्ब्बभूव तस्य मेरौ तपस्तप्यतः समुद्र आहूतो नागतस्तेनामर्षितेनात्मगात्रोष्मणा समुद्रस्तिमितजलः कृतः स्वेदप्रस्यन्दनसदृशश्चास्य लवणभावो जनितः उक्तश्चाप्यपेयो भविष्यस्येतच्च ते तोयं वडवामुखसंज्ञितेन पीयमानं मधुरं भविष्यति । तदेतदद्यापि वडवामुखसंज्ञितेना नुवर्त्तिना तोयं समुद्रात् पीयते हिमवतो गिरेर्दुहितरमुमां कन्यां रुद्रश्चकमे ।

भृगुरपि च महर्षिर्हिमवन्तमागत्याब्रवीत् कन्यामिमां मे देहीति तमब्रवीद्धिमवानभिलषितो वरो रुद्र इति तमब्रवीद्भृगुर्यस्मात्त्वयाहं कन्यावरणकृतभावः प्रत्याख्यातस्तस्मान्न रत्नानां भवान् भाजनं भविष्यतीति अद्यप्रभृत्येतदवस्थि तमृषिवचनं तदेवंविधं माहात्म्यं ब्राह्मणानां ॥ क्षत्त्रमपि च ब्राह्मणप्रसादादेव शाश्वतीमव्ययाञ्च पृथिवीं पत्नीमभिगम्य बुभुजे तदेतद्ब्रह्माग्नीषोमीयं तेन जगद्धार्य्यते ॥

उच्यते । सूर्य्याचन्द्रमसौ चक्षुः केशाश्चैवांशवः स्मृताः । बोधयंस्तापयंश्चैव जगदुत्तिष्ठते पृथक् ।

बोधनात्तपनाच्चैव जगतो हर्षणं भवेत् । अग्नीषोमकृतैरेभिः कर्म्मभिः पाण्डुनन्दन ः । १२२२५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हृषीकेशोऽहमीशानो वरदो लोकभावनः। इलोपहूतो योगेन हरेर्भागं क्रतुष्वहं।
वर्णश्च मे हरिश्रेष्ठस्तस्माद्धरिरहं स्मृतः। धामसारो हि भूतानामृतञ्चैव विचारितं।
ऋतधामा ततो विप्रैः सत्यश्चाहं प्रकीर्त्तितः। नष्टाञ्च धरणीं पूर्व्वमविन्दन् वै गुहागतां।
गोविन्द इति तेनाहं देवैर्व्वाग्भिरभिष्टुतः। शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत्।
तेनाविष्टन्तु यत् किञ्चिच्छिपिविष्टेति च स्मृतः। यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान्। १३२३०
शिपिविष्टइति ह्यस्माद्गुह्यनामधरो ह्यहं। स्तुत्वा मां शिपिविष्टेति यास्कः ऋषिरुदारधीः।
मत्प्रसादादधोनष्टं निरुक्तमभिजग्मिवान्। न हि जातो न जायेयं न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः। नोक्तपूर्व्वं मया क्षुद्रमश्लीलं वा कदाचन।
ऋता ब्रह्मसुता सा मे सत्या देवी सरस्वती। सच्चासच्चैव कौन्तेय मया वेशितमात्मनि।
पौष्करे ब्रह्मसदने सत्यं मामृषयो विदुः। सत्त्वान्न च्युतपूर्व्वोऽहं सत्त्वं वै विद्धि मत्कृतं। १३२३५
जन्मनीहाभवेत् सत्त्वं पौर्व्विकं मे धनञ्जय। निराशी कर्म्मसंयुक्तः सत्त्वतश्चाप्यकल्मषः।
सात्त्वतज्ञानदृष्टोऽहं सत्त्वतामिति सात्त्वतः। कृषामि मेदिनीं पार्थ भूत्वा कार्ष्णायसो महान्।
कृष्णो वर्णश्च मे यस्मात्तस्मात् कृष्णोऽहमर्ज्जुन। मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम। निर्व्वाणं परमं ब्रह्म धर्म्मोऽसौ पर उच्यते।
तस्मान्न च्युतपूर्व्वोऽहं अच्युतस्तेन कर्म्मणा। पृथिवी नभसी चोभे विश्रुते विश्वतोमुखे। १३२४०
तयोः सन्धारणार्थं हि मामधोक्षजमञ्जसा। निरुक्तं वेदविदुषो वेदशब्दार्थचिन्तकाः।
ते मां गायन्ति प्राग्वंशे अधोक्षज इति स्थितिः। शब्द एकपदैरेष व्याहृतः परमर्षिभिः।
नान्यो ह्यधोक्षजो लोके ऋते नारायणं प्रभुं। घृतं ममार्च्चिषो लोके जन्तूनां प्राणधारणं।
घृतार्च्चिरहमव्यग्रैर्व्वेदज्ञैः परिकीर्त्तितः। त्रयो हि धातवः ख्याताः कर्म्मजा इति ये स्मृताः।
पित्तं श्लेष्मा च वायुश्च एष संघात उच्यते। एतैश्च धार्य्यते जन्तुरेतैः क्षीणैश्च क्षीयते। १३२४५
आयुर्व्वेदविदस्तस्मात् त्रिधातुं मां प्रचक्षते। वृषो हि भगवान् धर्म्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमं। कपिर्व्वराहश्रेष्ठश्च धर्म्मश्च वृष उच्यते।
तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिः।
न चादिं न मध्यं तथा चैव नान्तं कदाचिद्विदन्ते सुराश्चासुराश्च। अनाद्यो ह्यमध्यस्तथा चाप्यनन्तः प्रगीतोऽहमीशो विभुर्लोकसाक्षी।
शुचीनि श्रवणीयानि शृणोमीह धनञ्जय। न च पापानि गृह्णामि ततोऽहं वै शुचिश्रवाः। १३२५०
एकशृङ्गः पुरा भूत्वा वराहो नन्दिवर्द्धनः। इमाञ्चोद्धृतवान् भूमिमेकशृङ्गस्ततो ह्यहं।
तथैवासं त्रिककुदो वाराहं रूपमास्थितः। त्रिककुत्त्वेन विख्यातः शरीरस्य प्रमापणात्।
विरिञ्च इति यत् प्रोक्तं कापिलं ज्ञानचिन्तकैः। स प्रजापतिरेवाहं चेतनात् सर्व्वलोककृत्।
विद्यासहायवन्तं मामादित्यस्थं सनातनं। कपिलं प्राहुराचार्य्याः साङ्ख्या निश्चितनिश्चयाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हिरण्यगर्भो द्युतिमान् य एष च्छन्दसि स्तुतः। योगैः संपूज्यते नित्यं सएवाहं भुवि स्मृतः। १३२५५
एकविंशतिसाहस्रं ऋग्वेदं मां प्रचक्षते। सहस्रशाखं यत् साम ये वै वेदविदो जनाः।
गायन्त्यारण्यके विप्रा मद्भक्तास्ते हि दुर्लभाः। षट्पञ्चाशतमष्टौ च सप्तत्रिंशतमित्युत।
यस्मिन्शाखा यजुर्व्वेदे सोऽहमाध्वर्य्यवे स्मृतः। पञ्चकल्पमथर्व्वाणं कृत्याभिः परिवृंहितं।
कल्पयन्ति हि मां विप्रा अथर्व्वाणविदस्तथा। शाखाभेदाश्च ये केचित् याश्च शाखासु गीतयः।
स्वरवर्णसमुच्चाराः सर्व्वांस्तान् विद्धि मत्कृतान्। यत्तद्धयशिरः पार्थ समुदेति वरप्रदं। १३२६०
सोऽहमेवोत्तरे भागे क्रमाक्षरविभागवित्। वामदेशितमार्गेण मत्प्रसादान्महात्मना।
पाञ्चालेन क्रमः प्राप्तस्तस्माद्भूतात् सनातनात्। बाभ्रव्यगोत्रः स बभौ प्रथमं क्रमपारगः।
नारायणाद्वरं लब्ध्वा प्राप्य योगमनुत्तमं। क्रमं प्रणीय शिक्षाञ्च प्रणयित्वा स गालवः।
कण्डरीकोऽथ राजा च ब्रह्मदत्तः प्रतापवान्। जातीमरणजं दुःखं स्मृत्वा स्मृत्वा पुनः पुनः।
सप्तजातिषु मुख्यत्वाद्योगानां सम्पदङ्गतः। पुराहमात्मजः पार्थ प्रथितः कारणान्तरे। १३२६५
धर्म्मस्य कुरुशार्द्दूल ततोऽहं धर्म्मजः स्मृतः। नरनारायणौ पूर्व्वं तपस्तेपतुरव्ययं।
धर्म्मयानं समारूढौ पर्व्वते गन्धमादने। तत्कालसमये चैव दक्षयज्ञो बभूव ह।
नचैवाकल्पयद्भागं दक्षो रुद्रस्य भारत। ततो दधीचिवचनाद्दक्षयज्ञमपाहरत्।
ससर्ज्ज शूलं कोपेन प्रज्वलन्तं मुहुर्मुहुः। तच्छूलं भस्मसात् कृत्वा दक्षयज्ञं सविस्तरं।
आवयोः सहसागच्छद्बदर्य्याश्रममन्तिकात्। वेगेन महता पार्थ पतन्नारायणोरसि। १३२७०
ततस्तत्तेजसाविष्टाः केशा नारायणस्य ह। बभूवुर्मुञ्जवर्णास्तु ततोऽहं मुञ्जकेशवान्।
तच्च शूलं विनिर्द्धूतं हुङ्कारेण महात्मना। जगाम शङ्करकरं नारायणसमाहतं।
अथ रुद्र उपाधावत्तावृषी तपसान्वितौ। तत एनं समुद्धूतं कण्ठे जग्राह पाणिना।
नारायणः स विश्वात्मा तेनास्य शितिकण्ठता। अथ रुद्रविघातार्थमिषीकां नर उद्धरत्।
मन्त्रैश्च संयुयोजाशु सोऽभवत् परशुर्महान्। क्षिप्तश्च सहसा तेन खण्डनं प्राप्तवांस्तदा। १३२७५
ततोऽहं खण्डपरशुः स्मृतः परशुखण्डनात्।
॥ अर्ज्जुन उवाच ॥ अस्मिन् युद्धे तु वार्ष्णेय त्रैलोक्यशमने तदा। को जयं प्राप्तवांस्तत्र शंसैतन्मे जनार्द्दन।
॥ श्रीभगवानुवाच ॥ तयोः संलग्नयोर्युद्धे रुद्रनारायणात्मनोः। उद्विग्नाः सहसा कृत्स्नाः सर्व्वलोकास्तदाभवन्।
नागृह्णात् पावकः शुभ्रं मखेषु सुहुतं हविः। वेदा न प्रतिभान्ति स्म ऋषीणाम्भावितात्मनां।
देवान्रजस्तमश्चैव समाविविशतुस्तदा। वसुधा सञ्चकम्पे च नभश्च विपफाल ह। १३२८०
निष्प्रभाणि च तेजांसि ब्रह्मा चैवासनच्युतः। अगाच्छोषं समुद्रश्च हिमवांश्च व्यशीर्य्यत।
तस्मिन्नेवं समुत्पन्ने निमित्ते पाण्डुनन्दन। ब्रह्मा वृतो देवगणैर्ऋषिभिश्च महात्मभिः।
आजगामाशु तं देशं यत्र युद्धमवर्त्तत। सोऽञ्जलिप्रग्रहो भूत्वा चतुर्व्वक्त्रो निरुक्तगः।
उवाच वचनं रुद्रं लोकानामस्तु वै शिवं। न्यस्यायुधानि विश्वेश जगतो हितकाम्यया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यदक्षरमथाव्यक्तमीशं लोकस्य भावनं । कूटस्थं कर्त्तनिर्द्वन्द्वमकर्त्तेति च यं विदुः । १३२८५
व्यक्तिभावगतस्यास्य एका मूर्त्तिरियं शुभा । नरोनारायणश्चैव जातौ धर्म्मकुलोद्वहौ ।
तपसा महता युक्तौ देवश्रेष्ठौ महाव्रतौ । अहं प्रसादजस्तस्य कुतश्चित् कारणान्तरे ।
त्वञ्चैव क्रोधजस्तात पूर्व्वसर्गे सनातनः । मया च सार्द्धं वरदं विबुधैश्च महर्षिभिः ।
प्रसादयाशु लोकानां शान्तिर्भवतु मा चिरं । ब्रह्मणा त्वेवमुक्तस्तु रुद्रः क्रोधाग्निमुत्सृजन् ।
प्रसादयामास ततो देवं नारायणं प्रभुं । शरणञ्च जगामाद्यं वरेण्यं वरदं प्रभुं । १३२९०
ततोऽथ वरदो देवो जितक्रोधो जितेन्द्रियः । प्रीतिमानभवत्तत्र रुद्रेण सह सङ्गतः ।
ऋषिभिर्ब्रह्मणा चैव विबुधैश्च सुपूजितः । उवाच देवमीशानमीशः स जगतो हरिः ।
यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु । नावयोरन्तरं किञ्चिन्मा ते भूद्बुद्धिरन्यथा ।
अद्यप्रभृति श्रीवत्सः शूलाङ्को मे भवत्वयं । मम पाण्यङ्कितश्चापि श्रीकण्ठस्त्वं भविष्यसि ।
॥ श्रीभगवानुवाच ॥ एवं लक्षणमुत्पाद्य परस्परकृतं तदा । सख्यञ्चैवातुलं कृत्वा रुद्रेण सहितावृषी । १३२९५
तपस्तेपतुरव्यग्रौ विसृज्य त्रिदिवौकसः । एष ते कथितः पार्थ नारायणजयो मृधे ।
नामानि चैव गुह्यानि निरुक्तानि च भारत । ऋषिभिः कथितानीह यानि सङ्कीर्त्तितानि ते ।
एवं बहुविधैरूपैश्चरामीह वसुन्धरां । ब्रह्मलोकञ्च कौन्तेय गोलोकञ्च सनातनं ।
मया त्वं रक्षितो युद्धे महान्तं प्राप्तवान् जयं । यस्तु ते सोऽग्रतो याति युद्धे सम्प्रत्युपस्थिते ।
तं विद्धि रुद्रं कौन्तेय देवदेवं कपर्द्दिनं । कालः स एव कथितः क्रोधजेति मया तव । १३३००
निहतास्तेन वै पूर्व्वं हतवानसि यान् रिपून् । अप्रमेयप्रभावं तं देवदेवमुमापतिं ।
नमस्व देवं प्रयतो विश्वेशं हरमक्षयं । यश्च ते कथितः पूर्व्वं क्रोधजेति पुनः पुनः ।
तस्मिन् प्रभावमेवाग्रे यच्छ्रुतन्ते धनञ्जय ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये चतुश्चत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४४ ॥
॥ शौनक उवाच ॥ सौते सुमहदाख्यानं भवता परिकीर्त्तितं । यच्छ्रुत्वा मुनयः सर्व्वे विस्मयं परमं गताः ।
सर्व्वाश्रमाभिगमनं सर्व्वतीर्थावगाहनं । न तथा फलदं सौते नारायणकथा यथा । १३३०५
पाविताङ्गाः स्म संवृत्ताः श्रुत्वेमामादितः कथां । नारायणाश्रयां पुण्यां सर्व्वपापप्रमोचनीं ।
दुर्द्दर्शो भगवान्देवः सर्व्वलोकनमस्कृतः । सब्रह्मकैः सुरैः कृत्स्नैरन्यैश्चैव महर्षिभिः ।
दृष्टवान् नारदो यत्तु देवं नारायणं हरिं । नूनमेतद्ध्यनुमतं तस्य देवस्य सूतज ।
यद्दृष्टवान् जगन्नाथमनिरुद्धतनौ स्थितं । यत् प्राद्रवत् पुनर्भूयो नारदो देवसत्तमौ ।
नरनारायणौ द्रष्टुं कारणं तद्ब्रवीहि मे । १३३१०
॥ सूत उवाच ॥ तस्मिन् यज्ञे वर्त्तमाने राज्ञः पारीक्षितस्य वै । कर्म्मान्तरेषु विधिवद्वर्त्तमानेषु शौनक ।
कृष्णद्वैपायनं व्यासमृषिं वेदनिधिं प्रभुं । परिपप्रच्छ राजेन्द्रः पितामहपितामहं ।
॥ जनमेजय उवाच ॥ श्वेतद्वीपान्निवृत्तेन नारदेन सुरर्षिणा । ध्यायता भगवद्वाक्यं चेष्टितं किमतः परं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

वदर्य्याश्रममागम्य समागम्य च तावृषी । कियन्तं कालमवसत् कां कथां पृष्टवांश्च सः ।
इदं शतसहस्राद्धि भारताख्यानविस्तरात् । आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमं । १२११५
नवनीतं यथा दध्नो मलयाच्चन्दनं यथा । आरण्यकञ्च वेदेभ्य ओषधिभ्योऽमृतं यथा ।
समुद्धृतमिदं ब्रह्मन् कथामृतमिदन्तथा । तपोनिधे त्वयोक्तं हि नारायणकथाश्रयं ।
स ईशो भगवान्देवः सर्व्वभूतात्मभावनः । अहो नारायणं तेजो दुर्द्दर्शं द्विजसत्तम ।
यत्राविशन्ति कल्पान्ते सर्व्वे ब्रह्मादयः सुराः । ऋषयश्च सगन्धर्व्वा यच्च किञ्चिच्चराचरं ।
न ततोऽस्ति परं मन्ये पावनं दिवि चेह च । सर्व्वाश्रमाभिगमनं सर्व्वतीर्थावगाहनं । १२१२०
न तथा फलदञ्चापि नारायणकथा यथा । सर्व्वथा पाविताः स्मेह श्रुत्वेमामादितः कथां ।
हरेर्व्विश्वेश्वरस्येह सर्व्वपापप्रणाशनीं । न चित्रं कृतवांस्तत्र यदार्य्यो मे धनञ्जयः ।
वासुदेवसहायो यः प्राप्तवान् जयमुत्तमं । न चास्य किञ्चिदप्राप्यं मन्ये लोकेष्वपि त्रिषु ।
त्रैलोक्यनाथो विष्णुः स यथासीत् सहायकृत् स वै । धन्याश्च सर्व्व एवासन् ब्रह्मंस्ते मम पूर्व्वजाः ।
हिताय श्रेयसे चैव येषामासीज्जनार्द्दनः । तपसाथ सुदृश्यो हि भगवाल्लोकपूजितः । १२१२५
यद्दृष्टवन्तस्ते साक्षात् श्रीवत्साङ्कविभूषणं । तेभ्यो धन्यतरश्चैव नारदः परमेष्ठिजः ।
न चाल्पतेजसमृषिं वेद्मि नारदमव्ययं । श्वेतद्वीपं समासाद्य येन दृष्टः स्वयं हरिः ।
देवप्रसादानुगतं व्यक्तं तत्तस्य दर्शनं । यद्दृष्टवांस्तदा देवमनिरुद्धतनौ स्थितं ।
वदरीमाश्रमं यत्तु नारदः प्राद्रवत् पुनः । नरनारायणौ द्रष्टुं किन्नु तत् कारणं मुने ।
श्वेतद्वीपान्निवृत्तस्स नारदः परमेष्ठिजः । वदरीमाश्रमं प्राप्य समागम्य च तावृषी । १२१३०
कियन्तं कालमवसत् प्रश्नान् कान् पृष्टवांश्च ह । श्वेतद्वीपादुपावृत्ते तस्मिन् वा सुमहात्मनि ।
किमब्रूतां महात्मानौ नरनारायणावृषी । तदेतन्मे यथातत्त्वं सर्व्वमाख्यातुमर्हसि ।
॥ वैशम्पायन उवाच ॥ नमो भगवते तस्मै व्यासायामिततेजसे । यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमां ।
प्राप्य श्वेतं महाद्वीपं दृष्ट्वा च हरिमव्ययं । निवृत्तो नारदो राजंस्तरसा मेरुमागमत् ।
हृदयेनोद्वहन् भारं यदुक्तं परमात्मना । पश्चादस्याभवद्राजन्नात्मनः साध्वसं महत् । १२१३५
यद्गत्वा दूरमध्वानं क्षेमी पुनरिहागतः । मेरोः प्रचक्राम ततः पर्व्वतं गन्धमादनं ।
निपपात च खात्तूर्णं विशालां वदरीमनु । ततः स ददृशे देवौ पुराणावृषिसत्तमौ ।
तपश्चरन्तौ सुमहदात्मनिष्ठौ महाव्रतौ । तेजसाभ्यधिकौ सूर्य्यात् सर्व्वलोकविरोचनात् ।
श्रीवत्सलक्षणौ पूज्यौ जटामण्डलधारिणौ । जालपादभुजौ तौ तु पादयोश्चक्रलक्षणौ ।
व्यूढोरस्कौ दीर्घभुजौ तथा मुष्कचतुष्किनौ । षष्टिदन्तावष्टदंष्ट्रौ मेघौघसदृशस्वनौ । १२१४०
स्वास्यौ पृथुललाटौ च सुभ्रू सुहनुनासिकौ । आतपत्रेण सदृशे शिरसी देवयोस्तयोः ।
एवं लक्षणसम्पन्नौ महापुरुषसंज्ञितौ । तौ दृष्ट्वा नारदो हृष्टस्ताभ्याञ्च प्रतिपूजितः ।
स्वागतेनाभिभाष्याथ पृष्टश्चानामयन्तथा । बभूवान्तर्गतमतिर्न्निरीक्ष्य पुरुषोत्तमौ ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सदोगतास्तत्र ये वै सर्व्वभूतनमस्कृताः । श्वेतद्दीपे मया दृष्टास्ताद्दृशावृषिसम्मतौ ।
इति सञ्चिन्त्य मनसा कृत्वा चाभिप्रदक्षिणं । स चोपविविशे तत्र पीठे कुशमये शुभे । १२२४५
ततस्तौ तपसां वासौ यशसां तेजसामपि । ऋषी शमदमोपेतौ कृत्वा पूर्व्वाह्निकं विधिं ।
पश्चान्नारदमव्यग्रौ पाद्यार्घ्याभ्यामथार्च्चतः । पीठयोश्चोपविष्टौ तौ कृतातिथ्याह्निकौ नृप ।
तेषु तत्रोपविष्टेषु स देशोऽभिव्यराजत । आज्याहुतिमहाज्वालैर्यज्ञवाटो यथाग्निभिः ।
अथ नारायणस्तत्र नारदं वाक्यमब्रवीत् । सुखोपविष्टं विश्रान्तं कृतातिथ्यं सुखस्थितं ।
॥ नरनारायणावूचतुः ॥ अपीदानीं स भगवान् परमात्मा सनातनः । श्वेतद्दीपे त्वया दृष्ट आवयोः प्रकृतिः परा । १२२५०
॥ नारद उवाच ॥ दृष्टो मे पुरुषः श्रीमान् विश्वरूपधरोऽव्ययः । सर्व्वे लोका हि तत्रस्थास्तथा देवाः सहर्षिभिः ।
अद्यापि चैनं पश्यामि युवां पश्यन् सनातनौ । यैर्लक्षणैरुपेतः स हरिरव्यक्तरूपधृक् ।
तैर्लक्षणैरुपेतौ हि व्यक्तरूपधरौ युवां । दृष्टौ युवां मया तत्र तस्य देवस्य पार्श्वतः ।
इहैव चागतोऽस्म्यद्य विसृष्टः परमात्मना । को हि नाम भवेत्तस्य तेजसा यशसा श्रिया ।
सदृशस्त्रिषु लोकेषु ऋते धर्म्मात्मजौ युवां । तेन मे कथितः कृत्स्नो धर्म्मः क्षेत्रज्ञसंज्ञितः । १२२५५
प्रादुर्भावाश्च कथिता भविष्या इह ये यथा । तत्र ये पुरुषाः श्वेताःपञ्चेन्द्रियविवर्जिताः ।
प्रतिबुद्धाश्च ते सर्व्वे भक्ताश्च पुरुषोत्तमं । तेऽर्च्चयन्ति सदा देवं तैः सार्द्धं रमते च सः ।
प्रियभक्तो हि भगवान् परमात्मा द्विजप्रियः । रमते सोऽर्च्यमानो हि सदा भागवतप्रियः ।
विश्वभुक् सर्व्वगो देवो माधवो भक्तवत्सलः । स कर्त्ता कारणञ्चैव कार्य्यञ्चातिबलद्युतिः ।
हेतुश्चाज्ञाविधानञ्च तत्त्वञ्चैव महायशाः । तपसा योज्य सोऽत्मानं श्वेतद्दीपात्परं हि यत् । १२२६०
तेज इत्यभिविख्यातं स्वयं भासावभासितं । शान्तिः सा त्रिषु लोकेषु विहिता भावितात्मना ।
एतया शुभया बुद्ध्या नैष्ठिकं व्रतमास्थितः । न तत्र सूर्य्यस्तपति न सोमोऽभिविराजते ।
न वायुर्व्वाति देवेशे तपश्चरति दुश्चरं । वेदीमष्टनलोत्सेधां भूमावास्थाय विश्वकृत् ।
एकपादस्थितो देव ऊर्द्ध्वबाहुरुदङ्मुखः । साङ्गानावर्त्तयन् वेदांस्तपस्तेपे सुदुश्चरं ।
यद्ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् । शेषाश्च विबुधश्रेष्ठा दैत्यदानवराक्षसाः । १२२६५
नागाः सुपर्णा गन्धर्व्वाः सिद्धा राजर्षयश्च ये । हव्यं कव्यञ्च सततं विधियुक्तं प्रयुञ्जते ।
कृत्स्नन्तु तस्य देवस्य चरणावुपतिष्ठतः । याः क्रियाः संप्रयुक्ताश्च एकान्तगतबुद्धिभिः ।
ताः सर्व्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयं । न तस्यान्यः प्रियतरः प्रतिबुद्धैर्म्महात्मभिः ।
विद्यते त्रिषु लोकेषु ततोऽस्म्यैकान्तिकं गतः । इह चैवागतस्तेन विसृष्टः परमात्मना ।
एवं मे भगवान्देवः स्वयमाख्यातवान् हरिः । आसिष्ये तत्परो भूत्वा युवाभ्यां सह नित्यशः । १२२७०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये पञ्चचत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४५ ॥
॥ नरनारायणावूचतुः ॥ धन्योऽस्यनुगृहीतोऽसि यत्ते दृष्टः स्वयं प्रभुः । नहि तं दृष्टवान् कश्चित् पद्मयोनिरपि स्वयं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalgaon

अव्यक्तयोनिर्भगवान् दुर्द्दर्शः पुरुषोत्तमः । नारदैतद्धि नौ सत्यं वचनं समुदाहृतं ।
नास्य भक्तात् प्रियतरो लोके कश्चन विद्यते । ततः स्वयं दर्शितवान् स्वमात्मानं द्विजोत्तम ।
तपो हि तप्यतस्तस्य यत् स्थानं परमात्मनः । न तत् सम्प्राप्नुते कश्चिदृते ह्यावां द्विजोत्तम ।
या हि सूर्य्यसहस्रस्य समस्तस्य भवेद्द्युतिः । स्थानस्य सा भवेत्तस्य स्वयं तेन विराजता । १२३७५
तस्मादुत्तिष्ठते विप्र देवाद्विश्वभुवः पतेः । क्षमा क्षमावतां श्रेष्ठ यया भूमिस्तु युज्यते ।
तस्माच्चोत्तिष्ठते देवात्सर्व्वभूतहिताद्रसः । आपो हि तेन युज्यन्ते द्रवत्वं प्राप्नुवन्ति च ।
तस्मादेव समुद्भूतं तेजो रूपगुणात्मकं । येन संयुज्यते सूर्य्यस्ततो लोके विराजते ।
तस्माद्देवात् समुद्भूतः स्पर्शस्तु पुरुषोत्तमात् । येन स्म युज्यते वायुस्ततो लोकान् विवात्यसौ ।
तस्माच्चोत्तिष्ठते शब्दः सर्व्वलोकेश्वरात् प्रभोः । आकाशं युज्यते येन ततस्तिष्ठत्यसंवृतं । १२३८०
तस्माच्चोत्तिष्ठते देवात् सर्व्वभूतगतं मनः । चन्द्रमा येन संयुक्तः प्रकाशगुणधारणः ।
सद्भूतोत्पादकं नाम तत् स्थानं वेदसंज्ञितं । विद्यासहायो यत्रास्ते भगवान् हव्यकव्यभुक् ।
ये हि निष्कलुषा लोके पुण्यपापविवर्ज्जिताः । तेषां वै क्षेममध्वानं गच्छतां द्विजसत्तम ।
सर्व्वलोकतमोहन्ता आदित्यो द्वारमुच्यते । आदित्यदग्धसर्व्वाङ्गा अदृश्याः केनचित् क्वचित् ।
परमाणुभूता भूत्वा तु तं देवं प्रविशन्त्युत । तस्मादपि च निर्मुक्ता अनिरुद्धतनौ स्थिताः । १२३८५
मनोभूतास्ततो भूत्वा प्रद्युम्नं प्रविशन्त्युत । प्रद्युम्नाच्चापि निर्मुक्ता जीवं सङ्कर्षणन्ततः ।
विशन्ति विप्रप्रवराः साङ्ख्या भागवतैः सह । ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा ।
प्रविशन्ति द्विजश्रेष्ठाः क्षेत्रज्ञं निर्गुणात्मकं । सर्व्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः ।
समाहितमनस्काश्च नियताः संयतेन्द्रियाः । एकान्तभावोपगता वासुदेवं विशन्ति ते ।
आवामपि च धर्म्मस्य गृहे जातौ द्विजोत्तम । रम्यां विशालामाश्रित्य तप उग्रं समास्थितौ । १२३९०
ये तु तस्यैव देवस्य प्रादुर्भावाः सुरप्रियाः । भविष्यन्ति त्रिलोकस्थास्तेषां स्वस्तीत्यथो द्विज ।
विधिना स्वेन युक्ताभ्यां यथापूर्व्वं द्विजोत्तम । आस्थिताभ्यां सर्व्वकृच्छ्रं व्रतं सम्यगनुष्ठितं ।
आवाभ्यामपि दृष्टस्त्वं श्वेतद्वीपे तपोधन । समागतो भगवता सङ्कल्पं कृतवांस्तथा ।
सर्व्वं हि नौ संविदितं त्रैलोक्ये सचराचरे । यद्भविष्यति वृत्तं वा वर्त्तते वा शुभाशुभं ।
सर्व्वं स ते कथितवान् देवदेवो महामुने । १२३९५
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तयोर्व्वाक्यं तपस्युग्रे च वर्त्तते । नारदः प्राञ्जलिर्भूत्वा नारायणपरायणः ।
जजाप विधिवन्मन्त्रान् नारायणगतान् बहून् । दिव्यं वर्षसहस्रं हि नरनारायणाश्रमे ।
अवसत् स महातेजा नारदो भगवानृषिः । तमेवाभ्यर्च्चयन् देवं नरनारायणौ च तौ ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये षट्चत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४६ ॥
॥ वैशम्पायन उवाच ॥ कस्यचित्त्वथ कालस्य नारदः परमेष्ठिजः । दैवं कृत्वा यथान्यायं पित्र्यञ्चक्रे ततः परं ।
ततस्तं वचनं प्राह ज्येष्ठो धर्म्मात्मजः प्रभुः । क इज्यते द्विजश्रेष्ठ दैवे पित्र्ये च कल्पिते । १२४००

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

त्वया मतिमतां श्रेष्ठ तन्मे शंस यथागमं। किमेतत् क्रियते कर्म्म फलं वास्य किमिष्यते।
॥ नारद उवाच ॥ त्वयैतत् कथितं पूर्ब्बं दैवं कर्त्तव्यमित्यपि। दैवतञ्च परो यज्ञः परमात्मा सनातनः।
ततस्तद्भावितो नित्यं यजे वैकुण्ठमव्ययं। तस्माच्च प्रसूतः पूर्ब्बं ब्रह्मा लोकपितामहः।
मम वै पितरं प्रीतः परमेष्ठ्यप्यजीजनत्। अहं सङ्कल्पजस्तस्य पुत्त्रः प्रथमकल्पितः।
यजामि वै पितॄन् साधो नारायणविधौ कृते। एवं स एव भगवान् पिता माता पितामहः। १३३०५
इज्यते पितृयज्ञेषु तथा नित्यं जगत्पतिः। श्रुतिश्चाप्यपरा देवी पुत्त्रान् हि पितरो यजन्।
वेदश्रुतिः प्रणष्टा च पुनरध्यापिता सुतैः। ततस्ते मन्त्रदाः पुत्त्राः पितृत्वमुपपेदिरे।
नूनं सुरैस्तद्विदितं युवयोर्भावितात्मनोः। पुत्त्राश्च पितरश्चैव परस्परमपूजयन्।
त्रीन् पिण्डान्न्यस्य वै पृथ्व्यां पूर्ब्बान्दत्त्वा कुशानिति। कथन्तु पिण्डसंज्ञान्ते पितरो लेभिरे पुरा।
॥ नरनारायणावूचतुः ॥ इमां हि धरणीं पूर्ब्बं नष्टां सागरमेखलां। गोविन्द उज्जहाराशु वाराहं रूपमाश्रितः। १३३१०
स्थापयित्वा तु धरणीं स्वे स्थाने पुरुषोत्तमः। जलकर्द्दमलिप्ताङ्गो लोककार्य्यार्थमुद्यतः।
प्राप्ते चाह्निककाले तु मध्यदेशगते रवौ। दंष्ट्राविलग्नांस्त्रीन् पिण्डान् विधूय सहसा प्रभुः।
स्थापयामास वै पृथ्व्यां कुशानास्तीर्य्य नारद। स तेष्वात्मानमुद्दिश्य पित्र्यञ्चक्रे यथाविधि।
सङ्कल्पयित्वा त्रीन् पिण्डान् स्वेनैव विधिना प्रभुः। आत्मगात्रोष्मसम्भूतैः स्नेहगर्भैस्तिलैरपि।
प्रोच्यापवर्गं देवेशः प्राङ्मुखः कृतवान् स्वयं। मर्य्यादास्थापनार्थञ्च ततो वचनमुक्तवान्। १३३१५
॥ वृषाकपिरुवाच ॥ अहं हि पितरः स्रष्टुमुद्यतो लोककृत् स्वयं। तस्य चिन्तयतः सद्यः पितृकार्य्यविधीन् परान्।
दंष्ट्राभ्यां प्रविनिर्धूता ममैते दक्षिणां दिशं। आश्रिता धरणीं पिण्डास्तस्मात् पितर एव ते।
त्रयो मूर्त्तिविहीना वै पिण्डमूर्त्तिधरास्त्विमे। भवन्तु पितरो लोके मया सृष्टाः सनातनाः।
पिता पितामहश्चैव तथैव प्रपितामहः। अहमेवात्र विज्ञेयस्त्रिषु पिण्डेषु संस्थितः।
नास्ति मत्तोऽधिकः कश्चित् को वान्योऽर्च्यो मया स्वयं। को वा मम पिता लोके अहमेव पितामहः। १३३२०
पितामहपिता चैव अहमेवात्र कारणं। इत्येतदुक्त्वा वचनं देवदेवो वृषाकपिः।
वाराहपर्व्वते विप्र दत्त्वा पिण्डान् सविस्तरान्। आत्मानं पूजयित्वैव तत्रैवादर्शनं गतः।
एषा तस्य स्थितिर्व्विप्र पितरः पिण्डसंज्ञिताः। लभन्ते सततं पूजां वृषाकपिवचो यथा।
ये यजन्ति पितॄन् देवान् गुरूंश्चैवातिथींस्तथा। गाश्चैव द्विजमुख्यांश्च पृथिवीं मातरं तथा।
कर्म्मणा मनसा वाचा विष्णुमेव यजन्ति ते। अन्तर्गतः स भगवान् सर्व्वसत्त्वशरीरगः। १३३२५
समः सर्व्वेषु भूतेषु ईश्वरः सुखदुःखयोः। महान्महात्मा सर्व्वात्मा नारायण इति स्मृतः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये सप्तचत्वारिंशदधिकत्रिशततोऽध्यायः ॥ ३४७ ॥
॥ वैशम्पायन उवाच ॥ श्रुत्वैतन्नारदो वाक्यं नरनारायणेरितं। अत्यन्तं भक्तिमान्देवे ऐकान्तित्वमुपेयिवान्।
प्रोष्य वर्षसहस्रन्तु नरनारायणाश्रमे। श्रुत्वा भगवदाख्यानं दृष्ट्वा च हरिमव्ययं।
हिमवन्तं जगामाशु यत्रास्य स्वक आश्रमः। तावपि ख्याततपसौ नरनारायणावृषी।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मिन्नेवाश्रमे रम्ये तेपतुस्तप उत्तमं । त्वमप्यमितविक्रान्तः पाण्डवानां कुलोद्वह । १३५२०
पावितात्माद्य संवृत्तः श्रुत्वेमामादितः कथां । नैव तस्यापरो लोको नायं पार्थिवसत्तम ।
कर्म्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययं । मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ।
यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं हरिं । कथं नाम भवेद्द्वेष्य आत्मा लोकस्य कस्यचित् ।
आत्मा हि पुरुषव्याघ्र ज्ञेयो विष्णुरिति स्थितिः । य एष गुरुरस्माकं ऋषिर्गन्धवतीसुतः ।
तेनैतत् कथितं तात माहात्म्यं परमव्ययं । तस्माच्छ्रुतं मया चेदं कथितञ्च तवानघ । १३५२५
नारदेन तु संप्राप्तः सरहस्यः ससंग्रहः । एष धर्म्मो जगन्नाथः साक्षान्नारायणान्नृप ।
एवमेष महान् धर्म्मः स ते पूर्व्वं नृपोत्तम । कथितो हरिगीतासु समासविधिकल्पितः ।
कृष्णद्वैपायनं व्यासं विद्धि नारायणं भुवि । को ह्यन्यः पुरुषव्याघ्र महाभारतकृद्भवेत् ।
धर्म्मान्नानाविधांश्चैव को ब्रूयात्तमृते विभुं । वर्त्ततान्ते महायज्ञो यथा सङ्कल्पितस्त्वया ।
संकल्पिताश्वमेधस्त्वं श्रुतधर्म्मश्च तत्त्वतः । १३५३०
॥ सौतिरुवाच ॥ एतत्तु महदाख्यानं श्रुत्वा पार्थिवसत्तमः । ततो यज्ञसमाप्त्यर्थं क्रियाः सर्व्वाः समारभत् ।
नारायणीयमाख्यानं एतत्ते कथितं मया । पृष्टेन शौनकाद्येषु नैमिषारण्यवासिषु ।
नारदेन पुरा यद्वै गुरवे तु निवेदितं । ऋषीणां पाण्डवानाञ्च शृण्वतोः कृष्णभीष्मयोः ।
स हि परमर्षिर्जनभुवनपतिः पृथुधरणिधरः श्रुतिविनयविधिः । शमनियमविधिर्यमनियमपरो द्विजवरसहितस्तव च भवतु गतिः ।
हरिरमरहितो ह्यसुरवधकरस्तपसां निधिः सुमहतां यशसाञ्च भाजनं मधुकैटभहा । कृतधर्म्मविदां गतिदोऽभयदो मखभागहरोऽस्तु शरणं स ते । १३५३५
त्रिगुणो विगुणश्चतुरात्मधरः पूर्त्तेष्टयोश्च फलभागहरः । विदधातु नित्यमजितोऽतिबलो गतिमात्मगां सुकृतिनामृषीणां ।
तं लोकसाक्षिणमजं पुरुषं पुराणं रविवर्णमीश्वरं गतिं बहुशः । प्रणमध्वमेकमनसो यतः सलिलोद्भवोऽपि तमृषिं प्रणतः ।
स हि लोकयोनिरमृतस्य पदं सूक्ष्मं परायणमचलं हि पदं । तत् साङ्ख्ययोगिभिरुदारधृतं बुद्ध्या यतात्मभिरिदं सनातनं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये अष्टचत्वारिंशदधिकत्रिशतोऽध्यायः ॥ ३४८ ॥
॥ शौनक उवाच ॥ श्रुतं भगवतस्तस्य माहात्म्यं परमात्मनः । जन्म धर्म्मगृहे चैव नरनारायणात्मकं ।
महावराहसृष्टा च पिण्डोत्पत्तिः पुरातनी । प्रवृत्तौ च निवृत्तौ च यो यथा परिकल्पितः । १३५४०
तथा च नः श्रुतो ब्रह्मन् कथ्यमानस्त्वयानघ । यच्च तत् कथितं पूर्व्वं त्वया हयशिरो महत् ।
हव्यकव्यभुजो विष्णोरुदक्पूर्व्वे महोदधौ । तच्च दृष्टं भगवता ब्रह्मणा परमेष्ठिना ।
किन्तदुत्पादितं पूर्व्वं हरिणा लोकधारिणा । रूपं प्रभावं महतामपूर्व्वं धीमताम्वर ।
दृष्ट्वा हि विबुधश्रेष्ठमपूर्व्वममितौजसं । तदश्वशिरसं पुण्यं ब्रह्मा किमकरोन्मुने ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतन्नः संशयं ब्रह्मन् पुराणं ज्ञानसम्भवं। कथयस्वोत्तममते महापुरुषनिर्म्मितं। १२४५५
पाविताः स्म त्वया ब्रह्मन् पुण्यां कथयता कथां।
॥ सूत उवाच ॥ कथयिष्यामि ते सर्व्वं पुराणं वेदसम्मितं। जगौ यद्भगवान् व्यासो राज्ञः पारीक्षितस्य वै।
श्रुत्वाश्वशिरसो मूर्त्तिं देवस्य हरिमेधसः। उत्पन्नसंशयो राजा एतदेवमचोदयत्।
॥ जनमेजय उवाच ॥ यत्तद्दर्शितवान् ब्रह्मा देवं हयशिरोधरं। किमर्थं तत्समभवत्तन्ममाचक्ष्व सत्तम।
॥ वैशम्पायन उवाच ॥ यत्किञ्चिदिह लोके वै देहसत्त्वं विशाम्पते। सर्व्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिभिः। १२४६०
ईश्वरो हि जगत्स्रष्टा प्रभुर्न्नारायणो विराट्। भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च।
भूतप्रलयमत्यन्तं शृणुष्व नृपसत्तम। धरण्यामथ लीनायामप्सु चैकार्णवे पुरा।
ज्योतिर्भूते जले चापि लीने ज्योतिषि चानिले। वायौ चाकाशसंलीने आकाशे च मनोऽनुगे।
व्यक्ते मनसि संलीने व्यक्ते चाव्यक्ततां गते। अव्यक्ते पुरुषं याते पुंसि सर्व्वगतेऽपि च।
तम एवाभवत् सर्व्वं न प्राज्ञायत किञ्चन। तमसो ब्रह्मसम्भूतं तमो मूलामृतात्मकं। १२४६५
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमाश्रितं। सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधानं प्रचक्षते।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम। विद्यासहायवान्देवो विश्वक्सेनो हरिः प्रभुः।
अप्स्वेव शयनं चक्रे निद्रायोगमुपागतः। जगतश्चिन्तयन् सृष्टिं चित्रां बहुगुणोद्भवां।
तस्य चिन्तयतः सृष्टिं महानात्मगुणः स्मृतः। अहङ्कारस्ततो जातो ब्रह्मा स तु चतुर्मुखः।
हिरण्यगर्भो भगवान् सर्व्वलोकपितामहः। पद्मोऽनिरुद्धात् सम्भूतस्तदा पद्मनिभेक्षणः। १२४७०
सहस्रपत्रे द्युतिमानुपविष्टः सनातनः। ददृशेऽद्भुतसङ्काशो लोकानापोमयान् प्रभुः।
सत्त्वस्थः परमेष्ठी स ततो भूतगणान् सृजन्। पूर्व्वमेव च पद्मस्य पत्रे सूर्य्यांशुसप्रभे।
नारायणकृतौ विन्दू अपामास्तां गुणोत्तरौ। तावपश्यत् स भगवाननादिर्निधनोऽच्युतः।
एकस्तत्राभवद्विन्दुर्म्मध्वाभो रुचिरप्रभः। स तामसो मधुर्जातस्तदा नारायणाज्ञया।
कठिनस्त्वपरो विन्दुः कैटभो राजसस्तु सः। तावभ्यधावतां श्रेष्ठौ तमोरजोगुणान्वितौ। १२४७५
बलवन्तौ गदाहस्तौ पद्मनालानुसारिणौ। ददृशातेऽरविन्दस्थं ब्रह्माणममितप्रभं।
सृजन्तं प्रथमं वेदांश्चतुरश्चारुविग्रहान्। ततो विग्रहवन्तौ तौ वेदान् दृष्ट्वासुरोत्तमौ।
सहसा जगृहतुर्व्वेदान् ब्रह्मणः पश्यतस्तदा। अथ तौ दानवश्रेष्ठौ वेदान् गृह्य सनातनान्।
रसां विविशतुस्तूर्णमुदक्पूर्व्वे महोदधौ। ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत्।
ततो वचनमीशानं प्राह वेदैर्व्विना कृतः। १२४८०
॥ ब्रह्मोवाच ॥ वेदा मे परमं चक्षुर्व्वेदा मे परमं बलं। वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तरं।
मम वेदा हृताः सर्व्वे दानवाभ्यां बलादितः। अन्धकारा हि मे लोका जाता वेदैर्व्विनाकृताः।
वेदानृते हि किं कुर्य्यां लोकानां सृष्टिमुत्तमां। अहो वत महद्दुःखं वेदनाशनजं मम।
प्राप्तं दुनोति हृदयं तीव्रं शोकपरायणं। को हि शोकार्णवे मग्नं मामितोऽद्य समुद्धरेत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेदांस्तांस्त्वानयेन्नष्टान् कस्य चाहं प्रियो भवे। इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम । १३४८५
हरेस्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमताम्वर । ततो जगौ परं जप्यं प्राञ्जलिप्रग्रहः प्रभुः ।
॥ ब्रह्मोवाच ॥ ओं नमस्ते ब्रह्महृदय नमस्ते मम पूर्व्वज। लोकाद्य भुवनश्रेष्ठ साङ्ख्ययोगनिधे प्रभो ।
व्यक्ताव्यक्तकराचिन्त्य क्षेमं पन्थानमास्थितः। विश्वभुक् सर्व्वभूतानामन्तरात्मन्नयोनिज ।
अहं प्रसादजस्तुभ्यं लोकधाम स्वयम्भुवः। त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितं ।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनं । त्वत्प्रसादात्तु मे जन्म द्वितीयं वाचिकं महत् । १३४९०
त्वत्तः श्रवणजञ्चापि चतुर्थं जन्म मे विभो । नासत्यञ्चापि मे जन्म त्वत्तः परममुच्यते ।
अण्डजञ्चापि मे जन्म त्वत्तःषष्ठं विनिर्म्मितं। इदञ्च सप्तमं जन्म पद्मजन्मेति वै विभो।
सर्गे सर्गे ह्यहं पुत्त्रस्तव त्रिगुणवर्ज्जितः । प्रथमः पुण्डरीकाक्ष प्रधानगुणकल्पितः ।
त्वमीश्वरस्वभावश्च कर्म्मबन्धः स्वयम्भुवः । त्वया विनिर्म्मितोऽहं वै वेदचक्षुर्व्वयोऽतिगः ।
ते मे वेदाहृताश्चक्षुरन्धो जातोऽस्मि जागृहि । ददस्व चक्षूंषि मम प्रियोऽहं ते प्रियोऽसि मे। १३४९५
एवं स्तुतः स भगवान् पुरुषः सर्व्वतोमुखः। जहौ निद्रामथ तदा वेदकार्य्यार्थमुद्यतः।
ऐश्वर्य्येण प्रयोगेण द्वितीयान्तनुमास्थितः। सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा।
कृत्वा हयशिरः शुभ्रं वेदानामालयः प्रभुः । तस्य मूर्द्धा समभवद्द्यौः सनक्षत्रतारका ।
केशाश्चास्याभवन्दीर्घा रवेरंशुसमप्रभाः। कर्णावाकाशपातालो ललाटं भूतधारिणी ।
गङ्गा सरस्वती श्रोण्यौ भ्रुवावास्तां महोदधी। चक्षुषी सोमसूर्य्यौ ते नासा सन्ध्या पुनः स्मृता। १३५००
ओंकारस्त्वथ संस्कारो विद्युज्जिह्वा च निर्म्मिता। दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः। ग्रीवा चास्याभवद्राजन् कालरात्रिर्गुणोत्तरा।
एतद्धयशिरः कृत्वा नानामूर्त्तिभिरावृतं। अन्तर्द्दधौ स विश्वेशो विवेश च रसां प्रभुः।
रसां पुनः प्रविष्टश्च योगं परममास्थितः। शैक्ष्यं स्वरं समास्थाय उद्गीतं प्रासृजत् स्वरं ।
सस्वरः सानुनादी च सर्व्वशः स्निग्ध एव च। बभूवान्तर्महीभूतः सर्व्वभूतगुणो हितः। १३५०५
ततस्तावसुरौ कृत्वा वेदान् समयबन्धनान्। रसातले विनिक्षिप्य यतः शब्दस्ततो द्रुतौ।
एतस्मिन्नन्तरे राजन् देवो हयशिरोधरः। जग्राह वेदानखिलान् रसातलगतो हरिः।
प्रादाच्च ब्रह्मणे भूयस्ततः स्वां प्रकृतिङ्गतः। स्थापयित्वा हयशिर उदक्पूर्व्वे महोदधौ।
वेदानामालयश्चापि बभूवाश्वशिरास्ततः। अथ किञ्चिदपश्यन्तौ दानवौ मधुकैटभौ।
पुनराजग्मतुस्तत्र वेगितौ पश्यतां च तौ। यत्र वेदा विनिक्षिप्तास्तत् स्थानं शून्यमेव च। १३५१०
तत उत्तममास्थाय वेगं बलवताम्वरौ। पुनरुत्तस्थतुः शीघ्रं रसानामालयात्तदा।
ददृशाते च पुरुषं तमेवादिकरं प्रभुं। श्वेतं चन्द्रविशुद्धाभमनिरुद्धतनौ स्थितं।
भूयोऽप्यमितविक्रान्तं निद्रायोगमुपागतं। आत्मप्रमाणरचिते अपामुपरि कल्पिते।
शयने नागभोगाढ्ये ज्वालामालासमावृते। निष्कल्मषेण सत्त्वेन सम्पन्नं रुचिरप्रभं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तं दृष्ट्वा दानवेन्द्रौ तौ महाहासममुञ्चतां । ऊचतुश्च समाविष्टौ रजसा तमसा च तौ । १२५१५
अयं स पुरुषः श्वेतः शेते निद्रामुपागतः । अनेन नूनं वेदानां कृतमाहरणं रसात् ।
कस्यैष को नु खल्वेष किञ्च स्वपिति भोगवान् । इत्युच्चारितवाक्यौ तौ बोधयामासतुर्हरिं ।
युद्धार्थिनौ हि विज्ञाय विबुद्धः पुरुषोत्तमः । निरीक्ष्य चासुरेन्द्रौ तौ ततो युद्धे मनो दधे ।
अथ युद्धं समभवत्तयोर्नारायणस्य वै । रजस्तमोविष्टतनू तावुभौ मधुकैटभौ ।
ब्रह्मणोपचितिं कुर्व्वन् जघान मधुसूदनः । ततस्तयोर्व्वधेनाशु वेदापहरणेन च । १२५२०
शोकापनयनञ्चक्रे ब्रह्मणः पुरुषोत्तमः । ततः परिवृतो ब्रह्मा हरिणा वेदसत्कृतः ।
निर्म्ममे स तदा लोकान् कृत्स्नान् स्थावरजङ्गमान् । दत्त्वा पितामहायाग्र्यां मतिं लोकविसर्गिणीं ।
तत्रैवान्तर्द्दधे देवो यत एवागतो हरिः । तौ दानवौ हरिर्हत्वा कृत्वा हयशिरस्तनुं ।
पुनः प्रवृत्तिं धर्म्मार्थं तामेव विदधे तनुं । एवमेव महाभागो बभूवाश्वशिरा हरिः ।
पौराणमेतत् प्रख्यातं रूपं वरदमैश्वरं । यो ह्येतद्ब्राह्मणो नित्यं शृणुयाद्धारयीत वा । १२५२५
न तस्याध्ययनं नाशमुपगच्छेत् कदाचन । आराध्य तपसोग्रेण देवं हयशिरोधरं ।
पञ्चालेन क्रमः प्राप्तो देवेन पथि देशिते । एतद्धयशिरो राजन्नाख्यानन्तव कीर्त्तितं ।
पुराणं वेदसमितं यन्मां त्वं परिपृच्छसि । यां यामिच्छेत्तनुं देवः कर्त्तुं कार्य्यविधौ क्वचित् ।
तां तां कुर्य्याद्धि कुर्व्वाणः स्वयमात्मानमात्मना । एष वेदनिधिः श्रीमानेष वै तपसो निधिः ।
एष योगश्च साङ्ख्यञ्च ब्रह्म चाग्र्यं हरिर्व्विभुः । नारायणपरा वेदा यज्ञा नारायणात्मकाः । १२५३०
तपो नारायणपरं नारायणपरा गतिः । नारायणपरं सत्यमृतं नारायणात्मकं ।
नारायणपरो धर्म्मः पुनरावृत्तिदुर्लभः । प्रवृत्तिलक्षणश्चैव धर्म्मो नारायणात्मकः ।
नारायणात्मको गन्धो भूमौ श्रेष्ठतमः स्मृतः । अपाञ्चापि गुणा राजन् रसा नारायणात्मकाः ।
ज्योतिषाञ्च परं रूपं स्मृतं नारायणात्मकं । नारायणात्मकश्चापि स्पर्शो वायुगुणः स्मृतः ।
नारायणात्मकश्चैव शब्द आकाशसम्भवः । मनश्चापि ततो भूतमव्यक्तगुणलक्षणं । १२५३५
नारायणपरः कालो ज्योतिषामयनञ्च यत् । नारायणपरा कीर्त्तिः श्रीश्च लक्ष्मीश्च देवता ।
नारायणपरं साङ्ख्यं योगो नारायणात्मकः । कारणं पुरुषो ह्येषां प्रधानञ्चापि कारणं ।
स्वभावश्चैव कर्म्माणि दैवं येषाञ्च कारणं । अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधं ।
विविधा च तथा चेष्टा दैवञ्चैवात्र पञ्चमं । पञ्चकारणसंख्यातो निष्ठा सर्व्वत्र वै हरिः ।
तत्त्वं जिज्ञासमानानां हेतुभिः सर्व्वतोमुखैः । तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः । १२५४०
ब्रह्मादीनां सलोकानां ऋषीणाञ्च महात्मनां । साङ्ख्यानां योगिनाञ्चापि यतीनामात्मवेदिनां ।
मनीषितं विजानाति केशवो न तु तस्य ते । ये केचित् सर्व्वलोकेषु दैवं पित्र्यञ्च कुर्व्वते ।
दानानि च प्रयच्छन्ति तप्यते च तपो महत् । सर्व्वेषामाश्रयो विष्णुरैश्वरं विधिमास्थितः ।
सर्व्वभूतकृतावासो वासुदेवेति चोच्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अयं हि नित्यः परमो महर्षिर्म्महाविभूतिर्गुणवर्ज्जिताख्यः । गुणैश्च संयोगमुपैति शीघ्रं कालो यथर्त्तावृतुसंप्रयुक्तः । १२५४५
नैवास्य विन्दन्ति गतिं महात्मनो न चागतिं कश्चिदिहानुपश्यति । ज्ञानात्मकाः सन्ति हि ये महर्षयः पश्यन्ति नित्यं पुरुषं गुणाधिकं ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये ऊनपञ्चाशदधिकत्रिशतोऽध्यायः ॥ ३४९ ॥

॥ जनमेजय उवाच ॥ अहो ह्येकान्तिनः सर्व्वान् प्रीणाति भगवान् हरिः । विधिप्रयुक्तां पूजाञ्च गृह्णाति भगवान् स्वयं ।

ये तु दग्धेन्धना लोके पुण्यपापविवर्ज्जिताः । तेषां त्वयाभिनिर्द्दिष्टा पारम्पर्य्यागता गतिः ।
चतुर्थ्याञ्चैव ते गत्यां गच्छन्ति पुरुषोत्तमं । एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदं ।
नूनमेकान्तधर्म्मोऽयं श्रेष्ठो नारायणप्रियः । अगत्वा गतयस्तिस्रो नियच्छन्त्यव्ययं हरिं । १२५५०
सहोपनिषदान् वेदान् ये विप्राः सम्यगास्थिताः । पठन्ति विधिमास्थाय ये चापि यतिधर्म्मिणः ।
तेभ्यो विशिष्टं जानामि गतिमेकान्तिनां नृणां । केनैष धर्म्मः कथितो देवेन ऋषिणापि वा ।
एकान्तिनाञ्च का चर्य्या कदाचोत्पादिता विभो । एतन्मे संशयं छिन्धि परं कौतूहलं हि मे ।
॥ वैशम्पायन उवाच ॥ समुपोढेष्वनीकेषु कुरुपाण्डवयोर्म्मृधे । अर्ज्जुने विमनस्के च गीता भगवता स्वयं ।
आगतिश्च गतिश्चैव पूर्व्वन्ते कथिता मया । गहनो ह्येष धर्म्मो वै दुर्व्विज्ञेयोऽकृतात्मभिः । १२५५५
सम्मितः सामवेदेन पुरैवादियुगे कृतः । धार्य्यते स्वयमीशेन राजन्नारायणेन च ।
एतदर्थं महाराज पृष्टः पार्थेन नारदः । ऋषिमध्ये महाभागः शृण्वतोः कृष्णभीष्मयोः ।
गुरुणा च ममाप्येष कथितो नृपसत्तम । यथा तत् कथितं तत्र नारदेन तथा शृणु ।
यदासीन्मानसं जन्म नारायणमुखोद्गतं । ब्रह्मणः पृथिवीपाल तदा नारायणः स्वयं ।
तेन धर्म्मेण कृतवान् दैवं पित्र्यञ्च भारत । फेनपा ऋषयश्चैव तं धर्म्मं प्रतिपेदिरे । १२५६०
वैखानसाः फेनपेभ्यो धर्म्ममेतंप्रपेदिरे । वैखानसेभ्यः सोमस्तु ततः सोऽन्तर्द्दधे पुनः ।
यदासीच्चाक्षुषं जन्म द्वितीयं ब्रह्मणो नृप । तदा पितामहेनैव सोमाद्धर्म्मः परिश्रुतः ।
नारायणात्मको राजन् रुद्राय प्रददौ च तं । ततो योगस्थितो रुद्रः पुरा कृतयुगे नृप ।
बालखिल्यानृषीन् सर्व्वान् धर्म्ममेतदपादयत् । अन्तर्द्दधे ततो भूयस्तस्य देवस्य मायया ।
तृतीयं ब्रह्मणो जन्म यदासीद्वाचिकं महत् । तत्रैव धर्म्मः सम्भूतः स्वयं नारायणान्नृप । १२५६५
सुपर्णो नाम तमृषिः प्राप्तवान् पुरुषोत्तमात् । तपसा वै सुतप्तेन दमेन नियमेन च ।
त्रिःपरिक्रान्तवानेतत् सुपर्णो धर्म्ममुत्तमं । यस्मात्तस्माद्व्रतं ह्येतत्त्रिसौपर्णमिहोच्यते ।
ऋग्वेदपाठपठितं व्रतमेतद्धि दुश्चरं । सुपर्णाच्चाप्यधिगतो धर्म्म एव सनातनः ।
वायुना द्विपदां श्रेष्ठ कथितो जगदायुषा । वायोः सकाशात् प्राप्तश्च ऋषिभिर्व्विघसाशिभिः ।
ततो महोदधिश्चैव प्राप्तवान् धर्म्ममुत्तमं । अन्तर्द्दधे ततो भूयो नारायणसमाहितः । १२५७०
यदा भूयः श्रवणजा सृष्टिरासीन्महात्मनः । ब्रह्मणः पुरुषव्याघ्र तत्र कीर्त्तयतः शृणु ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एष ते कथितो धर्म्मः सात्वतः कुरुनन्दन। कुरुष्वैनं यथान्यायं यदि शक्तोऽसि भारत।
एवं हि स महाभागो नारदो गुरवे मम। श्वेतानां यतिनामाह एकान्तगतिमव्ययां।
व्यासश्चाकथयत् प्रीत्या धर्म्मपुत्राय धीमते। स एवायं मया तुभ्यमाख्यातः प्रसृतो गुरोः।
इत्थं हि दुश्चरो धर्म्म एष पार्थिवसत्तम। यथैव त्वं तथैवान्ये भवन्तीह विमोहिताः। १२३३५
कृष्ण एव हि लोकानां भावनो मोहनस्तथा। संहारकारकश्चैव कारणञ्च विशाम्पते।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्यैकान्तिभावे पञ्चाशदधिकत्रिशतोऽध्यायः॥ ३५०॥
॥ जनमेजय उवाच ॥ साङ्ख्ययोगं पञ्चरात्रं वेदारण्यकमेव च। ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचरन्ति हि।
किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने। प्रब्रूहि वै मया पृष्टः प्रवृत्तिञ्च यथाक्रमं।
॥ वैशम्पायन उवाच ॥ जज्ञे बह्वज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्मयोगात्। पराशरात् सत्यवती महर्षिं तस्मै नमोऽज्ञा
नतमोनुदाय।
पितामहाद्यं प्रवदन्ति षष्ठं महर्षिमार्षेयविभूतियुक्तं। नारायणस्यांशजमेकपुत्त्रं द्वैपायनं वेदमहानिधानं। १२३४०
तमादिकालेषु महाविभूतिर्नारायणो ब्रह्ममहानिधानं। ससर्ज्ज पुत्त्रार्थमुदारतेजा व्यासं महात्मानमजं पुराणं।
॥ जनमेजय उवाच ॥ त्वयैव कथितः पूर्व्वं सम्भवो द्विजसत्तम। वशिष्ठस्य सुतः शक्तिः शक्तिपुत्त्रः पराशरः।
पराशरस्य दायादः कृष्णद्वैपायनो मुनिः। भूयो नारायणसुतं त्वमेवैनं प्रभाषसे।
किमतः पूर्व्वजं जन्म व्यासस्यामिततेजसः। कथयस्वोत्तममते जन्म नारायणोद्भवं।
॥ वैशम्पायन उवाच ॥ वेदार्थान् वेत्तुकामस्य धर्म्मिष्ठस्य तपोनिधेः। गुरोर्म्मे ज्ञाननिष्ठस्य हिमवत्पाद आसतः। १२३४५
कृत्वा भारतमाख्यानं तपःश्रान्तस्य धीमतः। शुश्रूषान्तत्परा राजन् कृतवन्तो वयं तदा।
सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः। अहञ्च तुर्थः शिष्यो वै शुको व्यासात्मजस्तथा।
एभिः परिवृतो व्यासः शिष्यैः पञ्चभिरुत्तमैः। शुशुभे हिमवत्पादे भूतैर्भूतपतिर्यथा।
वेदानावर्त्तयन् साङ्गान् भारतार्थांश्च सर्व्वशः। तमेकमनसं दान्तं युक्ता वयमुपास्महे।
कथान्तरेऽथ कस्मिंश्चित् पृष्टोऽस्माभिर्द्विजोत्तमः। वेदार्थान् भारतार्थांश्च जन्म नारायणात्तथा। १२३५०
स पूर्व्वमुक्त्वा वेदार्थान् भारतार्थांश्च तत्त्ववित्। नारायणादिदं जन्म व्याहर्त्तुमुपचक्रमे।
॥ व्यास उवाच ॥ शृणुध्वमाख्यानवरमिदमार्षेयमुत्तमं। आदिकालोद्भवं विप्रास्तपसाधिगतं मया।
प्राप्ते प्रजाविसर्गे वै सप्तमे पद्मसम्भवे। नारायणो महायोगी शुभाशुभविवर्ज्जितः।
ससृजे नाभितः पूर्व्वं ब्रह्माणममितप्रभः। ततः स प्रादुरभवदथैनं वाक्यमब्रवीत्।
मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः। सृज प्रजास्त्वं विविधा ब्रह्मन् सजडपण्डिताः। १२३५५
स एवमुक्तो विमुखश्चिन्ताव्याकुलमानसः। प्रणम्य वरदं देवमुवाच हरिमीश्वरं।
का शक्तिर्म्मम देवेश प्रजाः स्रष्टुं नमोऽस्तु ते। अप्रज्ञावानहं देव विधत्स्व यदनन्तरं।
स एवमुक्तो भगवान् भूत्वाथान्तर्हितस्ततः। चिन्तयामास देवेशो बुद्धिं बुद्धिमताम्वरः।
स्वरूपिणी ततो बुद्धिरुपतस्थे हरिं प्रभुं। योगेन चैनां निर्योगः स्वयं नियुयुजे तदा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सतामैश्वर्य्ययोगस्थां बुद्धिं गतिमतीं सतीं। उवाच वचनं देवो बुद्धिं वै प्रभुरव्ययः। १२६६०
ब्रह्माणं प्रविशस्वेति लोकसृष्ट्यर्थसिद्धये। ततस्तमीश्वरादिष्टा बुद्धिः क्षिप्रं विवेश सा।
अथैनं बुद्धिसंयुक्तं पुनः स ददृशे हरिः। भूयश्चैव वचः प्राह सृजेमा विविधाः प्रजाः।
बाढमित्येव कृत्वासौ यथाज्ञां शिरसा हरेः। एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत।
प्राप चैनं मुहूर्त्तेन स्वस्थानं देवसंज्ञितं। तां चैव प्रकृतिं प्राप्य एकीभावगतोऽभवत्।
अथास्य बुद्धिरभवत् पुनरन्या तदा किल। सृष्टाः प्रजा इमाः सर्व्वा ब्रह्मणा परमेष्ठिना। १२६६५
दैत्यदानवगन्धर्व्वरक्षोगणसमाकुला। जाता हीयं वसुमती भाराक्रान्ता तपस्विनी।
बहवो बलिनः पृथ्व्यां दैत्यदानवराक्षसाः। भविष्यन्ति तपोयुक्ता वरान् प्राप्स्यन्ति चोत्तमान्।
अवश्यमेव तैः सर्व्वैर्वरदानेन दर्पितैः। बाधितव्याः सुरगणा ऋषयश्च तपोधनाः।
तत्र न्याय्यमिदं कर्त्तुं भारावतरणं मया। अथ नानासमुद्भूतैर्व्वसुधायां यथाक्रमं।
निग्रहेण च पापानां साधूनां प्रग्रहेण च। इयं तपस्विनी सत्या धारयिष्यति मेदिनी। १२६७०
मया ह्येषा हि ध्रियते पातालस्थेन भोगिना। मया धृता धारयति जगद्विश्वं चराचरं।
तस्मात् पृथ्व्याः परित्राणं करिष्ये सम्भवं गतः। एवं सञ्चिन्तयित्वा तु भगवान् मधुसूदनः।
रूपाण्यनेकान्यसृजत् प्रादुर्भावे भवाय सः। वाराहं नारसिंहञ्च वामनं मानुषं तथा।
एभिर्म्मया निहन्तव्या दुर्व्विनीताः सुरारयः। अथ भूयो जगत्स्रष्टा भोः शब्देनानुवादयन्।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत्। अपान्तरतमा नाम सुतो वाक्सम्भवः प्रभुः। १२६७५
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः। तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः।
वेदाख्याने श्रुतिः कार्य्या त्वया मतिमताम्बर। तस्मात् कुरु यथाज्ञप्तं ममैतद्वचनं मुने।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे। ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा।
तपसा च सुतप्तेन यमेन नियमेन च। मन्वन्तरेषु पुत्त्रत्वमेवमेवं प्रवर्त्तकः।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः। पुनस्तिष्ये च सम्प्राप्ते कुरवो नाम भारताः। १२६८०
भविष्यन्ति महात्मानो राजानः प्रथिता भुवि। तेषां त्वत्तः प्रसूतानां कुलभेदो भविष्यति।
परस्परविनाशार्थं त्वामृते द्विजसत्तम। तत्राप्यनेकधा वेदान् भेत्स्यसे तपसान्वितः।
कृष्णे युगे च सम्प्राप्ते कृष्णवर्णो भविष्यसि। धर्म्माणां विविधानाञ्च कर्त्ता ज्ञानकरस्तथा।
भविष्यसि तपोयुक्तो न च रागाद्विमोक्ष्यसे। वीतरागश्च पुत्त्रस्ते परमात्मा भविष्यति।
महेश्वरप्रसादेन नैतद्वचनमन्यथा। १२६८५
यं मानसं वै प्रवदन्ति विप्राः पितामहस्योत्तमबुद्धियुक्तं। वशिष्ठमग्र्यञ्च तपोनिधानं यस्यातिसूर्य्यं व्यतिरिच्यते भाः।
तस्यान्वये चापि ततो महर्षिः पराशरो नाम महाप्रभावः। पिता स ते वेदनिधिर्व्वरिष्ठो महातपा वै तपसो निवासः।
कानीनगर्भः पितृकन्यकायां तस्मादृषेस्त्वं भविता च पुत्त्रः।
भूतभव्यभविष्याणां छिन्नसर्व्वार्थसंशयः। ये ह्यतिक्रान्तकाः पूर्व्वं सहस्रयुगपर्य्ययाः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तांश्च सर्व्वान्मयोद्दिष्टान् द्रक्ष्यसे तपसान्वितः । पुनर्द्रक्ष्यसि चानेकसहस्रयुगपर्य्ययान् । १२६९०
अनादिनिधनं लोके चक्रहस्तञ्च मां मुने । अनुध्यानान्मम मुने नैतद्वचनमन्यथा ।
भविष्यति महासत्त्व ख्यातिश्चाप्यतुला तव । शनैश्चरः सूर्य्यपुत्रो भविष्यति मनोर्महान् ।
तस्मिन्मन्वन्तरे चैव मन्वादिगणपूर्व्वकः । त्वमेव भविता वत्स मत्प्रसादान्न संशयः ।
यत्किञ्चिद्विद्यते लोके सर्व्वन्तन्मद्विचेष्टितं । अन्यो ह्यन्यं चिन्तयति स्वच्छन्दं विदधाम्यहं ।
एवं सारस्वतमृषिमपान्तरतमन्तथा । उक्त्वा वचनमीशानः साधयस्वेतदाब्रवीत् । १२६९५
सोऽहं तस्य प्रसादेन देवस्य हरिमेधसः । अपान्तरतमा नाम ततो जातोऽज्ञया हरेः ।
पुनश्च जातो विख्यातो वशिष्ठकुलनन्दनः । तदेतत् कथितं जन्म मया पूर्व्वकमात्मनः ।
नारायणप्रसादेन तथा नारायणांशजं । मया हि सुमहत्तप्तं तपः परमदारुणं ।
पुरा मतिमतां श्रेष्ठाः परमेण समाधिना । एतद्वः कथितं सर्व्वं यन्मां पृच्छत पुत्रकाः ।
पूर्व्वजन्म भविष्यच्च भक्तानां स्नेहतो मया । १२७००

॥ वैशम्पायन उवाच ॥ एष ते कथितः पूर्व्वं सम्भवोऽस्मद्गुरोर्नृप । व्यासस्याक्लिष्टमनसो यथा पृष्टः पुनः शृणु ।
साङ्ख्यं योगं पञ्चरात्रं वेदाः पाशुपतन्तथा । ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।
साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते । हिरण्यगर्भो लोकस्य वेत्ता नान्यः पुरातनः ।
अपान्तरतमाश्चैव वेदाचार्य्यः स उच्यते । प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन ।
उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः । उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः । १२७०५
पञ्चरात्रस्य कृत्स्नस्य वेत्ता तु भगवान् स्वयं । सर्व्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ।
यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः । नचैनमेवं जानन्ति तमोभूता विशाम्पते ।
तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः । निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम ।
निःसंशयेषु सर्व्वेषु नित्यं वसति वै हरिः । ससंशयान् हेतुबलान्नाध्यावसति माधवः ।
पञ्चरात्रविदो ये तु यथाक्रमपरा नृप । एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै । १२७१०
साङ्ख्यञ्च योगञ्च सनातने द्वे वेदाश्च सर्व्वे निखिलेन राजन् । सर्व्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणं ।
शुभाशुभं कर्म्म समीरितं यत् प्रवर्त्तते सर्व्वलोकेषु किञ्चित् । तस्मादृषेस्तद्भवतीति विद्याद्दिव्यन्तरीक्षे भुवि चाप्सु चेति ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्मपर्व्वणि नारायणीये द्वैपायनोत्पत्तौ एकपञ्चाशदधिकत्रिशतोऽध्यायः ॥ ३५१ ॥

॥ जनमेजय उवाच ॥ बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु । को ह्यत्र पुरुषः श्रेष्ठः को वा योनिरिहोच्यते ।
॥ वैशम्पायन उवाच ॥ बहवः पुरुषा लोके साङ्ख्ययोगविचारणे । नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।
बहूनां पुरुषाणाञ्च यथैका योनिरुच्यते । तथा तं पुरुषं विश्वं व्याख्यास्यामि गुणाधिकं । १२७१५
नमस्कृत्वा च गुरवे व्यासाय विदितात्मने । तपोयुक्ताय दान्ताय वन्द्याय परमर्षये ।
इदं पुरुषसूक्तं हि सर्व्ववेदेषु पार्थिव । ऋतं सत्यञ्च विख्यातमृषिसिंहेन चिन्तितं ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalgaon

उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः। अध्यात्मचिन्तामाश्रित्य शास्त्राण्युक्तानि भारत।
समासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान्। तत्तेऽहं सम्प्रवक्ष्यामि प्रसादादमितौजसः।
अत्राप्युदाहरन्तीममितिहासं पुरातनं। ब्रह्मणा सह संवादं त्र्यम्बकस्य विशाम्पते। १२७२०
क्षीरोदस्य समुद्रस्य मध्ये हाटकसप्रभः। वैजयन्त इति ख्यातः पर्व्वतः प्रवरो नृप।
तत्राध्यात्मगतिं देव एकाकी प्रविचिन्तयन्। वैराजसदनान्नित्यं वैजयन्तं निषेवते।
अथ तत्रासतस्तस्य चतुर्व्वक्त्रस्य धीमतः। ललाटप्रभवः पुत्त्रः शिव आगाद्यदृच्छया।
आकाशेन महायोगी पुरा त्रिनयनः प्रभुः। ततः खान्निपपाताशु धरणीधरमूर्द्धनि।
अग्रतश्चाभवत् प्रीतो ववन्दे चापि पादयोः। तं पादयोर्निपतितं दृष्ट्वा सव्येन पाणिना। १२७२५
उत्थापयामास तदा प्रभुरेकः प्रजापतिः। उवाच चैनं भगवांश्चिरस्यागतमात्मजं।
॥ पितामह उवाच ॥ स्वागतन्ते महाबाहो दिष्ट्या प्राप्तोऽसि मेऽन्तिकं। कच्चित्ते कुशलं पुत्त्र स्वाध्यायतपसोः सदा।
नित्यमुग्रतपास्त्वं हि ततः पृच्छामि ते पुनः।
॥ रुद्र उवाच ॥ त्वत्प्रसादेन भगवन् स्वाध्यायतपसोर्मम। कुशलञ्चाव्ययञ्चैव सर्व्वस्य जगतस्तथ।
चिरदृष्टो हि भगवान् वैराजसदने मया। ततोऽहं पर्व्वतं प्राप्तस्त्विमं त्वत्पादसेवितं। १२७३०
कौतूहलञ्चापि हि मे एकान्तगमनेन ते। नैतत् कारणमल्पं हि भविष्यति पितामह।
किन्तु तत् सदनं श्रेष्ठं क्षुत्पिपासाविवर्ज्जितं। सुरासुरैरध्युषितं ऋषिभिश्चामितप्रभैः।
गन्धर्व्वैरप्सरोभिश्च सततं सन्निषेवितं। उत्सृज्येमं गिरिवरमेकाकी प्राप्तवानसि।
॥ ब्रह्मोवाच ॥ वैजयन्तो गिरिवरः सततं सेव्यते मया। अत्रैकाग्रेण मनसा पुरुषश्चिन्त्यते विराट्।
॥ रुद्र उवाच ॥ बहवः पुरुषाः ब्रह्मंस्त्वया सृष्टाः स्वयम्भुवा। सृज्यन्ते चापरे ब्रह्मन् स चैकः पुरुषो विराट्। १२७३५
को ह्यसौ चिन्त्यते ब्रह्मंस्त्वयैकः पुरुषोत्तमः। एतन्मे संशयं ब्रूहि महत् कौतूहलं हि मे।
॥ ब्रह्मोवाच ॥ बहवः पुरुषाः पुत्त्र ये त्वया समुदाहृताः। एवमेतदतिक्रान्तं द्रष्टव्यं नैवमित्यपि।
आधारन्तु प्रवक्ष्यामि एकस्य पुरुषस्य ते। बहूनां पुरुषाणां स यथैका योनिरुच्यते।
तथा तं पुरुषं विश्वं परमं सुमहत्तमं। निर्गुणं निर्गुणा भूत्वा प्रविशन्ति सनातनं।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये द्विपञ्चाशदधिकत्रिशततोऽध्यायः ॥ ३५२ ॥
॥ ब्रह्मोवाच ॥ शृणु पुत्त्र यथा ह्येष पुरुषः शाश्वतोऽव्ययः। अक्षयश्चाप्रमेयश्च सर्व्वगश्च निरुच्यते। १२७४०
न स शक्यस्त्वया द्रष्टुं मयान्यैर्व्वापि सत्तम। सगुणैर्निर्गुणैर्व्विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः।
अशरीरः शरीरेषु सर्व्वेषु निवसत्यसौ। वसन्नपि शरीरेषु न स लिप्यति कर्म्मभिः।
ममान्तरात्मा तव च ये चान्ये देहसंज्ञिताः। सर्व्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्।
विश्वमूर्द्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखं।
क्षेत्राणि हि शरीराणि वीजञ्चापि शुभाशुभं। तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते। १२७४५
नागतिर्न गतिस्तस्य ज्ञेया भूतेषु केनचित्। साङ्ख्येन विधिना चैव योगेन च यथाक्रमं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चिन्तयामि गतिञ्चास्य न गतिं वेद्मि चोत्तरां । यथाज्ञानन्तु वक्ष्यामि पुरुषन्तु सनातनं ।
तस्यैकत्वं महत्त्वञ्च स चैकः पुरुषः स्मृतः । महापुरुषशब्दं स बिभर्त्त्येकः सनातनः ।
एको हुताशो बहुधा समिध्यते एकः सूर्य्यस्तपसो योनिरेका । एको वायुर्ब्बहुधा वाति लोके महोदधिश्चाम्भसां योनिरेकः ।
पुरुषश्चैको निर्गुणो विश्वरूपस्तं निर्गुणं पुरुषञ्चाविशन्ति । १२७५०
हित्वा गुणमयं सर्व्वं कर्म्म हित्वा शुभाशुभं । उभे सत्यानृते त्यक्त्वा एवं भवति निर्गुणः ।
अचिन्त्यञ्चापि तं ज्ञात्वा भावसूक्ष्मञ्चतुष्टयं । विचरेद्योऽसमुन्नद्धः स गच्छेत् पुरुषं शुभं ।
एवं हि परमात्मानं केचिदिच्छन्ति पण्डिताः । एकात्मानं तथात्मानमपरे ज्ञानचिन्तकाः ।
तत्र यः परमात्मा हि स नित्यं निर्गुणः स्मृतः । स हि नारायणो ज्ञेयः सर्व्वात्मा पुरुषो हि सः ।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा । कर्म्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते । १२७५५
स सप्तदशकेनापि राशिना युज्यते हि सः । एवं बहुविधः प्रोक्तः पुरुषस्ते यथाक्रमं ।
यत्तत् कृत्स्नं लोकतन्त्रस्य धाम वेद्यं परं बोधनीयः स बोद्धा । मन्ता मन्तव्यं प्राशिता प्राशनीयं द्रष्टा द्रष्टव्यं रसिता रसनीयं ।
घ्राता घ्रेयं स्पर्शिता स्पर्शनीयं द्रष्टा द्रष्टव्यं श्राविता श्रावणीयं । ज्ञाता ज्ञेयं सगुणं निर्गुणञ्च यद्वै प्रोक्तं तात सम्यक् प्रधानं ।
नित्यञ्चैतच्छाश्वतञ्चाव्ययञ्च यद्वै सूते धातुराद्यं विधानं । तद्वै विप्राः प्रवदन्तेऽनिरुद्धं यद्वै लोके वैदिकं कर्म्म साधु ।
आशीर्युक्तं तद्धि तस्यैव भाव्यं देवाः सर्व्वे मुनयः साधुशान्तास्तं प्राग्वंशे यज्ञभागं यजन्ते । १२७६०
अहं ब्रह्मा आद्य ईशः प्रजानां तस्माज्जातस्त्वञ्च मत्तः प्रसूतः । मत्तो जगज्जङ्गमं स्थावरञ्च सर्व्वेवेदाः सरहस्या हि पुत्र ।
चतुर्व्विभक्तः पुरुषः स क्रीडति यथेच्छति । एवं स भगवान् स्वेन ज्ञानेन प्रतिबोधितः ।
एतत्ते कथितं पुत्र यथावदनुपृच्छतः । साङ्ख्यज्ञाने तथायोगे यथावदनुवर्णितं ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि नारायणीये त्रिपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५३ ॥
॥ युधिष्ठिर उवाच ॥ धर्म्माः पितामहेनोक्ता मोक्षधर्म्माश्रिताः शुभाः । धर्म्ममाश्रमिणां श्रेष्ठं वक्तुमर्हति मे भवान् ।
॥ भीष्म उवाच ॥ सर्व्वत्र विहितो धर्म्मः स्वर्ग्यः सत्यफलं महत् । बहुद्वारस्य धर्म्मस्य नेहास्ति विफला क्रिया । १२७६५
यस्मिन् यस्मिंश्च विषये यो यो याति विनिश्चितं । स तमेवाभिजानाति नान्यं भरतसत्तम ।
इमाञ्च त्वं नरव्याघ्र श्रोतुमिच्छसि मे कथां । पुरा शक्रस्य कथितां नारदेन महर्षिणा ।
महर्षिर्नारदो राजन् सिद्धस्त्रैलोक्यसम्मतः । पर्य्येति क्रमशो लोकान् वायुरव्याहतो यथा ।
स कदाचिन्महेष्वास देवराजालयङ्गतः । सत्कृतश्च महेन्द्रेण प्रत्यासन्नगतोऽभवत् ।
तं कृतक्षणमासीनं पर्य्यपृच्छच्छचीपतिः । महर्षे किञ्चिदाश्चर्य्यमस्ति दृष्टं त्वयानघ । १२७७०
यद्वा त्वमपि विप्रर्षे त्रैलोक्यं सचराचरं । जातकौतूहलो नित्यं सिद्धश्चरसि साक्षिवत् ।
न ह्यस्त्यविदितं लोके देवर्षे तव किञ्चन । श्रुतं वाप्यनुभूतं वा दृष्टं वा कथयस्व मे ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मै राजन् सुरेन्द्राय नारदो वदताम्वरः । आसीनायोपपन्नाय प्रोक्तवान् विपुलां कथां ।
यथा येन च कल्पेन स तस्मै द्विजसत्तमः । कथां कथितवान् पृष्टस्तया त्वमपि मे शृणु ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने चतुःपञ्चाशदधिकत्रिशतोऽध्यायः ॥ ३५४ ॥

॥ भीष्म उवाच ॥ आसीत् किल नरश्रेष्ठ महापद्मे पुरोत्तमे । गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः । १२०७५
सौम्यः सोमान्वये वेदे गताध्वा छिन्नसंशयः । धर्म्मनित्यो जितक्रोधो नित्यतृप्तो जितेन्द्रियः ।
तपःस्वाध्यायनिरतः सत्यः सज्जनसम्मतः । न्यायप्राप्तेन वित्तेन स्वेन शीलेन चान्वितः ।
ज्ञातिसम्बन्धिविपुले सत्त्वाद्याश्रमसम्मिते । कुले महति विख्याते विशिष्टां वृत्तिमास्थितः ।
स पुत्त्रान् बहुलान् दृष्ट्वा विपुले कर्म्मणि स्थितः । कुलधर्म्माश्रितो राजन् धर्म्मचर्य्यास्थितोऽभवत् ।
ततः स्वधर्म्मं वेदोक्तं यथाशास्त्रोक्तमेव च । शिष्टाचीर्णञ्च धर्म्मञ्च त्रिविधं चिन्त्य चेतसा । १२०८०
किन्नु मे स्याच्छुभं कृत्वा किं कृतं किं परायणं । इत्येवं खिद्यते नित्यं न च याति विनिश्चयं ।
तस्यैवं खिद्यमानस्य धर्म्मं परममास्थितः । कदाचिदतिथिः प्राप्तो ब्राह्मणः सुसमाहितः ।
स तस्मै सत्क्रियाञ्चक्रे क्रियायुक्तेन हेतुना । विश्रान्तं सुखमासीनमिदं वचनमब्रवीत् ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने पञ्चपञ्चाशदधिकत्रिशतोऽध्यायः ॥ ३५५ ॥

॥ ब्राह्मण उवाच ॥ समुत्पन्नाभिधानोऽस्मि वाङ्माधुर्य्येण तेऽनघ । मित्रत्वमभिपन्नस्त्वां किञ्चिद्वक्ष्यामि तच्छृणु ।
गृहस्थधर्म्मं विप्रेन्द्र कृत्वा पुत्त्र गतस्त्वहं । धर्म्मं परमकं कुर्य्यां को हि मार्गो भवेद्द्विज । १२०८५
अहमात्मानमास्थाय एक एवात्मनि स्थितः । कर्त्तुं काङ्क्षामि नेच्छामि बद्धः साधारणैर्गुणैः ।
यावदेतदतीतं मे वयः पुत्त्र फलाश्रितं । तावदिच्छामि पाथेयमादातुं पारलौकिकं ।
अस्मिन् हि लोकसम्भारे परम्पारमभीप्सतः । उत्पन्ना मे मतिरियं कुतो धर्म्ममयः प्लवः ।
संयुज्यमानानि निशम्य लोके निर्य्यात्यमानानि च सात्त्विकानि । दृष्ट्वा तु धर्म्मध्वजकेतुमालां प्रकीर्य्यमाणामुपरि प्रजानां ।
न मे मनो रज्यति भोगकाले दृष्ट्वा यतीन् प्रार्थयतः परत्र । तेनातिथे बुद्धिबलाश्रयेण धर्म्मेण धर्म्मे विनियुङ्क्ष्व मां त्वं । १२०९०
सोऽतिथिर्व्वचनं तस्य श्रुत्वा धर्म्माभिभाषिणः । प्रोवाच वचनं श्लक्ष्णं प्राज्ञो मधुरया गिरा ।
॥ अतिथिरुवाच ॥ अहमप्यत्र मुह्यामि समाप्येष मनोरथः । न च संनिश्चयं यामि बहुद्वारे त्रिपिष्टपे ।
केचिन्मोक्षं प्रशंसन्ति केचिद्यज्ञफलं द्विजाः । वानप्रस्थाश्रयाः केचित् गार्हस्थ्यं केचिदास्थिताः ।
राजधर्म्माश्रयं केचित् केचिदात्मफलाश्रयं । गुरुधर्म्माश्रयं केचित् केचिद्वाक्संयमाश्रयं ।
मातरं पितरं केचित् शुश्रूषन्तो दिवङ्गताः । अहिंसयापरे स्वर्गं सत्येन च तथा परे । १२०९५
आहवेऽभिमुखाः केचिन्निहतास्त्रिदिवङ्गताः । केचिदुञ्छव्रतैः सिद्धाः स्वर्गमार्गं समाश्रिताः ।
केचिदध्ययने युक्ता वेदव्रतपराः शुभाः । बुद्धिमन्तो गताः स्वर्गं तुष्टात्मानो जितेन्द्रियाः ।
आर्ज्जवेनापरे युक्ता निहता नार्ज्जवैर्ज्जनैः । ऋजवो नाकपृष्ठे वै शुद्धात्मानः प्रतिष्ठिताः ।
एवं बहुविधैर्लोके धर्म्मद्वारैरनावृतैः । ममापि मतिराविग्ना मेघलेखेव वायुना ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने षट्पञ्चाशदधिकत्रिशतोऽध्यायः ॥ ३५६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ अतिथिरुवाच ॥ उपदेशन्तु ते विप्र करिष्येऽहं यथाक्रमं। गुरुणा मे यथाख्यातमर्थतस्तन्तु मे शृणु। १२८००
यत्र पूर्व्वाभिसर्गे वै धर्म्मचक्रं प्रवर्त्तितं। नैमिषे गोमतीतीरे तत्र नागाह्वयं पुरं।
समग्रैस्त्रिदशैस्तत्र इष्टमासीद्द्विजर्षभ। यत्रेन्द्रातिक्रमञ्चक्रे मान्धाता राजसत्तमः।
कृताधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान्। पद्मनाभो महानागः पद्म इत्येव विश्रुतः।
स वाचा कर्म्मणा चैव मनसा च द्विजर्षभ। प्रसादयति भूतानि त्रिविधे वर्त्मनि स्थितः।
साम्ना भेदेन दानेन दण्डेनेति चतुर्व्विधं। विषमस्थं समस्थञ्च चक्षुर्ध्यानेन रक्षति। १२८०५
तमतिक्रम्य विधिना प्रष्टुमर्हसि काङ्क्षितं। स ते परमकं धर्म्मं न मिथ्या दर्शयिष्यति।
स हि सर्व्वातिथिर्नागो बुद्धिशास्त्रविशारदः। गुणैरनुपमैर्युक्तः समस्तैराभिकामिकैः।
प्रकृत्या नित्यसलिलो नित्यमध्ययने रतः। तपोदमाभ्यां संयुक्तो वृत्तेनानवरेण च।
यज्वा दानपतिः क्षान्तो वृत्ते च परमे स्थितः। सत्यवागनसूयुश्च शीलवान्नियतेन्द्रियः।
शेषान्नभोक्ता वचनानुकूलो हितार्ज्जवोत्कृष्टकृताकृतज्ञः। अवैरकृद्भूतहिते नियुक्तो गङ्गाह्रदाम्भोऽभिजनोपपन्नः। १२८१०
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने सप्तपञ्चाशदधिकत्रिशतोऽध्यायः॥ ३५७॥
॥ ब्राह्मण उवाच ॥ अतिभारोद्यतस्येव भारावतरणं महत्। पराश्वासकरं वाक्यमिदं मे भवतः श्रुतं।
अध्वक्लान्तस्य शयनं स्थानक्लान्तस्य चासनं। तृषितस्य च पानीयं क्षुधार्त्तस्य च भोजनं।
ईप्सितस्य च सम्प्राप्तिरन्नस्य समयेऽतिथेः। एषितस्यात्मनः काले वृद्धस्येव सुतो यथा।
मनसा चिन्तितस्येव प्रीतिस्निग्धस्य दर्शनं। प्रह्लादयति मां वाक्यं भवता यदुदीरितं।
दत्तचक्षुरिवाकाशे पश्यामि विमृशामि च। प्रज्ञानवचनाद्योऽयमुपदेशो हि मे कृतः। १२८१५
वाढमेवं करिष्यामि यथा मे भाषते भवान्। इमां हि रजनीं साधो निवसस्व मया सह।
प्रभाते यास्यति भवान् पर्य्याश्वस्तः सुखोषितः। असौ हि भगवान् सूर्य्यो मन्दरश्मिरवाङ्मुखः।
॥ भीष्म उवाच ॥ ततस्तेन कृतातिथ्यः सोऽतिथिः शत्रुसूदन। उवास किल तां रात्रिं सह तेन द्विजेन वै।
चतुर्थधर्म्मसंयुक्तं तयोः कथयतोस्तदा। व्यतीता सा निशा कृत्स्ना सुखेन दिवसोपमा।
ततः प्रभातसमये सोऽतिथिस्तेन पूजितः। ब्राह्मणेन यथाशक्त्या स्वकार्य्यमभिकाङ्क्षता। १२८२०
ततः स विप्रः कृतकर्म्मनिश्चयः कृताभ्यनुज्ञः स्वजनेन धर्म्मकृत्। यथोपदिष्टं भुजगेन्द्रसंश्रयं जगाम कालेषु कृतैकनिश्चयः।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने अष्टपञ्चाशदधिकत्रिशतोऽध्यायः॥ ३५८॥
॥ भीष्म उवाच ॥ स वनानि विचित्राणि तीर्थानि च सरांसि च। अभिगच्छन् क्रमेण स्म कञ्चिन्मुनिमुपस्थितः।
तं स तेन यथोद्दिष्टं नागं विप्रेण ब्राह्मणः। पर्य्यपृच्छद्यथान्यायं श्रुत्वैव च जगाम सः।
सोऽभिगम्य यथान्यायं नागायतनमर्थवित्। प्रोक्तवानहमस्मीति भोः शब्दालङ्कृतं वचः।
ततस्तस्य वचनं श्रुत्वा रूपिणी धर्म्मवत्सला। दर्शयामास तं विप्रं नागपत्नी पतिव्रता। १२८२५
सा तस्मै विधिवत् पूजां चक्रे धर्म्मपरायणा। स्वागतेनागतं कृत्वा किं करोमीति चाब्रवीत्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

॥ ब्राह्मण उवाच ॥ विश्रान्तोऽभ्यर्च्चितश्चास्मि भवत्या श्लक्ष्णया गिरा । द्रष्टुमिच्छामि भवति देवं नागमनुत्तमं ।
एतद्धि परमं कार्य्यमेतन्मे परमेप्सितं । अनेन चार्थेनास्म्यद्य सम्प्राप्तः पन्नगाश्रमं ।
॥ नागभार्य्योवाच ॥ आर्य्य सूर्य्यरथं वोढुं गतोऽसौ मासचारिकः । सप्ताष्टभिर्द्दिनैर्व्विप्र दर्शयिष्यत्यसंशयं ।
एतद्विदितमार्य्यस्य विवासकरणं मम । भर्त्तुर्भवतु किञ्चान्यत् क्रियतां तद्वदस्व मे । १२८३०
॥ ब्राह्मण उवाच ॥ अनेन निश्चयेनाहं साध्वि संप्राप्तवानिह । प्रतीक्षन्नागमं देवि वत्स्याम्यस्मिन्महावने ।
सम्प्राप्तस्यैव चाव्यग्रमावेद्योऽहमिहागतः । ममाभिगमनं प्राप्तो वाच्यश्च वचनं त्वया ।
अहमप्यत्र वत्स्यामि गोमत्याः पुलिने शुभे । कालं परिमिताहारो यथोक्तं परिपालयन् ।
ततः स विप्रस्तान्नागीं समाधाय पुनः पुनः । तदेव पुलिनं नद्याः प्रययौ ब्राह्मणर्षभः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने ऊनषष्ट्यधिकत्रिशततोऽध्यायः ॥ ३५९ ॥
॥ भीष्म उवाच ॥ अथ तेन नरश्रेष्ठ ब्राह्मणेन तपस्विना । निराहारेण वसता दुःखितास्ते भुजङ्गमाः । १२८३५
सर्व्वे सम्भूय सहिता ह्यस्य नागस्य बान्धवाः । भ्रातरस्तनया भार्य्या ययुस्तं ब्राह्मणम्प्रति ।
तेऽपश्यन् पुलिने तं वै विविक्ते नियतव्रतं । समासीनं निराहारं द्विजं जप्यपरायणं ।
ते सर्व्वे समतिक्रम्य विप्रमभ्यर्च्च्य चासकृत् । ऊचुर्व्वाक्यमसन्दिग्धमातिथेयस्य बान्धवाः ।
षष्ठो हि दिवसस्तेऽद्य प्राप्तस्येह तपोधन । न चाभिभाषसे किञ्चिदाहारं धर्म्मवत्सल ।
अस्मानभिगतश्चासि वयञ्च त्वामुपस्थिताः । कार्य्यञ्चातिथ्यमस्माभिर्व्वयं सर्व्वे कुटुम्बिनः । १२८४०
मूलं फलं वा पर्णं वा पयो वा द्विजसत्तम । आहारहेतोरन्नं वा भोक्तुमर्हसि ब्राह्मण ।
त्यक्ताहारेण भवता वने निवसता त्वया । बालवृद्धमिदं सर्व्वं पीड्यते धर्म्मसङ्करात् ।
न हि नो ब्रह्महा कश्चिज्जातापत्योऽनृतोऽपि वा । पूर्व्वाशी वा कुले ह्यस्मिन्देवतातिथिबन्धुषु ।
॥ ब्राह्मण उवाच ॥ उपदेशेन युष्माकमाहारोऽयं कृतो मया । द्विरूनं दशरात्रं वै नागस्यागमनं प्रति ।
यद्यष्टरात्रेऽतिक्रान्ते नागमिष्यति पन्नगः । तदाहारं करिष्यामि तन्निमित्तमिदं व्रतं । १२८४५
कर्त्तव्यो न च सन्तापो गम्यताञ्च यथागतं । तन्निमित्तमिदं सर्व्वं नैतद्भेत्तुमिहार्हथ ।
ते तेन समनुज्ञाता ब्राह्मणेन भुजङ्गमाः । स्वमेव भवनं जग्मुरकृतार्था नरर्षभ ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने षष्ट्यधिकत्रिशततोऽध्यायः ॥ ३६० ॥
॥ भीष्म उवाच ॥ अथ काले बहुतिथे पूर्णे प्राप्तो भुजङ्गमः । दत्ताभ्यनुज्ञः स्वं वेश्म कृतकर्म्मा विवस्वतः ।
तं भार्य्याप्युपचक्राम पादशौचादिभिर्गुणैः । उपपन्नाञ्च तां साध्वीं पन्नगः पर्य्यपृच्छत ।
अथ त्वमसि कल्याणि देवतातिथिपूजने । पूर्व्वमुक्तेन विधिना युक्तियुक्तेन तत्समं । १२८५०
न खल्वस्य कृतार्थेन स्त्रीबुद्ध्या मार्द्दवीकृता । मद्वियोगेन सुश्रोणि वियुक्ता धर्म्मसेतुना ।
॥ नागभार्य्योवाच ॥ शिष्याणां गुरुशुश्रूषा विप्राणां वेदधारणं । भृत्यानां स्वामिवचनं राज्ञो लोकानुपालनं ।
सर्व्वभूतपरित्राणं क्षत्रधर्म्म इहोच्यते । वैश्यानां यज्ञसंवृत्तिरातिथेयसमन्विता ।
विप्रक्षत्रियवैश्यानां शुश्रूषा शूद्रकर्म्मकृत् । गृहस्थधर्म्मो नागेन्द्र सर्व्वभूतहितैषिता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नियताहारता नित्यं व्रतचर्य्या यथाक्रमं । धर्म्मो हि धर्म्मसम्बन्धादिन्द्रियाणां विशेषतः । १३८५५
अहं कस्य कुतो वापि कः को मेह भवेदिति । प्रयोजनमतिर्नित्यमेवं मोक्षाश्रमे भवेत् ।
पतिव्रतात्वं भार्य्यायाः परमो धर्म्म उच्यते । तवोपदेशान्नागेन्द्र तच्च तत्त्वेन वेद्मि वै ।
साहं धर्म्मं विजानन्ती धर्म्मनित्ये त्वयि स्थिते । सत्पथं कथमुत्सृज्य यास्यामि विपथं पथः ।
देवतानां महाभाग धर्म्मचर्य्या न हीयते । अतिथीनाञ्च सत्कारे नित्ययुक्तास्म्यतन्द्रिता ।
सप्ताष्टदिवसांस्त्वद्य विप्रस्येहागतस्य वै । तच्च कार्य्यं न मे ख्याति दर्शनं तव काङ्क्षति । १३८६०
गोमत्यास्त्वेष पुलिने तद्दर्शनसमुत्सुकः । आसीनो वर्त्तयन् ब्रह्म ब्राह्मणः संशितव्रतः ।
अहं त्वनेन नागेन्द्र सत्यपूर्व्वं समाहिता । प्रस्थाप्यो मत्सकाशं स सम्प्राप्तो भुजगोत्तमः ।
एतच्छ्रुत्वा महाप्राज्ञ तत्र गन्तुं त्वमर्हसि । दातुमर्हसि वा तस्य दर्शनं दर्शनश्रवः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने एकषष्ट्यधिकत्रिशतोऽध्यायः ॥ ३६१ ॥
॥ नाग उवाच ॥ अथ ब्राह्मणरूपेण कं तं समनुपश्यसि । मानुषं केवलं विप्रं देवं वाथ शुचिस्मिते ।
को हि मां मानुषः शक्तो द्रष्टुकामो यशस्विनि । सन्दर्शनरुचिर्वाक्यमाज्ञापूर्व्वं वदिष्यति । १३८६५
सुरासुरगणानाञ्च देवर्षीणाञ्च भाविनि । ननु नागा महावीर्य्याः सौरभेयास्तरस्विनः ।
वन्दनीयाश्च वरदा वयमप्यनुयायिनः । मनुष्याणां विशेषेण नावेक्ष्य इति मे मतिः ।
॥ नागभार्य्योवाच ॥ आर्ज्जवेन विजानामि नासौ देवोऽनिलाशन । एवं तस्मिन् विजानामि भक्तिमानतिरोषणः ।
स हि कार्य्यान्तराकाङ्क्षी जलेप्सुः स्तोकको यथा । वर्षं वर्षप्रियः पक्षी दर्शनन्तव काङ्क्षति ।
हित्वा त्वद्दर्शनं किञ्चिद्विघ्नं न प्रतिपालयेत् । तुल्योऽप्यभिजने जातो न कश्चित् पर्य्युपासते । १३८७०
तद्रोषं सहजं त्यक्त्वा त्वमेनं द्रष्टुमर्हसि । आशाच्छेदेन तस्याद्य नात्मानं दग्धुमर्हसि ।
आशया ह्यभिपन्नानामकृत्वाश्रुप्रमार्ज्जनं । राजा वा राजपुत्रो वा भ्रूणहत्यैव युज्यते ।
मौने ज्ञानफलावाप्तिर्द्दानेन च यशो महत् । वाग्मित्वं सत्यवाक्येन परत्र च महीयते ।
भूप्रदानेन च गतिं लभत्याश्रमसम्मितां । न्याय्यस्यार्थस्य सम्प्राप्तिं कृत्वा फलमुपाश्नुते ।
अभिप्रेतामसंक्लिष्टां कृत्वा चात्महितां क्रियां । न याति निरयं कश्चिदिति धर्म्मविदो विदुः । १३८७५
॥ नाग उवाच ॥ अभिमानैर्न मानो मे जातिदोषेण वै महान् । रोषः सङ्कल्पजः साध्वि दग्धो वागग्निना त्वया ।
न च रोषादहं साध्वि पश्येयमधिकं तमः । तस्य वक्तव्यतां यान्ति विशेषेण भुजङ्गमाः ।
रोषस्य हि वशं गत्वा दशग्रीवः प्रतापवान् । तथा शक्रप्रतिस्पर्द्धी हतो रामेण संयुगे ।
अन्तःपुरगतं वत्सं श्रुत्वा रामेण निर्हृतं । धर्षणारोषसंविग्नाः कार्त्तवीर्य्यसुता हताः ।
जामदग्न्येन रामेण सहस्रनयनोपमः । संयुगे निहतो रोषात् कार्त्तवीर्य्यो महाबलः । १३८८०
तदेष तपसां शत्रुः श्रेयसां विनिपातकः । निगृहीतो मया रोषः श्रुत्वैवं वचनं तव ।
आत्मानञ्च विशेषेण प्रशंसाम्यनपायिनि । यस्य मे त्वं विशालाक्षि भार्य्या गुणसमन्विता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एष तत्रैव गच्छामि यत्र तिष्ठत्यसौ द्विजः। सर्व्वथा चोक्तवान् वाक्यं स कृतार्थः प्रयास्यति।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने द्विषष्ट्यधिकत्रिशततोऽध्यायः ॥३६२ ॥
॥ भीष्म उवाच ॥ स पन्नगपतिस्तत्र प्रययौ ब्राह्मणं प्रति। तमेव मनसा ध्यायन् कार्य्यवत्तां विचारयन्।
तमतिक्रम्य नागेन्द्रो मतिमान् स नरेश्वरः। प्रोवाच मधुरं वाक्यं प्रकृत्या धर्म्मवत्सलः। १३८८५
भो भोः क्षाम्याभिभाषे त्वं न रोषं कर्त्तुमर्हसि। इह त्वमभिसम्प्राप्तः कस्यार्थे किम्प्रयोजनं।
आभिमुख्यादतिक्रम्य स्नेहात् पृच्छामि ते द्विज। विविक्ते गोमतीतीरे कं वा त्वं पर्य्युपाससे।
॥ ब्राह्मण उवाच ॥ धर्म्मारण्यं हि मां विद्धि नागं द्रष्टुमिहागतं। पद्मनाभं द्विजश्रेष्ठं तत्र मे कार्य्यमाहितं।
तस्य चाहमसान्निध्यं श्रुतवानस्मि तं गतं। स्वजनं तम्प्रतीक्षामि पर्ज्जन्यमिव कर्षकः।
तस्य चाक्लेशकरणं स्वस्तिकारसमाहितं। आवर्त्तयामि तद्ब्रह्म योगयुक्तो निरामयः। १३८९०
॥ नागउवाच ॥ अहो कल्याणवृत्तस्त्वं साधुः सज्जनवत्सलः। अवाच्यस्त्वं महाभाग परं स्नेहेन पश्यसि।
अहं स नागो विप्रर्षे यथा मां विन्दते भवान्। आज्ञापय यथा स्वैरं किं करोमि प्रियन्तव।
भवन्तं स्वजनादस्मि संप्राप्तं श्रुतवानहं। अतस्त्वां स्वयमेवाहं द्रष्टुमभ्यागतो द्विज।
सम्प्राप्तश्च भवानद्य कृतार्थः प्रतियास्यति। विस्रब्धो मां द्विजश्रेष्ठ विषये योक्तुमर्हसि।
वयं हि भवता सर्व्वे गुणक्रीता विशेषतः। यस्त्वमात्महितं त्यक्त्वा मामेवेहानुरुध्यसे। १३८९५
॥ ब्राह्मण उवाच ॥ आगतोऽहं महाभाग तव दर्शनलालसः। कञ्चिदर्थमनर्थज्ञः प्रष्टुकामो भुजङ्गम।
अहमात्मानमात्मस्थो मार्गमाणोत्मनो गतिं। वासार्थिनं महाप्राज्ञ चलचित्तमुपास्मि ह।
प्रकाशितस्त्वं स्वगुणैर्यशोगर्भगभस्तिभिः। शशाङ्ककरसंस्पर्शैर्हृद्यैरात्मप्रकाशितैः।
तस्य मे प्रश्नमुत्पन्नं छिन्धि त्वमनिलाशन। पश्चात् कार्य्यं वदिष्यामि श्रोतुमर्हति तद्भवान्।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने त्रिषष्ट्यधिकत्रिशततोऽध्यायः ॥ ३६३ ॥
॥ ब्राह्मण उवाच ॥ विवस्वतो गच्छति पर्य्ययेन वोढुं भवांस्तं रथमेकचक्रं। आश्चर्य्यभूतं यदि तत्र किञ्चिद्दृष्टं त्वया शंसितु
मर्हसि त्वं। १३९००
॥ नाग उवाच ॥ आश्चर्य्याणामनेकानां प्रतिष्ठा भगवान् रविः। यतो भूताः प्रवर्त्तन्ते सर्व्वे त्रैलोक्यसम्मताः।
यस्य रश्मिसहस्रेषु शाखास्विव विहङ्गमाः। वसन्त्याश्रित्य मुनयः संसिद्धा दैवतैः सह।
यतो वायुर्व्विनिःसृत्य सूर्य्यरश्म्याश्रितो महान्। विजृम्भत्यम्बरे तत्र किमाश्चर्य्यमतः परं।
विभज्य तन्तु विप्रर्षे प्रजानां हितकाम्यया। तोयं सृजति वर्षासु किमाश्चर्य्यमतः परं।
यस्य मण्डलमध्यस्थो महात्मा परमत्विषा। दीप्तः समीक्षते लोकान् किमाश्चर्य्यमतः परं। १३९०५
शुक्रो नामासितः पादो यस्य वारिधरोऽम्बरे। तोयं सृजति वर्षासु किमाश्चर्य्यमतः परं।
योऽष्टमासांस्तु शुचिना किरणेनोक्षितं पयः। प्रत्यादत्ते पुनः काले किमाश्चर्य्यमतः परं।
यस्य तेजोविशेषेषु स्वयमात्मा प्रतिष्ठितः। यतो बीजं मही चेयं धार्य्यते सचराचरा।
यत्र देवो महाबाहुः शाश्वतः पुरुषोत्तमः। अनादिनिधनो विप्र किमाश्चर्य्यमतः परं।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आश्चर्य्याणामिवाश्चर्य्यं इदमेकन्तु मे शृणु । विमले यन्मया दृष्टमम्बरे सूर्य्यसंश्रयात् । १३९१०
पुरा मध्याह्नसमये लोकांस्तपति भास्करे । प्रत्यादित्यप्रतीकाशः सर्व्वतः समदृश्यत ।
स लोकांस्तेजसा सर्व्वान् स्वभासा निर्व्विभासयन् । आदित्याभिमुखोऽभ्येति गगणं पाटयन्निव ।
हुताहुतिरिव ज्योतिर्व्याप्य तेजोमरीचिभिः । अनिर्द्देश्येन रूपेण द्वितीय इव भास्करः ।
तस्याभिगमनप्राप्तौ हस्तौ दत्तौ विवस्वता । तेनापि दक्षिणो हस्तो दत्तः प्रत्यर्च्चनार्थिना ।
ततो भित्त्वैव गगणं प्रविष्टो रश्मिमण्डलं । एकीभूतञ्च तत्तेजः क्षणेनादित्यताङ्गतं । १३९१५
तत्र नः संशयो जातस्तयोस्तेजःसमागमे । अनयोः को भवेत् सूर्य्यो रथस्थो योऽयमागतः ।
ते वयं जातसन्देहाः पर्य्यपृच्छामहे रविं । क एष दिवमाक्रम्य गतः सूर्य्य इवापरः ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने चतुःषष्ट्यधिकत्रिशततोऽध्यायः ॥ २६४ ॥
॥ सूर्य्य उवाच ॥ नैष देवोऽनिलसखो नासुरो न च पन्नगः । उञ्छवृत्तिव्रते सिद्धो मुनिरेष दिवङ्गतः ।
एष मूलफलाहारः शीर्णपर्णाशनस्तथा । अब्भक्षो वायुभक्षश्च आसीद्विप्रः समाहितः ।
भवश्चानेन विप्रेण संहिताभिरभिष्टुतः । स्वर्गद्वारे कृतोद्योगो येनासौ त्रिदिवङ्गतः । १३९२०
असङ्गतिरनाकाङ्क्षो नित्यमुञ्छशिलाशनः । सर्व्वभूतहिते युक्त एष विप्रो भुजङ्गमाः ।
न हि देवा न गन्धर्व्वा नासुरा न च पन्नगाः । प्रभवन्तीह भूतानां प्राप्तानामुत्तमां गतिं ।
एतदेवंविधं दृष्टमाश्चर्य्यं तत्र मे द्विज । संसिद्धो मानुषः कामं योऽसौ सिद्धिगतिं गतः ।
सूर्य्येण सहितो ब्रह्मन् पृथिवीं परिवर्त्तते ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने पञ्चषष्ट्यधिकत्रिशततोऽध्यायः ॥ २६५ ॥
॥ ब्राह्मण उवाच ॥ आश्चर्य्यं नात्र सन्देहः सुप्रीतोऽस्मि भुजङ्गम । अन्वर्थोपगतैर्व्वाक्यैः पन्थानञ्चास्मि दर्शितः । १३९२५
स्वस्ति तेऽस्तु गमिष्यामि साधो भुजगसत्तम । स्मरणीयोऽस्मि भवता सम्प्रेषणनियोजनैः ।
॥ नाग उवाच ॥ अनुक्त्वा त्वद्गतं कार्य्यं क्वेदानीं प्रस्थितो भवान् । उच्यतां द्विज यत् कार्य्यं यदर्थं त्वमिहागतः ।
उक्तानुक्ते कृते कार्य्ये मामामन्त्र्य द्विजर्षभ । मया प्रत्यभ्यनुज्ञातस्ततो यास्यसि सुव्रत ।
न हि मां केवलं दृष्ट्वा त्यक्त्वा प्रणयवानिह । गन्तुमर्हसि विप्रर्षे वृक्षमूलगतो यथा ।
त्वयि चाहं द्विजश्रेष्ठ भवान्मयि न संशयः । लोकोऽयं भवतः सर्व्वः का चिन्ता मयि तेऽनघ । १३९३०
॥ ब्राह्मण उवाच ॥ एवमेतन्महाप्राज्ञ विदितात्मन् भुजङ्गम । नातिरिक्तास्त्वया देवाः सर्व्वथैव यथायथं ।
य एव त्वं स एवाहं योऽहं स तु भवानपि । अहं भवांश्च भूतानि सर्व्वे यत्र गताः सदा ।
आसीत्तु मे भोगिपते संशयः पुण्यसञ्चये । सोऽहमुञ्छव्रतं साधो चरिष्याम्यर्थसाधनं ।
एष मे निश्चयः साधो कृतं कारणमुत्तमं । आमन्त्रयामि भद्रन्ते कृतार्थोऽस्मि भुजङ्गम ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने षट्षष्ट्यधिकत्रिशततोऽध्यायः ॥ २६६ ॥
॥ भीष्म उवाच ॥ स चामन्त्र्योरगश्रेष्ठं ब्राह्मणः कृतनिश्चयः । दीक्षाकाङ्क्षी तदा राजंश्च्यवनं भार्गवं श्रितः । १३९३५
स तेन कृतसंस्कारो धर्म्ममेवाभितस्थिवान् । तथैव च कथामेतां राजन् कथितवांस्तदा ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: KS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भार्गवेणापि राजेन्द्र जनकस्य निवेशने । कथैषा कथिता पुण्या नारदाय महात्मने ।
नारदेनापि राजेन्द्र देवेन्द्रस्य निवेशने । कथिता भरतश्रेष्ठ पृष्टेनाक्लिष्टकर्म्मणा ।
देवराजेन च पुरा कथितैषा कथा शुभा । समस्तेभ्यः प्रशस्तेभ्यो विप्रेभ्यो वसुधाधिप ।
यदा च मम रामेण युद्धमासीत् सुदारुणं । वसुभिश्च तदा राजन् कथेयं कथिता मम । १२९१०
पृच्छमानाय तत्त्वेन मया चैवोत्तमा तव । कथेयं कथिता पुण्या धर्म्या धर्म्मभृताम्वर ।
यदयं परमो धर्म्मो यन्मां पृच्छसि भारत । आसीद्वीरो ह्यनाकाङ्क्षी धर्म्मार्थकरणे नृप ।
स च किल कृतनिश्चयो द्विजो भुजगपतिप्रतिदेशितात्मकृत्यः । यमनियमसहो वनान्तरं परिगणितोञ्छशिलाशनः प्रविष्टः ।

इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वण्युञ्छवृत्त्युपाख्याने सप्तषष्ट्यधिकत्रिशततोऽध्यायः ॥ ३६७ ॥

समाप्तञ्चेदं शान्तिपर्व्व ॥

यद्यत्र व्यासोक्ताध्यायश्लोकसंख्यान्यूनातिरिक्तत्वं दृष्टं भवेत्तल्लिपिकरप्रमादेन बोध्यमिति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry